
भवत्प्रहितां विज्ञापनपत्रिकामद्राक्ष्म । अध्यगमाम च भावत्कमाशयम् । श्रीशंकरभगवत्पादप्रवर्तितायां वैदिकधर्मसरण्यौ तत्रत्यानामास्तिकानां दृढतरश्रद्धाभक्तिपूर्वकं प्रवृत्तौ साहायकमारचयितुम् "श्रीशंकरगुरुकुलम्" भवता समारब्धेति नैतन्न विदितमाचार्यपादविनेयानाम् । श्रीमदाचार्यपादानां श्रीमहात्रिपुरसुन्दर्याश्च नित्यपूजोत्सवादिना, तदा तदा पण्डितप्रकाण्डैर्धर्मग्रन्थप्रवचनेन, धार्मिकविषयेषु उपन्यासादिना च श्रीमदाचार्यपादविस्तारिते वैदिकधर्ममार्गे विनेयानां श्रद्धासंवर्धनायैव "श्रीशंकरगुरुकुलपत्रिका" नाम्नीं त्रैमासिकीं पत्रिकामुपक्रम्य तत्र च गुरुवराशयप्रकटनपटिष्ठानां स्वतन्त्राणां लेखानाम्, तथा प्राचीनतमानामुत्तमानां महताम् 'तत्त्वकौस्तुभमयूखावली' प्रभृतीनां ग्रन्थतल्लजानां च प्रकाशनेन वैदिकविद्यायाः सर्वतः प्रचारोऽपि क्रियत इति महदानन्दस्थानम् । तालपत्रमात्रशरण्यानां विरलतमानां प्राचीनग्रन्थानां प्रकाशनं न केवलं निबन्धृणामारविचन्द्रतारं भवतः प्रसृमराय यशसे, किं तु प्राचीनग्रन्थपरिशीलनव्रतानां तत्त्वमधिजिगांसूनामसरभारतीप्रणयिनां महते प्रमोदाय तत्त्वनिर्धारणाय च कल्पत इति निश्चप्रचम् । तद्भावत्कः प्रयत्नः चिरं फलतु । सुरसरस्वतीसिषेविषावशीकृतान्तःकरणाश्च श्रीशंकरगुरुकुलपत्रिकायाः ग्राहकपदस्वीकरणेन इतोऽप्यधिकं प्राचीनग्रन्थप्रकाशने भवतः साह्यमारचयन्तु । भवतश्चायमायासः आस्तिकानामन्तेवसतां श्रीमदाचार्यचरणारविन्दयोः अनुत्तमां भक्तिम्, वैदिकधर्ममार्गे च प्रवृत्तिफलां श्रद्धां संधुक्ष्य भवत इवान्येषामपि महते श्रेयसे कल्पतामित्याशास्महे ।

स्वभानुवत्सरीयाषाढकृष्णत्रयोदश्याम्
गुरुवासरे शृङ्गगिरिक्षेत्रतः

श्रीः



॥ श्रीजम्बुनाथः ॥



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

शरणं न भवति जननी न पिता न सुता न सोदरा नान्ये ।
परमं शरणमिदं स्याच्चरणं मम मूर्ध्नि देशिकन्यस्तम् ॥

आस्ते देशिकचरणं निरवधिरास्ते तदीक्षणे करुणा ।
आस्ते किमपि तदुक्तं किमतःपरमस्ति जन्मसाफल्यम् ॥

॥ श्रीमदाचार्यसेवापद्यावली ॥

श्री सच्चिदानन्दतीर्थस्वामिभिर्विरचिता ॥

कावेरीपरिपूतवारिलहरीपूरोदरोदित्वर-
स्फीताम्भःकणशीतलानिलपरिस्पन्दाधिकानन्दिन ।
श्रीरङ्गाख्यपुरोल्लसद्गुरुकुलागारप्रदीपाङ्कुर
श्रीमच्छंकरदेशिकोत्तम विभो ऋग्वेदमाकर्णय ॥ १ ॥

कल्यातङ्कनिरङ्कुशस्य जगतः कल्याणसंदायक
ब्रह्मेन्द्रादिसमस्तदेवनिकुरुम्बाभ्यर्थनासाधक ।
श्रीमत्कालटिपुण्यभूपरिसरप्राप्तावतारोज्ज्वल
पूर्णातीरनिवास शंकर यजुर्वेदं त्वमाकर्णय ॥ २ ॥

आर्याम्बामुखपङ्कजार्क शिवगुर्वानन्दसंदोहन
स्वाचार्याधिगताखिलश्रुतितते सच्छास्त्रपारंगत ।
ग्राहग्रासमिषात्स्वमातृकृतसंन्यासाभ्यनुज्ञादुग
श्रीमच्छंकर सामवेदमधुना सानन्दमाकर्णय ॥ ३ ॥

श्रीगोविन्दमुखोद्गतश्रुतिशिरोवाक्योपदेशादृत
श्रीविश्वेश्वरदर्शनोत्सुक विभो काशीनिवासप्रिय ।
संसारार्तसनन्दनादिकृतिनां संन्यासदीक्षागुरो
सामोदं त्वमथर्ववेदमधुना स्वामिन् समाकर्णय ॥ ४ ॥

गीतावाक्यततेर्दशोपनिषदां श्रीव्याससूत्रावलेः
प्रस्थानत्रितयस्य निस्तुलमहाभाष्यप्रणेतः प्रभो ।
त्राणस्युपसन्नशिष्यजनतामाष्योपदेशोत्सुक
स्वाधीनीकृतसर्वशास्त्रविततेः शास्त्रं समाकर्णय ॥ ५ ॥

वृद्धब्राह्मणबादरायणकृतप्रश्नोत्तरात्युत्सुक
सूत्रौघस्वरसार्थवर्णनसुसंतुष्यन्मुनिश्लाघित ।
व्यासाज्ञावशतः स्वभाष्यविशदीकारप्रचारोद्यत
शुद्धाद्वैतमतप्रसारणपटो प्रीत्या पुराणं शृणु ॥ ६ ॥

श्रीमद्भट्टकुमारिलान्तसमये सांनिध्यसंदायक
श्रीमन्मण्डनसौधलङ्घनपटो वादैकभिक्षापर ।
मध्यस्थोभयभारतीपरिसरे शास्त्रार्थचर्चाकर
श्रीमन्मण्डनपण्डिताख्यविजयिन् संगीतमाकर्णय ॥ ७ ॥

वादापेक्षिसरस्वतीजयसमारम्भप्रियंभावुक
भूयः कामकलानुसारिविषयप्रश्नोत्तरालोचक
निर्जीवामरुकीयकायकलनात् कामागमाभ्यासक
वाणीनिर्जयलब्धवैभव गुरो वीणारवं त्वं शृणु ॥ ८ ॥

श्रीमन्मण्डनमिश्रवन्दित महावाक्योपदेशिन् गुरो
दत्तान्वर्थसुरेश्वराभिध तदाशङ्कासमुच्छेदक ।
श्रीमत्पद्मपदाभिवन्दित सुरेशाराध्य सच्चोटक-
श्रीहस्तामलकाभिपूज्य सदयं सद्वेणुनादं शृणु ॥ ९ ॥

शुद्धाद्वैतसमर्थक श्रुतिशिरस्तात्पर्यसंदर्शक
श्रीमच्छिष्यचतुष्टयान्वित महादिग्जैत्रयात्रापर ।
विद्यापीठचतुष्टयेऽपि चतुराम्नायव्यवस्थापक
श्रीकैलासग सर्ववाद्यनिनदं तुष्टया समाकर्णय ॥ १० ॥

इति श्रीमदाचार्यचरणनलिनचञ्चरीकायमाणचेतसा श्रीसच्चिदानन्दतीर्थाख्येन भिक्षुणा प्रणीता आचार्यसेवापद्यावली संपूर्णा ॥

॥ श्रीललितापञ्चदशीस्तुतिः ॥

कल्याणगुणसंपूर्णां करुणामृतवर्षिणीम् । कलिकल्मषहन्त्रीं तां कलयेऽहमुमां हृदि ॥ १ ॥
एणाङ्कशकलोत्तंसामेधमानप्रभां शिवाम् । एकचित्तविनिर्ध्यातामेकां सौभ्युत्तमोत्तमाम् ॥
ईश्वरत्वप्रदामीड्यामीशताण्डवसाक्षिणीम् । ईश्वरीं नौमि सर्वेषामीतिबाधाविनाशनीम् ॥
लब्धयौवनशोभाढ्यां लसद्दाडिमपाटलाम् । ललितां तां सदा वन्दे लम्बिमुक्तालताञ्चिताम् ॥
ह्रींविभूषां ह्रींमतीं तां ह्रींकारत्रयसंपुटाम् । ह्रींकारजपसुप्रीतां ह्रीं ह्रीमित्याश्रयाम्यहम् ॥ ५ ॥
हल्लीसलास्यसंतुष्टां हरसौभाग्यदायिनीम् । हसदास्याम्बुजां गौरीं हंसिनीं भावयाम्यहम् ॥
सर्वमङ्गलदात्रीं तां सर्वलोकवशंकरीम् । सर्वापद्विनिहन्त्रीं च सर्वातीतां भजाम्यहम् ॥ ७ ॥
कलावतीं कलालापां कलात्मानं कलानिधिम् । कनत्कनकताटङ्कां करभोरुं भजाम्यहम् ॥ ८ ॥
हयमेधादिसंपूज्यां हस्तिकृत्तिप्रियाङ्गनाम् । हरिद्राकुङ्कुमाद्यिङ्गां हरिणाक्षीं भजाम्यहम् ॥
लयवृद्धिविनिर्मुक्तां लब्धसंपत्समुन्नतिम् । लब्धातिशयसर्वाङ्गीं लकुलेशीं भजाम्यहम् ॥
ह्रींकारवेद्यां ह्रींवाच्यां ह्रींकारतरुशारिकाम् । ह्रींकारपूज्यां ह्रींचिन्त्यां ह्रींरूपामाश्रयाम्यहम् ॥
सर्ववेदान्तसंवेद्यां सर्वभूषणभूषिताम् । सर्वसंपत्प्रदात्रीं तां सर्वेशीं भावयाम्यहम् ॥ १२ ॥
कचनिर्जितकालाब्दां कपालिप्राणनायिकाम् । कामितार्थप्रदां देवीं कल्याणीमाश्रयाम्यहम् ॥
लक्ष्मीवाणीसेविताङ्घ्रिं लाकिन्यम्बास्वरूपिणीम् । लम्बोदरप्रजननीं लयकर्त्रीं भजाम्यहम् ॥
ह्रींकारारण्यहरिणीं ह्रींकारावालवल्लरीम् । ह्रींकारसौख्यसंधात्रीं ह्रींशिखामणिमाश्रये ॥ १५ ॥



॥ श्रीजम्बुनाथाक्षरमालिका ॥

'महोपदेशक' 'कविरत्न' विरुदाङ्कितैः प. पञ्चापगेशशास्त्रिभिः विरचिता ॥

श्रीजम्बुनाथ भवदुःखविनाशदक्षमात्मस्वरूपममलं सुखरूपमाप्तुम् ।
त्वां भूषयामि विमलाक्षरमालया सा ग्राह्या त्वयेति कृपया परमर्थयेऽहम् ॥

अब्जासनादिविबुधव्रजवन्द्यमानं अङ्गार्धभास्वरहिमावनिभृत्तनूजम् ।
अन्तः सदा यमिवरैः परिधार्यमाणं अच्छं तनोम्यखिलदं हृदि जम्बुनाथम् ॥ १ ॥

आशान्तविश्रुतयशःप्रविराजमान आत्माश्रितेष्टफलदानजितामरद्रुः ।
आज्ञागमस्मृतिवचोऽवितसर्वलोक आर्तं स मां झटिति रक्षतु जम्बुनाथः ॥ २ ॥

इन्द्रादिदेवगणसेव्यपदारविन्दे इन्दीवराम्बुरुहवैरिलसत्स्वनेत्रे ।
इष्टादिहेतिनिरपेक्षसुदग्धमारे इष्टागजे वसतु हृन्मम जम्बुनाथे ॥ ३ ॥

ईर्ष्यादिदोषचयदूषितलोकदूर ईशाद्यनन्यसुलभामलनामयुक्त ।
ईक्षावशीकृतजगन्नयशंकर त्वं ईषत्कृपां कुरु विभो मयि जम्बुनाथ ॥ ४ ॥

उद्विग्नलोकपरिरक्षणजागरूक उन्मत्तसूनरचितार्चनजातमोद ।
उत्तुङ्गमञ्जुरजताचलभासमान उन्मत्तमेनमव विश्रुत जम्बुनाथ ॥ ५ ॥

ऊरीकृतस्वपदभक्तिधरेष्टदान ऊर्ध्वं समस्तजगतामपि राजमान ।
ऊधस्ययाचनपरार्पितसत्पयोधे ऊरीकुरु त्वमिह मामपि जम्बुनाथ ॥ ६ ॥

ऋक्साममुख्यनिगमैः परिमृग्यमाणः ऋक्षाधिनाथविलसत्स्वजटाकलापः ।
ऋक्षेश्वरोत्तमपदप्रदपूज्यमानः ऋद्धिं ददातु भगवान्मम जम्बुनाथः ॥ ७ ॥

ऋकारमुख्यालिपिगं गिरिशं विहाय ऋ कृ इति प्रपठतामिह धातुपङ्क्तिम् ।
नृणां फलं भवहरं न भवेद्धि तस्मान्नृन्रक्षितुं धृतमतिं भज जम्बुनाथम् ॥ ८ ॥

कल्पागमान्तवनखेलनबद्धतृष्णं श्लोकैकमात्रनुतितृप्तमचिन्त्यशक्तिम् ।
श्लाघ्यं ममन्तविबुधैरपि निष्कलङ्कं [1]श्लीलं तनोमि महितं हृदि जम्बुनाथम् ॥ ९ ॥

एकः प्रभुस्त्रिजगतामिति सर्ववेदैः एकाग्र्यधीभिरसकृद्विनुतो महेशः ।
एणेक्षणाप्रविलसन्निजवामभागः एनं स्वभक्तममलोऽवतु जम्बुनाथः ॥ १० ॥

ऐरावताधिपमुखामृतभुग्गणानां ऐश्वर्यदाननिरतो विरतश्च भोगात् ।
ऐतिह्यविद्विशदवेदितनैजवृत्त ऐश्वर्यदोऽस्तु भगवान्मम जम्बुनाथः ॥ ११ ॥

ओंकारवेद्यनिजपौरुषराजमान ओकः सरोजनयनादिसुरव्रजानाम् ।
ओतश्चराचरमयेषु जगद्व्रजेषु ओजोनिधिर्लसतु मे हृदि जम्बुनाथः ॥ १२ ॥

औदार्यकृष्टविबुधासुररक्षसादौ औपम्यशून्यनिजशुभ्रतनुप्रभाढ्ये ।
औक्षश्वरेण महता विचरत्यजस्रं औत्सुक्यमावहतु हृन्मम जम्बुनाथे ॥ १३ ॥

अन्तर्मुखैर्मुनिवरैः परिमृग्यमाणं अङ्कोज्झितेन्दुरुचिभङ्गददन्तकान्तिम् ।
अन्तादिशून्यमतुलाद्भुतशक्तियुक्तं अन्तस्तनोमि सततं मम जम्बुनाथम् ॥ १४ ॥

[2]अः पूजयन्यधिगम्य दृशा च चक्रं सर्वांश्च दैत्यनिवहानजयत्क्षणेन ।
कः कञ्जजो यमखिलैर्वेदनैः स्तवीति तं शंभुमाशु भज मानस जम्बुनाथम् ॥ १५ ॥

कल्याणभूमिधरचापलसत्स्वपार्श्वं कान्ताचलेन्द्रतनुजाश्रितवामभागम् ।
कन्दर्पदर्पहरफालविलोचनं तं कण्ठेऽमितं मम दधे हृदि जम्बुनाथम् । १६ ॥

खण्डं सुधामयतनोः शिरसा वहन् सः खेचारिवृन्दपरिपूजितपादपद्मः ।
खद्योतमानविलसन्निजदक्षिणाक्षः खालिं करोतु वशगां मम जम्बुनाथः ॥ १७ ॥

गङ्गाविहारसदनायितनैजमूर्धा गण्डूषसेकजमुदाऽनुगृहीतभक्तः ।
गाण्डीवचापकृतचापहतिप्रतुष्टो गामाशु वर्धयतु मे स च जम्बुनाथः ॥ १८ ॥

घर्मांशुशीतकिरणोज्ज्वलनेत्रयुग्म घण्टारवाकलितपूजनजातमोद ।
[3]घोणिस्वरूपजलरुद्दृगदृश्यपाद घोरं भवं मम विनाशय जम्बुनाथ ॥ १९ ॥

---

1. शोभायुक्त 2. विष्णुः 3 सूकर

ङिचेति गोत्रचरणाङ्गजिति क्रमुश्च ङेयोश्चिणो लुगिति चादिषु नद्यृतश्च ।
ङ्याश्छन्दसीति कथनैः समयाननीत्वा द्राङ्निर्भरं हृदय तं भज जम्बुनाथम् ॥ २० ॥

चारुस्मितं चरणताडितसूरसूनुं चन्द्रार्धचण्डसहितात्मजटाकलापम् ।
चामीकरोज्ज्वलमहासनभासमानं चेतश्चिरन्तनमये व्रज जम्बुनाथम् ॥ २१ ॥

छित्वाऽशुभं शुभकरः शुभकर्मिणां द्राक् छान्दोग्यमुख्यनिगमान्तविबोध्यमानः ।
छायेश्वराय बहुलद्युतिमर्पयन्सः छिन्द्याद्भवं भयकरं मम जम्बुनाथः ॥ २२ ॥

जम्बूपुरेश इति विश्रुतनामशोभी जम्भारिकुम्भिगतिभङ्गकरात्मयानः ।
जम्ब्वादियोगिवरसंततचिन्त्यमानो जम्बूपतिः स भगवान् हृदये चकास्तु ॥ २३ ॥

[1]झाटाटनप्रिय जटाच्छटया विराजन् झंझारवागतपरास्त्रविनाशशूर ।
झर्झावनेसुमणितेः स्वजनस्य दक्ष [2]झं मेऽहसां गिरिश संहर जम्बुनाथ ॥ २४ ॥

ज्ञानं सुनिर्मलतरं वितरन्तमीशं ज्ञेयं परं महश्रभू करुणाझराढ्यम् ।
ज्ञात्यादिबन्धुरहितं श्रुतिसिद्धरूपं ज्ञानाप्तये हृदय भावय जम्बुनाथम् ॥ २५ ॥

टङ्कारशब्दकलनान्निजचापवर्ये टङ्को महीध्रमिव शत्रुगिरिं विभिन्दन् ।
टीका बहूः क्षितिगतो रचयन्कृपाख्यटङ्केन चित्तगतमो हर जम्बुनाथ ॥ २६ ॥

ठकारवेण शुभदेन तपोधनानां [3]ठम्यार्पयन्नभिमतं बहु चित्समायाम् ।
ठाकारवर्तुललसच्छशिबिम्बवक्त्रं ठस्याकृतिं कुरु मयं मम जम्बुनाथ ॥ २७ ॥

डोलोत्सवेषु विदधन्नितरां प्रमोदं [4]डित्थः समस्तजनसंस्तुतसच्चरित्रः ।
डिण्डीरशुभ्ररुचिभूतिविराजमानो डिम्भं स्वकं सपदि रक्षतु जम्बुनाथः ॥ २८ ।

[5]ढाकारवेदनिवहैः परिवेष्ट्यमानं ढुण्ढ्याख्यपूर्वतनुजोल्लसदङ्गदेशम् ।
ढक्कादिवाद्यवरवादकगीतकीर्तिं ढं[6] सर्वदं हृदय चिन्तय जम्बुनाथम् ॥ २९ ॥

णत्वणाङ्कृति प्रथितमञ्जुलनादयुक्तघण्टारवैर्बुधवरैः परिपूजनाय ।
आहूयमानमतिभक्तियुतैः समोदं सेवस्व तं झटिति मानस जम्बुनाथम् ॥ ३० ॥

---

1. वन 2. बृन्दं 3. बृन्दस्य 4. सुन्दरः 5 श्वरूपधर 6. निर्गुणम्

तारेशशेखरमणे गिरिजाधिनाथ तूर्णं निपीतविषपालितसर्वलोक ।
तुङ्गस्ववाहवृषभोज्ज्वलदिव्यमूर्ते तात त्वमेव शंकर जम्बुनाथ ॥ ३१ ॥

[1]धाद्घोरसंसृतिभवात्परिपालयन्तं लंकेश्वरानुजविभीषणकुम्भजाभ्याम् ।
पद्मोद्भवेन च मुदाऽर्चितमिन्दुमौलिं चित्ते करोमि मम जम्बुपतिं सदाऽहम् ॥ ३२ ॥

दत्ताखिलत्रिभुवनस्थितभक्तलोकदानालिप्तामरमहीरुहजातकीर्तिम् ।
दामोदरप्रियतरं श्रितकेकिवाहं देवं भजाशु जडमानस जम्बुनाथम् ॥ ३३ ॥

धावत्सु देवनिवहेषु विषं निरीक्ष्य धैर्येण सर्वमपि तच्च निपीय पान्तम् ।
धीशालिभिः परमसुं निगमान्तलभ्यं ध्यायाम्यहं गजवनाधिपजम्बुनाथम् ॥ ३४ ॥

नालीकभूधृतखगानभिदृष्टमूर्धा नानापथेषु चरतामपि लभ्य एकः ।
नातः परः प्रभुरिति श्रुतिशेखरेड्यो नित्यं विभातु भगवान्हृदि जम्बुनाथः ॥ ३५ ॥

पिष्टाशनार्थकृतमृद्धरणो महेशः पार्थावनार्थधृतमञ्जुकिरातवेषः ।
पापापनोदनपटुस्वचरित्रभूषः पोतं म मां परशिवोऽवतु जम्बुनाथः ॥ ३६ ॥

फालाक्षिवह्निशलभायितसूनबाणः फण्युत्तमाभरणभूषितसर्वदेहः ।
फुल्लत्प्रशस्तकुसुमार्चितपूतपादोऽफल्गुश्रियं म ददतां मम जम्बुनाथः ॥ ३७ ॥

बाधाकरं भवजरोगततेर्निदानं बाह्यान्तरस्थमविशुद्धधियामयोग्यम् ।
बोधस्वरूपमुमया परया लसन्तं बध्नामि मङ्गलतनुं हृदि जम्बुनाथम् ॥ ३८ ॥

भासा स्वकेन सकलं प्रविभासयन्तं भीतं यमान्मुनिसुतं परिपालयन्तम् ।
भास्वत्कृशानुतिलकोज्ज्वलफालदेशं भिक्षुं नमामि शिरसा मम जम्बुनाथम् ॥ ३९ ॥

मातङ्गपूजितलसत्स्वपवित्रमूर्तिं मायाविकाररहितं महितं महेशम् ।
माराख्यदुर्मतिरिपुं ममतातिदूरं मां पातु कृत्तिवसनः स च जम्बुनाथः ॥ ४० ॥

यं योगिनः सकललोकपतिं वदन्ति यद्रूपमागमगणैरपि वेद्यते नो ।
यद्भक्तिलब्धविभवा विलसन्ति देवाः याद्येनमीशमयि मानस जम्बुनाथम् ॥ ४१ ॥

---

1. भयात्

रामेण रावणवधोद्भवदोषशान्त्यै रात्रिंदिवं नियमं प्रभुरर्चितः यः ।
राजद्वराभयमृगादियुतस्वपाणिः रक्षां करोतु भगवान्मम जम्बुनाथः ॥ ४२ ॥

लूनःस्वतन्तुकृतरत्नविमानपथ्य लोकाभिनन्दकृतपूजनतोषितेश ।
लीलास्मितप्रजितपूत्रय हे कृपाब्धे लिङ्गाकृतेऽव भगवन्मृड जम्बुनाथ ॥ ४३ ॥

वामाभिरामममदनाायतवामभागं वाञ्छाधिकार्पणसुतोपितभक्तलोकम् ।
वाङ्मानसोपरिमन्महिमानमं तं वागाश्रये अव मनो हृदि जम्बुनाथम् ॥ ४४ ॥

शैलोद्भवारुणकराब्जयुगेन वलते श्रवणे सुतपयसा निजभृजनाय ।
शुद्धे कृतोदय मुदा महिते च लिङ्गे शंभो भजामि चरणं तव जम्बुनाथ ॥ ४५ ॥

षड्वक्त्रदन्तिवदनाश्रितपार्श्वयुग्मः षण्डेन कौतुकरणेऽधिगतात्मभङ्गः ।
षड्जेन किन्नरगणैः परिगीयमानः षोढाऽरिदर्पमपहन्तु स जम्बुनाथः ॥ ४६ ॥

सच्चित्सुखात्मक सदाऽखिलसत्स्वरूप सोमावतंस सुकृतिव्रजसाधलभ्य ।
संहारकालकृततताण्डव सर्ववेदिन् संसारखेदमिह मे हर जम्बुनाथ ॥ ४७ ॥

हासाभिदग्धपुरवासिसुदुष्टदैत्यो हालास्यनामपुरखेलनजातमोदः ।
हेलाभिसृष्टचराचरविष्टपौघो हालस्तुतोऽस्तु कुशलाय म जम्बुनाथः ॥ ४८ ॥

क्षान्तं गमाश्रितवता गरलेन शंभो शोभाऽधिका भवति ते न विकारलेशः ।
लोकोत्थदुःखविनिवर्तनदीक्षितानां यद्यद्भवत्यतुलमण्डनमेव तत्तत् ॥ ४९ ॥

क्षेमंकरस्त्रिजगतां त्रिगुणैरगम्यः क्षौमोज्ज्वलः क्षपितभक्ततमःसमूहः ।
क्षान्त्यालयः क्षतरिपुः क्षितिभृत्सुतेशः क्षिप्रं तनोतु कुशलं मम जम्बुनाथः ॥ ५० ॥

श्रीमज्जम्बुपते समक्तिविनय त्वय्यर्पितां सादरं सद्वर्णोत्तमवृत्तमास्वरगुणां धार्यां सुखेन प्रभो ।
एनामक्षरमालिकां गिरिजया साक गृहीत्वा मुदा धन्यं मां कुरु भक्तमित्यहमयं नत्या सह प्रार्थये ॥

इत्थं प्रजापतिशरद्वरकुम्भमासे श्रीजम्बुनाथमधिकृत्य कृतामिमां ये ।
पक्षापगेशकविनाऽक्षरमालिकां ते भक्त्या पठन्ति लघितं द्रुतमाप्नुवन्ति ॥

॥ इति श्रीजम्बुनाथाक्षरमालिका समाप्ता ॥

श्रीमदप्पय्यदीक्षितेन्द्रविरचितः

॥ चतुर्मतसारः ॥

पोलकं ब्रह्मश्रीराम[illegible]स्त्रिभिर्विमर्शितः ॥

अन्योन्यवैरिभिरपाहृ मतैर्विभिन्नमार्गैर्विरोधविधुरं श्रुतभेदगन्धम् ।
तात्पर्यभूमिमखिलस्य मतस्य पूर्णं ब्रह्मावबोधसुखमद्वयुपाननोऽस्मि ॥

यः स्फोरयन्स्वपरसाधकबाधकानि तत्तन्मतेष्वभिरुचिं जनयन्विवेश्य ।
नानाविधानधिकृतान्क्रमशो महेशो मुक्तिं निनीषति स पात्वखिलान्तरात्मा ॥

इह खल्वविदितमिदं न कस्यापि, यदा चतुराननात् आ च पिपीलिकातः सर्वोऽपि प्राणभृत् 'मा न भूवमहं कदाऽपि, किं तु भूयासमेव सर्वदा' इति नित्यमेवाशंसमानो दरीदृश्यत इति । सा चेयमात्मनो मरणाभावाशंसा मरणभयादुपजायमाना नानुभूतमरणस्य प्राणिनो भवितुमर्हति । यतो मरणं तस्य दुःखहेतुभावं चानुभूतवत एव तज्जदुःखद्वेषमूलकस्तस्मिन् प्रद्वेषन्निबन्धना च तदभावप्रार्थना घटते । न चास्मिञ्जन्मन्यनेन मरणमनुभूतम् ; वर्तमानस्य शरीरस्य वर्तमानत्वादेव नाशाभावेन प्रत्यक्षतो मरणानुभवाभावात् । नाप्यनुमानतः शब्दतो वाऽस्मिञ्जन्मनि मरणानुभवोपपादनप्रत्याशा शोभते, यतो जातमात्र एव कृमिबालकादिर्मारकवस्तुदर्शनाद्वेपमानस्ततो विभ्यदुपलभ्यते । न चासावस्मिञ्जन्मनि प्रत्यक्षानुमानागमैर्मरणं तदुःखहेतुभावं चानुभूतवानिति शक्यं वक्तुम् । अतः पारिशेष्यात्पूर्वस्मिञ्जन्मनि मरणं तदुःखहेतुभावं च प्रत्यक्षतोऽनुभूय, तदाहितसंस्कारः सन् तद्बलान्मरणं तदुःखहेतुभावं च स्मृत्वा तत एव मरणं प्रद्वेष्टि ; तदभावं चाशंसते सर्वोऽपि प्राणीत्यवाकामेनाप्येष्टव्यम्, गत्यन्तराभावात् । एतेन जन्मान्तरं प्रत्याचक्षाणो नास्तिको गलहस्तितो वेदितव्यः ॥

अयमेव मरणत्रासोऽविद्याऽस्मितारागद्वेषाभिनिवेशाख्येषु पञ्चसु क्लेशेषु चरमोऽभिनिवेशाख्यः क्लेश इति पातञ्जलैर्व्यपदिश्यते । स चायमहितकर्माचरणादिना पामरानिव पण्डितानपि क्षिणोति, अतः क्लेश इत्युच्यते । अथ च 'स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः' इति भगवता पतञ्जलिना सूत्रितः । स्वरसवाही स्वभावेन वासनारूपेण वहनशीलः, न पुनरागन्तुकः । विदुषोऽपि तथारूढः—यथा चायमत्यन्तमूढेषु दृश्यते, तथा विदुषोऽपि रूढः, अशक्यसमुच्छेदः । अभिनिवेशः—उच्छेददृष्ट्यात्मको मरणत्रासः इति भगवद्वेदव्यासभाष्यारूढः सूत्रार्थः ॥

एवमनादिभवपरंपरया नानायोनिषु विचित्रबहुविधकर्मवशाद्घटीयन्त्रवदनिशमावर्तनेन पुनः पुनर्मरणं ततो बहुतम दुःखं चानुभूयानुभूय निर्विण्णानाम्, मरणशब्दश्रवणमात्रेणापि विभ्यतामनिवार्यपुनःपुनरुपजायमानमरणाभिधमहारोगाणाम्, तदात्यन्तिकनिवृत्तिमाभलषताम्, प्रत्यक्षानुमानाभ्यां तदुपायमजानताम्, तदुपायपरिज्ञाने सुदृढामक्तिमतां केषांचित्पुरुषधौरेयाणां पूर्वकृतसुकृतपरिपाकवशाद्भवत्येतादृशी जिज्ञासा—किमस्य बहोः कालादस्माभिरसकृदनुभूयमानस्य मरणाभिधमहारोगस्य आत्यन्तिकी निवृत्तिरस्ति, उत न? यदि नास्ति, तदाऽस्माकं तदर्थः परिश्रमो वृथैव, यतोऽवश्यमनुभोक्तव्य एवास्माभिरयं महारोगः सवृत्त.; सोढव्यं च तन्निबन्धनं दुःखजातं; का गतिः? अशक्यनिवारणत्वात्तस्य। यद्यस्ति, तर्हि आगन्तुकस्य सहेतुकत्वेनियमादवश्यं तदुपायेन केनचिद्भवितव्यम्, स्वभावत्वादस्यात्यन्तानिर्युक्तिकत्वेन हेयत्वात्। स चोपायः कः? यदनुष्ठानेनास्मान्महारोगाद्विमुक्ता निर्वृता भवेम। यत्तस्माभिर्दृष्ट एव काश्चदुपायः स्यात्तदा 'अङ्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्। इष्टस्यार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत्॥' इति लौकिकाभाणकमनुसृत्य, नास्माकमनेकजन्माभ्यासपरपरायाससाध्येऽतिदुष्करे उपाये प्रवृत्तिः स्यात्। न चास्माभिर्दृष्टो भिषग्वरोपदिष्टात्युत्तमरसायनसेवनादिरुपायः आत्यन्तिकमरणाभावायास्मदभिलषितायालभवितुमर्हति; यतो यथाविधि रसायनाद्युपयोगेऽपि केषांचिदनन्तरमेव मरणमुपजायमानं जानीमः। च्यवनादीनामिव केषांचिन्महाभागानां रसायनपानादिना बहुकालमरणाभावसंभवेऽपि पुनरन्ततो गत्वा मरणावश्यंभाव शृणुमः। नाप्यदृष्टो ज्योतिष्टोमादिरुपाय आत्यन्तिकीममृततां घटयितुमीष्टे; यतो ज्योतिष्टोमादिकर्मभिरमरभावं प्राप्तानामपि फलानुभवेन निजकृतसुकृतक्षये पुनरपि विनाशो बहुषु श्रुतिस्मृतिपुराणादिवचनेषु जोषुष्यते। देवानाममरत्वं च आपेक्षिकमेवेत्यपि 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इत्यादिपुराणवचनबलादवगच्छामः। तस्मात्पूर्वोक्तसाधनानामसाधनत्वादात्यन्तिकमरणाख्यमहारोगनिवृत्तिहेतुभूतं किमपि महौषधं नास्माभिरुपलभ्यते। अस्ति चेत्तत्किम्? तादृशमहौषधप्रदाता भिषग्वरेण्यः कः? किं चास्य महारोगस्य मूलभूतं निदानम्? यद्बलाच्चयं रोगः पुनः पुनरुपजायत इति॥

इत्थम्परमदुर्लभान्कतिपयान जिज्ञासूनधिकृत्य प्रवृत्ते मातापितृसहस्रेभ्योऽपि परमाप्ततमा परमहितमेव सर्वेषामपि सर्वदा बोधयन्ती भगवती श्रुतिः—'प्रथमो दैव्यो भिषक्' 'भिषक्तमं त्वा भिषजां शृणोमि' इत्यादिका। अनया च श्रुत्या परमेश्वर एव परमो भिषक, इतर मानुषभिषजोऽश्विन्यादिदैव्यभिषजश्च सर्वेऽप्यस्माकमेतद्रोगनिवर्तने किंचित्यपि शक्तिर्नास्तीति बुद्ध्वा यं रोगं निवर्तयितुमशक्नुवाना उदासते, दूरतश्च पलायितुमारभन्ते, तादृशमरणाख्यमहारोगस्यानायासेन क्षिप्रमेव निवर्तकः। अतो मानुषान्दैव्याश्चेतरान्सर्वानपि नाममात्रेण भिषजो विहाय मरणरोगनिवृत्तिकामैः शंकर एव प्रथमो दैव्यो भिषक् सेव्यः। इतरानिवर्त्यमरणाख्यमहारोगनिवर्तकत्वादेवास्य दैव्यभिषक्षु प्रथमत्वम्। एवं च मरणाख्यमहारोगस्य आत्यन्तिकी निवृत्तिरस्त्यतस्तदनिवर्त्यत्वभ्रान्त्या वृथा तद्रोगानुभवेन मा भूत्क्लेशो भवतामिति तात्पर्यशालिन्या पूर्वोक्तजिज्ञासा निवर्तते। इममेव च श्रुतेरभिप्राय श्रीसदाशिवेन्द्रा अपि 'भवामिषप्रथुविषशमनो मानस भिषगेष

शंकरः सेव्यः । प्रथमो दैव्यो भिषगिति यं किल जननी श्रुतिः स्वयं प्राह ॥' इत्येतेन ह्येन पद्येनाविश्चक्रुः ।

भगवता परमेश्वरेण च महाभिषजा दिव्यवटवृक्षमूले श्रीदक्षिणामूर्तिरूपेणाविर्भूय संसारमहारोगनिवृत्तिकामेभ्यः सनकादिमहायोगिभ्यः संसारमहारोगात्यन्तिकनिवृत्तये अङ्गुष्ठतर्जनीयोगाभिधचिन्मुद्रया जीवब्रह्मैक्यगोचरदिव्यज्ञानाभिधं महौषधं प्रदीयते ; तदेव च तस्य रोगस्य आत्यन्तिकनिवृत्तिहेतुभूतम्, तस्यैव संसाररोगनिदाननिवर्तकत्वात्। न हि रोगस्य निदानपरिवर्जनं विना आत्यन्तिकी निवृत्तिः। निदानापरिज्ञायिभिर्भिषग्भिर्दत्तेन यत्किंचिद्भेषधादिना निदानमनुन्मूल्य रोगे तात्कालिके निर्वर्तितेऽपि पुनः कालान्तरे तदुद्भवदर्शनात्। भवरोगस्य च निदानमज्ञानमेव । तदुक्तमभियुक्तैः श्रीनीलकण्ठदीक्षितेन्द्रैः—'अज्ञानमिह निदानं प्रारूपं जननमेव भवरोगे। परिपाकः संसरणं भैषज्यं नैष्ठिकी शान्तिः ॥' इति । भवरोगस्य जीवब्रह्मैक्याज्ञानमेव निदानं, तत्तत्कर्मानुसारिनानाशरीरपरिग्रहात्मकं जननमेव प्रारूपं रोगप्रागवस्था, ब्रह्माण्डमध्ये पुनःपुनरर्चिरादिगतित्रयेण तत्तद्देशगत्यागतिभिराध्यात्मिकादितापत्रयानुभवरूपं संसरणं रोगपरिपाकावस्था, ज्ञाननिष्ठाप्राप्त्या सर्वोपशम एव रोगनिवर्तकमहौषधमिति श्लोकनात्पर्यार्थः ॥

अज्ञानस्य च ज्ञानेनैव निवृत्तिः, न तु कर्मप्रभृतिभिः, तमसः प्रकाशेनैव निवृत्त्यौचित्यात्। अज्ञानस्यैव बन्धहेतुत्व, ज्ञानस्यैव च मोक्षहेतुत्वमित्येतन्मदीये आचार्यमहिमप्रकाशे समुपपादितम्—

ज्ञानाद्विमुक्तिरिति वेदशरःसु वाचः सर्वेऽत्र दर्शनकृतो न विमवदन्ते ।
भक्त्या विमुक्तिपदमाप्यमिहाहुरेके भक्त्या विमुक्तिपदमत्र न मुख्यवृत्त्या ॥
बन्धस्य मूलमखिलैरपि तीर्थकारैर्नाभक्त्यकर्ममुखमभ्युपगम्यते यत् ।
किं त्वज्ञतैव तत एव हि मोक्षमूलं ज्ञानं न भक्तिरपि कर्म न वा प्रपत्तिः ॥
ज्ञानं यदा श्रुतिशतैरपवर्गहेतुरज्ञानमेव नियतं भवबन्धहेतुः ।
अज्ञानमप्यपलपन्निह साक्षिसिद्धं न ज्ञायते किल गुरो किमु वा न कुर्यात् ॥ इति ॥

तच्च ज्ञानमहौषधं सर्वविद्याधिपतित्वेन सर्वगुरुपरंपराविश्रान्तिभूमित्वेन ज्ञानचन्द्रकलाचूडत्वेन सर्वज्ञनामकत्वेन ब्रह्मविद्याधिदैवतोमार्धविग्रहत्वेन, ज्ञानसाधनतया प्रसिद्धवैराग्यादिचिह्नभरितत्वेन च श्रुतिस्मृतिपुराणेतिहासादिसमुद्घोषणपरमेश्वरानुग्रहैकलभ्यम्, 'स नो देवः शुभया स्मृत्या संयुनक्तु', 'स नो बुद्ध्या शुभया संयुनक्तु' 'ईश्वरात् ज्ञानमन्विच्छेत्' इत्यादिश्रुतिपुराणादिवचनशतप्रामाण्यात् ॥

अतोऽपि संसारमहारोगमोचकज्ञानमहौषधाभिलाषिभिर्महाभिषक्तमो जननमरणादिवर्जितो महेश्वर एव भजनीयो नान्ये ब्रह्मादयः ; यतस्तेऽपि भवरोगपारूप्यात्मकजनिमत्त्वेन श्रुतिपुराणादिषु प्रसिद्धाः । अत एव स्वयमपि भवरोगमनुभवन्तः 'स्वयं तारयितुमक्षमः किमपरानसौ तारयेत्' इति न्यायेन परकीयभवरोगपरिहरणे न शक्नुयुः । अत एव 'अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्' इति श्रुतिः 'अजातभिममेवैकं मत्वा जन्मनि भीरवः । रुद्रस्यास्य प्रपद्यन्ते रक्षार्थं दक्षिणं मुखम् ॥' इति पुराणवचनोपबृंहिता इतरदेवताव्यवच्छेदेन

जननमरणवर्जितपरमेश्वरस्यैव संसारभीरूपाण्यत्वमावेदयति। इममेवाभिप्रायं 'न भिन्ना नौरन्यानल-मुदन्निधेरुद्गमयितुं शिला नैवोन्नेतु प्रभवति शिलामन्तकारिपो। जनित्वा मृत्वा वा जगति परिवर्ती सुरगणः कथं मे संसारभ्रमणभयभाजोऽस्तु शरणम् ॥' इति श्लोकेन श्रीमन्तः सुदर्शनाचार्याः तात्पर्यसंग्रहे प्राकाशयन्। यो यन्मार्द्धमेति स तु तद्भीतिरहितमेवाश्रयेत्; तद्यथा—मार्कण्डेयो मृत्युभीतः सन् मृत्युनिर्हरणार्थं शिवमेवाश्रितवान्, नान्यम्। तथा गर्भजन्मजगमरणसंसार-महाभयाद्भीतः तादृशभयरहितमाश्रितानां तादृशभयध्वंसकं परमेश्वरमेवाश्रयेत् इति च शिवलिङ्ग-भूपालस्तच्छ्लोकभावमभिजगौ ॥

तस्मादीश्वराणामपि परमो महेश्वरः, दैवतानामपि परमं दैवतम्, पतीनामपि परमः पतिः शंभुमृडशंकरशिवादिदिव्यनामधेयावेदितनिजमकलंकसुखकृत्त्वमहिमा, अनन्यविषयथार्थाक्षर-स्वरशब्दवाच्यः, चमकेषु वाजादितुल्यमाशंसितविष्णुप्रजापतिमुखदेयद्रव्यप्रदातृत्वेन महावदान्यः, नमकेषु भूयो भूयो विरचितापरिमितनमस्कृत्यावेदितमर्वोत्तमभावः, सर्वप्राणिविरचितसर्वविध-मानुषदेवताद्युद्दिश्यकनमस्कारवत्त्वानभूमिः, देवतान्तरवैलक्षण्येन मूर्ध्वस्पृक्करपुटाञ्जलिमुद्राभिनेयत्वेन भरतशास्त्रोद्घोषितः, नमःशर्वो, विश्वात्मकतया यज्ञात्मकतया च प्रसिद्धाद्विष्णोरप्यधिकतया विश्वा-धिक इति अध्वरपतिरिति च श्रुतिप्रसिद्धो, भगवान्महेश्वर एव आशुतोषो महाभिषक् संसार-वैद्याख्यसुप्रसिद्धनामधेयः संसाररोगानवृत्तिकामैरुपास्य इति सिद्धम् ॥

स च भिषक्तमः केषांचित्परिणतमलानां सनकादीनां दिव्ययोगिनामत्युत्तमाधिकारिणां दिव्य-ज्ञानमहौषधपानयोग्यतावतो तदर्थप्रार्थ्यावान्तरौषधान्तरानपेक्षं सद्य एव चिन्मुद्रया दिव्यज्ञानमहौ-षधं दत्त्वा तदीयाज्ञानाख्यनिदानोन्मूलनेन तान् जननमरणाख्यमहारोगाविनिर्मुक्तान् स्वस्थानारचय्या-नुगृह्णाति। इतरेषां च सद्य एव तादृशदिव्यौषधपानानर्हतासाकल्यस्य क्रमेण तादृशौषधपानयोग्यता-धायकं नानाविधविचित्रतत्तदधिकारानुरूपनानाविधसाधनानुष्ठानात्मकनानाविधावान्तरौषधपानं विधत्ते। तत्र यथा समानौषधनिवर्त्यसमानरोगवतामेव बहूनां मध्ये अस्य रोगिण ईदृशो रोगः, अयं च ईदृशविपाकः, अन्य चैतच्छरीरानुगुण्येन एवमेवमवान्तरनानौषधपानक्रमेण एतन्महौषध-पानेन निवृत्तिः कर्तव्या। अन्यस्य च रोगिणो रोगस्य अन्यादृशस्य अन्यादृशविपाकस्य तच्छरीरानुगुण्येनान्यादृशावान्तरनानौषधपानक्रमेणैतन्महौषधपानेन निवृत्तिः कर्तव्येति भिषगेव जानाति, न रोगी। स च भिषगुक्तप्रकार श्रद्धालुतयाऽनुष्ठाय तं परित्यज्य स्वबुद्धिपरिकल्पितेन वा रोग्यन्तरार्थं भिषगुक्तेनैव वाऽन्यादृशप्रकारेण तादृशमहौषधं निषेवमाणो न केवलं रोगान्न विमुच्यते, अपि तु दृढतममेव तद्रोगं संपाद्य भूयोऽपि पूर्वाधिकमेव दुःखी संपद्यत इति च अवि-प्रतिपन्नानुभवसिद्धम् ॥

एवमेव परमेश्वरेण महाभिषजाऽस्याधिकारिणो भवरोगमनुभवत एवंसाधनानुष्ठानक्रमेण दिव्यज्ञाननिषेवणेन भवरोगनिवृत्तिः संपादनीया। अन्यस्य चान्यादृशसाधनानुष्ठानक्रमेण दिव्य-ज्ञानमिषेवणान्निवृत्तिः संपादनीयेति सर्वज्ञतया परिज्ञाय तत्तदधिकारियोग्यतानुरूपं तत्तत्साधनं कर्तव्यतया श्रुत्यादिमुखेन विधीयते, परमश्रद्धालुतया तत्तत्साधनानुष्ठानेनैव [illegible] तत्तदधिकारिणो

ORIENTAL RESEARCH INSTITUTE

भवरोगनिवृत्तिः क्रमेण समुपजायते । स्वबुद्धिपरिकल्पितक्रमानुसारेण वाऽन्याधिकार्यर्थं परमेश्वरेणैव विहितसाधनानुष्ठानक्रमेण वा ज्ञानमहौषधपानेन न केवल भवरोगानिवृत्तिः, प्रत्युत भवरोगं पूर्वाधिकमेव सपाद्य ानतरामनर्वाधकदुःखभाजन भवेदिति भवरोगिणां कर्तव्याकर्तव्यविषये भिषक्तमस्य भगवतः परमेश्वरस्यैव वचः प्रमाणम्, न स्वमनीषा, नाप्यन्येषां भवरोगमनुभवतामेव स्वयमपि तरितुमक्षमाणां वचनं प्रमाणम् ॥

स च भगवान् परमकारुणिकः सकलविद्याप्रवर्तकः परमेश्वरो भवरोगपीडितान् प्राक्तनकर्मवैचित्र्यानुसारिनानाविधपरस्परविलक्षणाधिकारसपन्नानविद्याकामकर्मवशगतान् प्राणिनोऽभिवीक्ष्य तान् ससारमहारोगान्मुमोचयिषुस्तत्कर्तव्याकर्तव्यबोधक त्रैवर्णिकाधिकार साङ्गोपाङ्गं ऋगादि वेदरूपम्, सर्ववर्णाधिकारमागमरूप च रोगरोगनिदाननिदानारोग्यतन्निदानाबोधकं भवरोगचिकित्साशास्त्रं प्रणीय विद्यासप्रदायप्रवर्तनकर्तृतदधिकारिकपुरुषद्वारा प्रचारयामास । तत्रापि तन्त्रगन्धासहो वेदवेदाङ्गाधिकारी शुद्धवैदिकः, तन्त्रप्रीतिमान तन्त्रोपसर्जनकवेदाधिकारी तान्त्रिकवैदिकः, तन्त्रप्रीतिमानेव वेदोपसर्जनकतन्त्राधिकारी वैदिकतान्त्रिकः. वेदगन्धासहः केवलतन्त्राधिकारी शुद्धतान्त्रिकः इत्येवमधिकारीचतुष्टयभेदेन तदवान्तरानेकाधिकारिभेदेन च परम्परविलक्षणकर्तव्याकर्तव्यबोधकानि भिन्नभिन्नानि वेदागमोपबृहणरूपाणि पुराणादीनि तन्त्राणि च वेदतात्पर्यनिर्णायकन्यायसूत्राणि च कृष्णद्वैपायनादिरूपेणाविर्भूय विनिर्ममे ॥

एवं परमेश्वरप्रवर्तितवेदागमादिशास्त्रतात्पर्यं यथावत्परिज्ञाय स्वस्वाधिकारानुगुणसाधनानुष्ठानक्रमेण तत्त्वज्ञानरसायनपानप्रविलीनभवरोगा बहवः स्वास्थ्यं तदा तदा आसादितवन्तः । बहोः कालादनन्तरं च भगवान्परमेश्वरः श्रुतिस्मृतिपुराणब्रह्मसूत्रादीनामप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिभिः कलुषीक्रियमाणं यथावत्तात्पर्यं 'चतुर्भिः सह शिष्यैस्तु शंकरोऽवतरिष्यति' इत्यादि बहुपुराणवचननिचयप्रतिपादितप्रकारेण भगवत्पादरूपेणाविर्भूय शारीरकमीमांसाभाष्यादिबहुविधलोकोत्तरग्रन्थनिर्माणेन प्रकटीचकार । पुनरपि कलिमलीमसचित्तैः वेदागमपुराणादितात्पर्यानभिज्ञैर्दुराग्रहगृहीतैः कैश्चिच्छास्त्रार्थे पर्याकुलीक्रियमाणे भवरोगे च प्राणिना द्रढिमानमापादिते स भगवान् परमकृपालुः परमेश्वर एव 'दीक्षितोऽपि भवेत्कश्चिन्मदंशो भूसुरोऽम्बिके । भासुराचारनिरतः शैवश्छन्दोगवंशजः ॥' इति शिवरहस्यवचनाद्यनुसारेण श्रीमदप्पय्यदीक्षितेन्द्ररूपेणाविरभवत् । तदुक्तं श्रीनीलकण्ठदीक्षितेन्द्रैः श्रीनीलकण्ठविजये-- 'लीढालीढपुराणसूक्तिशकलावष्टम्भमंभावनापर्यस्तश्रुतिसेतुभिः कतिपयैर्नीते कलौ सान्द्रताम् । श्रीकण्ठोऽवततार यस्य वपुषा कल्क्यात्मनेवाच्युतः श्रीमानप्पयदीक्षितः स जयति श्रीकण्ठविद्यागुरुः ॥' इति ॥ तैरेव शिवतत्त्वरहस्ये च प्रतिपादितम्— विधाय वेदान्विविधाः कलाश्च भावज्ञमप्राप्यविषीदतोऽन्तः । शंभोः प्रियं कर्तुमिवावतीर्णः श्रीमान जयत्यप्पयदीक्षितेन्द्रः ॥ इति ॥

एते च सर्वतन्त्रस्वतन्त्राश्चतुरधिकशतप्रबन्धनिर्मातारो जगद्विख्यातमहिमानः । एतेषां च पाण्डित्यप्रकर्षः 'अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे । यत्कृतिबोधाबोधौ विद्वद्विद्वज्जडकोपाधी ॥' इति तन्त्रसिद्धान्तदीपिकाया श्रीभट्टोजिदीक्षितोक्त्या, 'य विद्या इति यद्ग्रन्थानभ्यस्या-

मोऽखिलानिति । यस्य शिष्याः स्म इति च श्लाघन्ते स्वं विपश्चितः ॥ इति गङ्गावतरणकाव्ये नीलकण्ठदीक्षितोक्त्या,

'दुरन्यस्तविद्यालवेनापि केचिद्दुरन्तामहन्तामयन्तां कृतं तैः ।
प्रशस्ते कवित्वे समस्तेऽपि शास्त्रे भवत्यप्पयज्वावतंसान्कुतो कः ॥'

इति यात्राप्रबन्धचम्पूषा समरपुङ्गवदीक्षितोक्त्या, भाट्टकौस्तुभे 'मीमांसकमूर्धन्यः' इति खण्डदेवोक्त्या, लघुचन्द्रिकायां 'सर्वतन्त्रस्वतन्त्रः' इति गौडब्रह्मानन्दोक्त्या च स्फुटमवगम्यते । एतेषां च शताधिकप्रबन्धनिर्मातृत्वं 'कालेन शंभुः किल तावताऽपि कलाश्चतुःषष्टिमिताः प्रणिन्ये । द्वासप्ततिं प्राप्य समा प्रबन्धान शतं व्यधादप्पयदीक्षितेन्द्रः ॥' इति शिवलीलार्णवे श्रीनीलकण्ठदीक्षितोक्त्याऽवगम्यते । एतैर्विरचितेषु चतुरधिकशतप्रबन्धेष्वन्यतमश्चतुर्मतसारः इति प्रसिद्धो ग्रन्थः । तस्य चोपक्रमस्थाः श्लोका इमे—

'सर्वेषामपि पूजनी सुमनसामव्याहताज्ञाञ्चिता श्लाघ्यश्लोकपरम्पराधिकरणेष्वाम्नादितप्रौढिमा ।
एषा मत्कृतिरेधतामनुकलं ब्रह्मप्रतिष्ठापिनी राज्यश्रीरिव चिन्नबोम्मनृपतेराचन्द्रतारं क्षितौ ॥'

यन्नानाभाष्यशाखोदितफलवितितिः प्रौढनानारसाढ्या
यस्मिन्मूले निरूढं फलमधिकतरं स्वादुनारुह्य लभ्यम् ।
यस्य प्रेक्षैव देहद्वयनदनुगतप्रत्यगर्थौघं विविक्ते
सूत्रात्मा पारिजातः सकलमभिमतं मह्यमर्थं स दद्यात् ॥

आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्रश्रीकण्ठयोगिपदवीरदवीयसीनः ।
आचार्यपादसरणिं च विविच्य बोद्धुं सगृह्यते मतचतुष्टयसारलेशः ॥' इति ॥

चतुर्मतसारश्च परिच्छेदचतुष्टयात्मकः; तत्र प्रथमपरिच्छेदे श्रीमदानन्दतीर्थाचार्यमतानुसारेण ब्रह्मसूत्राणि प्रत्यधिकरणं पूर्वोत्तरपक्षसमग्राहकश्लोकरचनापूर्वक व्याख्यातानि, तस्य च न्यायमुक्तावलीति नाम। यस्यायमाद्य श्लोकः—'आदावानन्दतीर्थीयामनुसृत्य मतस्थितिम्। न्यायमुक्तावली रम्या विशदार्था विरच्यते ॥' इति । द्वितीयपरिच्छेदे तथैव प्रत्यधिकरणं पूर्वोत्तरपक्षसंग्राहकश्लोकरचनापूर्वकं श्रीमद्रामानुजाचार्यमतानुसारेण ब्रह्मसूत्राणि व्याख्यातानि । तस्य च नयमयूखमालिकेति नाम । यस्य चादिमौ श्लोकाविमौ—

हेषारवैर्यः श्रुतब्रह्मनिर्भरैः स्वीयां व्यनक्ति स्वरसोदितां पुरा ।
निश्वासपङ्क्तिं निखिलामपि त्रयीमश्वाननः पातु स वाश्वरं हरिः ॥

श्रेयसा निधिमिव श्रियः पतिं प्रेप्सतां प्रियहिताध्वदर्शिनी ।
लक्ष्मणार्यहृदयानुसारिणी तन्यते नयमयूखमालिका ॥' इति ॥

तृतीयपरिच्छेदे श्रीश्रीकण्ठाचार्यमतानुसारेण पद्यरूपेण प्रत्यधिकरणं पूर्वोत्तरपक्षौ संग्रथितौ । तस्य नयमणिमालेति नाम । श्रीकण्ठभाष्योपरि स्वेन शिवार्कमणिदीपिकाख्यविस्तृतव्याख्यावि-

रचनेन तत एव श्रीकण्ठाचार्यहृदयानुसारिब्रह्मसूत्रार्थस्य स्फुटमवगन्तु शक्यतया केवल श्लोकैरधिकरणार्थसंग्रहमात्रं कृतम् । यस्यायमाद्यः श्लोकः—

'सोपानपङ्क्तिकल्पा सोमाभरणपदमारुरुक्षूणाम् ।
क्रियते नयमणिमाला श्रीकण्ठाचार्यदृष्टमार्गेण ॥' इति ॥

तुरीयपरिच्छेदे श्रीमद्भगवत्पादमतानुसारेण छन्दःशास्त्रस्थमकलवृत्तोदाहरणरूपैर्हृद्यैः पद्यैः प्रत्यधिकरणं पूर्वोत्तरपक्षौ सम्ग्रथिता। अस्यैव च नयमञ्जरीति नाम। अयमेव चास्यां पत्रिकायां समुद्रय प्रकाशितो ग्रन्थः । न्यायरक्षामणिपरिमलादिभिः स्वकृतग्रन्थैः श्रीभगवत्पादमतानुसारिब्रह्मसूत्रार्थस्य स्फुटमवगन्तु शक्यतया केवलं श्लोकैरधिकरणार्थसंग्रहमात्रमत्रापि कृतम्, यस्य चारम्भश्लोका इमे—

नानाभाष्याहृता सा सगुणफलतिवैधर्म्यविद्याविशेषै-
स्तत्तद्देशाप्तरम्या सरिदिव सकला यत्र यात्यंशभावम् ।
तस्मिन्नानन्दसिन्धावतिमहति फले भावविश्रान्तिमुद्रा
शास्त्रस्योद्घाटिता यैः प्रणमत हृदि तान् नित्यमाचार्यपादान् ॥

आचार्यपाददर्शितमाशयमनुसृत्य सूत्रकृतः । अधिकरणमञ्जरीमहमारचयाम्यात्मबोधाय ॥

एकोऽत्र पूर्वपक्षः श्लोकः सैद्धान्तिकस्त्वपरः । एवं प्रत्यधिकरणं भिन्नैर्वृत्तैरिय क्रियते ॥

अप्रसिद्धेषु वृत्तेषु पादभेदप्रतीतये । लिख्यन्ते युग्मपादादिवर्णमूर्धसु बिन्दव' ॥ इति ॥

इत उपरि आदिमजिज्ञासाधिकरणप्रभृति अन्तिमजगद्व्यापाराधिकरणपर्यन्तमेकनवत्युत्तरशताधिकरणेष्वपि प्रत्यधिकरणं भिन्नभिन्नवृत्तश्लोकद्वयानिबन्धनेन द्व्यशीत्युत्तरत्रिशतश्लोका विरचिताः । तावता ग्रन्थः समापितः । अथ च चतुर्मतसारग्रन्थो ग्रन्थकृद्भिरेव शिवार्कमणिदीपिकायां जिज्ञासाधिकरणावसाने 'अत्रायमधिकरणार्थसंग्रहः' इत्युपक्रम्य—

आत्मा ब्रह्मेत्यधीतः स्फुरति स तु सदा निर्विशेषः स चैतस्या-
स्तस्यातीतस्य बुद्धेः सरणिमिह नये का परिच्छेदवार्ता ।
तज्ज्ञानात्सर्वजीवावरणनिरवधिद्रव्यपाशानिवृत्तेः
को वा मुक्तेः प्रसङ्गस्तदविषयफल ग्राह्यमेतन्न शास्त्रम् ॥

ब्रह्म ह्यर्थानुगत्या निरतिशयगुणं तत्कथं जीव एवे-
त्युक्तं श्रुत्या तदन्नं मन इति च कथं चोक्तमित्यादि चिन्त्यम् ।
ध्यातस्यास्य प्रसादात्प्रतिपशुनियतानन्तशक्तेर्मलस्य
क्षीयेतैकैकशक्तिस्तदिह न विषये नैव साध्येऽप्ययुक्तिः ॥

एवमुत्तराधिकरणेष्वपि पूर्वोत्तरपक्षसंग्रहश्लोकाश्चतुर्मतसारेऽस्माभिर्निबद्धा द्रष्टव्याः' इति । तथा परिमलेऽपि' तदभिध्यानाधिकरणावसाने 'अस्माभिस्तु चतुर्मतसारसंग्रहे टीकोक्तं न्यायनिर्णयोक्तं चार्थं संयोज्याधिकरणशरीरं दर्शितम्—

तत्तद्भूताकारापन्नं सादृतरजनकमिति कथं श्रुतिद्वयवैशमा-
द्व्योमादीनां पञ्चम्या हि श्वसनमुखजनिषु विहिता स्फुटं निरपेक्षता ।
तेषां स्वातन्त्र्यं चादुष्ट सत इव बहुभवनदृशः श्रुतावुपवर्णना-
दाकाशादेर्वत्यप्यन्या श्रुतिरिह समधिगमयते सतो निरपेक्षताम् ॥
बाधं नार्हन्त्येते सर्वे द्विविधवचनसमधिगता यतः खलु धर्मिणः
सच्चाकाशाद्याश्चेहासते न हि किमपि विनिगमक तदन्यतरोज्झितौ ।
तस्माद्बाध्या तद्धर्मत्वाद्वियदधिकृतिकथितनयादियं निरपेक्षता
भूतानां तत्स्वातन्त्र्य च स्थितवति यमीयतरि परे न किंचन युज्यते ॥

भुजङ्गविजृम्भितं नामेदं वृत्तम्' इति च प्रस्तावितः ॥

अत्र च चतुर्मतसाराख्यनिबन्धे मतचतुष्टयमपि सोपानपङ्क्तिन्यायेन मुमुक्षूणामुपयोगितया क्रमिकसंनिवेशेन निबद्धम् । तत्र च क्रमसंनिवेशे कारणं किंचिदिव विमृशामः ॥ (क्रमशः)

॥ नयमञ्जर्यनुभवः ॥

मीमांसारत्नम्, एम्. ए., बि. एल्., बिरुदभाजा श्री ए. वि. गोपालाचार्येण विरचितः ॥

[श्रीमदप्पय्यदीक्षितेन्द्रविरचिता चतुर्मतसारान्तर्गता च नयमञ्जरी संचिकायामस्यामाचिरादेव प्राकाश्यमलभत । तस्याश्च गाम्भीर्यमभिप्रदर्शयितुं स्थालीपुलाकन्यायेन तृतीयाध्याये तृतीयपादे आदितोऽधिकरणद्वयस्थश्लोकानां व्याख्या प्रकाश्यतेऽस्माभिर्विद्वल्लोकानुभवाय । त्रिशिरःपुराद्वैतसभायां पण्डितवरैरश्रौषीयं व्याख्या कृपयाऽन्यैर्नन्दि समशोधि च—लेखक.]

॥ सर्ववेदान्तप्रत्ययाधिकरणम् ॥

प्रकरणनामधेयगुणधर्मभिदाप्रमुखयुता विवेचितपुनःश्रुतयः ।
अधिगमयन्ति भेदमितरेतरतः प्रतिनिगमावधि स्फुटमुपास्तिधियाम् ॥ (ब्र. सू. ३-३-१-१)

अथ पूर्वपक्षश्लोकः । नैकवेदान्तेषु पठिताः समानजातीयाः सगुणविद्याः प्रतिवेदान्तं भिन्ना इति पूर्वः पक्षः । तासामेकत्वमौत्सर्गिकमसति बलवद्बाधके इति सिद्धान्तः ॥

प्रकरणेत्यादि । प्रकरणभिदा, नामधेयभिदा, गुणभिदा, धर्मभिदेति विधेयकर्मभेदप्रमापकहेतवः पूर्वतन्त्रप्रदर्शिताः । शब्दान्तराभ्यासंख्यागुणप्रक्रियानामधेयानि विधेयविद्यानानात्वसाधकत्वे हेतव इति सिद्धान्तयिष्यते 'नाना शब्दादिभेदात्' इत्येतस्मिन्पादे । पादान्ते निभन्त्स्यमानं तदधिकरणं सिद्धं कृत्वेदमधिकरणं पादादौ निबद्धम् । 'स्थिते चैतस्मिन्नधिकरणे सर्ववेदान्तप्रत्ययमित्यादि द्रष्टव्यम्' इति शब्दादिभेदाधिकरणभाष्यम् । 'सिद्धं कृत्वा विद्याभेदमध-

स्तनं विचारशतमभिनिर्वर्तितम्' इति तदधिकरणभामती। दहरशाण्डिल्यादिविद्यानां मिथो नानात्वं तत्र निरूप्यते। अत्र भिन्नेषु वेदान्तेषु पठितानां समानजातीयविद्यानामेकत्वं निरूप्यते। तासामेकत्वे एकत्र पठिता गुणा इतरत्रोपसंहर्तुं शक्याः, तथा च गुणपौष्कल्यसिद्धिः। उपास्यगुणा उपासकमनःकर्षकास्तच्चित्तरञ्जकाः। विद्यैक्यनिरूपणस्य बहुगुणोपसंहारः फलमिति 'उपसंहारोऽर्थाभेदाद्विधिशेषत्वात्समाने च' इत्यनन्तराधिकरणसूत्रेण प्रदर्शयिष्यते। गुणोपसंहारेण विद्यास्वरूपस्य यथाशास्त्रं कात्स्न्यसिद्धिः फलम्। अनुपसंहारे वैकल्यं तत्प्रयुक्तं निष्फलत्वं च स्यात्। शब्दादिभेदाधिकरणे, 'आदिशब्देनाभ्यासमंख्यागुणप्रक्रियानामधेयानि गृह्यन्ते' इति श्रीभाष्यम्। 'शब्दान्ताभ्यासंख्यागुणप्रक्रियानामधेयानि कर्मभेदकानि' इति रत्नप्रभा। तत्रेवात्रापि श्लोके प्रकरणनामधेययोः समभिव्याहारः। 'नामरूपधर्मविशेषपुनरुक्तिनिन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनशब्दान्तरसंख्याप्रक्रियातोऽपि कर्मभेदः स्यात्' इत्यानन्दगिरिभिः शाखान्तराधिकरणपूर्वपक्षसूत्रानुरोधेन कर्मभेदहेतवः पूर्वपक्ष्युपन्यस्ताः समगृह्यन्त। तत्र नामप्रकरणयोर्मध्ये पठिता हेतवोऽप्यत्र प्रकरणनामधेययोर्मध्ये उपलक्षणविधया संजिघृक्षिताः॥

'तत्र पूर्वपक्षहेतवस्तावदुपन्यस्यन्ते। नाम्नस्तावद्भेदप्रतिपत्तिहेतुत्वं प्रसिद्धं ज्योतिरादिषु' इति भाष्ये नामभेदो यद्यपि प्रथमं भाषितः। ज्योतिरादिष्वति दृष्टान्तत्वेन भाषितस्य 'अथैष ज्योतिरथैष विश्वज्योतिरेतेन सहस्रदक्षिणेन यजेत' इति वाक्यस्यार्थवर्णने 'तथा चाथशब्दोऽधिकारार्थः प्रकरणान्तरतामावेदयति। एषशब्दश्चाधिक्रियमाणपरामर्शकः' 'भवत्पूर्वस्मिन्गुणविधिर्यदि तदेव प्रकरणं स्यात्। विच्छिन्नं हि तत्' इति भामतीवाक्यैः प्रकरणभेदबलावष्टम्भेन नाम्नो भेदसाधकत्वं द्योतितम्। 'प्रकरणनामधेय ..' इत्यत्र श्लोके प्रकरणभेदस्य प्रथमपठनेन तस्य नाम्नोऽपि प्राबल्यं सूच्यते आचार्यैः। विद्याविषये स्त्रीलिङ्गकभिदाशब्दः सुश्लिष्ट इति रसिकैर्भाव्यम्। धर्मसूत्रे धर्मविषये भेदः स्यादिति भेदशब्दः पठितः। विद्याया भिदायुतत्वं शोभनम्। 'भिदाप्रमुखयुताः'। अत्र प्रमुखपदेन शाखान्तराधिकरणपूर्वपक्षसिद्धान्तसूत्रपठिताः समाप्तिवचनभिदाद्या अन्या भिदाः, भिदानात्मकपुनरुक्त्यशक्त्यादीनि च जिघृक्ष्यन्ते। 'पुनरुक्त्यादयोऽपि भेदहेतव.' इति भाष्यस्य व्याख्याने 'आदिग्रहणान्निन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनानि शब्दान्तरं संख्या प्रक्रियेत्येतानि च संगृह्यन्ते' इत्यानन्दगिर्युक्तमपि भाव्यम्। 'कस्यचिद्वेदान्तस्योङ्कारसार्वात्म्ये समाप्तिः, कस्यचिदन्यत्रेति विद्याभेदः' 'वेद उपास्ते इत्यादिशब्दभेदाद्विद्याभेदः' 'वायुप्राणौ द्वौ संवर्गौ इति द्वित्वसंख्यया संवर्गविद्याभेदः स्यात्' इति रत्नप्रभाप्रदर्शनमिह पूर्वपक्षे भाव्यम्। शब्दादिभेदाधिकरणे सर्वविद्यास्थसर्वगुणोपसंहारस्याशक्यत्वं सिद्धान्तहेतुर्भवति विद्यानानात्वसाधने। 'वेद्यैकत्वनिमित्ते च विद्यैकत्वे सर्वत्र निरङ्कुशे प्रतिज्ञायमाने समस्तगुणोपसंहारोऽशक्यः' इति तत्र भाष्यम्। न हि शास्त्रमशक्यं विदध्यात्। अन्यथात्वाधिकरणे 'न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्' इति सिद्धान्तसूत्रहेतुः प्रकरणभेद इति। तत्र प्रकरणपदस्य प्रक्रमार्थकत्वम्। उपक्रमभेदादित्यर्थ इति तत्र भाषितम्। प्रकरणभेदः इत्यत्र यदुच्यते तत्सूत्रोक्तसिद्धान्तहेतुरत्रोपादित्सित इति प्रतीतिः स्यात्। तन्मा भूदित्यतोऽप्यत्र प्रकरणभेदेति पठितमिव। नाम्नः प्रकरणाद्बहिरङ्गत्वम्। 'सञ्जातश्चेत्तदुक्तम्' इति सूत्रे उद्गीथविद्याऽपसंग्रैकत्वेन विद्यैक्यं पूर्वपक्षयित्वाऽन्तरङ्गेण रूपभेदेन विद्याभेदः साधितः। अतोऽपि

प्रकरणस्य प्रथमपठनम्। 'काठककाण्वादिको नामभेदः। काठकादिकं ज्योतिरादिवन्न कर्मनाम, काठकेन यजेतेत्यश्रवणात्। काठकमधीत इति प्रयोगाद्ग्रन्थनामेत्यवगन्तव्यम्' इति न्यायमालाविस्तरः। 'अस्ति चात्र वेदान्तान्तराविहितेषु विज्ञानेष्वन्यदन्यन्नाम तैत्तिरीयकं वाजसनेयिकं कौथुमकं शाट्यायनिकमित्येवमादि' 'ये तु नामरूपादयो भेदहेत्वाभासास्ते प्रथम एव काण्डे 'न नाम्ना स्यादचोदनाभिधानत्वात्' इत्यारभ्य परिहृताः' इत्येतदधिकरणभाष्यमिह भाव्यम्। यद्यपि शाखासंबन्धिनामभेदो न भेदप्रयोजकः, विधेयकर्मनामधेयैक्यमभेदप्रयोजकसिद्धान्तहेतुरेव। अस्मिन् श्लोके नामधेयशब्देन वेदान्तसंबन्धिनामधेयं विवक्षितम्। आख्याया अविशेष एकत्वहेतुत्वेन सूत्रितः सिद्धान्तिना 'चोदनाद्यविशेषात्' इति। तत्र दहरादिनामधेयं ग्राह्यम्॥

'गुणभिदा'। गुणपदं जैमिनीयपूर्वपक्षसिद्धान्तसूत्रपठितस्य रूपशब्दस्य प्रतिपदम्। द्रव्यदेवते यागस्य रूपम्। 'द्रव्यदेवताख्यरूपभेदात्कर्मभेदः सिद्धान्तितः' इति रत्नप्रभा। 'यथा च द्रव्यदेवते यागस्य रूपमेवं विज्ञेयं रूपं विज्ञानस्य; तेन हि तद्रूप्यते' इति भाष्यम्। पठितब्रह्मगुणा ब्रह्मविद्यारूपम्। अस्मिन्पादे विद्यारूपसमर्पकगुणानामुपसंहारः प्रस्तूयते। 'नाना वा देवता' इति कर्मकाण्डप्रसिद्धदेवतानानात्वं न ब्रह्मविद्याया समस्ति। ब्रह्मैकमेवात्रोपास्यदेवता। ज्ञानरूपायां विद्यायां न द्रव्यभेदसंभवः। 'श्रेयान्द्रव्यमयाद्यज्ञाद्ज्ञानयज्ञः परंतप' इति गीतम्। विद्याया रूपं गुणैः समर्प्यते। 'अन्यत्रोदितानां गुणानामन्यत्रापि समाने विज्ञाने उपसंहारो भवति' 'य एव हि तेषां गुणानामेकत्रार्थो विशिष्टविज्ञानोपकारः स एवान्यत्रापि' 'वसिष्ठत्वादयो गुणा अभियोगविशेषाच्छाखान्तरेऽप्यस्येरन्' इति गुणोपसंहारोऽत्र पादेऽनुस्यूततया प्रस्तुतः। अत एवास्मिन् श्लोके रूपशब्दस्य स्थाने गुणशब्द उपात्तः। 'एकस्यामपि विद्यायामेवंजातीयको गुणभेद उपपद्यते' इत्यादिभाष्यानुरोधोऽपि भवति॥

'धर्मभिदा'। 'तथा धर्मविशेषोऽपि कर्मभेदस्य प्रतिपादक आशङ्कितः कारीर्यादिषु। अस्ति चात्र धर्मविशेषो यथाऽऽथर्वणिकानां शिरोव्रतम्' इति भाष्य स्मार्यते धर्मशब्देन। 'कारीरीवाक्याध्ययने तैत्तिरीयकाणां भूमौ भोजनं धर्मविशेषो नान्येषाम्, न च तान्येव कारीर्यादीनि कर्माणि धर्मविशेषमपेक्षन्ते, नापेक्षन्ते इति च युक्तम्। अतो धर्मविशेषाच्छाखान्तरे कर्मभेदः शङ्कितस्तथाऽत्रापि मुण्डकाध्ययने केषांचिदेव शिरस्यङ्गारपात्रधारणरूपं व्रतम्, नान्येषामिति विद्याभेदः स्यात्' इति रत्नप्रभाप्रदर्शितः पूर्वपक्षः। नात्र श्लोके गुणधर्मपदयोरेकार्थत्वम्। गुणशब्देनोपास्यब्रह्मगुणाः, धर्मशब्देनाध्येतृव्रतधर्मविशेषाश्च विवक्ष्यन्ते॥

'विवक्षितपुनःश्रुतयः'। श्रुतिः श्रवणं निगमो वा। पुनःश्रुतयः पुनःश्रवणानि, पुनरुक्तिघटितश्रुतयो वा। भिन्नासु शाखासु तत्तद्विद्याविषयपुनःपठनान्यभिप्रेयन्ते। एककर्मणः शाखान्तरेषु पुनःपठनस्य तत्तदध्येतॄणां बोधनायावश्यकत्वेन पुनरुक्तिरेवासिद्धा। बोधनीयाध्येतृभेदेन पुनरुक्तेरन्यथासिद्धत्वं सिद्धान्ते प्रतिपाद्यते। एकस्यामेव शाखायामेकत्र 'समिधो यजति, इडो यजति' इत्यादिवाक्ये पञ्चकृत्वो यजतिपदपुनरुक्तिरूपाभ्यासात्कर्मभेदः साधितः। 'अध्येतृभेदात्तान्प्रति सर्वाण्येव वाक्यान्येकमेव कर्म विदधति, न कर्मान्तरम्' इति भिन्नशाखावाक्यानां विषये शास्त्रदीपिका। 'विधेः कर्मार्थतामात्रं पुनःश्रुत्यादिभिर्व्रजेत्' इति तत्रत्यः सिद्धान्तश्लोकः स्मार्यते

पुनःश्रुतय इत्यत्र पदनिवेशनेन । शास्त्रदीपिकाव्याख्यातार आचार्याः । भिन्नासु शाखासु पुनरुक्ति घटितैकरूप्यभूयस्त्वेन प्रत्यभिज्ञाद्वारा विद्यैक्यमवगम्यते । 'भूयसो वेद्यगोचरभेदावगमात्' इति भाष्यम् । पुनःश्रुत्यभावे विद्यैक्यसंभावनाया एवानवकाशः । पुनःश्रुतिमद्वाक्यान्यधिकृत्य विद्यैकत्वनानात्वविचारः प्रवर्तते । इदं सूच्यते 'पुनःश्रुतयः' इति पक्षनिर्देशेन । 'पुनःश्रुतयः' इति पक्षपदं हेतुगर्भम् । साभिप्रायं विशेष्यपदम् । उक्तभिदासहितानि पुनःश्रुतिपठितवाक्यानि विचार्यमाणानां विद्याभेदमवगमयन्ति वा न वेति । विवेचिताः विसृष्टाः । 'एकस्यैवं पुनःश्रुतिरनर्थिका स्यात्' इति पूर्वतन्त्रस्थसूत्रपठितपुनःश्रुतिपदमत्र पठ्यते आचार्यैः । सर्ववेदान्तसूत्र 'सर्ववेदान्तप्रत्ययम्' इति पक्षपदे एकवचनस्य बहुवचनार्थकत्वमभिप्रेयते सूत्रकृता । 'सर्ववेदान्तप्रत्ययानि विज्ञानानि तस्मिंस्तस्मिन् वेदान्ते तानि तान्येव भवितुमर्हन्ति' इति सिद्धान्तभाष्यप्रथमवाक्यम् । सौत्रपक्षपदे जातावेकवचनम् । सूत्रपदस्य बहुवचनार्थत्वद्योतनाय 'पुनःश्रुतयः' इत्यत्र पक्षनिर्देशः कृतः । प्रतिवेदान्तं समानविद्यात्वेन संभावनीयप्रत्यया भिन्ना इति पूर्वपक्षः । प्रतिवेदान्तं प्रत्ययो भिन्नः इति पूर्वपक्षिवाक्यस्य प्रतिवदन क्रियते सूत्रकृता सर्ववेदान्तप्रत्ययमेकमभिन्नमिति ॥

'प्रतिनिगमावधि' । विद्याभेदावगमयितॄणि पुनःश्रुतिघटितवाक्यानि इति श्लोके पूर्वपक्षप्रतिज्ञा । 'सर्ववेदान्तप्रमाणानि विज्ञानानि' इति भामती । वेदान्तप्रमाणाने च भिन्नभिन्नवेदान्तदृष्टपुनःश्रुतिवाक्यानि । ज्योतिरधिकरणभाष्ये, 'अतः परं ब्रह्मैव ज्योतिःशब्दम्' इति निगमनं कृतम् । प्रतर्दनाधिकरणे 'तस्माद्ब्रह्मवाक्यमेतत्' इति भाषितम् । तद्वदत्र पुनःश्रुतय इति शब्दपरत्वेन पक्षनिर्देशः कृतः । ज्योतिःपदं ब्रह्मवाचकमिति वा ज्योतिःपदवाच्यं ब्रह्मेति वा निर्देशस्य फलैक्यमेव । 'अधिगमयन्ति' । प्रत्याययन्ति अध्येतॄन् । अनेन सौत्रप्रत्ययपदार्थः सूच्यते । 'वेदान्तेषु प्रतीयन्त इति वेदान्तप्रत्ययानि' इत्यानन्दगिरयः । 'इतरेतरतो भेदम्' । सगुणविद्याविचारे इतरेतरतो भेदो निरस्यते सिद्धान्तिना, न भेदसामान्यनिषेधः । 'प्रतिनिगमावधि' । तत्तद्वेदान्तेषु तत्तद्विद्या समाप्तेति पूर्वपक्षिहृदयम् । न शाखान्तरं धावदेकशाखावाक्यमिति तद्भावः । 'स्फुटमधिगमयन्ति' । स्वशाखापठितविद्यावाक्यमेव प्रत्यक्षं तत्तच्छाखाध्येतुः । शाखान्तरोक्ता गुणास्तत्तच्छाखाध्येतृभ्यो ग्रहीतव्याः, न स्वप्रत्यक्षाः । न तादृशग्रहणस्यार्थीतस्वशाखावत्स्फुटावगमयितृत्वम् । अध्युपसर्गेणाप्यध्ययनं सूच्यते । अधीतात्स्वशाखानिगमतो विद्यास्फुटप्रतीतिर्भवति । 'प्रतिनिगमावधि प्रतिवेदान्तं भिद्यते विद्येति पूर्वपक्षी । 'प्रतिनिगमावधि पुनःश्रुतिवाक्यानि' इति पूर्वपक्षे पक्षनिर्देशः । 'उपास्तिधियाम्' । प्रतिनिगमावधि पठितानि तत्तद्विद्यावाक्यानि पुनःश्रुतिघटितानि उपास्तिधियां भेदावगमकानि । तत्तद्वेदान्तावधिका तत्तद्विद्या तत्र तत्र समाप्ता । नैराकाङ्क्ष्यमेव तस्या इतरवेदान्तादुपान्तरोपसंहारे । 'उपास्तिधियाम्' । उपासनवाक्येष्वेव गुणोपसंहारविचारः । निर्गुणधीविषये भेदशङ्काया अनवकाशः । विहितेषूपासनेषु भेदाभेदविचारो, नाविहिते निर्गुणब्रह्मज्ञानेऽपुरुषतन्त्रे । चोदितेषूपासनेष्वयं विचार इति प्रदर्शयितु 'संयोगरूपचोदनाशब्दविशेषात्' इति धर्मसूत्रपदेषु चोदनाशब्दः प्राधान्येनेतरोपलक्षकतयोपादीयते सूत्रे । सर्ववेदान्तप्रत्ययम्' इति पक्षपदे सर्वशब्दस्य संकोचः क्रियते हेतुखण्डे चोदनायाः प्रथमोपादानेन । चोदनावाक्यमात्रपरत्वेन सर्वपदस्य संकोचः सूच्यते हेतुपदस्थचोदनाशब्देन । यत्र प्रवर्तनालक्षणचोदना नास्ति, यथा निर्गुणवाक्येषु, तद्वेदान्तानां न पक्षान्तःप्रविष्टत्वम् । उपास्तिधियामिति श्लोकस्थपदेनेदं द्योत्यते । चोदितोपास्तिधियामिति तदर्थः ॥

(क्रमशः)

प्रपञ्चं हरतीति हरः, संक्षुद्य सम्यक् मर्दयित्वा एनं चतुर्दशभुवनात्मकतया अवस्थितं पादरजः-कणं भजति सवते, उपदिहतीत्यर्थः । भासितोद्धूलनविधिं भासितेन यदुद्धूलनं उपदेहनं अङ्गराग-करणं, तस्य विधिः अनुष्ठानं, त तथोक्तम् ॥

अत्रेत्थं पदयोजना—हे भगवति, विरिञ्चिः तव चरणपङ्केरुहभवं तनीयांसं पांसुं संचिन्वन् लोकान् अविकलं विरचयात । हे भगवति, शौरिरेनं शिरसां सहस्रेण कथमपि वहति । हे भगवति, एनं संक्षुद्य हरः भसितोद्धूलनविधिं भजति ॥

अयं भावः—ब्रह्मविष्णुमहेश्वराणां प्रपञ्चविषयसृष्टिस्थितिलयकर्तृत्वं भगवत्याः पादाब्ज-रेणुमहिमायत्तमिति ॥ २ ॥

॥ सौभाग्यवर्धनी ॥

'प्रणन्तुं स्तोतु वा कथमकृतपुण्यः प्रभवति' इत्युक्तम् । त्वया मां स्तोतु, मत्स्वरूप मत्प्रभावं ज्ञात्वा स्तुतिः करणीया । कि मत्स्वरूप ज्ञातम्, को वा मत्प्रभावो ज्ञातः ? इत्यत्रोत्तरमाह—**तनीयांसमिति** । तनीयांसं सूक्ष्मं तव चरणपङ्केरुहभवं पांसु रजःकणं विरिञ्चि. संचिन्वन्नेकीकुर्वन्विरचयति सृजति ; लोकान् चतुर्दशभुवनानि । तव चरणप्रणामतः शिरसि लग्नैः पांसुभिः संचितैः सर्वान् लोकान् सृजति । अविकलं यथा भवति तथा निर्व्याजेनेत्यर्थः । एन पांसुं शौरिः विष्णुः शेषरूपः शिरसां सहस्रेण वहति । पञ्चाशत्कोटिविस्तीर्णं भूमिरूपं तव चरणपङ्केरुहभवं मकरन्दकणं कथमपि वहतीत्यर्थः । हरः, हरतीति हरः सहर्ता संक्षुद्य चूर्णीकृत्य भसितोद्धूलनविधिं भस्मस्नानविधिना भस्मोद्धूलनविधिं करोति । पृथिव्यादिपञ्चभूतानि भस्मसात्करोतीत्यर्थः । तथा च भस्मस्नानमन्त्रः—'अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, सर्वं ह वा इदं भस्म, मन एतानि चक्षूंषि भस्मानि' इति । एतावता पृथिव्यादिपञ्चभूतानि तव चरणपङ्केरुहभवमकरन्दकणाः, एतादृश्यास्तव स्वरूपं प्रभावं वेत्तुं शिव एव समर्थः । को वा अस्मदादिर्विराक इति भावः । तदुक्तं भगवता दत्तात्रेयेण योगिना—'यत्पादपद्ममकरन्दकणा धारित्री यन्मध्यवर्तिविवरं गगनं समग्रम् । यद्वात्रसङ्गिकिरणत्रसरेणुरर्कस्तस्यास्तवाम्ब वपुषो मितिरीशवेद्या ॥' इति । चरणान्येव पङ्केरुहाणि । चरणाश्चत्वारः शुक्लरक्तमिश्रनिर्वाणा इति । तत्र सत्त्वप्रधानः शुक्लः, रजःप्रधानो रक्तः, तमः-प्रधानो मिश्रः, गुणातीतो निर्वाणः । तेषां ध्यानस्थानानि—शुक्लरक्तयोराज्ञाचक्रं द्विदलम्, मिश्रस्य हृत्कमलम्, निर्वाणस्य सहस्रदल द्वादशान्तस्थम् । शुक्लरक्तयोः ब्रह्मविष्णू ध्येयौ, मिश्रे रुद्रः, निर्वाणे साक्षात्परमानन्दनिर्भरः सदाशिवरूपः सहस्रदलकमलकर्णिकारूपः चन्द्रमण्डलगलत्सुधाभिराप्लाव्यमान-श्चिन्तनीयः । तथा च श्रुतिः—'चरणं पवित्र विततं पुराणम । येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः । अति पाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिमत्पावितम् । ओजस्वद्राजमानं महस्वत् । चरण नो लोके सुधितां ददातु ।' इति । तथा च तव रक्तचरणपङ्केरुहभवं पांसुं रजोगुणं संचिन्वन् विरिञ्चिः लोकान् सृजति । विष्णुः शुक्लचरणपङ्केरुहभवं पांसु सत्त्वगुणं संचिन्वन्नेनं विधिसृष्टं प्रपञ्चं शिरसां सहस्रेण वहति । प्रपञ्चभारं वहति धत्ते इत्यर्थः । हरः मिश्र-

चरणपङ्केरुहभवं रामुं तपोगुणं संचिन्वन् त्रयीसृष्टप्रपञ्चं चूर्णीकृत्य भस्मितोद्धूलनविधिं भजति । तदुक्तं दत्तात्रेयेण महायोगिना—'भ्रूमध्यगौ विधिहरौ तव रक्तशुक्लौ पादौ रजोऽमलगुणौ खलु सेवमानौ । सृष्टिस्थिती वितनुतो हृदये तृतीयमङ्घ्रिं भजन्हरति विश्वमुदग्रमुग्रः ॥ तुर्यं तवाम्ब चरणं निरुपाधिबोधं सान्द्रामृतं शिवपदे सततं नमामि ॥' इति । सांप्रदायिको रहस्यार्थो गुरुगम्यः । इति द्वितीयपद्यार्थः ॥ २ ॥

॥ अरुणामोदिनी ॥

एवं स्तवनहेतुभूतं भगवतीप्रसादं संप्रार्थ्य श्लोकोक्तानां हरिहरादीनां समाराधितभगवतीप्रसादासादितं सामर्थ्यं प्रकटयति—तनीयांसमिति । अत्र सर्वत्र संबोधनप्रधानस्य युष्मच्छब्दस्यावस्थानान्न संबुद्धिप्रयोगाभावदोषः । हे भगवति, विरचयति प्रपञ्चमिति विरिञ्चिर्ब्रह्मा । 'रच प्रतियत्ने' इति धातोः स्वार्थण्यन्तादच इत्यचः । पृषोदरादित्वादुकारस्येत्वं नुमागमश्च । 'विरिञ्चो द्रुहिणः शिक्षो विरिञ्चिर्द्रुहिणो मतः' इति शब्दार्णवे । तव सकलजगत्कारणभूतायाभवत्याः, चरणौ पङ्केरुहे इवेत्युपमितसमासः । अन्यथा पङ्केरुहयोः प्राधान्येन तद्रजसो वक्ष्यमाणसामर्थ्यासंभवादिति । यदाहुः—'उपमाया तु पूर्वस्य पदार्थस्य प्रधानता । रूपके तूत्तरपदार्थस्य प्राधान्यमिष्यते ॥' इति । ताभ्यां भवो जन्म यस्य तम्, तत्संभूतामित्यर्थः । कैवल्याश्रमास्तु 'चरणावेव पङ्केरुहाणि' इति विगृह्य चरणाश्चत्वार इत्याहुः । तच्चिन्त्यम्, 'तव हि चरणावेव निपुणौ', 'शिरसि दयया धेहि चरणौ,' 'हसत इव ते चण्डि चरणौ', 'सरोजं त्वत्पादौ' 'उपरि तव पादाम्बुजयुगम्', 'ललादाच्छाणं चरणयुगलं चारुचरितं' इत्यादौ द्विवचनमेव प्रयुञ्जतां शिवापदाम्भोजयुगलार्चकानामागमरहस्यज्ञानामाचार्याणामसंमतत्वादिति । गुणत्रयावस्थितिश्च शबलवर्णे संभवत्येवेत्येतदर्थं न पादबाहुल्यकल्पना युक्ता । अतिशयेन तनुस्तनीयान् । तमतिसूक्ष्मं पांसुं रेणुम्, परमाणुरूपमित्यर्थः । 'द्विवचनविभज्य...' इत्यादिना ईयसुन्प्रत्ययः । जातावेकवचनम् । परमाणूनित्यर्थः । संचिन्वन्राशीकुर्वन्, ईक्षणनैव क्रियावतो वा कुर्वन्नित्यर्थः । सिसृक्षोरीश्वरस्येच्छावशादुत्पन्नक्रियायोः परमाण्वोः संयोगाद्द्व्यणुकमुत्पद्यते, ततस्तत्त्रयसंयोगात्त्र्यणुकमित्यादिक्रमेण पृथिव्यादिसकलप्रपञ्चसृष्टिं वदतोः सर्वज्ञयोः कणादाक्षपादयोर्जगत्कारणत्वेनाभिमताः परमाणवोऽपि भवदीयपदपङ्कजजातिसूक्ष्मपरा एव, न त्वन्ये स्वबुद्धिकल्पिताः, तेषामेतादृशसामर्थ्यासंभवादिति भावः । लोकान्, चतुर्दश भुवनानीत्यर्थः । अविकलमसंकीर्णं यथा तथेति रचनासामर्थ्योक्तिः । यद्वा, अविभिः पर्वतैः कला व्यवस्था यस्मिंस्तत्, मेर्वादिपर्वतैः कृतव्यवस्थमित्यर्थः । 'अवयो मेषशैलार्काः' इत्यमरः । यद्वा, अस्य विष्णोर्विः पक्षी गरुडः, तं कलयति तेजोवैचित्र्येणेति पासुविशेषणम् । अविकलानिति पाठेऽप्ययमेवार्थो लोकविशेषणत्वेनोह्यः । विरचयति विदधाति, सृजतीति यावत् । ब्रह्माऽनेकतपोभिर्भवत्पदपङ्कजं समाराध्य जगत्सर्जनसमर्थांस्तत्संबन्धिनः परमाणुरूपान्पासून्संगृह्य भवत्प्रसादासादितया निजशक्त्या तेषु क्रियां समुत्पाद्य द्व्यणुकादिक्रमेण पृथिव्याद्यनेकप्रपञ्चं संसृज्य विरचयतीति विरिञ्चिरित्यन्वर्थाभिधानं भजतीति भावः । तथा शूरस्य यदोरपत्यं शौरिः । 'शूरः स्याद्यादवे भटे' इति विश्वः ।

तद्वंशजत्वाद्वृष्णित्वेऽपि बाह्वादित्वादिञ्प्रत्ययः । भूभरणार्थं शूरकुलेऽवतीर्णो भगवानादिविष्णुः स्थितिकर्ता । 'देवकीनन्दनः शौरिः' इत्यादयः । एनं ब्रह्मणा चतुर्दशश्लोकात्मतया निर्मितं त्वदीयपदपांसुं शिरसां मूर्ध्नाम्, नपुंसकनयाऽपरवाहनाममर्थानामिति भावः । सहस्रेण, सहस्रसंख्याकैः शिरोभिः, न त्वेकेनेत्यस्यातिदुर्भरत्वं सूचितम् । 'विंशत्याद्याः सदेकत्वे संख्याः संख्येयसंख्ययोः' इत्येकत्वम् । 'मुखैः सहस्रेण' इति प्रयोगश्च । कथमाप्य यत्नगौरवेण वहति धरति, रक्षतीत्यर्थः । अत्र श्रुतिः प्रमाणम् 'सहस्रशीर्षा पुरुषः' इत्यादिः । विष्णुश्च त्वदाराधनावाप्तमहिम्नैव निर्बाधं निखिललोकरक्षणं कुर्वाणः शौरिपदेनान्वर्थनामोच्यत इति भावः । यत्तूक्तं लक्ष्मीधरेण—'शूरस्य यदोरपत्यं शौरिर्बलभद्रः, तेन शेषो लक्ष्यते, शेषावतारत्वाद्बलभद्रस्य । यद्वा शृणाति हिनस्ति दशतीति शौरिः सर्पराजः शेष इति यावत्' इति, तन्न; शौरिपदस्य बलभद्रवाचकत्वाभावात्, प्रथमं सशौरिपदान्यूनचत्वारिंशद्विष्णुनामानि गणयित्वाऽनन्तरं वसुदेवनामद्वयमुक्त्वाऽनन्तरं बलभद्रनामानि पारेगणयतोऽमरस्यास्य बलभद्रवाचकत्वानभिमतेश्च । लक्षणादिदुष्टकल्पनयाऽस्य शेषत्वेनोक्तेः प्रकृतानुपयुक्तत्वात्, सृष्टिस्थित्यादिकर्तृप्रकरणे तस्य प्रवेशाभावाच्च । यच्चोक्तम्—'यद्वा शौरिर्विष्णुः' इति, तदपि प्रथमवक्तव्यं वापक्षमाश्रित्योक्तमित्यज्ञानविलसितमेव । यच्चोक्तम्—'शेषपक्षेऽपि शेष एव विष्णुः, रक्षणे विष्णोरधिकारात्' इति, तदपि ऋजुमार्गेण सिध्यन्तमर्थमपहायामार्गमाश्रित्य पुनस्तमेवाश्रयतो घट्टकुटीप्रभातवृत्तान्तानुसरणं स्यादिति मन्दम् । हरति सर्वमिति हरः कालरुद्रः । पचाद्यच् । एनं चतुर्दशश्लोकात्मकं विष्णुना रक्षितं पांसुं सक्षुद्य सम्यक् चूर्णीकृत्य समर्द्य वेत्यर्थः । भसितेन भस्मना यदुद्धूलनमुपदेहनं तस्य विधिं विधानम्, 'विधिर्विधाने दैवे च' इत्यमरः । निदर्शनालंकारः । भजति सेवते, भसितमिवोपदेहनं करोतीत्यर्थः । हरोऽपि भवत्प्रसादमहिम्नैव हरतीति हर इत्यन्वर्थाभिधानो भवति । इत्युत्तरोत्तरं विरिञ्च्यादीनामेतादृशसामर्थ्यसंपादिभवत्प्रसादासादितैवेति भावः । निदर्शनास्वभावोक्त्योः संसृष्टिः ॥ २ ॥

अविद्यानामन्तस्तिमिरमिहिरद्वीपनगरी[1]
जडानां चैतन्यस्तवकमकरन्दस्रुतिझरी[2] ।
दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा सुररिपुवराहस्य भवति ॥ ३ ॥

॥ लक्ष्मीधरा ॥

तमेव पांसुं प्रस्तौति—अविद्यानामिति । एषः पांसुः अविद्यानां अविद्याविष्टचित्तानां, अज्ञानिनामित्यर्थः, न तु अविद्यमानविद्यानां, अविद्यायाः भावरूपत्वात् । अर्श आदित्वाद-

1. 'ऽमिहिरोद्दीपनकरी' इति सौभाग्यवर्धनीपाठः । २. 'ऽमकरन्दस्रुतिस्रुतिः' इति सौभाग्यवर्धनीपाठः ।

कप्रत्ययः, अविद्यावन्तः अविद्या इति । यद्वा, अविद्याविष्टचित्ता अपि उपचारेण अविद्या इति । तेषां अन्तस्तिमिरमिहिरद्वीपनगरी, अन्तस्तिमिरं अन्तःस्थितज्ञानम् । अज्ञानस्य तिमिरत्वारोपणं आवरकत्वसाम्यात् ; यथा बाह्यपदार्थानावृणोति तमः, तथा आन्तरपदार्थमात्मानमावृणोति अविद्या । तस्य तिमिरस्य मिहिरद्वीपनगरी, मिहिरस्य सूर्यस्य द्वीपः समुद्रमध्ये उदयप्रदेशः, तत्र नगरी पत्तनं, वासगृहमिति यावत् । जडानां मन्दानां दुर्मेधसां चैतन्यस्तबकमकरन्दस्रुतिझरी, चेतनैव चैतन्यम् । स्वार्थे ष्यञ् । चेतना नाम आत्मगतपदार्थप्रबोधकारिणी चित्तविस्तररूपा काचन शक्तिः, तदेव स्तबकः कल्पवृक्षगुच्छः, तस्य मकरन्दः पुष्परसः, तस्य स्रुतिः स्रवणं निष्यन्दः, तस्य झरी प्रवाहः । दरिद्राणां दीनानां चिन्तामणिगुणनिका चिन्तामणेः रत्नविशेषस्य गुणनिका गुणना आश्रेडनं, समूह इति यावत् । जन्मजलधौ जन्मैव संसार एव जलधिः समुद्रः; संसारे समुद्रत्वारोपणमपारत्वसाम्यात् ; तत्र निमग्नानां नितरां उन्मज्जनराहित्येन मग्नानाम् । दंष्ट्रा स्पष्टम् । मुररिपुवराहस्य, मुरो नाम दैत्यः तस्य रिपुः विष्णुः, अयं मुररिपुशब्दः विशेषणवाच्यपि विशेष्यं विष्णुमेव कथयति, शब्दस्वाभाव्यात् ; न चात्र पङ्कजादिपदवत् शक्तिसंकोचः, द्रव्यवाचकत्वादस्येति ; तस्य वराहः अवतारविशेषः, तस्य तथोक्तस्य भवति वर्तते ॥

अत्रेत्थं पदयोजना—हे भगवति, तव पादाब्जरेणुः एषः अविद्यानां अन्तस्तिमिरमिहिरद्वीपनगरी, जडानां चैतन्यस्तबकमकरन्दस्रुतिझरी, दरिद्राणां चिन्तामणिगुणनिका, जन्मजलधौ निमग्नानां मुररिपुवराहस्य दंष्ट्रा भवति । अत्र परिणामालंकारः, आरोप्यमाणस्य आरोपविषयात्मतया स्थितेः । तथा च मङ्खकसूत्रम्—'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति । अस्यार्थः—आरोप्यमाणस्य प्रकृतोपयोगित्वं आरोपविषयात्मतया स्थितिनिबन्धनमेवेति फलाभिप्रायेणोक्तमिति । यद्वा, उल्लेखालंकारः, नगर्यादिरूपेण पांसोरुल्लेखनात् । रूपकं वा भवतु, प्रकृतोपयोगो न विवक्ष्यत इति ॥ ३ ॥

॥ सौभाग्यवर्धनी ॥

तर्हि मम स्वरूपं न जानासि, नाप्यनुभावम्, अज्ञः त्वं मूर्खः जडः दरिद्रः; अत एव पूजायामसमर्थः, धनवरतसंसारासक्तः जन्ममरणादिक्लेशसमुद्रे मग्नो मां कथं स्तौषीति प्रश्नस्योत्तरमाह—**अविद्यानामिति**। न विद्यते विद्या येषां ते अविद्याः तेषामन्तस्तिमिरमनेकजन्मसंचितं दुर्वासनासमासादितमहं ममेति बुद्धिविजृम्भिततापत्रयसंपादितमज्ञानं तस्य मिहिरद्वीपनगरी सूर्योन्मीलनकरी तन्नाशकविद्योद्बोधिनीति यावत्। क्वचित्पाठः—तिमिरमिहिरद्वीपनगरीति। मिहिराणां द्वीपं द्वादशादित्यानां भूमिस्तत्र नगरी तेषां निजवसतिः; द्वादशादित्या यत्र युगपदुदयं प्राप्नुवन्ति तादृशद्वीपनगरी। यतः सर्वदा परिभ्रमणं कुर्वतः सूर्यस्य गिरिकुहरकोटराद्यन्तर्गततिमिरनाशकत्वं नास्ति ततः तदपेक्षयाऽप्यधिकतरप्रकाशकारिणीत्यर्थः। जडानां कर्तव्याकर्तव्यबुद्धिप्रकाशशून्यानां चैतन्यस्तबकः उत्तरोत्तरलोकोत्तरबुद्धिचमत्कारव्यतिकरः तस्य मकरन्दस्रुतिः हृदयंवद्भजनानन्दसंदोहसंपादकरसविशेषधारा तस्याः सृतिः सरणिः। दरिद्राणां चिन्तामणिगुणनिका

चिन्तामणिमयी माला जन्मजलधौ जन्मेत्युपलक्षणम्, जन्ममरणादिबहुविधक्लेशसंचयवीचिमालिनी-मग्नानाम्, मुरारिपुवराहस्य विष्णुरूपादिवराहस्य दंष्ट्रा तदुद्धारकारी भवति । एतादृश्यास्तव स्तुतौ प्रवृत्तस्य मम अविद्याजडस्य दारिद्र्यं जन्ममरणादिक्लेशसमुद्रोन्मज्जनानि न सन्ति; सर्वथेति भावः । एतावता—'बालार्ककोटिरुचिरां स्फटिकाक्षमालां कोदण्डमिक्षुजनितं स्मरपञ्चबाणान् । विद्यां च हस्त-कमलैर्दधतीं त्रिनेत्रां ध्यायेन्ममस्तजननीं नवचन्द्रचूडाम् ॥' इति कामराजमातृकादेवता सूचिता भवति । आदौ श्रीविद्योपासकानां कामराजमातृकान्यास यावश्यिकत्वात्तस्या ध्यान सूचितम् । अथ वा त्रयाणां वेदानां पुरा त्रिपुरेति वाग्भवबीजस्य त्रिपुरारूपतयोक्तत्वात् तदेव बीजं सूचितम् । तथा हि—ऋग्वेद-सामवेदयोरादिवर्णावकारौ । तथा यजुर्वेदस्यादिवर्ण इकारः । सामवेदादवर्णयजुर्वेदादिवर्णयोः संधौ कृते एकारो भवति । पुनः ऋग्वेदादिवर्णएकारयोः संधौ कृते ऐकारो भवति । तेन अर्धेन्दुना सहितः स वाग्भवो भवति । तदुक्तं कादिमते—'अकारादिः सामवेदो ऋग्वेदस्तु तदादिकः । यजुर्वेद इकारादि-स्तेषां संयोगत शुचिः ॥ तन्निष्पत्ति शृणु प्राज्ञे प्रोक्तमुद्धारतः क्रमात् । विलिख्य योजयेत्पूर्वं शब्दशास्त्रा-नुसारतः ॥ गुणसंध्या ऋग्यजुषोस्ततस्तेनापरं तथा । वृद्धिसंध्या समायुञ्जयादित्युत्पन्नं शुचेर्वपुः ॥ तेन त्रयीमयी विद्या कार्यकारणयोगतः । बिन्दुसर्गात्मनोरैक्यरूपा सा त्वावयोर्वपुः ॥ तेन बीजेन विश्वा-त्मरूपता सम्यगीरिता ॥' इति । प्रथमाकार अविद्यानिवर्तकः, द्वितीयो जडतानिवर्तकः, इकारः कामितफलदः, अर्धेन्दुः कैवल्यदः । तेन वाग्भवरूपता प्रतिपादिता परदेवतायाः । तदुक्तं त्रिपुरार्णवे —'हरत्यज्ञानमज्ञानाज्जडिमानमतः पुनः । इतः कामान्वितनुते कैवल्य कलया विधोः ॥ वाग्भवं प्रथमं बीजं वेदानां पुरतो यतः । त्रिपुरासंज्ञया भद्रे त्वद्रूपा विश्वविग्रहा ॥ वाच्यवाचकरूपेण व्याप्नोत्यमितवैभवम् ॥ इति ॥ ३ ॥

॥ अरुणामोदिनी ॥

नन्वचेतने पदपांसौ कथमेतादृशी शक्तिरित्याशङ्क्य तन्महिमान प्रकटयन्ति—अविद्यानामिति । हे देवि, त्वदीयपदपासुरित्यनुषङ्गः । विद्या देवताज्ञानमात्मज्ञान वा, तस्या अन्याऽविद्या कर्मावैधनिष्पाद्यं ज्योतिष्टोमादिकर्मेत्यर्थः, 'विद्यां चाविद्यां च' इत्यत्र तथा व्याख्यानात् । अथ वा, न विद्याऽविद्या, अज्ञानमित्यर्थः । सैषामस्तीत्यविद्याः कर्मिणोऽज्ञानिनश्च । अथ वा, न विद्यते विद्या देवतोपास्तिर्येषां तेऽविद्याः उपासनारहिता इत्यर्थः । अथ वा, 'अकारो ब्रह्मविष्णवीश . ' इत्यादिकोशादान् ब्रह्मविष्णवीशान्विदन्ति जगत्कारणतेत्यविद्याः, विरिञ्चादीनेव जगत्कर्तृन्मत्वा भ्रान्ता इत्यर्थः । तेषामन्तरन्तःकरणे यत्तिमिरवत्तिमिरमावरकमज्ञानं तस्य मिहिरद्वीपनगरी सूर्योदयप्रदेशस्थितपत्तनविशेषः, तमोनिवारक इति भावः । यद्वा, अविद्यानां विद्याभ्यासरहितानामीषदभ्यस्तविद्यानां चान्तरन्तःकरणं तदेव तिमिरमन्धं तमो मलिनत्वाद्दाति भावः । तस्य मिहिर-द्वीपनगरी सूर्यावि र्भावस्थानपत्तनविशेषः । 'उद्दीपनकरी' इति पाठे मिहिर इवोद्दीपनं करोतीत्यर्थः । अत्रान्तःकरणे तिमिरत्वारोपेणाविद्यावत्त्वे रात्रित्वप्रतीतेरेकदेशविवर्ति परंपरितं रूपकम् । तथा जडानां बुद्धिहीनानाम्, 'जडः स्तब्धे बुद्धिहीने' इति रत्नमाला । चेतनैव चैतन्यम्, चातुर्वर्ण्या-दित्वात्स्वार्थे ष्यञ् । 'प्रतिपज्ज्ञप्तिचेतनाः' इत्यमरः । तदेव स्तबको गुच्छः, 'स्याद्गुच्छकस्तु

स्तबकः' इत्यमरः। तस्य मकरन्दस्रुतिझरी पुष्परसनिष्यन्दप्रवाहविशेषः। मय्यग्र्याता सती संवित्प्रवाहं जनयतीत्यर्थः। अत्रापि चैतन्ये स्तबकत्वरूपणेन जडेषु वृक्षत्वप्रतीतेरेकदेशविवर्ति पूर्वोक्तमेव रूपकम्। तथा दरिद्राणां दुर्गतानाम्, 'दरिद्रौ रङ्कदुर्गतौ' इत्यमरः। चिन्तामणेश्चिन्तितार्थप्रदस्य रत्नविशेषस्य गुणनैव गुणनिका, आम्रेडनम्; इष्टार्थज्ञानेऽपरश्चिन्तामणिरित्यर्थः। 'प्रत्ययस्थात्' इत्यादिना कात्पूर्वस्येकारः। तथा जन्मजलधौ संसारसमुद्रे निमग्नानां निमज्जताम्; अपारसंसाराम्बुधिनिपतितानामित्यर्थः। मुरो नामासुरः, तस्य रिपुर्मुरारिर्विष्णु ; स चासौ वराहश्च मुरारिपुवराहः। निषादस्थपत्यधिकरणन्यायेनात्र कर्मधारय एव साधुः। तस्य दृष्ट्रा दन्तविशेषः, भवति जायते। अपारसंसारसमुद्रनिमग्नानामुद्धर्ता च भवतीत्यर्थः। अविद्यानामविद्याया जगत्कारणत्ववादिनामन्तस्तिमिरसंहरद्वीपलहरी, ईदृशतत्त्वप्रकाशनद्वारा निःसारितान्तरतमःस्तोमा, तथा जडानामचेतनस्य प्रधानस्य जगत्कारणत्ववादिनां कपिलमतानुसारिणां चैतन्यस्तबकमकरन्दस्रुतिझरी तद्विरोधिचैतन्यावभासिका. तथा दरिद्राणामतिकृपणतया परमाणुजगत्कारणत्ववादिनां चिन्तामणिगुणनिका विचारातिशयप्रदात्री, तथा जन्मजलधौ संसारसमुद्रे निमग्नानां शिश्नोदरपरायणानामित्यर्थः। मुरारिपुवराहस्य दृष्ट्रा भवति, महाभारताद्यधर्मोपदेशेनोद्धारकश्च भवतीत्यर्थान्तरमपि प्रतीयते। सर्वथा भवत्पदपांसुरेव सर्वानुग्राहक इति भावः। 'भवती' इति जीवन्तपाठे, एवंविधा त्व सर्वाज्ञाननाशिका, जडानां जाड्यनिवर्तनापूर्वकं विज्ञानातिशयप्रदात्री, दुर्गतानामपरश्चिन्तामणिः, संसारसमुद्रमग्नानामुद्धारिका च त्वमेवेति रूपणमद्गन्तव्यम्। मालापरंपरितरूपकाणां संसृष्टिः। यत्तूक्तं लक्ष्मीधरेण—'अत्र परिणामोऽलंकारः' इति, तन्न, आरोप्यमाणस्यात्रोपरञ्जकत्वेन प्रकृतोपयोगित्वाभावात्, 'प्रसन्नन..' इत्यादिपरिणामालंकारोदाहरणपरिशीलिनामनृजुत्वात्। यत्तु 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति लक्षणं कथितं तदपि समासोक्त्यादावतिव्याप्तत्वाच्चिन्त्यमेव। यत्तु 'अथ वोल्लेखालंकारः' इत्युक्तं, तदप्यज्ञानविलसितमेव, 'स्त्रीभिः कामोऽर्थिभिः स्वर्दुः' इत्यादाविव ग्रहीतृभेद एव तदुत्थानात्। यदपि 'रूपकं वा भवतु' इत्युक्तं, तदपि प्रथमवक्तव्यमनन्तरोक्तमित्यलंकारज्ञानपरिज्ञानं लक्ष्मीधरस्य कियद्वर्णनीयमित्युपेक्ष्यते॥ ३॥

त्वदन्यः पाणिभ्यामभयवरदो दैवतगण-
स्त्वमेका नैवासि प्रकटितवराभीत्यभिनया।
भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ॥ ४॥

॥ लक्ष्मीधरा ॥

त्वदिति। त्वत् भवत्याः सकाशात् अन्यः इतरः पाणिभ्यां हस्ताभ्यां अभयवरदः अभयं भयराहित्यं, भयात्राणमिति यावत्, वरः इष्टार्थः, वौ ददातीति अभयवरदः, एकेन हस्तेन

अभयदः अन्येन वरद इत्यर्थः। दैवतगणः देवता एव दैवतानि। विनयादित्वात्स्वार्थे अण्,(!) 'स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते,' यथा चेतनैव चैतन्यमिति। तेषां गणः इन्द्रादयः आदित्यादयश्च गणदेवताः। त्वं भवती एका मुख्या, एकसंख्यासंख्येया वा, नैवासि न भवस्येव। प्रकटितवराभीत्यभिनया, प्रकटितः प्रकाशितः, हस्ताभ्यामिति शेषः, वरः इष्टार्थः अभीतिः अभयं भयात्त्राणं तयोरभिनयः अभिव्यञ्जनं यस्याः सा तथोक्ता। हस्ताभ्यामभयवरप्रदानं सर्वदैवतसाधारणमिति सर्वेषामसाधारणं अभयवरप्रदानप्रकारमाह—भयात् त्रातुं संसाराद्रक्षितुं दातुं फलं वाञ्छितार्थानुरूपं, अपि च समुच्चये, वाञ्छासमधिकं वाञ्छायाः कामनायाः सम्यगधिकं कामितार्थादधिकमित्यर्थः। शरण्ये शरणार्हे लोकानां चतुर्दशभुवनानाम्। तव भवत्याः। हिशब्दः इत्यर्थे. इति संचिन्त्येत्यर्थः। चरणौ पादौ। एवकारः अवधारणे। निपुणौ समर्थौ॥

अत्रेत्थं पदयोजना—हे भगवति, लोकानां शरण्ये, त्वदन्यो दैवतगणः पाणिभ्यामभयवरदः। एका त्वं पाणिभ्यां प्रकटितवराभीत्यभिनया नैवासि हि इति संचिन्त्य तव चरणावेव भयात्त्रातुं वाञ्छासमधिकं फलमपि च दातुं निपुणौ।

अयं भावः—हस्ताभ्यामभयवरदानं सर्वसाधारणमिति कृत्वा त्वच्चरणावेव तादृशाभयवरप्रदाने स्वयमेव व्यापृतौ। अतस्तव न कर्तव्यं हस्ताभ्यामभयवरप्रदानम्, प्रयोजनाभावात्, सर्वसाधारण्यप्रसङ्गात्, लोकैकशरण्यत्वव्याघाताच्चेत्युपदेश इति। अत्र व्यतिरेकालंकारः स्पष्टः। वाक्यलिङ्गकः काव्यलिङ्गालंकारोऽपि स्पष्टः। तयोरङ्गाङ्गिभावेन संकरः॥ ४॥

॥ सौभाग्यवर्धनी॥

यदि स्तुति कर्तुं प्रवृत्तोऽसि, मम स्तुत्या किम्? मदन्या देवतागणाः हरिहरगणेशादयः प्रत्यक्षतो वराभयकराः सन्ति तान् स्तुहि; तेषां स्तुत्या समीहितं भविष्यतीत्यत आह—त्वदन्य इति। श्लोकार्थः स्पष्टः। सत्यमुक्तं वराभयकरा त्वं न भवसि। वराभययोः कृत्यं भयात्त्राणं समीहितफलवितरणं च। एतद्द्वयमपि तव चरणावेव दातुं निपुणौ। त्वदन्यदैवतेषु नटानामिव वराभयाद्यभिनयमात्रम्। तथा तवाभिनयो नास्ति। किं च, अन्यदैवतगणा उपासिताः वरेण शरीरपोषणेन यावद्वाञ्छितं तावदेव ददते। तव चरणौ वाञ्छितादप्यधिकं वितरतः; यतस्त्वं लोकानां शरण्या; येऽप्यन्ये दैवतगणाः तेषामपि त्वमेव शरण्या। ते तु प्रतिदिनमुत्पत्तिप्रलयाभ्यामवसीदन्ति। तस्मात्तत्र स्मृतिर्निश्चलसिद्धिदायिनीति भावः। तदुक्तं क्रमस्तुतौ—ईशत्वभावकलुषाः कति नाम सन्ति ब्रह्मादयः प्रतिदिनं प्रलयाभिभूताः। एकः स एव जननि स्थिरबुद्धिरास्ते यः पादयोस्तव सकृत्प्रणतिं करोति॥' इति। इति चतुर्थश्लोकार्थः॥ ४॥

॥ अरुणामोदिनी॥

एवं पदपांसुमहिमानं प्रकटय्य तदधिकरणयोश्चरणयोर्माहात्म्यं प्रकटयिष्यन्तो देव्यां देवतान्तरसाधारण्यभ्रान्तिं निराकुर्वन्ति—त्वदिति। हे देवि, त्वदिति पञ्चम्येकवचनम्; भवत्याः, अन्य इतरः, भवत्प्रसादलब्धातिशय इत्यर्थः। देवा एव देवताः, स्वार्थे तल्प्रत्ययः। देवता एव

दैवतानि, प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययः ; तेषां गणो देवसङ्घः. मनोरथमतीतत्वेन पामराभिमतो भवत्प्रसादलब्धविभवो देवसङ्घः, पाणिभ्यां हस्ताभ्यामभय भयराहित्यं वरोऽभीष्टम्, तौ ददातीत्यभयवरदः। हस्ताभ्यामभयवरदो न तु मनोज्ञत्वाभिसंधेः, प्रतारणपरतन्मुद्राधारणादिति भावः। यद्वा, पाणिभ्यां न त्वेकपाणिना, अपि तु द्वाभ्यामिति, हस्तद्वयेन स इष्टार्थं ददाति, अस्माभिरपि तेनैव दातव्यमिति लोकन्यायानुसार्यसूयासंपृक्तोपहासो वाऽर्थः यद्वा, पाणिभ्यामभयवरदो दैवतगणस्त्वदितधार्मिकसाधारणधार्मिकयोः साधारणस्य चिह्नबाहुल्यदर्शनात्, 'मुद्रा व्याजे लाञ्छने च' इति कोशाद्व्याजार्थकहस्तधृतमुद्रो देवतात्वेन गण्यमानस्त्वदन्यः भवत्या अन्य एव, अतितुच्छरूप एवेत्यर्थः। एकाऽद्वितीयरूपा, सर्वदेवताकारणभूतेत्यर्थः, त्वं भवत्येव सकलदेवतामुख्या त्वमेव पाणिभ्यां प्रकटितः प्रकाशितः वराभीत्योरिष्टाभययोरभिनयो व्यञ्जनं यस्याः सा तथोक्ता भूः। 'अधोमुखो वामहस्तः प्रसृतो वरमुद्रिका। ऊर्ध्वीकृतो दक्षहस्तः प्रसृतोऽभयमुद्रिका॥' इत्युक्तलक्षणवराभयमुद्रयोर्धारणाभावात्। किं तु 'चतुर्बाहुं त्रिलोचनाम्' इत्यादिध्यानेषु चतुर्षु हस्तेषु धनुर्बाणाङ्कुशपाशानां चतुर्णां धारणोक्तेरित्यर्थः। यदि त्वमपि हस्ताभ्यामभयवरदानसूचकतन्मुद्राधारणमकरोस्तर्हि भवत्या देवतासाधारण्यप्रसङ्गतद्द्वारा भक्तेष्टार्थवितरण यादृच्छिकतैव प्रतीयेत, निरङ्कुशैश्वर्यादिवितरणं न प्रतीयेतेत्यर्थः। सर्वाभीष्टदातुर्मुद्राधारणमप्रयोजकमित्यर्थः। ननु देव्याऽपि दानस्य हस्तदेयत्वाद्देव्या बाहुचतुष्टयान्यस्यानुपलम्भादिष्टार्थं कथं वा देयादेवी, कुतश्च विश्वासो भक्तजनानामित्याशङ्क्याह—भयादिति। शरण रक्षणमर्हतीति शरण्या; शरणं श्रीचक्राख्यं गृहमर्हतीति वा शरण्या; तस्याः संबुद्धिर्हे शरण्ये, भक्तजनरक्षणदीक्षिते भगवतीति संबोधनम्। एतेन देव्यन्येषामशरण्यत्वं सूचितम्। 'तदर्हति' इति यत्प्रत्ययः। भयादाध्यात्मिकादेर्दारिद्र्यादेः संसाराच्च यद्रूपं तस्मात्त्रातुं रक्षितुम्, भक्तजनानित्यर्थः। तथा लोकानां भुवनानां वाञ्छायाः समधिकं मनोरथादधिकं फलमभीष्टं दातुं वितरितुं च तव भवत्याः, सर्वदेवताविभवदाया इति भावः। चरणौ पादावेव नान्यौ। चरत्यनेनेति व्युत्पत्त्या गत्यर्थकत्वेन ज्ञानार्थकत्वादिष्टार्थवितरणशक्ततया पाणिभ्यामधिकाविति भावः। निपुणावभिज्ञौ, 'प्रवीणे निपुणाभिज्ञ...' इत्यमरः। हीत्यवधारणे। 'हि हेताववधारणे' इत्यमर.। अयमभिप्रायः—भवदन्येषां देवानामिष्टार्थदानसामर्थ्यमेव नास्ति; यदि तत्संभवेत्तदानीं त्वमेवेष्टार्थदात्री, 'येऽपि ब्रह्मादयो देवा भवन्ति वरदायिनः। त्वद्रूपां शक्तिमासाद्य ते भवन्ति वरप्रदाः॥' इति वचनात्, 'फलमत उपपत्तेः' इति बादरायणसूत्रात्, 'यो यो यां यां तनुं भक्तः' इत्यादिवचनाच्च। भवच्चरणयोश्च भयहरणं वाञ्छितादधिकेष्टदानं चातिदुःखितोः समाधिसुरथयोर्निदर्शनमभूदिति। व्यतिरेकालंकारः॥ ४॥

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारी भूत्वा पुरारिपुमपि क्षोभमनयत्।
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम्॥ ५॥

॥ लक्ष्मीधरः ॥

हरिः विष्णुः त्वां भवतीं चक्रस्वरूपिणीं विद्यारूपिणीं च आराध्य पूजयित्वा जपित्वा ध्यात्वा च । अत एव त्रिपुरसुन्दरीप्रस्तारभेदेन एतस्य प्रस्तारस्य ऋषिः विष्णुः । ऋषिर्नाम वेदस्थितो मन्त्रो येन दृष्टः स इति । अत एवाह 'दुर्जनादपि' इति । इयं पञ्चदशाक्षरीविद्या ऋग्वेदे आम्नाता - 'चत्वार ईं बिभ्रति क्षमयन्तः' (ऋ. ५. ८, ४) इत्यादौ । न चात्र ईंकारत्रयम्, ह्लेखात्रयस्यैव श्रुतत्वात्, इति वाच्यम् । षोडशकलात्मकस्य श्रीबीजस्य गुरुसंप्रदायवशाद्विज्ञेयस्य स्थितत्वात् चतुर्णामीकाराणां सिद्धेः मूलविद्यायाः वेदस्थितत्व सिद्धम् अत्र केचित्तु कुलमन्त्रयाचारानभिज्ञाः 'चत्वार ईं बिभ्रति क्षमयन्तः' इत्यादिश्रुतिबाधताश्चत्वार ईंकाराः ईंकारेण सार्धं ह्लेखात्रयमित्याहुः । तन्न, ईंकारस्य ईंकारत्वोक्तेरयुक्तत्वात्, मूलविद्यायाः षोडशवर्णात्मकत्वात्; षोडशवर्णात्मकत्वं च षोडशनित्याप्रकृतिभूतत्वान्मूलविद्यायाः । एतच्च 'चतुःपञ्चधा तन्त्रैः' इति 'शिवः शक्तिः कामः' इति च श्लोकद्वयव्याख्यानावसरे निपुणतरमुपपादयिष्यामः । किं चास्य मन्त्रस्य वेदमूलत्वं संज्ञानानुवाकेन (तै. ब्रा. ३. १० १) 'इयं वाव सरघा' (तै. ब्रा. ३. १०. १०) इत्यनुवाकेन च प्रतिपाद्यत इति वक्ष्यते ॥

प्रकृतमनुसरामः प्रणत-नमस्याभाग्यजननीं आकर्षेण नताः प्रणताः कायिकवाचिक-मानसिकनमस्कारवन्तः जनाः भक्तलोकाः तेषां सौभाग्यस्य जननी प्रसवित्री, तां पुरा पूर्वं नारी कान्ता भूत्वा नारीरूपं धृत्वा पुरारिपुं त्रिपुरान्तकं, अपिशब्दो जितेन्द्रियत्वं संभावयति, क्षोभं मनोविकारं अनयत् नयति स्म । 'गतिबुद्धि' इत्यादिसूत्रेण द्विकर्मकत्वम् । स्मरोऽपि मन्मथोऽपि । अपिशब्दः पूर्वोक्तविष्णुधर्म समुच्चिनोति—यथा विष्णुर्भवन्मन्त्रस्य ऋषिः एवं स्मरोऽपि । त्वां भवतीं नत्वा शरणमुपगम्य, श्रीचक्रं सम्यगभ्यर्च्य त्वन्मूलविद्यां सम्यगभ्यस्य त्वत्प्रभावापन्न-सत्त्वः, रतिनयनलेह्येन, रते स्वपत्न्याः नयनाभ्यां लेह्येन लेहनार्हेण, रतिनयनैकदृश्येनेत्यर्थः । यद्वा, रतिर्नाम अतिसुन्दरी तस्याः नयनदेयेन इत्यतिसौन्दर्यं कामदेहस्येति । वपुषा देहेन । मुनीनां जितेन्द्रियाणां । अपिशब्दः संभावनायां । अन्तः अन्तरङ्गे चित्तवृत्तौ । प्रभवति समर्थः । हि प्रसिद्धौ । मोहाय शब्दादिविषयाकाङ्क्षोत्पादनाय । महतां महात्मनाम् ।

अदेहं कथयोजना हे भगवति, प्रणतजनसौभाग्यजननीं त्वां हरिराराध्य पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् । स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा महतां मुनीनामप्यन्त-र्मोहाय प्रभवति हि ॥

पुरा किल नारायणः स्त्रीरूपधारी कनकस्वामिनं प्रलोभ्य अवधीत् । तादृशं स्त्रीरूपं शंभुना प्रार्थितः सन् तस्मै दर्शयित्वा तं व्यामोहयामासेति कथा अनुसंधेया । मन्मथोऽपि सकल-

मुनिमनःक्षोभं कुर्वाणः प्रवर्तते । एतच्च वामकेश्वरतन्त्रादौ चतुःषष्ट्यां निरूपितम्—'एतामेव पुराऽऽराध्य विद्यां त्रैलोक्यमोहिनीम् । त्रैलोक्यं मोहयामास कामारिं भगवान्हरिः ॥ कामदेवोऽपि देवेशीं देवीं त्रिपुरसुन्दरीम् । सम्पाराध्याभवल्लोके सर्वसौभाग्यसुन्दरः ॥' इति । अतश्च यत्र यत्र रतिमूलकं मनःक्षोभकरणं भवति, तद्भगवतीपरमाबलभ्यमिति वक्तुं कवेरयमारम्भः ॥ ९ ॥

॥ सौभाग्यवर्धनी ॥

तर्हि मम प्रभावः कुत्र दृष्टः, यद्दृष्टान्तेन मम स्तुतिरारभ्यत आह—हरिस्त्वामिति । हरिः विष्णुस्त्वा प्रणतजनसौभाग्यजननीं समाराध्य पुरा अमृतमथनादनन्तर द्रष्टुमागतं, येन रूपेण दानवा मोहिताः तव तद्रूपं दिदृक्षेऽहमिति पृष्टवन्तं मदनारि नारायणीरूपं प्रकटीकृत्य क्षोभमनयत् । मदनपरवशं कृतवानित्यर्थः । येन स्मर्तव्यता प्रापितः स्मर इति नाम प्राप्तवान् सोऽपि पुनः रतिनयनलेहेन वपुषा प्राप्तविग्रहेण महतामपि मुनीनां विश्वामित्रगौतमादीनां मोहाय प्रभवतीति प्रकटार्थः । गुप्तार्थस्तु—हरिस्त्वां हे प्रणतजनसौभाग्यजननि ईमिति तुरीयवर्णरूपामाराध्य अग्रे वक्ष्यमाणप्रकारेण भावयित्वा नारीरूपमासाद्य पुरारिपुमपि क्षोभमनयत् । तव रूपमासाद्येत्यर्थः । यत्किंचित्प्राकृतनार्याः मदनारेः क्षोभकरणं न संभवति यत एतावता षट्कूटया विद्यया त्वामुपास्य अग्रे वक्ष्यमाणया कामकलया भावनया भावयित्वा तव सारूप्यं प्राप्य मदनारि मोहितवानिति भावः । षटकूटाविद्या तु लोपामुद्रापाप्तविद्यया नन्दिकेश्वरोपासितविद्यया च भवति । तदुक्तं ज्ञानार्णवे—'लोपामुद्रां पुनर्देवि विलिखेत्तदनन्तरम् । नन्दिकेश्वरविद्या च षट्कूटा वैष्णवी भवेत् ॥ इति । लोपामुद्राविद्या अग्रे वक्ष्यते । नन्दिकेश्वरविद्या तु ज्ञानार्णवे—'कामराजाख्यविद्याया बाम्भवं मादनं त्यजेत् । चन्द्रं तत्रैव संयोज्य कामराजमतःपरम् ॥ हित्वा चन्द्रं मुखे कुर्याद्वद्यं नन्दिपूजितम् ॥' इति । विद्येयं स्पष्टीभविष्यत्यग्रे । लोपामुद्राविद्योद्धारेण कामराजविद्या चाग्रे वक्ष्यते । स्मरोऽपि अनेनैव विधिना कामराजविद्यामुपास्य महामुनीनां मोहको जात इति भावः । इति पञ्चमपद्यार्थः ॥ ९ ॥

॥ अरुणाभादिनी ॥

भगवतीचरणयोरतिमनोरथफलदातृत्वमेवाह—हरिरिति । हे देवि, हरिर्विष्णुरादिभक्तः पुरा पूर्वं प्रणतानां साष्टाङ्ग दण्डवत्पतन कुर्वता स्तोत्रादीनि शब्दायतां च जनानाम् । पूजाजपादिकं विनाऽपि केवलनमस्कारोऽपि फलद इत्यभिप्रायः । उक्तं च मार्कण्डेयेन—'भक्त्या नताः स्म विदधातु शुभानि सा नः' इति । सौभाग्यं सुभगत्वं सौरूप्यसौशील्यादिकं जनयत्युत्पादयति ददातीति ताम् । पशुपुत्रवित्तार्तिदारिद्र्यनाशनादिविविधाभीष्टप्रदां, न त्वितरदेवतावत्संपीड्य भुञ्जानामित्यर्थ । उक्तं च मार्कण्डेयेन—'स्तुता सपूजिता पुष्पैर्धूपगन्धादिभिस्तथा । ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभाम् ॥ सा चिन्तिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति । आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ शरणागतदीनार्तपरित्राणपरायणा । सर्वस्यार्तिहरा देवी' इति । त्वां विद्यारूपिणी चक्ररूपिणीं च भवतीम्, आराध्योपास्य । मन्त्रप्रथमखण्डप्रस्तारयोर्ऋषित्वादस्येति भावः । नारी भूत्वा मोहिनीरूपं भूत्वेत्यर्थः । पुरारिपुं त्रिपुरान्तकं रुद्रमपि, अतिक्रोधितयाऽविज्ञातशृङ्गाररसतत्त्वमपीत्यर्थः । अथ वा रुद्र नारीभूत्वा, अनरिररिभूत्वाऽरीभूत्वा, स न भूत्वा नारीभूत्वा

सुहृद्भूत्वाऽपि नित्यसहचरीत्वादिज्ञातस्वरूपोऽपि अविदितस्वरूप इव क्षोभं वनितादर्शनजन्य चित्त-विकारमनयत् प्रापयति स्म । नयतिर्द्विकर्मकः । अत्राविदितशृङ्गाररसस्यापि तदुत्पादनोक्त्या विष्णोः सौन्दर्यातिशय सूच्यते । नन्वेकत्र कृतोऽनुग्रहो न सार्वत्रिकोऽनियतत्वादित्याशङ्कायामाह— स्मरोऽपीति । आस्तां मूर्तिमद्देवताया विष्णोस्त्वदुपास्तिलब्धवैभवादेतादृशसामर्थ्यवत्ता, अपि तु स्मरः स्मृतिलब्धजन्माऽनङ्गतया प्रसिद्धो मदनोऽपि त्वां पूर्वोक्तरूपिणी भवतीं नत्वा नमस्कृत्य रतेरति-सुन्दर्याः स्वप्रियायाः । 'रतिः कामप्रियायां च' इति विश्व । नयनाभ्यां लेह्येनास्वाद्येन, अत्यादरदृश्ये-नेत्यतिसौन्दर्यवत्ता सूचिता । वपुषा देहेन महतां मुनीनां जितेन्द्रियाणा मननशीलानां मनीषिणामपि किमुतान्येषामित्यपेरर्थः । अन्तरन्तःकरणानां मोहाय मूर्च्छनायै, 'मोहमिच्छन्ति मूर्च्छायाम्' इति विश्वः । प्रभवति । अलमर्थयोगेऽपि चतुर्थी । अतोऽत्र हरिस्मरयोस्त्रिपुरान्तकसकलमुनि-मोहकातिसौन्दर्यसंपत्तिसमवाप्तिर्भवत्प्रसादलब्धेति न भवत्पदपङ्कजादन्योऽभयवाञ्छितार्थकर-प्रदाता लभ्यत इत्यभिप्रायः । अत्रोक्तं वामकेश्वरतन्त्रे—'एतामेव पुरा ज्ञात्वा विद्यां त्रैलोक्य-मोहिनीम् । त्रैलोक्यं मोहयामास कामारिं भगवान्हरि । कामदेवोऽपि देवेशीं महात्रिपुरसुन्दरीम् । समाराध्याभवल्लोके सर्वसौभाग्यसुन्दरः ॥' इति ॥ ५ ॥

धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाऽप्येकः[1] सर्वं हिमगिरिसुते कामपि कृपा-
मपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥ ६ ॥

॥ लक्ष्मीधरः ॥

यद्यपि पूर्वस्मिन् श्लोके भगवतीप्रसादासादितं सन्मथस्य प्रागल्भ्यमुक्तम्, तथाऽपि मन्मथस्य अनङ्गविद्यायां मन्मथप्रस्तारस्य ऋषित्वात् तदायत्तमतिप्रागल्भ्यमाह— धनुरिति । अत्र पद्ये यत्तदोरध्याहारः । उभयाध्याहारः सकलकविसमयसिद्धः । रघुवंशे 'वागर्थाविव संपृक्तौ' इत्यत्र यौ संपृक्तौ तौ वन्दे इति । तथा 'ये नाम केचिदिह नः प्रथयन्त्यवज्ञाम्' इत्यादौ य उत्पत्स्यते तं प्रत्येष यत्न इति । धनुः आयोधनमाधनं चापः पौष्पं पुष्पमयम् । पुष्पा-णामतिमृदुलत्वात् स्पर्शासहत्वात् नमनाकर्षणादिचापकार्यानर्हत्वमिति तात्पर्यम् । मौर्वी शिञ्जिनी मधुकरमयी मधुकरैः भ्रमरैः प्रचुरा, भ्रमरपङ्क्तिनिर्मितेत्यर्थः । परस्परासंबद्धानां शिञ्जिनीत्वं न संगच्छत इति तात्पर्यम् । पञ्च पञ्चसंख्यासंख्येयाः विशिखाः बाणाः । पञ्चानां विक्षेपणे तूष्णींभाव एव शरणमिति तात्पर्यम् । किं च, 'पञ्च विशिखाः' इत्यनेन तद्विशिखानां

1. 'तथाऽप्येतत्' इति सौभाग्यवर्धनीपाठः ।

अमूर्तात्मकत्वमिदेः विशिष्यकार्यकरित्वाभाव इति तात्पर्यम् । वसन्तः कालविशेषः, 'वसन्तो मधुमाधवौ' इत्यभिधानात् । सामन्तः सखिभूतः । तस्य कालात्मकत्वात् पञ्चित्यकारित्वं न सगच्छत इति तात्पर्यम् मलयमरुत् दक्षिणानिलः आयोधनस्थः आयोधनस्य युद्धस्य साधनं सम्पादन । मलयमरुतः प्रत्यहं स्थितत्वात् च सार्वत्रिकत्वात्, सार्वत्रिकत्वेऽपि न सर्वदा सद्भावः, सर्वदा सद्भावेऽपि जीरूपत्वात्तथाकार्यकारित्वाभावः इति तात्पर्यम् । तथाऽपि उक्तप्रकारेः सार्वज्ञनीने सिद्धेऽपि एक. अनङ्गहायशूरः सर्वं सकलं प्रपञ्चम् । हे गिरिसुते, हे प्रधानो गिरिः हिमाचलः, तस्य सुता तत्सम्बुद्धौ हे हिमगिरिसुते, शाकपार्थिवादित्वात्साधुः, तस्य सुता तत्सम्बुद्धौ हे हिमगिरिसुते, तव सम्बुद्धिः, काऽनिर्वाच्या । अपिशब्दः सम्भावनायाम् । कृपा अनुकम्पा । अपाङ्गात् कटाक्षात् ते तव लब्ध्वा प्राप्य । जगत् जङ्गमात्मकं लोकम्, स्थावरात्मकस्यापि तस्य परिदृश्यमानत्वात् । अनङ्गः अङ्गरहितः । अत्र निरवयवत्वेऽपि दौर्बल्यं सूचितम् । हस्तभावादेव चापाकर्षणशरसंधाने अप्यसम्भाविते । वाहभावात् स्थादेः दिग्विनिरीक्ष्यमसम्भाविता । अक्षत्वभावात्-भावात् वयस्येन मधुना सार्धं सम्भाषणसहितनिरीक्षणमहासहायत्वं असम्भाव्यमिति तात्पर्यम् । विजयते, 'विपराभ्यां जेः' इत्यात्मनेपदम् ॥

अन्वयः पदयोजना—हे हिमगिरिसुते, अस्य अनङ्गस्य धनुः पौष्पम्, मौर्वी मधुकरमयी, विशिखाः पञ्च, सामन्तो वसन्तः, आयोधनरथः मलयमरुत्, तथाऽपि एकोऽनङ्गः एकः ते अपाङ्गात् कामपि कृपां लब्ध्वा सर्वमिदं जगत् विजयते । अत्र निरवयवालङ्कारः, विजयसाधनाभावेऽपि विजयोक्तेः । 'कारणेन विना कार्योत्पत्तिर्विभावना' इति लक्षणम् ॥ ६ ॥

॥ सौभाग्यवर्धनी ॥

भवतु हरिर्मत्सारूप्यमाप्य पुरारिपोः क्षोभकरः । मदनो रावणादिवत्कराळदर्शनः सन् मुनीनां मोहकः कुतो न स्यादित्यत आह—धनुरिति । पुष्पमयं धनुः सुकुमारतरं न वज्रमारायमाणम् । ज्या चञ्चलतरचञ्चरीकमयी; पञ्च विशिखाः, नाधिकाः, तेऽपि पौष्पाः; सहायो वसन्तः कादाचित्कः समयः । स्मरथः मलयानिलः मन्दगमनः । तथाऽपि एतत्सर्वं जगत्स्वयमनङ्ग हे हिमगिरिसुते दयासर्द्रतले विजयते तवापाङ्गात् कामपि कृपां विशिष्य निर्वक्तुमशक्यां लब्ध्वा विजयते । एतावता रावणादिवन्न क्रूरदर्शनः, अतिसौम्यदर्शनः, आयुधादयोऽप्येतादृशाः, तथाऽपि जगद्विजयते इति यत् तद्भवत्याः कृपाकटाक्षमहिम्नेति भावः ।

॥ अरुणामोदिनी ॥

पूजाजपादिमाहात्म्यप्रकटनपूर्वकं भगवत्या भक्तवात्सल्यातिशयं द्योतयन्नाह—धनुर्रीति । हिमवदाख्यो गिरिर्हिमगिरिर्हिमवान्, तस्य सुता, तस्या सम्बुद्धिर्हे हिमगिरिसुते, भक्तवात्सल्यप्रकटनायैव दक्षगृहं विहाय हिमवद्गृहेऽवतीर्णे देवि, शीतलहिमवत्पुत्रिकाया भगवत्या भक्तजनदयापरत्व नाद्भुत-

मित्यभिप्रायः । पूर्वश्लोकोपात्तस्यानङ्गस्य धनुः विजयप्रधानसाधनं चापः, पोष्यं पुष्पविकारः, तन्निर्मितेन, पुष्पधन्वेति प्रसेद्धेः । अस्ति ह मदनस्य प्रथमं विजयसाधनमूर्ध्वविचारमति धनतीति धनुरिति व्युत्पत्तिलिङ्गाभ्यां, तस्यापि सामान्यतया कोलाहलीगुणदौर्बल्यनिवारणशीलतां सूचितां, एकवचनेन धनुरन्तरासाद्यः सूचितः । तदपि पुष्पविनिर्मितमित्येव पुष्णाति विकसतीति पुष्पमिति व्युत्पत्त्या तत्कारणके सौकुमार्यातिरेकेऽपि कामादिरूपेऽसमानवच्छासामर्थं दृढतरौत्सुक्यता सूचितं । अपि च, नमनाकर्षणादितत्कार्यनिर्वर्त्यत्वं च सूचयन् । विजयप्रधानसाधनं च धनुर्जननसम्भवं तदप्येक तदपि पुष्पनिर्मितमित्यन्तै, विजयानुपयुक्तत्वातिशयफलगुणेन प्रातीतिकत्वमित्यर्थः । तथा मौर्वी ज्याऽपि, धनुर्विचार आस्ताम्, तदधिष्ठिते गुणेऽर्थात्मार्थे । मधुकरश्रेणी मधुव्रतविकारः । विकारार्थे मयट् । 'टिड्ढाणञ्' इत्यादिना ङीप् । सूचनेति व्युत्पत्त्या सिद्धसाध्यत्वस्त्रीत्वाभ्यामतिकर्कशत्व क्षणवैराग्याकर्षणाधिक्ये व्रतनशीलत्वं प्रकृतकार्यानुपयोगित्व च सूच्यते । साऽपि मधुकरश्रेणीत्वेनेन मधुविधानविशेषागतव्यग्रत्वं स्नेहशैथिल्यभावनया व्याजरूपेण स्थित्ययोग्यता सूच्यते । परस्परासंश्लिष्टानां व्यग्रचित्तानां बहूना भिक्षाभुजां तदूपावस्थानानर्हत्वादित्यभिप्रायः । आस्तामेतत्, तथा विशिखा बाणाश्चारविन्दादयः पञ्च, पञ्चसंख्यापरिमिताः । विगता शिखा येषामिति व्युत्पत्त्या कुण्ठितधारत्व प्रतीयते । लिङ्गात्सामर्थ्यसूचनेऽपि पञ्चेत्यनेन परिमितबाणविनियोगे जातेऽनन्तर तूष्णींभावात्पराजयाद्वाप्तिः पञ्चत्वाप्तिस्वभावता च सूच्यते । बाणाश्च विशिखास्तेऽपि पञ्चेतीदमभ्यासेनिनिवारमेवत्यर्थः । न हि शरेष्वङ्गिरससमर्थैः परिमितैः कार्यं साध्यत इति धनुर्मौर्वीशराणां सर्वेषामपि विजयानुपयोगित्वं सूचितम् । आस्तां तावद्धनुरादिचिन्ता, सत्सहाये लब्धे किमलभ्यमस्तीत्याशङ्क्याहुः— वसन्तः कालविशेषः सामन्तः सहायः, लिङ्गदार्ढ्यात्सामर्थ्यसूचनेऽपि तस्य कालरूपत्वेनावेतनत्वात्कादाचित्कत्वाच्च शत्रुवाचकसामन्तपदवाच्यत्वाच्च स्वसमयपर्यन्तावस्थातृत्वमसमयपरित्यक्तृत्व युद्धानुपयुक्तत्वं च सूच्यते । आ समन्ताद्योधनमायोधनमित्यनेन सारथ्यभावः सूचितः । अत्र रथो युद्धे तृतीयसाधनं स्यन्दनः, मलयमरुन्मलयानिलः । अत्र मलयानिलस्य कादाचित्कत्वान्मलयाद्रावेव वर्तमानत्वाद्वा, म्रियतेऽनेनेति व्युत्पत्त्या मारकस्वभावत्वाच्च न रथीभवनयोग्यतेति व्यज्यते । आयोधनरथ इत्यनेन 'रथ गतौ' इत्यनुशासनाद्रथेर्गत्यर्थकत्वात्समये पलायनशीलता सूच्यते । सोऽपि मलयजन्यः, सोऽपि दूरवर्ती, सोऽपि मारकस्वभाव इति सर्वमप्यतिजर्जरमित्यभिप्रायः । लोके वीरभटा धनुरादिदृढसाधनाः सन्त एव जयं प्राप्ता दृश्यन्ते । मदनस्य तु जगद्विजयाद्यस्य न किंचिदपि दृढ साधनं प्रतीयत इति समुदायार्थः । तथाऽपि, यद्यप्येवमतिमृदुलसाधनस्तथाऽपीत्यर्थः । अनङ्गो मदनः, न विद्यतेऽङ्ग शरीरमस्येति व्युत्पत्त्या हरललाटनेत्रनिर्दग्धाङ्गत्वाद्धस्तपादाद्यवयवसंघातरूपदेहरहित्येन साधकस्य वीरस्याप्यस्य च धनुरादीनामिव शरसंधानधनुराकर्षणरथावस्थानसचिवसलापाद्यो न सन्तीति सूचितम् । स च, एकः असहाय एव सन , ते तृणमपि मेरुकुर्वतया भवत्या अपाङ्गात्कटाक्षात्, सनामतयाऽनङ्ग प्रीत्यतिशयोऽनेन सूच्यते । कामप्यनिर्वचनीयां कृपा परदुःखप्रहाणेच्छालक्षणां दयां लब्ध्वा प्राप्य, शिवनिर्दग्धशरीरस्य स्वस्योत्पत्तिं सामर्थ्यातिशयं चावाप्येत्यर्थः । शिवललाटाक्षिदाहितस्य मदनस्य देवीकटाक्षात्पुनरुत्पन्नत्वादित्यभिप्रायः । तदुक्तम्—'कामोऽक्षितो यतो

जातस्तस्याः कामेशयोषितः । कामाक्षीति तदा ख्यातिं सा गता काञ्चिकापुरे ॥' इति । उक्तं चाम्बास्तवे—'तव यदा मदनमेकपनेकधा ते मुग्धे कटाक्षविधिरकुरयांचकार । वक्षे तदा-प्रभृति देवि ललाटनेत्रं नित्यं द्विषैव मुकुलीकृतमिन्दुमौलिः ॥' इति । अलं समस्तमिदं परिदृश्यमानं जगद्विजयते, जित्वा चेदं सर्वोत्कर्षेण वर्तत इत्यर्थः । अतस्तृणस्यापि मेरुकरणे, मूकस्यापि मुखरीकरणे, पङ्गोरपि पर्वतोल्लङ्घनीकरणे च शक्तता भवत्याः प्रभावादलभ्यं किमिवास्तीत्यभिप्रायः । उक्तं च मदनेन—'आप यदि विधिज्ञाः शरासनं वा कुसुममयं ससुरासुरं तथाऽपि । जगदिदमखिलं वशेऽनुनाज्ञामिदमतिलङ्घ्य धृतिं मुहूर्तमेति ॥' इति । अत्र धनुः पौष्पमत्वादीनि अनङ्ग-विशेषणानि तस्यातिलघुत्वसूचनद्वारा भगवतीकृपावाप्तिरूपस्य वाच्यस्य सिद्धिं कुर्वन्तीति वाच्यसिद्ध्यङ्गं नाम गुणीभूतव्यङ्ग्यम् ॥ ६ ॥

क्वणत्काञ्चीदामा करिकलभकुम्भस्तननता[1]
परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना ।
धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ॥ ७ ॥

॥ लक्ष्मीधरः ॥

'सुधासिन्धोर्मध्ये' इत्युत्तरश्लोकोपयोगितया समस्तां चतुर्विधैक्यानुसन्धानमहिम्ना मणिपूरे भगवत्या यादृशं स्फुरति रूपं तादृशं प्रकाशयति—क्वणत्काञ्चीदामेति । क्वणत्काञ्चीदामा शिञ्जन्मणिमेखला । करिकलभकुम्भतुल्याभ्यां स्तनाभ्यामीषन्नम्रमध्येत्यर्थः । परिक्षीणा कृशा मध्ये अवलग्ने, तनुमध्येत्यर्थः । परिणतशरच्चन्द्रवदना परिणतः संपूर्णकलः शरदि शरत्काले चन्द्रः इन्दुः तद्वद्वदनं यस्याः सा । धनुः चापम्, बाणान्, पुष्पमयान् पाशं दाम, सृणिं अङ्कुशम् । अपिशब्दः उक्तमेव समुच्चिनोति । दधाना बिभ्रती करतलैः चतुर्भिः हस्ताम्बुजैः । पुरस्तात् हृदयकमले, मणिपूरान्निर्गत्येति शेषः । आस्तां उपविशतु । नः अस्माकम । पुरमथितुः त्रिपुरान्तकस्य । यद्वा, पुराणि त्रीणि वर्णानि त्रिपुराबीजानि मथ्नाति, मथित्वा नवनीतं करोति यस्मिन । रुद्रयामले च रुद्रः पुरमथितेत्युच्यते । आहोपुरुषिका अहोशब्द आश्चर्यवाची । पुरुष-शब्दस्य प्रत्यगात्मवाचिनः अहंशब्दवाच्यत्वं लक्ष्यते ; अतः अहो अहंभावः आहोपुरुषिका, अहङ्कार इति यावत् । रुद्रस्याहंकाररूपित्वं भगवत्याः 'शिवः शक्त्या' इत्यादिश्लोकव्याख्याने प्रपञ्चितम् , प्रपञ्चयिष्यते च ॥

---

1. '०कुम्भस्तनभरा' इति सौभाग्यवर्धनीपाठः ।

अत्रेत्थं पदयोजना — कणत्काञ्चीदामा करिकलभकुम्भस्तननता मध्ये परिक्षीणा परिणत-शरच्चन्द्रवदना धनुः बाणान् पाशं सृणिमपि करतलैः दधाना पुरमथितुराहोपुरुषिका नः पुरस्ता-दास्ताम् । अत्र यद्वक्तव्यं तत्तु 'तवाज्ञाचक्रस्थं' इत्यादिश्लोकषट्कव्याख्यानान्ते निपुणतरमुपपाद-यिष्यते । तत्रत एवावधार्यम् ॥ ६ ॥

॥ सौभाग्यवर्धनी ॥

तर्हि मा कीदृशी ध्यात्वा स्तौषीत्यत आह—**कणत्काञ्चीति** । कणत् काञ्चीदाम यस्याः सा कणत्काञ्चीदामा, ढाबन्तः । करिशावककुम्भस्तनन्धया । करिशब्दोऽत्रोपरञ्जकः; यथा—स्तनचूचुक-मिति । कलभशब्देनैव करिशावकस्य प्राप्तत्वात् । अथवा, करिषु कं प्रकाशं लभत इति करिकलभः करिवर इति यावत् । तस्य कुम्भौ तयोरिव स्तनभरौ यस्याः सा । परिक्षीणा मध्ये क्षाममध्या, राकाश-शाङ्कानना, ऐक्षवं धनुः पुष्पमयबाणान् पाशं सुवर्णमयम्, सुवर्णमयमङ्कुशं च धारयन्ती । तदुक्तं मनोरमा-यामु—'सौवर्णौ पाशाङ्कुशौ वामदक्षिणकर्ण्यार्ध्ये यौ' इति । अधस्तनकरयोर्वामदक्षिणक्रमेण धनुर्बाणौ ध्येयाः । उपरितनयोः वामदक्षिणक्रमेण पाशाङ्कुशौ ध्येयौ । केषाञ्चित्संप्रदाये शक्तीनां दक्षिणवामकर-यागेन पाशाङ्कुशौ ध्येयौ; अन्येषां च वामदक्षिणक्रमेणेति । पुरस्तादास्ता नः प्रत्यक्षा भवतु । प्रार्थनायां लोट् । पुरमथितुराहोपुरुषिका, अहोपुरुषशब्दाद्बुद्धि कृते शब्दोऽयं सिद्धः । दर्पातिशयसंभावना; 'आहोपुरुषिका दर्पाद्या स्यात्संभावनाऽऽत्मनि' इत्यमरः । त्रिपुर दिवक्षुः दर्पातिशयेन आत्मनि तृणप्राय-मेतत्त्रिपुरमिति यान् संभावनादीन् कृतवान् सा भवल्लक्षणा पुरस्तादास्ता नः । पुरारेर्या अकुण्ठिता शक्तिः सा त्वमेव, त्वद्युक्तः सर्वत्र प्रभवति इति 'शिव शक्त्या युक्तो यदि भवति' इति पूर्वोक्तार्थः स्मारितः । न इति बहुवचनं संतोषातिशयेनात्मनो गौरवख्यापनार्थम् ॥ ७ ॥

॥ अरुणामोदिनी ॥

एवं भगवत्याः सर्वाभीष्टदातृत्ववर्णनामुखेन पञ्चश्लोक्या देवतान्तरसाधारण्यभ्रान्ति निराकृत्य, तत्स्वरूप विवर्णयिषुरादावागमप्रसिद्धं तद्ध्यानं निबध्नाति— **कणदिति** । काञ्ची मे-खला दामेव काञ्चीदाम । कणच्छब्दायमानं काञ्चीदाम मेखलाकलापो यस्याः सा । 'श्रोणिकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः । अत्र कणदित्यनेन सम्यग्ध्वानदृढत्वकमलं प्रत्यागमनं सूच्यते । करिकलभो गजशावः । अत्र 'कलभः करिशावक' 'त्रिशद्वर्षस्तु कलभः' इत्यादिकोशा-त्कलभशब्दस्यैव करिशावकवचनशक्तत्वेऽपि सामान्यविशेषभावाश्रयणान्न पौनरुक्त्यम् । यथाऽऽह वामनः— 'एवं करिकलभकर्णायतसादिषु सामान्यविशेषभावाश्रयणान्न पौनरुक्त्यम्' इति । अत एव 'आनिन्यिरे वंशकरीरनीलैः' इत्यादयः साधव इत्याहुर्मल्लिनाथचरणाः । यद्वा, करिषु कलन शोभया भाति, कं लभत इति वा करिकलभो गजश्रेष्ठः, तस्य कुम्भानिभाभ्यां स्तनाभ्यां नता नम्रा, योग्यतयेषन्नम्रेत्यर्थः । तथा मध्ये वलग्ने परिक्षीणा, शातोदरीत्यर्थः । अत एव करिकलभकुम्भ-स्तननतेति वा । परिणतः पूर्णो यः शरच्चन्द्रः, तत्तुल्यं स एव वा वदनं यस्याः सा । धनुर्बाणान्पाशं यत्र सृणिमङ्कुशं च । अपीत्युक्तानामेव समुच्चये । 'अङ्कुशोऽस्त्री सृणिर्द्वयोः' इत्यमरः । करतलै-

हसनलेश्चतुर्भिरित्यर्थः । ध्याना विज्ञाना । मज्ञातीत भाषिता, पुराणा माधवा, तन्त्रे त्रिपुरान्तकल्पे । एतेन रुद्रस्य भगवतीप्रसादादत्युत्कटकार्यकरणं लभ्यमर्थं सूचितम् । अहो इत्यहमर्थेऽव्ययम् । अहो चासौ पुरुषश्चेत्यहोपुरुषः । 'पुरुषाश्वे'त्यादिना समासः । अहोपुरुषस्य भाव आहोपुरुषिका । मनोज्ञादित्वाट्ठञ् । आहोपुरुषिका पुरुषार्थितुः कर्तुरीश्वरस्य करणरूपा देवीत्यर्थः । 'आहोपुरुषिकया स्वाद्या स्वारसभावनाऽऽस्वाने' इत्यमरः । प्राथमश्लोकोपात्तसभूयोत्थानसूचनाय पुरुषार्थेत्यादिपदद्वयोपादानमित्यवगन्तव्यम् । तः ध्यानार्थं प्रवृत्तानामस्माकं पुरस्ताद्य पश्चात्क्रम आ. आम्नामुपविशतु, तत्फलं प्राप्नोतु । एवंप्रकारेण ध्यायेयातां कवेरभिसंधिः ॥ ७ ॥

सुधाम्भोधेर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलया
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ॥ ८ ॥

॥ लक्ष्मीधरा ॥

सुधाम्भोधेः अमृतसमुद्रस्य मध्ये सुरविटपिवाटीपरिवृते सुरविटपिनां कल्पवृक्षाणां वाटीभिः झम्पाभिः परिवृते मणिद्वीपे मणिमये अन्तरीपे नीपोपवनवति नीपैः कदम्बैः उपवनवति चिन्तामणिगृहे चिन्तामणिविनिर्मिते मन्दिरे शिवाकारे शिवात्मके शक्तिरूपे, विकोणे इति यावत्, मञ्चे खट्वायां परमशिवपर्यङ्कनिलयां परमशिव एव पर्यङ्कः तल्पः, तत्र निलयः अवस्थितिर्यस्याः, तां भजन्ति सेवन्ते त्वां भवतीं धन्याः तत्प्रसादलाभात् कृतार्थाः कतिचन विरलाः, चिदानन्दलहरीं चिन्मात्रं ज्ञानं तदाकारः आनन्दः निरतिशयः सुखं, तस्य लहरीं तरङ्गरूपाम् ॥

अत्रेत्थं पदयोजना— हे भवति, सुधाम्भोधेः मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां त्वां चिदानन्दलहरीं कतिचन धन्याः भजन्ति ।

अत्रेदमनुसंधेयम्— भगवत्पादाचार्याः समयतत्परहृदयाः समयाचारप्रवणाः समयरूपां भगवतीं स्तुवन्ति । समयाचारो नाम आन्तरयजनादिः । कुलाचारो नाम बाह्यपूजादिरिति रहस्यम् । एतच्च 'तवाधारे मूले सह समयया' इत्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः । श्रीचक्रस्य वियच्चक्रमिति नामान्तरमस्ति; वियच्चक्रत्वं तु वियत्पूज्यत्वात् । वियत्पूज्यत्वं द्विविधं, दहराकाशजं बाह्याकाशजं चेति । बाह्याकाशजं नाम बाह्याकाशावकाशे पीठादौ

त्रिमूर्तीनां च रुद्रः स्यान्न चापरः ॥' इत्यादि । कौर्मे विंशाध्याये —'तमूचुर्भ्रातरो रुद्रः सेवितः सात्त्विकैर्जनैः । मोचयेत्सत्त्वसंयुक्तः पूजयेशमतो हरम ॥' इति। कस्तर्हि पुराणानां परस्परकलहस्य समाधिः ? इति चेत्, अद्वैतमेवेति चतुर्थाधिकरणभङ्ग एवोक्तम् । उक्तं च वायुपुराणे —'तपसा तोषयित्वा तु पितरं परमेश्वरम् । ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत् । [1]कल्पान्तरे पुरा ब्रह्मा रुद्रविष्णू जजान ह । विष्णुश्च भगवांस्तद्वद्ब्रह्माणमसृजत्प्रभुः[2] । नारायणं पुनर्ब्रह्मा[3] ब्रह्माणं च पुनर्भवः । एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः । परस्परस्माज्जायन्ते परस्परजयैषिणः । तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः । प्रभावः कथ्यते तेषां परस्परसमुद्भवात् । अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः । यातुधाना भवन्त्येव पिशाचाश्च न संशयः ॥' इति । भारते खिलेषु भविष्यत्पर्वणि पञ्चचत्वारिंशेऽध्याये "ईश्वरः —'रामोऽहं तु भविष्यामि विष्वंशेन समन्वितः । दशाननपुरोगाणि हनिष्ये तानि संयुगे । ऋक्षवानररूपेण यूयमत्र जनिष्यथ ॥' मातङ्गः—'इत्युक्ता भूतनाथेन देवदेवेन राघव । तुष्टाः सुरगणाः सर्वे दिवं जग्मुर्यथासुखम् । स त्वं राम महाबाहो शंकरो लोकशंकरः । वधार्थं राक्षसेन्द्राणां जातो रघुकुलोत्तमे[4] ॥" इति । पाद्मे सृष्टिखण्डे— 'सर्गस्य प्रतिसर्गस्य स्थितेः कर्ता जनार्दनः । सर्गे वै रजसा युक्तः सत्त्वस्थः परिपालने ॥ प्रतिसर्गे तमोद्रिक्तः स एव त्रिविधः क्रमात् । विशुद्धोऽयं ततः कृष्णः पुराणः शिव उच्यते ॥' इति । अत एव 'यो ब्रह्मविष्णुरुद्राणां भेदोत्कर्षौ स्वभावतः । साधयेदुदरव्याधियुक्तो भवति मानवः ॥' इत्यादिमहार्णवाद्युदाहृतं कर्मविपाकस्मृतिजातं संगच्छते ॥

यत्तु 'अन्यमीशम' इति भेदे प्रमाणमुपन्यस्तं तन्न, त्वद्रीत्या 'अन्योऽन्तरः' इतिवदुपपत्तेः । अस्माकं तु व्यावहारिकप्रामाण्यं भेदे, तत्त्ववेदनरूपं तु ब्रह्मण्येवेत्यभ्युपगमात् । उक्तं च स्कान्दे—'व्यावहारिकसत्यार्थं साक्षात्सत्यार्थचिद्घनम् । उभयं वक्ति वेदस्तु' इति । तस्मादद्वैतमेव श्रुतिस्मृतितात्पर्यगोचर इति स्थितम् ॥

छान्दोग्ये श्रूयते—'यो वै भूमा तत्सुखम्' इति । तत्र भूमा किं वायुः, उत विष्णुरिति विशये, वायुरेवेति प्राप्तम् । अत्र हि नामवागादितारतम्यमाशावसानमुक्त्वा 'प्राणो वा आशाया भूयान्' इति प्राणस्याशोत्तमत्वं चाभिधाय तत उत्तममनुक्त्वा भूमा आम्नातः । न च प्राणोऽपि विष्णुरेव 'अत एव प्राणः' इति न्यायेनेति वाच्यम्, 'उत्क्रान्तिप्राणान्' इति वाक्यशेषावगतस्योत्क्रमणस्य सर्वगते हरावसंभवात् । एवं प्राप्ते, सिद्धान्तमाह—

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥

भूमा विष्णुरेव, संप्रसादात्, पूर्णसुखरूपत्वात्, सर्वेषामुपर्युपदेशाच्च ॥

---

1. कल्पान्तेषु 2. पुनः 3. सदा पूर्णम् 4. रघुषु सत्तम

ब. ब. ब.

धर्मोपपत्तेश्च ॥ ९ ॥

इति सूत्रान्तरम् । 'स एवाधस्तात्' इत्यादिनोक्तस्य सर्वगतत्वादेर्विष्णावेव संभवादित्यर्थः । उत्क्रमणं तु सर्वगतस्यापि विष्णोः रूपान्तरविवक्षया 'तमुत्क्रामन्तम्' इत्यादिश्रुतिसिद्धमिति भावः । खण्डनं प्राग्वत् ॥

वाजसनेयके श्रूयते—'तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ अश्रुतं श्रोतृ' इत्यादि । तत्राक्षरं मध्यमं श्रीतत्त्वमेवेति प्राप्तम्, 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इति वाक्यशेषात् । चन्द्राद्याधारत्वं हि श्रियो लिङ्गम्, 'अहं सोममाहनसं बिभर्मि' इति श्रुतेः । आहनसं यज्ञेष्वभिधूयमाणम् । [1]कृताभिमानित्वेनेयमुक्तिः, 'सोमं राजानं जुह्वति तं देवा भक्षयन्ति' इत्यादिवत् । एवं प्राप्ते, सिद्धान्तमाह—

अक्षरमम्बरान्तधृतेः ॥ १० ॥

अक्षरं विष्णुरेव, 'एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति अम्बरान्तस्य सर्वस्य धृतेः । श्रूयते च विष्णुसूक्ते—'य च त्रिधातु पृथिवीमुत द्यामेको दधार भुवनानि विश्वा' (ऋ. २. २. २४) इति । किं च,

सा च प्रशासनात् ॥ ११ ॥

सा च सर्वधृतिः प्रशासनादुक्ता—'एतस्य वाऽक्षरस्य प्रशासने' इति । प्रशासनं च विष्णोरेव श्रूयते—'सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि' इति । अस्यार्थः— महदहंकारपञ्चमहाभूताख्याः सप्त देवताः अर्धगर्भाः ब्रह्माण्डाख्यसमुद्गगर्भास्तदावरणभूता भुवनस्य रेतः रतिप्रदाः सारभूता वा विष्णोः प्रदिशा आज्ञया विधर्मिणि विविधविश्वधारणे तिष्ठन्तीति ॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

'अस्थूलमनणु' इत्यादिना स्थूलाणवादीनामन्यवस्तुस्वभावानां व्यावृत्तेश्च । लौकिकस्थौल्यादेर्विरहोऽलौकिकस्य सत्त्वं च विष्णावेव श्रूयते—'अस्थूलोऽनणुरमध्यमो मध्यमो व्यापको योऽसौ हरिरादिरनादिरविश्वो विश्वः सगुणो निर्गुणः' इत्यादि । खण्डनं प्राग्वत् ॥

छान्दोग्ये श्रूयते—'सदेव सौम्येदमग्र आसीत्' इति । तत्र सत् किं प्रधानं ब्रह्म वेति संशये, प्रधानमिति प्राप्तम्, 'बहु स्यां प्रजायेयेति' इति बहुभावाख्यविकारश्रवणात् । ब्रह्म तु विष्णुः, 'अविकारः सदा शुद्धो नित्य आत्मा सदा हरिः' इत्यविकारत्वोक्तेः । सिद्धान्तमाह—

ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥

सः विष्णुरेव, 'तदैक्षत' इति ईक्षणव्यापाराश्रयणात्। 'बहु स्याम्' इति तु विकारं विनैव स्वरूपबहुत्वेनोपपन्नम्, 'अजायमानो बहुधा विजायते' इति श्रुतेः। अजायमानोऽविकुर्वाणः। खण्डनं प्राग्वत्॥

छान्दोग्ये श्रूयते — 'एतस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यम्' इति। तत्र हृदयपद्मस्थो विष्णुरन्यो वेति संशये, अन्य इति प्राप्तम्, आकाशश्रवणात्, 'तस्यान्ते सुषिरं सूक्ष्मम्' इति श्रुत्यन्तराच्च। सिद्धान्तमाह—

दहर उत्तरेभ्यः ॥ १४ ॥

दहरो विष्णुरेव, उत्तरेभ्यो गुणेभ्यः। तथा हि वाक्यशेषे श्रूयते — 'य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इत्यादि॥

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १५ ॥

'अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इति सुप्तस्य तद्गतिश्रुतेः, ब्रह्मशब्दाच्च। लिङ्गं च तथा दृष्टम् — 'अरश्च वै प्यश्च अर्णवौ च ब्रह्मलोकः' इति। तस्य हि विष्णुलोकलिङ्गत्वं स्मर्यते — 'अरश्च वै प्यश्च सुधासुद्रौ तत्रैव सर्वाभिमतप्रदौ द्वौ' इति॥

किं च,

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' इति हृत्पद्मस्थस्य सर्वाधारत्वश्रवणाच्च विष्णोरेवायमित्यर्थः। अस्य विष्णोर्महिम्नः अस्मिन् हृत्पद्मस्थले उपलब्धेः 'एष भूताधिपतिरेष भूतपालः' इत्यादिना॥

प्रसिद्धेश्च ॥ १७ ॥

'तत्रापि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्' इति श्रुत्यन्तरप्रसिद्धेरित्यर्थः॥

इतरपरामर्शात्स इति चेन्नासंभवात् ॥ १८ ॥

'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते[1] एष आत्मेति होवाच' इति जीवपरामर्शात् स इति चेत्, न, तस्य स्वतोऽपहतपाप्मत्वाद्यसंभवात्॥

---

1. अभिसंपद्यते

उत्तरात्प्रेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

'स तत्र पर्येति जक्षत्क्रीडन् रममाणः' इत्याद्युत्तरवचनात् जीव एवेति चेत्, न, तत्र हि परमेश्वरप्रसादादाविर्भूतस्वरूपो मुक्त उच्यते। यत्प्रसादात्स मुक्तो भवति स भगवान् पूर्वोक्तः ॥

नन्वीश्वरप्रसादात्प्राप्तिपहृतपाप्मत्वादिगुणो जीव एव हृत्पद्मस्थात्मा किं न स्यादित्याशङ्क्याह—

अन्यार्थश्च परामर्शः ॥ २० ॥

भवेदेवं, यदि 'एष ते' इति जीवं परामृश्य तस्य हृत्पद्मस्थात्मत्वं विधीयेत। न त्वेतदस्ति। किं तु ईश्वरार्थोऽयं परामर्शः। 'यं परज्योतिराख्यं भगवन्तमभिसंपद्य जीवः स्वेन रूपेणाभिनिष्पद्यते, स एष आत्मा' इति परमात्मानमेव 'एषः' इति परामृश्य तस्यात्मत्वं विधीयत इत्यर्थः ॥

अल्पश्रुतेरिति चेत् तदुक्तम् ॥ २१ ॥

दहर इत्यल्पश्रुतेर्न विष्णुरिति चेन्न, 'निचाय्यत्वादेवं व्योमवच्च' इत्युक्तत्वात्। खण्डनं प्राग्वत् ॥

कठवल्लीषु श्रूयते—'तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्। कथं नु तद्विजानीयां किमु भाति न भाति च ॥' इति। अत्र परमं सुखमिति किं विष्णुरन्यद्वेति संशये, अन्यदिति प्राप्तम्, 'तमात्मानं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्' इति ज्ञानिसुखस्य संनिहितत्वेन तस्यैव तदेतदिति परामर्शात्, भगवतः प्रकृतत्वेऽपि व्यवहितत्वात्। एवं प्राप्ते, सिद्धान्तमाह—

अनुकृतेस्तस्य च ॥ २२ ॥

परमात्मैवात्रानिर्देश्यं सुखमिति निर्दिष्टः, 'तमेव भान्तमनुभाति सर्वम्' इत्यनुकृतेः 'तस्य भासा सर्वमिदं विभाति' इति वचनाच्च। न हि ज्ञानिसुखमनुभाति सर्वं, नापि तद्भासा ॥

अपि च स्मर्यते ॥ २३ ॥

'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥' इति। 'न तद्भासयते सूर्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥' इति च। तथा चागत्या व्यवहितपरामर्शस्वीकार इति भावः। खण्डनं प्राग्वत् ॥

चतुर्थवल्ल्यामाम्नायते—'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य' इति। तत्रेशानो रुद्रो वायुर्विष्णुर्वेति संशये, रुद्र इति प्राप्तम्, ईशानशब्दस्य तत्र

रूढेः सा हि योगाद्बलीयसी। यद्वा, वायुरेवेशानः, इह श्रुतस्य भूतभव्यस्वामित्वस्य 'विश्वे देवा उपासते' इत्युत्तरत्र श्रुतस्य सर्वदेवोपास्यत्वस्य च वायावेव संभवात्। अत एव रुद्र इति पक्षो गर्भस्रावणैव गतः, तत्र सर्वस्वामित्वसर्वदेवोपास्यत्वयोर्बाधितत्वात्। वायोस्तु श्रुत्या तत्सिद्धिः। तथा च मन्त्रः—'कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन्। ते वायवे मनवे बाधितायावामयन्नुषसं सूर्येण॥' (ऋ ५. ५. ४.) इति। अङ्गेति संबोधने। ये देवा नमसा वायोर्नमस्कारादिना वृधासः ज्ञानादिगुणपूर्णाः। अनवद्यासः अजनायाद्यवद्यविधुराः पुरा आसन ते क्वचिद्रहस्यस्थाने सूर्येण साकं मनवे ज्ञानिने बाधिताय बाधिभिः संसारबाधवद्भिरिताय शरणं प्राप्ताय वायवे उषसं बुद्धिमवासयन् तद्विषयामकुर्वन्नित्यर्थः। एवं प्राप्ते, सिद्धान्तमाह—

शब्दादेव प्रमितः॥ २४॥

'ऊर्ध्वं प्राणमुन्नयति अपानं प्रत्यगस्यति। मध्ये वामनमासीनं विश्वे देवा उपासते॥' इति हि पञ्चवल्ल्यां श्रुतम्। तथा च वामन शब्दादेव विष्णुरिति प्रमितः। ननु इह प्राणप्रेरकत्वाद्वायुरेव प्राह्यः। तद्धि तल्लिङ्गम्, 'यथा सम्राडेवाधिकृतान् विनियुङ्क्ते एतान् ग्रामानधितिष्ठस्वैतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथक्पृथगेव संविधत्ते' इति श्रुतेरिति चेत्, न, लिङ्गापेक्षया वामन इति श्रुतेर्बलीयस्त्वात्। 'श्रुतिर्लिङ्गं समाख्या च वाक्यं प्रकरणं तथा। पूर्वं पूर्वं बलीयः स्यादेवमागमनिर्णयः[1]॥' इति स्कान्दे। अत्र तत्त्वप्रकाशिका—नाममात्रेण निर्देशः श्रुतिः। असाधारणधर्मो लिङ्गम्। निराकाङ्क्षपदानि वाक्यम्। एकप्रमेयप्रतिपादकानेकवाक्यानि प्रकरणम्। अनेकप्रमेयप्रतिपादकमेकार्थे तात्पर्ययुक्तं स्थानम्। समानोक्तिः समाख्या। तत्र श्रुतेः साक्षादर्थबोधजनकत्वात् सर्वप्राबल्यम्। लिङ्गस्यानुमापकतया तदानन्तर्यम्। वाक्यस्यानेकार्थकथनद्वाराऽर्थानुमापकत्वात्ततोऽपि दौर्बल्यम्। प्रकरणस्य बह्वर्थपरत्वेनार्थानुमितिहेतुत्वात्तदवमता। स्थानस्यातिबह्वर्थकथनेनाभिप्रेतार्थानुमितिजनकस्य ततोऽपि दौर्बल्यम्। समाख्यायाः स्थानान्तरगतायाः सादृश्यमात्रेणार्थानुमापकत्वात्ततोऽपि दुर्बलत्वम्। न च स्कान्दे यथास्थित एव क्रमः, 'आत्मा प्रकरणात्' इत्यत्र समाख्यायाः प्रकरणेन बाधितत्वात्। तथा जैमिनिः—'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति। 'वाक्यं प्रकरणं स्थानं समाख्या च तथाविधा' इति भाष्यकारोक्तिरप्येवं संगच्छत इति। न च निरवकाशत्वं लिङ्गस्य, विष्णौ सावकाशत्वात्॥

ननु सर्वगतस्याङ्गुष्ठमात्रत्वं कथमित्यत आह—

---

1. ०लिङ्गतः

हृद्यपेक्षया तु मनुष्याधिकारत्वात् । २५ ॥

हृदि विद्यमानस्याकाशस्याङ्गुष्ठमात्रतया तत्राभिव्यक्तायाः भगवन्मूर्तेरङ्गुष्ठमात्रत्वं युज्यते । पश्चादीनामङ्गुष्ठाभोऽपि मनुष्याणामेव वेदविद्याधिकारादविरोधः तस्मादीशानो विष्णुरेवेति सिद्धमिति माध्वाधिकरणशरीरम् । खण्डनं प्रारभते ।

किं च, रुद्र इति पक्ष इह त्वया दूषयितुमशक्यः । यत्तूक्तम्—'गर्भस्रावेण गतः मः' इति, तत्र श्रुतिस्मृतिपुराणाद्यपरिशीलनप्रयुक्तम् । सामन्वयाधिकरणभाष्याद्याधिकरणयोः खण्डने स्फुटीकृतमेतत् । यदपि 'कुविदङ्ग' इत्युदाहृतं तत्तु विपरीतम् , नमसा 'नमस्ते रुद्र' इत्यादिमन्त्रेण रुद्रनमस्कारादिना वा 'तव श्रिये मरुतो मर्जयन्त' इत्यादिसंवादात् । वृधास इत्यादि प्रारब्धत् । बाधिताय तापत्रयाभिभूत य जनेव मननादिज्ञानसामग्रीप्रवृत्ताय वायवे बुद्धि-नवासयन् उपादिशन्निति व्याख्यानात् । स्वपक्षे तु बाधितायेत्यत्र इर्णस्य दीर्घतापत्तेः, अवग्रहापत्तेः 'तृतीया कर्मणि' इति प्रतिषेधापत्तेश्च । यत्तु सामनश्रुतिर्बलीयसीति, तत्र, उपक्रमस्थाया ईशानश्रुतेरसंज्ञातविरोधितया ततोऽपि बलीयस्त्वात् । तथा च 'वेदो वा प्रायदर्शनात्' इत्यधिकरणे भट्टपादैरुक्तम्—'असंजातविरोधितयार्थवादो यथा स्थितः । आस्थेयस्तद्विरुद्धस्य विध्युद्देशस्य लक्षणा ॥' इति ॥

स्यादेतत् । जैमिनीयमीमांसायां यथा तथाऽस्त । माध्वमते तु उपक्रमादुपसंहार एव बलीयान् । इदं च ब्रह्मतर्के सिद्धम् 'उपक्रमादिलिङ्गानां बलीयो ह्युत्तरोत्तरम् । श्रुत्यादौ पूर्वपूर्वं च ब्रह्मतर्कविनिर्णयात् ॥' इत्यनुव्याख्यानोक्तेः । 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥' इति जैमिन्यधिकरणभाष्योदाहृतबृहत्संहितावचनविवरणावसरे तत्त्वप्रकाशिकायां तथैव सिद्धान्ततथोक्तेति चेत् , सत्यम् , प्रसिद्धतर्कमीमांसादिपरिशीलनशालिभ्यः पण्डितेभ्यो बिभ्यतस्तव वन्ध्यानुप्रायब्रह्मतर्कशरणीकरणमुचितमेव ; किं तु 'श्रुतिलिङ्ग...' इत्यादिजैमिनिसूत्रं घनगर्जितन्यायेन श्रुत्वा तदीयांश्चार्थांस्तदनविरुद्धानेवोत्प्रेक्ष्य यन्मीमांसाच्छायानुकारि प्रलपितं तदेवानुचितम् । इह हि यच्छ्रुत्यादीनां लक्षणादिकं त्वयोक्तं तदतितुच्छमिति स्पष्टमेव मीमांसादर्शिनाम् । किं च, न केवलमिहैवेत्थम् , किं तु त्वद्भाष्यानुव्याख्यानतत्त्वप्रकाशिकान्यायसुधासु प्रायेण मीमांसकमर्यादोल्लङ्घनेन व्यवहारस्तन्मतमित्यन्यथाऽनुवादश्च दृश्यते । तथा हि—'द्वादशाहवदुभयविधं बादरायणोऽतः' इति सूत्रे भाष्यम्—द्वादशाहः क्रत्वात्मकः सत्रात्मकश्च भवतीति । 'लिङ्गभूयस्त्वात्तद्धि बलीयस्तत्' इति सूत्रे श्रवणगुरुप्रदानयोः पश्चानेतिकर्तव्यतारूपयोः गुरुप्रदानं प्रबलमित्युपपादनार्थं तत्त्वप्रकाशिका—न चेतिकर्तव्यतात्वेन दौर्बल्यं, यज्ञीयहिंसायामितिकर्तव्यताया एव प्राबल्यदर्शनादिति । 'भूम्नः

क्रतुवज्ज्यायस्त्वं तथा च दर्शयति' इति सूत्रे तत्त्वप्रकाशिका—यथा खलु दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकस्य क्रतोः सर्वयागेष्वनुवर्तन एव साफल्यात्, अन्यथा वैफल्याज्ज्यायस्त्वम्; ततश्च सर्वैः कर्तव्यत्वं, तथा भूमत्वस्यापि सर्वत्रानन्दादिषु सहभावेनोपासन एवेष्टसिद्धेरिति। 'स्वामिनः फलश्रुतेरित्यात्रेयः' इत्यधिकरणे अयजमानानामप्यृत्विजां तत्रयागफलमिवास्वामिनामपि कर्तृणां कर्मज्ञानफलमिति भाष्यादौ स्थापितम्। जिज्ञासासूत्रे च प्रथममसंहितयोंकारनिर्देशं सूत्रावयवभूतमङ्गीकृत्यासंहिताप्रयोजनमुत्तरसूत्रेष्वप्यनुगतिसूचनमिति व्युत्पादनार्थं न्यायसुधा—सर्वाणि हि सूत्राणि प्रत्येकमनेकवेदवाक्यविचारपरत्वादवान्तर। ब्रह्मविद्याः। 'सवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यते' इति श्रौतार्थवादसामर्थ्यात् सर्वास्वपि ब्रह्मविद्यासु आद्यन्तयोरोंकारस्योहः कर्तव्य इति गम्यते। न चोह्यमानं वाक्यात् पृथगिति शक्यते वक्तुम्, मन्त्रेष्वप्यूह्यमानस्य मन्त्रानवयवत्वप्रसङ्गादिति। आनन्दमयाधिकरणे च न्यायसुधा— 'ज्योतिषां स्तोमो हि ज्योतिष्टोमः' इति। 'ज्योतिरुपक्रमात्तु' इत्यधिकरणे तत्त्वप्रकाशिकाऽप्येवम्। अत्र सर्वत्र प्रसिद्धमीमांसानुरोधी व्यवहारो न भवतीति तद्विदां सुविदितमेव। अहीनसत्ररूपेण द्वादशाहो न तु क्रतुसत्ररूपेण, क्रतुत्वस्योभयसाधारणत्वात्। यज्ञीयहिंसायामितिकर्तव्यताप्राबल्यं दृष्टमिति त्वत्यन्तनिरालम्बनम्। दीक्षणीयादिसकलाङ्गसहितः क्रतुः सर्वयागेष्वनुवर्तत इत्यपूर्वो व्यवहारः। दीक्षणीयादिज्योतिष्टोमेतिकर्तव्यताकलाप एव हि तद्विकृतिभूतेषु[1] अतिदिश्यते, न तु ज्योतिष्टोमक्रतुरपि, न वा सर्वयागेषु। न चेतिकर्तव्यताकलापः क्रतुरिति व्यवह्रियते। न च ज्योतिष्टोमेतिकर्तव्यताकलापस्य तद्विकृतिष्वतिदेशेन किमपि ज्यायस्त्वम्, ऐष्टिकादीतिकर्तव्यताकलापस्यापि तद्विकृतिष्वतिदेशेन साम्यात्। न चानतिदेश्यास्वप्रधानाज्ज्यायस्त्वं विवक्षितम्, विरोधात्; न ह्यमात्यानपि सेवमानो भटवर्गस्तानसेवमानाद्राज्ञो ज्यायान् भवति। नाप्यर्थलोपादिनाऽनतिदेश्यादङ्गान्तराज्ज्यायस्त्वम्, दीक्षणीयादेरपि त्रेधा तथाप्रत्याम्नानादिनाऽश्वमेधादिष्वनतिदेशात्। 'सर्वेष्वयजमाना ऋत्विजः' इति तु प्रलापमात्रम्, 'ये यजमानास्ते ऋत्विजः' इति तत्र यजमानानामृत्विक्कार्ये विधानात्। न चोंकारस्योत्तरसूत्रेषु अनुगतिरूहः, 'देवस्य त्वा' इत्यादिमन्त्रेषु सूर्यादिशब्दलक्ष्येऽग्निशब्दादेरिव कस्यचित् स्थानिनः शब्दस्याभावात्, अनुषङ्गस्योहाङ्गेन व्यवहाराच्च। यथाऽऽहुः—'आम्नायमानं ह्यनुषज्यमानमन्तर्गतं मन्त्रनिरूपणायाम्' इति 'अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात्' इति च। न च ज्योतिषां स्तोम इति ज्योतिष्टोमनामनिर्वचनम्; किं तु 'त्रिवृत्पञ्चदशः सप्तदश एकविंश एतानि वाव ज्योतींषि य एतस्य स्तोमः' इति वाक्यशेषबलात् ज्योतिर्नामकाः स्तोमा यस्येति तन्निर्वचनं मीमांसकाभिमतम्। बहुव्रीहित्वप्रयुक्तपूर्वपदप्रकृतिस्वरदर्शनाच्चैवमेव युक्तम्। 'ज्योतिष्टोमं प्रथममुपयन्ति' इत्यत्र हि आद्युदात्त-

1. विश्वजिदादिषु इत्यधिकः पाठः

त्वमेव तैत्तिरीया अधीयते। न च ज्योतिःशब्दे फिट्स्वरः शङ्क्यः, 'युतेरिसञ्ज्ञादेश्च जः' इति इसन्प्रत्यये नित्त्वेनाद्युदात्तत्वात् ॥

एवं तावन्मीमांसकमर्यादोल्लङ्घनेन व्यवहार उदाहृतः। तन्मतमित्यन्यथाऽनुवादमप्युदाहरामः—'अङ्गीकृतत्वादपि तैः पदार्थानां पृथक् पृथक्। क्रियापदेनान्वयस्य वाक्यभेदाद्धि दूषणम् ॥' इत्यनुव्याख्यानम्। एतच्च सत्यज्ञानादिवाक्येषु ब्रह्मानुवादेन सत्यत्वाद्यनेकविधाने वाक्यभेदः स्यादिति शङ्कां, 'पृथगेव च वाक्यत्वं पृथगन्वयतो भवेत्। अवान्तरत्वाद्वाक्यानां वाक्यभेदो न दूषणम् ॥' इत्यभ्युपगमेन परिहृत्य मीमांसकमतेऽपीदं समानमित्यनेन श्लोकेनोच्यत इति न्यायसुधायां व्याख्यातम्। तैर्मीमांसकैरपि 'अरुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति' इत्यादावरुणादिपदानां क्रियापदेन पृथक्पृथगन्वयस्याङ्गीकृतत्वात् तेषामपि हि वाक्यभेदात् दूषणं प्रसज्येत। तत्रैतावदेव वक्तव्यम्—महावाक्यभेद एव दूषणम्, नत्ववान्तरवाक्यभेद इति; तदस्माकमपि समानमिति। न च प्रसिद्धमीमांसकमतेऽवान्तरवाक्यभेदोऽस्ति, क्रयभावनाया विधेयत्वेन 'अप्राप्ते तु विधीयेरन् बहवोऽप्येकयत्नतः' इत्युक्तरीत्या आरुण्यादिविशिष्टक्रयभावनारूपक्रियैक्येन पदैकवाक्यतायाः एव तैः स्वीकारात्। एवमन्यत्रापि मीमांसानवबोधमूलकं बहु मध्वादिभिर्व्यर्थबहुतम। विस्तरभयान्नोद्दृङ्क्यते। न च कठवल्लीमन्त्रे ईशानशब्दो भूतभव्यस्येति पदसमभिव्याहारात् भूतभव्यप्रतियोगिकेशितृत्वपरो न तु शिवे रूढिमानिति वाच्यम्, तथा सति वामनशब्दोऽपि प्राणापानमध्यस्थितोक्त्या पूर्वापरमन्त्रेषु बह्वधाऽङ्गुष्ठमात्रतोक्त्या च ह्रस्वत्वपरो न तु विष्णौ रूढिमानिति त्वदभिमतश्रुतेरपि हानिप्रसङ्गात्। ईशानशब्दस्य योगरूढ्या यौगिकांशमादाय समभिव्याहृतान्वयस्यापि संभवाच्चेति दिक् ॥

स्यादेतत्। 'मनुष्याधिकारत्वात्' इति सूत्रशेषेण मनुष्याणामेव विद्याधिकार इत्युक्तम्। तथा च 'विश्वे देवा उपासते' इति श्रुत्युक्तं देवोपास्यत्वं विरुध्यत इति आशङ्क्य देवानामधिकारं समर्थयते सूत्रकारः—

तदुपर्यपि बादरायणः संभवात् ॥ २६ ॥

मनुष्याणां देवादित्वप्राप्तेरुपरि वेदविद्याधिकारं बादरायणो मन्यते, तेषां विशिष्टबुद्ध्यादिसंभवात्। तिर्यगादीनां तदभावादधिकाराभावः। मनुष्यत्वविशेषणमपि तिर्यगादिव्यावृत्त्यर्थमेवोक्तम्, न तु देवादिव्यावृत्त्यर्थमिति भावः। अत एव तिर्यगादीनामपि येषां विशिष्टबुद्ध्यादिमत्त्वं तेषामस्त्येवाधिकारः; यथा [1]जरितार्यादीनाम् ॥

1. पठितार्यादीनाम्।

मन्त्रवर्णाः शब्दापशब्दविभागाभिज्ञतदनभिज्ञस्तुतिनिन्दारूपाः। दृष्टार्थेऽपि च शब्दप्रयोगे तदाश्रितः साधुनियमो भोजनाश्रितदिङ्नियमवच्छास्त्रेण क्रियत इति न प्रयोगोत्पत्त्यशास्त्रत्वादव्यवस्था ॥

तन्वं विसस्रे स्वात्मानं विवृणुतेऽपि। तत्र दृष्टान्तः—जायेव पत्य इति। उशती कामयमाना। अनेन मन्त्रेण व्याकरणस्य साध्वसाधुविवेचनकौशलसंपादनद्वारा वाक्यस्वरूपप्रकाशनं फलमुक्तम्। 'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ॥' इति मन्त्रान्तरम्। अस्यार्थः—सक्तुं अतिदुःशोधं तितउना चालिन्याख्येन उत्पवनसाधनेन पुनन्त इव धीराः मनसा प्रज्ञया यत्र वाचमक्रत कृतवन्तः। अत्र अस्मिन् वाग्विषये दुर्गे मार्गे सखायः सन्तः सख्यानि जानते व्याकरणसाहाय्यकान्यवगच्छन्ति। एषां वैयाकरणानां आधिवाचि भद्रा लक्ष्मीः लक्षणात् लक्ष्मीः लक्षणार्थसूत्रसहितेर्निहितेति। अनेन व्याकरणाभिज्ञस्तुतिः कृता। एवं 'यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले। सोऽनन्तमाप्नोति फलं परत्र वाग्योगविद्दुष्यति चापशब्दैः ॥' इति स्मृत्यनुमितश्रुत्यादयश्च साध्वसाधुशब्दाभिज्ञतदनभिज्ञस्तुतिनिन्दारूपा इहानुसंधेयाः। ननु दृष्टार्थाच्छब्दप्रयोगात् कथमामुष्मिकफलं ब्रूते शास्त्रमित्याकाङ्क्षायामाह—दृष्टार्थेऽपि चेति। भोजनाश्रितदिङ्नियमवादिति। अयं पुरुषार्थनियमे दृष्टान्तः। क्रत्वर्थनियमे तु 'पयो व्रतं ब्राह्मणस्य' इति व्रतनियमो दृष्टान्तः। द्विविधो हि क्रत्वर्थपुरुषार्थभेदेन साधुशब्दप्रयोगनियमः। ज्योतिष्टोमप्रकरणाम्नातेन 'तस्माद्ब्राह्मणेन न म्लेच्छितवै' इत्यादिना तदङ्गापशब्दवर्जनाविधानेन 'आहिताग्निरपशब्दं प्रयुज्य' इत्याहिताग्नेरपशब्दप्रयोगनिमित्तकेष्टयन्तरप्रायश्चित्तविधानेन चार्थलभ्यः क्रतुविषयः। 'सन्तु प्रयुङ्क्ते' इति श्लोके 'दुष्यति चापशब्दैः' इति निषेधेनाप्यर्थासिद्ध। स हि श्लोकः क्रतुविषयः। 'वाचा च मनसा च यज्ञो वर्तते' इत्यादिलिङ्गदर्शनेन वाग्योगशब्दस्य यज्ञपरत्वात्, आहत्य वाग्योगविच्छब्दस्य ऋत्विग्यजमानपरत्वात्। यदि वाग्योगविदित्यस्य प्रकृतिप्रत्ययसंबन्धविद्वैयाकरण इत्यर्थः, तदाऽपि महाभाष्यादाहृतोऽयं श्लोकः क्रतुविषय एव। अपशब्दोच्चारणनिषेधः सर्वोऽपि क्रतुविषय एव, न लौकिकव्यवहारविषयोऽपीति भाष्य एव प्रतिपादितत्वात्। एवं चात्रैव श्लोके साक्षादेव क्रत्वर्थतया साधुशब्दनियमविधानम्। 'सोऽनन्तमाप्नोति' इति तु 'ऊर्जं पशूनाप्नोति' इतिवत्क्रतुफलेनैवाङ्गस्तुतिरिति द्रष्टव्यम्। 'एकः शब्दः' इत्यादिवचनेन तु पुरुषार्थनियमलाभः। दृष्टार्थनियमेन साधोरसाधोर्वा शब्दस्य प्रयोगे प्राप्ते साधुशब्दनियमोऽनेन क्रियते। यथा भोजनार्थमनियतदिङ्मुखप्राप्तौ 'आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः॥' इति वचनेनायुर्यशःफलविशेषाय दिग्विशेषनियमः। एवं चाभ्युदयफलकामनाकालप्राप्तप्रयोगमात्राश्रयोऽयं साधुशब्दनियमो न सार्वदेशिकसकलप्रयोगाश्रय इति लौकिकव्यवहारे नापशब्दप्रयोगनिषेधशङ्का-

---

1. जयम्

सत्यानृतवदनवर्जनयोश्चाविगीतमेव शास्त्रार्थत्वं । च शब्दार्थभेदेन द्विविधम् । तत्र यथैवार्थस्य यथास्थितार्थकथनं धर्मो तथा शब्दस्यापि यथावस्थितार्थविप्लुताशब्दोच्चारणमित्यर्थः । यथा चार्थानृतमन्यथास्थितस्यान्यथा वचनं सत्यनाशाय, तथा शब्दानृतमपि अन्यरूपे वाचके सत्यन्यरूपे चारणादि जावत् । भेदेन च ये उत्पत्त्यशास्त्रत्वम् । द्वाभ्यामेव च वाक्याभ्यां साधूनेव शब्दान्सत्यपर्यायान्प्रयुञ्जीत, नासाधूनशब्दाननृतपर्यायानिति समस्तशब्दापशब्दावबोधप्रतिषेधसिद्धेर्ने वाक्यकल्पनागौ । साधुत्वासाधुत्वे एव च शब्दापशब्दसत्यानृतपर्याये उपलक्षणे । अनादिवाच्यत्वेन साधुत्वं तद्विपर्ययश्चासाधुत्वम् ॥

वकाशः । एवं व्याकरणस्य प्रयोगानुगमे श्रुतिमूलत्वेन च प्रामाण्यसमर्थनेन 'प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात्' इति सूत्रेण प्रत्याक्षेपः पूर्वपक्षो निरस्त इत्याह—न प्रयोगेति । प्रयोगस्य, साधव एव प्रयोक्तव्या इति प्रयोगनियमस्योत्पत्त्यर्थं व्याकरणम् । करणार्थे क्तिन्प्रत्ययः । तस्याशास्त्रत्वान्मूलश्रुतिरहितत्वात् शब्देषु गोमाद्यर्थादिषु व्यवस्था नियमो न सिध्येत् । अतो भाष्यादयोऽपि प्रयोक्तव्या इति सूत्रार्थः ॥

सत्यवचनविधानानृतवचननिषेधरूपाभ्यां प्रसिद्धशास्त्राभ्यामपि साधुशब्दप्रयोगविधानासाधुशब्दप्रयोगनिषेधासाङ्गाह—सत्यानृतवदनवर्जनयोश्चेति । ननु यद्यपि यथार्थान्यथार्थप्रतिपादकत्वसमशक्तिप्रयुक्तविप्लुतिरहितत्वं चेति द्विविधं सत्यशब्दप्रवृत्तिनिमित्तम् ; अन्यथाभूतार्थप्रतिपादकत्वं वाचकान्यरूपेणोच्चारणावषयत्वरूपं विप्लुतत्वं च द्विविधमनृतशब्दप्रवृत्तिनिमित्तम् । तयोश्च प्रवृत्तिनिमित्तयोरात्म्याश्रयो वाक्यम्, द्वितीयस्य पदस्यति सत्यानृतशब्दयोर्भेदः । तर्हि विधिनिषेधस्थयोस्तयोरेक एवार्थः परिग्राह्य इति कथं ताभ्यामेव साध्वसाधुप्रयोगाविनिषेधावुद्धरूपि वर्ण्येते ? उच्यते, अर्थसबन्धाभावराहित्यं सत्यत्वम्, अर्थसबन्धाभावोऽनृतत्वमित्यभिप्रेत्य तत्तदुपपादनद्वैविध्यमुक्तं ग्रन्थे । तत्र यथार्थवाक्यस्यार्थतत्सबन्धयोः सत्त्वात्तदभावराहित्यम्, गवादिशब्दस्याविप्लुतित्वेनानादित्वादिति निरुक्तसत्यत्वोपपादनम् । अयथार्थवाक्यस्यार्थाभावादेव तत्सबन्धाभाव इति गाव्यादिशब्दस्याशक्तिजस्यार्थिधालक्षणाद्यभावादिति निरुक्तानृतत्वोपपादनम् । अर्थसबन्धश्चात्र वृत्तिमूलावाध्यविषयप्रतिपाद्यप्रतिपादकभावो वाक्यसाधारणो विवक्षितः । तेन अयथार्थवाक्यस्य वृत्तिमूलकः प्रतिपाद्यप्रतिपादकभावः सन्नपि बाध्यविषयः ; गाव्यादेरबाधितविषयः सन्नपि न वृत्तिमूलक इति सत्यत्वं तदुभयव्यावृत्तिः, अनृतनिषेधे तदुभयसङ्गतिश्च । यद्यपेवमुपपादयितुं शक्यम्, तथाऽपि 'एष ह वै सत्यं वदन् सत्ये जुहोति योऽस्तमिते सायं जुहोति उदिते प्रातः ; प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽभिहोत्रम्' इत्यादिवैदिकप्रयोगेषु लौकिकप्रयोगेषु च सत्यानृतशब्दयोः सदसदर्थगोचरवाक्यविषयत्वेनैव प्रसिद्धत्वात् गाव्यादेर्लौकिकव्यवहारे शिष्टगर्हितत्वाभावाच्च प्रौढिवादमात्रेणोक्तम् । सर्वथा साध्वसाधुवाक्यः श्रुतिमूल इत्यत्र तात्पर्यम् । अनन्तवाक्यकल्पनाभावमेव स्पष्टीकरोति—साधुत्वासाधुत्वे एवेति । उपलक्षणे विधेयनिषेध्यसंग्राहकरूपे ॥

यत्तु प्रयोगप्रत्ययान्यथानुपपत्त्या गाव्यादीनामपि वाचकत्वाद्व्यवस्थानुपपत्तिरित्युक्तम्, तत्रोच्यते—यद्यप्यमीषामवाचकत्वम्, यद्यपि च मुख्याभावे गौणलाक्षणिकयोरसंभवः, तथाऽपि वाचकशक्तिजन्यतया मूलशब्दोपस्थापनेन प्रत्ययकत्वं भविष्यति। अशक्तिजन्यत्वापरिज्ञानाच्चोपशृण्वन्तो बालास्तत्रैव शक्तिं संक्रामयित्वा तथैव वयं व्याहरन्ति। तेभ्यश्च शिक्षित्वाऽन्येऽपीत्येवमपि प्रयोगप्रत्ययोरुपपत्तौ नैकान्ततः सर्वेषामप्यविच्छिन्नपारम्पर्यवाचकत्वमध्यवसातुं शक्यते। संभवति चैव नानेकशब्दत्वेनैकार्थार्थम्याभ्युपगन्तुं न्याय्यम्। अनेकशक्तिकल्पनप्रसंगात्। प्रयोगबलाच्चाष्टविधदोषनिदानविकल्पापत्तेः, वाच्यवाचकयोश्चैकधाऽवधारणस्य क्रियमाणस्य बाधप्रसङ्गात्। मात्रादिज्ञानेन हि यस्यामभिधानक्रियायां कर्म तस्यां गोशब्दः करणमित्यनयोः शब्दार्थयोः संबन्धः तद्यदि गाव्या-

---

ननु गाव्यादीनामपि वाचकत्वम्, सकृत्पुरुषस्मरणादनादित्वं चास्तीति शङ्कामनूद्य प्रयोगप्रत्ययथोर्वाचकत्वेऽपि सादित्वेऽप्यशक्तिजन्यत्वेनोपपत्तेर्न वाचकत्वानादित्वसिद्धिरित्याह—यद्यित्यादिना। ननु गोगव्यादीनां सर्वेषामपि वाचकत्वमेवास्तु, किमर्थमदृष्टाश्रुताशक्तिजन्यत्वादिकल्पनेत्याशङ्क्याह—संभवतीति। अर्थव्यवहारार्थमेकेनापि शब्देनोपपत्तेरनेकत्रैकार्थविषयानेकशक्तिकल्पना गौरवग्रहेतत्यर्थः। प्रयोगबेलायां चेति। प्रयोगप्रत्ययान्यथानुपपत्त्योभयत्रापि शक्तिकल्पनानन्तरं सास्नावदर्थप्रत्ययाय गोशब्दप्रयोगे गाव्यादिशब्दे च तत्कारणता गृहीतवत् यत् प्रमाणं तत्र प्राप्तप्रामाण्यपरित्यागः अप्राप्ताप्रामाण्यस्वीकारश्च दोषद्वयं प्राप्नोति। तत्प्रत्ययाय पुनर्गोव्यादिशब्दप्रयोगे गाव्यादिशब्दस्य तत्कारणताग्राहकप्रमाणे परित्यक्तप्रामाण्यस्वीकारः, परिगृहीताप्रामाण्यपरित्यागश्चेति दोषद्वयम्; गोशब्दस्य तत्कारणतां गृह्णातीति प्रमाणे परिगृहीतप्रामाण्यपरित्यागः, परित्यक्ताप्रामाण्यस्वीकारश्चेति दोषद्वयं; पुनर्गोशब्दप्रयोगे गोशब्दस्य तत्कारणतां गृह्णातीति प्रमाणे परित्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति दोषद्वयम्; इत्येवं पर्यायत्रयेणैकैकस्मिन् प्रमाणे चत्वारश्चत्वारो दोषा इत्यष्टदोषदुष्टा विकल्पश्च प्रसज्येतेत्यर्थः। किं च, प्रयोगप्रत्यथान्यथानुपपत्त्या गोगाव्यादिशब्दयोः सास्नावत्प्रत्ययकरणत्वकल्पने प्रयोगबेलायामष्टदोषदुष्टविकल्पवत् गोशब्देन सास्नावानभिधीयत इत्युपदेशरूपवाक्येन वाचकत्वग्रहे तल्लभ्यस्य कर्मकरणयोः परम्परसंबन्धनियमस्य बाधोऽपि स्यादिति दोषान्तरमाह—वाच्यवाचकयोश्चेति। वाच्यवाचकयोः कर्मकरणयोरेककर्म्यादिभिधानरूपैककियान्वयात्तद्वारा परम्परसंबन्धो भवन् सास्नावत्कर्मकाभिधानक्रियायां गोशब्द एव करणम्, गोशब्दकरणकाभिधानक्रियायां तद्वारा सास्नावानेव कर्मेति नियतसंबन्धरूप एव लभ्यते। यथा 'अरुणयैकहायन्या सोमं क्रीणाति' इत्यत्र आरुण्यैकहायन्योः क्रयभावनान्वितयोः पश्चात्परस्परसंबन्धो भवन्नेकहायन्यवच्छेदद्वारैव आरुण्यं क्रयसाधनम्, आरुण्यावच्छिन्नैव एकहायनी क्रयसाधनमिति नियतसंबन्धरूपो लभ्यते। यथा वा तत्रैव कर्मकरणयोः क्रियाद्वारा

दिभिरपि मास्नादिमानभिधीयते, ततस्तस्यां वेलायां मास्नादिमत्कर्मिकायामप्यभिधानक्रियायां गोशब्दस्य करणत्वाभावात्प्रतीतिबाधः। तस्मादेकैकस्यैव वाचकत्वमितरे तदशक्तिजा इति न्याय्यम्॥

करहस्तादिषु तु विशेषानवधारणान्न्याय्याऽप्यनेकशब्दता गत्यन्तराभावादङ्गीक्रियते। गोगाव्यादिषु त्वभियुक्तस्मरणास्मरणाद्विशेषोऽस्तीति न तावत्सर्वेषां वाचकत्वम्। वाचकरूपनियमेऽपि स्मृतेः स्मृत्यन्तरमेव मूलम्, तस्याप्यन्यादित्येवमनादिरेवैषा स्मृतिपरम्परा। न चान्धपरम्परान्यायः, शब्दस्वरूपस्य शब्दान्तराद्विविक्तस्य प्रत्यक्षत्वात्। सर्वेऽपि हि स्वे स्वे काले गवादिशब्दान्प्रत्यक्षत एवोपलभन्ते। अतीतकाले च सत्तां पूर्वेभ्यो वृद्धेभ्यः श्रुत्वाऽवधारयन्ति। सर्वकालमपि च केचन वृद्धाः सन्तीति तत्प्रत्यक्षसंभवान्न कदाचिदपि प्रत्यक्षविच्छेदः। सर्वकालवर्तित्वमेव चानादित्वं साधुत्वम्; तदप्य-

---

परस्परसंबन्धो भवन सोमकर्मिकायामेव क्रयभावनायामरुणिमैकहायन्यौ करणे। तत्करणिकायामेव तस्यां सोमः कर्मेति परस्परनियमो लभ्यते। एवं च गाव्यादिभिरपि मास्नावदभिधाने तदा मास्नावत्कर्मिकायामभिधानक्रियायां गोशब्दस्य करणत्वाभावादुपदेशजन्यवाक्यजप्रतीतिविषयस्य नियमस्य बाधः स्यादित्यर्थः। संगृहीतमर्थं स्वयमेव विवृणोति—मास्नादिमानित्यादिना॥

एवम् 'अन्यायश्चानेकशब्दत्वम्' इति गुणसूत्रोक्तहेतुमतिलङ्घ्य करहस्तादिष्वभियुक्तानभियुक्तप्रयोगविशेषानवधारणादन्याय्यानेकशब्दत्व गत्यभावादङ्गीकृतमित्याह—करेति। प्रकृते विशेषानवधारणमसिद्धमित्याह—गोगाव्यादिष्विति। एवं व्याकरणस्य, साधव एव प्रयोक्तव्या इति प्रयोगनियमरूपे प्रतिपाद्ये समूलतामुपपाद्य गवादय एव साधव इति साधुनियमरूपेऽपि प्रतिपाद्ये तामुपपादयति—वाचकरूपेति। ननु व्याकरणस्य व्याकरणान्तरमात्रमूलत्वे अष्टकादिस्मृतीनां स्मृत्यन्तरमात्रमूलत्व इत्यन्धपरम्परा स्यादित्याशङ्क्य परिहरति—न चेति। शब्दस्वरूपस्येत्यादिवाक्येन संगृहीत परिहारं स्वयमेव विवृणोति- सर्वेऽपि हीति। सर्वेऽपि मनुवृद्धमन्वादयः स्वस्वकाले नानाशाखाविप्रकीर्णमष्टकादिमूलवाक्यजातमिव सर्वेऽपि व्याकरणकर्तारः स्वस्वकाले गवादिशब्दान् मास्नावत्प्रभृतिषु प्रयुज्यमानान् प्रत्यक्षेणोपलभन्त इत्यर्थः। स्वस्वकाले प्रत्यक्षयन्तः कथमतीतकाले तत्सत्ता प्रतिपद्येरन्? येन यदृच्छाशब्दवैषम्यादनादित्वं निश्चिनुयुरित्याकाङ्क्षायामाह— अतीतकाले च सत्तामिति। ननु वृद्धव्यवहारपरम्परायाः अनादित्वरूपं साधुत्वं गाव्यादीनामपि स्यादित्याशङ्क्य तद्वैषम्यमाह—तदपीति। अपिशब्दो भिन्नक्रमः। तत्साधुत्वमावेच्छिन्नपारम्पर्याभियुक्तस्मरणेनापि सुग्रहमित्यर्थः। उक्तं हि वार्तिके—'एकस्य च यथा युक्त्या मूलवत्त्वं निरूपितम्। पौरुषेयान्तरग्रन्थमूलताऽपि तथेष्यते॥' इति। एवं चात्र

विच्छिन्नपारम्पर्याभियुक्तस्मरणेन सुलभमिति न निर्मूलत्वम्। न च विगानादप्रामाण्यम्, श्रुतीनामपि ग्रहणाग्रहणादिविगानदर्शनात्। फलं चास्य शब्दापशब्दविभागज्ञानमुपादानपरित्यागोपयोगि धर्माधर्मप्राप्तिपरिहारार्थम्, रक्षोहादि च। वेदविरुद्धं कामं भवत्वप्रमाणं सर्ववेष्टनादिस्मरणवत्, न तावता सर्वाप्रामाण्यम्॥

प्रत्यक्षव्याकरणस्मृतिपरम्परयोः सिंहकाननन्यायेन परस्परानुग्रहाद्दुराधर्षतेति भाव.। किं चाभियुक्तशब्देन प्रसिद्धाप्ततमभाववद्वेदाभियुक्तत्वमपि विवक्षितम्। तेन वेदेषु दृष्टप्रयोगान गवादिशब्दान भाषायामपि पश्यन्तः स्मर्तारः तान लोकेऽपि साधुत्वेन समग्रहीषुः ; न तु तदशक्तिजत्वेनोपपन्नान गाव्यादीनपीति युक्तमेवेत्याशयः। शास्त्रप्रयोजनाशे भाष्यवार्तिककारयोः परस्परविगानं परिहरति— ग्रहणाग्रहणेति। प्रौढ्या विकल्पवादोऽय अन्तो विकल्पमाश्रित्यापि विरोधः परिहरणीय इति तयोरभियुक्तत्वख्यापनार्थम्। वस्तुतस्तु 'शास्त्रमूले प्रयोगेऽभ्युदयः' इति वार्तिककारोक्तरीत्या ज्ञानप्रयोगयोर्विशेषणविशेष्यभावेन समुच्चय एव भाष्यकृतोऽभ्युपगमतः। अत एव भाष्ये तस्य प्रत्याख्यानं न कृतम्। किं तु 'शब्दज्ञानाद्धर्मश्चेदपशब्दज्ञानादधर्मोऽपि भवेत्' इत्यस्यैवांशस्य प्रत्याख्यानं कृतम्। 'एकः शब्दः' इत्यादिश्रुतेरपि शास्त्रमूलकतत्स्यज्ञानपूर्वकप्रयोगादभ्युदय इत्यर्थाश्रयणान्न वाक्यभेदः। एवं च व्याकरणमूलज्ञान विना केवल पूर्वप्रयोगादिदर्शनेन साधुशब्दप्रयोगान्नाभ्युदय इति पर्यवस्यति। वार्तिके तु 'एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः शास्त्रान्वितः' इति शास्त्रान्वितत्वविशेषणयुक्तः श्रुतिपाठो लिखितः। तेन अधीतस्वाध्यायमूलकतदर्थावगतिपूर्वकात्कर्मानुष्ठानादिव व्याकरणशास्त्रमूलकप्रकृतिप्रत्ययादिविभागज्ञानपूर्वकादेव प्रयोगादभ्युदय इति स्फुटमेव सिध्यति। रक्षोहादि चेति। अन्वाचयार्थश्चकारः। यद्यपि रक्षोहादिकमन्यतोऽपि संभवात्सद्धिकं व्याकरणारम्भप्रयोजकं प्रयोजनं न भवति, तथाऽपि प्रयोजनान्तरार्थमवश्यमारम्भणीये व्याकरणे तस्य तदप्यानुषङ्गिक प्रयोजनं भवन्न निवार्यत इत्यर्थः। 'निष्कारणो धर्मः' इत्यागमे षडङ्गशब्दः प्रसिद्धिप्राचुर्याद्वेदपदसमभिव्याहाराच्च वेदाङ्गषट्कपर एव। अङ्गानां षट्त्वसंख्यापूरण च शिक्षा कल्पो व्याकरण निरुक्त छन्दो ज्योतिषमित्याभियुक्तप्रसिद्धया व्याकरणेनैव। तदनुसारादध्येय इति पदच्छेदः। 'निष्कारणः' इत्यस्य यद्यपि फलं नाभिसंदध्यात्, तथाऽप्यवश्यमधीयीतेति नित्यापेक्षणीयफलत्वेनावश्यकत्वज्ञापनार्थः, न तु नैष्फल्यार्थः, वेदाध्ययनस्याप्यर्थावबोधफलकत्वाभावप्रसङ्गात्। लाघव च बहुव्याख्यानसापेक्षत्वेऽपि बहुतरोत्सर्गापवादादिजटिलत्वेऽप्यपरिमितानन्तशब्दप्रयोगान्वेषणादस्यैव व्याकरणस्य। अत एव वाग्व्याकर्तव्येति देवैः प्रार्थित इन्द्रो लाघववशात् परिज्ञानाय प्रकृतिप्रत्ययविभजनसहितं व्याकरणशास्त्रमकरोदिति तैत्तिरीयाः समामनन्ति। 'वाग्वै पराच्यव्याकृताऽवदत् ते देवा इन्द्रमब्रुवन्। इमां नो वाचं व्याकुर्विति। सोऽब्रवीद्वर वृणै। मह्य चैवैष वायवे च सह गृह्याता इति। तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते' (तै. सं. ६-४-७) इति। तस्यार्थो भाष्ये विवृतः। वाक्पूर्वं पराची ऐकरूप्येण दण्डायमाना अव्याकृता।

एवं पदानर्थक्यपदस्फोटवाक्यस्फोटाद्यभ्युपगमोऽपि न न्यायमूल इति न्यायाभावादप्रमाणम्। धर्माधर्मसिद्ध्यर्थं तु शब्दापशब्दविभागकथनमभियुक्तप्रणीतत्वात् प्रमाणमेवेति ॥

अस्यां वाचि एतावदेकं पदम्, अस्मिन् पदेऽयमेषा प्रकृतिरयं प्रत्यय इत्येवं विभज्य [1]सर्वतः करणरूपेण व्याकरणेन रहितस्य स्वार्थमवदतः। ततो देवैः प्रार्थित इन्द्रो वाचं मध्यतोऽवक्रम्य प्रकृतिप्रत्ययादिविभागार्थं मध्यं बुद्ध्या प्रावेश्य व्याकरोत्। प्रकृतिप्रत्ययादिविभाजकं व्याकरणशास्त्रमकरोदिति। अतो रक्षोहादिवचनस्य न काचिदनुपपत्तिरिति भावः। वामं च तद्देयं, देवेषु साधु चेति व्युत्पत्तिमाश्रित्य वामोत्तरपदशब्दात्साध्वर्थेयत्प्रत्ययोत्पादनेन कर्मधारयसमासेन च वामदेव्यशब्दव्युत्पादने, कालशब्दात्कालनवाचिनो ढक्प्रत्ययविधानेन कालेयशब्दव्युत्पादने च वेदानुबन्धो भवति। तथा न कृतमात्र तादृशे वेदविरुद्धांशे मामूत्प्रमाणमित्यर्थः ॥

एवं पदानर्थक्येति। यद्भाष्यटीकयोः समासवाक्यवर्तिपदानामानर्थक्यवचनं, यच्च वर्णपदवाक्यस्फोटप्रसाधनम्, एवमादिरूपं न्यायाभासमूलांशं तदप्रमाणमित्यर्थः। यद्यपि समासे वाक्ये च पदानां वर्णवदानर्थक्येऽपि स्नुषादिपदात्पुत्रभार्यादिरूपविशिष्टार्थस्यैव समासपदात्पदसमभिव्याहाररूपवाक्याच्च तत्तद्विशिष्टार्थस्य प्रत्ययः संभवति, तथाऽपि 'द्व्यङ्गैः स्विष्टकृतं यजति' इत्यत्र द्व्यङ्गैरिति समासपदे पञ्चङ्गेदेशेन त्वित्वविधानम्, 'एकां सामिधेनीमन्वाह' इत्यत्र सामिधेन्युद्देशेनैकत्वविधानमित्यादि न घटेत। समासे वाक्ये च विशिष्टरूपेणैव तत्तदर्थप्रतीत्यभ्युपगमे पदार्थस्य विशेषणमात्रस्य विधेयतयाऽन्वयाभावप्रसङ्गात्। तस्मान्न्यायाभासमूलः पदानर्थक्यवादः। स्फोटवादस्तु प्रथमपाद एव निराकृतः। धर्माधर्मसिद्ध्यर्थं त्विति। अनेन [2]साधुशब्दप्रयोगाश्रितकृत्वर्थपुरुषार्थनियमरूपधर्मप्रमितौ कृत्वर्थापशब्दत्वजनरूपधर्मप्रमितौ चोपयोगान् व्याकरणस्मृतिप्रामाण्यविचारस्य पादसंगतिरपि स्फुटीकृता ॥

लोकवेदाधिकरणम् ॥ १० ॥

आकृत्यधिकरणम् ॥

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥ ३० ॥ अद्रव्यशब्दत्वात् ॥ ३१ ॥ अन्यदर्शनाच्च ॥ ३२ ॥ आकृतिस्तु क्रियार्थत्वात् ॥ ३३ ॥ न क्रिया स्यादिति चेदर्थान्तरे विधानं न द्रव्यमिति चेत् ॥ ३४ ॥ तदर्थत्वात्प्रयोगस्याविभागः ॥ ३५ ॥

---

1. स्वतः 2. सुशब्द०

जैमिनीयन्यायमाला।

लोके पदपदार्थौ यौ न तौ वेदेऽथवाऽत्र तौ। रूपभेदात्पदं भिन्नमुक्तानादिभिदा स्फुटा ॥ ३१ ॥

वर्णैक्यत्वात्पदैकत्वं क्वचित्को रूपभिन्नता। प्रायिकेण पदैक्येन तदर्थैक्यं तथाविधम् ॥ ३२ ॥

व्यक्तिर्ग्राह्यादिशब्दार्थ आकृतिर्वा क्रियान्वयात्। व्यक्तिर्व्युत्पत्तिवेलायामाकृत्या लोपलक्ष्यते ॥ ३३ ॥

शक्तिग्रहादियुक्तिभ्य आकृतेरर्थतोचिता। क्रियापर्यवसानाय व्यक्तिस्तत्रोपलक्ष्यताम् ॥ ३४ ॥

गवादिचोदना नो मा जातिव्यक्त्योरनिर्णयात्। आनन्त्यव्यभिचाराभ्यां न व्यक्तिरिति निर्णयः ॥ ३५ ॥

प्रमाणं व्याकरणम्, तदनुगता एव गवादयो वाचका इति स्थितम्। इदानीं वाचकप्रसङ्गाद्वाच्यविशेषश्चिन्त्यते—किमाकृतिरुत व्यक्तिरिति। तत्र यदि लोकवेदयोः शब्दार्थानामन्यत्वं भवेत्तत इदमनारम्भणीयम्। तथा हि—लौकिकशब्दविषयं तावदिदमधिकरणमनर्थकं भवेत्, वैदिकविषयं तु भवत्यर्थवत्। न हि तत्र व्यवहारानुपातिनां शब्दानामर्थनिर्णयः शक्यते कर्तुमुपायाभावात्। तेनोभयस्मिन्नपि विषयेऽनारम्भणमेवाधिकरणस्यान्यत्वपक्षे स्यात्। एकत्वपक्षे तु लोके वृद्धव्यवहारानुसारेण शब्दार्थनिर्णयः कृतस्तत्रानुपयुक्तोऽपि वेदे फलिष्यति। तेनाकृत्यधिकरणोपोद्घाततया लोकवेदयोः पदपदार्थानां अन्यानन्यत्वे विचार्येते ॥

तत्र सत्यपि वर्णभेदे केषांचित् स्वरच्छान्दसवर्णागमलोपविकारविपर्ययाध्यायानध्या-

---

प्रयोगचोदनाभावादर्थैकत्वमविभागात्।

आकृत्यधिकरणस्य व्याकरणाधिकरणेन संगतिं दर्शयति—व्याकरणमिति। गवादिशब्दाः साधव इत्युक्तम्, तत्प्रसङ्गात्तेषामर्थश्चिन्त्यत इत्यर्थः। अत्र प्रथमं [1]प्रवर्तमानस्य लोकवेदाधिकरणस्य आकृत्यधिकरणेनोपोद्घातसंगतिं दर्शयितुं तत्सिद्ध्यर्थतामाह—तत्र यदीति। एवं च सोपोद्घातस्य पूर्वाधिकरणेन प्रसङ्गसंगतिरिति द्रष्टव्यम्। अनर्थकं भवेदिति; धर्मप्रमित्युपयोगिविषयत्वाभावादित्यर्थः। व्यवहारानुपातिनामिति। उत्तममध्यमवृद्धव्यवहाराश्रयः खलु शब्दार्थविचारः प्रवर्तनीयः, न च वैदिकशब्देषु सोऽस्तीत्यर्थः। तत्रानुपयुक्त इति। प्रस्तुतशास्त्रा-(लोकेऽ)नुपयुक्त इत्यर्थः ॥

---

1. प्रवर्त्यमानस्य

यादिधर्मभेदेन जराराजादिपदयोरिव क्रमभेदेन व्यपदेशभेदात् स्पष्टो भेदः। स्वरुयूपादिशब्द-साहचर्याच्च लोकवेदयोः पदानामन्यत्व, अर्थोऽपि च पदान्यत्वादेव। 'उत्ताना वै देवगवा वहन्ति' इति दर्शनाच्च। अश्ववालादिशब्दानां च स्पष्टार्थान्तरदर्शनादन्य इति प्राप्तेऽभिधीयते—

'प्रत्यक्षप्रत्यभिज्ञानाद्वर्णैकत्वं प्रतिष्ठितम्। वर्णात्मकं पदं तच्च तदभेदान्न भिद्यते॥

ननु वर्णभेदेऽपि स्वरादिभेदात्पदभेदो वाक्याधिकरणे दर्शितः—'पदावधारणोपायान्बहूनिच्छन्ति सूरयः। क्रमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीः॥' इति। सत्यम्। योऽर्थप्रतीत्यौपयिको धर्मस्तद्भेदे भिद्यत एव पदम्। यथा—पूर्वपदप्रकृतिस्वरत्वे बहुव्रीह्यर्थत्वं अन्तोदात्तत्वे स्वार्थवृत्तिता स्मरणादवगम्यते। ब्रह्मब्राह्मणादिषु न्यूनातिरेकवशादर्थभेदो लोकत एवावगतः। जराराजादिषु क्रमभेदादर्थान्यत्वाध्यवसायः। नैवं लोकवेदयोरर्थौपयिकधर्मभेदोऽस्ति। यदि ह्यनियतस्वराणामन्योऽर्थो नियतस्वराणामन्योऽर्थ इति स्मृतितो लोकतो वाऽवगतं स्यात्ततोऽनियतनियतस्वरतया लोकवेदयोः पदभेदो भवेत्; न चैवम्,

---

स्वरेति। वैदिकेषु पदेषु स्वरो नियतः, न लौकिकेषु; तेषु स्वरनियमे 'सुष्ठु प्रयुक्तः' इति श्रुतेरभ्युदयमात्रम्। 'विश्वे देवास आगत' इत्यत्र देवास इति वर्णागमः। 'त्मना सहस्रपोषिणम्' इत्यत्र आत्मनेत्याकारस्य प्रथमवर्णस्य लोपः। 'गृभ्णामि ते सौभगत्वाय' इत्यत्र हकारस्य भकारो वर्णविकारः। वर्णागमलोपविकाररूपो यो विपर्ययः, लौकिकपदेभ्यो वैलक्षण्यम्, यश्चा ध्यायानध्याययोपनीतत्रैवर्णिकप्रयोज्यत्वशुश्रूषाधिगुरुसंप्रदायग्राहित्वादिरूपो धर्मभेदः सकलप्रयोज्यत्वेच्छाग्राह्यलौकिकपदव्यावृत्तो धर्मः तेन च हेतुना जराराजपदयोः क्रमभेदहेतुनेव व्यपदेशभेदात्—'अथ शब्दानुशासनम्। केषां शब्दानाम्? लौकिकानां वैदिकानां च' इत्यभियुक्तग्रन्थेषु व्यवहारभेदात्। वेदेषु लोकाप्रसिद्धस्वरुयूपाहवनीयपददर्शनेन तत्साहचर्याच्च लोकवेदयोः पदभेद इत्यर्थः। न केवल पदभेदादेव पदार्थभेदः, किं तु गोपदार्थस्य लोकाप्रसिद्धोत्तानवाहित्वप्रतिपादनाचेत्याह—उत्ताना इति॥

प्रत्यक्षेति। वर्णाभेदे सुदृढे वर्णात्मकस्य पदस्य भेदः कथमपि न घटत इत्यर्थः॥

वर्णाभेदात् पदाभेदे व्यभिचारमाशङ्कते—नन्विति। वाक्यम् अश्ववालादिवाक्यशेषः; श्रुतिः वैदिकपदाना लौकिकार्थाविलक्षणमर्थान्तरमाहत्य वर्णयन्ती 'रात्रिर्वै चित्रावसुः' 'आदित्यस्य वै रश्मय आताना.' इत्याद्या। स्मृतिरपि तथाभूतोदाहर्तव्या। औत्सर्गिकोऽयं नियमः क्रमभेदाद्यपवादकाभावे प्रतिष्ठित एवेत्याह—सत्यमित्यादिना। ननु क्रमभेदादीनामभावेऽपि लोकवेदयोरनियतानियतस्वरभेदोऽस्ति। तेनान्तोदात्तपूर्वपदप्रकृतिस्वरभेदेनैव भेदः किं न स्यादित्याशङ्क्य तस्य तद्भेदकत्वे स्मृतिलोकप्रसिद्धयोरभावेन वैषम्यमाह—यदि ह्रीति। ननु स्वरभेदस्याभेद-

आलापशुश्रूषापरिसरचरत्सुकामिनीनियमितव्योमयानम्, सर्वतः सर-
दपारविसारविहारबृहदगारबहुलतुङ्गभङ्गशृङ्गान्योन्यसंघट्टनोत्कीर्यमाणा-
म्बुशीकरच्छटारविकरव्यतिकरोपदर्शितेन्द्रचापच्छायासहस्रेण पयोनि-
मग्नसगरुन्महीधरजुनरुड्डीनगतिनिरासाय गोत्रभिदा सर्वतः प्रपञ्चितेन
निजायुधस्तोमेनेव कृतरक्षणम्, जालिकजनविक्षिप्तशम्बूकपिण्डकब-
लनलोभरंहोनिपतज्झषकुलसमग्रग्रसनेनिरवग्रहाग्रहपरस्परकलहसाटो-
पसन्नह्यन्मकरपाठीनप्रमुखमहामीनविधूनितविशंकटवालजालसंभूतप्र-
भूतवातजातविदूरविकीर्यमाणपयःकणपरंपराप्रशमितमनोजसमरायास-
सुखितोपरिचरद्विमानगतनिलिम्पनितम्बिनीविस्फारितकटाक्षमांसलम-

मानानां जलमानुषाणां युवत्यश्च युवानश्च यूनस्तेषां सहस्रस्य, सातुरागालापशुश्रूषया श्रोतु-मिच्छया, नियमितानि निरुद्धानि व्योमयानानि यस्य तथोक्तम्। 'व्योमयानं विमानोऽस्त्री' इत्यमरः। सर्वतः सरतां संचरताम्, अपारविसाराणामसंख्याकमत्स्यानाम्, 'विसारः शकुली चाथ' इत्यमरः। विहाराय बृहदगाराणां महागृहस्थानीयानाम्, बहुलतुङ्गभङ्गानां तरङ्गानाम्, 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः। शृङ्गसंघट्टनेन उत्कीर्यमाणासु अम्बुशीकरच्छटासु रविकरस्य व्यतिकरेण संपर्केण उपदर्शितानामिन्द्रचापच्छायानाम्, गगने कीर्णा जलशीकराः, रविकिरण-संपर्केण इन्द्रचापसदृशद्युतयो भान्तीति भावः; सहस्रेण। सगरुन्महीधराणां पक्षविशिष्टपर्वतानाम् उड्डीनगतेरुड्डयनगतेः निरासाय गोत्रभिदा इन्द्रेण, प्रपञ्चितेन विस्तृततया निहितेन, निजायुधस्तो-मेन चापसमूहेनेव, कृतरक्षणम्। जालिकेति। जालिकजनैः मत्स्यग्राहिभिः, विक्षिप्तानां शम्बूकपिण्डानाम्, 'शम्बूकस्तण्डुलमले' इति सारः। कबलने लोभात् रंहसा वेगेन निपततां झषकुलानां मत्स्यसङ्घानां समग्रग्रसने सर्वस्यकबलने निरवग्रहाग्रहेण निपतद्भिः परस्परं कलहाय साटोपं ससंरम्भं यथा तथा संनह्यद्भिः मकरपाठीनप्रमुखमहामीनैः, मकर इति मत्स्यविशेषः। 'सहस्रदंष्ट्रः पाठीनः' इत्यमरः। विधूनितेभ्यः कम्पितेभ्यः, विशंकटवालजालेभ्यः, 'विशं-कटं पृथु बृहत्' इत्यमरः। प्रशमितात् मनोजसमरायासात् सुरतश्रमात् सुखिताभिः, उपरि-चरद्विमानगताभिः निलिम्पनितम्बिनीभिः, विस्फारितानां विस्तारितानां कटाक्षाणां मांसलाभिः

यूखरेखाकल्पितकलिन्दनन्दिनीशतविभ्रमम्, अक्षुद्रबुभुक्षाक्षुभितभीकरमहोरगानुद्रुतभयसंभ्रमकृतोत्प्लवनपिचण्डिलमण्डूकमण्डलेन सगरान्ववायशेखरदशरथतनुजातकार्यनिर्वहणव्यग्रपवनतनयसहायाचरणतोषितमघवदभयदाननिःशङ्कमैनाकावष्टम्भेन विश्रृङ्खलविहाराय स्वैरसुज्झिहानेन चिराय गभीरसलिलान्तरवास्तव्येन महीधरनिवहेनेव कृतविस्मयम्, मुक्तामणिजिघृक्षाविहितसलिलावगाहनधीरधीवरनिष्ठ्यूतविसारिमहौषधितैलपरिणतचन्द्रकाकारमण्डलसहस्रैः नानादेशान्तरागतप्रियासमुदायालोकनाय सादरार्चितेन चक्षुःसंचयेनेवासंख्येनोपलक्षि-

---

पीवराभिः मयूखरेखाभिः कल्पितकलिन्दनन्दिनीशतविभ्रमम् । देवकान्तानां कटाक्षशोभापरंपराः यमुनाप्रवाहशतविभ्रमं कुर्वन्तीति भावः ॥

अक्षुद्रेति । अक्षुद्रबुभुक्षया अधिकक्षुधा, 'अशनाया बुभुक्षा क्षुत्' इत्यमरः । क्षुभितैराकुलितैः, भीकरमहोरगैरनुद्रुतानाम्, अत एव भयसंभ्रमेण कृतोत्प्लवनानां जलोपरि प्लवमानानां पिचण्डिलमण्डूकानां स्थूलदर्दुराणां मण्डलेन ; 'बृहत्कुक्षिः पिचण्डिलः' 'भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः' इत्यमरः । सगरान्ववायशेखरस्य दशरथतनुजातस्य रामस्य कार्यनिर्वहणे व्यग्रस्य पवनतनयस्य साहाय्यकरणेन तोषितः यो मघवान् तदभयदानेन तत्कर्तृकाभयदानेन निःशङ्कस्य निर्भीकस्य मैनाकस्य गिरेः अवष्टम्भेन आश्रयेण, विश्रृङ्खलविहाराय निरर्गलविहाराय उज्झिहानेन उद्गच्छता चिराय चिरकालात् सलिलान्तरवास्तव्येन वासं कुर्वता महीधरनिवहेनेव। महासर्पभयेन जलानामुपरि प्लवमानाः महामण्डूकाः पर्वता इव भान्तीति भावः । मुक्तेति । मुक्तामणीनां जिघृक्षया ग्रहीतुमिच्छया विहितसलिलावगाहनैः, धीरधीवरैः कैवर्तैः ; 'कैवर्ते दाशधीवरौ' इत्यमरः । निष्ठ्यूतेन, अत एव विसारिणा महौषधितैलेन ; मुक्ताफलग्राहिणो निजास्यनिहिततैलाः सन्तोऽन्तर्निमज्ज्य निष्ठीवनं कुर्वन्तीति प्रसिद्धिः ; तेन परिणतानां जलानामुपरि प्रसृतानां चन्द्रकाकारमण्डलानां मयूरपिच्छसदृशचक्राकाराणाम् ; 'समौ चन्द्रकमेचकौ' इत्यमरः । नानादेशान्तरागतस्य प्रियासमुदायस्य नदीसमूहस्य समुद्रः तैलबिन्दुमण्डलैः सहस्रेणोपलक्षित इव भातीति भावः ॥

तम्, विस्तृतनिजाम्भोदेशकार्पटिकसांयात्रिकसमवायसंततन्यमान-निखिलवस्तुविनिमयसंपादितानुत्तमबहुलार्थजातविलोकनाभ्यस्ततदीयाजीव इव स्वयमपि तोयपिपासागताय जीमूतजाताय वारिवितीर्यभूरि सौदामिनीभिरिवोपार्जिताभिः प्रवालप्रतानिनीभिः प्रथमानसौभाग्यम्, निरन्तरान्तःपरिवर्तनसमिन्धमानमहदाबिन्धनज्वलनज्वालाकलापदुःसहसंतापेन समन्ततः स्फुटमविरतोद्वतैः स्फोटैरिव संततजलबुद्बुदार्बुदैः सतारागणं गगनसीमानमनुकुर्वन्तम्, क्वचिदलघुजवोज्जिहानस्वैरविहारिकुलीरबृहदुत्तालतालसालोदग्रकठिनशृङ्गयुगसंघटनक्षणखण्डितरयदूरोत्पतद्गिरिगुरुमहोरगशिरःपतनविघूर्णिताम्भःक्षुभितजरठयादोगणचिन्तिताचिरंतनसेतुबन्धनसमयमदमेदुरवलीमुखचण्डबाहादण्डबलसमुन्मीलितव्यत्ययपात्यमानघनमहीधराघातम्, प्र-

---

विस्तृतेति । निजाम्भोदेशे कार्पटिकानाम् नित्यं संचरताम्, 'नित्ययात्रः कार्पटिकः' इति सारे । संयात्रा द्वीपान्तरगमनं तदेषां प्रयोजनमिति सांयात्रिकाः; 'सांयात्रिकः पोतवणिक्' इत्यमरः । तेषां समवायेन संततं तन्यमानेन क्रियमाणेन निखिलवस्तुविनिमयेन परिवर्तनेन अर्थजातस्य द्रव्यसंघस्य विलोकनेन अभ्यस्तः तदीय आजीवः वणिग्जीवनं येन तथोक्तः इति । 'आजीवो जीविका वार्ता' इत्यमरः । पिपासया पातुमिच्छया आगताय जीमूतजाताय मेघसंघाय, 'घनजीमूतमुदिर....' इत्यमरः । प्रवालप्रतानिनीभिः विद्रुमलतासमूहैः; वस्तुविनिमयसंपादितां वणिग्जनसंपदमालोक्य अब्धिः स्वयमपि जलदेभ्यः सलिलानि दत्त्वा परिवर्तनरूपेण संपादिततटिल्लताभिरिव विद्रुमलतिकाभिरुपेत इति भावः । निरन्तरेति । समिन्धमानस्य वर्धमानस्य अबिन्धनज्वलनस्य बाडवाग्नेः; 'समुद्राग्निरबिन्धनः' इति सारे । संतापेन, स्फोटैः पिटकैरिव स्फुटतीति स्फोटः, 'स्फुटविकसने' 'विस्फोटः पिटकं त्रिषु' इत्यमरः । क्वचिदिति । अलघुजवेन उज्जिहानानामुद्गच्छतां स्वैरविहारिणां कुलीराणाम्; 'स्यात्कुलीरः कर्कटकः' इत्यमरः । बृहदुत्तालाः स्थूलोन्नताः तालसालाः तालवृक्षाः, तद्वदुदग्रस्य कठिनशृङ्गयुगस्य संघटनक्षणे संयोगसमये खण्डितानाम्, अत एव रयेन वेगेन दूरमुत्पततां गिरिवत् गुरूणां महो-

कृष्टकाव्यमिव सर्वतो विद्योतमानरसगुम्भितम्, नक्षत्रमण्डलमिवाश्रितशिंशुमारम्, नारायणप्रभावमिव निर्वर्तितमीनकूर्मादिरूपम्, वेशवाटमिव निरन्तरसंचरद्भुजङ्गसंचयम्, धनिकहस्तमिव प्रशस्तोर्मिकासनाथम्, सुरलोकमिवानन्तपुण्यजनालयम्, चक्रवर्तिनमिव शरणागतभूभृज्जातम्, वैकुण्ठलोकमिव मुक्तोपलालनीयम्, दातृकरमिव दानवारिकृतशोभम्, धनदावासमिवान्तर्निविष्टशङ्खमकरम्, सत्यलोकमिव सरस्वतीप्रचारोपकल्पितसौभाग्यम्, कासारमिव पद्मोल्लासिनम्, उद्धृतामृतमप्यमृतमयम्, मुक्तामयमप्यनपायगदाकरजठरम्, द्विजराजोत्पत्तिप्रतीतकीर्तिमपि सुरैकानिदानम्, अपारजलाकरमपि करकोदराव-

---

रगशिरसां पतनेन विघूर्णितेषु अम्भःसु क्षुभितैः चलितैः, 'क्षुभसंचलने', जरठयादोगणैः पुराणजलजन्तुभिः, 'यादांसि जलजन्तवः' इत्यमरः । चिन्तितः, घनमहीधराणामाघातः प्रहारो यस्मिंस्तथोक्तम् । कुलीरशृङ्गयुगखण्डितमहासर्पशिरांसि पर्वता इव पतन्तीति भावः । प्रकृष्टेति । उत्तमकाव्यमिव रसैः शृङ्गारादिरसैः, उदकैश्च गुम्भितं ग्रथितम् । शिंशुमारो जलग्राहः; अन्यत्र नक्षत्रमण्डलसंचाराधिष्ठानभूतशिंशुमाराख्यो हरेरवतारविशेषः । 'जलग्राहे शिंशुमारस्तारारूपाच्युते ऽपि सः' इति रत्ने । निर्वर्तितं साधितं मीनकूर्मादिरूपं मीनकूर्माद्यवतारस्वरूपम्, अन्यत्र उत्पादितमीनकूर्मादिजलजन्तुरूपम् । 'रूपं स्वभावे शुक्लादौ सौन्दर्ये नाटके पशौ । ग्रन्थावृत्तौ नाटकादावाकारे श्लोकशब्दयोः ॥' इति रत्ने । वेशवाटं गणिकानिवासस्थानमिव, 'भुजङ्गौ विटपन्नगौ' इति रत्ने । ऊर्मिकाभिरङ्गुलीयैः सनाथम् संयुतम्, 'अंगुलीये तरङ्गे च वस्त्रभङ्गेऽपि चोर्मिका' इति रत्ने । पुण्यजनाः सुकृतिनः, यातुधानाश्च । भूभृतां राज्ञां पर्वतानां च जातं समूहः, 'भूभृद्भूमिधरे नृपे' इत्यमरः । मुक्तोपलालनीयं मुक्तपुरुषैः, मुक्ताफलैश्च श्लाघनीयम् । दानवारिणा दानोदकेन, विष्णुना च । अन्तर्निविष्टाः शङ्खाः मकरा मत्स्याश्च यस्मिंस्तथोक्तम्, अन्यत्र निधयः । सरस्वत्याः भारत्याः प्रचारेण संचारेण, अन्यत्र सरस्वतीनामकनद्याः । पद्मानामुदयेन, अन्यत्र लक्ष्म्याः । उद्धृतामृतमपि गृहीतामृतमपि, अमृतमयं सुधामयमिति विरोधः, जलमयमित्यविरोधः; 'अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते' इति विश्वः । मुक्तामय इति रोगविमुक्त इति अनपायस्य अपायरहितस्य स्थिरस्येति यावत्, गदस्य रोगस्य आकरः

काशनियमितम् क्वचिदाभूरसातलसंभृताम्भस्तया समग्रगाम्भीर्येण निस्तरङ्गस्तब्धहृदयायतनम्, संततनिजान्तरान्तरीपानन्तमञ्चसमुदञ्चितयोगशयनपरायणनारायणनिद्राभङ्गमहापराधभयेनेवाहृतमौनमुद्रं कृतनिलिम्पलोकनिरतिशयभद्रं समुद्रमद्राक्षीत् ॥

यदीयशिलाशकलाश्चिन्तामणिः, शैवालाः प्रवाललतिकाः, पयोविकारः पीयूषम्, यज्जलमानव्योऽप्सरसः, सिकता मुक्ताफलानि, यादांसि चिरंतनमीनकूर्मसुरदन्तावलतुरङ्गमादयश्च ॥

यत्रावासममन्यताब्धिसुतया सत्रान्तरीपे हरिः
सुत्रामप्रमुखाः सुधामधिगता वित्रासिता दानवैः ।

जठरं यस्य तथोक्तमिति विरोधः ; 'रोगव्याधिगदामयाः' इत्यमरः ; अन्यत्र, मुक्तामयो मुक्ताप्रचुरः, गदाकरो विष्णुः जठरे यस्य तथोक्तम् । द्विजराजानां ब्राह्मणोत्तमानां उत्पत्त्या प्रथितप्रभावोऽपि सुराया मद्यस्य निदानमिति विरोधः, अन्यत्र द्विजराजश्चन्द्रः सुराणां देवानां सुराया वा; 'द्विजराजः शशधरः' इत्यमरः । करकस्य ह्रस्वकलशस्य उदरावकाशे नियमितं निहितम्, अन्यत्र करस्य कोदरस्य ईषन्मध्यस्य अवकाशे, अगस्त्यकरचुलुकितमित्यर्थः । 'कमण्डलौ च करकः' इत्यमरः । क्वचिदिति । आभूरसातलं भूमिमारभ्य रसातलपर्यन्तं संभृताम्भस्तया संपूर्णोदकतया समग्रगाम्भीर्येण गाम्भीर्यगुणेन निस्तरङ्गं यथा तथा स्तब्धं निश्चलं हृदयायतनं मध्यस्थानं यस्य तथोक्तम् । अत एव निजान्तरे निजमध्यावकाशे यदन्तरीपम्, 'द्वीपोऽस्त्रियामन्तरीपम्' इत्यमरः । तस्मिन् अनन्तरूपे मञ्चे शयने ; 'शयनं मञ्चपर्यङ्कपल्यङ्काः' इत्यमरः । योगशयनपरायणस्य योगनिद्रासक्तस्य ; 'स्यान्निद्रा शयनं स्वापः' इत्यमरः । 'परायणमभीष्टे स्यात्तत्पराश्रययोरपि' इति विश्वः । समुद्रमद्राक्षीत् ॥

यदीयेति । चिन्तामणिः, यदीयशिलाशकला इत्यादिना समुद्रस्य महिमा वर्ण्यते । चिरंतनमीनकूर्मौ हरेरवतारौ, सुराणां दन्तावलः ऐरावतः, तुरङ्गम उच्चैःश्रवाश्च यादांसि जलचराः; 'यादांसि जलजन्तवः' इत्यमरः ॥

यत्रेति । हरिः अन्तरीपे द्वीपे अब्धिसुतया सत्रा रमया सह; 'साकं सत्रा समं सह'

वृत्रारेरवितारमेनमभजन्पत्रावनैकोद्यताः
सत्रासा गिरयः स दीव्यति महाचित्राकरः सागरः ॥ ३८ ॥


चिन्तयन्निति चिरंतनमौनी चित्रपूरपरिवेल्लितचेताः ।
वल्लकीमधुरवादनशीलः श्रीनिकेतननिकेतमवाप ॥ ३९ ॥

इति श्रीमदुदयकुलकलशजलधिचन्द्रमसः पण्डितमान्यस्य दत्तात्रेयविपश्चितस्तनयेन
गङ्गाधरकविना विरचिते श्रीमद्भद्रकन्यापरिणये प्रथमरसोल्लासे
पूर्णः प्रथमोल्लासः ॥

इत्यमरः । आवासममन्यत । दानवैः वित्रासिताः सुत्रामप्रमुखा इन्द्रादयो देवाः, यत्र सुधामधिगतवन्तः प्राप्तवन्तः, वृत्रारेरिन्द्रात् सत्रासाः त्रासविशिष्टाः गिरयः, पत्राणां पक्षाणामवन एकोद्यताः सन्तः एनमब्धिम् अवितारं रक्षकमभजन् । महाचित्राकरः स सागरो दीव्यति ॥ ३८ ॥

चिन्तयन्निति । वल्लक्याः मधुरवादनमेव शीलं यस्य तथोक्तः, चिरंतनमौनी पुरातनमुनिर्नारदः, चित्रपूरेणाश्चर्यप्रवाहेण परिवेल्लितं कम्पितं चेतो यस्य तथोक्तः सन्; 'वेल्लितप्रेङ्खिताधूतचलिता कम्पिता धुते' इत्यमरः ॥ ३९ ॥

॥ इति श्रीमद्भद्रकन्यापरिणयव्याख्याने प्रथमोल्लासः ॥



॥ द्वितीयोल्लासः ॥

इन्दिरारमणमन्दिरत्वतः सिन्धुनाऽपि स मुनिः समाश्रिताम् ।
द्वारकां सबहुमानमैक्षत श्रीमदाहृतमहागुणोत्तराम् ॥ १ ॥

निरुपमगारुडशोभा निर्मलमुक्तालिनित्यसक्ता सा ।
विष्वक्सेनोपेता तुलयति वैकुण्ठमिन्दिरोल्लासा ॥ २ ॥

ककुदवदधीशसेव्या शंकरहितसर्वमङ्गलावासा ।
पुण्यजनाधिपचरिता महिता कैलासभासुरा नगरी ॥ ३ ॥

आ चतुराननसदनाज्जनविदितादा च भुजगराड्भुवनात् ।
नालोकितचरमश्रुतमदसीयमसावलोकयद्भाग्यम् ॥ ४ ॥

इन्दिरेति । इन्दिरारमणस्य कृष्णस्य मन्दिरत्वतः आवासभूतत्वात् सिन्धुनाऽपि समाश्रितां समुद्रवेष्टितामित्यर्थः । श्रीमदाहृतं श्रीमता विष्णुना राज्ञा च ॥ १ ॥

निरुपमेति । गारुडानां मरकतोपलानाम् ; 'गारुत्मतं मरकतम्' इत्यमरः ; अन्यत्र वैनतेयश्चोभा । मुक्तालिभिः मुक्ताफलपङ्क्तिभिः, मुक्तजनालिभिश्च नित्यसक्ता । विष्वक्सेनवा उपेता ; अन्यत्र विष्वक्सेनाख्यविष्णुपार्षदेन । इन्दिराया उल्लासः यस्या तथोक्ता नगरी वैकुण्ठं तुलयति ॥२॥

ककुदेति । ककुदवद्भी राजलक्षणवद्भिः, अधीशैः परिवृढैः सेव्या । 'ककुदोऽस्त्री राजचिह्ने प्राधान्यवृषभाङ्कयोः' इति रत्ने । ककुदवतां वृषभाणामधीशेन वृषभश्रेष्ठेन ; शंकराणां सुखंकराणाम् ; सर्वमङ्गलानामावासभूता ; अन्यत्र शंकरहिताया पार्वत्याः पुण्यजनाधिपानां चरितं यस्याम् ; अन्यत्र कुबेरेण चरिता संचरिता ॥ ३ ॥

आ चतुराननेति । असौ जनविदितात् प्रसिद्धात् । आ चतुराननसदनात् सत्यलोकादारभ्य आ भुजगराड्भुवनाच्च रसातलपर्यन्तम् । आङः कर्मप्रवचनीयत्वात्, 'पञ्चम्यपाङ्परिभिः'

पौरीं प्रतोलिमुपयन्नाजीगणदाजलोकजं शर्म ।
आनन्तवन्द्यपदरागपरं मनसाऽपि किं श्रयेदवरम् ॥ ५ ॥

शापायुधीयवीणागानरसावेशमोहिता जनता ।
अन्वगभूदिति युक्तं द्रवते ग्रावाऽपि गानतो यस्मात् ॥ ६ ॥

नारदगौरमयूखे गानसुधासारदानधौरेये ।
सौहित्यमत्युदारं पौरचकोरालिरानशे पूर्वम् ॥ ७ ॥

कलधौतसौधवीथीविचरन्नीरजलोचनापाङ्गैः ।
अधिमुनिराड्वलमानैः सामीचीन्यं समाश्रितं सौमम् ॥ ८ ॥

इति तद्योगे पञ्चमीविधानात्पञ्चमी । समासभ्रान्तिवारणाय आ च भुजगेति मध्ये चकारनिवेशः । नालोकितचरं कदापि पुरा अनालोकितम्, अश्रुतं च, अदर्शीयं नगरसंबन्धि भाग्यमलोकयत् ॥

पौरीमिति । प्रतोलिम् 'रथ्या प्रतोलिर्विशिखा' इत्यमरः । उपयन्नुपागतो नारदः आजलोकजं ब्रह्मलोकजन्यं शर्म सुखमपि नाजीगणत् । 'गणसंख्याने' सकर्मकात्कर्तरि लुङ् । अनन्तस्य विष्णोरिदमानन्तं वन्द्यं यत्पदं स्थानं तद्भजनीति तथोक्तः; मुक्तपुरुष इत्यर्थः । अवरमधमम्, अपरमन्यत् कर्म मनसाऽपि श्रयेत् किं किमपि न चिन्तयेदित्यर्थः । महानन्दप्राप्ता-वल्पानन्दानामस्मरणीयत्वात् । ब्रह्मलोकापेक्षया अधिकानन्ददायिनी सा नगरीति भावः ॥ ५ ॥

शापेति । शाप आयुधं यस्य स शापायुधः ऋषिः तदीयाया वीणायाः । जनता जन-समूहः अन्वगभूत् । 'अन्वगन्वक्षमनुगे' इत्यमरः । इति युक्तं यस्माद्गानतः ग्रावा शिलाऽपि द्रवते । शिलाद्रावकस्य गीतस्य जनमोहकत्वं तदाकर्णनं च न चित्रमिति भावः ॥ ६ ॥

नारदेति । नारद एव गौरमयूखश्चन्द्रः तस्मिन्, गानरूपसुधासारस्य दाने धौरेये सति, पौराः पुरजना एव चकोराः तेषामालिः सौहित्यं तृप्तिमानशे प्राप्ता । 'अशूव्याप्तौ' ॥ ७ ॥

कलधौतेति । अधिमुनिराट् मुनिश्रेष्ठे ; अव्ययीभावः समासः । वलमानैः कलधौ-तसौधवीथ्याम् ; 'कलधौतं रूप्यहेम्नोः' इत्यमरः । विचरन्तीनां नीरजलोचनानां स्त्रीणामपाङ्गैः सौमं सुमसंबन्धि समीचीनत्वम् । स्त्रीणामपाङ्गाः नीलोत्पलवदभवन्निति भावः ॥ ८ ॥

मदः—निःशङ्कं मधु पायय पललान्याहारयाधिकं
रामाः संगमयाथ घोरतमसि व्यापारयामाद्य तम् ।
इत्येवं बहुशो विकत्थनकृतां राज्ञः पुरस्तान्मदा-
दस्माकं प्रकटं हि पुंस्त्वमधुनेत्यन्तर्विलज्जे परम् ॥ ४१ ॥

मत्सरः—मोहो मोहमुपागतः समभवत्कामस्य कामः सुतः
क्रोधः क्रोधपदं मदो गतमदो निर्मत्सरो मत्सरः ।
लोभः सोऽयमपि प्रलोभनपदं जातो विधेरज्ञया
किं ब्रूमः किमिहोचितं कथमितो जीवेम लज्जां विना ॥ ४२ ॥

तदद्य निरुद्यमाः पुण्ये क्वचिदरण्ये मृगैः सह वसन्तः शेषमायुषोऽपनेष्यामः ।

कामः—अलमधीरतया । क गमिष्यति स तपस्वी जीवः ? प्रायश आपातबोधहतकेनापक्षिप्तोऽत्रैव क्वचिदन्तर्हितः स्यात् । तत्सर्वतो मृगयामहे ।

(सर्वे तथेति परिक्रम्य निष्क्रान्ताः ।)

जीवः—(समन्तादवलोक्य) अहो चरमाश्रमं प्राप्ताः स्मः, यदत्र काषायधारिणः संनिहिताः ।

आपातबोधः—देव, श्रमं प्राप्ताः स्मः; न पुनस्तमाश्रमम् ।

जीवः—कस्तर्ह्ययमुद्देशः ? के चैते काषायधारिणः ?

आपातबोधः—इदमभ्यन्तरं प्रासादस्य, एते चात्मगुणनामानो महात्मानः ।

चत्वारिंशत्प्रभेदा ये संस्कारास्तेष्वसत्स्वपि । यदालम्बनमात्रेण पुरुषो जायते कृती ॥

जीवः—(साश्चर्यम्) आपातबोध, कुत्र स्थिता वयम् ? कुत्रापतिता वर्तामहे ?

आपातबोधः—शृणोतु देवः ।

आकृष्य षड्भिररिभिर्विषयान्धकूपे प्रक्षिप्यमाणतनुरत्र भवानकाण्डे ।
आविर्भवद्भिरलमात्मगुणैरमीभिरध्यासितोऽस्युपनयद्भिरमुं प्रदेशम् ॥ ४४ ॥

जीवः—(सानुतापम्) आः कष्टमाः कष्टम । कथमेवमुपक्रान्तं दुर्दान्तैः । आपातबोध, तादात्विकत्वद्वचनानादरस्य विषरूपोऽयं विपाकः ।

आपातबोधः—देव, कृतं गतानुतापेन । वन्दनीयाः पुनरेते तपस्विनः ।

जीवः—आपातबोध, उदाहर णावदेतेषां प्रतिनियतान्यभिधानानि ।

आपातबोधः—(हस्तेन निर्दिशन्)

निरुपधि परदुःखच्छेदनेच्छा दयेयं विघटयति विपत्सु क्षान्तिरुद्वेगमेषा ।
परमहिमकथायां हर्षदैषाऽनसूया विषयविमुखतायाः कारणं त्वस्पृहेयम् ॥ ४५ ॥

अन्ये पुनः शौचमङ्गलाकार्पण्यानायासनामानश्चत्वारो नाम्नैव निगदव्याख्यातमहिमानः ।

जीवः—भो भो महाभागाः, नमो वः ।

आत्मगुणाः—राजन्, कल्याणभाजन भूयाः ।

जीवः—एकद्वित्रिसमन्वयेऽपि भवतां सालोक्यभाग्ब्रह्मणः
सायुज्यप्रणयी भवद्भिरखिलैरन्वीयमानो भवेत् ।
इत्येतच्छ्रुतिमात्रगोचरतया पूर्वं स्थितं संप्रति
त्वध्यक्षं समभून्ममेति किमितः कल्याणमाशास्यते ॥ ४६ ॥

आत्मगुणाः—राजन्, निष्कामकर्मनिष्ठेन त्वया संप्रति निराकृतमननुष्ठानलक्षणमप्रामाण्यं शास्त्रस्य ।

जीवः—

विषयकुहरात्प्रत्युद्धृत्य क्षणात्प्रतिरक्षतामुपकृतिपणेनात्मा क्रीतो मम स्वत एव वः ।
अथ कतमया निष्क्रीतः प्रत्युपक्रियया भवेत्स पुनरिति मे चिन्ताग्नस्य का गतिरुच्यताम् ॥

आत्मगुणाः—

त्वमसि जगतां निष्ठाकाष्ठा गतिश्च परायणं श्रुतिभिरुदितो भूयो गत्यन्तरं किमपेक्षसे ।
पुरुष भवतस्तत्तादृक्षस्य का नु परा गतेर्न खलु जलधेरन्या काचिद्गतिः सरितां निधेः ॥

(नेपथ्ये कलकलानन्तरम्)

भो भो दुरात्मन्नात्मज्ञ, मायाश्रबलितविध्यऽहंकारकबलित, मृषारोपितपौरुष, सर्वगुणावभूतचिदाभास, जीवापशद,

उत्क्षिप्तोऽसि किल द्विपाच्छ्रुतरं व्याक्षिप्तचित्तेष्वमी-
ष्वन्तर्धानगतेन केनचिदपि प्रद्वेषिणा भीरुणा ।
अद्य त्वां मिषतोऽपि तस्य पुरतः प्रत्याहरामो वयं
श्येना मीनमिवात्र कश्चिदपि चेच्छक्तः परित्रायताम् ॥ ४९ ॥

[सर्वे आकर्णयन्ति ।]

आत्मगुणाः—हन्त, नूनमन्तर्हितं राजानमुपलभ्य पुनरप्यास्कन्दितुकामानां कामादीनामदीनो व्यवहारः । तदितः परं नोदासितव्यमस्माभिः । आपातबोध, त्वमस्मदनुज्ञया नाविदूरवर्तिनं तुर्याश्रमं प्रापय राजानम् । वयं त्वरिवर्गं समूलमुन्मूलयिष्यामः ।

आपातबोधः—यदाज्ञापयन्ति महाभागाः ।

जीवः—अनुगृहीतोऽस्मि । (इति यथाक्रमं परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति तृतीयोऽङ्कः ।

॥ चतुर्थोऽङ्कः ॥

॥ मिश्रविष्कम्भः ॥

(ततः प्रविशति परिव्राजिकावेषा साधनसंपत्तिः ।)

साधनसंपत्तिः—नित्यानित्यविवेचनं मम मुखं दृष्टिर्विरागोदयः
श्रद्धाशान्तिदमक्षमोपरतयो गात्रं मुमुक्षा शिरः ।
ये चान्ये स्युरमानिताप्रभृतयो मैत्र्यादयो वा गुणा-
स्ते सर्वेऽपि मम प्रसाधनविधावन्तर्भवन्ति स्वतः ॥ १ ॥

(परिक्रम्यावलोक्य च) कथमिह एवाभिवर्तते सत्त्वशुद्धिः ।

(प्रविश्य)

सत्त्वशुद्धिः—हला साहणसम्पत्ती, किं चिराअसि ? [हला साधनसंपत्ते, किं चिरायसि ?]

साधन०—इत आगताऽस्मि ।

सत्त्वशुद्धिः—इत्तिअं कालं को विलम्बो ? [इयन्तं कालं को विलम्बः ?]

साधन०—अद्य खलु सुप्रतिष्ठाऽस्मि कामादिवैरिजयेन ।

सत्त्वशुद्धिः—हला, एहि गच्छम्मो । [हला, एहि गच्छामः ।]

साधन०—क्व पुनः ?

सत्त्वशुद्धिः—देवीए सण्णिहाणे । [देव्याः संनिधाने ।]

साधन०—किं तत्र गता ब्रह्मजिज्ञासा ?

सत्त्वशुद्धिः—ण खु ण खु । [न खलु न खलु ।]

साधन०—किं तस्या गमनविलम्बे कारणम् ?

सत्त्वशुद्धिः—किं अण्णं भेददिट्ठिए णिब्बन्धवन्दरेण । [किमन्यद्भेददृष्टेर्निर्बन्धमन्तरेण ।]

साधन०—किं मा या द्वैतवादस्य संदेशहारिणी ?

सत्त्वशुद्धिः—अह इं । [अथ किम् ।]

साधन०—कीदृशः स देशो ब्रह्मजिज्ञासां प्रति द्वैतवादस्य ?

सत्त्वशुद्धिः—गुणवदो एव्व पक्खो मए अवलम्बिअदि ण णिग्गुणो पक्खो त्ति । [गुणवत एव पक्षस्त्वयाऽवलम्बनीयो न निर्गुणपक्ष इति]

साधन०—सदृशमेवेदं तस्याज्ञानवर्मोपप्लवकृतेः । किं पुनः प्रतिबंदिष्टं द्वैतवादं प्रति ब्रह्मजिज्ञासया ?

सत्त्वशुद्धिः—गुणवदो एव्व पक्खो मए अवलम्बिअदि ण णिग्गुणो पक्खो त्ति । [गुणवत एव पक्षो मयाऽवलम्ब्यते न निर्गुणः पक्ष इति ।]

साधन०—कथमेवमध्यवस्यसि ब्रह्मजिज्ञासा । अत एव तस्या निकटेऽहं प्रेषिताऽस्म्यमात्य-रमणीयचरणेन ।

सत्त्वशुद्धिः—कहिं दाणिं तादो ? [कुत्रेदानीं तातः ?]

साधन०—मामितः प्रस्थाप्यार्यमिश्रं शिवप्रसादाकारयितुं गतः ।

सत्त्वशुद्धिः—को उण दाणिं देवस्स परिस्सरे ? [कः पुनरिदानीं देवस्य परिसरे?)

साधन०—आपातबोधः ।

सत्त्वशुद्धिः—अहं वि देवीए पस्सवट्ठिणी होमि । एआइणी णाम सा । [अहमपि देव्याः पार्श्ववर्तिनी भवामि । एकाकिनी नाम सा ।)

साधन०—भवितव्यतया संगता देवी । त्वया पुनर्देशिकानुग्रह आह्वयितव्यः । अहमपि ब्रह्म-जिज्ञासां पुरस्कृत्य तुर्याश्रमस्थं देवं संभावयिष्यामि ।

[इति परिक्रम्य निष्क्रान्ते ।]

इति मिश्रविष्कम्भः ॥

(ततः प्रविशति जीवः, आपातबोधश्च ।)

जीवः—अहो निर्विघ्नेपरमणीयता तुर्याश्रमस्य । तथा हि,

न कर्तव्यं किंचिज्जगति परिहर्तव्यमथ वा वने वास्तव्यानामिह सकलभूतप्रणयिनाम् ।

क्रियाभ्यः सर्वाभ्यः प्रतिकलविवृद्धानुरागदुपालीढं नैर्घृण्यं निरवधिकमासादितवताम् ॥

आपातबोधः—इहापि न हीयते कर्तव्यम् ।

आचार्योक्तिरसिद्धं प्रतिपदविहितं ब्रह्मचर्यं च कार्यं
मर्यादाः सेवितव्या यमनियमनिभा नो विचारणाध्यानमुख्याः ।
निष्ठातव्यं समाधावहरहरपि च द्विप्रकारेऽपि तस्मि-
न्कामादीनां त्यागप्रकरणविरहव्यञ्जनैर्न प्रबन्धः ॥ ३ ॥

जीवः—सत्यमस्त्येवात्र कर्तव्यम् , तथाऽपि तत्र म्रियतामनुस्मरणस्य प्रत्यनीकम् । **श्रेयस्तान्त्रिकब्रह्म-साधनमेव** । यतः,

प्राणान्पञ्च नियम्य तं च करणग्रामं निगृह्य क्षणं
प्रत्याहृत्य मनः परात्मविषयतो यावत्समाधीयते ।
तावत्पादझलज्झलायितरणत्क्षीरभृङ्गाङ्गना
बाला किंचिदुदञ्चितस्मितमुखी क्षिप्तेव समोज्जृम्भते ॥ ४ ॥

अपि च,

अनुकलमपि ध्यायं ध्यायं तदाकृतिमद्भुतां मनसि भजतो निर्व्यूढा मे तदाहितसंस्क्रियाम् ।
स्फुरति पुरतः पश्चादेषा वधूरव पार्श्वयोर्युगपदधुना भूयश्चान्तर्बहिश्च सुनिश्चितम् ॥

आपातबोधः—संप्रति संततानुसंधानेन तन्मयत्वं प्राप्तो देव इति मन्ये ।

जीवः—अत्यल्पमिदमुच्यते ।

ध्यायंस्तामनुवेलमुज्झितमनोबाह्येन्द्रियप्रक्रियः
सद्यस्तन्मयतां न केवलमहं प्राप्तोऽस्मि निःसंशयम् ।
मद्दृष्ट्या तु समस्तमेव भुवनं संपद्यते तन्मयं
निह्नोतुं विधिना विनैतदधुना शक्यं जगच्छिल्पिना ॥ ५ ॥

आपातबोधः—संप्रत्याप्तकाम एव देव इति मन्ये यत आत्मकामः ।

जीवः—सत्यमेवमन्यथाप्रतिभानं तव वर्तते ।

आपातबोधः—तत्कदा निवर्तिष्यते ?

जीवः—

यदा मा तन्वङ्गी पुनरपि पुरेव स्फुटतरं पुरः प्रादुर्भावं सपदि भजमाना कुतुकतः ।
स्वलावण्योल्लासव्यतिकरपराभूततिमिरा चिराद्युत्सङ्गं मे फलितनिजमङ्गं विरचयेत् ॥ ७ ॥

आपातबोधः—कथमेतद्भविष्यते, यतोऽद्याप्यनिवृत्तकोपैव देवी ।

जीवः—बाढमेनामनुसरिष्यामि । (उभौ परिक्रामतः ।)

जीवः—आपातबोध, भवितव्यतया सह किमपि व्यवहरन्ती इत एवाभिवर्तते देवी । तदावां विटपान्तरितौ शृणुवस्तावदेनयोर्विस्रम्भजल्पितानि । [उभौ तथा कुरुत :।]

[ततः प्रविशति बुद्धिः, भवितव्यता च।]

भवितव्यता—देवि, पसीद । कुदो विसण्णा सि [देवि, प्रसीद । कुतो विषण्णाऽसि]

बुद्धिः—हला भविदव्वदे, तुमं किं वि अजाणदी विअ पुच्छसि । जं दाणिं देव्वो, [हला भवितव्यते, त्वं किमप्यजानतीव पृच्छसि । यदिदानीं दैवः,] (संस्कृतमाश्रित्य)

नालापेऽभिरुचिं करोति न पुनः स्रक्चन्दनादिस्पृहां
दूरे नाम विलासिनीकुलसमाचारो विचारोदयात् ।
ताम्बूलश्रवणेऽपि कुप्यति भृशं न स्वीकरोत्यम्बरं
प्राश्नात्यौषधवत्कदाचिदशनं क्लिश्नाति मां केवलम् ॥ ८ ॥

भवितव्यता—कदारहिअ ? [कदाऽऽरभ्य ?]

बुद्धिः—जदा उण मण्णासणामा एसो अस्समो पत्तो मइ कोवेण तदप्पहुदि एसा अवत्था अज्जउत्तस्स । [यदा पुनः संन्यासनामैष आश्रमः प्राप्तो मयि कोपेन तदाप्रभृत्येषाऽवस्थाऽऽर्यपुत्रस्य]

भवितव्यता—किंणिमित्तो तुइ कोवो देवस्स ? (किंनिमित्तस्त्वयि कोपो दैवस्य ?)

बुद्धिः—जदो कोवाविट्ठा अहं दुट्ठजादि अज्जउत्तस्स बहुप्पआरं अणुणअं ण गहीदवदी । [यतः कोपाविष्टाऽहं दुष्टजातिरार्यपुत्रस्य बहुप्रकारमनुनयं न गृहीतवती ।]

भवितव्यता—कुदो उण तुह तारिसो कोवावेसो देवम्मि ? [कुतः पुनस्तव तादृशः कोपावेशो दैवे ?]

बुद्धिः—सुणादु सही । पुढमं कहिं वि इत्थिअअणम्मि अज्जउत्तस्स भाववन्धो त्ति कण्णाकण्णि-

आए सुदं । अणन्दरं दु एक्कदा अज्जउत्तस्स अग्गदो एव्व दिट्ठा मए सा चित्तफलअम्मि । [श्रृणोतु सखी । प्रथम कुत्रापि खीजन आर्यपुत्रस्य भावबन्ध इति कर्णाकर्णिकया श्रुतम् । अनन्तरं त्वेकदाऽऽर्यपुत्रस्याग्रत एव दृष्टा मया सा चित्रफलके ।]

भवितव्यता—कहिं दाणिं तं चित्तफलअं ? [कुत्रेदानीं तच्चित्रफलकम् ?]

बुद्धिः—इदो एव्व तं [इत एव तत्] (इति चेलान्ते पिहित चित्रफलकं प्रदर्शयति । **भवितव्यता** चित्रफलकमादाय निरूप्य च सरोमाञ्चमानन्दबाष्पं मुञ्चति ।)

जीवः—आपातबोध, चित्रदर्शनमात्रेण रोमाञ्चानन्दबाष्पोद्गमाद्भवितव्यतायाः परिचिता तत्रभवतीति मे वितर्कः ।

बुद्धिः—(स्वगतम्) कहं एसा चित्तदंसणादो अस्सूणि मुञ्चेदि । णूणं चित्तगदा वहू एदाए अणुबन्धिणी होदि । [कथमेषा चित्रदर्शनादश्रूणि मुञ्चति । नूनं चित्रगता बधूरेतस्या अनुबन्धिनी भवेत] (प्रकाशम्) भविदव्वदे, किं कारणं बाहुग्गमस्स ? [भावितव्यते, किं कारणं बाष्पोद्गमस्य ?]

जीवः—अस्माभिः प्रष्टव्यं स्वयमेव देवी पृष्टवती । भवतु, किं वक्ष्यत्येषा, श्रोष्यामः ।

[भवितव्यता आनन्देन स्तिमिता तिष्ठति ।]

बुद्धिः—णं भविदव्वदे, पुच्छम्मि, दाव बाहकारणं । [ननु भवितव्यते, पृच्छामि तावद्बाष्पकारणम्]

भवितव्यता—देवि, किं कहइस्सं । खादिरमूलम्मि कविट्ठफललाहो, वराडिअण्णेसणप्पउत्तस्स णिहिलाहो, जं दाणिं चित्तदंसणप्पउत्ताए मह जदुच्छाए चिरणट्ठं पिअदमं वत्थु उवलद्धं, जं अण्णिज्जन्तं वि ण लहिज्जइ तिहुअणम्मि । सम्पदं किदइच्चो दाव देवो भुवणब्भुदे अस्सिं भावं उवणिबद्धन्तो । तदणुबन्धेण तुमं वि धण्णा एव । तुह अणुबन्धेण अणुबन्धिणो वि । [देवि, किं कथयिष्यामि । खादिरमूले कपित्थफललाभः, वराटिकान्वेषणप्रवृत्तस्य निधिलाभः, यदिदानीं चित्रदर्शनप्रवृत्ताया मम यदृच्छया चिरनष्टं प्रियतमं वस्तूपलब्धम्, यदन्विष्यमाणमपि न लभ्यते त्रिभुवने । सांप्रतं कृतकृत्यस्तावदेवो भुवनाद्भुतेऽस्मिन्भावमुपनिबध्नन् । तदनुबन्धेन त्वमपि धन्यैव । तवानुबन्धेनानुबन्धिनोऽपि ।

बुद्धिः—(साश्चर्यम्) भविदव्वदे, कहेहि कहेहि का उण एसा महाभाआ । [भवितव्यते, कथय कथय, का पुनरेषा महाभागा ।] (जीवः साकूतं कर्णं ददाति ।)

भवितव्यता—(सरोमाञ्चं संस्कृतमाश्रित्य)

सर्वे वेदा यत्पदं संगिरन्ते सर्वाण्येवाचक्षते यां तपांसि ।

यामिच्छन्तो ब्रह्मचर्यं चरन्ति प्राज्ञा जीवन्मुक्तिरेषा सखी मे ॥ ९ ॥

बुद्धिः—अज्ज प्पहुदि मह वि एसा सही एव्व । [अद्यप्रभृति ममाप्येषा सख्येव ।]

भवितव्यता—दिढप्पडिण्णा होहि । [दृढप्रतिज्ञा भव ।]

जीवः—यामासाद्य पुमान्न पश्यति परं नान्यद्विजानाति चे-

त्याहुः सर्वविदः पुरातनमिरामन्तःप्रदेशाध्वगाः ।

जीवन्मुक्तिरिति प्रथामुपगता वैद्येयमाजानतो

भूमानन्दमुर्याति निश्चितुहे मोदाहे चान्तरः । १० ॥

बुद्धिः—(साश्चर्यम्) णाम वि मे ण सुदपुव्वं एदाए । [नामापि मे न श्रुतपूर्वमेतस्याः ।]

भवितव्यता—(संस्कृतमाश्रित्य)

नैषा लभ्या श्रोतुमप्यस्मदादेः श्रृण्वन्नोऽपि प्राणिनो यां न विद्युः ।

आश्चर्योऽस्याः किं च वक्ताऽऽशिष्टो बोद्धा लब्धा त्वास्पदं कौशलस्य ॥ ११ ॥

बुद्धिः—वण्णअदु एसा पुणो वि सुणिस्सं । [वर्ण्यतामेषा पुनरपि, श्रोष्यामि ।]

भवितव्यता—(संस्कृतमाश्रित्य)

यामप्राप्य निवर्तन्ते वाचोऽपि मनसा सह । चिदानन्दाकृतिः सेयं वर्णनीया कथं मया ॥

जीवः—एष भूतार्थवाद एव ।

गन्तुं तत्पदमुद्यता सुमहता यत्नेन वाग्गुम्भना

व्यावृत्ता दृशुक्त्यभावजनितक्लेशेन निर्विद्यते ।

सिद्धानां यमिनां मनांस्यपि तदा प्रबोधयन्ती क्षणा-

त्प्रत्यावृत्य पुनः पुनः कलवशाद्विकल्प्यमुद्बिभ्रति ॥ १२ ॥

बुद्धिः—चिट्ठदु दाव ताए वण्णणं । कस्स उण एसा कण्णा ? [तिष्ठतु तावत्तस्या वर्णनम् । कस्य पुनरेषा कन्या ?]

जीवः—उचितः प्रश्नः ।

भवितव्यता—अओणिआ, अओ एव्व णिच्चसिद्धा अ । [अयोनिजा, अत एव नित्यसिद्धा च ।]

जीवः—प्राचीनो मदीयस्तर्कः संप्रति निर्णयः संपन्नः ।

बुद्धिः—कहिं उण एसा पडिट्ठिदा ? [कुत्र पुनरेषा प्रतिष्ठिता ?]

भवितव्यता—गुहब्भन्दरम्मि । [गुहाऽभ्यन्तरे ।]

जीवः—आपातबोध, गुहाऽभ्यन्तरे इत्येष तव संवादः ।

बुद्धिः—गुहप्पविट्ठा सा केण दट्ठव्वा । [गुहाप्रविष्टा सा केन द्रष्टव्या ?]

भवितव्यता—अग्गिआए तुए एव्व । [अग्र्यया त्वयैव ।]

बुद्धिः—कदा उण अग्गिआ भविस्सम् ? [कदा पुनरग्र्या भविष्यामि ?]

भवितव्यता—जदा उण सही साहणसम्पत्ती बम्हजिण्णासा अ तुए सङ्गदाओ भविस्सन्ति ।
[यदा पुनः सखी साधनसंपत्तिर्ब्रह्मजिज्ञासा च त्वया संगते भविष्यतः ।]

(ततः प्रविशति परिव्राजिकावेषेण साधनसंपत्तिः, ब्रह्मजिज्ञासा च ।)

साधन०—सर्वैः कर्मार्जितो यथेह भुवने भावः क्षयेणान्वित-
स्तद्वत्पुण्यजितोऽप्यमुत्र भुवने क्षीयेत भावोऽखिलः ।
उत्पत्त्याप्तिविकारसंस्कृतिमतः साध्यात्पृथग्लक्षणं
बुद्धिह्रासविवर्जितं पदमतः प्रेक्षावता प्रार्थ्यते ॥ १४ ॥

जिज्ञासा—श्रोतव्यं श्रुतिवाक्यतः श्रुतमिदं मन्तव्यमन्ताश्चिरं
युक्त्योघेन मतं च तत्प्रविशदं कार्यं निदिध्यासनैः ।
साक्षात्कार्यमिदं तदेव ह्यनकैरात्मस्वरूपं परं
तन्निष्ठा परिनिष्ठिता समुपगन्तव्या मुमुक्षावता ॥ १५ ॥

साधन०—हला जिज्ञासे, कुत इयन्तं कालं कृतविलम्बाऽसि ।

जिज्ञासा—त्वदागमनप्रतीक्षया ।

साधन०—ईदृशो मयि स्नेहातिरेकः प्रियसख्याः ।

जिज्ञासा—मुखं खल्वत्रभवती ।

साधन०—कृतमुपचारेण । भूतार्थं ब्रूहि । मया तु श्रुतं भेददृष्टयवष्टम्भो गमनविलम्बे निमित्त-मिति ।

जिज्ञासा—(कर्णौ पिधाय) क्षान्तं पापम् । क्षान्तं पापम् ।

भेददृष्टिमवष्टभ्य चेष्टते यो विनष्टधीः । मृत्योः स मृत्युमाप्नोति संदेहो नेह कश्चन ॥

साधन०—हला, किं कुप्यसि। द्वैतवादसंदेशाभ्युपगम एव भेददृष्टयवष्टम्भो नाम।

जिज्ञासा—किं नाम द्वैतवादस्य संदेशो मयाऽभ्युपगतः।

साधन०—अहं न जानामि। गुणवत्पक्षस्त्वयाऽवलम्बनीय इति संदेशः। गुणवत्पक्ष एव मयाऽवलम्ब्यत इति प्रतिसंदेशः। किमत्र फलितम्, त्वयैव विमृश्यताम्।

जिज्ञासा—अस्त्येव महानर्थभेदः संदेशप्रतिसंदेशयोस्तात्पर्यभेदेन।

साधन०—कथम्?

जिज्ञासा—गुणवतः पक्षोऽवलम्बनीय इति संदेशस्याशयः। गुणवान्पक्षोऽवलम्ब्यत इति प्रतिसंदेशस्याभिप्रायः।

साधन०—कस्मादत्पक्षो गुणवानभिप्रेतः प्रियसख्या?

जिज्ञासा—अद्वैतपक्ष एव।

साधन०—द्वैतपक्षे किं दूषणम्?

जिज्ञासा—अप्रामाणिकत्वमेव।

साधन०—सर्वानुभवसिद्धं द्वैतं कथमप्रामाणिकम्?

जिज्ञासा—श्रुतिप्रमाणकं न भवतीति ब्रवीमि।

साधन०—श्रुतयोऽपि द्वैतं वदन्ति।

जिज्ञासा—अनुवदन्तीति वक्तव्यं, यतो वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यम्।

साधन०—किमयं प्रतिसंदेशाभिप्रायो भेददृष्टिर्विदितः स्यात्।

जिज्ञासा—विदित इत्येव मे वितर्कः। कथमन्यथा प्रतिनिवर्तमानायास्तस्या वीरवादः।

साधन०—कथमिव।

जिज्ञासा—सर्वथा मत्पक्षे त्वां पातयिष्यामीति।

साधन०—अत्याहितम्।

जिज्ञासा—अभयं प्राप्ताया मम का भयशङ्का। (उभे परिक्रामतः।)

बुद्धिर्भवितव्यता च—(निरूप्य) कहं इदो एव्व आअच्छन्दि भअवदीओ। [कथमित एवागच्छतो भगवत्यौ] (इत्युपसरतः।)

बुद्धिः—भअवदीओ, पणमामि। [भगवत्यौ, प्रणमामि।]

भगवत्यौ—भर्तुरनुरोधिनी भव।

जीवः—कथमुपस्थिते भगवत्यौ । (इत्यापातबोधेन सहोपसृत्य) अयमहम् । (इत्यभिवादयते ।

भगवत्यौ—प्रियतमाभिसंपन्नो भव ।

जीवः—जातप्रायैव मे प्रियतमाऽभिसंपत्तिर्भगवत्योरुपस्थानेन ।

आपातबोधः—अनुकूलयितव्या देवी भगवतीभ्याम् ।

भगवत्यौ—यदर्थस्तावदावयोरुपक्रमः ।

साधन०—देवि, श्रूयताम् ।

अन्योन्यात्मकतामुपागतवतोरेतावताऽनेहसा
वैरस्यं युवयोर्न सांप्रतमिदं निष्कारणोज्जृम्भितम् ।
वैरस्यं पुनरेतदेव विषयेष्वस्थायिषु ब्रह्मणो
लोकान्तेषु निधीयते यदि तदा शोभाऽऽवहं याति नः ॥ १ ॥

(बुद्धिः अवचना तिष्ठति ।)

भवितव्यता—देवि, किं त्वं तूष्णीकासि ? [देवि, किं त्वं तूष्णीकाऽसि ?]

बुद्धिः—(संस्कृतमाश्रित्य)

संसारोऽयमनादिरेव विशयोऽप्यत्राणुमात्रो न नः
कालेन त्वियताऽपि नास्मि विरहव्याधेरहं गोचरे ।
अद्यैनं विधिदुर्विपाकविभवादुद्भाव्यमानोदयं
पर्यालोच्य विपच्यमानहृदया न व्याहरामि ह्रिया ॥ १८ ॥

जिज्ञासा—

भुक्ता भोगाः प्रतिमुहुरिहामुत्र चालं युवाभ्यां नानारूपा नवनवसमुन्मेषभाजोऽभिरूपाः ।
भोक्तव्यं किं भुवि परमितः शिष्यतेऽभुक्तपूर्वं निर्वेदस्य त्वयमवसरो निर्व्यलीकं निवेष्टुम् ॥

बुद्धिः—मं एव्व उद्दिसइ भअवदीणं संरम्भो । [मामेवोद्दिशति भगवत्योः संरम्भः ।]

साधन०—

स्वयमखिलविकारप्रत्ययप्रत्यगात्मा न हि विषयसुखार्थी लक्ष्यते पार्थिवोऽयम् ।
अपि तु चिरवियुक्तामात्मनोऽनन्यभूतामभिलषति स जीवन्मुक्तिमत्यन्तभव्याम् ॥ २० ॥

देवस्यानन्यभूता चैषा देव्या अप्यनन्यभूतैव ।

बुद्धिः—कहं ! [कथम् !]

साधन०—देवि, शृणु ।

त्वं देवान्न हि भिद्यसे स च पुनर्देवो न मुक्तेः पृथ-
ग्भावीति प्रणिधानतो मम दृढं विज्ञातमन्तः स्वयम् ।
एवं त्वं तदभेदमाश्रितवतो देवान्न भिन्नाऽसि य-
त्तन्मुक्तेरपि नैव भिद्यस इति न्यायेन निर्णीयते ॥ २१ ॥

जिज्ञासा—एतस्यामभिलाषबन्धनमपि प्रायेण न त्वां विना
देवस्य त्वदधीन एव भविता भोगो भविष्यन्नपि ।
संप्राप्ता यदि सामरस्यपदवीं भिद्येत किं वां तदा
सर्वोऽप्येष मृषा विशेषकलनायासश्रमया संगतौ ॥ २२ ॥

भवितव्यता—हला देवि, जीवम्मुत्तीए सङ्गदो देवो पज्जत्तकामदाए सत्थो हवे । तुमं वि दाणिं णिव्वक्खेपसुत्थदाए संप्पदं मुत्तिं अणुभविस्सासि । आरोविदा अ सा सहीपदं पुढमं एव्व तुए । ता अज्ज तुमं एव्व जीवम्मुत्तिं सुघडिदं करेहि देवेण । [हला देवि, जीवन्मुक्त्या संगतो देवः पर्याप्तकामतया स्वस्थो भवेत् । त्वमपीदानीं निर्व्याक्षेपसुस्थतया संततां सुप्तिमनुभविष्यसि । आरोपिता च सा सखीपदं प्रथममेव त्वया । तस्मादद्य त्वमेव जीवन्मुक्तिं सुघटितां कुरु देवेन ।]

बुद्धिः—ण सक्कुणोमि भविदव्वदं अदिवट्टिदुं । [न शक्नोमि भवितव्यतामतिवर्तितुम् ।]

(संस्कृतमाश्रित्य)

हितमस्त्वहितं वाऽस्तु वस्तुतत्त्वं न चिन्तये । आर्यपुत्रस्य कार्येऽस्मिन्नात्मानमपि नादृिये ॥

जीवः—(सपरितोषम्) दिष्ट्या देवी परित्यक्तमत्सरा मनोरथानुरोधिनी च संवृत्ता ।

भगवत्यौ—तर्हि प्रवर्तनां देवी कल्याणाय देवस्य ।

बुद्धिः—अहं इदो एव्व पउट्टम्हि । पुरदो चलिदव्वं अज्जउत्तेण । [अहमित एव प्रवृत्ताऽस्मि । पुरतश्चलितव्यमार्यपुत्रेण ।]

आपातबोधः—देव, किं जोषमास्यते । साधयामः ।

जीवः—अपि परिचितः पन्थाः प्रियाऽऽवसथस्य ।

आपातबोधः—हन्त, ममापि द्रष्टव्यः पन्थाः ।

जीवः—बाढम्, इदानीमेवमभिधत्से।

आपातबोधः—पश्चादपन्थानमेव प्रापयिष्यसीति वाक्यशेषः। भवतु, किमिदानीं कथितेन। अग्रे सर्वं स्फुटीभविष्यति। विस्रब्धमुत्तिष्ठतु देवः।

जीवः—ओं तत्सत्। (इत्युत्तिष्ठति।)

आपातबोधः—(अवलम्बनाय हस्तमर्पयित्वा) इत इतो देवः।

(सर्वे परिक्रामन्ति।)

आपातबोधः—सत्वरं चलतु देवो यावन्नभो न प्रवहति। अद्य हि,

परुषपरिकरोपसर्गदुःखैः परिणतसौम्यगुणैकदर्शनीयः।
विषयविलसितं विहाय सद्यः जगदुपयाति रविर्यथैष देवः॥ २४॥

जीवः—(ऊर्ध्वमवलोक्य, साश्चर्यम्)

अस्तं गच्छति मध्य एव नभसो ग्रस्तो रविः केन वा
स्तीर्यन्ते परितो जगन्ति तिमिरैरन्धीक्रियन्ते दिशः।
हा हा कोऽयमकाण्ड एव जगतामाविर्भवत्यत्ययो
यद्वा कस्यचिदिन्द्रजालरचनाप्रस्तावनैषा भवेत्॥ २५॥

अहं तु,

उद्बोधितोऽपि कबले कबले जनन्या निद्रालसः शिशुरिवाविदितान्यभावः।
आलोकयन्नपि बहिर्जगदिन्द्रजालमन्तः कयाऽपि कलया न परिच्युतोऽस्मि॥ २६॥

(इति परिक्रम्य निष्क्रान्ताः सर्वे।)

इति चतुर्थोऽङ्कः॥



पञ्चमोऽङ्कः ॥

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति शिवप्रसादः ।)

शिवप्रसादः—अहो दयालुभावो भगवतः परमशिवस्य । तथा हि,

अल्पायुर्द्रविणोऽप्यनिष्टवसुधाखण्डाधिकारी नृपो
राजाऽस्मीति वदन्तमन्तिकगतं हन्ति क्षुधा सान्वयम् ।
विश्वेशोऽपि शिवः शिवोऽहमिति यो वाचाऽपि संभाषते
तस्मै देहभृते ददाति मुदितस्तादात्म्यमेवात्मनः ॥ १ ॥

किं बहुना,

आत्मोद्देशकृतान्यनेन सुकृतान्यद्येति जीवाह्वये
गाङ्गे प्रीतमनाः स्वनामकथनव्यापारनिस्तन्द्रिते ।
स्वं तादात्म्यमपि प्रदातुमधुना भावेन संकल्पय-
न्सर्वस्मिन्स्तदुपायसाधनविधावाज्ञाप्य मां प्राहिणोत् ॥ २ ॥

(परिक्रम्यावलोक्य च) कथमित एवाभिवर्तते सखा देशिकानुग्रहः । (उपसृत्य) सखेऽनुग्रह, कुतः संभ्रान्त इवासि ?

(प्रविश्य)

अनुग्रहः—कथमेवंविधो न स्याम् । यतो जीवन्मुक्तिकल्याणमुद्दिश्य प्रस्थितस्य जीवराजस्य प्रवृत्तिरपि नोपलभ्यते, यदभ्युदये प्रवृत्तोऽस्मि देशिकनिदेशेन ।

शिव०—सखे, पर्यवस्थापयात्मानम् । कुशली नाम स राजा जीवितमात्रेण ।

अनुग्रहः—जीवितमात्रेणेति कम्पितमिव मे सबन्धनं हृदयम् । सखे, स किं विपन्नो राजा ?

शिव०—

स बद्धो मोहाख्यप्रबलतरपाशेन विवशं सुदुर्मोचद्वैतान्धतममजठरीनिपतितः ।
समन्तादाक्रन्दन्हर हर हरेत्यातुरतया भवाख्ये गर्तेऽस्मिन्युगमिव निमेषं गमयति ॥ ३ ॥

अनुग्रहः—आः कष्टम् । इतोऽपि का नाम विपत्तिः । (सवितर्कम्) प्रायशः सर्वज्ञंमन्यस्यापतबोधस्यासमीक्ष्यकारितामुक्तोऽयमातङ्कः । अथ वा द्वैतवादोपलब्धाया भेददृष्टेर्दुश्चेष्टितमेतद्भवेत् ।

शिव०—अज्ञानवर्मण एव दुरात्मनो दुश्चेष्टितमेतदिन्द्रजालरूपम । अतश्च तदुन्मथनेन विना न क्षेमप्राप्तिर्जीवराजस्य ।

अनुग्रहः—कथमुन्मथितव्योऽनिर्वचनीयः स पापः ।

शिव०—सखे विस्रब्धो भव ।

नौस्तम्भाग्रनिविष्टकाकवदसावात्मैकनीडः क्व वा
यावद्वाप्यथ वाऽयनाय किमहो मार्गान्तरं विद्यते ।
यत्र क्वापि निलीनमप्यथ बलादासाद्य चाबध्य च
ब्रह्मज्योतिषि तं जुहोमि सहसाऽध्वर्युर्यथाऽग्नौ पशुम् ॥ ४ ॥

नियुक्तश्च मया द्वैतवादजयाय ब्रह्मज्योतिरुज्ज्वलनाय च मननिदिध्यासनशर्मभ्यां सह श्रवणशर्मा ।

अनुग्रहः—तर्ह्यहमपि सत्वरमितो गत्वा विपन्नं राजानमाश्वासयामि ।

शिव०—उपपन्नं भवानाह । यावदहमप्यानायगिरेरन्तभागस्थे महावाक्यनाम्नि शृङ्गे प्ररूढां ज्योतिर्मयीं ब्रह्मविद्यां नाम सिद्धाञ्जनौषधिमाहरामि, यया जीवराजस्यानर्थनिवृत्तिरानन्दावाप्तिश्च संपत्स्यते ।

उभौ—तथा । (इति परिक्रम्य निष्क्रान्तौ ।)

इति शुद्धविष्कम्भः ॥

(ततः प्रविशति यथानिर्दिष्टो बुद्धया सह जीवः ।)

जीवः—अहह महति क्वाप्यन्धकारे कठोरे विवशनिपतितोऽहं विह्वलः संभ्रमामि ।
अधिकमपि विपन्नो हन्त तापैरिदानीमनधिगतशरण्यः किं करोमि क्व यामि ॥

बुद्धिः—अज्जउत्त, किं अआणन्तो विअ तुमं परिदेविदम्मि मणं कुणसि । गच्छ दाव सरणं तहणिन्दुसेहरं जो उम्मत्थअकरुणदाए दीणाणाहविवण्णाणं सरणं सुणिज्जइ । [आर्यपुत्र, किम-

जानन्निव त्वं परिदेविते मनः कुरुषे । गच्छ तावच्छरणं तरुणेन्दुशेखरं य उन्मस्तककरुणतया दीनानाथविपन्नानां शरणं श्रूयते ।]

जीवः—देवि, सम्यगनुस्मारितोऽस्मि ।

मतं गतमितः प्रभृत्यहमहंकृतिं दुस्त्यजां विसृज्य सह लज्जया विधुतसर्वदुर्वासनः ।
हर स्मरहर प्रभो शिव भवेति जल्पन्विभोः सरोजसमरोचिषं चरणमेव संचिन्तये ॥ ६ ॥

(शिरस्यञ्जलिं बध्नन्)

जय जय देवदेव जगदीश नदीशशिभृद्घनघनसारसारसुकुमार कुमारगुरो ।
शिव शिवतातितातिरमणीयमणीवलयिन्भव भवभीमभीषथनोदन मोदयिता ॥ ७ ॥

जनजननावनावसितभूः सितभृतिरुचे रुचिरुचिराधराधरितपल्लव भिल्लवर ।
महिमहिमाग जागधसुरासुरसिद्धसुने हर हर खेऽघमेघमधुना मधुनामकथ ॥ ८ ॥

समसमभावि भाविभवभावन भावभुवा रणरणकेन केनचन भीमहता वहता ।
गलगलदश्रुदश्रुलभुजङ्गभुजाङ्गमदो परिरक्षिदेहि देहिसुखसाधक साधुकृपाम् ॥ ९ ॥

दधदधरस्य रस्यतमहासमहासुषुमामहमहमादिमादितिजवन्दित वन्दितगीः ।
विधुविधुताण्डताण्डवाचिदम्बर शम्बरजिद्वर धरणीमणीमयनिवेश निवेशय माम् ॥ १० ॥

कृतौ कृत्यो भृत्यो निगलभरनिस्पन्दित इव प्रभुं त्वां क्रोशामि स्मरमथन तन्मोचनकृते ।
अनुक्रोशात्किं न द्रवति हृदयं किंचिदपि ते यमासाद्योत्क्रोशो न किमधिगतः कर्णसरणिम् ॥

असंख्यैरुत्पादैरनियतमसंख्यैश्च निधनैस्तवाज्ञामेतावच्चिरमहमकार्षं कथमपि ।
इतः कर्तुं नालं भृशमलसतामप्युपगतः सुखं वर्तिष्ये मां कृपणमनुमन्यस्व कृपया ॥१२॥

इयं ते विज्ञप्तिः पुनरपि पुरारे पुनरपि प्रभुर्नाहं भूयो जनितुमथ मर्तुं च भुवने ।
तदेतस्मात्पाशाच्चिरदृढनिरूढात्पशुपते पशुं मामुन्मोच्य प्रदिश परमानन्दपदवीम् ॥ १३ ॥

बुद्धिः—(श्रुतिमभिनीय) कहं पडिसद्दो विअ । [कथं प्रतिशब्द इव ।]

जीवः—(आकर्ण्य) नूनं पान्थैर्भवितव्यम् । भवतु, उत्क्रोशामि । भो भोः पान्थाः, परित्रायध्वं, परित्रायध्वम् ।

स एष पाशबन्धेन दुर्मोचेनाभिपीडितः । विलुठामि तमिस्रान्धो जरामरणगह्वरे ॥ १४ ॥

श्रीत्यागराजावजय-रामामृततरङ्गिणी-शृङ्गारशेखरादिग्रन्थनिर्माणेन विश्रुतयशोभिः संस्कृतसाहित्यावलम्बानां परिचितपूर्वैः श्रीमद्भिः सुन्दरेशशर्मभिः प्रणीतं प्रेमविजयाभिधानं सप्ताङ्कसमलङ्कृतमिदं नाटकम्। कल्पितं चात्रेतिवृत्तं कविना। मगधदेशाधिपतेः प्रतापरुद्रस्य तनया चन्द्रलेखा अवरोधोद्याने सेनापतिना साकं युध्यन्तं, स्ववीर्यातिशयेन च तस्य विजेतारं, कलाधरनाम्नो महाकवेः कुमारं, हेमचन्द्रमभिवीक्ष्य तस्य रूपवीर्याभ्यां समाकृष्टमानसा कुसुमेषुशरव्यतां प्राप्नोति। तत्प्रेमानुबद्धा च सा सखीभिस्तमानाय्य एकान्ते सलपति। अन्यान्यानुरागमभिवीक्ष्य असूयाविष्टहृदयेन दुर्मतिना विज्ञापितो महीपतिः प्रत्यक्षीकरणाय समाह्वयति सहभोजनाय कलाधरं सहपुत्रम्। आज्ञापयति च चन्द्रलेखां परिवेषणाय। दृष्ट्वा च तां वर्णयितुमारब्धे हेमचन्द्रे भारतीविषयकतुरीयपादपूरणेन कलाधरो रक्षति। दुर्मतिश्च हेमचन्द्रं हन्तु बहुधा प्रयतते। अन्ते च निसर्गतः क्षमाशीलोऽपि हेमचन्द्रः स्वशरीररक्षणाय दुर्मतिं प्रणिहन्ति। सेनापतिवधेन क्रुद्धो भूपतिः तस्य कारागृहवासं कल्पयति। एवं नायकीनायकयोः परस्परं प्रेम्णो नानाविधाः प्रत्यूहाः जायन्ते। ततः कलाधरवचनेनानुनीतो नृपतिः शत्रूणां युद्धवार्तां श्रुत्वा हेमचन्द्रमेव प्रेषयति शत्रुविजयाय। सोऽपि विजित्य सर्वानप्यरातीन्, चारमुखात् स्वनिधनवार्तां श्रुत्वा पावकप्रवेशोन्मुखीं प्रियतमां चन्द्रलेखां समाश्वास्य राज्ञोऽपि चित्तमनुरञ्जयति। राज्ञा च प्रीतिपुरःसरं दत्तां प्रेमपात्रीभूतां चन्द्रलेखां परिणीय मागधराज्यमपि प्रशासति इति कथासारः। नाटकं चेदं तत्र तत्र किंचित् किंचित् कालिदासीय काव्यमनुकरोति। प्रथमतः नान्दीश्लोकस्तावत् मालविकाग्निमित्रीयं 'एकैश्वर्ये स्थितोऽपि' इति श्लोकमर्थतोऽनुसरति। अनन्तरं मालविकाग्निमित्रे 'पारिपार्श्विकः—प्रथितयशसां भासकसौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य कृतौ किं कृतो बहुमानः?' इति। अत्रापि 'पारिपार्श्विकः—कथं शताधिकेषु महाकविकृतेषु रूपकेष्वाधुनिकस्य कवेः कृतिष्वादरः सुधीवर्गस्य?' इति। तत्र न केवलं पुरातनत्वं साधुत्वे प्रयोजकम्, नापि आधुनिकत्वमसाधुत्वे। अतः परीक्ष्य यत्साधु तदग्राह्यमिति समाहितम्। अत्र तु अधुनातनमानवमनोऽनुरोधेन 'अभिनवतैव सर्वानावर्जयति। पश्य। 'रसवदपि पुराणं नैव तोषाय पुंसामभिनवविषयेष्वेवाद्य भूयान् प्रमोदः' इत्यभिहितम्। शाकुन्तले 'आसीद्विवृत्तवदना च विमोचयन्ती शाखासु वल्कलमसक्तमपि द्रुमाणाम्' इति। प्रेमविजये — 'अनिबद्धस्यापि कचभरस्य विमोचनच्छलेन क्षणमवस्थाय' इति। नायकीनिकटे दुर्मतिवधनिवेदनप्रकारे च अन्यादृशः कश्चन चमत्कार आहृतः कविना। तत्र तत्र 'कथं वा संवर्धमानमिममाश्रयाशं निर्वापयिष्ये,' 'दुर्मतिकर्दमे लग्नोऽयं मत्तकलभः कथं वा निष्कर्षिष्यति,' 'हन्त, शफरो जाललग्नः' 'हित्वा नववारिधुनीं वेशन्त याति मीनवृन्दं किम्' इत्याद्याः सहृदयहृदयाह्लादकाः सूक्तयो दृश्यन्ते। तदेवमत्यन्तविरले सुरभारतीपरिचये, अतिसरले रसवत्तमैर्वाक्यविलासैरुपशोभितमेतत्प्रबन्धरत्नं विरच्यातिमात्रमुपकृतं श्रीशर्मभिरमरवाणीपरिशीलिनाम्॥

Sri Sadasiva Brahman's Siva Manasikapuja, Kirtanas, Atmavidyavilasa—with Tamil and English meanings by V Narayanan M.A., M.L, Sri Kamakoti Publishing House, Sri Sankara Mutt, Kumbakonam As. 10

இச் சஞ்சி காப்புரிமை பெற்றது

களான ஜகத்குரு ஸ்ரீ சங்காசாரியஸ்வாமிகளால் ஸ்தாபிக்கப்பெற்ற 'ஸ்ரீ காமகோடி கோசஸ்தானத்திலிருந்து வெளியாகியிருக்கும் முதல புஸ்தகம ஸ்ரீஸ்வாமிகள் கோரமான கலியின விஷஜ்வாலையால் சூழபபட்டு தததளிகதும பக்தகோடிகளை பனுகரஹிப்பதற்காகவே சரீரச்சரமத்தைக் கொஞ்சமேனுமை கருதாமல் ஆங்காகு யாதரைகள் செய்து உபகேசித்து வருவது எல்லோரு மறிந்தவிஷயம. ஸ்ரீஸ்வாமிகள் செய்துவரும் ஒவ்வொரு காரியமும பண்டிதர்கள் முதல் பாமரர்கள் ஸாயபுள்ளஸகல ஆஸ்திகர்களுடைய கேமததைக் கருதிதகானெனபதைப்பற்றி அதிகம் சொல்லவேண்டிய திலலை. இப்பொழுது ஸ்ரீ ஸ்வாமிகள் 'ஸ்ரீ காமகோடி கோசஸ்தானம' என்று பெயருளள ஓ புததகசாலையைஸ்தாபிதது அதிலிருந்து அநேக நூல்களை வெளியிட ஆரமபிதிருகிறார்கள. ஆஸை இதில் விசேஷமென்னவெனறால், நம பாரதபூமியில் அநேக இடங்களிலிருந்து ஸமஸ்கிருத கிரந்தங்கள் அச்சிடப்பட்டு வெளிவருகின்றன. இவைகளெலலாம ஸமஸ்கிருத பாஷை பயின்ற பண்டிதாகளுகுகுதான உபயோகப்படும. ஸம்ஸ்கிருதபாஷை பயிலாத மாணாக்கர்களும பெரியோர்களும இகிரந்தகளின் கருததையறிந்து கணமையடைவதற்காக இந்த கோசஸ்தானதிலிருந்து வெளியாகும புஸ்தகஙகளுகுகு இங்கிலீஷ் தமிழ் மொழிபெயர்ப்புகளையும் சேர்த்து வெளியிடுகிறார்கள். மேடி கோசஸ்தானதிலிருந்து வெளியாகியிருகுகும் முதல் புஸ்தகதில ஸ்ரீ ஸதாசிவபிரமமேந்திராளுடைய கிருதிகளில் 'சிவமானஸிகபூஜா' 'கீர்த்தனங்கள்' 'ஆத்மவித்யாவிலாஸம்' என்னும மூன்று நூல்கள் அடங்கியிருக்கினறன. தேவநாகரலிபியிலும தமிழிலும் மூலமும V நாராயணன் எம. ஏ, எம. எல்., அவர்கள் செய்க இங்கிலீஷ் தமிழ் மொழிபெயர்ப்புகளுமை சேர்க்கப்பட்டிருக்கினறன. ஒவ்வொரு பதகதிறதும தமிழ் உரையும ஆங்காங்கு சிறசில இடங்களில குறிப்புகளும காட்டபபடடிருக்கினறன. இவைகளில் வ்யக்யமான கலியின் அபிப்ராயங்கள் வெளியிடப்பட்டிருக்கின்றன. சிவமானஸிகபூஜையில 30 சுலோகங்கள் உள்ளன. 24 கீர்த்தனங்களில் அநேகமாகனல்லாம் ப்ரஹ்மானுபவதனை வெளியிடுபவைகளாகவும சிலகீர்த்தனங்கள் மனதிறகும வாக்குக்கும உபதேசம் செயபவைகளாகவும் அமைந்திருகுகினறன. அத்தம தெரிந்தாலதான ஸஙகீதஸாஹித்யங்களை நன்றயனுபவிக்கலாமென்பது எல்லோருக்கும தெரிநதவிஷயம. ஆதமவித்யாவிலாஸம் முழுமையும் ப்ரஹ்ம ஸாக்ஷாதகாரததை யடைந்தபிறகு ஜீவன்முக்த நிலைமையில ப்ரஹ்மானந்தானுபவததுடன் ஸஞ்சரிககும்பொழுது அவாகள் வாக்கிலிருந்து வெளிவந்தவை நம்முடைய பாக்யவசததால்தான ஸ்ரீ ஸ்வாமிகள் உததமமான, எல்லோருக்கும் உபயோகப்படும்படியான, கிரந்தாத்தங்களை பொறுக்கி எடுதது தமிழ் மொழிபெயர்ப்புடன் ஸ்ரீ காமகோடி கோசஸ்தானம் மூலமாக வெளியிடுமபடி அனுக்ரஹித்திருக்கிறார்கள். ஆஸ்திகர்களான யாவரும இதிலிருந்து வெளியாகும ஒவ்வொரு புஸ்தகத்தையும வாங்கி படித்து கிருதார்த்தர்களாக ஆகவேண்டுமென்று எல்லாம்வல்ல ஈச்வரனை பிரார்த்திக்கிறோம் இதிலிருந்து வெளியாகும அதிதத புத்தகங்களை ஆவலுடன் எதிர்பார்க்கிறோம.

NEWS AND NOTES

OURSELVES.

With this issue we commence the fourth volume of our Journal For the reason explained in our last issue we are not giving the year in the front page but make up a volume with four numbers as they are issued. Thus the fourth volume will consist of the four issues—Nos. 13 to 16 The Title-page and Contents of the third volume are given with this number. In this number we have allotted 16 pages for Soundarya-lahari. Since it is a very big work, we propose to allot 16 pages in every subsequent issue also

We have much pleasure in gratefully acknowledging the sum of Rs. 150/—from Mr. Madhava Sastry of Mysore as a donation to push forward the publication of the Tattva Kaustubha by Bhattoji Dikshita As soon as we finish the Jivanmukti Kalyananataka, which we hope to do in the next issue, we will allot 16 pages for this Tattva Kaustubha also in every subsequent issue We give with this issue the Introduction, and alphabetical Index to the slokas in the first three cantos of the Balabharatam.

***

We once again make an earnest appeal to our subscribers and readers to help the Journal to stand on its own legs by each one securing as many fresh subscribers as possible Whereas it was originally considered that this Journal would, not only be a source of enlightenment and learning by resuscitating ancient hitherto unpublished Sanskrit works and thereby spread our ancient culture, but also add something to the revenues of the Sri Sankaragurukulam from out of its profits, it is now found as a matter of fact to be the exact opposite The Journal is now on the wrong side of the balance and owing to the abnormal rise in the paper and printing materials, is now a drain on the slender resources of the Sankaragurukulam. Hence we appeal most earnestly to all those how could afford, to become Patrons, or Life-members or Subscribers as suits their convenience. We hope that our appeal will not fall on deaf ears but will bear some fruit before the appearance of our next issue.

***

KASHMIR GOVERNMENT PUBLICATIONS.

It is with much pleasure that we acknowledge the receipt during this quarter of a copy of each of the publications of the Kashmir Series of Texts and Studies Nos, 1-63 together with all the Volumes brought out so far of His Highness' private library publications and of the Gilgit manuscripts We take this opportunity to convey our grateful thanks to the Government of His Highness the Maharaja of Jammu and Kashmir for having included the Sri Sacchidananda Bharati Bhandaram, Sri Sankaragurukul their stribution list for the regular s... ...ther publications in future. The books received are all very very valuable dealing mostly with Kashmir Saivism. We hope to deal with them later on one by one in

detail. However, we cannot help mentioning here one of them *viz.*, Sri Vidyarnava Tantram by Sri Vidyaranyaswami in Sanskrit in two big volumes included in His Highness' private library publications It is a very valuable work dealing elaborately with all the details connected with the Sri Vidya worship. Within these two bulky volumes are collected all the available authoritative texts from whatever source they might be thus exhausting practically all available literature on Sri Vidya. We hope to review these books specially in a later issue. In our 'Books Received' column in this issue we are publishing a full list of the books received from Kashmir.

***

PALM LEAF MANUSCRIPTS

The Sri Sacchidananda Bharati Bhandaram is now enriched by the addition of several Palm Leaf Manuscripts, a moity of which were kindly sent by Prof. P P Subrahmanya Sastry of Madras. The other half was kindly sent by Sri Raghupati Vadhyar of Nanja-Talayur. A few came from Sundarapandyapuram. A detailed list of these will be given under the column "Books Received" in our next issue.

***

A DONATION.

Mr. A. K. Ranganathaiyer of Mylapore has been kind enough to send us through His Holiness Sri Jagadguru of Kanchi Kamakoti Peetham the sum of Rs 500/- as his contribution towards the building of the Mahamantapa and the front gopuram. While extremely grateful for this generous gift, we thank Mr A. K. Ranganatha Iyer for having sent it through His Holiness for, while forwarding it to us, His Holiness has sent us His own blessings for the progress of Sri Sankaragurukulam — 'ஸ்ரீ சங்கர குலம் அபிவிருத்தியாக' to use His Holiness's own words. We are sure that these blessings would enable us to secure the full amount required to complete the Mahamantapam and the front Gopuram viz Rs 15 000/ and finish its construction ere long

***

RAMAYANA PATTABHISHEKAM

The series of Ramayana expositions commencing from the very beginning by Kalladakurichi Siromani Venkatarama Sastrigal came to a close on 8—2—43. On that date the Pattabhishekam was celebrated with great eclat. Mahanyasapurva Rudrabhishekam was conducted for the Acharya Murti in the Temple and special pujas and alankarams were performed for the portrait of Sri Ramachandra in coronation robes. After Sahasranama Archana, Naivedya and Diparadhana, Brahmanasantarpana took place. In the evening at 7 P M Sri Sastrigal expounded in easy tamil the Pattabhisheka portion of the Ramayana. The exposition charmed the minds of the hearers, especially so when he explained the beauty of the several words used by Valmiki and the dharmas expounded therein. When the exposition was over, Sri S. G. Krishnier of the Trichy Electric Supply Corporation spoke of the greatness of Sri Rama and extolled the beauty of the expositions of Sri Sastrigal. This was followed by Gurubhaktasikhamani Sri T. K. Balasubrahmanyaiyer who said that it was solely due to the blessings of Sri Sankara Bhagavatpada and Sri Maha Tripurasundari that Sri Venkatarama Sastrigal in this his very first attempt, conducted himself so very masterfully, that the Ramayana was not an ordinary work but a divine one, to wit, Veda itself, that Rama was even according to his enemies a great Dharmatma, that Sage Valmiki, the author of the Ramayana, was a great soul who, by divine grace, had a personal panoramic view of all the events (both public and private) that occurred in the Ramayana, and that it is within the experience of scholars that every time one

read the Ramayana with care and attention new meanings flashed in his mind In fine, he prayed to Lord Sri Sankara and Sri Maha Tripurasundari to bless the Sastrigal with long life, robust health and still greater zest and clarity of vision in expounding the Ramayana and such other works. A rich laced shawl and a set of Eight vols of the Ramayana, were presented to the Sastrigal along with several cash presentations and clothes After the distribution of the prasadams the function came to a close

*
* *

JAYANTI-ARADHANA FESTIVAL, 1943

This annual festival commenced on Sunday the 28th March 43, and continued for sixteen days till the end of Monday, the 12th April. As usual Brahmasri Sivaramakrishna Sastrigal of Mayavaram delivered this year his brilliant and instructive course of lectures on Srimad Valmiki Ramayanam to a very large and most appreciative audience The special feature this year was the Ramayana Mulapathanam (the reading of the Text of the Ramayana) was performed regularly every morning by Kalladakurichi Sri K S. Venkatarama Sastrigal during all these sixteen days His Holiness Sri Sankarananda Sarasvati Swamigal, who has moved with the late Mahaswamigal of Sringeri, was kindly present throughout the function with two of his disciples. On the Jayanti day proper i e., on the 31st of March in the evening, after reading the tribute sent by Sri Sacchidananda Tirtha Swamigal, Sri Sankarananda Sarasvati Swamigal delivered a most interesting and illuminative lecture on the greatness of Sri Sacchidananda Sivabhinava Narasimha Bharati Swamigal the late Mahaswamigal of Sringeri whose Jayanti was celebrated that day He was followed by Gurubhaktasikhamani Sastraprasarabhushana Sri T. K. Balasubrahmanyaiyer, who revealed new facts every year about the incidents in the life of his illustrious Acharya illustrative of His greatness On the 4th of April H H Sri Sankarananda Sarasvati Swamigal spoke in the evening on Janma Saphalya It was a learned and instructive lecture much appreciated by the audience. On the 6th of April the Aradhana of His Holiness was celebrated as usual with great eclat by Gurubhaktasikhamani T. K Balasubrahmanyaiyer when Sri N. S Rama Narsu Iyer of Tennur presented 4 pairs of cloths to the four Aradhana Brahmins as his humble quota of tribute to the late Mahaswamigal On the 12th of April the celebrations came to a close with the last lecture of Brahmasri Sivaramakrishna Sastrigal Sri Sankarananda Sarasvati Swamigal and Gurubhaktasikhamani T K, Balasubrahmanyaiyer extolled the lectures and prayed for the long life, health and prosperity of Brahmasri Sastrigal. There was a general sumptuous feeding of all bhaktas both on the Jayanti and Aradhana days

*
* *

TAMIL NEW YEAR'S DAY AND SRI RAMA NAVAMI.

On the 14th April which happened to be both the Tamil New Year's day and Sri Rama Navami day the portrait of Sri Rama in Coronation robes was decorated in a specially erected mantap and Panaka Pujas including sahasranama archana were performed for the same. Kalladakurichi Sri K S Venkatarama Sastrigal read the Pattabhisheka sarga of the Ramayana and expounded the same in Tamil The New Year panchangam was also read, being new Year day.

On the 21st of April Sri M. Rama Rao B.A of Kumbakonam gave a lecture on Kuchelopakhyanam.

*
* *

SRI SANKARAJAYANTI FESTIVAL

This annual festival commenced on the 4th of May and continued till the end of 10th of May.

As usual every morning Mahanyasapurva Ekadasarudrajapams and Mahabhishekams were performed. Vedaparayanams and Parayanams of Prasthanatrayabhashyas and the other works of Sri Sankara and Sri Sankaravijaya were all conducted on all the days by specially nominated Brahmins. A very large and enthusiastic crowd of Bhaktas attended every day and witnessed the Puja, themselves performing namasankirtanams and chanting various stotras. A very large number of devotees were fed sumptuously every day both in the noon and in the nights In the evenings lectures by eminent pandits and scholars were delivered to large audiences On the 4th May, Dewan Bahadur K. S. Ramaswami Sastrigal B.A., B.L., delivered a very interesting and instructive lecture on 'The unique place of Sankaras's philosophy among those of the world'. On the 5th idem K S Venkatarama Sastrigal gave a delightful lecture on Acharya Upasana The next day Batlagundu Narayana Bhagavatar lectured on the greatness of the Acharya. On the 7th idem the Vedanta Professor of the Jagadguru Vidyasthanam of Jambukesvaram, Vedantasthapaka Polagam Brahmasri Rama Sastrigal discoursed on the supreme greatness of Iswara The next day Gitopanyasachatura Vedantasthapaka Sri S. V Subrahmanya Sastrigal, Principal of Pazhur Patasala lectured on Jiva Svarupa, On Monday the 10th of May Sri S. Ramaswamy Iyengar B.A., L.T., delivered a very interesting lecture on Vali and Sri Rama After the lectures and evening Deeparadhanas the Utsava Murti was decorated in various Alankarams and taken in procession round the Temple After the procession returned to the Ardhamantapam the following Harikatha performances and music parties took place. On 5—5—43 Messrs T. N. Venkatakrishna Bhagavatar and Bros, performed a Harikatha of Rukmini Kalyanam. On the 6th idem Messrs T. R. Krishnamachar and Bros. played on the Veena with T R Narasimhachari in the Mridangam. On the 7th idem Sri V. S. Krishnamurthy sang vocally accompanied by T S. Vaidyanatha Iyer in the Fiddle and T R. Narasimhachari in the Mridangam. On the 8th of May the exquisite Harmonium party of Hemamba Dasar alias Sri Subrahmanya Dikshitar with Sri T. Narasimhachari's Ghatam captivated the audience On the 9th—the Jayanti day proper, in the morning during the Mahabhishekam, Sri Hemamba Dasar played on the Harmonium Rudram, Chamakam, Purushasuktam, Sri Suktam and Taittiriyopanishad to the accompaniment of the chantings of the Brahmins. The whole audience stood mute with astonishment The same evening two young girls performed Bharatanatyam in the presence of the Acharyal

***

SRI DEVI BHAGAVATAM LECTURES.

Commencing from the 17th of February 1943, Sri K S. Venkatarama Sastrigal of Kalladakurichi expounds the Devi Bhagavatam from the very commencement thrice every week—on Sundays, Tuesdays and Fridays. As this is the first time Sri Devi Bhagavatam is expounded in this Temple, the greatness and exploits of the Devi are eagerly listened to,

***

OBITUARY.

It grieves us extremely to record the death of two of our most esteemed collaborators On the 2nd of October last Sri V A. Lakshmi Narasimha Iyer, the agent of Rangoon Raja Reddiar passed away all on a sudden He was a very regular visitor to the Temple and was an ardent devotee of the late Mahaswamigal of Sringeri. His advice on all matters connected with the Temple was very valuable. His enthusiasm during the festivals was simply contagious He would bring the whole of his family with him on

such occasions and ask his daughters to play on the Fiddle or the Veena in the presence of the Acharyal. He would collect a number of Brahmin devotees and carry the Utsava Murti himself during the processions. In short, he was of such great help that his death is irreparable

The other irreparable loss is that of Sri M. V. Nataraja Iyer, one of our most valued Committee member on the 26th June 1943. He was a very estimable gentleman of quiet, unassuming manners who has been helping this Institution financially ever since its commencement No good cause appealed to him in vain. Himself an ardent Sanatanist he helped all those who followed the Sanatana Dharma, to the best of his ability

The sudden demise of these two valued friends has made this Institution much the poorer but we continue the work patiently fully relying on Lord Sri Sankara, who, we are sure does everything for our best

***

SRI SANKARAGURUKULA PUJA FUND.

In continuation of the lists already published, we give below the names of those who have since paid their subscriptions in full.

113 Hon'ble Justice N Chandrasekhara Iyer; Madras
114 Sri R. Kodandarama Iyer, Income Tax Officer, Tanjore
115 ,, A V Gopalacharlar, Trichy
116 Valambal Ammal, Karkudi
117 ,, K. S Subrahmanya Iyer, Trichy
118 ,, Bhagyalakshmi Ammal, Manachanallur
119 ,, U. M Sundaram Iyer, Unjalur
120 ,, S. Alagusundaram Pillai, Musiri

***

SRI SANKARAGURUKULAM AND ACHARYAVIDYA PEETHAM TRUST.

In our last issue we just announced the fact that the Sri Sankaragurukulam and Acharyavidya Peetham and its properties have been declared as a Trust under a duly registered document. The objects of the Institution, as declared in the Trust Deed which is written in Tamil, are as follows:--

1 The due and regluar performance of the daily pujas both in the morning and evening and the annual celebration of the Jayanti and Navaratri festivals for the deities consecrated in the Temple here for the welfare of all the Astika people between the Himalayas and Cape Comorin and for the spread of the Advaita Philosophy.

2. By the grace of the Acharyal, to make all arrangements to train boys here by precept and example in the observance of our cultural customs and practices as detailed in the Shastras and as traditionally interpreted, and to produce scholars learned in Vedas and Sastras possessing full and deep knowledge of the Advaita Sastra

3 In pursuance of the above objects to hold often assemblies of learned people (Vidvat Sabhas) and arrange Bhajanas, Harikathas, lectures, expositions of Puranas and Itihasas by learned Pandits and Scholars

4 To train a number of lecturers to go throughout the country at the cost of this Institution and lecture about the greatness of our religion and our Vaidika Dharma and about the utility of following our traditional customs and thus make the people follow our ancient religion and dharma and culture

5. To train Purohits who could understand the rationale of the various Vaidikakarmas now in vogue by learning the meanings of the various Sutras and the Mantras contained therein and become experts.

6 To collect and publish ancient Sanskrit Manuscripts and Sastraic works and make them useful to the public.

7 To accommodate and feed the Brahmin Sannyasis that go to the Temple here and utilise their knowledge and learning in such a way as would be useful to this Institution

8 In accordance with the above objects to draw out a regular syllabus of the various subjects and to hold examinations in those subjects once a year and confer Titles and Prizes to those who come out successful in the Examinations.

9, To collect all printed Sanskrit books as well as Manuscripts in the Library called Sri Sacchidananda Bharati Bhandaram and make it useful to the public.

10 Further to do all such things as are not inconsistent with the above objects and are not opposed to the Sanatana Vaidika Dharma.

Any generous Astika gentleman who desires to encourage any of the above objects may do so by endowing any amount in the shape of movables or immovables as suits his convenience, ear-marking the same for the particular object or objects desired by him to be encouraged. It will be most gratefully acknowledged and the proceeds shall be devoted to the specified object or objects Enquiries for further details are quite welcome and will be replied to immediately

---

BOOKS RECEIVED

The Kashmir Series of Texts and Studies.

शिवसूत्रविमर्शिनी—The Sutras of Vasugupta with commentary by Kshemaraja

Kashmir Saivaism—(In English) Brief Introduction to the history, literature and doctrines of Advaita Saiva philosophy of Kashmir

प्रत्यभिज्ञाहृदयम् by Kshemaraja

शिवसूत्रवार्त्तिकम्-by Rajanaka Bhaskara
शिवसूत्रवृत्तिः
स्पन्दवृत्ति.—by Kallata

The above three in one book.

स्पन्दकारिका with Vritti of Ramakanthacharya

परमार्थसारः—by Abhinavagupta with commentary by Yogaraja

विज्ञानभैरवः—with commentary partly by Kshemaraja and partly by Sivopadhyaya

Do with commentary of Ananda Bhatta

स्तवचिन्तामणिः—भट्टनारायणविरचितः, क्षेमराजाचार्यकृतविवृत्युपेतः ।

महार्थमञ्जरी—महेश्वरानन्दाचार्यप्रणीता स्वकृतपरिमलाख्यटीकोपेता ।

कामकलाविलासः सटीकः पुण्यानन्दाचार्यप्रणीतः ।

षट्त्रिंशत्तत्त्वसंदोहः— श्रीमद्राजानकानन्दप्रणीतविवरणोपेतः ।
भावोपहारः—चक्रपाणिनाथविरचितः, भट्टरम्यदेवकृतविवरणोपेतः ।
बोधपञ्चदशिका—अभिनवगुप्तविरचिता ।
अनुत्तरप्रकाशपञ्चाशिका—आद्यनाथकृता ।
पराप्रवेशिका—क्षेमराजकृता ।

The above five in one book.

स्पन्दसंदोहः by Kshemaraja

तन्त्रसारः—by Abhinavagupta

श्रीपरात्रिंशिका—with the commentary of Abhinavagupta

जन्ममरणविचारः—श्रीभट्टवामदेवविरचितः ।
अमरौघशासनं—गोरक्षनाथविरचितम् ।
तन्त्रवटधानिका—अभिनवगुप्ताचार्यविरचिता ।

The above three are bound in one book

श्रीमहानयप्रकाशः—(in Prakrit) with Sanskrit commentary by Sitikanthacharya

ईश्वरप्रत्यभिज्ञाविमर्शिनी — उत्पलदेवविरचिता, अभिनवगुप्तकृतविमर्शिनीसमेता । 2 vols

श्रीतन्त्रालोकः—by Abhinavagupta with commentary by Jayaratha 12 vols.

Hindu Realism (In English)

लल्लेश्वरीवाक्यानि—(Prakrit) राजानकभास्करकृतसंस्कृतपद्योपेतानि ।

A Short Review of the Research Publications—(Kashmir State)

स्वच्छन्दतन्त्रम्—with the commentary of Kshemaraja 6 vols.

श्रीमालिनीविजयवार्तिकम्—by Abhinavagupta

सिद्धित्रयी,
ईश्वरप्रत्यभिज्ञाकारिकावृत्तिः । —by Utpaladeva

The above two are bound in one book.

श्रीमालिनीविजयोत्तरतन्त्रम् with Preface and elaborate Introduction in English.

वातूलनाथसूत्राणि-अनन्तशक्तिपादकृतवृत्युपेतानि ।

देशोपदेशः नर्ममाला च—by Kshemendra.

स्पन्दनिर्णयः—by Kshemaraja with English Translation by Pandit Madusudan Kaul Sastri M. A, M. C. L.

शिवसूत्रवार्तिकम्—by Varadaraja

नरेश्वरपरीक्षा—सद्योज्योतिविरचिता—श्रीरामकण्ठकृतव्याख्यासमेता ।

श्रीनेत्रतन्त्रम्—with commentary by Kshemaraja 2 vols.

लौगाक्षिगृह्यसूत्राणि—देवपालभाष्योपेतानि । 2 vols.

श्रीमृगेन्द्रतन्त्रम्—with the commentary of Narayanakantha

शिवदृष्टिः—सोमानन्दनाथप्रणीता, उत्पलदेवकृतवृत्तिसमेता ।

ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी— अभिनवगुप्तकृता । 2 vols.

श्रीदेवीनामविलासः—साहिबकौर्कविरचितः ।

His Highness' Private Library Publications.

A Descriptive Catalogue of Sanskrit Manuscripts in the Private Library of H. H. Maharaja of Jammu and Kashmir 3

आन्हिकपद्धतिः— नव्यचण्डीदासेन संकलिता ।

क्रमदीपिका ।

श्रीविद्यार्णवतन्त्रम्—श्रीविद्यारण्यस्वामिप्रणीतम् । 2 vols.

शिशुपालवधम्—माघकविविरचितम्, वल्लभाचार्यविरचितसंदेहविषौषध्याख्यव्याख्योपेतम् ।

बृहच्छीलतन्त्रम्

Gilgit Manuscripts.

Gilgit Manuscripts Vols. 1, 2, and pt. 2 of Vol. III

SANSKRIT.

लघुवासिष्ठम्—Presented to the Sri Sacchidananda Bharati Bhandaram by Raghupati Vadhyar, Nanjatalayur

प्रेमविजयः—(Drama) श्रीसुन्दरेशशर्मविरचितः ।

प्रथमसंस्कृतसाहित्यसंमेलनस्य स्वागताध्यक्षाणां एम्. पी वाकी, एम् ए. महाभागानां स्वागताध्यक्षीयभाषणम् Belgaum

शिवमानसिकपूजा, कीर्तनानि, आत्मविद्याविलासश्च–श्रीसदाशिवब्रह्मेन्द्रविरचिताः– Text in Devanagari and Tamil Scripts, with Tamil and English meanings by V. Narayanan M.A., M.L., Sri Kamakoti Publishing House, Sri Sankara Mutt, Kumbakonam


श्रीयादवाभ्युदयम्—श्रीवेदान्तदेशिकप्रणीतम्-त्रयोदशः सर्गः। Text in Devanagari, Grantha and Tamil Scripts with Tamil meaning of A. V Gopalachariar M.A.

Do **चतुर्दशः सर्गः**— Do.

Impressions and Recollections of places visited M. A. Ananta Aivar B.A., L.T., Retd. Headmaster.

TAMIL.

உபன்யாஸங்களின் தொகுதி—சிருகேரி ஸ்ரீ சங்கராசார்யாதிஸ்வாமிகள் அவர்கள் செயதது 0–12



कूडली शृङ्गेरी श्रीमच्चिदानन्दशंकरभारतीस्वामिनः—

सूरिभिर्हारीक्रियमाणां वाग्वैखरीं श्रीमच्छंकरभगवत्पादाचार्याणां एकत्र शांकरग्रन्थावलिरूपेण स्वमुद्रणालयीयसुन्दराक्षरैः संमुद्रय सुन्दरतरसंपुटरूपेण प्रहितमधिगत्य संतुष्यतितमां चित्तमास्माकीनम् ॥

ग्रन्थावलिमुद्रणसंपुटीकरणादिरीतिर्जरीहरीति चेतांसि विदुषां सरीसर्ष्टि च तुष्टिपुष्टिम्। ग्रन्थावलोकनमात्रेण केवलं शब्दार्थविदामपि वाचनासक्त्यां संभवन्त्यां किमु वक्तव्यं पण्डितानामासक्तौ। शांकरं ग्रन्थनिकुरम्बं ईदृशं मुद्रणादिक्रमं 'रत्नं समागच्छतु काञ्चनेन' इतिवदासाद्य सुभृशं शोभत इति हन्त महत्प्रमोदस्थानमेतत्। एतादृशोपकारकरणेन नूनमास्तिकमण्डलस्य अन्ततो भारतवर्षस्योत्तमर्णाः यूयमिति सहर्षं उद्घोषयामः। 'श्रेयांसि बहुविघ्नानि' 'विघ्नवत्य. प्रार्थितार्थासिद्धयः' इत्यादिन्यायानुरोधेन कर्मणोऽस्य कृतेऽनुभूयापि महान्तं क्लेशं 'क्लेशः फलेन हि पुनर्नवतां विधत्ते' इतिवन्नवीभूता यूयमेव। पुनः शंकरगुरुकुलनामकं कंचन सर्वाङ्गसुन्दरं छात्रनिलयं आचार्यभगवत्पादविग्रहपरिपूततमं निर्माय तत्र निगमादिपाठं प्रवर्तयन्तोऽन्यानप्यत्युपयुक्तान्ग्रन्थान् त्रैमासिकीं शंकरगुरुकुलपत्रिकां च प्रकाशयन्तोऽद्यत्वेऽप्युपकुर्वन्त्यहो परार्थैकफलता श्रीमताम्। सुजनप्रवराणां युष्माक दीर्घायुष्यमनुपममनामयं अवितथमानन्दथुं च भगवानाद्यगुरु. प्रददात्विति क्रियासमभिव्याहारेण समाशास्महे ॥

शास्त्रप्रसारभूषणमुख्यैर्विरुदैर्विभूषिताधास्तु।
बालादिमपदभाजे सुब्रह्मण्याय सौख्यमिह नित्यम् ॥

इति नारायणस्मृतयः ॥

***

Vidwan Shuddhananda Bharati, Pondicherry.

Lovers of Sanskrit are much indebted to you for the great service that you are doing, to keep its ancient splendour still burning in the heart of India and the Indians. You are one of the ardent apostles of Bhagavan Sankara whose Monism is the bedrock of Indian Culture, and the soul of human unity The Nine Issues of your Journal are nine gems of supreme knowledge. Let your Gurukula live long, a life of fruitful service! Let your Journal be a messenger of that silence which blossoms into an ecstacy of song-thrill from the rishi-heart!

***

D. Balasubramanya Aiyar, Proprietor, Messrs B G Paul & Co., Madras

The 1st of January 1943 was a red-letter day in my life as on that day I had the good fortune to visit the sacred shrine of Sri Sankara built by you for the Nation. It was extremely kind of you to have shown and explained to me the several aspects and details of the temple and I am grateful to you for the Darsan I cherish that day as a great one and I consider the journey to the Holy place as a Divine action.

Apart from the pleasing sensation created by the atmosphere to both my eyes and ears, your wonderful and highly useful publications of Sri Sankara and on HIM have had a telling effect on my feeling. I have my own feeling whether all these works (publications), brought out with rare courage and insight, is the work of a single individual, unaided, without Divine urge. When you were explaining the several features of the figures which adorn the Vimana Mandapam and the Gopuram I felt 'Here is a Soul, kindled by the Divine, having grasped fully the implications of the several dhyana slokas, giving LIFE to the inanimate objects'. I also felt that the great Sri Acharya who adorned the Gadi of Sringeri to whose feet you have surrendered your all, has not only guided you but also has given you a sustained inspiration by which you are able to do magnificent service for the cause of Hindu India. Words are poor substitute to convey my own feelings about your services I have a very genuine appreciation for all that you have done for the cause of Sanatana Dharma. Divine dispensation is a thing which cannot be altered by human ingenuity and whoever has the luck to follow the divine current will have nothing to fear or worry about. So it is my prayer that the Divine, whose helping hand you have felt, will inspire you further in the work for which your life is dedicated!

***

தங்களது 'சங்கர குருகுல பத்திரிகை' க்கு ஒரு மாக முனபு கான ஒரு சந்தர்ப்பம் ஆகும் பாகயம் பெறறு எல்லா ஸஞ்சிகை களும வரபபெறறு படிதது வருகிறேன்.

ஸமஸ்கிருத பாஷையில இம்மாதிரி உயர்ந்த பத்திரிகைகளைக கான அளவற்ற ஆனந்தம உண்டாகிறது. அதில பல உயரிய விஷயங்கள் வெளியாவதுடன இதுவரை அச்சுக்கு வராத பல ஸாஸ்திரயங்களை ப்ரகாசம செயய தாங்கள ஏற்பாடு செயதிருப்பதுபற்றி குறிப்பாக பரம ஸந்தோஷம அடைந்தேன.

K S ராமஸ்வாமி அய்யர்,
கோவனிராஜபுரம.

CONTENTS.

Original Articles.

1	श्रीसदाशिवब्रह्मेन्द्रविजयकाव्यम्	By N. Sambasiva Sastrigal Retd. Sanskrit Head Pandit.	44—50
2	आर्यापञ्चदशीस्तोत्रम्	By Tyagaraja	50—51
3	श्लोकमञ्जरी	By K. S. Venkatarama Sastri, Sri Sankaragurukulam	52
4	विवाहायननिर्णायकः	By Kalyanasundara Sastri, Nalloor	53—54
5	शिवपरवचसां तामसत्वोक्तिभङ्गः		55—65
6	भाष्यवार्तिकगाम्भीर्यम्	Sri Sacchidanandatirtha Swamigal	66—70
7	जीवातुस्तुतिः		1—8
8	श्रीबालसुब्रह्मण्यार्यप्रशंसापद्यानि	By K. S. Venkatarama Sastri	1
9	Do	By Sivaramakrishna Sastrigal of Mayavaram	1—2
10	Do	By Arunachala Sastrigal of Lalgudi	2—3
11	श्रीविज्ञानानन्दसरस्वतीचरितम्	By P. G. Sundara Sastrigal	3—4

Rare & Hitherto Unpublished Works.

12	सौन्दर्यलहरी	By Sri Sankara Bhagavatpadacharya with three Commentaries — Lakshmidhara, Sowbhagyavardhani and Arunamodini	105—112
13	Preface to SivakesadipadantaStuti by T. K. Balasubrahmanya Aivar		
14	तत्त्वकौस्तुभः	By Sri Bhattoji Dikshita	81—88
15	मयूखावली	A commentary on the Sastra Dipika of Parthasarathi Misra By Sri Appayya Dikshita	147—154
16	बालभारतम्	By Agastya Pandita with 'Manohara', a commentary by Salva Timmaya Dandanatha	33—40
17	मद्रकन्यापरिणयचम्पूः	By Sri Gangadharakavi with commentary	81—88
18	महिषशतकम्	By Sri Vanchesvarakavi with the commentary by the author's great-grandson	57
	Do Do	श्लोकानुक्रमणिका	59—60
	Do Title—Page		
	Do Preface	By R. Krishnaswami Aivar M.A., B L. Tirunelveli	
	Do प्रस्तावना	By K. S. Venkatarama Sastrigal	1—8

The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. IV. JULY—SEPTEMBER NO. 14.



Editor
Gurubhaktasikhamani
Sastraprasarabhushana,
T.K BALASUBRAHMANYA AIYAR.
B A,
Founder, Sri Sankara
gurukulam, Srirangam

Literary Adviser
Bharatakalanidhi
Vidyasagara,
Vidyavacaspati
P P SUBRAHMANYA SASTRI,
B A (Oxon) M A.
Professor of
Sanskrit, Presidency
College, Madras

ANNUAL SUBSCRIPTION { INLAND Rs. 6/—Post Free. FOREIGN SH. 12/—

Original Articles.

1	प्रातःस्मरणस्तोत्रम्	By Sri R. Krishnaswami Iyer, M.A., B.L., Advocate, Tinnevelly	22
2	श्रीशारदाम्बानवरत्नमालिकास्तोत्रम्	By Sri Sankara Sastri, Kallidaikkurichi	22-23
3	श्रीराजराजेश्वरीपञ्चरत्नस्तोत्रम्	By Do.	23—24
4	द्वादशादित्यमञ्जरीस्तोत्रम्	By Mahamahopadhyaya Vedantakesari Brahmasri Ganapaty Sastrigal	24—25
5	शनैश्चराष्टकम्	By Do.	26
6	श्रीराजराजेश्वरीचरणसरोजराजसेवा	By Sri Sankarananda Sarasvati Swami	27—28
7	नवरत्नमाला	By His Holiness Sri Jagadguru Sri Chandrasekhara Bharati Swamigal	29
8	आचार्येन्द्रमहिमानुवर्णनम्	By Sri Sacchidananda Tirtha Swami	29—31
9	चतुर्मतसारः (Contd)	By Polagam Rama Sastrigal	32—39
10	नयमञ्जर्यनुभवः (Concld.)	By Mimamsaratna A. V. Gopalachariar	40—43
11	मतं तत्प्रयोजनं च		44

Rare & Hitherto Unpublished Works.


12	सौन्दर्यलहरी	By Sri Saukara Bhagavatpadacharya with three Commentaries — Lakshmidhara Sowbhagyavardhini and Arunamodini	49—64
13	शिवकेशादिपादान्तस्तुतिः	By Do. with the commentary of Ramakrishna Suri	1—6
14	तत्त्वकौस्तुभः	By Sri Bhattoji Dikshita	41—48
15	मयूखावली	A commentary on the Sastra Dipika of Parthasarathi Misra By Sri Appayya Dikshita	111—118
16	मद्रकन्यापरिणयचम्पूः	By Sri Gangadharakavi with commentary	41—48
17	जीवन्मुक्तिकल्याणम्	A Drama By Sri Nalladhvari	49—58
18	महिषशतकम्	By Sri Vaneshvarakavi with a commentary by the author's great-grandson	17—24

Original Articles in English,

19	*Sri Sringeri Mutt*	By R. Krishnaswami Iyer, M.A., B.L. Tinnevelly	21—27

Reviews

20	*Hindu Realism*	Mimamsaratna A. V. Gopalachariar M.A., B.L.,	28—30
	Devi Mahatmyam—K Ramachandra Sarma		
	Vishnusahasranama Stotram, Vishnupadadikesantastotram, Mukundamala & Bhajagovindam.		
	Lalitashtottarasatanamastotram	By K. Ramachandra Sarma	30—32
21	**News and Notes.**		33—35
22	**Books Received.**		36
23	**Our Exchanges.**		36



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

यावदायुस्त्वया वन्द्यो वेदान्तो गुरुरीश्वरः ।
मनसा कर्मणा वाचा श्रुतिरेवैष निश्चयः ॥
भावाद्वैतं सदा कुर्यात्क्रियाद्वैतं न कर्हिचित् ।
अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह ॥

॥ प्रातःस्मरणस्तोत्रम् ॥

(शालिवाटीपुरवास्तव्येन श्री रा. कृष्णस्वाम्यार्येण विरचितम् ।)

प्रातः स्मराम्यनुदिनं गुरुराजमूर्तिं भस्माङ्गरागलसितं स्मितपूर्वभाषम् ।
काषायवस्त्रपरिवेष्टितसर्वगात्र कारुण्यवीक्षणघनं परमात्मनिष्ठम् ॥ १ ॥

प्रातः स्मरामि गुरुराजमुखारविन्दं मोदावहस्मितवशीकृतविश्वचित्तम् ।
संसारघोरजलधेस्तरणोत्सुकानां तत्त्वोपदेशनिरतं करुणारसार्द्रम् ॥ २ ॥

प्रातर्भजामि गुरुराजकरारविन्दं भक्तेष्टदानचतुरं धृतबोधमुद्रम् ।
श्रीचन्द्रमौलिपदपङ्कजपूजनान्ते बद्धाञ्जलिं सकललोकहितैकहेतोः ॥ ३ ॥

प्रातर्नमामि गुरुराजपदारविन्दं नौकायमानमतुलं भववारिराशौ ।
यस्यावलम्बनबलाद्विपलान्तरङ्गः प्राप्नोति सौख्यमपि पुण्यकृतां दुरापम् ॥ ४ ॥

प्रातर्वदामि गुरुराजपवित्रनाम यत्कीर्तनादखिलदुःखमपास्तमास्ते ।
आचार्यदेव यतिपुंगव देशिकेन्द्र मामुद्धर प्रणतमेनमवाङ्मनस्या ॥ ५ ॥

यः श्लोकपञ्चकमिदं गुरुराजमूर्तेर्भक्त्या प्रभातसमये हृदुसंदधाति ।
धर्मार्थकाममयमुक्तिपुरुषार्थजातं श्रीदेशिकेन्द्रकृपया लभते क्रमेण ॥ ६ ॥

॥ श्रीशारदाम्बास्तवरत्नमालिकास्तोत्रम् ॥

(कल्लिडैक्कुरिचि ब्रह्मश्री शंकरशास्त्रिभिर्विरचितम् ।)

विभण्डकमुनीश्वरप्रियविशालदेशाश्रित प्रचण्डमृगमण्डिते प्रथितयोगिसंभाविते ।
सरित्तटिपरिष्कृते सततपुष्पशोभिद्रुमे गिरीन्द्रशिखरे स्थितां नमत शारदामम्बिकाम् ॥ १ ॥

मुनीन्द्रवसतिक्षमाश्रमवरिष्ठतुङ्गासरित्तरङ्गकणशीतले सरलगन्धवाताश्रिते ।
मनोहरतमे शुभे कलिकलापसंवर्जिते विचित्रभवने स्थितां नमत शारदामम्बिकाम् ॥ २ ॥

हिरण्मयवरासनां मणिमयाङ्घ्रिपीठां शिवां भजन्मनुजवाञ्छितप्रदपदारविन्दद्वयाम् ।
सुवर्णखचिताम्बरज्वलितमध्यभागार्पितक्वणन्मणिककाञ्चिकां नमत शारदामम्बिकाम् ॥

मणिग्रथितहाटकाम्बरविचित्रसत्कञ्चुकावृतस्तनयुगप्रभाविततपूतवक्षःस्थलाम् ।
कनत्कनकमङ्गलप्रदसुपीततन्तुस्फुरद्दलाञ्जविसरत्प्रभां नमत शारदामम्बिकाम् ॥ ४ ॥

विचित्रमणिमंडलसन्मकुटवर्यभूषितां मरन्दभृन्मल्लिकाप्रमुखसूनमंपूजिताम् ।
निटालतलशोभिना मृगमदेन नंराजितं सदा हसिताननां नमत शारदामम्बिकाम् ॥ ५ ॥

दयार्द्रनयनाम्बुजां निटिलचान्तकान्तालकां असन्मदनां शिवां मुकुरशोभिगण्डस्थलाम् ।
सखीटिरसरकित्तस्फुरितहेमपङ्क्तिप्रभाविभासितरदच्छदां नमत शारदामम्बिकाम् ॥ ६ ॥

विदूरवरमंजुलप्रवररत्नसंयोजितप्रतिद्वयविभूषणां भुवनमङ्गलाधायिनीम् ।
मणिप्रवरमौक्तिकाकरजभासिकण्ठस्थलीं प्रणम्रजनतोषिणीं नमत शारदामम्बिकाम् ॥ ७ ॥

कनत्कनककङ्कणप्रचयभालसत्पाणिकां रणन्मणिगणाञ्चितस्फुरितहेमसूत्रान्विताम् ।
मरालवरवाहनां सरलबुद्धिसंतोषिणीं वराभयविधायिनीं नमत शारदामम्बिकाम् ॥ ८ ॥

करैस्तु शुकमम्बुजं जपमणिं सुधापूरितं घटं च दधतीं परां त्रिजगतां जनित्रीं वराम् ।
अशेषसुरनन्दितामखिलमर्त्यसंपूजितां समस्तसुखदायिनीं नमत शारदामम्बिकाम् ॥ ९ ॥

इमं स्तुतिवरं कृतं विबुधशंकरेणार्पितं पदाम्बुजयुगे धिया प्रणुतशारदायाः शुभे ।
पठन्नरवरो भवेन्निखिलसर्वसंपत्सुखो लभेत परयोर्युगं तदनु शारदीयं शुभम् ॥ १० ॥

॥ श्रीराजराजेश्वरीपञ्चरत्नस्तोत्रम् ॥

(कल्हिडैकपुरिचि ब्रह्मश्री शंकरशास्त्रिभिर्विरचितम् ।)

मुक्ताजालविभूषिताङ्गलतिकां रक्ताम्बरालंकृतां
भुक्तानन्दविधायिनीं मणिमयैस्ताटङ्कहारादिभिः ।
भक्तानां सुधियां प्रहर्षजननीं पद्मासनाख्यायिनीं
कारुण्यामृतवर्षिणीं हृदि दधे श्रीराजराजेश्वरीम् ॥ १ ॥

श्रीमातृप्रमुखैः सहस्रललितानामोत्तमैरर्चितां
मन्दारादिसुमैरुपासककुलैः श्रीचक्रराजोज्ज्वलाम् ।
आधारादिनिविष्टदैवतगणैस्तोष्टूय्यमानां परां
शक्तिं कामदवामिनीं हृदि दधे श्रीराजराजेश्वरीम् ॥ २ ॥

ब्रह्माणीप्रमुखामरेन्द्रवनितावृन्दैः समन्ताद्धृतां
बिन्दुप्रज्वलिताणिमादिकिरणैर्देदीप्यमानां वराम् ।
पञ्चब्रह्ममयासनोपरिलसन्मूर्तिं सुवर्णाकृतिं
सौवर्णाम्बरभूषितां हृदि दधे श्रीराजराजेश्वरीम् ॥ ३ ॥

मञ्जीरादिभिराञ्चितां कचभरप्रोत्तंसमूनाञ्चितां
मध्येफालतलं विशालतिलकां कान्तालकान्ताननाम् ।
मन्दस्मेरमुखीं दयार्द्रनयनोपान्तां सुबिम्बाधरां
कुन्दप्राग्रदतीं सतीं हृदि दधे श्रीराजराजेश्वरीम् ॥ ४ ॥

श्रीविद्यां शशिभूषणां शिवमहाभाग्यस्वरूपां शिवां
काद्यैर्णैस्तिथिसंख्यकैर्मुनिवरैराराधितां मानसे ।
शान्तान्तःकरणैः समर्चितपदाम्भोजद्वयामद्वयां
कामेशाङ्कनिवासिनीं हृदि दधे श्रीराजराजेश्वरीम् ॥ ५ ॥

इत्थं शंकरशर्मणा विरचितं श्रीराजराजेश्वरी-
स्तोत्रं यः स्मृतिमान् पठेदनुदिनं श्रीराजराजेश्वरी ।
तस्यास्याय पुरः श्रियं धियमियं पुष्टां सवंशान्वयां
दद्यादिष्टमनन्यदैवसुलभं स्वात्मानुभूतेः सुखम् ॥ ६ ॥

॥ द्वादशादित्यमरुञ्जीस्तोत्रम् ॥

(पञ्चानाडुग्रामाभिजनैः 'महामहोपाध्याय' 'वेदान्तकेसरी'
ब्रह्मश्री गणपतिशास्त्रिभिर्विरचितम् ।)

श्रियो गेहं देहं भुवि जनिमतां माधु सुखयंस्तथा निद्रामुद्राविघटनपटुर्दीप्तिनिलयः ।
दिनानामीशानो दिविषदवनंसायितपदस्त्रयीमूर्तिः स्फूर्तिं रचयति दृशो मे स भगवान् ॥ १ ॥

निमीलन्त्यम्भोजान्यखिलजगतां लोचनपुटैः समं सद्यः सम्यग्विकचयति यद्दिश्यमहितम् ।
दृशामायुष्याय द्रुतकनकदीप्राय विदधे नमस्तस्मै च्छायाधरुचिरसहाय महसे ॥ २ ॥

निलीने मार्ताण्ड त्वयि हि भगवन्सर्वमपि यज्जगन्निर्व्यापारं स्यादिति मृततुल्यं द्युनिनिभे ।
उदेष्यत्यानन्दादखिलमपि चोत्थाय रभसात्स्वमं स्वं स्वे कार्ये भवति जगतां त्वं खलु विभुः ॥

अशेषाणां दृष्टीरपि च पिदधानं जनिमतामपारं ध्वान्तं यत्स्वयमुदितमात्रोऽपहरसि ।
भ्रमस्ते तादृक्षाद्भुततरमहिम्नोऽम्बरमणेर्मदक्ष्णोः संजातं तिमिरमपनेतुं कथय कः ॥ ४ ॥

जगत्यां धन्योऽयं जयति रुजया यो विरहितो जनानामारोग्यं जलजकुलबन्धो तदपि ते ।
प्रसादैकायत्तं प्रथितमखिलेऽप्यत्र भुवने विहाय त्वामेकं शरणमुपयामः कमपरम् ॥ ५ ॥

भृशं चोराद्भीतिश्चलितुमपि शक्यं न कुहचित्तथा भूतप्रेतप्रभृतिजनितं साध्वसमपि ।
क्वचिद्याते श्रीमंस्त्वयि हि जगदीदृक्स्थितियुतं सुखेनास्ते सर्वं त्वयि समुदिते निर्भयमिदम् ॥

अहः सर्वं सम्यग्दिनकरकरैर्भासुरयते भवानेव श्यामाममृतकिरणो भासयति च ।
प्रकाशो ह्यार्ये स च भवदधीनः किमु गिरा ध्रुवं भानं नाम क्वचिदपि विना नैव भवतः ॥

दृशौ स्तामाकर्णं दलितनलिनीच्छायसुभगे भवद्भानं नो चेद्भवति फलमाभ्यां किमु विभो ।
प्रसादश्चेत्तत्तः प्रभवति नरो द्रष्टुमखिलं त्वमेवैकस्तस्मादखिलजगतां लोचनमसि ॥ ८ ॥

द्विजानां सर्वेषां त्वमसि समुपास्यः प्रतिदिनं धिनोषि त्वं सर्वं जगदपि च वृष्टिं विरचयन् ।
प्रतीतः पन्थास्त्वं परमपुरुषार्थं तमपि चाभ्यातुं तस्मै ते ननु किरणमालिन्नतिरियम् ॥

शलाकाकाराभ्रीनिलयसदनोद्घाटनविधौ तमिस्रां क्षुन्माष्टुं कनकमयसंमार्जनसमान् ।
रथाङ्गद्वन्द्वानां रतिघटनचञ्चून्सुरुचिरान्किरन्विष्वद्रीचो जयति किरणानेष तरणिः ॥ १० ॥

न जातु श्रान्तिं त्वं भजसि न विलम्बः क्षणमहो न निर्वेदो हानिर्न च तव मनाग्मानविषये ।
अजस्रं संतोषादखिलभयविध्वंसनचणो जगत्यामप्यास्ते जगदुपकृतावेवमपरः ॥ ११ ॥

मनः कर्मज्ञानेन्द्रियदशकमात्मेति निखिलं प्रपञ्चं स्रष्टुं त्वं प्रभवसि विभो द्वादशतया ।
इति त्वां तत्त्वज्ञास्तपन भगवन्द्वादशतनुं विजानन्ति प्राज्ञा विहतदुरितं तं शरणये ॥ १२ ॥

अमेयच्छायाढ्यां मिहिर भवतो मूर्तिमनघां जनः को वा स्तोतुं जगति भविता देव कृतधीः ।
मदक्ष्णोर्दुर्वारां विपदमपनेतुं त्वयि विभो तथाऽपि श्रीमन्मे विलपनविधा केवलमियम् ॥

॥ इति द्वादशादित्यमञ्जरीस्तोत्रं संपूर्णम् ॥

॥ शनैश्चराष्टकम् ॥

पञ्चानाङ्ग्रामाभिजनैः 'महामहोपाध्याय' 'वेदान्तकेसरी'
ब्रह्मश्री गणपतिशास्त्रिभिर्विरचितम् ॥

नलिनीपत्रेरमन्दं नयनानन्दं नतेषु सुखकन्दम् ।
भासा धूतमिलिन्दं नतसुरवृन्दं नमाम्यमुं यन्दम् ॥ १ ॥
दर्भवनास्थितिरलिकं स्वर्भवसुखदायकं महः किमपि ।
अन्तरसुसंदधानः तरति क्रूरदुःखसरिदीशम् ॥ २ ॥
पुष्करसमानचरणः पुष्करधरवर्यपूज्यतनुकिरणः ।
पुष्करपरिवृढतनयः पुष्कलमुदयं सदाऽपि पुष्णातु ॥ ३ ॥
शनिरपि निजपददूरे जनिमति यावन्नहो त्वमशनिरसि ।
कालं कलयसि दूरात्त्वालम्बानां तथैव कालोऽपि ॥ ४ ॥
कायाभायाः कणतस्तोयाधाराम्बुदस्य दायादम् ।
छायातनयं हित्वा ध्यायामोऽन्यं ग्रहं न जात्वपरम् ॥ ५ ॥
तिलवद्भक्ते भगवन् किल वत्सलता विशिष्यते तदपि ।
व्यक्तं शुष्यसि नितरां भक्तं दृष्ट्वा तथा न तिलवन्तम् ॥ ६ ॥
वर्षाम्बुदसमा येषां हर्षामर्षौ न किंचिदातनुतः ।
देवैः किं तैरनिशं सेवे भगवन् भवन्तमेव परम् ॥ ७ ॥
स्वर्भावितसुखदातरि स्वर्भान्वादिग्रहेश्वितरि देवे ।
दर्भारण्यविहारिणि गर्भादारभ्य दासदासोऽहम् ॥ ८ ॥
मुद्गलवंशजमणिना सद्गलमालायमानसूक्तेन ।
त्यागाधीश्वरकरुणाभागावाप्तानवद्यविद्येन ॥ ९ ॥
एवं गणपतिकविना देवं दर्भाटवीस्थमुद्दिश्य ।
रचितं स्तोत्रं पठतामुचितं धत्ते फलं स सहसैव ॥ १० ॥

॥ इति शनैश्चराष्टकं संपूर्णम् ॥

॥ श्रीराजराजेश्वरीचरणसरोजराजसेवा ॥

श्रीशंकरानन्दसरस्वतीस्वामिभिर्विरचिता ॥

तुल्यं वस्तु समस्ति न त्रिभुवने त्रातुं भवत्याऽम्बिके
कुल्या त्वत्पदसेविनां प्रतिभयः संसारवारांनिधिः ।
तुल्या चालकनन्दया नतिमतां वाणीसुधाधोरणी
कल्यन्तस्य विधात्रि तत्रभवतीं हृद्यामृचं श्रावय ॥ १ ॥

मन्त्राराधितपादपङ्कजयुगे माङ्गल्यसंदायिके
यन्त्रावासनितान्तलोलहृदये कामेशवामेक्षणे ।
तन्त्रस्तोमविचारलब्धविलसत्सिद्धान्तसिद्धान्ति के
मन्त्रैरुज्ज्वलभुज्ज्वले शृणु यजुर्वेदं ममोदं शिवे ॥ २ ॥

आम्नायान्तविभातदिव्यविभवे धामाभिरामे शुभे
नाम्ना पादसरोरुहप्रणयिनां पापापनोदक्षमे ।
आम्नायोदितसाधुकर्म चरते श्रेयःप्रदेऽभीष्टदे
साम्नां गानमनुत्तमं करुणया देवि त्वमाकर्णय ॥ ३ ॥

शौर्यं ते भुवनेषु विश्रुततरं भण्डाद्यरीणां गणे
चर्यादीन्परिशीलयन्ति मुनयस्त्वत्पादसेवापराः ।
वर्यं धारयसे पुमर्थमखिलं भक्ताय युक्तात्मने
तुर्यं वेदसुमे शृणोतु भवती सामोदमाथर्वणम् ॥ ४ ॥

गात्रं गोत्रतनूभवे तव सदा प्रस्पर्धि काश्मीरजैः
नेत्रं सर्वजनुष्मतां दिनमणिस्त्वत्तेजसा भासते ।
नेत्रान्तस्तव वीक्ष्यते कमलया वाण्या च भक्त्याऽनिशं
सूत्रं सूत्रकृतां विभावय मुदा त्वं सर्वसूत्रात्मिका ॥ ५ ॥

जन्मस्थेमलयं पुराणमपि यत्प्राहुः परादुद्गतं
तत्सर्वं च घटेत किं परशिवे शक्त्या भवत्या विना ।
वाचस्ते कृतकेतराश्च कृतका विश्वा विलासाः शिवे
तत्त्वं पुण्यफलं पुरारिदयिते पुण्यं पुराणं शृणु ॥ ६ ॥

नानातानवितानकैर्नवनवैर्गीतैर्विगीतेतरैः
नानागायकसार्वभौमनिकरैरालापितालापनैः ।
नानारक्तिनिदानरागमधुरैः संकीर्तितैः कीर्तनैः
नानालावणिकापदैश्च रुचिरं संगीतमङ्गीकुरु ॥ ७ ॥

वाणीशोणकराब्जसङ्गमुखरव्यामोहयत्कच्छपी-
तुच्छीकारविहारसारमधुरव्याहारधारादराम् ।
मातस्त्वामपि निस्तपोऽहमनघे वीणारवं श्रावये
मन्तुं मन्तुमिमं किशोरकृतं मन्तुं तु नैवार्हसि ॥ ८ ॥

कम्रं कम्पितमुख्यमुख्यगमकैरामूर्छितं मूर्छनैः
रम्यं रञ्जकराजरागनिवहैः श्राव्यैकषड्जादिकम् ।
गान्धारप्रमुखैश्च हृद्गमतमैर्ग्रामैः समुल्लासितं
गानं वैणवमन्तरङ्गमयतां गाङ्गेयमातस्तव ॥ ९ ॥

नाद्यन्तौ तव देवि विश्वजगतां नाथे सनाथे श्रिया
खाद्यं च श्रुतियुग्मतः श्रुतिगिरा वेद्येऽनवद्ये सताम् ।
माद्यन्ति त्रिदशाः सुखेन विवशा यन्नादशैलीश्रुवा
वाद्यं तन्महनीयभक्त्युपहृतं मातस्त्वमाकर्णय ॥ १० ॥

इति श्रीमत्सच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिचरणकमलभृङ्गायमान-
मानसेन श्रीशंकरानन्दसरस्वतीनामधेयेन कर्मन्दिना विरचिता
श्रीराजराजेश्वरीचरणसरोजराजसेवा संपूर्णा ॥

॥ नवरत्नमाला ॥

श्रीजगद्गुरुश्रीचन्द्रशेखरभारतीस्वामिभिर्विरचिता ।

लोकं समस्तमपि मोहमहान्धकार-
नश्यद्दशं भवमहाजलधौ पतन्तम् ।
स्वोक्त्यञ्जनेन समपालयदाशु यः सः
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ १ ॥

पाषण्डमुख्यमतकुम्भिषु केसरीन्द्र-
पाषाटवीदवविभावसुरानतानाम् ।
अद्वैतवारिनिधिपूर्णशशी च यः सः
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ २ ॥

शब्दादिमान्हि विषयान्विषतुल्यकक्ष्या
न्ज्ञात्वापि तत्र बहुरागवतो ममाशु ।
पादानताखिलजनस्य विरक्तिदाता
दृग्गोचरो भवतु देशिकसार्वभौमः ॥ ३ ॥

श्रीमन्नृसिंहगुरुपादयुगाब्जभृङ्गः
सीमाविलङ्घिधिषणोऽखिलशास्त्रवेत्ता ।
नम्रान्तरान्ध्यविनिवारणचण्डरश्मिः
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ ४ ॥

कामादिशृङ्गिपरिभेदनवज्रपाणि-
नामावधूतनिखिलाघचयो महस्वी ।
सामादिदीर्षपरिगीतनिजस्वरूपः
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ ५ ॥

आश्रामवासिवटुमेकमभापमाण
सभापमाणमकरोत्त्वरितं कृपातः ।
श्रीशंकरार्य इव यः स हि हस्तधात्रीं
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ ६ ॥

विप्रं ह्यपस्मृतियुतं प्रसमीक्ष्य तस्य
मूर्ध्नंऽङ्घ्रिमाद्यदपारकृपाम्बुराशिः ।
यो दक्षिणास्य इव रोगमपानुदत्तं
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ ७ ॥

ऊर्ध्वंस्थलान्निपतितां गृहगोधिकां यः
त्यक्तासुमाशु करकाम्बुकणेन सिक्त्वा ।
सोऽजीवयज्जनममक्षममेयशक्तिः
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ ८ ॥

मर्त्यांचिकित्स्यबहुकुष्ठनिपीडितं यः
विप्रं हि कंचन तदामयहीनमाशु ।
चक्रे स दक्ष इव केशलभस्मदानात्
दृग्गोचरो भवतु देशिकराण्ममाशु ॥ ९ ॥

श्रीमदाचार्येन्द्राणां जयन्तीमहोत्सवावसरे श्रीसच्चिदानन्दतीर्थस्वामिकृतं

॥ आचार्येन्द्रमहिमानुवर्णनम् ॥

धन्यो भारतपुण्यभूपरिसरे यः प्राप विप्रान्वयं नूनं धन्यतरास्ततोऽपि सुतरां ये वैदिका भूतले ।
तेऽमी धन्यतमाश्च ये तु भगवत्पादीयमार्गानुगाः ये शिष्यास्तु नृसिंहभारतिगुरोरेतान कथं ब्रूमहे ॥

अयि धन्याः ! गुरुवरचरणकमलपरिचरणप्रकटितनिरतिशयसौजन्याः, सत्पथाधन्याः, साधुमूर्धन्याः ! किमिव हि नाम वर्णयामो वयमनुपमेयमस्मद्भागधेयम्, यतो हि वयं वर्षेषु प्रथमगणनीयं भारतं नाम वर्ष अगण्यपुण्यगणैकसमधिगम्यं अधिगमिताः स्मो विधिवशेन । भारतभूमेश्च मुमुक्षुजनहितावहत्वं जगति प्रथिततरमेव । तथा हि—सुखैषिणो हि स्वरसतः

सर्वे लोकाः, न विनश्वरवैषयिकसुखमात्रेण विश्राम्यन्ति। अपि तु अविनश्वरमलौकिकं कमपि सुखविशेषमास्राद्य तेनैव नूनं विश्राम्यन्ति। आब्रह्मभुवनं आखिलोऽपि मुमुक्षुवर्गः ईदृशसुखलाभायैव सर्वथा व्याप्रियते। स चायं सुखविशेषः आत्मतत्त्वविचारैकसमधिगम्यः। तादृविचारश्च मानुषजन्मन्येव सुसाधः स्यात्। मनुष्यजन्मन्यपि वैदिककुले जन्मलाभो दुर्लभ एव। वैदिकानां मध्येऽपि अद्वैतिनां कुले जन्मलाभः दुर्लभतर एव। तत्रापि भगवत्पादीयगुरुवंशावलीभूषणायमानानां सद्गुरूणां पादारविन्दभागधेयं तु दुर्लभतममेव। ईदृशसद्गुरुलाभपूर्वकं श्रवणमननादिप्रणाड्या आत्मतत्त्वविचारे ये व्याप्रियन्ते तादृशानां भागधेयं वाचामगोचरमेव। आत्मतत्त्वविचारो ह्ययं मनुष्यलोके यथा फलाय कल्पते, न तथा लोकान्तरेषु इति श्रुतिरेव घोषयति। तथा ह्याम्नायते- "यथाऽऽदर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके। यथाऽप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके॥" इति॥

अयमाशयः—आदर्शे प्रतिबिम्बत्वभृतं यद्रूपमुपलभ्यते, तदिदं बिम्बरूपाद्विलक्षणधर्मोपेतत्वेन बिम्बापेक्षया अत्यन्तविविक्तमेवेति यथा अनुभूयते, तथा कर्मोपासनादिजनितविशिष्टसंस्कारवत्तया अत्यन्तनिर्मलीभूतायां बुद्धौ तादृविविक्तमात्मस्वरूपं यत्स्पष्टं स्फुरतीति ईदृशविविक्तात्मदर्शनं मनुष्यलोक एव सुलभं नान्यत्र। पितृलोकशब्देन च तदुपलक्षिताः स्वर्गादिफलभूमयः परिगृह्यन्ते। तथा च यथा स्वप्नावस्थायां जाग्रद्वासनामात्रनिर्मितत्वात् स्वाप्निकपदार्थाः अविविक्ता एव पारदृश्यन्ते; 'आरुरुक्षामिव गिरिशृङ्गं अद्राक्षमिव वनराजिं' इत्यादिना इवकारानुबन्धेनैव तत्रत्यव्यवहारदर्शनात्। तथा पितृलोकं स्वर्गादिस्थानविशेषं च प्राप्तानां तत्तत्कर्मफलोपभोगमात्रप्रवणतया तत्रत्यानां मुमुक्षूणामपि विविक्तात्मस्वरूपं न स्फुरति, स्वतो विवेककुशलानामपि देवानां भोगैकलम्पटतया वैराग्यादिसाधनानां दुःसंपादत्वात्। ततश्च स्वप्ने निद्राद्युपप्लववत् भोगलाम्पट्यादिप्रतिबन्धकबाहुल्यात् विविक्तात्मस्वरूपोपलब्धिः स्वर्गादिलोकेष्वपि सुदुर्लभैव। यथा च अप्सु शरीरादीनां भानेऽपि जलचाञ्चल्यादिदोषवशात् अविविक्ततयैव भानं भवति, तद्वद्गन्धर्वलोकादिष्वपि प्रागुक्तभोगलाम्पट्यादिविविधप्रतिबन्धवशात् अविविक्तमेवात्मस्फुरणं भवितुमर्हति। ब्रह्मलोके तु छायातपवत् अत्यन्तविविक्तमात्मस्वरूपमुपलभ्यत एव। परं तु ब्रह्मलोकस्य प्रकृष्टकर्मोपासनादिसाध्यत्वात् तत्प्राप्तिप्रत्याशैव सुतरामनुपपन्ना। तथा च मुमुक्षूणां मोक्षोपयोगिविविक्तात्मस्वरूपोपलब्ध्यर्थं देवादिलोकानामनाकाङ्क्षणीयतया भूलोक एव मुमुक्षूणामत्यन्तमुपकारकः। अतो मनुष्यजन्मैव प्रशस्तमिति हि श्रुतेराशयो लक्ष्यते। अत एवाहुरभियुक्ताः 'इहैव नरकव्याधेश्चिकित्सां न करोति यः। गत्वा निरौषधं स्थानं सरुजः किं करिष्यति॥' इति॥

भूलोकेऽपि नववर्षात्मके भारतवर्षमेव वैदिकानां कर्मभूमित्वेन व्यपदेशं प्राधान्यं च लभते। तादृशमिदं भारतवर्षं पुण्यवतामेव सुलभं नान्येषामिति समुद्घुष्यन्ति हि ममस्वरेण सर्वाण्यपि पुराणवचनानि। तत्रापि भारतभूमौ ब्राह्मण्यलाभश्चेत् महदिदं भाग्यमेवेति तादृशास्ते धन्या इति न खल्विदं वर्णनीयम्। तदिदं ब्राह्मण्यं प्राप्यापि तदीयमहिमानमजानानाः लौकिककृत्येष्वेव व्याप्रियमाणाः खरमहिषादिवदुदरपूरणैकव्यसनिनो भवन्ति चेत् तदपेक्षया का नामान्या हानिः स्यात्। अतः

वैदिककुलेष्वेव जनित्वा वेदोक्तकर्मोपासनादिनित्यसाधनानामनुष्ठानेनैव ये कालं क्षिपन्ति, तद्द्वारा मोक्षार्थं च प्रयतन्ते, ते धन्यतरा एव। वेदप्रामाण्यवादिनो हि वैदिका नाम। तादृशवैदिकत्वं च मध्वरामानुजादितत्तन्मतानुयायिनामपि अविशिष्टमेवेति तेऽपि वैदिककोटावेव परिगणनीयाः सन्ति। तादृशा अपि तत्तन्मतानुसारेण धन्यतरा एव। अद्वैतवेदीयमतानुयायिनस्तु ततोऽपि धन्यतमा एव; 'चतुर्भिः सह शिष्यैस्तु शंकरोऽवतरिष्यति' इत्यादिवचनानुसारेण साक्षात्परमेश्वरावतारभूतानां श्रीमच्छंकरभगवत्पादानां सर्वतोऽप्यभ्यर्हितत्वात्। न केवलमतावन्मात्रमेव, अपि तु रामकृष्णाद्यवतारापेक्षयाऽपि भगवत्पादावतारस्यात्यन्तलोकोपकारकत्वात्तदपेक्षयाऽपि उत्कर्ष एव। रावणशिशुपालादिबाह्यरिपूणामुपरंहणार्थं परिगृहीतरामकृष्णाद्यवतारापेक्षया आत्मतत्त्वोपदेशद्वारा आन्तररिपूणां कामादीनामुन्मूलनेन जगति परमां शान्तिमुत्पादयितवतां भगवत्पादानां सर्वाभ्यर्हितत्वस्य सर्वैरेवाद्रियमाणत्वात्। तादृशभगवत्पादोक्तवैदिकमतावलम्बिना श्रौतस्मार्तादिनित्यकर्मानुष्ठानेष्टानामद्वैतिनां धन्यतमत्वे को नाम विप्रतिपद्येत? भगवत्पादीयमतानुयायिनामद्वैतिनां मध्येऽपि श्रीमच्छृङ्गगिरिपीठमाधिष्ठितवतां श्रीमत्सच्चिदानन्दशिवाभिनवनरसिंहभारतीस्वामिवर्याणां शिष्यभावं प्रतिपद्य तदुपदिष्टां वरणिं ये तावदनुसरन्ति, तेषां भाग्यं तु वाचामगोचरमेव। इदं च महाभाग्यवतामेतेषां कदाचित् शास्त्रार्थश्रवणेन, कदाचित् तत्कृतदेवताराधनदर्शनेन जातुचिदुपन्यासश्रवणेन, अन्यदा अन्त्यादिश्लोकपठनेन, तदा तदा विनोदभाषणेन च मुखेन कालमतिवाहयन्तस्तदानींतना ये भाग्यशालिनः श्रीकृष्णसंनिधौ गोपालबाला इव परमानन्दमनुबभूवुः, तादृशानामेव गोचरीभवति नान्येषाम्। किं च 'आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः' इति न्यायेन अमानुषं तेषामाकृतिविशेषं, अमानुषीं प्रज्ञाम्, अमानुषं चरित्रविशेषं च यदि सम्यगनुशीलयामः, तर्हि नूनमेते शंकरभगवत्पादानां अपरावतारभूता एवेति भावना द्रढीयसी स्यादित्यत्र न मनागप्यस्ति तदीयावकाशः॥

एतादृशमहापुरुषाणां अवतारदिनमहोत्सवेऽस्मिन् तदीयमहिमानुवर्णन तत्स्मरणं च कुर्वाणानां जन्मैव कृतार्थीभवति; त एव धन्यतमापेक्षयाऽपि धन्यतमाः। 'अलब्ध्वाऽतिशयं यस्माद्व्यावृत्तास्तमवादयः' इति सुरेश्वरोक्तदिशा तमबादिप्रत्यया अपि तादृशानां उत्कर्षं प्रतिपादयितुं न क्षमन्ते चेत्, कथमिव सोऽयमस्मदीयवाचां गोचरः स्यात्। अतस्तेषां श्रीमदाचार्येन्द्राणां शिष्यभाव प्रतिपन्ना वयं न केवलं धन्या धन्यतरा वा; नापि केवलं धन्यतमा वा। अपि तु ततोऽपि निरतिशयोत्कर्षभाजो वय वाचामगोचरा एवेति नास्मदपेक्षया जगति कश्चिद्भाग्यवानस्तीति निश्चप्रचमेवेदम्।

अयि आस्तिकवर्याः! अद्यतनजयन्तीमहोत्सवे समवेताः सर्वे भवन्तः तदीयादिव्यमूर्तिसंदर्शनेन, तदीयगुणगणमहिमानुवर्णनेन, तदुपदिष्टार्थानामनुस्मरणेन, तत्कृतग्रन्थजातपरिशीलनेन, तदीयचरणतीर्थसंसेवनेन च तत्प्रमादमासाद्य समासादयन्तु नाम जन्मनः साफल्यमिति संततमाशास्महे॥

॥ चतुर्मतसारः ॥

[पोलकं ब्रह्मश्रीरामशास्त्रिभिर्विमृष्टः ॥]

(पूर्वतोऽनुवृत्तः)

इह हि तापत्रयसंतप्तसर्वजनोद्धिधीर्षयैव सर्वाण्यपि शास्त्राणि, सर्वाणि च तत्तन्महापुरुषप्रवर्तितानि मतान्यधिकारिभेदेन सोपानक्रमेण च प्रवृत्तानीत्येतत्सर्वं मार्गप्रामाण्यनिरूपणावसरे सूतसंहिताया मुनिपुणमुपपादितं लोकानुग्रहैकप्रयोजनावतीर्णेन भगवता वेदव्यासमुनितिलकेन 'अथातः संप्रवक्ष्यामि मार्गप्रामाण्यनिर्णयम्' इत्युपक्रम्य 'सोपानक्रमतो देवा वेदमार्गस्य हेतवः' इति, 'अतोऽधिकारिभेदेन मार्गा मान्य न संशयः' इति चैवमादिना। तद्व्याख्यायां च तात्पर्यदीपिकाख्यायां सर्वज्ञशिखामणयः सर्वास्वपि विद्यास्वविदितवेदितव्यांशवेदिनः अन्वर्थनामधेया विद्यारण्यश्रीचरणाः सुष्ठु न्यरूपयन्विषयमिमम्। 'यैर्व्याख्याताः सर्ववेदाः सशीर्षा यैः साम्राज्यं मेषपालस्य दत्तम्। व्यासः साक्षाद्यैश्च तेषां प्रमाणं विद्यारण्यश्रीगुरूणां वचो नः॥' इति तत्त्वचन्द्रिकायामुमामहेश्वरशास्त्रिभिः कथितरीत्या श्रीविद्यारण्यगुरुवचने नाविश्वासशङ्काऽवकाशवती। 'सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा। आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः॥' इत्यादिना पञ्चमवेदे भारतेऽप्ययमेव विषयो निर्धारितस्तेनैव वेदाचार्येण व्यासमुनिना। 'शासनाच्छंसनाच्चैव शास्त्रमित्यभिधीयते। शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवेदिभिः॥ तत्रैकं विधिरूपेण तदन्यत्प्रतिषेधतः। शंसनं भूतवस्त्वेकविषयं न क्रियापरम्॥ शास्त्रमापाततो भाति मुने बहुमुखं नृणाम्। निरूपितं तु न्यायेन विभात्येकमुखं पुनः॥' इत्यादिना भगवता वेदाचार्यपित्रा पराशरेणापि पराशरपुराणेऽयमेव विषयो न्यरूपि। मानवपुराणेऽपि निष्टङ्कितोऽयमर्थः—'कणादकपिलाद्यैस्तु मुनीन्द्रैरपि कीर्तितम्। मन्दबुद्ध्यनुसारेण केवलं परिकीर्तितम्। अत एव मुनीनां तु विरोधो नास्ति कश्चन। अन्यथा ते विरुद्धार्थं कथं ब्रूयुर्मनीषिणः॥ ब्रह्मविष्णुमहादेवप्रमुखैः परिकीर्तिताः। आगमाश्चानया नेया दिशा नैवान्यथा बुधाः॥ अन्यथा ते तु नेयाश्चेद्विरुद्धाः स्युर्न संशयः। कथं ते निर्गता वेदविरुद्धार्थाविभाषिणः॥ अत एव न कस्यापि विरोधो ह्यत्र कश्चन। स्वतन्त्रा आगमाः सर्वे निर्मलैः परिकीर्तिताः। अधिकारिविशेषेण प्रवृत्ता न हि संशयः॥' इति। तत्तत्पुराणादिगततन्त्रनिन्दाऽपि न तन्त्राप्रामाण्यतात्पर्येण; अपि तु तन्त्राधिकारिभिन्नाधिकारिणां तन्त्रप्रवृत्तिनिरासतात्पर्येणेत्युक्तं साम्बपुराणे—'निन्दा स्मृतिपुराणेषु या तन्त्रविषयाऽनघ। अपेक्ष्य वेदमार्गार्हं प्रवृत्ता सा न संशयः॥' इति॥

ब्रह्मविदग्रगण्यो भगवान्भर्तृहरिरपि 'शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते' इत्यादिना वाक्यपदीये सर्वेषामपि शास्त्राणां प्रक्रियाभेदमात्रम्, न लक्ष्यभेद इत्यवोचत्। 'स्वसिद्धान्तव्यव-

स्थासु द्वैतेनो निश्चिता दृढम् । परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥ अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते । तेषामुभयथा द्वैत तेनायं न विरुध्यते ॥' इत्यादिना माण्डूक्यकारिकायामाचार्याचार्याः श्रीगौडपादा अप्यौपनिषदसमयस्य सर्वसमयेष्वपि स्वीयत्वाभिमानवत्ताम्, अत एव तैरविरोधमजातशत्रुतां चाविश्चक्रुः । सर्वमामरस्यभाजो भगवत्पादा अपि श्रीगौडचरणाशयं सम्यक् व्यावृण्वस्तद्भाष्ये । पुरुषार्थप्रबोधे ब्रह्मानन्दभारतीभिरप्युक्तम्—'लोकायताद्यर्माखलं शास्त्रं शंभुविनिर्मितम् । अधिकारिविभेदेन प्रमाणं नात्र संशयः ॥ परस्परविरुद्धत्वेऽप्येतेषां सर्ववर्त्मनाम् । पुविशेषान्समुद्दिश्य प्रामाण्यं केन वार्यते ॥ प्रामाण्यं सर्वमार्गाणामेकमुद्दिश्य यो वदेत् । व्याहतं तद्वाक्यमेव न मद्वाक्यं न संशयः ॥ प्रामाण्यं सर्वमार्गाणां पुंभेदेनापि नैव चेत् । तर्हि कस्यापि मार्गस्य प्रामाण्य नैव विद्यते ॥ मार्गा वेदविरुद्धा ये तेषामेवाप्रमाणता । स्वप्नेऽपि वेदमार्गस्य नैव चेदप्रमाणता ॥ समाना वेदतन्त्राणां परस्परविरुद्धता ॥ अतोऽप्रमाणता वेदमार्गस्य न भवेत्कथम् ॥ वेदानामप्रमाणत्वं वेदमार्गबहिष्कृताः । वदन्ति तान्त्रिका एव सर्वथा वैदिका न चेत् ॥ तर्हि तन्त्राप्रमाणत्वं तन्त्रसंबन्धवर्जिताः । वदन्ति वैदिका एव सर्वथा न तु तान्त्रिकाः ॥ विचित्रानन्तकर्माधीनाधिकारिविभेदतः । लोकायतादिवेदान्तमार्गाणामस्ति मानता ॥ तथाऽपि वेदो मार्गाणामुत्तमः सर्वसाधकः । तत्प्राप्तिहेतवस्त्वन्य इति चेन्नेति को वदेत् ॥ सर्वासामपि विद्यानां वेदवच्छूलपाणिना । निर्मितत्वं वायवीये विस्पष्टं समुदीरितम् ॥ अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् । आदिकर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः ॥ किं बहूक्त्या वेदमार्गसौधसंप्राप्तये नृणाम् । दृढनिश्रेणिकापर्वाण्येव तन्त्राणि सर्वथा ॥' इति ॥ कविकुलतिलकः कालिदासोऽप्याह—'बहुधाऽप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः । त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥' इति । गन्धर्वराजः पुष्पदन्तोऽपि बभाणेमं विषयं महिम्नःस्तोत्रे—'त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च । रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥' इति । तद्व्याख्यायां प्रस्थानभेदाख्यलघुग्रन्थे च सम्यगिमं विषयं व्याचख्युः श्रीमधुसूदनसरस्वतीचरणाः सरस्वत्यपरावताराः । व्यासतात्पर्यनिर्णये अप्पयदीक्षितैरपि विषयोऽयमुपपाद्य 'तस्मात् बौद्धचार्वाकपाञ्चरात्रपाशुपतन्यायवैशेषिकपूर्वमीमांसासांख्ययोगतन्त्राणामप्युक्तरीत्या वेदान्तशास्त्रोपयोगित्वं संभवतीति न काऽप्यनुपपत्तिः' इत्युपसंहृतः । जयन्तभट्टकृतायां न्यायमञ्जर्याख्यायां विस्तृतन्यायसूत्रव्याख्यायामपि विवृतोऽयं विषयः—'मन्वादिचोदनान्यायः स यद्यपि न विद्यते । शैवागमे तथाऽप्यस्य ननु युक्ता प्रमाणता ॥ सर्वोपनिषदामर्थाः निश्रेयसपदस्पृशः । विविच्यमाना दृश्यन्ते ते हि तत्र पदे पदे ॥ ये च वेदविदामग्र्याः कृष्णद्वैपायनादयः । प्रमाणमनुमन्यन्ते तेऽपि शैवादिदर्शनम् ॥ पाञ्चरात्रेऽपि तैरेव प्रामाण्यमुपबर्णितम् । अप्रामाण्यनिमित्तं हि नास्ति तत्रापि किंचन ॥ नानाविधैरागममार्गभेदैरादिश्यमाना बहवोऽभ्युपायाः । एकत्र ते श्रेयसि संपतन्ति सिन्धौ प्रवाहा इव जाह्नवीयाः ॥' इति ॥ 'तस्मादात्मज्ञानं सन्तो मोक्षप्राप्तौ हेतुं प्राहुः । तीर्थे तीर्थे तच्चार्यैस्तैस्तैरुक्तं संज्ञाभेदैः ॥' इति च । पौष्करागमज्ञानपादवृत्तौ उमापतिशिवाचार्याः, रौरवागमान्तर्गतशिवज्ञानबोधभाष्ये शिवाग्रयोगिनश्च सर्वमतप्रामाण्यमित्थमेव निरूपयामासुः ॥

वामकेश्वरतन्त्रान्तर्गतनित्याषोडशिकार्णवस्य व्याख्याने सेतुबन्धाख्याने श्रीललितामहात्रिपुरसुन्दरीसाक्षात्कारवद्भिस्तन्त्रसिद्धान्तवेदान्तोभयमर्मविद्भिः श्रीभास्कररायैर्निपुणमुपपादितोऽयं विषयः। तथा हि—विविधकर्मपरिपाकायत्तविविधचित्तशालिनो जनाननुजिघृक्षुः परमकारुणिको भगवान् परमेश्वरः परस्परविलक्षणा अपि साक्षात्परंपरया वा परमपुरुषार्थैकप्रयोजनेका विद्याः प्रवर्तयामास। तथा च श्रुतिः—'ईशानः सर्वविद्यानाम्' 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति। अत्र चकारादितरविद्यासमुच्चयः, 'तस्मै वेदान् पुराणानि दत्तवानग्रजन्मने' इत्युपबृंहणदर्शनात्। स्मृतिरपि 'अष्टादशानामतासां विद्यानां भिन्नवर्त्मनाम्। आदिकर्ता कविः साक्षात् शूलपाणिरिति श्रुतिः॥' इति। ततश्च जगदाप्तपरमशिवप्रणीतत्वाविशेषेण सर्वासां विद्यानामधिकारिभेदेन प्रामाण्यमेवेति स्पष्टं सूतसंहितादौ॥

अधिकारश्च यथा नास्तिकानामेवार्हतादिदर्शनेषु, त्रैवर्णिकादेरेव वैदिकमार्गेष्विति पुरुषभेदेनैव व्यवस्थितः, तथा एकस्यापि पुरुषस्य चित्तशुद्धितारतम्यादपि व्यवस्थितः, वर्णभेदेनेवाश्रमभेदेनापि धर्मव्यवस्थादर्शनात्। एवं च यानि तत्तद्विद्याप्रशंसकानि वचनानि तानि तत्तदधिकारिणं प्रत्येव प्रवर्तकानि; यानि च तन्निन्दकानि तानि तत्तदनधिकारिणं प्रति निवर्तकानि, न पुनः न हि निन्दान्यायेन विधेयस्तावकानि। अतिबाल्यदशायां बालक्रीडनके प्रवर्तयतामेव पित्रादीनां वस्यैवाध्ययनाधिकारे तादृशक्रीडायां ताडनकर्तृत्वदर्शनात्। तदयं मथितार्थः—जातमात्रस्य त्रैवर्णिकस्य पुरुषस्य क्रीडाधिकारे निवृत्तेऽक्षराभ्यासः, ततः छन्दोभाषाज्ञानार्थं काव्याध्ययने प्रवर्तकानि 'अदोषं गुणवत्काव्यम्' इत्यादीन्यग्निपुराणवचनानि। व्युत्पन्नस्य तु 'काव्यालापांश्च वर्जयेत्' इति निषेधः। काव्याध्ययनजन्यप्रयोजनस्य जातत्वेनोत्तरभूमिकायामेवाधिकारात्तां विहाय पूर्वभूमिकायामेवायुः क्षपयतोऽनिष्टं भवतीति तदर्थः। ततो देहाद्यतिरिक्तत्वेनात्मनो ज्ञानार्थं न्यायशास्त्राध्ययने विधिः 'शुक्लेनात्मानमन्विच्छ' इत्यादिः। शुक्लं हेतुः, अवयवसमुदायात्मकन्याय इति यावत्। देहादिभिन्नत्वेनामुष्मिकयातायातक्षमतया आत्मनि ज्ञाते तु तादृशफलकर्माधिकारात् 'आन्वीक्षकीं तर्कविद्यामनुरक्तो निरर्थिकाम्' इत्यादयो निषेधाः पूर्वभूमिकां निषेधन्ति। 'धर्ममेवाचरेत्प्राज्ञः' इत्यादिविधय उत्तरभूमिकाया प्रवर्तयन्ति। तदुपयोगित्वेन पूर्वमीमांसायाः वेदे कर्मकाण्डस्य चाध्ययनम्। तेन धर्मार्थकामेषु साधितेषु चतुर्थपुरुषार्थलिप्सया पूर्वभूमिकात्यागाय 'नास्त्यकृतः कृतेन' इति कर्मनिन्दा। एताश्च सर्वा अज्ञानभूमिका इत्युच्यन्ते। इताः परस्परान्तर्भावेण सप्तैवेति वसिष्ठः। एतदुत्तरास्तु ज्ञानभूमिकाः। अथ 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' आत्मा वा अरे द्रष्टव्यः' इत्यादयो ब्रह्मज्ञानविधय उत्तरभूमिकाप्रवर्तकाः। उत्तरभूमिका बहव इति केचित्, 'वदन्ति बहुभेदेन ज्ञानिनो योगभूमिकाः' इति वचनात्। सप्तैवेति तु भगवान् वसिष्ठः, 'अवबोधं विदुर्ज्ञानं तदिदं सप्तभूमिकम्' इत्युक्तेः। तन्नामानि विविदिषा, विचारणा, तनुमानसा, सत्त्वापत्तिः, असंसक्तिः, पदार्थाभावनी, तुर्यगा, इति। तल्लक्षणानि तु वासिष्ठे ज्ञानशास्त्रे द्रष्टव्यानि। तदुपयोगितया च वेदे उपनिषत्काण्डस्योत्तरमीमांसायाश्चाध्ययनम्॥

ब्रह्मज्ञानं च द्विविधम्—शाब्दं अपरोक्षानुभवरूपं च, 'शास्त्रदृष्टिर्गुरोर्वाक्यं तृतीयः स्वात्मनिश्चयः। अन्तर्गतं तमश्छेत्तुं शाब्दबोधो न हि क्षमः॥' इत्यादिज्ञापकात्। तेन शाब्दभूमिकालाभोत्तरं तत्रायुःक्षपणनिषेधार्थाः 'पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इत्यादयः। सप्तभूमिकान्तर्गतद्वितीयतृतीययोश्च मध्ये भक्तिरूपैका महती भूमिका। तदुपयोगित्वेन भक्तिमीमांसाध्ययनम्। भक्तिश्च पञ्चमभूमिकान्तमनुवर्तते। तल्लाभोत्तरमपरोक्षानुभवरूपषष्ठभूमिकालाभः। सैव च जीवन्मुक्तिः। तदव्यवहितोत्तरमेव च विदेहकैवल्यम्, 'ज्ञानादेव तु कैवल्यम्' इत्त्र ज्ञानपदस्यानुभवपरत्वात्। न्यायादिशास्त्रेषु स्वस्वभूमिकालाभमात्रेण मोक्षप्राप्तिवर्णनं तूत्तरोत्तरभूमिकानामपह्नवेनैव; पुरुषार्थप्राप्तौ विलम्बशङ्कया प्रवृत्त्यभावनिरासेन तस्यादोषत्वात्। यानि च 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' 'यमेवैष वृणुते तेन लभ्यः' इत्यादीनि वचनानि, तेष्वेवकारः स्वस्वभूमिकासाध्ये उत्तरभूमिकाधिकाररूपफले साधनान्तरनिरासार्थः, न पुनरुत्तरभूमिकाऽभावबोधकः। 'ज्ञानादेव तु कैवल्यम्' इत्यत्र तु अनुभवात्परतः साधनान्तररूपाया भूमिकाया अभावात्तदभावबोधक एवेति सर्वेषां तत्तद्विद्याप्रवर्तकानामृषीणां न मिथो विरोधः॥

एतासां च भूमिकानामेकैकस्या अवान्तरभूमिका अपि भूयस्य एवेयत्तयाऽपरिच्छेद्या बुद्धिमद्भिरनुभवैकवेद्याः सन्त्येव। तदुक्तम्—'इत्यवस्था मया प्रोक्ताः सप्त ज्ञानस्य राघव। एकैकाशतसंख्याऽत्र नानाविभवरूपिणी'॥ इति। एवमनेकासु भूमिकास्वेकैकाऽपि बहुभिर्जन्मभिरेव साध्यते॥

तदेवमपरिमितैर्जन्मभिर्महता प्रयत्नेन परब्रह्मणः शाब्दतत्त्वनिश्चयभूमिकापर्यन्तं क्रमेण सम्यगारूढस्य संसारे नात्यन्तमासक्तिः नापि दृढो निर्वेदः इत्याकारिका विलक्षणा चित्तशुद्धिः संपद्यते। सोऽयं भक्तिमार्गेऽधिकारी, 'न निर्विण्णो न चासक्तो भक्तियोगोऽस्य सिद्धिदः' इति वचनात्। सा च भक्तिः द्विविधा—गौणी परा चेति। तत्राद्या सगुणस्य ब्रह्मणो ध्यानार्चनजपनामकीर्तनादिरूपा संभवत्समुच्चयिका। परभक्तिस्त्वेतज्जन्यानुरागविशेषरूपा। आद्याया अपि बह्व्योऽवान्तरभूमिकाः। तासु प्रथमा 'योषामग्निं ध्यायीत' इत्यादिभावनासिद्धिः। द्वितीया 'मनो ब्रह्मेत्युपासीत' इत्यादिविहितोपास्तिः। तृतीया त्वीश्वरोपास्तिः। ईश्वरस्यापि सूर्यगणेशविष्णुरुद्रपराशिवशक्तिभेदेन बहुविधत्वात् तत्तदुपास्तयो विभिन्ना एव भूमिकाः। शक्तिरपि छायावल्लभालक्ष्म्यादिभेदेनानन्तविधैव। अनेन क्रमेण एता भूमिका अनन्तैर्जन्मभिरारूढस्य पश्चात् त्रिपुरसुन्दर्या गौणभक्त्युदयः। तत्र सम्यक्निरूढस्य तस्यां परभक्त्युदय इति स्थितिः। श्रीमहात्रिपुरसुन्दर्याश्च गौणीं भक्तिं सेतिकर्तव्यताकां निरूपयितुमैदम्पर्येण सुन्दरीतापनीपञ्चकम्, भावनोपनिषत्, कौलोपनिषत्, गुह्योपनिषत्, महोपनिषच्चेत्यादयो वेदशिरोभागाः प्रवृत्ताः। वेदे च पूर्वकाण्डस्य शेषभूततया आश्वलायनादिकल्पसूत्राणां मन्वादिस्मृतीनां च प्रवृत्तिवदुपनिषत्काण्डशेषत्वेन आह्वावासिष्ठादिकल्पानां परशुरामादिकल्पसूत्राणां यामलादितन्त्राणां च प्रवृत्तिः। पुराणानां तु काण्डद्वयं प्रत्यपि शेषत्वेन प्रवृत्तिः। ततश्च स्मृतितन्त्रपुराणानां वेदमूलकत्वेनैव प्रामाण्यम्। ये च प्रत्यक्षश्रुतिविरुद्धास्तत्तद्देकदेशास्तेषां विरोधाधिकरणन्यायेन यावन्मूलश्रुतिदर्शनमननुष्ठानलक्षणमप्रामाण्यम्। यानि तु सर्वांशेनापि

वेदविरुद्धान्येव कानिचित्तन्त्राणि पाशुपतविशेषपाञ्चरात्रविशेषादीनि, तानि नेदृशीं भूमिकामारूढस्य। अपि तु श्रौतस्मार्तकर्मभूमिकाधिकारिण एव केनचित्पापेन ततश्च्युतौ तेष्वधिकारः। अत एव 'पाञ्चरात्रं भागवत तथा वैखानसाभिधम्। वेदभ्रष्टान्समुद्दिश्य कमलापतिरुक्तवान्॥' इत्यादिना कतिपयानामेव परिगणनमुपपद्यते। तेन 'श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रायश्चित्ते भय गतः। क्रमेण श्रुतिसिद्धयर्थं मनुष्यस्तन्त्रमाश्रयेत्॥' इत्यत्र तन्त्रसामान्यपदं तादृशविशेषपरम्। 'पत्युरसामञ्जस्यात्' इत्यधिकरणमपि तादृशतन्त्रपरमेव। यानि तु रामकृष्णनृसिंहरुद्रपरशिवसुन्दर्याद्युपासनाबोधकान्यगस्त्यादितन्त्राणि, तन्मूलभूतानां रामतापन्याद्युपनिषदां प्रत्यक्षत्वादेव तेषां नाप्रामाण्यशङ्काकलङ्कावकाशः। हरदत्ताचार्यापरनामधेयसुदर्शनाचार्यैरपि श्रुतिसूक्तिमालापराभिधतात्पर्यसंग्रहे कर्मोपासनज्ञानात्मकवेदकाण्डत्रयान्तर्गतोपा॰नाकाण्डोपबृंहणरूपतया आगमानां प्रामाण्यं प्रसाधितम्—'वेदाः प्रमाणमिति संगिरमाण एव दिव्यं तवागममवैति जनः प्रमाणम्। त्वद्ध्यानवाक्यविषयौपयिकैः पदार्थैरामूर्धमाकालितविग्रहमा च मूलात्॥ ध्यानं यथा भवति तद्विषयो यथा त्वं यादृग्गुणश्च भगवन्नधिकारिवर्गः। सर्वाणि तानि भवदागमसंहिताभिः कल्पैरिवाध्वरविधेरुपपादितानि'॥ इति। बाह्या अप्याहुः—'देशना लोकनाथानां सत्वाशयवशानुगाः' इति। किं बहुना? एकस्मिन्नपि हि भगवत्पादीये दर्शने विवरणाचार्यवाचस्पतिमिश्रप्रभृतिपूर्वाचार्यावलम्बिता एकजीववादनानाजीववादादयः प्रस्थानभेदास्तत्तदधिकारिभेदेनानवस्थिता बहवो लक्ष्यैक्यमावहन्तो लक्ष्यन्ते। अत एव सर्वेषामपि प्रस्थानानां प्रामाण्यमेवानपवादमास्थीयते भगवत्पाददर्शनावलम्बिभिः सर्वैरपि। तदुक्तं श्रीसुरेश्वराचार्यैर्वार्तिके—'यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि। सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता॥' इति। संक्षेपशारीरकेऽपि सर्वज्ञात्मश्रीचरणैरुक्तम्—'जगदनेकमुमुक्षुकमीक्षते पुरुष एकतरो न तथेतरः।' इति। 'श्रुतिवचांसि मुनिस्मरणानि च द्वयविशारदगीरपि सर्वशः। त्रयमपेक्ष्य दशात्रितयं विना न हि घटामुपयान्ति कदाचन॥ पुरुषमेकमपेक्ष्य च भूमिकात्रितयमस्ति पुरोदितमेव तत्। तदनुसारवशादखिलश्रुतिस्मृतिवचांसि वयं घटयामहे'॥ इति च। सिद्धान्तलेशसंग्रहे श्रीमदप्पय्यदीक्षितैरप्युक्तम्—'प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ पर संनह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः।' इति। एवं च आवात्स्यायनतन्त्रमाश्रुतिशिरःसिद्धान्तं सर्वा अपि विद्यास्तत्तदधिकारिभेदेन भूमिकाभेदेन च प्रमाणमेवेति बहुभिर्महद्भिर्निष्पक्षपातैर्निर्णीतोऽयमभेद्यो राजमार्गः। अत एव श्रीनीलकण्ठमखी श्रीनीलकण्ठविजयकाव्ये—'आवात्स्यायनतन्त्रमाश्रुतिशिरःसिद्धान्तमुद्रावचा विद्या यत्प्रभवा जयन्ति भुवि तां वन्दे गिरां देवताम्॥ इति सर्वविद्याधिष्ठात्रीं सर्वविद्यास्वरूपिणीं सरस्वतीं देवीमुपतस्थे॥

तथा च सति कस्यापि मतस्य ग्रन्थस्य वा महापुरुषैः प्रवर्तितस्याप्रामाण्यं वक्तुं बिभेत्येव प्रामाणिको जनः। एवं स्थिते श्रीरुद्रचमकश्वेताश्वतरार्थर्वशिरोऽथर्वशिखाकैवल्यजाबालतैत्तिरीयादिबहुविधश्रुत्युपबृंहणरूपाणां तुलाहिरण्यगर्भादिमहादानस्वर्णरूप्यादिदानवरलक्ष्मीव्रतजन्माष्टमीजयन्तीविनायकानन्तव्रतादिशिष्टानुष्ठीयमानसर्वविधधर्ममूलभूतानां शैवपुराणानां तामसत्ववादः केषांचित् स्वबुद्धितामसत्वमेवावेदयति। तदुक्तं मदीये आचार्यमहिमप्रकाशे—'भ्रान्त्यादिदोषरहिताप्ततम-

प्रणीते वैयाग्रमेकेऽप्यहह हन्त पुराणवर्गे। स्वानिष्टदैवतपरे तु परेऽनिर्धारा आरोपयन्ति निजबुद्धि-गतामसत्त्वम्॥' इति। एवं च न्यायसिद्धाञ्जने शैवागमोक्तनियतितत्त्वखण्डनानन्तरं 'यदि पुनः प्रमाणभूतेषु पाञ्चरात्रादिषु काचिन्नियत्यादिसृष्टिरुच्यते, तदाऽपि तत्र तत्र तात्पर्यभेदेन संप्रति-पन्नतत्त्वविशेषतच्छक्त्यादीनामेव पृथग्गणनेति मन्तव्यम्, युक्तिश्च निबन्धने दूष्यते न त्वागमः' इति वाक्येन शैवागमीयनियतितत्त्ववाक्याप्रामाण्यस्य स्वीयपाञ्चरात्रीयनियतितत्त्ववाक्यप्रामा-ण्यस्य च कथनं श्वश्रूनिगच्छोक्तिसदृक्षम्। तथा अहङ्कारतत्त्वानरूपणावसरे 'यत्तूक्तं भोज-राजेन' इति भोजराजकृततत्त्वप्रकाशाख्यशैवप्रकरणग्रन्थस्थश्लोकाननूद्य 'अत्र विरुद्धांशा बाह्यशैवा-गममूलत्वेनानादरणीयः। एवं भगवत्पराशरादयुक्तप्रमाणतमपुराणाद्यानुगुण्येन पुराणान्तरादिवच-नादीनि निर्बाह्याणि, अत्यन्तविरुद्धानि त्वनादेयानि' इति शैवागमशैवपुराणाद्यनादेयत्ववचन च स्वीयग्रन्थरागपरकीयग्रन्थप्रद्वेषमूलकं वेङ्कटनाथीयं सहृदया एव विवेचयन्तु॥

श्रीभगवत्पादास्तु सर्वेषामपि मतानां प्रामाण्यम्, मतानां मिथः कलहस्य भ्रान्तिमूलत्वं चाभ्युपयन्ति। 'शैवादिषण्मतगुरो ह्यधिकारिभेदान्नानं समस्तमपि मार्गमिहाभ्युपैषि। सोपानरीतिमव-लम्ब्य यतोऽत एव लोका गृणन्त्युचितमेव जगद्गुरुं त्वाम्॥ भ्रान्त्या मतेषु हि मिथः कलहायमानेष्व-द्वैतमार्गममलं श्रुतिमौलिगूढम्। उद्धाट्य शान्तिमधिकां सुखमप्यनैषीर्लोकं ततोऽसि भुवि शंकरनाम-धेयः॥' इति। एवमधिकारिभेदेन भूमिकाभेदेन च सर्वासामपि विद्यानां प्रमाणत्वेऽपि सर्वप्रमाणोत्तम-त्वं सर्वोत्तमाधिकारिकत्वं चापौरुषेयायाः श्रुतेरेव, तत्रापि वेदावसानभूताया उपनिषद एव चेति निर्वि-वादमास्तिकोत्तमाना वैदिकानां सर्वेषामपि। तस्यामप्युपनिषदि उपासनाकाण्डज्ञानकाण्डात्मना द्विधा विभक्तायामुपासनाकाण्डापेक्षया ज्ञानकाण्डस्योत्तमत्वमुत्तमाधिकारिकत्वं च निरपवादमास्थेयमेव। 'यः प्राकृतः पदमसारतमं हि तस्य लोकायतं मतमसारतरं प्रसिद्धम्। बौद्धादिदर्शनमसारमथाल्प-सारं वेदोक्तकर्मकरणं सफलाभिसन्धि॥ निष्कामकर्म किल सारमुपासनं यद्वेदोदितं तदिह सारतरं प्रगीतम्। यद्वेदनं श्रुतिशिखोद्भवमीशजीवाभेदावगाहि खलु सारतमं तदाहुः॥'

तत्र केचन उपासनकाण्डपार्थक्येन ज्ञानकाण्डे, उपासनापेक्षया ज्ञानस्योत्तमत्वे च विप्र-तिपद्यन्ते। स्मृतिसंतानरूप दर्शनसमानाकारं वेदनदर्शनध्रुवस्मृतिनिदिध्यासनध्यानादिशब्दवाच्य-मुपासनमेव भक्तिरूपापन्नं परप्राप्त्युपायभूतम् 'वेदन ध्यानविश्रान्त ध्यान श्रान्तं ध्रुवस्मृतौ। सा च दृष्टित्वमभ्येति दृष्टिर्भक्तित्वमृच्छति॥' इति संगिरन्ते। 'शास्त्रार्थतत्त्वज्ञानतः कर्मयोगः, तेन जितस्वान्तस्य परिशुद्धात्मभावनारूपो ज्ञानयोगः, तद्द्वारा वा साक्षात्कर्मयोगेनैव वा आत्मावलोक-नम्, तेन लब्धाधिकारस्य भक्तियोगः, ततः परप्राप्तिः। अस्मिञ्जन्मनि कर्मयोगाभावेऽपि पूर्व-जन्मकृतेन ज्ञानयोगः स्यात्। इदानीं तदुभयाभावेऽपि जन्मान्तरसहस्रेष्वित्यादिप्रतिपादितक्रमेण भक्तियोगः स्यात्' इति च क्रममभिप्रयान्ति। परिशुद्धजीवात्मभावनारूपज्ञानयोगेन च केवलाचिदनु-भवरूपैश्वर्यशब्दितभोगापेक्षयोत्तमः, चिदचिद्विशिष्टनारायणाख्यब्रह्मात्मकपत्यनुभवरूपपरमपदशब्दि-तमुक्त्यपेक्षया अवमः, पतिपरित्यक्तपत्न्याः वसनभूषणाद्यलंकृतस्वीयशरीरमात्रानुभवतुल्यो बन्धा-द्विलक्षणो मुक्तिभिन्नश्च आन्तरालिकः अक्षरगतिशब्दशब्दितः कैवल्याख्याविख्यातः केवलाचिदनु-

भवः प्राप्यते इति च वदन्ति। त्रैवर्णिकसमर्थप्राञ्जविलम्बक्षमाधिकारिकाऽऽप्रायणानुष्ठेयायासभूमापेक्षोपासनाख्यभक्तिमार्गापेक्षया भक्तिरूपोपायान्तरानभिज्ञविषयत्वेनाशक्तविषयत्वेन मुक्तिविलम्बाक्षमविषयत्वेन सुकरत्वेन सकृत्कर्तव्यत्वेन शीघ्रफलदत्वेन च विलक्षणं सकलवर्णाधिकारिकं शरणागतिन्यासंन्यासत्यागभरन्यासनिक्षेपप्रपदनादिशब्दशब्दितं विश्वासभूमापेक्षं, स्वनिष्ठा भक्तिनिष्ठा आचार्यनिष्ठेति निष्ठात्रयात्मकं प्रपत्तिमार्गं च व्यवस्थितविकल्पेन भक्तिमार्गवन्मुक्तिहेतुभूतमामनन्ति। निर्विशेषं प्रत्यगभिन्नं निर्विकल्पकगोचरमखण्ड नित्यशुद्धबुद्धमुक्तस्वभावमुपनिषदुद्घुष्ट ब्रह्म चापलपन्ति। सविशेषमेव हेयप्रत्यनीकं समस्तकल्याणगुणगणाकरमप्राकृतदिव्यमङ्गलविग्रहोपेतम्; विभुत्वादणुस्वरूपजीवान्तरविलक्षणया जीवकोट्यन्तर्गतया वा, विभुत्वादीश्वरपारतन्त्र्याच्च पतिपुत्रव्यावृत्तपत्नीन्यायेन जीवेश्वरविलक्षणया वा, नित्यलीलाख्यविभूतिद्वयशेषित्वादिमात्रेणेश्वरकोट्यन्तर्गतया वा, स्वस्वेतरसर्वशेषिभगवच्छेषभूतया जगत्कारणत्वादिब्रह्मलक्षणशून्यया स्वात्यन्तभिन्नया श्रीदेव्या समाश्लिष्टं नारायणाख्यं मूर्तित्रयमध्यस्थ परं ब्रह्मोपयन्ति। ब्रह्मविष्णुरुद्रात्मकमूर्तित्रयातीततुरीयेश्वरवादम्, मूर्तित्रयैक्यवादम्, मूर्तित्रयसाम्यवादम्, ब्रह्मणः शिवस्य वा ईश्वरत्ववादं च प्रतिक्षिपन्ति। तदुक्तम्—'आत्मैक्यं देवतैक्य त्रिकसमधिकतातुल्यतैक्यं त्रयाणामन्यत्रैश्वर्यमित्याद्यनिपुणफणितीराद्रियन्ते न सन्तः' इति। ब्रह्मणः शिवस्य च जीवत्वं व्यवस्थापयन्ति। 'अन्येषां तु चतुर्मुखादिरुद्रादीनामपूर्णतया साधकावस्थत्वात्कामक्रोधाक्रान्तत्वाच्चाक्षीणि विरूपाणि भवन्ति; भगवतः परिपूर्णकामस्य परमशान्तस्य पुरुषोत्तमस्यैव पुण्डरीकाक्षत्वम्' इति च कविसिंहेन वेङ्कटनाथेन शिवसंबन्धिविरूपाक्षसंज्ञाव्युत्पत्तिकौशलं प्रादर्शि। 'सोऽयं मदीयाशयरङ्गमध्ये सायंनटस्ताण्डवमाचनोतु। पादारविन्दाभरजे यदीये दधाति नीलोपलतां मुकुन्दः॥' इति दीक्षितेन्द्राद्युक्तरीत्या शिवचरणनूपुराभरणायमानस्य शेषस्य नित्यसिद्धगरुडादिजीवकोटिपरिगणनेन, साधकावस्थजीवतयाऽभ्युपगतस्य शिवस्य ततोऽप्यपकर्षं च वर्णयन्ति। शिवोपासनपरत्वेन शिवजगत्कारणत्वपरत्वेन च स्वरसतः प्रतीयमानानामपि बहूनां वेदान्तवाक्यानां शाश्वतशिवत्वेन स्वाभ्युपगतविष्णुपरत्वं लिङ्गभूयस्त्वाधिकरणादिभिः सिद्धान्तयन्ति। शिवादिनाम्नामपि 'विष्णोरप्यस्त्यभिख्या शिव इति शुभतारूढिरत्रानुपाधिः' इत्यादिना विष्णुनामत्वं प्रसाधयन्ति। 'बुद्धरुद्रादिवसतिं श्मशानं शवमेव च। अटवीं राजधानीं च दूरतः परिवर्जयेत्॥' इति च बौद्धविहारादिसमकक्ष्यतया शिवालयस्य परिवर्जनीयत्वमाह वेङ्कटनाथः। 'महावृक्षसमाख्येव बलवन्मानबाधिता। महेश्वरमहेन्द्रादिसमाख्याऽप्यत्र निष्फला॥ इति महेश्वरसमाख्यायाः महावृक्षसमाख्यातौल्येन शिवमहत्त्वासाधकत्वमवोचत् स एव। "यद्येवं गङ्गा पशुपतेरपि पावनी, तर्हि 'भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः' इत्येतत् कथम्? इत्थं—अत्र हि स्वतः पवित्रत्वस्य स्पष्टव्यतादेतुत्वमुच्यते। अश्रुतमनाकाङ्क्षितं चान्यसंसर्गस्य तत्पावित्र्यतादेतुत्वं कल्पयितुमयुक्तम्। कल्प्यमानेऽपि ज्ञापकहेतुत्वमात्रं कामं कल्प्यताम्। भवेन शिरसा धृतत्वात्पवित्रमिति ज्ञात्वा पस्पृशुरित्यर्थः। सामान्योक्त्या च भवस्यान्येषां च पवित्रत्वमभिप्रेतम्। अत एव 'हरस्य गात्रसंस्पर्शात्पवित्रत्वमुपागता' इत्यत्रापि हरस्य मूर्द्धित्र-

दत्वमुपागता इति बोद्धव्यम्" इत्यादिना शिवगात्रसंस्पर्शस्य गङ्गापवित्रत्वं प्रति कारकहेतुत्वप्रतिक्षेपपूर्वकं ज्ञापकहेतुत्वनिर्धारणाद्वेङ्कटनाथेन स्वीयतार्किकसिंहत्व प्राकाशि ॥

अन्ये च ततोऽप्यतिधीराः राघवेन्द्रयतिश्रीनिवासाचार्यप्रभृतयः चन्द्रिकाप्रकाशप्रमाणलक्षणटीकाव्याख्यादिषु 'शर्वादिसर्वगीर्वाणनिर्वाणगतिहेतवः । पूर्णब्रह्मपदाम्भोजपांसवः पान्तु नः सदा ॥' 'श्रीमदानन्दतीर्थार्यचरणावाश्रयेऽनिशम् । रुद्रादिसर्वेश्वरैः संसेव्याविष्टदौ मताम् ॥' इत्यादिना हिरण्यगर्भापेक्षयाऽप्युत्तमत्वेन स्वाचार्याभ्युपगतवायुदेवतावतारामितपूर्णप्रज्ञपादपांसुभिः परमांशवस्य निर्वाणगतिप्राप्तिं वर्णयन्ति । अहो धाष्टर्यमतिभूमिं गतमेतेषाम् ॥

शिवोपासकाश्च परे शिवभागवताः विष्णुभागवतोक्तवैपरीत्येन पूर्वोक्तं सर्वं वर्णयन्ति । ते हि अनुपपत्त्यधिकरणान्यप्रतिषेधाधिकरणलिङ्गभूयस्त्वाधिकरणादिभिस्त्रिमूर्त्युत्तीर्णपरमशिवस्यैव च परब्रह्मत्वं समाभ्यधिकराहित्यं सर्वपरविद्योपास्यत्वं मुक्तप्राप्यत्वादि च व्यवस्थापयन्ति । तदुपासकत्वं च नारायणस्य वर्णयन्ति । भट्टभास्करप्रभृतयश्च केचिद्विष्णोर्जीवत्वमेव साधयन्ति । श्रीमदप्पयदीक्षितेन्द्रास्तु तदसहमानाः आनन्दलहर्यामेवमाहुः—'आस्माकीना तु सैद्धान्तिकसरणिरियं यत्परब्रह्मकोटिः श्रीमन्नारायणः सन्महित इति महाभारतादिप्रसिद्धेः' इति । स्वकृतचन्द्रिकाव्याख्यायां चैवं विशदयामासुः—'वेदविभागार्थमेवावतीर्णेन सकलवेदतात्पर्याभिज्ञेन सर्वज्ञशिखामणिना भगवता वेदव्यासेन, पुलस्त्यवरदानलब्धदेवतापारमार्थ्यवेदनेन श्रीपराशरेणान्यैश्च महर्षिभिर्वेदोपबृंहणार्थं प्रणीतेषु श्रीमहाभारतविष्णुपुराणादिषु निश्चितपरब्रह्मभावस्य सद्भिः सर्वैरप्याविभागेन परब्रह्मत्वेव पूजितस्य श्रीनारायणस्य क्वचित्कोणे निविष्टमन्त्रार्थवादपुराणवचनादिलेशमवलम्ब्य जीवभावं वक्तुं नास्मज्जिह्वा प्रवर्तते । तथा चेन्मूर्धा च शतधा भवति । वेदवैदिकद्रोहो देवताद्रोहश्च जायते । अतो नारायणः परब्रह्मकोटिरित्येवास्माकं सिद्धान्तः ।' इति । शिवचिच्छक्त्यंशभूतो नारायणः परब्रह्मकोटिरित्येव श्रीकण्ठाचार्याणामाशयोऽपि ; न तु विष्णुभागवतानामेकेकण्ठ्येन शिवजीवत्ववदेतेषां शिवभागवतानां विष्णुजीवत्वमभिमतम् । रत्नत्रयपरीक्षायां च श्रीमदीक्षितेन्द्रैः श्रीकण्ठभाष्यानुसारेण हरिहरगौरीरूपरत्नत्रयस्य 'आगतं शिववक्त्रात्तु गतं च गिरिजामुखे । मतं च वासुदेवेन तस्मादागम उच्यते ॥' इत्यादिप्रमाणवचनबलेनागमपदप्रवृत्तिनिमित्तघटकीभूतस्य परब्रह्मकोटित्वमुपास्यत्वं च स्फुटमुपवर्ण्य 'आमथ्य भाष्यदुग्धाब्धिमाप्तं रत्नत्रयं ततः । शम्भुर्गौरी हरिश्चेति तच्च सम्यक् परीक्षितम् ॥' इत्युपसंहृतम् ॥ विष्णुभागवतानां श्रीदेव्याः परब्रह्मकोटित्वमतसद्भावेऽपि तस्याः श्रीनारायणापेक्षयाऽत्यन्तभिन्नत्ववच्छिवभागवतानामेतेषां परब्रह्मकोट्यन्तर्गतयोः गौरीनारायणयोः न शिवादत्यन्तभिन्नत्वम्, अपि तु शिवाभेद एव इत्यपि तद्ग्रन्थपरामर्शिनां स्फुटम् । अयमेव शिवभागवतानां विष्णुभागवतापेक्षया विशेषः—यत् यथा विष्णुभागवताः सर्वेऽप्यैकण्ठ्येन शिवस्य जीवत्ववादं शिवद्वेषं च कलयन्ति, न तथा सर्वेऽपि शिवभागवताः विष्णुजीवत्ववादं विष्णुद्वेषं वा कलयन्तीति एतत् विष्णुभागवतानां शिवभागवतानां चाशेषग्रन्थदर्शिना करवदरत्नमानम् ॥ (क्रमशः)

॥ नयमञ्जर्यनुभवः ॥

मीमांसारत्नम्, एम. ए., बि. एल्., बिरुदभाजा श्री ए. वि. गोपालाचार्येण विरचितः ॥

(पूर्वतोऽनुवृत्तः)

फलगुणचोदनाह्वयभिदारहिताः कथमिव भेदमाप्नुयुरुपास्तिधियः ।
यदिह विभेदकं कथितमभ्यसनप्रभृतिकमन्यगामि तत् सिद्धमपि ॥ (ब्र. सू. ३. ३. १. २०)

सिद्धान्तश्लोकोऽयम् । भिदायुतत्वहेतुना भेदपूर्वपक्षः कृतः । भिदारहितत्वहेतुनाऽभेदः साध्यते । 'एकं वा संयोगरूपचोदनाख्याऽविशेषात्' इति धर्ममीमांसासिद्धान्तसूत्रादेकमिति साध्यस्यानुषङ्गः कार्योऽत्र । साध्यगतैकवचनानुरोधेनात्र प्रत्ययमिति पक्षपदे एकवचनमाहृतं सूत्रकारैः । अस्त्यन्यदपि स्वारस्यमेकवचने । अत्र तन्त्रेण वेदान्तेषु निर्गुणविज्ञानैकत्वमपि कथंचित्प्रतिज्ञेयम् । तद्विषये एकवचनमेवोपपद्येत । अस्मिन्नधिकरणे, 'दर्शयति च' इति सूत्रे 'सर्वे वेदा यत्पदमामनन्ति' इति वाक्यमुदाहृतं भाष्यकारैः सूत्रकृदुद्बुद्धिस्थत्वेन । तद्वाक्यं च सर्वनिगमावगमितनिर्गुणज्ञानैक्यविषय एव सामञ्जस्यं लभेत । 'स्वाध्यायस्य तथात्वेन' इति तृतीयसूत्रं निर्गुणमुण्डकविद्याविषयम् । उपास्तिविद्यामात्रपरत्वे एतदधिकरणस्थनिर्गुणविद्याविषयस्य तत्सूत्रस्य निवेशनमप्रकृतमनुचितं स्यात् । निर्गुणवाक्येष्वप्यस्मिन्पादे विचारः क्रियते । पादादौ क्रियमाणायाः प्रतिज्ञायास्तद्विचारस्यापि कथंचित्संग्राहकत्वमुचितं । फलादिभिदागर्हिता उपास्तिधियः कथमिव भेदमाप्नुयुः इति सिद्धान्तप्रदर्शनम् । कथमिवेति आक्षेपेन न कथंचिदपीत्यभेदस्य दृढप्रतिज्ञानं भेदस्य दृढनिरसनमपि कृत भवति । अत्र सूत्रप्रतिज्ञायामिव प्रत्ययशब्दवाच्यधियः पक्षीक्रियन्ते । धीविषये एवात्र विचारः । 'फल॰॰ रहिताः' इति पक्षविशेषणं हेतुगर्भम् । हेतुगर्भपक्षविशेषणेन 'फलरूपचोदनाख्याऽविशेषात्' इति सौत्रहेतुः प्रदर्श्यते । फलं फलसयोगः । उपास्तिरूपयोगेन ब्रह्मप्राप्तिरूपफलसंयोगः सिषाधयिषितः । एतदधिकरणात्पूर्वमधिकरणं फलाधिकरणं । सर्वेषां फलानां दातृ ब्रह्मैवेति तत्र सिद्धान्तितम् । विद्यायाः मोक्षफलस्य दातृत्वं विद्यारूपोपास्त्या ईश्वरप्रीणनं द्वारमिति अत्र सूच्यते पादादावस्मिन्नाद्यसूत्रे फलन्यादिपदेनोपलक्षणविधया संग्रहणेन । पादान्ते च विकल्पाधिकरणे 'अविशिष्टफलत्वात्' इति फलं स्वशब्दतः संकीर्त्यते । अनन्तरपादारम्भे, 'पुरुषार्थोऽतः' इति विद्यातः फलं कीर्त्यते । तत्पादान्ते च मुक्तिफलस्य निर्देशः क्रियते । मुमुक्षोः साधकस्य मोक्षफलं सदा बुद्धौ संनिधत्त इति सौत्रं प्रदर्शनं । फलस्य प्रेरकत्वेन प्राधान्यात्तस्यात्र प्रथमनिर्देशः क्रियते धर्ममीमांसासूत्रमनुसृत्य । सौत्रसंयोगपदस्थाने फलमिति स्फुटपदं निवेश्यते श्लोके । पक्षस्थसर्वपदसंकोचनाय चोदनापदमुपात्तं सूत्रकृतेति पूर्वमेवोक्तम् । 'गुणभिदारहिताः' इति । ब्रह्मगुणा उपासकचित्ताकर्षकाः । उपासितगुणानुरूपा तदन्विता फलप्राप्तिः । फलगुणेति समभिव्याहारेण तत्कृतन्यायसूचनमपि क्रियते । 'चोदनाभिदारहिताः' । गुणचोदनेति समभिव्याहारेणैकत्र विहितामुपास्तिमनूद्यान्यत्र गुणविधानमात्रं क्रियत इति सिद्धान्तिपक्षस्य सूचनमपि क्रियते । 'आह्वयः' प्रणवेनाहूतं ब्रह्म नितरां प्रसीदति, आहूत इव सद्य उपसीदति' इत्युक्तमभियुक्तैः । तद्वत् दहरवैश्वानरादिनामभेरुपासने आहूतमिव ब्रह्मोपसीदेत् । अभ्यसनप्रभृतिक यद्भेदकमिह कथितं तदन्यगामि, अन्यार्थमन्यथा-

सिद्धं हेतुत्वेनाभिहितमपीत्युत्तरार्थम्। अभ्यसनश्रुतिकामिति निरासार्थं पूर्वपक्षानुवादेऽभ्यसनशब्दस्य प्रथमग्रहणेन पुनःश्रुतः पूर्वपक्षणा प्रधानतयाऽवलम्बनं कृतमिति द्योत्यते। 'अभ्यसनप्रभृतिकम्'। प्रभृतीति नामधर्मादिकं गृह्यते। अभ्यासोऽपि नात्र भेदकः' इत्यादिना भाष्यात् भिन्नेषु वेदान्तेष्वभ्यासस्य भेदानाधकत्वं निरूपयता। तत्र पठितो भेदकप्रकारोऽत्र पठ्यते। पुनः पठनमध्येतृभेदनिमित्तकम्। पुनरुक्तमन्यार्थम्, न विद्याभेदकम्। अन्यानि अन्यार्थम्। तदसिद्धमपीति पुनरुक्तेरसिद्धमपि कथ्यते। 'शाखाभेद पुनरुक्तमिति' इति रत्नप्रभा। अन्यथासिद्धत्वाद्धेतुत्वेनासिद्धः। काठकादिनामभेदो ग्रन्थभेदगामी। विद्यानामभेदस्यैवोक्तेः। धर्मभेदः शिरोव्रतादिधर्मभेदः। अध्ययनाङ्गं तन्त्रं न विद्याङ्गं वदन्ति तद्धर्मं न विद्यागामि। विद्याधर्मत्वेन तदसिद्धम्। स्वाध्यायाङ्गं तत्। स्वमध्यायः स्वाध्यायः। स्वशाखाध्ययनं विधीयते 'स्वाध्यायोऽध्येतव्यः' इति स्वाध्यायनः। अध्ययनधर्माः स्वाध्याय स्वशाखाधर्माः 'स्वाध्यायस्य तथात्वेन' इति सूत्रोक्तमिह ज्ञेयम्। आथर्वणिकानां च शिरोव्रताचाराध्ययनमेतेषाम्। तेषामेव मुण्डकं स्वशाखा स्वाध्यायो नेतरेषाम्। 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्' इति वाक्ये ब्रह्मविद्यामिति पदे विद्यापदस्य वेदरूपग्रन्थवाचकत्वं, न विज्ञानवाचकत्वम्। एतं ब्रह्मप्रतिपादकत्वेन वेदमित्यर्थः। एतामिति श्रुतिपदेन प्रकृता वेदशाखाऽभिप्रेयते॥

वेदान्तप्रत्ययरूपविज्ञानस्य आप्रायणमहरहः सादरं निरन्तरं निरतिशयप्रीत्याऽभ्यस्यमानस्य दर्शनपर्यवसायित्वं भवेत्। 'दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति' इति भाषितमावृत्त्यधिकरणे। 'तथा हि लोके गुरुमुपास्ते, राजानमुपास्त इति च यस्तात्पर्येण गुर्वादीननुवर्तते स एवमुच्यते। तथा ध्यायति प्रोषितनाथा पतिमिति यः निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा सैवमभिधीयते' इति च भाषितमुपास्तेरानन्दरूपत्वं प्रियतमविषयत्वं च। 'उपास्तिधियः' इत्यस्मिन् श्लोक उपास्तिपदेन भाष्यभाषितप्रियरूपत्वं ब्रह्मप्रत्ययानां द्योत्यते। ब्रह्मविषयो योगो ललितललितोत्तरोत्तरप्रीत्यातिशयनिष्पाद्योऽत्यर्थप्रियभगवदनुग्रहेण प्रयत्नलेशं विना स्वयं प्रवहेत्, क्षणे क्षणे चोपचयमियात्। अयं योगो न हठयोगः, न कर्कशः, किंतु ललितललित इति व्यज्यते ललितावृत्तवरणेन। 'प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्' इति गीतम्। ललितवृत्तं ब्रह्मोपासनम्; अत्र पदानां लालित्यं रसिकरञ्जकम्॥

निर्गुणविद्याचिन्ताऽप्यस्मिन् पादे क्रियत इति प्रदर्शितमेतत्पादपरिमलारम्भे—'अक्षरधियामित्यधिकरणे स्थूलत्वाद्यभावरूपगुणोपसंहारचिन्ता' इति। सर्ववेदान्तसूत्रे निर्गुणविद्यैक्यप्रतिज्ञाप्रदर्शनं कार्यमेव। 'आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते। यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः' इति भाष्यारम्भकृतप्रतिज्ञानुरोधेनात्रमन्त्सर्ववेदान्तसूत्र सर्वेषु वेदान्तेष्वात्मैकत्वविद्याप्रतिपत्तिप्रतिज्ञा संभाव्यैव। चोदनाद्यविशेषादिति हेतोर्विद्यैकत्वरूपसाध्यसमर्थकत्वं सुपपादं। 'ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्'। निर्विशेषत्वेनावबोधो ब्रह्मचोदनालभ्यः। चोदनादीनामविशेषात्, अविशेषत्वात् निर्विशेषत्वात्। फलं निर्विशेषम्, रूपं निर्विशेषम्, चोदना निर्विशेषा निर्विशेषकेवलावबोधमाद्य-

जानिका। निर्विशेषमिति समाख्या ब्रह्मणः। निर्गुणविद्यायाः निर्विशेषसमाख्या। इत्थं चतुर्णामप्यविशेषत्वहेतुना सर्वनिर्गुणविद्यानामेक्यं प्रतिपाद्यते। 'अरूपवदेव हि तत्प्रधानत्वात्'। अरूपत्वमेवास्य चिन्तनीयस्वरूपम्। रूपराहित्यमविशेषत्वं फलं। 'विद्वान नामरूपाद्विमुक्तः' इति फलश्रुतिः। निष्प्रकारकं ज्ञानमज्ञातज्ञापकब्रह्मचोदनाविषयम्॥

॥ उपसंहाराधिकरणम् ॥

विद्यैक्येऽपि न कार्यः शाखान्तरगतगुणोपसंहारः।
व्यावर्तनाच्छ्रुतगुणैस्तत्क्रमभङ्गादशक्तेश्च॥ (ब्र. सू. ३-३-२.)

अयं पूर्वपक्षश्लोकः। पूर्वं साधितस्यैकविद्यस्य प्रयोजनाभावशङ्कयाऽऽक्षेपः। शाखान्तरगुणोपसंहारः सिद्धान्त्यभिमतं प्रयोजनम्; तन्निरस्यते: शाखान्तरगतगुणोपसंहारो न कार्यः, श्रुतगुणैर्व्यावर्तनात्, तत्क्रमभङ्गात्, अशक्तेश्चेति हेतुत्रयेणाकार्यत्वसाधनमिष्यते पूर्वपक्षिणा। उपसंहार इति सूत्रपदं पक्षसमर्पकम्। सौत्रोपसंहारपदस्य शाखान्तरगतगुणोपसंहार इत्यर्थः प्रदर्श्यते श्लोके। पूर्वार्धं प्रतिज्ञावाक्यम्। उत्तरार्धं हेतुप्रदर्शकम्। 'श्रुतगुणैर्व्यावर्तनात्' इति प्रथमहेतुः। पाठतगुणानां परिसंख्याशक्त्या इतरनिवृत्तिफलकत्वमाभिमन्यते। 'इह तु शाखान्तरे कतिपयाङ्गविधानं तानि विधत्ते नेतराणि परिचष्टे' इति भामतीसिद्धान्तवाक्येनेतरनिवृत्तिफलकपरिसंख्याशक्त्याऽऽक्षेपः क्रियते पूर्वपक्षिणेति गम्यते। 'अनेन गृहमेधीयपूर्वपक्षगतपरिसंख्यापक्षोऽपि व्युदस्तः' इति कल्पतरूक्तमपीह भाव्यम्। 'तत्क्रमभङ्गात्' इति द्वितीयहेतुः। गुणपाठक्रमो नैकरूपः। क्रमभङ्गो भवेच्छाखान्तरगुणोपसंहारे। श्रुतपाठक्रमभङ्गो न न्याय्यः। 'अशक्तेश्च' इति तृतीयहेतुः। सर्वाः शाखा अधीत्य ततस्ततः सर्वगुणोपसंहारस्याशक्यत्वादिति हेतुः। 'न ह्येकः पुरुषः सर्ववेदान्तप्रत्ययात्मिकामुपासनामुपसंहर्तुं शक्नोति, सर्ववेदान्ताध्ययनासामर्थ्यात्। प्रतिशाखं भेदे तूपासनानां नायं दोषः' इति भामती॥

तेऽर्थाभेदाद्वाक्यैरुपयन्तः प्रापकैः श्रुतैर्विधिभिः।
न निवर्त्याः क्रमसहितैर्नाशक्तिस्तद्धेऽप्येतुः॥

सिद्धान्तश्लोकोऽयं। ते शाखान्तरश्रुता गुणा न निवर्त्याः, किं तूपसंहार्याः। गुणाः पक्षीक्रियन्ते, उपासनेषूपास्यात्यर्थप्रियब्रह्मगुणानां परमादरणीयत्वद्योतनाय। 'बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते' इति कोसला जनाः। न निवर्त्या इति निषेधनिषेधरूपेण निवृत्तिनिषेधेन प्रतिज्ञादार्ढ्यं गुणनिवृत्तिपूर्वपक्षनिरासश्च द्योत्येते। 'तुल्यधीबद्धा गुणा विषयास्ते किं यथाश्रुति व्यवतिष्ठेरन्नुत प्रत्यभिज्ञया ज्ञानोपाधावुपसंहियेरन् इति मीमांसा' इत्यानन्दगिर्युक्तमनुसृत्यात्र 'ते' इति पठ्यत इव। 'अर्थाभेदात्' इति सौत्रहेतुरुपादीयते श्लोके। अर्थः प्रयोजनम्। प्रयोजनं च विद्योपकारकत्वम्। 'विधिशेषवत्' इत्येतदधिकरणसूत्रखण्डेन पूर्वकाण्डदृष्टान्तः प्रदर्श्यते। 'यथा हि विधिशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादिकर्म सर्वत्रेत्यर्थाभेदाद्

पसंहरणमेवमिहापि' इति भाष्यमपीह भाव्यम्। तत्र तदेवेतिवदत्र ते इति पठ्यते। ते इति पुरोवादरूपप्रापकवाक्यसिद्धत्वं द्योत्यते। पुरोवादश्रुतप्रत्यभिज्ञान द्योत्यते ते इति। पुरोवादपठित-प्रधानैक्यप्रत्यभिज्ञयैकवाक्यत्वे सिद्धे न क्रमभङ्गादिना प्रधानपदार्थभेदः शङ्कनीयः। पदार्थधर्ममात्रं क्रमः। विद्या प्रधानपदार्थो धर्मी। गुणवती विद्या प्रधानभूता। प्रापकानि वाक्यानि पुरोवाद-वाक्यानि। 'यस्त्वेतमेव प्रादेशमात्रमभिविमानं वैश्वानरमुपास्ते' इति छान्दोग्यवैश्वानरवाक्ये सिद्धवदुपादानं वाजसनेयके प्रादेशमात्रसंपादनस्यावगमकं पुरोवादमाश्रयति। पुरोवादवाक्य-गता गुणा अनुवादवाक्ये उपयन्ति उपगच्छन्ति॥

'श्रुतैर्विधिभिर्गुणिनः प्रधानस्य गुणा गुणिना सह स्वत उपयन्ति। सर्वशाखासु विद्यैक्ये सिद्धे गुण्याकृष्टगुणानामुपसंहारसिद्धिः' इति कल्पतरुः। गुणिना प्रधानेन गुणा आकृष्यन्ते। गुणा उपा-सकचित्तमाकर्षन्ति। गुणी गुणानाकर्षति। विहिता गुणा नेतरनिवृत्तिफलका भवितुमर्हन्ति। पठितगुणविधानमेवाश्रयितुं न्याय्यम्। भाषितं च समानाधिकरणे—'ननु पौनरुक्त्यप्रसङ्गाद्विद्या-भेदोऽध्यवसितः। नेत्युच्यते। अर्थविभागोपपत्तेः। एकं ह्याम्नानं विद्याविधानार्थमपर गुणविधा-नार्थमिति न किंचिन्नोपपद्यते इति। स्थलान्तरोक्तविद्याविधिमनूद्य गुणा विधीयन्त इत्यर्थः। 'समान एवं चाभेदात्' इति सूत्रस्य भाष्ये 'यथा भिन्नासु शाखासु विद्यैक्यं गुणोपसंहारश्च भवति, एव-मेकस्यामपि शाखायां भवितुमर्हति, उपास्याभेदात्। तदेव हि ब्रह्म मनोमयत्वादिगुणकमुभयत्राप्यु-पास्यमभिन्नं प्रत्यभिजानीमः। उपास्य च रूपं विद्यायाः। न च विद्यमाने रूपाभेदे विद्याभेदमध्य-वसातुं शक्नुमः। नापि विद्याऽभेदे गुणव्यवस्थानम्' इति भाषितं। तदधिकरणे नयमञ्जरीसिद्धा-न्तश्लोके गीतम्—'तदितरगुणमात्रमस्मिन्विधेयं विधेर्लाघवस्थापि सिद्धेर्जरीगृह्यते' इति। 'विधि-शेषवत्समाने च' इत्येतदधिकरणसूत्रे पठ्यते। अस्यैव तु प्रयोजनसूत्रस्य प्रपञ्चः सर्वाभेदादित्यारभ्य भविष्यतीत्येतदधिकरणान्ते भाषितम्। 'श्रुतैर्विधिभिर्न निवर्त्याः'। श्रुतैर्गुणविधिभिर्नाश्रुतगुणव्या-वर्तनं न्याय्यम्। परिसंख्यादोषाः स्मार्यन्ते। 'प्रापकैर्वाक्यैरुपयन्तः'। पुरोवादवाक्यविहितविद्यया सहायान्तो गुणाः क्रमसहितैर्विधिभिर्न निवर्त्याः। पदार्थधर्मः क्रमः। धर्मापेक्षया धर्मिणः प्राबल्यम्। न क्रमानुरोधेन विद्यारूपपदार्थः परित्यक्तव्यो भवेत्। किं च, गुणा गुणिनि ब्रह्मणि युगपत्पतन्ति। अरुणाधिकरणन्यायः स्मर्तव्यः। न तत्र क्रमस्यावकाशः। क्रमसहितैरित्यनेन क्रमस्य पदार्थधर्मत्वेन पदार्थापेक्षयाऽप्राधान्यं द्योत्यते। न गुणानां परस्परान्वयः। 'प्रधानप्रत्यभिज्ञायां सर्वतद्धर्मप्रत्यभिज्ञानात्फलाविशेषाच्च व्यवस्थया श्रुतानामपि गुणानामेकज्ञानोपाधावुपसंहारः' इत्यानन्दगिरयः॥

'नाशक्तिस्तद्धहेऽध्येतुः'। अशक्तेश्चेति पूर्वपक्षहेतुर्निरस्यते नाशक्तिरिति। अध्येतुरिति पञ्चमी। शाखान्तरं यस्य स्वशाखा तस्मात्तदध्येतुः सकाशाद्ग्रहणं शक्यम्। शाखान्तरस्याध्ययने स्वस्याशक्तिर्भवतु नाम। तदधीतवत एतन्मात्रग्रहणे नाशक्तिरिति भावः। अत्र वृत्तं पठ्यार्या। ब्रह्मप्रापणे विद्या पन्थाः। न विद्यातोऽन्यः पन्था अयनाय विद्यते। आर्या महाभागा विद्या। उपसंहृतापेक्षितसर्वगुणा विद्या॥

॥ मतं तत्प्रयोजनं च ॥

"ब्रह्मविद्या"

मतं हि नाम इष्यमाणम्, यत्सर्वैरिष्यते, यच्चादौ बद्धैकमत्यापादकं विबुधसार्वभौमैरङ्गीकृत सकललोकानुजिघृक्षुभिः, 'सर्वप्रमाणतत्त्वज्ञैः सद्भिर्लोकहिते रतैः। शास्त्रानुसारि निर्णीतं यत्तन्मतमुदाहृतम् ॥' इत्यादिना तथैव विवरणात्। इदं च प्रतिपूरुषं बुद्धिवैचित्र्येण भिन्नम्। तत्र च यदवलम्बनेन सर्वैकमत्यादि सिध्येत्तच्चेदवलम्ब्यते सुखमेव तेन भविष्यति। तत्र च मतेन महत्प्रत्यक्षं प्रयोजनत्रयम्, परोक्षं च महदेकम्। आन्तरगलिकमविनाभूतमन्यत्। तत्र तावत्प्रत्यक्षम्— ऐकमत्यम्, पापाद्वयम्, राज्यस्थितिश्च; परोक्षं निरतिशयपरमानन्दावाप्तिः। तत्रैकमत्येन विना सर्वेषामप्यसिद्ध्या काङ्क्षणीयं तदादौ। ऐकमत्यं ह्येकमतीभावः, तत्र मतं परमकारणम्। यथा— इहत्यः कश्चिदुत्तराहिं प्रस्थितः तत्रत्यं कंचिच्चेत्स्वमतस्थमुपलभते, तेनैव सहाश्नाति, तस्मिन्विश्वसिति, स चैनमाद्रियते। दृष्टमेवैतदन्यत्र। प्रभवति नापरोऽत्र हेतुर्विना मतात्। अथ तावेकमतीभवतः। क्षणेन चास्य महान् जायते परिचयो मतसाधर्म्यात्। यद्यप्यर्वाचीनेषु अनैकमत्यमात्रसाराणि सन्ति मतानि, नेदानीं तानि लक्ष्यपदवीमधिरोढुमर्हन्ति। यतस्तेषा न मतत्वमपि तु मतभूमिकत्वमेव। तथा द्वितीयं फलं पापाद्भीतिः। आस्तिक्याज्जगदीश्वरास्तित्वनिर्णयेन तच्छासनानुसरणव्याजेन वा, स्वतः परहिंसापराङ्मुख्येन वा परहृदयतापात्पापाद्विरमन्ति। हेतुरिहाप्येतदेव, आस्तिक्यस्यैव तन्मूलहेतुत्वात्। अत एव प्रकटनास्तिकेष्वप्रामाणिकतयाऽविश्वास आधुनिकानामप्यवनिपतीनाम्। तृतीयं राज्यस्थितिः जनैकमत्यमात्रसाध्यति समधिगतसकलदेशवृत्तानामिदानींतनानामतिविशदम्। अन्ते च शास्त्रप्रामाण्यान्निरतिशयो महानन्दो हि मोक्षाभिधः परमः पुरुषार्थः। अथ च बहुष्वपि मतेषु बहुजनाभिमततया सर्वसामरस्यप्राधान्येन पुष्कलप्रयोजनप्रापणप्रवणतया बहोः कालात्पुराणमुनिगणपरिगृहीततया च श्रीमदद्वैतमतमेव मुख्यतो मतशब्दार्थो भवति। अद्वैतिनां चायमाशयः—लोके सर्वस्यापि शास्त्रस्य परमेश्वरप्रवर्तिततया सर्वेषां मतानां परस्परं विरोधेऽपि अस्मदृष्ट्या सर्वमधिकारिविशेषविषयतया प्रमाणमेव। लोके खलु नैकविधोऽधिकारी। अतो लोकतन्त्रनिर्वाहायापेक्ष्यन्त एव मतानि लौकायतिकादीन्यापि। यथा— सर्वतो बहिर्भावमापद्यमानं हि चित्तं नवनवविषयविषयीकरणप्रवणं न कंचित्सर्वदा व्यवतिष्ठते। अथ तादृशस्य चित्तस्य कथंचित्स्वाभिमुख्यीकरणमावश्यकमेव सर्वेषाम्। तत्र सर्वतो बहिर्मुखात्स्वभावकारणवादिनः स्फुटमेष वरीयान् शरीरात्मवादी चार्वाकः। व्यवतिष्ठते यदस्य चित्तं व्यस्तेभ्यो भूतेभ्यो व्यावृत्तं शरीरमात्रे। साधयत्यपि पुरुषार्थयुगमं अर्थं च कामं च। ज्ञानिनोऽप्यर्थकामयोः साधनेषु अनुकुर्वन्त्यस्यैवास्य मतम्। ततः शरीरव्यतिरिक्ते योगादिना सकलैश्वर्यसमवाप्तिस्वरूपयोग्ये जीवाख्ये ज्योतिषि धृतचित्ताः परहिंसापराङ्मुखाः बौद्धशासनानुसारिणः।

(क्रमशः)

भूर्जपत्रशुद्धपटहेमरजतादिपट्टतले लिखित्वा समाराधनम् । एतदेव कौलपूजेत्याहुर्वृद्धाः । तदुत्तरत्र स्फोर्यते । दहराकाशजं नाम हृदयाकाशचक्राकाशे चक्रस्य पूजनम् । इदमेव समयपूजेत्याहुः समयिनः । एतदप्युत्तरत्र स्फोर्यते । तत्र नवयोनिष्वधःस्थितशिवात्मकयोनिचतुष्कस्योपरि ऊर्ध्व-स्थितशक्त्यात्मकयोनिपञ्चकादधःप्रदेशस्य बैन्दवस्थानस्य नाम सुधासिन्धुरिति । 'बिन्दुस्थानं सुधासिन्धुः पञ्च योन्यः सुरद्रुमाः । तत्रैव नीपश्रेणी च तन्मध्ये मणिमण्टपम् ॥ तत्र चिन्तामणिकृतं देव्या मन्दिरमुत्तमम् । शिवात्मके महामञ्चे महेशानोपबर्हणे ॥ अतिरम्यतरे तत्र कशिपुश्च सदाशिवः । भूतकाश्च चतुष्पादा महेन्द्रश्च पतद्ग्रहः ॥ तत्रास्ते परमेशानी महात्रिपुरसुन्दरी । शिवाऽर्कमण्डलं भित्त्वा द्रावयन्तीन्दुमण्डलम् ॥ तदुद्भूतामृतस्यन्दिपरमानन्द-नन्दिता । कुलयोषित्कुलं त्यक्त्वा परं वर्षणमेत्य सा ॥' इति भैरवयामले वामकेश्वरमहातन्त्रे बहुरूपाष्टकविद्यायां कथितम् । 'देव्या मन्दिरमुत्तमम्' इत्यस्यार्थः—देवीमन्दिरं त्रयश्चत्वा-रिंशत्त्रिकोणात्मक श्रीचक्रमुच्यते । अत उक्तं 'शिवाकारे मञ्चे' इति । त्रिकोणात्मकश्रीचक्रस्य बैन्दवस्थानं प्रत्यङ्गत्वात्, बैन्दवस्थानस्य प्रधानत्वात्, प्रधाने गुणस्यान्तर्भावात् तदन्तर्भाव उक्त इति रहस्यम् । 'भूतकाः' इत्यस्यार्थः—भूतकाः भूत्याः द्रुहिणहरिरुद्रेश्वराः । एतच्च 'गतास्ते मञ्चत्वं द्रुहिण...' इत्यादिश्लोकव्याख्यानावसरे वक्ष्यते । 'शिवाऽर्कमण्डलं भित्त्वा' इत्यस्यायमर्थः—शिवा नाम शक्तिः कुण्डलिनी अर्कमण्डलं हृत्कमलोपरि स्थितं भित्त्वा भिन्नं कृत्वा अवयुत्य आच्छा-द्येत्यर्थः । अर्कमण्डलोपरि स्थितं ब्रह्मद्वारं पिधाय महस्रकमलान्तःस्थितमिन्दुमण्डलं दशति द्राव-यति । अत एव कुलयोषित् कुण्डलिनीशक्तिः कुलं कुलमार्गं सुषुम्नामार्गं त्यक्त्वा तत्रैवेन्दुमण्डले आस्थाय परं वर्षणं उत्कृष्टवर्षणं द्विसप्ततिसहस्रनाडीषु प्रवर्षणम् ; कृत्वेति शेषः । सा कुण्डलिनी पुनः स्वस्थानमेत्य स्वाधिष्ठानं प्राप्य स्वपितीति तात्पर्यम् । शिवाद्दीनां मञ्चत्वोपधानत्वपतद्ग्रहत्वा-वस्थापन्नत्वं कामरूपत्वाद्देवानामत्यन्तासन्नसेवार्थं घटते । इममेवार्थं संक्षेपेणोक्तवान्मदाशिवः—'सुधाब्धौ नन्दनोद्याने रत्नमण्टपमध्यगाम् । बालार्कमण्डलाभासां चतुर्बाहां त्रिलोचनाम् ॥ पाशाङ्कुशशरांश्चापं धारयन्तीं शिवां श्रियम् । ध्यात्वा च हृद्गतं चक्रं व्रतस्थः परमेश्वरीम् ॥ पूर्वोक्तध्यानयोगेन चिन्तयन् जपमाचरेत् ।' इति । अनेन 'कणत्काञ्चीदामा' इति, 'सुधासिन्धो-र्मध्ये' इति श्लोकद्वयमेकीकृत्य व्याख्यातमित्यवगन्तव्यम् ॥ ८ ॥

॥ सौभाग्यवर्धनी ॥

ध्यानमुक्तम् ; कुत्र ध्येयाऽहमित्यत आह—**सुधासिन्धोरिति** । अमृताम्बुधिमध्ये कल्पवृक्षवाटिका-वृते कदम्बोपवनयुते नवरत्नखचितद्वीपे चिन्तामणिघटितकुड्यस्तम्भप्राकारतोरणादिमण्डितगृहे शिवाकार-भाजि **मञ्चे**, सदाशिव एव मञ्चीभूत इत्यर्थः । तथा मञ्चचरणीभूतविधिहरिरुद्रेश्वरविलसिते मञ्चीभूते सदाशिवे परमासने परमशिवपर्यङ्कनिलयां परमशिवः गुणातीतः सकलप्रपञ्चसाक्षी सच्चिदानन्दसुन्दरः

त्वदपेक्षया पर्यङ्कता प्राप्त इत्यर्थः । तत्र निषण्णां त्वां धन्याः कतिपये पश्चिमजन्मानः चिदानन्दलहरीं परमां शिवाविनाभूतां भजन्ति । तदुक्तं रुद्रयामले—'यस्य नो पश्चिमं जन्म न स्वय यो महेश्वरः । स न प्राप्नोति परमां दशपञ्चाक्षरीमिमाम्' ॥ इति । अनेन ध्यानयोगेन भजतो जन्ममरणदुःखाम्बुधेरुन्मज्जनं भवतीति भावः । शिव एकारः एकादशस्वरः ; तेन त्रिकोणं, परमशिवो बिन्दुः तन्निलयां श्रीचक्रान्तर्गत-त्रिकोणमध्यबिन्दुनिलयां धन्या भजन्तीति सांप्रदायिकार्थो गुरुगम्यः ॥ ८ ॥

॥ अरुणामोदिनी ॥

एवं ध्यातव्यदेवतास्वरूपमभिधाय ध्यानप्रणालीमुपदिशति— सुधासिन्धोरिति । हे देवि, सुधासिन्धोरमृताब्धेर्मध्ये मध्यभागे, तत्र च सुरविटपिनां कल्पतरूणां वाटीभिः शाखाभिः परिवृते परितः समन्ताद्वृते वेष्टिते, मणिद्वीपे वज्रवैडूर्यादिमाणिक्यखचितेऽन्तरीपे, तत्र च नीपैः कदम्बैरुपवनमारामोऽस्यास्तीति तस्मिन् । 'कदम्बवनवासिनीम्' इत्यादिप्रयोगाद्देव्याः कदम्बवनवास-रसिकत्वादिति भावः । चिन्तामणिभिश्चान्तितार्थप्रदैर्माणिक्यविशेषैर्निर्मिते गृहे सद्मनि । तत्र च शिवस्य पञ्चवक्त्रस्य महेशितुराकार इवाकारो यस्य तस्मिन्मञ्चे सिंहासने । परमशिवपर्यङ्क-निलयामितिकल्याणास्तरणनिवासिनीम्, चित्स्वरूपश्चासावानन्दश्च चिदानन्दो निरतिशयसुखम्, तस्य लहरीं प्रवाहरूपां त्वां भवतीं कतिचन केचिद्धन्याः सुकृतिनो भजन्ति सेवन्ते, कति न भजन्ति च, भजन्त्येवेति वाऽर्थः । प्रथम सुधासिन्धु निधाय तन्मध्ये कल्पवृक्षपरीतरत्नान्तरीप-संस्थितनीपोद्यानवनमध्यस्थरत्नमण्डपान्तः संस्थिते सिंहासनेऽतिकल्याणोपबर्हणोपरि संस्थितां चिदानन्दरूपिणीं देवीं कर्णादित्यादिश्लोकोक्तप्रकारेण ध्यायेदित्युपदेशः । तथा चोक्तम्—'सुधाब्धौ नन्दनोद्याने रत्नमण्डपमध्यगाम् । बालार्कमण्डलाभासां चतुर्बाहां त्रिलोचनाम् ॥ पाशाङ्कुशौ शरांश्चापं धारयन्तीं शिवां शिवाम् । ध्यात्वा च हृदये चक्रे व्रतस्थः परमेश्वरीम् । पूर्वोक्तध्यान-योगेन संचिन्त्य जपमाचरेत् ॥' इति । उक्तं चाचार्यैः—'सुधासिन्धुमध्ये मणिद्वीपरम्ये सुकल्पद्रुमा-कल्पकादम्बसत्रे । स्फुरत्स्वर्णसिंहासने रत्नपीठे भवाङ्के निषण्णा भजाम्यन्नपूर्णाम् ॥' इति । इति प्रातीतिकार्थः ॥

आगमरहस्यार्थस्तु—नवयोन्यात्मके श्रीचक्रे शिवात्मकयोनिचतुष्कस्योपरि शक्त्यात्मक-योनिपञ्चकस्याधःप्रदेशे वर्तमानस्य बिन्दुस्थानस्य सुधासिन्धुरिति नाम । तस्य मध्ये मध्यभागे सुरविटपिना कल्पसंतानहरिचन्दनमन्दारपारिजातरूपसुरतरुत्वेनागमोक्तानां पञ्चानां योनीनां वाटीभिर्वेष्टनैः । 'वेष्ट परिवेष्टने' इति धातुः । परिवृते व्याप्ते मणिद्वीपे मणिमयरत्नद्वीपवस्थिते नीपैः कदम्बैरुपवनवति, यद्वा नयन्ति चक्रस्वरूपामिति नीपा रेखाः, ता एवोपवनं तद्वति, चिन्ता-मणिनिर्मिते गृहे, पुष्यरागपद्मरागगोमेदवज्रवैडूर्यनीलमुक्तारत्नमरकतादिनिर्मितप्राकारानन्दवापि-कादिसहिते, शिवायाः शक्त्या आकारो रूपं यस्य तस्मिञ्छिवात्मके, यद्वा शिवा एकारस्तदात्मके त्रिकोण इत्यर्थः । मञ्चे ब्रह्मविष्णुरुद्रेश्वरपादसहितायां खट्वायाम्, परमश्चासौ शिवश्च परमशिवः सदाशिवः, स एव पर्यङ्कोऽवसक्थिका कशिपुरित्यर्थः । स निलयो यस्यास्ताम्,

तत्र नित्यनिवासिनीमित्यर्थः । चिदानन्दलहरीं ज्ञानानन्दप्रवाहिनीं त्वाम्, भक्ताभीष्टदात्रीं भवतीमित्यर्थः । कतिचन केचिद्धन्याः सुकृतिनो हरिहरादयो भजन्ति सेवन्ते, हरिहरब्रह्मेन्द्ररुद्रा भूतकत्वमिन्द्रश्च पतङ्गहता च प्राप्य नित्यं भवतीमेव सेवन्त इत्यर्थः । तदुक्तं भैरवयामले वामकेश्वरतन्त्रे—'बिन्दुस्थानं सुधामिन्धुः पञ्च योन्यः सुरद्रुमाः । तत्रैव नीपश्रेणी च तन्मध्ये मणिमण्डपम् । तत्र चिन्तामणिकृतं देव्या मन्दिरमुत्तमम् । शिवात्मके महामञ्चे महेशानोपबर्हिणि । अतिरम्यतले तत्र कशिपुश्च सदाशिवः । भूतकाश्च चतुष्पादा महेन्द्रश्च पतङ्गहः । तत्रास्ते परमेशानी महात्रिपुरसुन्दरी । शिवाऽर्कमण्डलं भित्त्वा द्रावयन्तीन्दुमण्डलम् । तनूद्भूतामृतस्यन्दिपरमानन्दनन्दिता । कुलयोषित्कुलं त्यक्त्वा परं पुरुषमेति सा ॥' इति । इत्यागमरहस्यार्थः ॥

ग्रन्थपरार्थोऽपि प्रतीयते—हे देवि, सुरा देवा एव विटपिनः कल्पतरवः, इष्टार्थदातृत्वात् । तेषां वाटीभिः स्थलविशेषैः परिवृते, श्रीशैलादितत्तत्प्रसिद्धदेवनास्थलचिह्नित इत्यर्थः । मणिमया द्वीपा यस्मिंस्तत्तदुपासनयोग्यस्थलसहित इत्यर्थः । नीपोपवनवति कदम्बवनयुक्ते, चिन्तामणिनिर्मितानि गृहाणि देवालयानि यस्मिंस्तस्मिन् । सुधाशब्देन सुष्ठु दधाति भुवनमिति व्युत्पत्त्या सुधावदतिधवलत्वाद्वा सुधा इत्यनेन हिमाचल उच्यते । तथा च सुधामारभ्या सिन्धोः सिन्धुपर्यन्तं हिमाचलमारभ्य सेतुपर्यन्तं मध्यदेशे शिवाकारे अतिधवलत्वात्स्फटिकमणिमयतया शिवसदृशे मञ्च्यत इति मञ्चे पूज्ये कैलास इत्यर्थः । परमशिवः सदाशिवः, यद्वा परौ च तौ शिवौ च परमशिवौ, तस्य तयोर्वा पर्यङ्क उत्सङ्गो निलयो यस्यास्तां, पार्वतीपरमेश्वराभ्यामङ्के निधायानुगृहीतामित्यर्थः । अत एव भगवत्पादाः स्तोत्रमेतद्विधाय कैलासं गत्वा तत्रैतामेव स्तुतिं पार्वतीपरमेश्वरसमीपे पठ्यमानां दृष्टवन्त इति प्रसिद्धिः । चिच्छक्तेर्देव्याः प्रतिपादिकामानन्दलहरीं तदभिधेयां त्वां प्रबन्धमित्यर्थः । यद्वा, चनचितां प्रत्येकाव्ययत्वे आनन्दलहरीं प्रबन्धं, त्वां च कतिचिद्धन्या न भजन्तीति काकुः । भजन्त्येवेत्यर्थः । इति ग्रन्थमहत्ताप्रतिपादकार्थः ॥

अथ च सुष्ठु राजते प्रकाशत इति सुरो जीवः; स एव विटपी, आपादमस्तकं विस्तीर्य वर्तमानत्वात्तस्य वाट्या वेष्टनेन परितो वृते धृते; तदभावे देहस्थित्यभावात् । किं च, मणिमया मणिवत्प्रकाशमानाः द्वीपाः देवतानिवासस्थानत्वाद्द्वीपतुल्या मूलाधारादिस्थानविशेषाः । यद्वा, मणिरूपा द्वीपाः शिवेन स्वनिवासस्थानतया विष्णु प्रति कथिताः ब्रह्मरन्ध्रमुखचक्षुःश्रोत्रगण्डोष्ठदन्तमूर्धहस्तपादादिसंधिपार्श्वनाभिहृद्व्याद्यो यस्मिंस्तस्मिन् । नयन्ति शरीरं गमनागमनव्यापारैरिति नीपाः प्राणापानव्यानोदानसमानाख्या मुख्यप्राणाः, नागकूर्मकृकरदेवदत्तधनंजयोपप्राणाश्च; नितरां पाति शरीरमिति वा नीपाः पूर्वोक्ता इन्द्रियाधिष्ठानदेवताश्च, तैरुपवनवति उद्यानवनयुक्ते । संकल्पविकल्पात्मकत्वात् चिन्तारूपं आत्माधिष्ठानत्वान्मणिवत्प्रकाशमानत्वान्मणिरूपं च गृहं गुहात्वेनोपनिषद्भिर्निरुक्तं हृदयपुण्डरीकं यस्मिंस्तस्मिन् । यद्वा, चिन्तामणीनामिष्टार्थवितरणप्रवणतया चिन्तामणिरूपाणाम् । 'श्रीपर्वतः शिरःस्थाने केदारस्तु ललाटके । वाराणसी महाप्राज्ञा भ्रुवोर्घ्राणस्य मध्यमे ॥ भ्रुवोर्घ्राणस्य यः संधिरिति जाबालिका श्रुतिः । कुरुक्षेत्रं कुचस्थाने प्रयागो हृत्सरोरुहे ॥ चिदम्बरं तु हृन्मध्यमाधारः कमलालयः ।' इति पुराणोक्तानां श्रीपर्वतादीनां पुण्यक्षेत्राणां गृहे निवासस्थाने शिवाकारे सकल-

देवतावासत्वात् शिवात्मके, अत एव मञ्च पूज्ये तदात्मतया भावनार्हे इत्यर्थः। सुष्ठु दधाति शरीरमिति सुधः, मूलाधारः पादेन्द्रियं वा, उभयाभावे शरीरधारणाभावात्। आ समन्तात्सेधति स्रवति नाडीमार्गमिति आसिन्धुः, शिरःस्थितश्चन्द्रः; सुधसहितस्य आसिन्धोः पादशिरसोर्मध्ये मध्यभागे परमशिवः अतिकल्याणरूपमनाहतं चक्रम्, तदेव पर्यङ्कः स निलयो यस्यास्तां नित्यं हृत्कमलवासिनीं चिदानन्दलहरीं त्वा कतिचनाध्यात्मे सेवन्त इति प्रतिपाद्यप्रतिपादकसंवलितार्थः ॥ ८ ॥

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ ९ ॥

॥ लक्ष्मीधरा ॥

महीं पृथिवीतत्त्वं मूलाधारे मूले गुदस्थाने सर्वाधारभूतं चक्रं मूलाधारभूतमिति, तस्मिन् मूलाधारे। 'सर्वाधारा मही यस्मान्मूलाधारतया स्थिता। तदभावे तु देहस्य पातः स्यादुद्रमोऽपि वा॥' इति रुद्ररहस्ये। पृथिवीतत्त्वात्मकस्य मूलाधारस्याभावे देह ऊर्ध्वं वा गच्छेत्, अधो वा पतेदित्यर्थः। कं उदकतत्त्वम्। अपिशब्दः स्वाधिष्ठानोक्तवह्निं समुच्चिनोति। मणिपूरे मणिपूरचक्रे। यत्र स्थिता भगवती मणिभिः तत्प्रदेशं पूरयति, स देशो मणिपूरः। समयिनां आन्तरपूजावसरे तृतीयकमले नानाविधमणिगणखचितभूषणार्पणं देव्याः कर्तव्यमिति रहस्यम्। हुतवहं अग्नितत्त्वम्। स्थितं प्रतिष्ठितं स्वाधिष्ठाने स्वाधिष्ठाननामके चक्रे। कुण्डलिन्याः भगवत्याः स्वयमधिष्ठाय ग्रन्थिं कृत्वा अवस्थानं स्वाधिष्ठानम्। यथोक्तं योगदीपिकायाम्— 'रुद्रग्रन्थिरयम् शक्तेः स्वाधिष्ठानाग्रवर्तिनि' इति। यद्यपि आधारचक्रस्योपरि स्वाधिष्ठानं वर्णनीयम्, तथाऽपि आकाशादितत्त्वोत्पत्तिक्रममवलम्ब्य व्युत्क्रमेण मणिपूरचक्रवर्णनं कृतमित्यनुसंधेयम्। एतच्च 'तवाज्ञाचक्रस्थम्' इत्यादिश्लोकषट्कव्याख्यानावसरे सम्यगुपवर्णितम्। हृदि हृदयाकाशे अनाहतनामनि चक्रे। अनाहतनादस्थानत्वात् अनाहतं नामास्य। मरुतं मरुत्तत्त्वम्। आकाशं आकाशतत्त्वम्, उपरि पूर्वोक्तानामुपरि विशुद्धिचक्रे। शुद्धस्फटिकसंकाशत्वात् विशुद्धिर्नामास्य। मनः मनस्तत्त्वम्। अपिशब्दः उक्तसमुच्चयार्थः। भ्रूमध्ये भ्रुवोरन्तराले आज्ञाचक्रे। अत्र आङीषदर्थः, ज्ञा ज्ञानम्, ईषत् ज्ञानं यत्र जायते साधकानां भगवतीविषयम्। ब्रह्मग्रन्थिभेदनातिव्यग्रतया भगवत्याः आज्ञाचक्रे क्षणमात्रावस्थानात् साधकानां तटिल्लेखारूपेण अवभासनात् आज्ञाचक्रं नामास्य। स्थितमिति लिङ्गव्यत्ययेन सर्वत्रानुषज्यते। सकलं

सर्वम् । अपि समुच्चये भित्त्वा कुलपथं सुषुम्नामार्गम् । सहस्रारे महस्रदले पद्मे कमले सह मिलित्वा रहसि एकान्ते पत्या सदाशिवेन विहरसे क्रीडसे ॥

अत्रेत्थं पदयोजना—हे भगवति, मूलाधारे महीं, कं मणिपूरे हुतवहमपि, स्वाधिष्ठाने हुतवहमेव, हृदि मरुत आकाशमुपरि, मनोऽपि भ्रूमध्ये आकाशमपि, स्थितमिति विभक्तिव्यत्ययेन सर्वत्रानुषज्यते । सकलं कुलपथमपि भित्त्वा सहस्रारे पद्मे रहसि पत्या सह विहरसे ॥

अत्रेदमनुसंधेयम्—मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञात्मकानि षट् चक्राणि । एतानि पृथिव्यग्निजलपवनाकाशमनस्तत्त्वात्मकानि । तानि तत्त्वानि तेषु चक्रेषु तन्मात्रतयाऽवस्थितानि । तन्मात्रास्तु गन्धरूपरसस्पर्शशब्दात्मकाः । आज्ञाचक्रस्थितेन मनस्तत्त्वेन एकादशेन्द्रियगणः संगृहीतः । एवमेकविंशतितत्त्वानि प्रतिपादितानि । पत्या सह रहसि सहस्रपत्रे विहरसे इत्यनेन तत्त्वचतुष्टयं सूचितम् । तच्च मायाशुद्धविद्यामहेश्वरसदाशिवात्मकं तत्त्वचतुष्टयम् । एवं मिलित्वा पञ्चविंशतितत्त्वानि मायापर्यन्तानि मायया युक्तत्वात् प्राकृतानि । माया महेश्वरेण संयुक्ता सती तस्य जीवभावमापादयति । स जीवः प्राकृत एव । शुद्धविद्या तु सदाशिवेन युक्ता सती सादाख्या कलेति व्यवह्रियते । अतो भगवती चतुर्विंशतितत्त्वान्यतिक्रान्ता सदाशिवेन पञ्चविंशेन सार्धं विहरमाणा षड्विंशतत्त्वत्वमापन्ना परमात्मेति गीयते । एतदुक्तं भवति—सादाख्या कला पञ्चविंशेन सदाशिवेन मिलिता षड्विंशा भवति, मेलनस्य तत्त्वान्तरत्वात् । न चोभयोर्मेलनमुभयात्मकम् । तस्य तादात्म्यरूपत्वात् तत्त्वान्तरमेवेति रहस्यम् । यत्तु श्रुतिवाक्यम्—'पञ्चविंश आत्मा भवति' (वै. ब्रा. १. २. ६.) इति, तत्तु सदाशिवतत्त्वप्रतिपादनपरम्, न मेलनपरमिति ध्येयम् । ननु (कथं) बैन्दवस्थानं श्रीचक्रस्य मध्यस्थितम्, शिवचक्राणां चतुर्णामुपरि शक्तिचक्राणां पञ्चानामधस्तादवस्थितत्वात् । सहस्रारपद्मस्य तु शिरःस्थितत्वात् सर्वेषामुपरि वर्तमानत्वात्, तस्य बैन्दवस्थानत्वं नोपपद्यत इति चेत्, निशम्यतां भागवतमतरहस्यम्—'चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः । शिवशक्तिमयं ज्ञेयं श्रीचक्रं शिवयोर्वपुः ॥' इत्यादौ शक्तिचक्राणि त्रिकोणाष्टकोणदशारद्वितयचतुर्दशकोणात्मकानि पञ्च चक्राणि । शिवचक्राणि तु अष्टदलषोडशदलमेखलात्रितयभूपुरत्रयात्मकानीति । अतः शक्तिचक्राणां बाह्यतः शिवचक्राणि । शिवस्य शक्तिबाह्यत्वायोगात् तानि शिवचक्राणि बिन्दुरूपेणाकृष्य शक्तिचक्रान्तरे स्थापितानि । अत एव बिन्दुः शिवचक्रचतुष्टयात्मकः शक्तिचक्रेषु पञ्चसु व्यश्नुवानः समाप्त इति शिवशक्त्योरैक्यमिति केचित् ॥

अन्ये तु—बिन्दुत्रिकोणयोरैक्यं, अष्टकोणाष्टदलाम्बुजयोः, दशारयुग्मषोडशदलाम्बुजयोः, चतुर्दशारभूपुरयोरैक्यम् । अनेन प्रकारेण शिवशक्त्योरैक्यमित्याहुः । अत्र बिन्दुशब्देन शिवचक्रचतुष्टयप्रतिनिधिभूतो वर्तुलाकारो लक्ष्यते, न तु चतुष्कोणमध्यवर्ती बिन्दुः । न तु सहस्रकमलान्त-

र्गतः आधारस्वाधिष्ठानदशदलप्रकृतिभूतः शिवशक्तिमेलनाविष्टतनुः सादाख्यं षड्विंशं तत्त्वम् । तेन सह नादबिन्दुकलानामैक्यं नास्ति, तस्य नादबिन्दुकलातीतत्वात् । एतच्च पुरस्तात्प्रपञ्चयिष्यते। अत एव सहस्रकमलान्तर्गतचन्द्रमण्डलमध्यवर्ती सुधासिन्धुरेव भगवत्या विहरणस्थानमिति 'सहस्रारे पद्मे सह रहसि पत्या विहरसे' इति 'सुधासिन्धोर्मध्ये' इति श्लोकद्वयस्यैक एवार्थ इति रहस्यम्। इममेवार्थं भैरवयामले चन्द्रज्ञानविद्यायां शिव आह पार्वतीम्—'चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः । नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपु ॥ त्रिकोणमष्टकोणं च दशकोणद्वयं तथा । चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥ बिन्दुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकम् । चतुरश्रं च चत्वारि शिवचक्राण्यनुक्रमात् ॥ त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुजम् । दशारयोः षोडशारं भूगृहं भुवनाश्रके ॥ शैवानामपि शाक्तानां चक्राणां च परस्परम् । अविनाभावसंबन्धं यो जानाति स चक्रवित् ॥ त्रिकोणमष्टकोणं च दशकोणद्वयं तथा । मनुकोणं चतुष्कोण कोणचक्राणि षट् क्रमात् ॥ मूलाधारं तथा स्वाधिष्ठानं च मणिपूरकम् । अनाहतं विशुद्धयाख्यमाज्ञाचक्रं विदुर्बुधाः ॥ तवाधारस्वरूपाणि कोणचक्राणि पार्वति । त्रिकोणरूपिणी शक्तिः बिन्दुरूपः शिवः स्मृतः ॥ अविनाभावसंबन्धस्तस्माद्बिन्दुत्रिकोणयोः ।' इति । इतः पूर्वम्—'अधोमुखं चतुष्कोणं शिवचक्रात्मकं विदुः' इत्यनुसारेण 'अधोमुखानि चत्वारि त्रिकोणानि शिवात्मकानि' इत्युक्तिः 'शिवचक्राणि बाह्यानि तद्रूपेणावस्थितानि' इत्येवंपरेति ध्येयम् ॥

यद्वा, कौलमतानुसारेण अधोमुखानि चत्वारि त्रिकोणानि शिवात्मकानि, ऊर्ध्वमुखानि पञ्च त्रिकोणानि शक्त्यात्मकानि । कौलमते संहारक्रमेण लेखने नवत्रिकोणात्मकं श्रीचक्रम् । एतत्सर्वं 'चतुर्भिः श्रीकण्ठैः' इत्यादिश्लोकव्याख्यानावसरे वक्तव्यमपि 'सहस्रारे पद्मे सह रहसि पत्या विहरसे' इत्यत्रावश्यं वक्तव्यत्वात् उभयोपयोगितया अत्रैव किंचित्कथितम् । विस्तरस्तु तत्रैवावधार्यः ॥ ९ ॥

॥ सौभाग्यवर्धनी ॥

ध्यानं त्रिविधम्—स्थूलं सूक्ष्मं परं चेति । कणत्काञ्चीदामेति स्थूलध्यानमुक्तम् । चिदानन्दलहरीमित्यनेन परं ध्यानमुक्तम् । इदानीं सूक्ष्मध्यानमाह—महीमिति ॥ षट् चक्राणि मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धयाज्ञाऽऽख्यानि क्रमेण पृथिव्यादिपञ्चमहाभूतानां मनसश्च स्थानानि । एतच्चक्रषट्कं कुलपथमित्युच्यते । तदुपरि शिरसि सहस्रदलमकुलपथमित्युच्यते । हे कुण्डलिनीस्वरूपे परमेश्वरि, महीं मूलाधारे भित्त्वा, चतुर्दलपद्म महीस्थानं भित्त्वेत्यर्थः । स्वाधिष्ठाने कं जलं भित्त्वा षड्दलं भित्त्वा, मणिपूरे हुतवहस्थितिं दशदलं भित्त्वा; अत्र व्यत्ययेन योजना, स्वाधिष्ठानमणिपूरकयोः शांभवमतानुसारेण संज्ञाव्यत्ययो वा । हृदि मरुतमनाहतं द्वादशदलं भित्त्वा, आकाशमुपरि कण्ठे विशुद्धयाख्यं षोडशदलं भित्त्वा, भ्रूमध्ये मानसस्थाने द्विदलं भित्त्वा; एतच्चक्रषट्कं कुलपथमित्युच्यते; अकुलपथे सहस्रारे सहस्रदले रहसि पत्या परमशिवेन सह विहरसे । एतावता एवं सूक्ष्मध्यानयोगेनोपास्यमाना भूमित्यागादियोगसिद्धि

दिशसि । सहस्रदलेन संयुज्यमाना निर्वाणपदवीं दिशसीति भावः । तदुक्तं रहस्यमिद्धिसोपाने—'कुण्डलिन्या महीभेदे योगी त्यजति मेदिनीम् । सलिलस्थानयोगेन जले चलति योगवित् ॥ वह्निभेदे जलमिव स्पृशत्यग्निं ज्वलच्छिखम् । मरुद्भेदे शीघ्रगतिर्याति क्रोशशतं क्षणात् ॥ व्योममेदे खे चरति मनोभेदे मनोगतिः । यत्र कामयते तत्र याति लोकत्रयेऽपि च ॥ संयोजयञ्छिवपदे शिव एव प्रजायते । कर्ता हर्ता च सर्वत्र सुरासुरनमस्कृतः ॥' इति । सूक्ष्मध्यानेन सूचित कुण्डलिन्या भूमिकात्रयमुन्नेयम् । भूमिका अन्वयभूमिका प्रत्यावृत्तिभूमिकेत्यनेन पद्येनोक्ता ॥ ९ ॥

॥ अरुणामोदिनी ॥

एवं ध्यानप्रणालीमुपदिश्य योगशास्त्रप्रसिद्धकुण्डलिनीरूपत्वेन भगवतीं स्तौति—महीमिति । हे देवि आ समन्ताद्धियते शरीरमनेनेति आधारः । मूले गुदस्थाने स्थित आधारः मूलाधारः । अथवा, मूलं सर्वेषां चक्राणामादिकारणम्; स चासावाधारश्च मूलाधारस्तस्मिन्, सर्वचक्राधारे चतुर्दलत्वेन कुण्डलिनीशक्तेर्नित्यनिवासत्वेन प्रसिद्धे मूलाधाराख्ये चक्रे, 'गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम् । अस्ति कुण्डलिनी ब्रह्मशक्तिराधारसंपुटे ॥ आब्रह्मरन्ध्रमृजुतां नीतेयममृतप्रदा ।' इति वचनात् । स्थितमिति नपुंसकस्य विभक्ति (लिङ्ग)विपरिणामेन सर्वत्रान्वयः । स्थितां तन्मात्रगन्धात्मना सूक्ष्मरूपेणावस्थितां महीं भुवं पृथिव्यप्तेजोवाय्वाकाशमनसामाद्य पृथिवीतत्त्वमित्यर्थः । मूलाधारे महीतत्त्वावस्थितिश्च रुद्ररहस्य उक्ता, 'सर्वाधारा मही यस्मान्मूलाधारतया स्थिता । तदभावे तु देहस्य पातः स्यादुद्गमोऽपि वा ॥' इति । तथा मणिभिर्नानारत्नैः पूर्यते भूष्यते देवी अत्रेति, मूलाधारादुत्थापिताया देव्या मणिपूरकचक्रे भूषणैर्भूष्यत्वादिति मणिपूरे नाभिसस्थे अन्वर्थनामनि दशदले चक्रे 'नाभौ दशदलं चक्रं मणिपूरकसञ्ज्ञितम्' इति वचनात् । स्थितम्, तन्मात्ररसात्मना सूक्ष्मरूपेणावस्थितं कं जलं तत्तत्त्वमित्यर्थः । तथा भगवत्याः शक्त्याः स्वयमात्मना सर्वाकारत्वेन ग्रन्थिं कृत्वा अधिष्ठीयत इति वा, सुष्ठु अधिष्ठीयत इति वा स्वाधिष्ठानं मूलाधारोपरितनं षड्दलमग्नितत्त्वात्मकं कमलम्; 'स्वाधिष्ठानं लिङ्गमूले षट्पत्रं च क्रमस्य च' इत्यागमात् । तस्मिन् स्थित रूपतन्मात्ररूपेण सूक्ष्मरूपेणावस्थितं हुतवहमग्नितत्त्वमित्यर्थः । अत्र यद्यपि, 'मूलाधारं तथा स्वाधिष्ठान च मणिपूरकम् । अनाहतं विशुद्धयाख्यमाज्ञाचक्रं विदुर्बुधाः ॥' इत्यागमान्तरपर्यालोचनया मूलाधारानन्तरं स्वाधिष्ठानमेव वक्तव्यम्, तथाऽपि 'आत्मन आकाशः संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी,' 'आपो वा अग्नेरायतनम्, 'अद्भ्योऽग्निर्ब्रह्मतः क्षत्रं पृथिव्यप्तेजोवाय्वाकाशः' इत्यादिश्रुतिसूत्रक्रममवलम्ब्य मणिपूरमुक्तवानिति ध्येयम् । किं चेदम्, 'तवाज्ञाचक्रस्थम्' इत्यादिश्लोकषट्कश्रौतक्रममवलम्ब्यावरोहणक्रमेणैव आत्माकाशमरुदग्निजलपृथिवीतत्त्वात्मकानि आज्ञाप्रभृतीनि कमलान्युपदिश्य ध्यानं निबध्नतां 'मनस्त्वं व्योम त्वम्' इति श्लोके, 'नरं' 'क्षितौ षट्पञ्चाशत्' इति श्लोके च तमेव क्रममुपदर्शयतां स्मृत्यपेक्षया श्रौतक्रमस्य प्राबल्यं प्रतिपादयतामाचार्याणामपि संमतमेवेत्यवगन्तव्यम् ॥

यत्तूक्तं रामकविना—नाभिलिङ्गमूलचक्रप्रसिद्धयोर्मणिपूरस्वाधिष्ठानशब्दयोः सामीप्यादन्योन्यपदवाच्यता मधुमाधवशब्दयोर्माधवमासयोरेवेति, तच्चिन्त्यम्, मूलाधारादिव्यवहारोच्छेदा-

पत्तेः, मध्वादिशब्दानां वसन्तमाधवयोः कोशाप्रसिद्धेश्चेति, 'आचार्यतात्पर्यमपि अस्मदुक्तानुसारि' इत्यनन्तरोक्तिश्च चिन्त्या। तथा हृदि हृदयाकाशसंस्थिते द्वादशदले केनाप्यनाहतत्वादनाहतमित्यन्वर्थनामनि चक्रे, 'हृदयेऽनाहतं चक्रं शिवस्य प्रणवाकृति। पूजास्थानं तदिच्छन्ति दलैर्द्वादशभिर्युतम्॥' इति वचनात्। स्थितं तन्मात्रस्पर्शरूपेण सूक्ष्मात्मनाऽवस्थितं मरुतं वायुतत्त्वम्। तथा उपरि अनाहतचक्रादूर्ध्वप्रदेशे स्वप्रकाशे षोडशदले शुद्धस्फटिकवर्णतया विशुद्धिरित्यन्वर्थनामनि कण्ठस्थिते कमले 'कण्ठे तु भारतीस्थानं विशुद्धिः षोडशच्छदम्' इति वचनात्। स्थितं तन्मात्रशब्दात्मना सूक्ष्मरूपेणावस्थितमाकाशतत्त्वं च। तथा भ्रुवोर्मध्यं तस्मिन् भ्रुवोरन्तरस्थद्विदले आज्ञीषज्ज्ञानं भगवतीविषयं साधकानां भवति क्षणमात्रावस्थायित्वाद्देव्यास्तत्रेति वा, आ समन्ताज्ज्ञायतेऽस्यामिति वाऽऽज्ञेत्यन्वर्थनामनि कमले, 'भ्रूमध्ये द्विदलं चक्रमाज्ञासंज्ञं प्रचक्षते' इति वचनात्। स्थितं मनो मनस्तत्त्वं चेति एतत्सकलं समस्तमपि मूलाधारादिचक्रस्थितपृथिव्यादिशब्दसंगृहीतानि भूततन्मात्रज्ञानेन्द्रियपञ्चकमनोमायाशुद्धविद्यामहेश्वरसदाशिवान्तं सर्वं तत्त्वजातं कमलद्विकद्विकोपरि स्थित रुद्रविष्णुब्रह्मनामकं ग्रन्थित्रयं चेति तत्सर्वमित्यर्थः। कुलपथं सुषुम्नामार्गम्। षट् चक्राणि कुलपथमुच्यत इति केचित्। भित्त्वा साधककौशलवशादुत्थापिता भुजङ्गरूपा बिसतन्तुनिभा स्वयं सग्रन्थीनि षट् कमलानि निर्भिद्य निर्गच्छती सतीत्यर्थः। सहस्रमराणि दलानि यस्य तत् सहस्रारं सहस्रदलम्, तस्मिन् पद्मे ब्रह्मरन्ध्रसंस्थिते कमले, 'चक्रं सहस्रपत्रं तु ब्रह्मरन्ध्रसमन्वितम्' इति वचनात्। रहसि एकान्ते पत्या सह सदाशिवेन साक विहरसे क्रीडासे। योगवेदिना साधकेन सम्यग्वायुनिरोधान्मूलाधारादुत्थाप्य षट्कमलग्रन्थिभेदनपूर्वकं सहस्रारकमलमानीय तत्र शिवेन सह प्रापितविहारा योगशास्त्रप्रसिद्धा कुण्डलिनीशक्तिश्च भवत्येव नान्येत्यभिप्रायः। अत एवाहुराचार्याः—'माया कुण्डलिनी मधुमती' इत्यादिना। अत्रोक्तं वामकेश्वरतन्त्रे—'भुजङ्गाकाररूपेण मूलाधारं समाश्रिता। शक्तिः कुण्डलिनी नाम बिसतन्तुनिभा शुभा॥ मूलकन्दं फणाग्रेण दष्ट्वा कमलकन्दवत्। मुखेन पुच्छं संगृह्य ब्रह्मरन्ध्रसमन्विता॥ पद्मासनगतः स्वस्थो गुदमाकुञ्च्य साधकः। वायुमूर्ध्वगतिं कुर्वन्कुम्भकाविष्टमानसः॥ वायवाघातवशादग्निः स्वाधिष्ठानगतो ज्वलन्। ज्वलनाघातपवनाघातैरुन्निद्रितोऽहिराट्॥ रुद्रग्रन्थिं ततो भित्त्वा विष्णुग्रन्थिं भिनत्त्यथ। ब्रह्मग्रन्थिं च भित्त्वैव कमलानि भिनत्ति षट्॥ सहस्रकमले शक्तिः शिवेन सह मोदते। सा चावस्था परा ज्ञेया सैव निर्वृतिकारणम्॥' इति॥ उपासकानां च, 'त्रिकोणमष्टकोणं च दशकोणद्वयं तथा। मनुकोणं च षट्कोणं कोणचक्राणि षट् क्रमात्॥ मूलाधारं तथा स्वाधिष्ठानं च मणिपूरकम्। अनाहतं विशुद्धयाख्यमाज्ञाचक्रं विदुर्बुधाः॥' इत्यागमादुक्तचक्रषट्कमेव सुधासिन्धुरिति; तदेव चन्द्रमण्डलम्। तत्रैव शिवयोर्विहारश्चेति रहस्यम्॥ ९॥

सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसः[1]।

---

1. 'रसाम्नायमहसा' इति सौभाग्यवर्धनीपाठः।

अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ १० ॥

॥ लक्ष्मीधरः ॥

सुधाया अमृतस्य धारणासारैः कणैः अत्रासारशब्द एव धारासंपातवचन इति धाराशब्दमाहचर्यादासारशब्दः संपातमात्र इति न पौनरुक्त्यम् । यद्वा सुधाया आधारभूता आसारा धारासंपाताः, तैः, चरणयुगलान्तर्विगलितैः चरणयुगलस्य पादारविन्दद्वितयस्य अन्तर्विगलितैः मध्यप्रदेशात् स्रवद्भिः, प्रपञ्चं द्विसप्ततिसहस्रनाड्यात्मकं कन्दोत्थं सिञ्चन्ती सेक्त्री, पुनरपि सेचनानन्तरमपि रसान्नायमहसः च द्रसकाशात् । रसान्नायमहःशब्दो यामलेषु कलानिधौ प्रसिद्धः ; रसस्य सुधाया आम्नायो गुणानामाधिक्यमित्यंभूतं यावत्, तदात्मकं महः कान्तिर्यस्य सः रसान्नायमहा इति व्युत्पत्तेः । अवाप्य प्राप्य स्वां स्वकीयां भूमिं आधारचक्रं भुजगनिभं सर्पसदृशं अध्युष्टवलयं अधिष्ठितकुण्डलनाविशेषं स्वं निजं आत्मानं कृत्वा धृत्वा स्वस्वरूपमवलम्ब्य उषित्वा स्वपिषि निद्रासि कुलकुण्डे कुः पृथिवीतत्त्वं लीयते यत्र तत्कुलं आधारचक्रम् । लक्षणया सुषुम्नामार्गः कुलामत्युच्यते । अत एव कौलाः कुलभूजकाः आधारसेवकाः इति कौलत्वं तेषामिति रहस्यम् । एतदुत्तरत्र प्रस्फोर्यते । कुलमार्गस्य सुषुम्नायाः मूले यत्कुण्डं कमलकन्दाकारं आधारकन्दं तस्मिन् कुहरिणि, कमलकन्दमध्यस्थितच्छिद्रतुल्यं छिद्रं यस्य कुण्डस्य तत्तथोक्तम् । आधारकन्दमध्यस्थितसुषिरमध्ये बिसतन्तुनिभा तत्र कुण्डलिनीशक्तिः वर्तत इति तात्पर्यम् ॥

अत्रेत्थं पदयोजना—हे भगवति, चरणयुगलान्तर्विगलितैः सुधाधारासारैः प्रपञ्चं सिञ्चन्ती रसान्नायमहसः सकाशात् स्वां भूमिं पुनरप्यवाप्य भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा कुहरिणि कुलकुण्डे स्वपिषि ॥

अत्रेदमनुसंधेयम्— शिरःस्थितं चन्द्रमण्डलं सर्वयोगशास्त्रसिद्धम् । तच्च समयिनां मते श्रीचक्रमेव चन्द्रमण्डलम्, षोडशकलात्मकत्वात् । श्रीविद्यायाः प्रतिपदादिषोडशदिनेषु कलावृद्धिक्षययोः वक्ष्यमाणत्वात् चन्द्रमण्डलमेतदेव । बाह्यस्थितमपि चन्द्रमण्डलं श्रीचक्रमेवेति सुभगोदयव्याख्याने निदर्शितम् । तच्च महारहस्यम् । अतश्च शिरःस्थितसहस्रदलकमलान्तर्गतश्रीचक्रात्मकशशिबिम्बमध्यस्थिताया भगवत्याश्चरणकमलनिर्णेजनजलैः सुधामयैः साधकस्य सकलशरीरं संप्लाव्य पुनः भुजङ्गरूपेण आधारकुण्डं प्रविश्य सुषुम्नामवष्टभ्य सा भगवती स्वपितीति । यथोक्तं वामकेश्वरमहातन्त्रे—'भुजङ्गाकाररूपेण मूलाधारं ममाश्रिता । शक्तिः कुण्डलिनी नाम बिसतन्तुनिभाऽऽशुभा ॥' आशुभा क्षणप्रभा विद्युन्निभा इत्यर्थः । 'मूलकन्दं फणाग्रेण दष्ट्वा कमलकन्द-

वत् । मुखेन पुच्छं संगृह्य ब्रह्मरन्ध्रं समाश्रिता ॥ पद्मासनगतः स्वस्थो गुदमाकुञ्च्य साधकः । वायुमूर्ध्वगतिं कुर्वन्कुम्भकाविष्टमानसः ॥ वाय्वाघातवशादग्निः स्वाधिष्ठानगतो ज्वलन् । ज्वलनाघातपवनाघातैरग्निद्रितोऽहिराट् । रुद्रग्रन्थिं ततो भित्त्वा विष्णुग्रन्थिं भिनत्त्यतः । ब्रह्मग्रन्थिं च भित्त्वैव कमलानि भिनत्ति षट् ॥ सहस्रकमले शक्तिः शिवेन सह मोदते । सा चावस्था परा ज्ञेया सैव निर्वृतिकारणम् ॥' इति । श्रुतिरपि भगवत्याः चरणाम्बुजसुधाधारासारैः प्रपञ्चसेचनं प्रतिपादयति । तथा हि—'लोकस्य द्वारमर्चिष्मत्पवित्रम् । ज्योतिष्मद्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानम् । चरणं नो लोके सुधितान् दधातु ॥' (तै. ब्रा. ३. १२. ३.) ॥

अस्यार्थः—लोकस्य स्वनिवासस्थानस्य सायुज्यस्य वा साष्टर्ध्यादेर्वा ब्रह्मलोकादेर्वा द्वारं, तत्प्रापकमित्यर्थः । अर्चिमत् अर्चींषि मयूखाः अस्य सन्तीति अर्चिष्मत्, अर्चिष्मदित्यर्थः । छान्दसः सकारलोपः । मयूखाः किरणाः । पवित्रं स्वयमतिशुद्धं अन्यशुद्धिहेतुश्च । 'ज्योतिष्मत्क्षत्रमृराजमानं महस्वत्' इत्याम्रेडनं अर्चिष्मत्तुल्यार्थम् । यद्वा—'त्रिखण्डं मातृकाचक्रं सोमसूर्याग्नलात्मकम्' इति वक्ष्यते । 'अर्चिष्मत्' इत्यनेन आग्नेयान्यचर्धिष्टोत्तरशतं कथ्यन्ते । 'ज्योतिष्मत्' इत्यनेन ऐन्दवानि षट्त्रिंशदुत्तरशतं ज्योतींषि निर्दिश्यन्ते । 'महस्वत्' इत्यनेन भानवीयानि षोडशोत्तरशतं महांसि किरणाः संगृह्यन्ते । एतच्च 'क्षितौ षट्पञ्चाशत्' इति श्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः । अमृतस्य धाराः सुधाप्रवाहान् बहुधा बहुप्रकारेण द्विसप्ततिसहस्रनाडीमार्गेषु दोहमानं किरत् चन्द्रमण्डलगतसुधाधाराप्रवाहान् स्वनिर्णेजनपवित्रितान् वर्षदित्यर्थः । तच्चरणम्, 'चरणशब्दो नपुंसकः, 'पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमरः । न अस्मान् साधकान् लोके प्रपञ्चे सुधितान् दृप्तान्; यद्वा, संजातबुद्धिप्रकाशान् सुधिवः, कृत्वा दधातु पुष्णातु ॥

नन्वयं मन्त्रः अपाघास्विछिषु याज्यात्वेनाम्नातः । मन्त्राणां [1]समवेतार्थप्रकाशनशीलत्वात्, 'चरणाय स्वाहा' इति चतुर्थ्यर्थोपहितशब्दस्यैव देवतात्वात्, एतद्व्याख्यानं न संगच्छत इति चेत्; उच्यते—

अन्वाहुः भगवत्पादाः—'सिद्धमन्त्रं परित्यज्य भिक्षामटति दुर्मतिः' इति । अयमाशयः—वेदस्य सकर्तृकत्वासिद्धेः फलदानसमर्थत्वेन सर्वविद्वद्भिमतं वृद्धव्यवहारावसितशक्तिकं 'लोकस्य द्वारम्' इत्यादिविशेषणविशिष्टत्वाद्दं भगवत्याश्चरणमेव 'चरणाय स्वाहा' इत्यत्र चरणशब्देनाभिधीयत इति ॥ १० ॥

---

1. समवेतदेवता०

॥ सौभाग्यवर्धनी ॥

अपरे त्वाहुः—**सुधाधारासारैरिति** । सुधाधारासारैरमृतधारासंपातैः चरणयुगलान्तर्विगलितैः भ्रूमध्यगतशुक्लरक्तचरणमध्यमार्गतो निष्यन्दमानैः प्रपञ्चं मानसस्थानादिषट्चक्ररूपं कुलपथं सिञ्चन्ती; तेनान्वयभूमिकोक्ता । प्रत्यावृत्तिभूमिकामाह—पुनरपि रसाम्नायाः षडाम्नायाः पूर्वदक्षिणपश्चिमोत्तरोर्वानुत्तराः ; एते शक्तेराम्नायाः स्थानानि, पार्थिवाप्यानलवायव्यनाभसमानसादिशांभवाम्नायाः ; एतेषां थानानि अनुत्तरादिक्रमेण, भ्रूमध्यादिमानसादिक्रमेण वा । तेषां महसा । एतेषां षण्णां प्रकाशकजसा स्वां भूमिमवाप्य मूलाधारमवाप्य । भुजगनिभमध्युष्टवलयं सार्धत्रिवलयम, आत्मानं कृत्वा कुलकुण्डे मूलाधारान्तर्गतचतुर्दलपद्मकर्णिकामध्यवर्तित्रिकोणे स्वपिषि । कुहरिणि कुहरं रन्ध्रविशेषः द्वति गुप्तस्थान इत्यर्थः । एतेन पद्यद्वयेन कुण्डलिनीरहस्यसोपानमभिहितम् । तदुक्तं चतुःशत्याम्—मूलादिब्रह्मरन्ध्रान्तं रक्तोर्णातन्तुसंनिभाम् । कुलकुण्डलिनीं नित्यां विद्युद्दुल्लासदृक्तनुम ॥ मत्तालिकुलझंकारसदृक्षतरनादिनीम् । उन्नीयोन्नीय चक्रेषु क्रमात्स्यन्दति वैभवम् ॥ अनुभूय परं गत्वा पीत्वा कुलपरामृतम् । अकुलात्कुलसभूय (कुलकं भूयः) कुलादकुलकं महः ॥ एवं मां सुन्दरी ध्यायेत्सूक्ष्मध्यानं कौर्तितम् ॥' इति ॥ १० ॥

॥ अरुणामोदिनी ॥

विहारानन्तरं कृत्यमाह—**सुधाधारेति** । हे देवि, चरणयुगलस्य पदद्वन्द्वस्यान्तरभ्यन्तराद्विलितैर्गलद्भिः सुधाधाराणाममृतसंततीनामासारैर्वेगवर्षणैः; 'आसारः स्यात्प्रसरणे वेगवर्षे सुहृद्बले' ति विश्वः । प्रपञ्च द्विसप्ततिसहस्रसंख्याकनाडीमार्गं सिञ्चन्ती सेचमाना; 'लोकस्य द्वारमर्चिमविभ्रम्। ज्योतिष्मद्राजमानं महस्वत्। अमृतस्य धारा बहुधा दोहमानम्। चरणं नो लोके सुधिता धातु ।' इति श्रुतेः । इह च भगवत्याः सुषुम्णामार्गेण सहस्रारान्तर्गतत्वात् 'तासां मूर्धानमभिः सुतैका' 'सुषुम्णा तिसृषु श्रेष्ठा वैष्णवी मुक्तिमार्गदा' इत्यागमात् प्रधाननाड्यां सुषुम्णायां चने जाते पिण्डाण्डब्रह्माण्डयोरैक्याद्ब्रह्माण्ड इव पिण्डाण्डेऽपि सर्वासु नाडीष्वाह्लादो जायत त्युक्तम् । रसा आम्नायन्तेऽस्मिन्निति रसाम्नायममृतमयं महस्तेजो यस्य तस्मात्; सहस्रारपद्मर्तिनोऽक्षीणकलाचन्द्रात्, तत्सकाशादित्यर्थः । महस्रीति पाठे रसाम्नायं रसावृत्तिरूपं महस्तेजो स्याः सा आनन्दरूपिणी अत्यन्ततृप्ता..शादुन्मतति सतीत्यर्थः । पुनर्भूयोऽपि स्वां स्वकीयां र्मिं निवासस्थानं 'भूमिः क्षितौ स्थानमात्रे' इति विश्वः । मूलाधारमित्यर्थः । अवाप्य प्राप्य जगनिभं सर्पाकारं स्वं स्वकीयमात्मानं देह सहस्रारावाप्तये ऋजूकृतमित्यर्थः । अध्युष्टोऽधिष्ठितो लयः कुण्डलना येन तं सन्तं कृत्वा विधाय कुण्डलितं कृत्वेत्यर्थः । कुहरं बिलमस्यास्तीति तस्मिन् ह सच्छिद्रवति, सर्वप्रियत्वाच्छिद्रस्येति भावः । कुलकुण्डे कुण्डाकारे कुले निवासगृहे । यद्वा ः पृथिवीतत्त्वं लीयतेऽस्मिन्निति कुल मूलाधारः । तदेव कुण्डं निवासस्थानभूतः करण्डविशेषः स्मिन् स्वपिषि निद्रासि । कुहरिणीत्यस्य देवीसंबुद्धिपरत्वं केचिदिच्छन्ति । शिरसि चन्द्रमण्डलं र्तत इति योगशास्त्रप्रसिद्धेश्चन्द्रमण्डलश्रीचक्रयोरुभयोरपि षोडशकलात्मकत्वेनैक्याच्छिरःस्थितहस्रारान्तर्गतश्रीचक्रचन्द्रमण्डलीयस्वचरणनिर्गतामृतसुधाजलैः साधकशरीरं संप्लाव्य पुनरप्या-

धारचक्रं भुजङ्गाकारेणैवावाप्य सुषुम्णामवष्टभ्य स्वपिति भगवतीत्यभिप्रायः । आधारकमलकन्द-सुषिरमध्ये बिसतन्तुनिभा कुण्डलिनी वर्तत इत्यागमः ॥ १० ॥

चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः ।
[1]चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलय-
त्रिरेखाभिः सार्धं तव [2]शरणकोणाः परिणताः ॥ ११ ॥

पूर्वश्लोके इन्दुमण्डलात्मकं श्रीचक्रमित्युक्तम् । तदेव श्रीचक्रमुपदिशति—चतुर्भिरिति । चतुर्भिः चतुःसंख्याभिः संख्येयैः श्रीकण्ठैः, शृणाति हिनस्तीति श्रीः विषं कण्ठे यस्यासौ श्रीकण्ठः हरः । ते कोणा अपि श्रीकण्ठाः । तादात्म्यात्तद्व्यपदेशः । अत एव बहुवचनसिद्धिः । श्रीकण्ठात्मकैरित्यर्थः । शिवयुवतिभिः शक्तिभिः । पूर्ववद्बहुवचनसिद्धिः । शक्त्यात्मकैरित्यर्थः । पञ्चभिः । अपिशब्दो भेदे । प्रभिन्नाभिः प्रकर्षेण भिन्नाभिः ; प्रकर्षस्तु शिवशक्तिचक्रमध्ये बैन्दवस्थानस्य विद्यमानत्वात् । एतच्च समयमतेन सृष्टिक्रमेण पञ्चचक्रलेखने ज्ञेयम् । कौलमतेन संहारक्रमेण नवयोनिचक्रलेखने ऊर्ध्वाधोमुखतया अवस्थितेः प्रभिन्नत्वं ज्ञेयम् । तेनोभयं पृथक्पृथक् स्थितमित्यर्थः । शंभोः इति पञ्चमी । शंभुशब्देन चत्वारः श्रीकण्ठाः उच्यन्ते । नवभिः नवसंख्यैः । अपिशब्दो वक्ष्यमाणबाहुल्यं समुच्चिनोति । मूलप्रकृतिभिः प्रपञ्चस्य मूलकारणैः । अत एव तेषां योनिशब्देन व्यवहारः । नव योनयो नवधात्वात्मकाः । तथा चोक्तं कामिकायाम्—'त्वगसृङ्मांसमेदोस्थिधातवः शक्तिमूलकाः । मज्जाशुक्रप्राणजीवधातवः शिवमूलकाः ॥ नवधातुरयं देहो नवयोनिसमुद्भवः[3]। [4]दशमी योनिरेकैव परा शक्तिस्तदीश्वरी ॥' इति । दशमी योनिः बैन्दवस्थानम् । तदीश्वरी तस्य देहस्येत्यर्थः । 'एवं पिण्डाण्डमुत्पन्नं तद्वद्ब्रह्माण्डमुद्भवौ । पञ्च भूतानि शाक्तानि मायादीनि शिवस्य तु ॥ माया च शुद्धविद्या च महेश्वरसदाशिवौ । पञ्चविंशतितत्त्वानि तत्रैवान्तर्भवन्ति ते ॥' एकादशेन्द्रियाणि शब्दादितन्मात्राः तच्छब्देन परामृश्यन्ते । 'शिवशक्त्यात्मकं विद्धि जगदेतच्चराचरम् ' । चरं पिण्डाण्डं, अचरं ब्रह्माण्डमित्यर्थः ॥

---

1. त्रयश्चत्वारिंशद्वसु० 2 चरणकोणाः

3. 'जीवधातुर्नाम जीवाधिष्ठानत्वात् ओजोधातुरेव जीवधातुरित्युच्यते । तदुक्तं वाग्भटेन—रसादिशुक्रान्तानां धातूनां प्रसादश्रेष्ठो जीवाधारभूतो धातुः ओज इति '—इत्यधिकः पाठः ।

4. 'दशमो धातुरेकैव ' इति पाठान्तरम् ।

केचित्तु एकपञ्चाशत्तत्त्वान्याहुः । तथा हि—'पञ्च भूतानि तन्मात्रपञ्चकं चेन्द्रियाणि च । ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च ॥ त्वगादिधातवः सप्त पञ्च प्राणादिवायवः । मनश्चाहंकृतिः ख्यातिर्गुणाः प्रकृतिपूरुषौ ॥ रागो विद्या कला चैव नियतिः काल एव च । माया च शुद्धविद्या च महेश्वरसदाशिवौ ॥ शक्तिश्च शिवतत्त्वं च तत्त्वानि क्रमशो विदुः ॥' इति । एतान्येकपञ्चाशत्तत्त्वानि वायव्यसंहितादिशैवपुराणेषु सर्वेषु प्रतिपादितानि । अस्यार्थः—पञ्च भूतानि पृथिव्यप्तेजोवाय्वाकाशात्मकानि कार्यकारणरूपेणावस्थितानि । गन्धादितन्मात्रपञ्चकं पृथिव्यादीनां कारणभूतम् । ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मकानि । कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थात्मकानि । धातवः त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि । वायवः प्राणापानव्यानोदानसमानाः । मनः मननात्मिका शक्तिः । अहंकृतिः अहंकारजनिका शक्तिः । ख्यातिः ज्ञानम् । गुणाः सत्त्वरजस्तमांसि । प्रकृतिः मूलप्रकृतिः । पुरुषो जीवः । रागः इच्छा । विद्या जनितविकल्पज्ञानम् । कलाः षष्ट्युत्तरत्रिशतसंख्याकाः । नियतिः नियामिका शक्तिः । कालः संहरणशक्तिः । माया ऐन्द्रजालिकादिज्ञानम्[1] । शुद्धविद्या मोचकज्ञानम् । महेश्वरः रजोगुणाविष्टः सृष्टिकर्ता । सदाशिवः सृष्टिस्थितिकर्ता । शक्तिः महेश्वरसदाशिवयोः रक्षणसर्जनशक्तिः । चकारात् कालात्मिका[2] संहारिणी शक्तिश्च । शिवतत्त्वं शुद्धबुद्धमुक्तस्वरूपम् । एतेषु सर्वेषु तत्त्वेषु कतिचन तत्त्वानि कुत्रचिदन्तर्भवन्ति । त्वगादिसप्तधातवः भूतेष्वन्तर्भवन्ति । प्राणादिवायवः वायावन्तर्भवन्ति । अतो भूतेष्वेव तेषामन्तर्भावः । अहंकारस्य मनस्यन्तर्भावः । ख्यातेर्विद्यायामन्तर्भावः । गुणानां प्रकृतावन्तर्भावः । प्रकृतेस्तु शक्तावन्तर्भावः । पुरुषस्य महेश्वरेऽन्तर्भावः । कलायाः शुद्धविद्यायामन्तर्भावः । नियतेस्तु शक्तावेवान्तर्भावः । कालस्य महेश्वरे सदाशिवे चान्तर्भावः । शक्तेस्तु शुद्धविद्यायामन्तर्भावः । शिवतत्त्वस्य सदाशिवतत्त्वेऽन्तर्भावः इति तत्त्वानि पञ्चविंशतिरेव—पञ्च भूतानि तन्मात्रपञ्चकं पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनस्तत्त्वं मायाविशुद्धविद्यामहेश्वरसदाशिवात्मकानि चत्वारि । एतानि पञ्चविंशतितत्त्वानि सर्वसंमतानि, श्रुत्यनुगृहीतत्वात् । तथा च श्रुतिः—'पञ्चविंश आत्मा भवति' (तै. ब्रा. १. २. ६) इति । अतश्च षट्त्रिंशत्तत्त्वानीत्यादितत्त्वविकल्पः श्रुत्यनुसारेण पञ्चविंशतितत्त्वपर इत्यनुसंधेयम् । अतश्च सर्वतत्त्वातीतं शिवशक्तिसंपुटम् । तस्मादेव जगदुत्पत्तिः । तदुक्तं सुभगोदये—'परोऽपि शक्तिरहितः शक्तः कर्तुं न किंचन । शक्तः स्यात्परमेशानि शक्त्या युक्तो भवेद्यदि ॥' इति । अत्र बहु वक्तव्यमस्ति । तत्तु सुभगोदयव्याख्यानावसरे निपुणतरमुपपादितमस्माभिरिति अलमतिविस्तरेण । प्रकृतमनुसरामः ॥

चतुश्चत्वारिंशत् एतत्संख्याभिः वसुदलकलाश्रित्रिवलयत्रिरेखाभिः ; वसवोऽष्टौ, तेन वसुशब्देन अष्टसंख्या लक्ष्यते । वसुदलं अष्टदलम् । कलाश्च कलाः षोडश । तेन कलाशब्देन

---

1. ऐन्द्रजालिकाद्यज्ञानम् । 2. कालस्य

षोडशसंख्या लक्ष्यते । अब्जशब्देन दलं लक्ष्यते । अतः कलाश्रं षोडशदलमित्यर्थः । त्रिवलयं त्रयाणां वलयानां समाहारः त्रिवलयं, त्रिमेखलमित्यर्थः । त्रिरेखाः प्राकारवलयाकार-रेखाः, भूपुरत्रयमित्यर्थः । एतच्च भूपुरत्रयं चतुर्दिक्षु द्वारयुक्तम् । तथा चोक्तम्—'बिन्दुत्रिकोणवसुकोणदशारयुग्ममन्वश्रनागदलसंयुतषोडशारम् । वृत्तत्रिभूपुरयुतं परितश्चतुर्द्वाः श्रीचक्रमेतदुदितं परदेवतायाः ॥' इति । श्रुतिरपि—'सतद्वाट्टारंगमं ता । सञ्हार्यं नगरं तव । (तै. आ. १. ३१.) इति । अस्यार्थः—सतद्वा, चतुर्द्वारमित्यर्थः । छान्दसो वर्णलोपश्च । अट्टारगमं अट्टारैः प्राकारवलयैः त्रिभिः अगमं दुर्गमम् । ता तानीमानि भूतानि । भगवति, तव नगरं पुरं श्रीचक्रात्मकं संहार्यं संहारकमित्यर्थः । पृथिव्यादिमहेश्वरान्तानि तत्त्वानि तत्रैव लीयन्त इति तात्पर्यम् ॥

केचिदेवं व्याचक्षते—संहार्यं संहारक्रमेण लेखनीयमिति, तन्न, कौलमत एव संहार-क्रमेण चक्रस्य लेखनीयत्वादिति । प्रकृतमनुसरामः—ताभिः सार्धं सह तव भवत्याः शरणकोणाः शरणं गृहं वैन्दवं मन्दिरं, तव कोणाश्चेति द्वन्द्वसमासः । ततः कोणाश्चतुश्चत्वारिंशदित्यर्थः ॥

ननु बिन्दुत्रिकोणेत्यादिक्रमेण त्रिकोणबिन्दुभ्यां योगे षट्चत्वारिंशत्कोणाः, बिन्दुपरि-त्यागे पञ्चचत्वारिंशत्कोणा इति चेत्, सत्यम्, ग्रन्थारवश्चात् त्रिकोणस्याधःस्थितं कोणद्वयमष्टकोणे-ऽन्तर्गतम् । ततश्च कोणाः त्रिचत्वारिंशदेवेति । शरणेन सार्धं कोणा इति द्वन्द्वसमासगत्या व्याख्यातम् । यद्वा, त्रयश्चत्वारिंशदिति पाठान्तरम् । तत्र स्पष्ट एवार्थः । परिणताः परिणामं प्राप्ताः । अयमर्थः—त्रिकोणाष्टकोणदशकोणयुगलचतुर्दशकोणात्मकानि शक्तिचक्राणि । अष्टदल-षोडशदलमेखलात्रयभूपुरत्रयात्मकानि चत्वारि शिवचक्राणि । त्रिकोणे वसुदलं वसुकोणे षोडशदलं दशारयुग्मे मेखलात्रितयं भुवनाश्रके भूगृहं अन्तर्भूतमिति परिणतमित्युच्यते । एतच्च पूर्वमेव प्रतिपादितम् ॥

अत्रेत्थं पदयोजना—हे भगवति, चतुर्भिः श्रीकण्ठैः शंभोः सकाशात्प्रभिन्नाभिः पञ्चभिः शिवयुवतिभिः नवभिरपि मूलप्रकृतिभिः तव शरणकोणाः वसुदलकलाश्रत्रिवलय-त्रिरेखाभिः सार्धं परिणताः सन्तः चतुश्चत्वारिंशदिति ॥

अत्रेदमनुसंधेयम्—अस्मिन् चक्रे अष्टाविंशतिमर्मस्थानानि । सन्धयस्तु चतुर्विंशतिः । ननु मर्माणि चतुर्विंशतिरेव, कथमष्टाविंशतिः ? 'द्विरेखासंगमस्थानं सन्धिरित्यभिधीयते । त्रिरेखासंगमस्थानं मर्म मर्मविदो विदुः ॥' इति । उच्यते—अष्टदलषोडशदलमेखलात्रयभूपुर-त्रयाणां शिवचक्राणां त्रिरेखासंगमस्थानत्वाभावेऽपि वाचनिकी मर्मसंज्ञा । यथोक्तं चन्द्रज्ञान-विद्यायाम्—'मन्वश्रद्विदशाराष्टकोणवृत्तचतुष्टयम् । अष्टाविंशतिमर्माणि चतुर्विंशतिसन्धयः ॥'

इति। अस्यार्थः—चतुर्दशकोणे दशारयुग्मे अष्टकोणे च त्रिरेखासंगमस्थानगणनाथां चतुर्विंशतिमर्मस्थानानि वृत्तचतुष्टयेन शिवचक्रात्मकेन सार्धं अष्टाविंशतिरिति॥

एतत्सर्वं चक्रलेखनापरिज्ञाने ज्ञातुं दुःशकमिति चक्रलेखनप्रकारो निरूप्यते। स च द्विप्रकारः, सृष्टिक्रमेण संहारक्रमेण चेति। संहारक्रमेण लेखनं कौलमार्ग एव। तथाऽपि नवयोनिपरिज्ञानार्थं स प्रकारो निरूप्यते। संहारक्रमेण तावत्—पुरतो वृत्तमालिख्य, वृत्तमध्ये नव रेखाः लिखित्वा, पश्चिमरेखाप्रान्ताभ्यां त्रिकोणमुत्पाद्य, स्वापेक्षया षष्ठ्या रेखया योजयेत्। एवं प्राग्रेखाप्रान्ताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया सप्तम्या रेखया योजयेत्। पश्चिमद्वितीयरेखाप्रान्ताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया अष्टम्या योजयेत्। प्राग्द्वितीयरेखाप्रान्ताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया अष्टम्या योजयेत्। ततः प्राक्पश्चिमतृतीयरेखाप्रान्ताभ्यां [1]षट्कोणमालिखेत्। षट्कोणमध्यस्थितह्रस्वरेखात्रितये पश्चिमरेखाप्रान्ताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया पञ्चम्या योजयेत्। एवं प्राग्रेखाप्रान्ताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया षष्ठ्या योजयेत्। मध्यस्थितातिह्रस्वरेखाप्रान्ताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया तृतीयरेखया योजयेत्। एवं चतुर्विंशतिमर्माणि, चतुर्विंशतिसन्धयः, नवयोनिचक्रम्। एतत्कौलमतरहस्यम्॥

सृष्टिक्रमस्तु समयमार्गः। स च निरूप्यते—आदौ त्रिकोणमालिख्य, मध्ये बिन्दुं निक्षिप्य, बिन्दोरुपरि त्रिकोणं भित्त्वा त्रिकोणान्तरं प्रागग्रं विलिख्य प्रथमत्रिकोणाग्रात् त्रिकोणान्तरं पश्चिमाभिमुखं विलिखेत्। एवं अष्टकोणचक्रमुत्पन्नम्। एतस्मादेव दशारमुत्पादयेत्। तद्यथा—अष्टकोणप्राक्पश्चिमरेखाप्रान्ताभ्यां षट्कोणमुत्पाद्य विदिग्गतमर्मस्थानेभ्यः चतुर्भ्यः चतुरस्रिकोणानुत्पाद्य अष्टकोणगतयोनेरुपरि दक्षिणोत्तरायतरेखा ईशानाग्निकोणत्रिकोणेषु योजयेत्। एवं पश्चिमतो योजयेत्, दशारं भवति। एतस्मादेव दशारात् पुनः दशारान्तरं उत्करीत्या उत्पादयेत्। एतस्मादेव दशाराच्च चतुर्दशारमुत्पादयेत्। तद्यथा—प्रथमदशारपूर्वपश्चिमरेखाप्रान्ताभ्यां षट्कोणमुत्पादयेत्। षट्कोणगतमर्मस्थानेभ्यः चतुर्भ्यः त्रिकोणचतुष्कमुत्पादयेत्। ततः उपरिस्थितमर्मचतुष्टयात् दशारन्यायेन त्रिकोणचतुष्कमुत्पाद्य प्राक्पश्चिमरेखा मेलयेत्। एवं त्रयश्चत्वारिंशत्कोणाः, चतुर्विंशतिसन्धयः चतुर्विंशतिमर्माणि इति। एतत् समयमतरहस्यम्। अस्मिन् चक्रे त्रिकोणमूर्ध्वमुखं लेखनीयम्। कौलचक्रे त्रिकोणमध्यगतो बिन्दुः। समयचक्रे [2]चतुष्कोणमध्यगतो बिन्दुः। कौलचक्रे कोणसंख्या नास्ति, नवत्रिकोणात्मकत्वात्। नवानां त्रिकोणानां मेलने मर्मसन्धय एवोत्पद्यन्त इति महद्रहस्यम्। उभयचक्रसाधारणमत ऊर्ध्वं अष्टदलपद्मं, ततः षोडशदल-

---

1. षट्कोणमुत्पाद्य वृत्तेन योजयेत्। 2. षट्कोण०

पद्मं, ततः मेखलात्रितयं, ततः चतुर्द्वारयुक्तं भूपुरत्रितयम् । इति श्रीचक्रोद्धारो विज्ञातव्यः ॥

अत्र मेरुप्रस्तारकैलासप्रस्तारभूप्रस्ताराः त्रयः संभवन्ति । मेरुप्रस्तारो नाम नित्याषोडशतादात्म्यम् । कैलासप्रस्तारो नाम मातृकातादात्म्यम् । भूप्रस्तारो नाम वशिन्यादितादात्म्यम् । एतत्सर्वं 'चतुःषष्ट्या तन्त्रैः' इत्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः ॥

अत्र रुद्रयामले विशेष उक्तः--'पृश्नयो नाम मुनयः सर्वे चक्रसमाश्रयाः । सेवमानाश्चक्रविद्यां देवगन्धर्वपूजिताम् ॥ अग्नीषोमात्मकं चक्रमग्नीषोममयं जगत् । अग्नावन्तर्बभौ भानुरग्नीषोममयं स्मृतं ॥ त्रिखण्डं मातृकाचक्रं सौमसूर्यानलात्मकम् । त्रिकोणं वैन्दवं सौम्यमष्टकोणं च मिश्रकं ॥ चक्रं चन्द्रमयं चैव दशारद्वितयं तथा । चतुर्दशारं वह्नेस्तु चतुश्चक्रं च भानुमत् ॥ एतत्प्रसादादिन्द्राद्या वसवोऽष्टौ मरुद्गणाः । ये ये मृद्धा लोकेऽस्मिन् त्रिपुराचक्रसेवकाः ॥ पुरत्रयं च चक्रस्थ सोमसूर्यानलात्मकम् । महालक्ष्म्याः पुरं चक्रं तत्रैवास्ते सदाशिवः ॥' इति । इममेवार्थं श्रुतिरप्याह तैत्तिरीयके अरुणोपनिषत् 'इमा नुकं भुवना सीषधेम' (तै. आ. १. ६७.) इत्यारभ्य 'ऋषिभिरदान्तृभिः' इत्यन्ता । अरुणोपनिषन्नाम अरुणायाः भगवत्याः प्रतिपादिका उपनिषत् । 'भद्रं कर्णेभिः' इत्यारभ्य 'तपस्वी पुण्यो भवति' (तै. आ. १. प्रश्नः) इत्यन्ता अरुणोपनिषत् अरुणामेव प्रतिपादयति । इममर्थं दृष्टवान् अरुणकेतुः ऋषिः । श्रुत्यर्थस्तावत्—इमा नुकं भुवना सीषधेम । अस्यार्थः—पृश्नयो नाम मुनयः परस्परं संगिरन्ते । इमां चक्रविद्यां, नुकं वितर्के, भुवना भुवनानि, सीषधेम अवगच्छाम । चक्रविद्यामुपाश्रित्यैव भुवनान्यवतिष्ठन्त इति वितर्कयाम इत्यर्थः । यद्वा, इमां चक्रविद्यां भुवना भुवनात्मतया सीषधेम । [1]नुकं पृच्छायाम्; 'नु पृच्छायां वितर्के च' इत्यमरः । इन्द्रश्च विश्वे च देवाः । अस्य वाक्यस्यार्थः स्पष्ट एव । चक्रविद्यामुपाश्रित्यैव आसत इति शेषः । यज्ञं च नस्तन्वं च प्रजां च । आदित्यैरिन्द्रः सह सीषधातु । अस्यार्थः—यज्ञमग्निष्टोमादिकं नः अस्माकं तन्वं तनूं शरीरार्धं पत्नीमिति यावत् । प्रजां संतानम् । चकारात्सर्वाः संपदः । आदित्यैः मरुद्गणैः इन्द्रः सह चक्रविद्योपासनात्प्राप्तपरमैश्वर्यः इन्द्रश्चक्रविद्यामस्माकं उपदिश्य सीषधातु संपादितवान् । प्राप्तकाले लोट् । आदित्यैरिन्द्रः सगणो मरुद्भिः । अस्माकं भूत्वविता तनूनाम् । मन्त्रद्वयस्यार्थः—तनूनां पुत्रामित्रकलत्रादीनां अविता रक्षकः भूतु भवतीत्यर्थः । इन्द्र एवास्माकं योगक्षेमसंपादक इति भावः । आप्लुवस्व प्लुवस्व । पृश्नयश्चक्रविद्यां प्रस्तुवन्ति । आपादमस्तकं प्लुवनं अमृतनिष्यन्दसेचनं कुरु । प्रकर्षेण प्लुवनं द्विसप्ततिसहस्रनाडीमार्गेषु आसेचनं कुरु । आण्डीभव जु मा मुहुः । आण्डी पिण्डाण्डं ब्रह्माण्डं च, च्विप्रत्ययान्तः, भव पिण्डाण्डरूपेणास्मदीयेन ब्रह्माण्डरूपेण बाह्येन भवदीयेन प्राप्नुहि, भवत्सायुज्यं देहीत्यर्थः ।

---

1. नुः पृच्छायाम् । भुवनात्मतया कं पृष्ट्वा अवगच्छाम इत्यर्थः ।

Srirangam Sri Sankaragurukula Series No. 15.

ŚIVAKĒŚĀDIPĀDĀNTASTUTIH

OF

ŚRĪ ŚANKARA BHAGAVATPĀDĀCHĀRYA

WITH THE COMMENTARY OF

SRĪ RĀMAKRISHNA SŪRI.

EDITED BY

Gurubhaktasikhamani, Sastraprasarabhushana,

T K BALASUBRAHMANYA AIYAR, B A.

Dharmadhikari, Sri Sankaragurukulam, Srirangam.



—— SRIRANGAM ——

SRI SANKARAGURUKULAM.

1913

PRINTED AT THE

SRI VANI VILAS PRESS,

SRIRANGAM.

श्रीमच्छंकरभगवत्पादाचार्यविरचिता

॥ शिवकेशादिपादान्तस्तुतिः ॥

श्रीमान्कृष्णसूरिविरचितव्याख्यासमेता ॥

श्रीरामं सर्वलोकेश भक्तसुस्वान्तमन्दिरम् ।
भावयामि परं ब्रह्म सर्वदाऽभीष्टसिद्धये ॥

अवलम्बेऽखिलालम्बलम्बोदरपदद्वयम् ।
यदालम्ब्याविलम्बेन लभतेऽलं बुधः श्रियः ॥ २ ॥

वाणि कल्याणि कल्याणश्रेणिनिश्रेणिसंस्तवे ।
मदीयरसनावेद्यां विचरेत्प्रदायिनि ॥ ३ ॥

शंभुर्भूरिकृपानिधिर्जगदिद द्वैतादिदुर्वादकु-
त्पाषण्डोक्तिभिराकुलं मदमलक्षेमं विधातुं कलौ ।
यद्रूपेण महीमवातरदमूनद्वैतविद्यागुरू-
ञ्श्रीमच्छंकरनामधेयभगवत्पादान्हृदा भावये ॥ ४ ॥

अधीताध्यापितानेकशास्त्रविद्वच्छिरोमणीन् ।
विद्यागुरून्कृष्णसूरीन्वन्देऽहं विहिताञ्जलिः ॥ ५ ॥

नित्यं साधुनरप्रियाऽश्रुतमहानन्दालयान्नित्यगो-
सद्वृन्दावनलालसान्वितततच्चारान्यशोदाश्रयान् ।
पापोद्यन्नरकान्तकान्करुणया भीष्मैकमुक्तिप्रदा-
ञ्श्रीगोपालसरस्वतीन्मुनिवरान् वन्दामहे सद्गुरून् ॥ ६ ॥

श्रीगोपालसरस्वत्यभिधेयैस्तैर्गुरुभिरीरित- प्रीत्या ।
व्याख्यास्ये परमेशस्तुतिममलां रामकृष्णसूरिरहम् ॥ ७ ॥

इह खलु परंपरानेकदुःखतरङ्गसंकुले दुर्निवारदुर्विषमविषयनक्रचक्राक्रान्ते ममाहमभिमानतटद्वयविशंकटकामादिपरिपूरितदुरुत्तारे अपारासारसंसारगरलपारावारे निमज्जतः परपारप्राप्तिमभिलषतो जनानालक्ष्य भगवान्परमकारुणिकः परमेश्वरः 'परित्राणाय

साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥' (भ. गी. ४. ८.) इति कृतसंकल्पतया श्रीमच्छंकरभगवत्पूज्यपादाचार्यात्मना लोकानुग्रहैकप्रयोजनपरिगृहीतलीलाविग्रहो दर्शनश्रवणपरिचरणादिगोचरतया, 'तस्मात्पारावारदूरंगाणि तानि' इति ब्रह्माद्यशैः शिष्यभूतैः सहावततार । अथ परमेश्वरावतारभूतान्ते श्रीमच्छंकरभगवत्पूज्यपादाचार्या निष्कामकर्मानुष्ठानपरितोषितभगवदनुग्रहसमासादितविवेकवैराग्यादिसाधनचतुष्टयसंपन्नानां मुख्याधिकारिणां प्रत्यगभिन्नपरब्रह्मसाक्षात्कारप्रयोजकं प्रस्थानत्रयं निर्माय तदर्थानुसंधानाममर्थान्मन्दाधिकारिणोऽनुजिघृक्षवः, 'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः । ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥ वशीकृते मनस्येषां सगुणब्रह्मशीलनात् । तदेवाविर्भवेद्ब्रह्म सत्यानन्दचिदात्मकम् ॥' इति न्यायेन सगुणब्रह्मानुसंधानस्य निर्विशेषसाक्षात्कारोपयोगित्वात्; 'विग्रहं परतत्त्वस्य निर्णेतुं साम्बमद्भुतम् । मुहूर्तं चिन्तयन्मर्त्यो मुच्यते सर्वपातकैः ॥' इति स्कान्दे साम्बत्वादिलक्षणपरतत्त्वमूर्तिचिन्तनस्य तत्त्वसाक्षात्कारप्रतिबन्धकसकलकल्मषनिवर्तकत्वोक्त्या तस्य साक्षात्कारकारणमनःशुद्धिसंपादनद्वारा तत्साधनत्वसूचनात् । श्रुतिरपि—'यस्मिन्नयमात्माऽधिश्रियन्ति भुवनानि विश्वाः । आत्मानं द्विधाऽकरोद्यैन स्त्री अर्धेन पुरुषः ॥' इति सर्वाधारस्य ब्रह्मणः साम्बमूर्तिन्यप्रतिपादकसुबालोपनिषदा, 'अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् । तथादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥' इति स्वतः केवलं स्वाध्यस्तमायैक्याध्यासेन जगद्बीजभावापन्नं ब्रह्मणो हिरण्यगर्भस्य योनिं साम्बशिवं प्रक्रम्य, 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्' इति तस्य ध्येयमूर्तिमुपवर्ण्य, 'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' इति, स एव साम्बशिवः प्रकृतिप्राकृतोत्त... ध्यात्र प्राप्य इति प्रतिपादिकया कैवल्यश्रुत्या 'द्विधा कृत्वाऽऽत्मनो देहमर्धेन पुरुषोऽभवत् । अर्धेन नारी तस्यां च विराजमसृजत्प्रभुः ॥' इति मनुस्मृत्या, 'संरम्भाय गतं सौम्यं विधूममिव पावकम् । प्रशान्तमनसं देवं त्रिदेहुमपराजितम् ॥ सहितं चारुसर्वाङ्ग्या पार्वत्या परमेश्वरम् । नीलकण्ठं महात्मानं हर्यक्षं तेजसां निधिम् ॥ अष्टादशभुजं देवं सर्वाभरणभूषितम् ।' इत्यादि महाभारते आनुशासनिकवचनेन, 'निर्विकल्पपरे तत्त्वे श्रद्धा येषां विजायते । अयत्नसिद्धा परमा मुक्तिस्तेषां न संशयः ॥' इत्युपक्रम्य, 'निर्विकल्पं

परं तत्त्वं नाम साक्षात्परः शिवः । सोऽयं साम्बस्त्रिणेत्रश्च सोमार्धकृतशेखरः ॥ स्वात्मतत्त्वसुखस्फूर्तिप्रमोदाण्डवविभ्रमः रुद्रविष्णुप्रजानाथैरुपास्यो गुणमूर्तिभिः ॥ ईदृशी तु परा मूर्तिर्यस्याराधनतो भवेत् । तद्धि माहात्म्यं परं तत्त्वं नान्यत्सत्यं मयोदितम् ॥' इति प्रत्यस्तमितसकलविकल्पजाते परब्रह्मणि येषां निष्ठा तेषां मुक्तिरयत्नसिद्धा, तच्च निर्विकल्पं परं ब्रह्म शिवाच्छिव एव । स च लीलया स्वस्य शिवशक्त्यात्मकत्वमाविष्कर्तुमर्धनारीश्वरविग्रहो जात इत्यवं प्रतिपादकपुराणवचनैश्च शिव एवोपासकानुजिघृक्षया योगमायाशक्तिपरिगृहीतलीलाविग्रहसाम्बशिवेत्यर्धशेखरनीलकण्ठशूलपाणिवृषवाहनत्वादिलक्षणो ब्रह्मादिभिरुपास्य इह परिस्फुरतीति श्रुतिस्मृतीतिहासपुराणवचनैरुक्तमूर्तेर्लीलागृहीतायाः परतत्त्वप्रतिपादनाच्छिवादेशे परशिवलीलाविग्रहे मनः प्रणिधाय मन्दाधिकारिणः कृतार्था भूयासुरिति प्रत्यङ्गं तेषामुचावचश्रेयोभ्यासानाय त्रिंशच्छ्लोकात्मकपरशिवलीलाविग्रहकपर्दादिपादाब्जपरागान्तस्तुतिकाव्यमारभन्ते—

देयासुर्मूर्ध्नि राजत्सरसरसुरसरित्[1]प्रान्तपर्यन्तनिर्य-
त्त्रांशुस्तम्बाः पिशङ्गास्तुलितपरिणतारक्तशालीलता वः ।
दुर्वारापत्तिगर्तश्रितनिखिलजनोद्धारणे[2] रज्जुभूता
घोराघोर्वीरुहालीदहनशिखिशिखाः शर्म शार्वाः कपर्दाः ॥ १ ॥

आदौ कपर्दा वर्ण्यन्ते शिवस्य परमात्मनः ।
संसारोत्तारणाः पापहारिणः शुभकारिणः ॥

देयासुरिति । शार्वाः कपर्दा वः शर्म देयासुरिति संबन्धः । कपर्दाः कीदृशाः, पिशङ्गाः श्वेतपीताः पीतरक्ता वा, ईषद्रक्तशालीलतासादृश्यस्य वक्ष्यमाणत्वात् । मूर्ध्नि मस्तके राजन्ती भ्राजमाना सरसा रसेन जलादिना सह वर्तमाना 'शृङ्गारपुष्यमधुगांदसुवर्णरेतोनिर्यासरागगरलद्रवपारदेषु । आस्वादनध्वनिसुधाम्बुरसाख्यधातुष्विष्टो रसोऽथ रसना धरणी रसा स्यात् ॥' इति भास्करः । एतादृशी या सुरसरिद्देवनदी मन्दाकिनी तस्या ये

1. सरित्पार० 2. जनोत्तारणे

प्रान्तास्तेषां पर्यन्तः समीपप्रदेश एव पर्यन्तः प्रत्यन्तभूः नदीसमीपभूमिस्तत्र निर्यन्तो निर्गच्छन्तः प्रादुर्भवन्त इत्यधिकरणप्रधाना 'सप्तमी' इति योगविभागात्समासः। प्रांशव उन्नताः, 'उच्चप्रांशून्नतोद्ग्रोच्छ्रिताः' इत्यमरः। स्तम्बाः स्तम्बिन्यादिगुल्मा इत्यभेदरूपकम्; 'अग्रकाण्डे स्तम्बगुल्मौ' इत्यमरः। 'स्तम्बो गुल्मतृणादीनामकाण्डद्रुमगुच्छयोः' इति सुधाकरः। मस्तकगङ्गाप्रान्तपर्यन्तेषु शिरसि गङ्गाप्रान्तपर्यन्तभूमौ प्रसृतास्तम्बा इव राजमाना इत्यर्थः, रूपकस्य गम्योपम्यत्वात् राजदित्यत्र राजतेर्लेटः शानजादेशः, ततः 'उगितश्च' इति ङीपि 'स्त्रियाः पुंवत' इत्यादिना पुंवद्भावः। तनः कीदृशाः, परिणताः परिपक्वाः, अत एव आरक्ताः ईषद्रक्ताः, 'आङीषदर्थे भिव्याप्तौ क्रियायोगे च नीम्नि च' इति मास्करः। एतादृश्यो याः शालीलताः तास्तुलिता यैस्ते तथोक्ता इत्युपमा। तादृशशालीलतासदृशा इत्यर्थः। शालीत्यत्र डलयोरभेदात् 'आङ आप्राप्त्ये' इत्यस्मात्कर्मणि इन्प्रत्यये, 'शल चलने संवरणे च' इत्यस्माण्ण्यन्तात्, 'अच इः' इतीत्यये वा शालिशब्दनिष्पत्तौ 'कृदिकारादक्तिनः' इति ङीषा दीर्घान्तालाभः अपि च दुर्वारा वारयितुमशक्या आपत्तिरापदेव गर्तो भूरन्ध्रं कूपादि. 'गर्तविटौ भुवि श्वभ्रे' इत्यमरः। श्रितस्य तत्र पतितस्य निखिलजनस्योद्धारणे रज्जुभूता इत्यपि रूपकम्, रज्जुभावं प्राप्ता इत्यर्थः, रज्जुशब्दस्यात्र वृत्तिविषये रज्जुभावे वृत्तः। भूतः इति च 'भू प्राप्तौ' इत्यस्माच्चौरादिकात्, 'आ धृषाद्वा' इति विकल्पाण्णिजभावे, 'भूत्यर्थ-' इत्यादिना कर्तरि प्रत्यये रूपम्, प्रमाणभूत आचार्य इतिवत्। अत्र हि महाभाष्यवाक्ये प्रमाणभूत इत्येतत्कैयटेनैवमेव व्याख्यातम्। अत्र कपर्दानां रज्जुभावोक्त्या रज्जूनां चोद्धारणक्रियाकरणतया कपर्दाश्रयस्य शिवस्य तदुद्धारणक्रियाकर्तृत्वं गम्यते। तेन सांसारिकक्लेशकूपपतितांस्तस्मादुद्धारणमभिलषतः स्वकीयदिव्यमङ्गलमूर्तिं साङ्गोपाङ्गां स्तुत्वा भक्तानुद्धरन्नम्बशिवः स्वोत्तमाङ्गस्थकपर्दस्तुत्या तोषितस्तांस्तस्मादुद्धरतीति ध्वन्यते। तथा घोराणि भयंकराण्यघानि पापान्येवोर्वीरुहा वृक्षास्तेषामाल्याः पङ्क्तेर्दहने भस्मीकरणे यः शिखी दावाग्निस्तस्य शिखा ज्वाला इति रूपकम्। एतादृशाः कपर्दाः शर्वस्य शिवस्येमे, 'तस्येदम्' इत्यण्प्रत्ययः। कपर्दा जटाजूटाः वो युष्मभ्यं शर्म सुखं देयासुरित्याशीः। अनुप्रासोऽत्र शब्दालंकारः, 'प्रकृष्टो वर्णविन्यासो रसाद्यनुगतश्च यः। सोऽनुप्रासः स च च्छेकवृत्त्युपाधिगतो द्विधा॥' इति लक्षणात्। स च

सरससुरसेन्यत्र, शिखिशिखा इत्यत्र च च्छेकानुप्रासः. 'द्वयोस्त्रयाणां वा हलामावृत्तौ छेकानुप्रासः' इति लक्षणात्। अन्त्र प्रान्तपर्य-तेत्यादौ वृत्त्यनुप्रासः; 'एकैकवर्णावृत्तौ वृत्त्यनुप्रास.' इति लक्षणात्। अर्थालंकारास्तु, रूपकोपमे प्रागुक्ते; कपर्दानां समर्थनीयस्य सुखदातृत्वस्य दुर्वारापत्तिभर्तृपतितजनोद्धारणकारणरज्जुभावनिखिलदुरितमहीरुहदग्धृशिखिशिखाभावाभ्यां समर्थनात्काव्यलिङ्गं च। तच्चोक्तरूपकानुप्राणितमिति तत्संकीर्णम्। प्राचां मतेनाशीरलंकारश्च। अथैषां लक्षणानि—'एकत्वरूपणं यत्स्यादुपमानोपमेययोः। रूपकं नाम तच्चापि बहुभेदयुतं तथा॥ उपमानानन्यत्वं यत्स्यात्सदृश्यवर्णनम्। समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्॥ आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा।' इति। अत्र कपर्दानां नदीप्रान्तपर्यन्तस्तम्बरूपणेनातिविपुलतयाऽऽगमप्रसिद्धाया गङ्गाया आधेयाया मूर्धैकदेशस्थितिकत्वात्तदाधारभूतस्य मूर्ध्नो निरतिशयाधिक्यं व्यज्यते। तथा च रूपकेणाधिकालंकारो ध्वन्यत इत्यलंकारेणालंकारध्वनिः। 'पृथ्वाधेयाद्यदाधाराधिक्यं तदपि तन्मतम्' इति ह्याधेकालंकारलक्षणम्। तथा सुखदातृत्वं यस्यां तदेव येन केनचिदात्मनेऽन्यस्मै वा सुखदानार्थमाशंस्यत इति प्रसिद्धेरत्र कपर्दानां सुखदानायाशंस्यमानत्वेन कपर्दशब्दो योगरूढः, न तु केवलरूढ इति ध्वन्यत इत्यलंकारेण वस्तुध्वनिः। कपर्दशब्दस्य योगतः सुखदातृत्वमित्थम्—'पर्व पूरणे' अस्मात्संपदादित्वाद्भावे क्विप्, 'ग्लोपः' इति वकारलोपः। तथा च केन सुखेन परं पूर्तिं कस्य सुखस्य परं पूर्तिं ददति कपर्दाः, 'सुपि स्थः' इत्यत्र सुपीति योगविभागात्कप्रत्ययः। प्रायेणैतत्स्तोत्रपद्येष्वनुप्रासालंकारः। अस्मिंस्तोत्रे स्रग्धरावृत्तम्, 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति लक्षणात्॥ १॥

कुर्वन्निर्वाणमार्गप्रगमपरिलसद्भूप्यसोपानशङ्कां
शक्रारीणां पुराणां त्रयविजयकृतस्पष्टरेखायमाणम्।
अव्याद्व्याजमुच्चैरलिकहिमधराधित्यकान्तस्त्रिधोद्य-
ज्जाह्नव्याभं मृडानीकमितुरुडुपरुक्पाण्डरं वस्त्रिपुण्ड्रम्॥ २॥

मोक्षप्रयोजकं गङ्गास्रोतस्त्रयमिव स्थितम्।
त्रिपुण्ड्रं वर्ण्यते शंभोः सुधांशुद्युतिभास्वरम्॥

कुर्वन्निति । निर्वाति निर्याति निर्गच्छत्यात्मनोऽस्मेति वा, निर्वान्ति निरङ्कुशतृप्तिभाजो भवन्त्यत्रेति वा निर्वाणं मोक्षः । 'वा गतिगन्धनयोः' इत्यस्माद्धातोः 'क्तोऽधिकरणे च' इत्यादिनाऽधिकरणे क्तः । अथ वा ...(निर्गतं वानमत्रेति) निर्वाणम्, 'नपुंसके भावे क्तः' इति भावे क्तः । 'निर्वाणोऽवाते' इति निष्ठानत्वम् । अनयोर्ध्वयोर्युङ्वा । निर्वाणमार्गस्य मोक्षमार्गस्य प्रगमः प्रकृष्टगमनम्, 'ग्रहवृ' इत्यादिना अप्प्रत्ययः तेन परिलसतां भासमानानां रूप्यस्य सोपानानां शङ्कां कुर्वत् । अत्र मोक्षस्य परपुरुषार्थत्वात्तन्मार्गगमनं प्रकृष्टगमोऽभ्यर्हितगमनम्, तच्च तैः सोपानैर्लसतीति तेषामभ्यर्हितकार्यकरत्वेन परिलसनमिति प्रगमस्य परिलसत्क्रियाहेतुत्वात्, प्रगमपरिलसादत्यत्र 'तृतीया तत्कृता ...' इत्यादिना, 'कर्तृकरणे कृता' इत्यादिना वा समासः । यथा लोके सुखेन तत्तन्मार्गगमनाय पाषाणादिसोपानानि विरच्यन्ते, तथा सुखेन मोक्षमार्गगमनाय निर्मितरजतसोपानत्रयमिव संभावितमित्यर्थः । उत्प्रेक्षालंकारः । सम्यग्ध्यातं शिवललाटस्थत्रिपुण्ड्रं मोक्षप्राप्तिप्रयोजकमिति गम्यते । शत्रूणां राक्षसानां संबन्धीनि यानि पुराणि तेषां पुराणां त्रयस्य विजयेन कृताः याः स्पष्टरेखास्ता इवाचरत् रेखामाणम्, 'कर्तुः क्यङ्' इत्यादिना क्यङि तदन्ताल्लुटः शानजादेशः । यथा लोके एकं कार्यं कृत्वा तत्सूचकत्वेनैका रेखा क्रियते, तद्वद्दैत्यपुरत्रयविजयकार्यसूचकत्वेन कृतरेखात्रयमित्र भासमानमित्यर्थः । अत्राप्युत्प्रेक्षा । हिमस्य धरः पर्वतः हिमवत्पर्वतः, 'अहार्यधरपर्वताः' इत्यमरः । तस्याधित्यका समीपस्थितोर्ध्वभूमिः, 'उपाधिभ्यां त्यकन्नारूढयोः' इति त्यकन्प्रत्ययः । उच्चैरुन्नतं यल्लिकं ललाटम्, 'ललाटमलिकं गोधिः' इत्यमरः । तदेव हिमधराधित्यकैकदेशविवर्तिरूपकम्, ललाटस्य हिमवदधित्यकात्वेन रूपणात्परमेशदेहस्य हिमवत्पर्वतेन रूपणं गम्यत इत्यवयवरूपणेनावयविनो रूपणस्य गम्यमानत्वात् । तस्या अधित्यकाया अन्तर्मध्ये त्रिधोद्यन्त्या उद्गच्छन्त्या जाह्नव्या आभेवाभा यस्य तत्तथोक्तम्, तादृग्जाह्नवीवाभातीति वा तथोक्तम् । 'आतश्चोपसर्गे' इति कप्रत्ययः । अत्राप्युत्प्रेक्षा, सा चोक्तरूपकानुप्राणितेति तत्संकीर्णा वेति । उडुपस्य चन्द्रस्य रुक् प्रभेव पाण्डरं शुभ्रम्, मृडानीकान्तुः पार्वतीकान्तस्य, 'आयादय आर्धधातुके वा' इति विकल्पाण्णिङभावः । त्रिपुण्ड्रमभ्याजं निरपदेशं निरुपाधिकमिति यावत् । 'व्याजः शाठ्येऽपदेशे च' इति विश्वः । वो युष्मानव्यात् रक्षतु । अत्रानिर्णीते प्रकृते त्रिपुण्ड्रे अप्र-

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥

मनुष्या एव देवादयो भवन्तीति तदुपरीत्युक्तम्। तत्र यदि मनुष्याः सन्तो देवभावं लभन्ते, तर्हि तत्पूर्वं देवताभावात् देवतोद्देश्यके कर्मणि विरोध इति चेन्न, अनेकेषां देवतापद-प्राप्तेर्दर्शनात्[1]। श्रूयते हि—'यज्ञेन यज्ञम्' इत्यादि। अयं हि मन्त्रार्थः—देवाः देवत्वयोग्या मनुष्याः यज्ञेन ज्ञानकर्मात्मकेन यज्ञं भगवन्तमयजन्त। ततस्ते ज्ञानपूर्वकर्मणा स्वःपदं प्राप्य मुख्यलोकधारका आसन्। ते पुनर्महात्मानो देवाः स्वस्वाधिकारावसाने पूर्णसुखात्मकं मोक्षं प्राप्नुवन्। यत्र मोक्षे पूर्वकल्पे मुक्ताः साध्या देवाः सन्तीति ॥

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥

ननु शब्दे वेदाख्ये विरोधः। प्रतिपाद्याना देवानामनित्यतया [2]नित्यानित्यसंयोगविरोध इति चेन्न, प्रभवात्, सर्वकल्पेषु यथापूर्वं देवानां प्रभवात्। तथा च प्रवाहनित्यत्वान्नोक्तदोष इत्यर्थः। अत्र प्रमाणान्याह—अतः प्रत्यक्षानुमानाभ्यामिति। अतः शब्दात् 'धाता यथापूर्वमकल्पयत्' इत्यादिश्रुतेः। प्रत्यक्षात् योगिप्रत्यक्षात्। तच्च—'यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथाभावा युगादिषु ॥' इति तद्वचनात्सिद्धम्। अनुमानात्; पूर्वोत्तरकल्पाः एवं-भूतदेववन्तः, कल्पत्वात्, एतत्कल्पवत्, इत्यादेरित्यर्थः ॥

देवानां प्रवाहनित्यत्वे युक्त्वन्तरमाह—

अत एव च नित्यत्वम् ॥ २९ ॥

वेदनित्यत्वान्यथानुपपत्त्यैवेत्यर्थः ॥

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥

प्राचीनानां मुक्तत्वेन स्वपदेष्ववृत्तावप्यविरोधः, तदन्येषा प्राचीनसमाननामरूपत्वात्, यथापूर्वमिति श्रुतौ दर्शनात्, प्रागुक्तस्मृतेश्चेत्यर्थः। समाननामरूपत्वांशः पूर्वं स्पष्टं नोक्तः, इह सूत्रे स्पष्टीकृत इति भेदः ॥

मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ ३१ ॥

जैमिनिर्मधुविद्यादिषु तावद्देवानामनधिकारमाह। कुतः? असंभवात्। तत्र हि 'वसूना-मेवैको भूत्वा' इत्यादिश्रवणात् वस्वादिपदप्राप्तिः फलम्। तच्च देवानां सिद्धमेव, न साध्यम् ॥

---

1. देवतापदप्राप्तिदर्शनात्। 2. नित्यसंयोगविरोधः

अस्तु तर्हि मोक्षार्थविद्यास्वधिकारः; नेत्याह—

ज्योतिषि भावाच्च ॥ ३२ ॥

ज्योतिषि देवानां ज्ञाने भावात्; सर्ववस्तूनां विषयतया प्रविष्टत्वादित्यर्थः ॥

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

बादरायणस्तु भगवान् देवानामशेषविद्यास्वधिकारसद्भावं मन्यते। मोक्षतदितरफलानां योग्यानां प्राप्तत्वे अयोग्यानां प्राप्तुमशक्यत्वेऽपि ज्ञानमात्रेणासाध्यस्य कर्मप्रयुक्तस्य मोक्षेऽतिशयस्य सिद्धयाऽर्थित्वसंभवात्, भगवदितरेषां निरूपचरितसार्वज्ञ्याभावात्, विचारादिना च ज्ञानविशेषसंभवादिति भावः। उक्तं च स्कान्दे—'यावत्सेवा परे तत्त्वे तावत्सुखविशेषता। [1]संभवाच्च प्रकाशस्य परमेकमृते हरिम्॥ तेषां सामर्थ्ययोगाच्च देवानामप्युपासनम्। सर्वं विधीयते नित्यं सर्वयज्ञादिकर्म च॥' इति। न चैवं जैमिनिमतविरोधः, प्राप्तफलार्थं नानुष्ठेयमित्येतावन्मात्रस्य तदभिमतत्वात्। तदङ्गीकारेणैव फलान्तरार्थितयाऽधिकारस्य भगवता समर्थितत्वात्। 'सर्वज्ञस्यैव कृष्णस्य त्वेकदेशविचिन्तनम्। स्वीकृत्य मुनयो ब्रूयुस्तन्मतं न विरुध्यते॥' इति ब्राह्मे। अतो देवानां सर्वविद्याधिकारित्वात्तदुपास्यत्वं हरेर्युक्तमिति माध्वाधिकरणशरीरम्। अत्रोपास्यस्य ब्रह्मत्वं नास्तीत्यादि सामान्यखण्डनं बोध्यम्। मोक्षे तारतम्यं च दूषयिष्यते। देवानां ब्रह्मविद्याधिकार इत्यंशस्त्विष्टः। यज्ञाद्यधिकार इति तु 'यतो विधिनिषेधेषु मनुष्याणामधिक्रिया। अतः पशुपिशाचाद्या धर्माधर्मोचिता मताः॥' इति पाद्मवचनेन विरुद्धं न्यायविरुद्धं च, वर्णाश्रमादिसापेक्षाधानं विनाऽन्यसिद्धेः। एतेन तिर्यग्विशेषा अपि व्याख्याताः। अत एव 'गावो वा एतत्' इत्यादीनां [2]गुणार्थवादतेत्येव शास्त्रकृतां निर्भरः। प्रवाहनित्यताऽपि त्वया दुरुपपादा, जातेः प्रतिव्यक्ति भेदस्य व्यक्त्या सहात्यन्ताभेदस्य च स्वीकारात्॥

स्यादेतत्। शूद्रोऽपि तर्ह्यधिकारी स्यात्, मनुष्यत्वाविशेषात्, विशिष्टबुद्धियोगाच्च। श्रूयते च पौत्रायणस्य वैदिकसंवर्गविद्याध्ययनम्। न चासावशूद्र एवेति वाच्यम्, 'तमुह परः प्रत्युवाच अहहारे त्वा शूद्र तवैव सह गोभिरस्तु' इति पौत्रायणं प्रति रैक्वोक्तेः। अत्र सिद्धान्तमाह सूत्रकारः—

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३४ ॥

भवेदेवं यदि पौत्रायणः शूद्रः स्यात्; न त्वेवम्। कथं तर्हि शूद्रेति संबोधनमिति चेत्, तदाद्रवणात्, तया शुचा आद्रवणात्, शुचा द्रवतीति यौगिकः शब्द इति भावः। तदुक्तम्—'राजा

---

1. संभवाच्चाप्रकाशस्य 2. गुणार्थवादतेत्येष

पौत्रायणः शोकाच्छूद्रेति मुनिनोदितः ।[1]प्राणविद्यामधाष्यास्मात्परं धर्ममवाप्तवान् ॥' इति । अस्य शूद्रकृत इति चेत्, तदनादरश्रवणात्, 'कम्बर एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थ' इति हंसकृतानादरश्रवणादित्यर्थः । अरे हंस एतद्वचनं कमेनमुद्दिश्य आत्थ सन्तं सयुग्वानं रैक्वमिवेति योजना। सूच्यते हि श्रुतौ शोकः 'स ह संजिहान एव क्षत्तारमुवाच' इति । सः श्रुतानादरः पौत्रायणः श्रयनीयादुत्तिष्ठन्नेव क्षत्तारं रैक्वगवेषणायोवाच इत्युक्त्वा हि व्यग्रत्वेन शोकः श्रुतौ सूचितः । मुनिस्तु सार्वज्ञ्यात् शोकेन द्रवणं बुद्ध्वा शूद्रेति समबोधयदिति भावः ॥

ननु योगाद्दृढिर्बलीयसीत्याशङ्क्याह—

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

'अयमश्वतरीरथः' इति चित्ररथसंबन्धित्वेन लिङ्गेन पौत्रायणस्य क्षत्रियत्वावगतेः 'रथस्त्वश्वतरीयुक्तश्चित्र इत्यभिधीयते' इति ब्राह्मे । 'यत्र वेदो रथस्तत्र न वेदो यत्र नो रथः इति ब्रह्मवैवर्ते ॥

संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ ३६ ॥

'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इत्यध्ययनार्थं संस्कारपरामर्शात् । 'नाग्निर्न यज्ञो न संस्कारो न व्रतानि शूद्रस्य' इति पैङ्गिश्रुतौ संस्काराभावाभिलापाच्चेति सूत्रार्थः ॥

तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

'नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि' इति सत्यकामवचनेन तस्यार्जवं ज्ञात्वा 'नैतदब्राह्मणो विवक्तुमर्हति' इति शूद्रत्वाभावं निश्चित्य तदुपनयने गौतमस्य प्रवृत्तेरित्यर्थः ॥

श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥ ३८ ॥

'श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणम्, अध्ययने जिह्वाच्छेदः, अर्थावधारणे हृदयविदारणम्' इति प्रतिषेधात् । 'नाग्निर्न यज्ञः शूद्रस्य तथैवाध्ययनं कुतः। केवलैव तु शुश्रूषा त्रिवर्णानां विधीयते ॥' इति स्मृतेश्च । विदुरादीनां तु उत्पन्नतत्त्वज्ञानत्वान्न कश्चिन्निषेध इति भाष्यतत्त्वप्रकाशिकादौ स्थितम् ॥

कठवल्लीषु पठ्यते—'महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति' इति । तत्र वज्रशब्दो रूढिबलादिन्द्रायुधपर इति प्राप्ते, आह—

---

1. प्राणविद्यामुपास्यास्मात्परं धर्ममुपास्तवान्

कम्पनात् ॥ ३९ ॥

भगवानेव वज्रशब्दार्थः, 'यदिदं किं च जगत्सर्वं प्राण एजति निःसृतम्' इति पूर्वार्धे कम्पनश्रवणात्। यत्किंच सर्वं जगत् प्राणे स्थितं प्राणान्निःसृतं तदिदं जगद्यस्मादेजति यत्प्रेरणया चेष्टते तन्महद्भयंकरं वज्रं ये विदुस्तेऽमृता भवन्ति इति हि श्रुत्यर्थः। न च सर्वजगच्चेष्टयितृत्वं भगवतोऽन्यस्य संभवति। न वाऽन्यज्ञानान्मोक्षः। न चोद्यतत्वलिङ्गविरोधः, उद्यमित्वार्थत्वात्। 'चक्रं चक्रक्रमणादेव वर्जनाद्वज्रमुच्यते। खण्डनात्खड्ग एवैष हेतिनामा स्वयं हरिः॥' इति ब्रह्मवैवर्ते। खण्डनं प्राग्वत्॥

वाजसनेयके श्रूयते—'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' इति। अत्र ज्योतिः किं जीवो विष्णुर्वेति संशये, 'उभौ लोकावनुसंचरति' इति लिङ्गाज्जीव एवेति प्राप्ते, आह—

ज्योतिर्दर्शनात् ॥ ४० ॥

'विष्णुरेव ज्योतिः' इति चतुर्वेदशिखायां दर्शनादित्यर्थः। तस्यापि लोकसंचरणमस्त्येव, प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन्याति' इति वचनात्। अधिकरणखण्डनं प्राग्वत्॥

छान्दोग्ये श्रूयते—'आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति। अत्राकाशः प्रसिद्ध एव ग्राह्यः, रूढेरिति प्राप्ते, आह—

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥

आकाश इह विष्णुरेव, नामरूपराहित्याख्यविलक्षणार्थत्वव्यपदेशात्. 'तद्ब्रह्म' इति ब्रह्मत्वव्यपदेशाच्च। 'ते यदन्तरा' इत्यस्य हि, ते नामरूपे अन्तरा विना वर्तत इत्यर्थः। 'अनामा सोऽप्रसिद्धत्वादरूपो भूतवर्जनात्' इति ब्राह्मे। खण्डनं प्राग्वत्। अत्र निर्वहितृत्वमित्यादिमंत्रब्राह्मणेष्वपशब्दः, श्रुतौ हि च्छान्दस इति॥

वाजसनेयके श्रूयते—'स वत्तन्न किंचित्पश्यत्यनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुषः' इत्यादि। तत्र स्वप्नादिद्रष्टा जीवो विष्णुर्वेति संशये जीव इति प्राप्तम्, तस्यैवावस्थात्रयप्रसिद्धेः। सिद्धान्तस्तु—विष्णुरेवेति, असङ्गत्वलिङ्गात्। स्वप्नादिद्रष्टृत्वं च सर्वज्ञत्वात्तस्य युज्यते। नन्वीश्वराभेदेन जीवेऽप्यसङ्गत्वोक्तिरस्तु इत्याशङ्क्याह सूत्रकारः—

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥

'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' इति सुषुप्तौ 'प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति' इत्युत्क्रान्तौ च भेदेन जीवेशयोर्निर्देशात्तद्भेदस्यासिद्धेरित्यर्थः। खण्डनं तु कृतप्रायम्, भेदस्य व्यावहारिकत्वात्, अध्यस्तसङ्गेन वास्तवासङ्गत्वानपायाच्च ॥

'एष नित्यो महिमा ब्राह्मणस्य' इति श्रूयते। अत्र ब्राह्मणो विरिञ्चो विष्णुर्वेति संशये विरिञ्च इति प्राप्तम्, 'स वा एष महानज आत्मा' इत्यजशब्दात्। सिद्धान्तस्तु विष्णुरेवेति। अत्र हेतुमाह सूत्रकारः—

पत्यादिशब्देभ्यः ॥ ४३ ॥

'सर्वस्याधिपतिः सर्वस्येशानः' इत्यादिशब्देभ्यो विष्णोर्नित्यमहिमत्वावगमादित्यर्थः। अजशब्दस्तु न जायत इति योगेन बोध्यः। अण गतौ, ब्रह्मणा वेदेन अण्यते गम्यते इति ब्राह्मणः। व्यत्ययात्साधुः। ननु विष्णोरवतारैरिव विरिञ्चेन सहाभेद एव, 'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादये हरिविरिञ्चहरेति संज्ञाः' इति भागवतोक्तेरिति चेत्, न, उक्तवचनस्य तदन्तर्गतेश्वररूपापेक्षयोपपत्तेरिति माध्वाधिकरणशरीरम्। खण्डनं प्राग्वत् ॥

इति श्रीतत्त्वकौस्तुभे द्वितीयपरिच्छेदे प्रथमाध्यायस्य
तृतीयः पादः ॥

॥ प्रथमाध्यायस्य चतुर्थः पादः ॥

'तत्तु समन्वयात्' इति सूत्रे सर्वे शब्दा विष्णुवाचका इत्युक्तम्। तदनुपपन्नम्, अव्यक्तादिशब्दानामन्यत्रैव प्रसिद्धेः, इत्याशङ्क्य तेषामपि विष्णुरेव मुख्योऽर्थ इति समर्थयितुमयं पाद आरभ्यते—

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥

'महतः परमव्यक्तमव्यक्तात्पुरुषः परः' इति सांख्यानुमानकल्पितं प्रधानमप्येकेषां कठानां शाखायामुच्यत इति चेत्, न, शरीररूपके परमात्मतन्त्रतया तदीयशरीरप्राये प्रधानादौ विन्यस्तस्य स्थितस्य परमात्मन एवाव्यक्तशब्देन ग्रहणात्। दर्शयति च पिप्पलादशाखायाम्— 'अव्यक्तमचलं शान्तं निष्कलं निष्क्रिय परम्। यो वेद हरिमात्मानं स भयादनुमुच्यते ॥' इति। अत्र जीवादिशब्दानप्युपलक्ष्य 'अनेन जीवेनात्मना' इत्यादिश्रुतयोऽप्युदाहार्या इति जयतीर्थः ॥

नन्वस्त्वेवं श्रौतस्मार्तप्रयोगबलेनाव्यक्तादिशब्दानां भगवद्वाचित्वम्, तथाऽपि तत्रैव मुख्यतेति कुतः? तत्राह—

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

सूक्ष्ममेवाव्यक्तशब्देनोच्यते; तद्धयव्यक्ततामर्हति। सूक्ष्मत्वं च भगवत एव मुख्यम्, 'यत्तत्सूक्ष्मं परमं वेदितव्यं नित्यं परं वैष्णवं धामनन्ति' इति पिप्पलादशाखायाम्। एवं जीवादिशब्दप्रवृत्तिनिमित्तानां प्राणधारणादीनां भगवति मुख्यत्वेन तेषां तत्र मुख्यत्वम्। तदुक्तम्—'स जीवनामा भगवान् प्राणधारणहेतुतः। उपचारेण जीवाख्या संसारिणि निगद्यते॥' इति॥

ननु 'अव्यक्तात्पुरुषः परः' इत्यादौ अव्यक्तादीनां महत्परत्वं पुरुषावरत्वं दुःखबहुत्वादिकं च श्रूयमाणं कथं परमात्मग्रहणे संगच्छताम्? अत आह—

तदधीनत्वादर्थवत् ॥ ३ ॥

प्रधानादिगतपरावरत्वादिधर्माणां भगवदधीनतया तस्मिन्नेवावरत्वादिवाचिशब्दजातमर्थवत्। 'यदधीनो गुणो यस्य तद्गुणी सोऽभिधीयते। यथा जीवः परात्मेति यथा राजा अयीति च॥' इति स्कान्दे। एवं च 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यादेरपि ब्रह्मणि समन्वयो बोध्यः। तथा हि—इन्द्रियशब्दप्रवृत्तिनिमित्तस्येन्द्रियत्वस्य ब्रह्माधीनत्वादिन्द्रियशब्दो ब्रह्मपरः। इन्द्रियगतपरत्वावधित्वस्य पञ्चम्यर्थस्य ब्रह्माधीनत्वात्पञ्चम्यपि ब्रह्मपरा इत्यादि। इन्द्रियदेवतातदुत्कर्षकमप्रतिपादकत्वमपि न त्यज्यते, श्रुतेरनेकार्थत्वाभ्युपगमादिति दिक्॥

इतोऽप्यव्यक्तशब्दो न प्रधानपर इत्याह—

ज्ञेयत्वावचनाच्च ॥ ४ ॥

यज्ज्ञाने मोक्षस्तज्ज्ञापको हि वेदः। ज्ञेयत्वं च विष्णोरेवोक्तम्—'तमेव विदित्वा' इत्यादौ; न तु प्रधानस्येत्यर्थः॥

वदतीति चेन्न प्राज्ञो हि ॥ ५ ॥

'अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते' इति ज्ञेयत्वं वदतीति चेत्, न; प्राज्ञः परमात्मा हि तत्रोच्यते। स एव हि महतः परः, 'अणोरणीयान्महतो महीयान्' इति श्रुतेः। नन्वणुप्रतियोगिभूतं स्थूलमेव महच्छब्दार्थ इति चेत्, सत्यम्; भावतोऽपि महत्तत्त्वात्परत्वं लभ्यत एव, सकलस्थूलमध्ये महत्तत्त्वस्याप्यन्तर्भावात्॥

प्रकरणात् ॥ ६ ॥

वैष्णवं हीदं प्रकरणम्, 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इति श्रवणात् ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ७ ॥

त्रयं ह्यत्रोपन्यस्तम्—पितुः सौमनस्यम्, स्वर्योऽग्निः, परमात्मा चेति । प्रश्नोऽप्येषां त्रयाणामेव । यद्यपि पितृसौमनस्यं वरत्वेन प्रार्थितम्, न तु पृष्टम्, तथाऽपि 'अविज्ञातप्रार्थनं च प्रश्न इत्यभिधीयते' इति वचनान्न विरोधः । अविज्ञातं प्राप्यते न वेत्यनिर्णीतं तस्य यत्प्रार्थनं सोऽपि प्रश्न इत्यर्थः ॥

महच्च ॥ ८ ॥

यथा महत्तत्त्वे प्रसिद्धोऽपि महच्छब्दः 'महान्तं विभुमात्मानम्' इत्यत्र ब्रह्मपरः, तथाऽव्यक्तशब्दोऽपीति सूत्रार्थः ॥

चमसवदविशेषात् ॥ ९ ॥

यथा चमसशब्दो यज्ञपात्रे प्रसिद्धोऽपि शिरोवाचकः, 'इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' इति श्रुतेः, एवमव्यक्तादिशब्दाः सर्वे अन्यत्र प्रसिद्धा अपि विष्णुवाचका एव, 'नामानि सर्वाणि [1]यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' इति श्रुतेरित्यर्थः । अविशेषादिति, श्रुत्योरनुशासनरूपतया शक्तिग्राहकत्वाविशेषादित्यर्थः । 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' इति व्याख्येयमन्त्रे यदुक्तम्, तदिदं प्रतीयमानं शिरः, कुतः? एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः । एष इति विधेयानुरोधि लिङ्गम् । 'दक्षिणाऽन्नं वनुते यो न आत्मा', 'णेरणौ यत्कर्म णौ चेत्स कर्ता', 'शौल्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत् । बिलं मुखादि । तस्माद्व्यक्तादिशब्दवाच्यो हरिर्भवत्येवेति सर्वशब्दवाच्यत्वं तस्योपपन्नमिति माध्वाधिकरणशरीरम् ।

अत्रेदं वक्तव्यम्—प्रवृत्तिनिमित्तताद्धीन्यबलेन सर्वशब्दानां विष्णौ परममुख्यत्वं तावत्त्वयोक्तम् । तदेव शिवविरिञ्चयोरपि स्यात्, तयोरप्यन्तर्यामित्वस्य समन्वयाधिकरणशुभ्वाद्यधिकरणभङ्गे स्फुटीकृतत्वात् । तथा च न तेन समन्वयस्य विष्णौ व्यवस्थितत्वं सिध्यति । किं च प्रवृत्तिनिमित्तताद्धीन्यकथा वृथैव, तत्तच्छब्दप्रवृत्तिनिमित्ताश्रयस्यैव तत्तद्वाच्यत्वात् । वृद्धव्यवहारो हि शक्तिग्रहे मूलम् । स च प्रवृत्तिनिमित्ताश्रयगोचर एव, न तु तत्स्वामिगोचरः, घटमानयेत्युक्ते घटादावप्रवृत्त्यापत्तेः । न हि घटः स्वामी ॥

---

1. यमामनन्ति

स्यादेतत्। यस्य शब्दस्य प्रवृत्तिनिमित्तमाश्रितत्वेन यथेष्टविनियोक्तृत्वरूपस्वातन्त्र्यविषयत्वेन वा यदधीनं स तस्य वाचकः। अत एव भृत्यगतस्य जयस्य राजानाश्रितत्वेऽपि तदधीनत्वमात्रेण राजा जयतीत्यपि प्रयोग इति चेन्न, तथा सति [1]रिपुगतदुःखबन्धमरणादीनां राजाधीनत्वमात्रेण राजा दुःखी बद्धो मृत इत्यादिप्रयोगापत्तेः। राजा जयतीति तु सम्यगेव। जिधात्वर्थभूतस्योत्कर्षस्य [2]राजनि सत्त्वात्। स च पराभिभावकभृत्यायत्त एव। अभिभवेऽपि प्रयोजककर्तृत्वाच्चास्तु वोपचारमात्रम्। यत्तु 'यदधीनो गुणो यस्य इति स्कान्दम्' इत्युदाहृतम्, तदपि 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिभिर्ब्रह्मगीतादिवचनजातैश्च विरोधाद्वचनाभासकल्पकधूर्तमाध्वमात्रमुखनिर्गतत्वाच्चोपेक्ष्यम्; लाक्षणिकार्थप्रदर्शनपरं वाऽस्तु। एतेन 'नामानि सर्वाणि यमाविशन्ति' इति व्याख्यातम्। चमसशब्दोऽप्येवमेव, 'अनन्यलभ्यः शब्दार्थः' इति न्यायात्। यत्तूक्तमनुशासनमेतदिति, तत्तुच्छम्, आविशन्तीत्यस्य बोधयन्तीत्येतावन्मात्रपरतया शक्तिलक्षणयोरौदासीन्येन 'यतो वाचो निवर्तन्ते', 'यद्वाचाऽनभ्युदितम्' इत्यादिश्रुतीनाम्, 'यतो वाचो निवर्तन्ते निमित्तानामभावतः' इत्यादिस्कान्दादीनां चाविरोधाय लक्षणाभिप्रायेणैव व्याख्येयत्वात्। किं च 'यो देवानां [3]नामधा एक एव' इति श्रुत्यनुरोधेन 'नामानि सर्वाणि' इत्यपि इन्द्रवरुणादिशब्दमात्रपरम्। तथा च श्रूयते—'इन्द्रं मित्रं वरुणमग्निमाहुः' इत्यादि। अतो नानेन सकलशब्दप्रतिपाद्यत्वं लभ्यते; शक्यत्वं तु दूरत एव। अपि च प्रकरणादिति हेतुस्त्वद्रीत्या न संभवदुक्तिकः, ब्रह्मप्रकरणस्थानामप्यब्रह्मवाचिनां शब्दानां लक्षणसमर्पकतया स्वीकारात्। कथमन्यथा जन्मादिसूत्रं संगच्छताम्? एतावान् परं भेदः—तत्र कार्यतयोपन्यासः, अत्र तु ब्रह्मनिष्ठतयोत्कर्षावधितयेति। ननु, तत्राप्याकाशादिशब्दा ब्रह्मपरा इति 'कारणत्वेन चाकाशादिषु' इत्यधिकरणे वक्ष्यत इति चेन्न, तस्यापि दूषयिष्यमाणत्वात्। ब्रह्मप्रकरणस्थतामात्रेण सर्वेषां ब्रह्मवाचकत्वे ज्योतिष्टोमादितत्तत्प्रकरणस्थानां सर्वेषां तत्तद्वाचकताप्रसङ्गाच्च। न हि स्वर्गकामादिशब्दा अपि यागवाचका इति कश्चिदभ्युपैति। अधिकं तूत्तराधिकरणभङ्गे स्फुटीकरिष्यते॥

स्यादेतत्। अस्तु नामोपनिषन्निष्ठानामब्रह्मणि प्रसिद्धानां शब्दानां ब्रह्मवाचिता। तावताऽपि समन्वयसूत्रोक्तं सर्वशब्दानां ब्रह्मवाचकत्वं न सिध्यति, कर्मकाण्डपठितानां ज्योतिरादिशब्दानां तदभावात्; अत आह—

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ १० ॥

अत्र ज्योतिरादिशब्दवाच्यं विषयः। विष्णुः, अन्यद्वेति संदेहः। अन्यदिति प्राप्तम्, अन्यत्रैव प्रसिद्धेः। प्रसिद्धिमपहाय ब्रह्मवाचकत्वकल्पने विहितानुष्ठानविलोपापत्तेः निषिद्धानुष्ठाना-

---

1. भृत्य० 2. राजनिमित्तत्वात् 3. नामधारक

अतो नास्ति पदभेदः। पद्यते गम्यतेऽनेनेति हि पदम्। अतो गमकस्वरूपस्य कियताऽपि रूपेण सति भेदे भिन्नं पदम्, तदभावे तु धर्ममात्रभेदान्न तद्भिद्यते। एवं 'देवासः' 'त्मना' इत्यादिषु; लौकिकेभ्यः न्यूनातिरेकैकतत्स्वरूपभेदे सत्यपि तद्रूपस्यार्थान्तरानवगमात्, किंचिद्रूपभेदेऽपि लौकिकपदप्रत्यभिज्ञानात्, सत्यपि च केषांचिद्भेदे सर्वेषां भेदस्याप्रामाणिकत्वात्, पदैक्ये च तदर्थावगमात्, उत्तानादिवचनस्यान्यपरत्वात्, अश्ववालाद्यर्थभेदेऽपि केषांचिद्भेदे सर्वेषां तदभावात् सिद्धमेकत्वं लोकवेदयोः पदपदार्थानाम् ॥

एवं सिद्धे विचार्यते—किमाकृतिः शब्दार्थ उत व्यक्तिरुताकृतिविशिष्टा व्यक्ति-

---

कत्वेऽपि ब्रह्मब्राह्मणादिषु न्यूनातिरेकयोर्भेदकत्वस्य क्लृप्तत्वात् त्मनेत्यादिषु पदभेदः स्यादित्याशङ्क्याह— एवं देवासः त्मनेत्यादिष्विति। धर्मभेदान्न भिद्यत इत्यनुषङ्गः। स्वरभेदादिवन्न्यूनातिरेकधर्मभेदादपि त्मनेत्यादिपदं न भिद्यत इत्यर्थः। तत्र हेतुमाह— लौकिकेभ्य इति। ब्रह्मब्राह्मणादिष्वर्थभेदावगतिसत्त्वात्तत्र न्यूनातिरेकयोर्भेदकत्वमिष्यते। नेह तथाऽर्थान्तरावगतिरस्तीत्यर्थः। ननु त्मनेत्यादिपदैरर्थान्तरस्थेव आत्माद्यर्थस्याप्यवगतिर्न संभवति, रूपभेदादित्याशङ्क्याह— किंचिदिति। किंचिद्रूपभेदेऽपि मुण्डनादिविकृते देवदत्त इव प्रत्यभिज्ञानसत्त्वात् च भेद इत्यर्थः। ननु 'विश्वानि देव वयुनानि विद्वान्' इत्यादिषु वयुनादिपदानि कर्मज्ञानार्थानि लौकिकभिन्नानि दृश्यन्त इत्याशङ्क्याह—सत्यपि चेति। सर्वेषामिति। न हि कचिद्भेदो दृष्ट इत्येतावता भेदकाभावेऽपि भेदोऽभ्युपगन्तुं युक्तः। तथा सति 'गौर्दक्षिणा' 'व्रीहिभिर्यजेत' इत्यादिषु गवादिपदानामपि भेदेन प्रयोगचोदनानामभावप्रसङ्गात्। सर्वेषां पदानां भेदे तदर्थानवगत्या क्रियाकारकभावसंबन्धाप्रतीतेः। अतः प्रयोगचोदनानामर्थप्रत्ययं जनयन्तीनां सद्भावाल्लोकवेदयोः प्रत्यभिज्ञानाविभागाच्च पदैक्यमेव युक्तमित्यर्थः। तदिदमाह—पदैक्ये च तदर्थावगमादिति। प्रत्यभिज्ञानप्रमाणके पदैक्ये सत्येव तदर्थावगतिः संभवति, नान्यथेति भावः। उत्तानादीति। उत्तानवाक्ये ये उत्ताना वहन्ति तेषां देवगवत्वम्, ये देवस्वामिका गावः तेषामुत्तानवाहित्वं वा न विधीयते। उत्तानवाहिनां देवगवानां चाप्रसिद्धत्वेनानुवादासंभवात्। किं तु यज्ञद्रव्यत्वेन यज्ञदक्षिणात्वेन वा देवतासंबन्धिनो ये मनुष्याणां गावः, तानूर्ध्व भूमिज्योतिश्चक्रलग्नचरणतया तत्र स्थितान् देवान् प्रत्युपरिभ्रमणदशायामुत्तानवाहिन इव दृश्यन्ते इति तद्दृष्ट्या तथोक्तिरिति भावः। उत्तानादीत्यादिशब्देन 'देवेभ्यो वनस्पते हवीꣳषि हिरण्यवर्ण प्रदिवस्ते अर्थम्' इत्यादि गृह्यते। तत्र वनस्पतेर्हिरण्यवर्णत्वं स्तुत्यर्थतया, हेमाचलादिषु तथाभूतवनस्पतिसद्भावाच्चोक्तमिति योज्यम्। अश्ववालाद्यर्थभेदशङ्कां निराकुर्वन्नधिकरणार्थमुपसंहरति—अश्ववालादीति ॥

एवमुपोद्घाताधिकरणं समाप्य जातिरेव शब्दार्थ इति निर्णेतुं विचारभारभते—एवं सिद्ध इति। इह वार्त्तिककारैर्गवादिपदानां जातिरेवार्थः, व्यक्तिरेवार्थः, जातिर्वा व्यक्तिर्वा विकल्पेनार्थः,

रिति त्रयः पक्षाः प्राधान्यतश्चिन्त्यन्ते । अन्ये तु विकल्पसमुच्चयसंबन्धसमुदायादयः सर्वे पक्षा आकृतिविशिष्टव्यक्तिपक्षनिराकरणेनैव निराकृता भवन्तीति न पृथग्विचार्यन्ते । तत्र—

प्रयोगचोदनाभावाद्व्यक्तेरेवाभिधेयता । न ह्याकृतिरमूर्तत्वाद्व्यवहारोपयोगिनी ॥

लिङ्गकारकसंख्याभिः संबन्धोऽस्या न कल्पते । सामानाधिकरण्यं च न जातिगुणशब्दयोः ॥

व्यक्तिवाचित्वपक्षे तु सर्वमेतत्समञ्जसम् । तेन शुद्धा विशिष्टा वा व्यक्तिः शब्दस्य गोचरः ॥

'व्रीहीनवहन्ति' 'पशुमालभेत' 'गामानय' 'ब्राह्मणो न हन्तव्यः' इति यावन्त एवमादयो विनाशिमूर्तद्रव्यगोचराः प्रयोगविधयः प्रतिषेधा वा, ते सर्वे व्यक्तावेव संभवन्ति नाकृतौ । न ह्याकृतिरवहन्तुमालब्धुमानेतुं हन्तुं वा शक्यते, नित्यत्वादमूर्तत्वाच्च । तेनानर्थकं तद्विधानं प्रतिषेधश्च, प्राप्त्यभावात् । व्यक्तिपक्षे तूपपद्यते । तस्माद्व्यक्तिः शब्दार्थः । एवं च वृक्षौ वृक्षाभ्यामिति व्यक्तौ प्रातिपदिकार्थे प्रत्ययाभिहितानि लिङ्गसंख्याकारकाणि तया संबध्यन्ते । जातेरलिङ्गत्वादसंख्यत्वादमूर्तत्वेनाकारकत्वाच्चासंबन्धः स्यात् । सामानाधि-

---

जातिर्व्यक्तिश्च समुच्चयेनार्थः, जातिव्यक्त्योः सबन्धोऽर्थः, जातिव्यक्त्योः समुदायरूपो धर्मोऽर्थः, व्यक्तिविशिष्टा जातिरर्थः, जातिविशिष्टा व्यक्तिरर्थ इति संभावितानष्टौ पक्षान् संशयकोटित्वेन प्रथम प्रदर्श्य संबन्धपक्षे जात्यैव विशिष्टः संबन्धोऽर्थः, व्यक्त्यैव, जातिव्यक्तिभ्यां विकल्पेन, ताभ्यां समुच्चयेन, तदुभयसमुदायरूपधर्मेण, जातिविशिष्टव्यक्त्या, व्यक्तिविशिष्टजात्या, परस्परविशिष्टाभ्यामुभाभ्यां वेत्यष्टाववान्तरपक्षाः प्रदर्शिताः । एवंप्रकारेण लिङ्गसंख्याकारकान्वयानन्वयप्रकारैश्च षष्ठ्युत्तरप्रकारैश्च (?) षष्ठ्युत्तरसार्धसहस्रसंख्याः पक्षभेदा विचारिताः । इह तु जातिः, व्यक्तिः, जातिविशिष्टा व्यक्तिरिति पक्षत्रयमेव विचार्यते । अन्ये सर्वे पक्षाः व्यक्तिविशिष्टजातिपक्षनिराकरणेनैव निराकृताः स्युरिति न पृथग्विचार्यन्त इत्याह—किमाकृतिरिति ॥

प्रयोगेति । अवहननाद्यनुष्ठानचोदनासद्भावात् व्यक्तिरेवाभिधेया, अन्यथा तदानर्थक्यप्रसङ्गादित्यर्थः । आकृतेरभिधेयत्वे प्रयोगचोदनानर्थक्यं सार्धश्लोकेनोपपादयति—न हीति । व्यक्तेरभिधेयत्वे तासां सार्थकत्वं श्लोकार्धेनोपपादयति—व्यक्तिवाचित्वेति । एवं व्यक्तेरभिधेयत्वावश्यंभावे सति शुद्धा, जातिविशिष्टा वा व्यक्तिरभिधेया इति द्वेधा पूर्वपक्षं दर्शयति—तेनेति ॥

श्लोकान् व्याचष्टे—व्रीहीनित्यादिना । लोकवेदयोरर्थैक्यादुभयत्रापि आख्यातार्थस्य अवहननादेः, विभक्त्यर्थस्य लिङ्गादेः, अरुणपदादिसामानाधिकरण्यस्य च व्यक्तावेवान्वय उपपद्यते न जातौ इति केवलव्यक्तिवाचित्वं जातिविशिष्टव्यक्तिवाचित्वं वाऽभ्युपेयम् । द्वितीयपक्षेऽपि

करण्यं च गौः शुक्ल इति शुद्धव्यक्तिवचनयोरेकार्थत्वादुपपद्यते। जातिगुणविशिष्टद्रव्यवचनत्वेऽपि विशेषणभेदे सत्यपि विशेष्याभेदादुपपन्नम्। त्वत्पक्षे तु जातिगुणमात्रवृत्तित्वादर्थभेदे दुर्लभं सामानाधिकरण्यं स्यात्। एवं पुरुषो देवदत्त इति जातिद्रव्यवचनयोर्दर्शयितव्यम्। तस्माद्व्यक्तिरेवार्थः। कथं तर्हि व्यक्तयन्तरे प्रयोगो यत्र न दृष्टः शब्दः तत्र? सामान्यस्योपलक्षणत्वाददोषः। यैवमाकृतिका सा गौरिति सामान्यमुपलक्षणीकृत्य शब्दार्थशिक्षा, योऽयं शुक्लवासाः स देवदत्त इतिवत्। यथा च तत्रोपलक्षणभूतं वासोऽनभिधाय देवदत्त एवाभिधीयते, तथेहाप्युपलक्षणमात्रत्वात् सामान्यस्यानभिधाने व्यक्तय एव शुद्धा अभिधीयन्ते। एकोपलक्षणत्वादेव नानेकशक्तिकल्पनापत्तिः। आकृतिविशिष्टव्यक्त्यभिधाने तु न कश्चिद्दोषः। तस्माद्व्यक्तिरेव शुद्धा विशिष्टा वा शब्दार्थ इति। नैतद्युक्तम्। कुतः?—

आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः। संदेहाच्चरमज्ञानाच्चित्रबुद्धेरभावतः॥

विशेष्याभेदमात्रेण जातिगुणशब्दानां व्यक्तिपर्यन्तत्वेन सामानाधिकरण्योपपत्तिरित्यर्थः। तस्माद्व्यक्तिरेवार्थ इति केवलव्यक्तिपक्षोपसंहारस्तत्र प्रथमं संभावितशङ्कापरिहारार्थः। अत एव तत्र प्रथममनुपपत्तिमाशङ्कते—कथं तर्हीति। यत्र न दृष्टः शब्द इति; यत्र प्रथमं गोशब्दो न दृष्टः तत्र व्यक्त्यन्तरे कथं पश्चात्प्रयोग इति पूर्वेण सबन्धः। शब्दार्थबहिर्भूतयाऽपि जात्योपलक्षिता व्यक्तिरभिधेयेति शक्तिग्रहे सति यत्र जातिर्दृश्यते तत्र तत्प्रयोग उपपद्यत इति सदृष्टान्तं परिहरति—सामान्यस्येति। जातेरुपलक्षणी(लक्षण)त्वेन शुक्लवाससस्त्वादिवत् शब्दार्थानन्तर्भावे व्यक्तीनां प्रवृत्तिनिमित्तेनैकधर्मेण क्रोडीकाराभावात्प्रतिव्यक्ति पृथक्शक्तिः कल्प्येति शक्त्यानन्त्यं स्यादित्याशङ्क्याह—एकोपलक्षणेति। विशेषणेनेवोपलक्षणेनापि क्रोडीकारे नानेकशक्तिकल्पनापत्तिः। अन्यथा विशेषणेन क्रोडीकारेऽपि व्यक्त्यनेकत्वानपायात् शक्त्यानन्त्यं स्यादिति भावः। द्वितीयपक्षे तु विशिष्टरूपस्य शक्यस्यैक्यान्नैतच्छङ्कावकाशोऽपीत्याह—आकृतिविशिष्टेति। 'प्रयोगचोदनाभावात्' इति सूत्रं लोकवेदाधिकरणे सिद्धान्तसूत्रं सादिहाधिकरणे पूर्वपक्षसूत्रम्। 'आकृतिस्तु' इति सिद्धान्तसूत्रम्। वयाकृतिशब्दो नैयायिकैः 'व्यक्तिर्गुणविशेषाश्रयो मूर्तिः, 'आकृतिर्जातिर्लिङ्गाख्या,' 'समानप्रसवात्मिका जातिः,' व्यक्त्याकृतिजातयस्तु पदार्थः' इति गौतमसूत्रानुसारेण घटादीनामवयवसंयोगविशेषात्मके संस्थाने प्रयुज्यते, तथाऽप्यत्र शास्त्रे जातिवचन इति भाष्यवार्तिकयोः प्रथमपादगताकृतिग्रन्थे विस्तरेण दर्शितम्। अतस्तदनुसारेण जातिः शब्दार्थ इति सिद्धान्तयति—नैतद्युक्तमिति॥

आनन्त्येति। अत्र प्रथमश्लोकेन व्यक्तिपक्षे दोषा उक्ताः। द्वितीयश्लोकेन आकृतिपक्षे गुणा उक्ताः। तृतीयचतुर्थश्लोकाभ्यामाकृतिपक्षे पूर्वपक्षोक्तदोषाणां परिहारा उक्ताः॥

अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः । आकृतेः प्रथमज्ञानाच्चास्या एवाभिधेयता ॥

व्यक्त्याकृत्योरभेदाच्च व्यवहारोपयोगिता । लिङ्गसंख्यादिसंबन्धः सामानाधिकरण्यधीः ॥

सर्वं समञ्जसं ह्येतद्वस्त्वनेकान्तवादिनः । लक्षणा वाऽभ्युपेतव्या जातेस्तेनाभिधेयता ॥

न ह्यनन्तासु व्यक्तिषु संज्ञित्वं शक्यतेऽवगन्तुम् । व्यभिचाराच्च व्यक्तीनामशब्दार्थत्वम्, नियमलक्षणत्वात्संबन्धस्यानियमे तदयोगात् । अनन्ताश्च शब्दव्यक्तयोऽनन्तासु व्यक्तिषु कल्प्याः । जात्युपलक्षणत्वेऽप्यभिधेयानामानन्त्याच्छक्त्यानन्त्यमस्त्येव । व्युत्पत्तिकाले हि जातिरुपलक्षणम्, नाभिधानसमये । अभिधानं हि प्रातिस्विकेनैव रूपेण व्यक्तिगतम् । तद्यथा—अक्षत्रयमेकापवरकस्थमेकापवरकस्थित्यैवोपलक्ष्य कश्चित्कंचिदाह—'य एतस्मिन्नपवरकेऽधुना स्थितास्तेऽक्षशब्दाभिधेयाः' इति । तत्र यद्यपि व्युत्पत्तिसमयेऽपवरकस्थितिर्नामैकमुपलक्षणं लभ्यते, तथाऽपि शब्दस्तदनादरेण व्यक्तिमात्रमेव स्वरूपेणाभिधत्ते इति भवति शक्तिग्रहयम् । एवमिहापि । यद्यपि व्युत्पत्तिसमये जातिरेकोपलक्षणमासीत्, तथाऽपि शब्दस्तामस्पृशन्नेव नानारूपा व्यक्तीः स्वेनैव रूपेणाभिधत्त इति स्यादेव शक्त्यानन्त्यम् । अपि च, यद्यव्यपदेश्यं धर्मिस्वरूपमभिधेयम्, ततो गोशब्दोच्चारणाद्गोव्यक्तिः प्रतीयमानाऽपि नाश्वादिव्यक्तिभ्यो व्यवच्छिन्ना प्रतीता स्यात् । न ह्यसाधारणमाकारमन्तरेण द्रव्यं द्रव्यान्तरव्यवच्छिन्नं प्रतीयते । ततश्च गौरित्युक्ते सर्वत्राविशिष्टा प्रतीतिः स्यात् ।

श्लोकान् व्याचष्टे—न ह्यित्यादिना । व्यक्तिः शब्दार्थ इति पक्षे एकैव व्यक्तिरर्थश्चेत् व्यक्त्यन्तरे प्रयोगो न स्यात् । सर्वाऽपि व्यक्तिः सर्वत्वाकारेणार्थश्चेदेकैकस्यां व्यक्तौ गोशब्दप्रयोगो न स्यात् । अतः सर्वासु व्यक्तिषु प्रत्येकं शक्तिग्रहो वाच्यः । स च न संभवति, आनन्त्यात् । 'गोशब्देन सास्नावानभिधीयते' इत्युपदेशाद्वाच्यवाचकभावग्रहे अभिधानक्रियायां कर्मकरणभावेनान्वितयोः सास्नावदर्थगोशब्दयोः पार्ष्टिकसंबन्धो भवन्नरुणैकहायनीन्यायेन नियतसंबन्धरूपो भवेदिति गोशब्दस्य व्यक्त्यन्तरेऽपि प्रयोगे व्यभिचारेण प्रथमगृहीतनियमस्य बाधप्रसङ्गाच्च प्रतिव्यक्ति भेदावश्यंभावेनानेकशक्तिकल्पनागौरवप्रसङ्गाच्चेत्यर्थः । ननु व्यक्तिः शब्दार्थ इति पक्षेऽपि जातेरुपलक्षणीकरणेन न शक्त्यानन्त्यप्रसङ्ग इत्याशङ्कां निराकरोति—जात्युपलक्षणत्वेऽपीति । यथा हि 'येऽस्मिन्नपवरके स्थितास्तेऽक्षशब्दाभिधेयाः' इत्यपवरकस्थितत्वमुपलक्षणीकृत्य अक्षशब्दाभिधेयेषूपदिष्टेषु देवनाक्षविभीतकाक्षशकटाक्षाः प्रत्येकमेवाक्षशब्दाभिधेया भवन्ति, न त्वपवरकस्थितत्वेनैकेन रूपेण, तथेहाप्युपलक्षणत्वपक्षे व्यक्तयः प्रत्येकमेवाभिधेयाः स्युरित्यर्थः । प्रातिस्विकेनैव रूपेणेति । 'प्रकृत्यादिभ्यः' इति तृतीया, 'आत्मनाऽसौ तृतीयः' इत्यादिवत् । अवान्तरव्यक्ति-

यथाऽऽह—'अव्यपदेश्यत्वेन सर्वत्राविशेषात्' इति। अथाभिधानसमयेऽपि जातिरुपलक्षणमित्यभिदधदेव हि व्यक्तिं शब्दो जातिमुपलक्षणमुपादाय तज्जातीयरूपेणाभिधत्ते, गोजातीयमिति; ततः प्रथमं जातिरभिधातव्या। न ह्यनभिधाय जातिं तज्जातीयत्वेन रूपेण व्यक्तिरभिधातुं शक्यते। ततश्च विशिष्टाभिधानमेव वाचोयुक्त्यन्तरेणापन्नम्, न शुद्धाभिधानम्। विशिष्टाभिधाने च पूर्वतरं विशेषणमभिधातव्यम्। तदभिधाने च तत एवात्यन्ताविनाभूतव्यक्तिप्रतिपत्तिसिद्धेर्न तत्राभिधानशक्तिकल्पनावसरः। किं च, गोशब्द उच्चारिते व्यक्तिषु संशयो भवति न कस्यांचिन्निर्णयः। यत्र च संशयो न तस्य शब्दाभिधेयता, शब्दस्य निश्चयजनकत्वात्, सामान्यं तु निर्णीयत इति भवत्यभिधेयम्। नन्वसत्यपि व्यक्तिविशेषनिर्णये व्यक्तिमात्रं निर्णीयत एव। किमिदं व्यक्तिमात्रम्? सामान्यं विशेषो वा। आकारैव हि वस्तुषु बुद्धिर्व्यावृत्त्यनुगतरूपा। तत्र विलक्षणबुद्ध्यालम्बनं व्यक्तिः, सामान्य-

---

स्वरूपमात्रमभिधत्ते, न तु तत्तदसाधारणरूपेणाभिधत्त इत्यर्थः। अपि चेत्याद्यग्रिमग्रन्थेन धर्मिमात्राभिधानमवलम्ब्यैव निर्विकल्पकत्वापत्तिदूषणोक्तिः। किं च गोशब्द उच्चारित इति। ननु 'अपि च' इत्यादिग्रन्थेन व्यक्तिवाचित्वपक्षे धर्मिमात्राभिधानादश्वादिव्यावर्तकरूपाप्रतीतेर्गोशब्दोच्चारणे कृते सर्वत्राविशिष्टा निर्विकल्पकरूपा प्रतीतिः स्यादिति दोषमभिधाय, शक्तिग्रहोपलक्षणभूताया जातेरभिधानवेलायामप्युपलक्षणत्वेन प्रकारतया तस्य परिहारमाशङ्क्य तथा सत्यभिधानक्रियान्वये उपलक्षणमिति नामान्तरेण विशेषणत्वमेवोक्तं स्यात्। ततश्च जातिविशिष्टव्यक्तिवाचित्वपक्ष एव तस्य परिहार उक्तः स्यात्, न व्यक्तिवाचित्व इति व्यक्तिवाचित्वपूर्वपक्षे स दोषः प्रतिष्ठापितः। तत उपरि संशयानुपपत्तिदोषस्य कथमुत्थानम्? न हि निर्विकल्पकं संशयविरोधीति चेत्, उच्यते—संशयानुपपत्तिदोषावकाशदानायैव 'अपि च' इत्यादिग्रन्थप्रवृत्तिः। यदीह व्यक्तिवाचित्वपक्षे धर्मिस्वरूपमात्राभिधानं शक्तिग्रहोपलक्षणजातिप्रकारकतदभिधानं वा स्यात्, तदा तत्तद्व्यक्तिरूपेणाभिधानाभावात्तेन रूपेण संदेह उपपद्यत इति संदेहानुपपत्तिदोषवचनं निरवकाशं स्यात्। तस्मिन् पक्षद्वये निर्विकल्पकत्वापत्तिदोषेण शक्तिग्रहोपलक्षणस्याभिधानवेलायां प्रकारत्वाभ्युपगमे जातिविशिष्टव्यक्तिवाचकत्वपक्षपर्यवसानापादनेन च निराकृते तु तदोषद्वयपरिहाराय तत्तदसाधारणरूपेणैवाभिधानमिष्यत इति शङ्कायाम्, तथा सति संशयो नोपपद्यत इति दूषणमवकाशं लभेतेत्येवं संशयानुपपत्तिदोषावकाशदानार्थत्वे सत्येव अपि चेत्यादिग्रन्थः संगतो भवति। अन्यथा श्लोकार्थविवरणग्रन्थसंदर्भे श्लोकसंगृहीतयोरनेकशक्तिकल्पनागौरवसंशयानुपपत्तिदोषयोर्मध्ये श्लोकासंगृहीताव्यपदेश्यत्वादिदोषप्रपञ्चनमस्थानविजृम्भितं स्यात्। संदेहोपपत्तिं शङ्कते—नन्वसत्यपीति। मात्रशब्दस्य सामान्ये प्रसिद्धत्वाद्विशेषपरत्वे संशयाभावप्रसङ्गाच्च, सामान्यविशेषव्यतिरेकेण रूपान्तराभावाच्च व्यक्तिमात्रमिति मात्रशब्देन सामान्यमेवोक्तमिति तदेवाभिधेयं

बुद्ध्यालम्बनं च सामान्यम्, न तदुभयातिरिक्तं व्यक्तिमात्रं नाम किंचिदस्ति वस्तुनो रूपम्। सामान्यमेव त्वनेन मात्रशब्देनाभिधीयत इति तदेवाभिधेयम्। प्रथमं च सामान्यमेव शब्दाद्गम्यते, पश्चाद्व्यक्तिविशेषाकाङ्क्षामात्रं जायते। ततस्तदेवाभिधेयम्, न व्यक्तिविशेषः। विचित्राश्च खण्डमुण्डादिरूपा व्यक्तय इति विचित्रा गोशब्दोच्चारणे बुद्धिः स्यात्। एकाकारा तूत्पद्यतेऽतोऽभिधेया जातेः। अन्वयव्यतिरेकाभ्यां चैवमेव युक्तम्। व्यवहाराङ्गता च जातेर्व्यक्त्यनतिरेकादुपपद्यतेऽतोऽभिधेया जातिः। न हि जातिर्नाम व्यक्तेरर्थान्तरभूतं किमपि तत्त्वम्, अपि तु वस्त्वेव ह्येकमुभयात्मकं व्यावृत्त्यनुगतरूपतया बुद्ध्या गृह्यते; तत्र सामान्यं शब्दार्थ इति। अयमर्थः—सामान्यात्मना वस्तु शब्दाद्गम्यते न विशेषात्मनेति। यच्च सामान्यात्मना शब्देन बोधितं तस्य क्रियासंबन्धश्चोद्यते। शक्नोति च तत्क्रियां साधयितुम्। अतस्तदेव क्रियाश्रयं विशेषरूपमपि। लिङ्गसंख्याकारकसंबन्धः सामानाधिकरण्यं च सर्वमनेकान्ताश्रयणेनैव सुपरिहरम्। यदा तु भेद एव जातिव्यक्त्योस्तदा सर्वमिदं लाक्षणिकव्यक्त्या-

---

पर्यवस्यतीत्याह—किमिति। खण्डमुण्डादिरूपा इति; खण्डितं खण्डम्; कर्मणि घञ्प्रत्ययः। खण्ड शृङ्गमस्यास्तीति ततो मत्वर्थीयाच्प्रत्ययः। एवं च खण्डशृङ्गः खण्डः, शृङ्गहीनो मुण्डः। आदिशब्देन पूर्णशृङ्गादीनां ग्रहणम्। याज्ञिकास्तु खण्डदन्तः खण्ड इत्याहुः। अन्वयव्यतिरेकाभ्यामिति। गोत्वान्वये सत्येव गोशब्दः प्रयुज्यते। अश्वादिषु तद्व्यतिरेके न प्रयुज्यते। व्यक्तेस्तु न व्यतिरेकोऽस्ति, अश्वादीनामपि व्यक्तित्वात्। न च तत्तद्गोव्यक्तयसाधारणस्याश्वादिषु व्यतिरेकोऽस्तीति स गोशब्दार्थः कथं स्यादिति वाच्यम्, गोव्यक्त्यन्तरेऽपि सतस्तद्व्यतिरेकस्य गोशब्दाप्रयोगहेतुत्वाभावादिति भावः। व्यक्त्यनतिरेकादिति। सिद्धान्ते जातिव्यक्तिगुणगुण्यादीनां तादात्म्याङ्गीकारादिति भावः। तदेव विवृणोति—न हीति। ननु यदि सामान्यविशेषयोरभेदः, तर्हि सामान्यं शब्दार्थो न विशेष इत्युक्तिर्निरालम्बनेत्याशङ्क्याह—तत्र सामान्यमिति। तादात्म्ये सामान्यविशेषाकारयोर्भेदोऽपि विद्यत इति भावः। अनेकान्ताश्रयणेनेति। नैकान्तिकोऽभेदः नाप्येकान्तिको भेदः इत्युभयरूपाभ्युपगमोऽनेकान्ताश्रयणम्। अत्यन्तभेदवादे त्ववहननाद्यन्वयसिद्ध्यर्थं व्यक्तौ लक्षणैवाश्रयणीयेत्याह—यदा त्विति। यद्यपि लक्षणास्थले प्रथम शक्ये प्रतीते तात्पर्यविषयपदार्थान्तरान्वयानुपपत्त्या तत्संबन्धिनि तीरे तारत्वाद्याकारेण लक्षिते घाषाद्यन्वय इति मर्यादा; इह तु न जातेर्व्यक्तिः पूर्वं प्रतीतिः, नापि व्यक्तिर्विना जातिमाकारान्तरेणोपस्थितिः, तथाऽपि शक्त्या जातौ प्रतीयमानायां समानसंवित्संवेद्यत्वस्वाभाव्याच्छक्तिमनपेक्ष्य तदविनाभूता व्यक्तिः प्रतीयते। तस्यां च समभिव्याहृतक्रियालिङ्गसंख्याद्यन्वय इत्येतावता लक्षणोक्तिः। ननु जातिपक्षे-

श्रयणेनोपपद्यते। यत्र तु 'पशुना यजेत' 'अरुणया क्रीणाति' इत्यादौ करणत्वश्रवणं तत्र जातिगुणयोश्चामूर्तयोरपि द्रव्यावच्छेदेन मुख्यमेव करणत्वमुपपन्नम्। अधिकरणसंप्रदानादिरूपं त्वमूर्तस्यासंभवादभेदं लक्षणां वाऽऽश्रित्य समर्थनीयम्। आह च—'तेन तल्लक्षितव्यक्तेः क्रियासंबन्धचोदना। जातिव्यक्त्योरभेदो वा वाक्यार्थेषु विवक्षितः॥' इति। तत्सामान्यमेवाभिधेयं न व्यक्तिरिति सिद्धम्॥

इति पदवाक्यप्रमाणपारावारपारीणमीमांसासाम्राज्यधुरंधरमहोपाध्यायविद्वद्वरश्रीमत्पार्थसारथिमिश्रप्रणीतायां शास्त्रदीपिकायां प्रथमाध्यायस्य तृतीयः पादः॥

ऽप्यवहननाद्यन्वयो यदि व्यक्तावेव तदा जातिपक्षव्यवस्थापनव्यसनस्य किं फलमित्याकाङ्क्षायामाह—यत्र त्विति। जातिपक्षे 'अरुणया क्रीणाति' इत्यत्र गुणस्येव 'पशुना यजेत' इत्यत्र तृतीयाश्रुत्या जातेः समभिव्याहृतक्रियाकरणत्वं द्रव्यपरिच्छेदद्वारकं लभ्यते; न तु व्यक्तिवाचित्वजातिविशिष्टव्यक्तिवाचित्वपक्षयोः; प्रथमे जातेः शब्देनासंस्पर्शात्। द्वितीये व्यक्तिविशेषणभूतायास्तस्याः क्रियाङ्गत्वेनान्वयाभावात्। जातिपक्षे तु तस्याः क्रियाङ्गत्वेनान्वये सति द्रव्यविधिषु श्रुतजातिवैकल्यं न क्रियाङ्गविशेषणवैकल्यम्, किं तु साक्षात्क्रियाङ्गवैकल्यमिति तत्प्रयुक्तं प्रायश्चित्तं भवति। एवमादिकं जातिपक्षे फलमिति भावः। ननु जातौ करणत्ववदधिकरणत्वादिरूपमपि कारकत्वं किमन्वेतीत्याकाङ्क्षायामाह—अधिकरणेति। अधिकरणत्वमौपश्लेषिकाधाराधेयभावरूपं द्रव्य इव जातौ न संभवति; द्रव्योद्देश्यत्वविशिष्टद्रव्यप्रतिगृहीतृत्वरूपं संप्रदानत्वमपि चेतन इव तस्यां न संभवतीति व्यक्तावेवाभेदं लक्षणां वाऽऽश्रित्य तदन्वयः समर्थनीय इत्यर्थः॥

इति श्रीमद्भरद्वाजकुलजलनिधिकौस्तुभ-श्रीरङ्गराजाध्वरिसूनोरप्पयदीक्षितस्य कृतौ शास्त्रदीपिकाव्याख्यायां मयूखावल्यां प्रथमाध्यायस्य तृतीयः पादः॥



प्रथमाध्याये चतुर्थः पादः ॥

(नामधेयपादः)

नामधेयाधिकरणम् ॥ १ ॥

उक्तं समाम्नायेदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ॥ १ ॥

॥ जैमिनीयन्यायमाला ॥

उद्भिदादिपदं धर्मे किममानमुत प्रमा । विध्यर्थवादमन्त्रांशेष्वनन्तर्भावतो न मा ॥ १ ॥

अन्तर्भावो विधावुद्भिदा यजेतेति इष्यते । नामत्वेनान्वयो वाक्ये वक्ष्यतेऽतः प्रमैव तत् ॥ २ ॥

उद्भिदादिशब्दानुदाहृत्य गुणविधिर्नामधेयमिति भाष्ये विचार्य 'उक्तं समाम्नायेदमर्थ्यम्' इत्यनेन सूत्रेण पूर्वपक्षमभिधाय 'अपि वा नामधेयं स्यात्' इत्यनेन सिद्धान्तितम्; तत्तु प्रमाणलक्षणासंगतमिति वार्तिककारेणाधिकरणभेदमाश्रित्य प्रथममुद्भिदादिशब्दानां धर्मे

उक्तं समाम्नायेदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ॥

ननु यथाभाष्यं गुणविधिनामधेयविचार एव प्रस्तूयताम्; किमर्थं वार्तिके ततः प्रागुद्भिदादिपदानां प्रामाण्याप्रामाण्यविचारोऽपि प्रवर्तित इत्याकाङ्क्षायां प्रमाणलक्षणसंगत्यर्थमित्याह—उद्भिदादिशब्दानिति । प्रमाणलक्षणासंगतमिति; स्वातन्त्र्येणेति शेषः । प्रथमाधिकरणनिर्णीतप्रामाण्यनिर्वाहकप्रकारविशेषविषयतया तच्छेषत्वेन गुणविधिनामधेयविचारस्य संगततया स्वयमेवानुपदं 'पश्चाद्गुणविधिनामधेयविचारः' इति वक्ष्यमाणत्वात्, तथैवोद्भिदधिकरणमारभ्य तस्य प्रवर्तयिष्यमाणत्वाच्च । केचित्त्वाहुः—'पूर्वं प्रमाणरूपाभ्यां पादेनाद्यस्य निर्णयः' इति वार्तिकेन प्रथमं धर्मस्य प्रमाणमुखेन स्वरूपमुखेन चाध्यायस्यैकेन पादेन निर्णय इत्युक्तत्वात् प्रथमपादे प्रतिज्ञात-

योषिल्लोचनमेचकवीचीसंसर्गमेचकोऽप्यस्याम् ।
सविलासहासभासा विचकासामास पूर्ववन्मौनी ॥ ९ ॥

फलसुमपल्लवमुक्तावन्दनमालापिनद्धसंसरणे ।
प्रतिभवनालिन्दमभूदिन्दुमुखीवृन्दतुन्दिला दीप्तिः ॥ १० ॥

अपि दानवारिमुदिताः पुंनागा मौनिसिंहमभिवीक्ष्य ।
द्वारस्थजना नास्मार्षुर्वारणशब्दस्य संभ्रमाक्रान्ताः ॥ ११ ॥

अबहिरुदीतं चित्रं बहिरिव निगदन्ननक्षरं रुरुचे ।
हरिसौधरत्नपटलीघृणिगणकिम्मीरविग्रहेणासौ ॥ १२ ॥

योषिदिति । मौनी नारदः । योषिल्लोचनानां मेचकवीचेः असितकान्तिपरंपरायाः संसर्गेण मेचकोऽपि नीलोऽपि पूर्ववत् यथापूर्वं विचकासामास रुरुचे । मेचकपदस्यैकत्र गुणपरत्वादन्यत्र गुणिपरत्वान्न पुनरुक्तिशङ्का ॥ ९ ॥

फलेति । फलसुमपल्लवमुक्तामयीभिः वन्दनमालाभिः तोरणस्रग्भिः; 'तोरणस्योपरिस्थं यद्दाम वन्दनमालिका' इति सारे । पिनद्धे संसरणे राजवीथ्याम् ; 'घण्टापथः संसरणम्' इत्यमरः । प्रतिभवनालिन्दं प्रतिगृहबाह्याङ्गणम् ; 'प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके' इत्यमरः । इन्दुमुखीवृन्देन नारददर्शनागतस्त्रीवृन्देन तुन्दिला निबिडा दीप्तिः प्रकाशोऽभूत् ॥ १० ॥

अपीति । दानवारौ कृष्णे मुदिताः पुंनागाः पुरुषश्रेष्ठाः द्वारस्थजनाः प्रतिहारजनाः; 'प्रतिहारे द्वारपालद्वारस्थद्वार्स्थितदर्शकाः' इत्यमरः । मौनिसिंहं नारदमभिवीक्ष्य संभ्रमाक्रान्ताः सन्तः; 'संभ्रमस्त्वरा' इत्यमरः । वारणशब्दस्य नास्मार्षुः न प्रवेष्टव्यमिति निषेधशब्दं न स्मृतवन्त इत्यर्थः । अन्यत्र दानवारिणा मदोदकेन मुदिता मत्ताः अपि तु पुंनागाः पुरुषगजाः सिंहमभिवीक्ष्य संभ्रमेण भयेनाक्रान्ताः सन्तः वारणशब्दस्य बृंहितध्वनेः नास्मार्षुः; गजशब्दं न कृतवन्त इति भावः । 'अधीगर्थदयेशां कर्मणि' इति स्मृधातोः कर्मणि षष्ठी । 'संभ्रमोऽत्यादरे भीतौ' इति रत्ने ॥ ११ ॥

अबहिरिति । असौ हरेः सौधस्य रत्नपटलीनां घृणिगणेन किरणसंपर्कादित्यर्थः । किम्मीरविग्रहेण चित्रदेहेन; 'चित्रकिम्मीरकल्माषशबलैताः' इत्यमरः । अबहिरन्तः उदीतं चित्रम्

दौवारिकैर्विनीतैर्दर्शितवर्त्मा विवेश यमिराजः ।
श्रीकृष्णराजधानीं प्रभया चक्षुर्जनस्य मुष्णन्तीम् ॥ १३ ॥

ततः कृष्णपक्ष इव दर्शितमहादर्शविभवः, वासन्तवनोद्देश इव बहुलप्रवालदर्शनीयः, शिबिरिव शरणंगतकपोतहितंकरः, शरास इव पटुतराशुगोपचितः, गाङ्गेय इव शिखण्डिदृष्टान्तः, पराशरदायाद इव परिशिक्षितनिपुणशुकमधुरव्याहारसमुल्लसितान्तरः, अपाचीदिशाभाग इव भास्वत्कुम्भजातवर्धितपरभागः, चैत्र इव प्रबुद्धविचित्रजालकः, हिमकर इव सुधामयः, मन्दहरतीव स्तम्भसंभावितः, वासर इव हंस-

---

मद्भुतरसं बहिरनक्षरं यथा तथा वर्णसंपर्कं विना निगदन्सूचयन्निवेत्यर्थः । रुरुचे । सौधमणिकान्तिभिः मुनिश्चित्रवर्णोऽभूदिति भावः ॥ १२ ॥

दौवारिकैरिति । द्वारपालकैः, यमिनां योगिनां राजा नारदः, प्रभया जनस्य चक्षुर्मुष्णन्तीं श्रीकृष्णराजधानीं विवेश ॥ १३ ॥

तत इति । तत इति प्रासादवर्णना । दर्शितमहादर्शस्य अमावास्यायाः विभवः यस्मिंस्तथोक्तः; अन्यत्र सौधपक्षे महत आदर्शस्य दर्पणस्य; प्रवालैः पल्लवैः, विद्रुमैश्च । 'वीणादण्डे प्रवालोऽस्त्री विद्रुमे नवपल्लवे' इति रत्ने । शिबिनामकचक्रवर्ती शरणं प्राप्तं कपोतं रक्षितवानिति कथोन्नेया; अन्यत्र गृहे वर्धितकपोतानां हितंकर इति । शरासः चाप इव आशुगैः बाणैः; अन्यत्र आशुगोपैः वेगवद्गोपालकैः चितः पूर्णः; अथवा आशुगैः तत्तत्कार्यकरणे वेगवद्भिः पुरुषैरुपचितः । गाङ्गेयो भीष्म इव शिखण्डिनामकेन दृष्टोऽन्तर्मरणं यस्य; अन्यत्र मयूरैः दृष्टमध्यदेशः । पराशरदायादो व्यास इव; 'दायादौ सुतबान्धवौ' इत्यमरः । अपाचीदिशाभागः दक्षिणदिग्भाग इव; 'प्राच्यपाचीप्रतीच्यस्ताः' इत्यमरः । अमरटीकासर्वस्वे अवाचीत्यपपाठ इत्युक्तत्वादपाचीत्येव साधु । भास्वान्सूर्यः कुम्भश्च ताभ्यां जातौ यमागस्त्यौ ताभ्यां वर्धितः परभागः गुणोत्कर्षो यस्य; अन्यत्र भास्वतां कुम्भानां कनककलशानां जातेन गणेन । प्रबुद्धानि विकसितानि विचित्रजालकानि कलिका यस्मिन्; 'जालकं पद्मके व्यूहे आनाये भूषणेऽनृते । बिन्दौ वागुरिके पुंसि क्षारके क्लीबमिष्यते ॥' इति वैजयन्ती । सुधामयोऽमृतमयः; अन्यत्र सुष्ठु धीयत इति सुधा लेप इत्यर्थः; तन्मयः सुधामयः । 'सुधाऽमृतं लेपभेदो मूर्वा सर्पाशनं स्नुही' इति रत्ने । स्तम्भेन

संचरणैकविभासितः, राकानिशासमय इव विधुपादविन्यासाशंसनीयः, मेरुसानुरिव जातरूपरमणीयः, नित्योपचीयमानकमलाविलासप्रसादः प्रासादः पुपोष तोषं चक्षुषोः ॥

आस्थानमण्टपतटे मध्येपीठं महेन्द्रमणिभासम् ।
कमलाकान्तमतानीदक्षणोराद्यां स पारणां पश्यन् ॥ १४ ॥

भट्टारकः सतोषं भावजलावण्यसंपदुन्मेषम् ।
आहतमानुषवेषं कमलानित्याभिकाङ्क्षिताश्लेषम् ॥ १५ ॥

अनवीनवचनमेयं यादवनिःसीमभाग्यसमुदायम् ।
सद्यस्तनजलदरुचिं हृद्यनवद्यं विभातमाद्यानाम् ॥ १६ ॥

जडभावेन स्थूणाभिश्च; 'स्तम्भौ स्थूणाजडीभावौ' इत्यमरः। हससंचरणेन सूर्यसंचारेण; अन्यत्र हंसानाम् । राकानिशा पूर्णिमारात्रिः, विधुपादानां चन्द्रकिरणानां; अन्यत्र विधोर्विष्णोः पादविन्यासेन; 'विधुर्विष्णौ चन्द्रमसि' इत्यमरः। सानुः कटकदेश इव जातरूपेण स्वर्णेन; 'चामीकरं जातरूपम्' इत्यमरः। अन्यत्र जातै रूपैः शुक्लादिवर्णैः; 'रूपं स्वभावे शुक्लादौ' इति रत्ने। नित्यमुपचीयमानानां प्रवृद्धानां कमलाविलासानां प्रसादः प्रसन्नता यस्मिंस्तथोक्तः। 'प्रसादोऽनुग्रहे कार्ये प्राणस्वास्थ्यप्रशस्तिषु' इति रत्ने।

आस्थानेति । स आस्थानमण्टपतटे सभामण्टपे, पीठस्य मध्ये मध्येपीठम्, कमलाकान्तं पश्यन्, पारणां तृप्तिमतानीत । प्रथमदर्शने नेत्रानन्दं प्रापेति भावः ॥ १४ ॥

अथ सप्तभिः श्लोकैः कृष्णं वर्णयति—

भट्टारकेति । भट्टारको मुनिः; 'भट्टारको भूमिपाले दिवौकसि तपोधने' इति रत्ने। भावजस्य लावण्यरूपसंपत्, तस्या उन्मेषो वृद्धिर्यस्मिंस्तथोक्तम् । मानुषवेषं नराकृतिम् । कमलया नित्याभिकाङ्क्षित आश्लेषो यस्य तथोक्तम् । कमलाकान्तं सतोषं यथा तथा पश्यन्सन् अक्ष्णोः पारणामतानीदिति पूर्वश्लोकोक्तकर्मक्रिये श्लोकसप्तकेऽपि योजयितव्ये ॥ १५ ॥

अनवीनेति । अनवीनवचनैः चिरंतनवचनैः, वेदवचोभिरित्यर्थः; मेयं ज्ञेयम् । सद्यस्तनस्य नूतनस्य जलदस्य; आद्यानां योगिनां हृदि विभातं प्रकाशमानम् । अनवद्यं निर्दोषम्;

स्निग्धापाङ्गमयूखप्रकटितकलशाब्धिमध्यसंवासम् ।
कमलाकृतानुसरणं करुणापरिणाममागमाभरणम् ॥ १७ ॥

विद्रुमसखरदनपटीविच्छुरितस्मेरचन्द्रिकोदारम् ।
विषमायुधीयविद्यादेशिकमाभीरमध्यललितानाम् ॥ १८ ॥

मणिमयकुण्डलनिर्यद्घृणिपरिपाटीकरम्बितकपोलम् ।
नलिनायतनयनाञ्चलनवरुचितोन्मेषनानटत्करुणम् ॥ १९ ॥

वल्लववनितातरुणिमसंललिताश्चर्यनटनरङ्गेशम् ।
विषमविषयातिदूरं विघटितदासेरमोहसंचारम् ॥ २० ॥

'कपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः' इत्यमरः ॥ १६ ॥

स्निग्धेति । स्निग्धैः सान्द्रैः, 'चिक्कणं मसृणं स्निग्धम्' इत्यमरः । अपाङ्गमयूखैः प्रकटितः कलशाब्धिमध्यसंवासः यस्य; कटाक्षाः क्षीराब्धिवत्सर्वतः प्रसरन्ति, अतः कृष्णस्तन्मध्यवासीव विराजत इति भावः । करुणायाः परिणामं, प्रकारान्तरेणावस्थानं परिणामः, 'परिणामो विकारे द्वे' इत्यमरः ॥ १७ ॥

विद्रुमेति । विद्रुमसखरदनपट्यां प्रवालमहशाधरे; 'सखा त्रिषु सहाये ना मित्रे' इति रत्ने । विच्छुरितया व्याप्तया । आभीरमध्यललितानां घोषयोषितां विषमायुधीयायाः मदनसंबन्धिन्या विद्यायाः देशिकमुपदेष्टारम् ॥ १८ ॥

मणिमयेति । घृणिपरिपाट्या किरणपरंपरया करम्बितौ मिश्रितौ कपोलौ यस्य तथोक्तम्; 'वृतः करम्बितो मिश्रश्छुरितो मिलितः समाः' इति सारे । नलिनायतनयनयोः अञ्चलयोः नवरुचितः उन्मेष उद्रेको यस्याः सा; अत एव नानटन्ती नृत्यन्ती करुणा यस्य तम् ॥ १९ ॥

वल्लवेति । वल्लववनितानां तरुणिमनि तारुण्ये यत् संललितं समीचीनशृङ्गारचेष्टा, तदेव आश्चर्यकरं नटनम्, तस्य रङ्गेशं सभानायकम्; गोपिकानां शृङ्गारचेष्टाद्रष्टारमिति भावः । 'सुकुमाराङ्गविन्यासो ललितं परिकीर्त्यते' 'रङ्गः स्यान्नर्तनस्थानम्' इति च सारे । विघटितो निरस्तः दासेराणां भक्तानां मोहसंचारो येन तम् ॥ २० ॥

कम्पानुषङ्गविधुरितशम्पासंपातसंपदाच्छादम् ।
राजन्यमकुटकोटीमणिपरिपाटीनिघृष्टपदपीठम् ॥ २१ ॥

निखिलविभवैकतानं नायनभाग्यात्पचेलिमात्पश्यन् ।
उन्मस्तकप्रमोदः सदसि जगावखिलमोहनं शौरिम् ॥ २२ ॥

वैकुण्ठीयति पावने यदुकुले बाह्यान्तरोपासना-
स्थानीयत्यधुना पुरेऽत्र सदने चास्थानभद्रासने ।
ओंकारीयति पालनाय जगतो गोपालबालीयति
स्वात्मानं प्रणवाभिधेयममलं चिद्वस्तु नैजेहया ॥ २३ ॥

वक्त्रं यस्य सुधाकरीयति हरेरुन्मज्जुहासाङ्कुरा
ज्योत्स्नीयन्ति दृगम्बुजीयति रसालापा सुधीयन्त्यहो ।

कम्पेति । कम्पस्यानुषङ्गेण संबन्धेन विधुरितानां विमुक्तानां निष्कम्पानामिति भावः । शम्पासंपातस्य तटित्संघस्य संपत्कान्त्यतिशयो यस्य तथोक्तः आच्छादो वसनं यस्य तथोक्तम् । निघृष्टमुल्लीढं पदपीठं यस्य तम् ॥ २१ ॥

निखिलेति । निखिलविभवानामेकतानं मुख्यस्थानम्, शौरिं सदसि, पचेलिमात्पकात्, नायनभाग्यान्नयनसंबन्धिभागधेयात्पश्यन्नारदः, उन्मस्तकप्रमोदः सन्नखिलमोहनं यथा तथा जगौ गानं कृतवान् ॥ २२ ॥

वैकुण्ठीयतीति । प्रणवाभिधेयमोंकारवाच्यममलं चिद्वस्तु ज्ञानरूपं वस्तु ब्रह्मेत्यर्थः । नैजेहया निजेच्छया जगतः पालनाय पावने यदुकुले, अधुना वैकुण्ठीयतीत्यत्र आधारक्यचि वैकुण्ठे इव वर्तत इत्यर्थः । एवं सर्वत्रोन्नेयः । अत्र पुरे सदने च बाह्यान्तरोपासनास्थानीयति बाह्योपासनास्थाने इव आन्तरोपसनास्थाने इव वर्तते । आस्थानभद्रासने सिंहासने, 'नृपासनं तु यद्भद्रासनं सिंहासनं च तत्' इत्यमरः । ओंकारीयति ओंकार इव वर्तते; ओंकारे तदर्थरूपे यथा वर्तते तद्वदिति भावः । पूर्वपूर्वापेक्षयोत्तरोत्तरस्मिन्भगवतः संनिधिविशेषः सूचितः । स्वात्मानं गोपालबालीयतीत्यत्र कर्मक्यचि गोपालबालमिवाचरतीत्यर्थः ॥ २३ ॥

वासश्चापि तटिल्लतीयति कटीदेशे प्रतीकप्रभा
जीमूतीयति दर्शनं नयनयोर्भाग्यप्रवाहीयति ॥ २४ ॥

अथ संगिरन्तमेवं गिरं तं सुधावृष्टिभिरिव घृष्टिभिस्तानवैः परितो विसारिभिरास्थानगतान्मसारमणिसारमेचकेन रोचिषा चातुर्भुजेन सावर्ण्यमुपगतानपि चन्द्रमण्डलविहारिणः पुरुषानिव निर्मृष्टसान्द्रचन्द्रिकावदातविग्रहान्वितन्वन्तम्, गानरसोदन्वन्तमभितो विष्यन्तयन्तम्, नन्दनमरविन्दसुनोरग्रतो निध्याय, यदुनन्दनोऽयमानन्दसंभ्रममल्लखुरलीविहरणरङ्गायितेनान्तरङ्गेण सभाजनाय सह सभाजनैः समुपगम्य सत्वरमुपकण्ठमुत्कण्ठया सादरमुपगूहमान इव प्रेयसीं सर्वाङ्ग-

---

वक्त्रमिति । यस्य हरेर्वक्त्रं सुधाकरीयति आत्मानं सुधाकरमिवाचरति । एवं सर्वत्रात्मपदमध्याहार्यम् । दृक् नेत्रमम्बुजीयति, आत्मानमम्बुजमिवाचरति । 'दर्शनज्ञाननेत्रेषु दृक्स्त्री द्रष्टरि तु त्रिषु' इति रत्ने । दृगादीनां द्वित्वबहुत्वेऽप्येकवचनेन प्रयोगो दृश्यते । यथा नैषधे—'त्वयि वीर विराजते परं दमयन्तीकिलिकिञ्चितं किल । तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम्' ॥ इति । 'स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेण' इति प्रायग्रहणादेकवचनप्रयोग इति । अत्र धर्मोपमेयवाचकलुप्तोपमालंकारः । कटीदेशे काटेप्रदेशे वासः वसनमपि तटिल्लतीयति विद्युल्लतामिवाचरति । जीमूतीयति मेघमिवाचरति । तस्य कृष्णस्य दर्शनं नयनयोर्भाग्यप्रवाहीयति आत्मानं भाग्यपरंपरामिवाचरति ॥ २४ ॥

अथेति । एवं गिरं संगिरन्तं वदन्तम् । मसारमणिष्विन्द्रनीलमणिषु सार इव उत्कृष्टेन्द्रनीलमणिरिवेत्यर्थः; मेचकेन श्यामेन, 'इन्द्रनीलो महानीलो मसारो वासवोपलः' इति सारे; चातुर्भुजेन चतुर्भुजसंबन्धिना कृष्णसंबन्धिनेत्यर्थः; रोचिषा कान्त्या सावर्ण्यं समानवर्णतामुपगतानपि आस्थानगतान् सभागतान्, सुधावृष्टिभिरिव अमृतवर्षैरिव परितो विसारिभिः तानवैः घृष्टिभिः देहच्छविभिः चन्द्रमण्डलविहारिणः पुरुषानिव निर्मृष्टया नितरां शोधितया; 'निर्णिक्तं शोधितं मृष्टम्' इत्यमरः । सान्द्रचन्द्रिकया अवदातविग्रहान्; अन्यत्र सान्द्रचन्द्रिकेव अवदातविग्रहान्वितन्वन्तम्; कृष्णस्य देहकान्त्या नीलान् सभाजनान्निजकायरोचिषा गौरवर्णान् कुर्वन्तमिति भावः ।

समाक्रान्तधरणीतलं प्रश्रयेण प्रणिपत्य चिरमुच्चलन्नुपवेश्य सिंहसंहननं तमर्घ्यादिभिरनर्घैरारचय्य सपर्यामार्योपयिकीममर्यादोदिताद्भुतरसपोप्लूयमानमानसो भगवान्निःसङ्गस्फुरदकृतकानन्दप्रत्ययधारैकतामापन्नस्य मनसो यौष्माकीणस्य निरन्तराविर्भूतजागतनिर्भासैकशरण्येषु गृहिषु माद्दशेषु बलादभिमुखीकरणप्रयासो निरायासमनुग्राह्यजनकल्याणवितरणायैव केवलमतः प्रणिधानयोगावगतविष्टपत्रयविशिष्टचेष्टेन भवता यदि कदाचिदपि दृष्टचरमिलातले शुभोदर्कमद्भुतं भवदन्तेवासिने मह्यमुदाहर्तव्यमित्यनुबबन्ध । तादृशप्रश्रयोदारवचनाकलनचित्रीयचेताः स वैणिकमुनिशिरोमणिरिदमाबभाण ॥

गानरस एवोदन्वांस्तम् ; 'उदन्वानुदधिः सिन्धुः' इत्यमरः । विष्यन्तयन्तं विशेषेण सेचयन्तम् ; गानरसेन सभामापूरयन्तमिति भावः । अरविन्दसूनोर्ब्रह्मणः नन्दनं तं नारदम् । अयं यदुनन्दनोऽग्रतो निध्याय आनन्दसंभ्रमावेव मल्लौ तयोः खुरलीविहरणस्य मल्लविहारस्य रङ्गायितेन ; 'रङ्गः स्यान्नर्तनस्थानम्' इति सारे । अन्तरङ्गेण आनन्दसंभ्रमाक्रान्तहृदयेनेत्यर्थः । सभाजनाय प्रत्युद्गमनादिसंमाननाय ; 'आनन्दनसभाजने' इत्यमरः । सभाजनैः सह सत्वरमुपकण्ठं समुपगम्य उत्कण्ठया प्रेयसीमिष्टां पृथिवीमित्यर्थः । सादरमुपगूहमान इव आलिङ्गन्निव समाक्रान्तधरणीतलं यथा तथा प्रश्रयेण चिरं प्रणिपत्य; 'प्रश्रयो विनयोच्छ्रायौ', 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः । अनर्घैरमूल्यैरुत्तमैरित्यर्थः । अर्घ्यादिभिः, उपचारैरिति शेषः । आर्याणामौपयिकीं युक्ताम् ; 'सपर्या चार्हणाः समाः' इत्यमरः । अमर्यादोदिते अद्भुतरसे पोप्लूयमानमानसः सन्, हे भगवन् माहात्म्यशालिन्, निःसङ्गं यथा तथा स्फुरन् अकृतकानन्दः ब्रह्मानन्दरूपो यः प्रत्ययः, ज्ञानानन्दयोरेकत्वात् ; 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः । तस्य धारा संततिस्तया एकतामापन्नस्य ; ज्ञानानन्दरूपतामापन्नस्येति भावः । यौष्माकीणस्य युष्मदीयस्य मनसः जागतनिर्भासः जगज्ज्ञानं शरण्यं येषां तथोक्तेषु, विषयासक्तेष्विति भावः । अनुग्राह्यजनानां भक्तजनानाम् ; प्रणिधानयोगेन ध्यानयोगेन अवगतविष्टपत्रयविशिष्टचेष्टेन ध्यानावगतजगत्त्रयनिखिलचरित्रेण शुभमेवोदर्कं उत्तरफलं यस्य तथोक्तम्, अद्भुतमाश्चर्यावहं कर्म दृष्टचरं यदि तत् भवदन्तेवासिने भवच्छिष्याय मह्यम् ; अनुबबन्ध अवश्यं वक्तव्यमिति निरोधं कृतवान्, प्रार्थयामासेति

यद्विश्वैकनिदानमेकमपि सद्यन्मायया मोहिता
ब्रह्मेशानमहेन्द्रवह्नियमराट्पाश्याशुगाख्यादिभिः ।
भेदेनाहुरनन्तमद्वयमजं प्रत्यक्प्रबोधात्मकं
जाने ब्रह्म तदेव देव कमलाजाने भवानित्यहम् ॥ २५ ॥

श्वासो वेदांबभूव प्रभवलयमुखप्रक्रिया भ्रूलताया
लीलामासाब्धिकन्याविहरणभवनामास वक्षोऽपि यस्य ।
गेहामासान्तरीपं कलशजलनिधेरात्मजामास वेधा-
स्तादृङ्नन्दस्य भाग्यादमितकरुणभाङ् नन्दनामासिथ त्वम् ॥

भावः । प्रश्रयोदारवचनानां विनयगम्भीरवचनानामाकलनेन श्रवणेन ; 'उदार उन्नते प्रौढे' इत्यमरः । आबभाण उवाच ॥

यदिति । हे देव कमलाजाने, यद्विश्वैकनिदानं यन्मायया मोहिता जनाः, एकमपि सत् सत्यात्मकं वस्तु कर्म ; यमराट् यमः आशुगो वायुः ; इत्यादिभिः आदिशब्देन रूपस्थानचेष्टादयो गृह्यन्ते ; भेदेन आहुः । अनन्तमद्वयमजं प्रत्यक्प्रबोधात्मकं जडात्मकजगत्प्रातिलोम्येन अञ्चति प्रकाशत इति प्रत्यक् स चासौ प्रबोधश्च प्रत्यक्प्रबोधः । निर्विकाराखण्डसाक्षिबोध इत्यर्थः । स एवात्मा स्वरूपं यस्य तथोक्तम् । तद्ब्रह्मैव भवानित्यहं जाने वेद्मि । 'इन्द्रं मित्रं वरुणमग्निमाहुः' इति श्रुत्युक्तोऽयमर्थः सर्वज्ञशंकरभगवत्पादोक्तहरिस्तोत्रे स्पष्टीकृतः—'ब्रह्मा विष्णू रुद्रहुताशौ रविचन्द्राविन्द्रो वायुर्यज्ञ इतीत्थं परिकल्प्य । एकं सन्तं यं बहुधाऽऽहुर्मतिभेदात्तं संसारध्वान्त-विनाशं हरिमीडे ॥' इति ॥ २५ ॥

श्वास इति । यस्य श्वासः वेदांबभूव वेदोऽभूत् । 'यस्य निःश्वसितं वेदाः' इत्युक्तेः । प्रभवलयमुखप्रक्रिया जगज्जन्मप्रलयादिव्यापारः भ्रूलतायाः लीलामास ; भ्रूविलासो बभूव । यस्य वक्षोऽपि अब्धिकन्याविहरणभवनामास लक्ष्मीविहारगेहमभूत् । कलशजलनिधेः अन्तरीपं द्वीपः गेहामास । वेधा आत्मजामास । तादृक्तथा उत्कृष्टः अमितकरुणभाक्त्वं नन्दस्य भाग्यात् नन्दनामासिथ पुत्रोऽभूः । परं ब्रह्मैव नन्दगोपनन्दनत्वेनावतीर्णोऽसीति भावः ॥ २६ ॥

(ततः प्रविशत्यनुग्रहः श्रवणशर्मा च ।)

अनुग्रहः—वत्स श्रवणशर्मन्, कथं नाम द्वैतवादस्त्वया निर्जितः ?

श्रवणशर्मा—भगवन्, श्रूयताम् । स खलु प्रथमं प्रपञ्चो मिथ्येति मम सिंहनादमाकर्ण्य तदसहमानः प्रत्यवातिष्ठत ; अचिक्षिपच्च युक्तिबाणम् ।

प्रपञ्चो मिथ्या चेत्कथमयमबाधः स्फुरति नो
न तुच्छस्य क्वापि स्फुरणमुपपन्नं त्रिभुवने ।
कथंचित्तुच्छोऽपि स्फुरति यदि तर्हि स्फुरतु नः
स्वयं वन्ध्यासूनुर्गगनकुसुमालंकृततनुः ॥ १५ ॥

इति । स च युक्तिबाणस्तत्क्षणमेव मत्प्रयुक्तेन पतियुक्तिबाणेन निवारितः ।

असावत्यन्तासन्न हि भवति वन्ध्यासुत इव प्रतीतिस्तेनास्य प्रसरणमुपैतुं प्रभवति ।
यदि ब्राह्मी विद्या निजमतिविकासं वितनुते तदा सर्वोऽप्येष प्रविशति समूलप्रविलयम् ॥

इति । अनन्तरं तेन, अस्तीति प्रविभाव्यमानमखिलैरर्थक्रियार्हं जग-
न्नास्तीति प्रतिपाद्यते कथमिदं नानाविधाकारवत् ।

इत्यस्त्रमुपन्यस्तम् । तच्च,

वाचा केवलमस्ति विश्वमिदमित्यारभ्यते विभ्रमा-
देतस्यैव महापराक्रमवशादर्थक्रियाऽनुक्रमः ॥ १७ ॥

इत्यस्त्रेण प्रत्यवारयम् । अस्त्रान्तरं च प्रायोजयम्,

चिज्ज्योतिरेव जगदात्मतया चकास्ति वस्त्वन्तरं किमपि नास्ति विचार्यमाणे ।
रज्जोर्भ्रमाधिकरणादपि रज्जुसर्पस्तत्त्वान्तरं भवितुमर्हति किं कथंचित् ॥ १८ ॥ इति ।

अनु०—ततः, ततः ।

श्रवणशर्मा—ततश्च तेन प्रकाशमानत्वहेतुकं विश्वसत्यत्वसाधकमनुमानास्त्रमुपक्षिप्तम् । मया तु,

विश्वं समस्तमपि विभ्रममात्रमेतदात्मैव सन्नयमनन्यसुखप्रकाशः ।
स्फूर्त्यैव विश्वमपि सत्यमितीष्यते चेत्को नाम शुक्तिरजतेन धनी न भावी ॥ १९ ॥

इत्यनेन प्रत्यक्षिपम् ।

अनु०—ततः, ततः ।

श्रवणशर्मा—तश्च तेन 'द्वासुपर्णा' इत्यादिभेदश्रुतिकदम्बको गृहीतः। मया च मयाऽन्यथयित्वा निगितनयधारेण तत्त्वमसिना प्रतिक्षिप्तः। प्रस्तश्च तेन द्वैतवादो लुप्तश्च।

अनु०—(सश्लाघं श्रवणशर्माणं परिष्वज्य) साधु वत्स, साधु। अतः परं हतप्राय एवाज्ञानवर्मा।

श्रवणशर्मा—भो भगवन्, आज्ञाप्यतामेष दासः स्वस्यापि दुरात्मनो निर्बर्हणाय।

अनु०—वत्स, सखा मे शिवप्रसाद एव ब्रह्मविद्यासमेधितेन ब्रह्मास्त्रेण तं भस्मीकरिष्यति। त्वमपि तस्य साहाय्यके वर्तस्व।

श्रवणशर्मा—तथा (इति निष्क्रान्तः।)

अनु०—क्व पुनरिदानीं जीवराजो यमुद्धरिष्यामि। (इति परिक्रामति।)

जीवः—भो भोः पान्थाः, परित्रायध्वं परित्रायध्वम्।

अनु०—(आकर्ण्य) कथमत्रैव जीवराजः। (इत्युपसर्पति)

जीवः—(चक्षुषी उन्मील्य) हन्त प्रभातमिव।

आकीर्यन्ते कतिचिदधुना भास्वता स्वस्य भासो
निर्मुच्यन्ते दिशि दिशि तमःश्रेणयश्च द्रढिम्नः।
आकाशोऽस्मावपि च दहरः पुण्डरीकान्तरस्थो
विष्वग्व्याप्तिं व्रजति शनकैर्विश्रुतेर्बोधयोगात्॥ ६०॥

(सदृष्टिक्षेपम्) क एष काषायधरो मत्करी गगनतलादवतीर्णो रविबिम्ब इवेत एवाभिवर्तते। यस्य गात्रप्रभाभिर्निस्तमस्कितं भुवनतलम्। भवतु एनं शरणयामि। भो भो भगवन् शरणं शरणम्।

अनु०—भद्रमुख, कस्त्वमसि?

जीवः—यः कश्चित्सर्वथा तावन्मुमुक्षुरस्मि।

अनु०—किमात्मानं न जानासि?

जीवः—जानामि तावद्बद्धोऽस्म्येषः, यं जीवराजमामनन्ति।

अनु०—हन्त, कथं बद्धोऽसि? किं पुनर्मया साधनीयम्?

जीवः—बद्धतव्यस्तावदहमस्मादापदर्णवान्नत्रभवता।

अनु०—हन्त, युगपदनेकं कर्तव्यमापतितम्। अद्य हि,

मज्जन्त्यमी परुमरीचिमहासमुद्रे मूर्च्छन्ति केचिदिह रज्जुभुजङ्गदष्टाः ।
अन्ये पुनः शशविषाणविपाटिताङ्गा बद्धो ऽवांश्च कथमत्र समुद्धरामः । २१

जीवः—अहो विडम्बना ।

क्व वा पारावारो जनयति मृगतृष्णाजलमयः
क्व रज्ज्वां सर्पो वा क्व नु शशविषाणादिकमपि ।

अनु०—

तथा कीदृक्पाशः कथय ननु बन्धः क इव
ते निवृत्तिर्वा कीदृक्त्व इव वीक्षस्व निपुणम् । २२ ॥

जीवः—कथमसत्यो मे बन्धः ?

अनु०—राजन्, शृणु । ते तत्त्वमुपदिशामि ।

त्वं ब्रह्मासि स्वरसमुखसद्बोधरूपं यदेतज्ञाना-
भूतस्वार्थाय परिणतो नामरूपप्रपञ्चः ।
मिथ्यैवायं त्वदुपहितया मायया कल्पितत्वा-
त्सत्यत्वस्य त्विह न घटते गन्धतोऽपि प्रसङ्गः । २३ ॥

जीवः—(सहर्षाश्चर्यम्) हन्त कथमहं ब्रह्मैव । जीव इति खल्वेतावन्तमनेहसमात्मानं प्रतीतवानस्मि ।

अनु०—राजन्, राजकुमारस्य व्याधभाव इव ब्रह्मण एव सतस्तव भ्रमकल्पितो जीवभावो न परमार्थः । तथा हि,

उन्मादेन वनं गतो नृपसुतो विस्मृत्य राजात्मतां
व्याधोऽस्मीह महमित्यमन्यत चिरं व्याधालये संवसन् ।
राजैव त्वमिति प्रबोधनपरैराप्तोपदेशैरथ
व्याधत्वं भ्रमकल्पितं परिजहद्राजैव सद्योऽजनि ॥ २४ ॥

एवं च,

आत्मैव मंस्त्वमपि विभ्रमतोऽसि जीवो येनाभिभूयसि जगन्मयमिन्द्रजालम् ।
जानीहि तन्नतु जहीहि च जीवभावं ब्रह्मात्मना भव परं परिशिष्यमाणः ॥ २५ ॥

जीवः—(आत्मानं निपुणं निर्वर्ण्य सानन्दम्) हन्त, मुक्तोऽस्मि पाशबन्धाद्भगवदनुग्रहेण ।

अनु०—राजन्, कथं मुक्तमात्मानं कथयसि। बद्धः खलु मुच्यते लोके न केवलः। तव च

कूटस्थनित्यसुखबोधतनोः प्रतीचो बन्धो विमोचनमिति भ्रमदुर्विलासः।
वन्ध्यासुतस्य वपुरादिगुणप्रपञ्चस्तत्पञ्चता च सुतरां परिकल्पनैव ॥ २६ ॥

जीवः—हन्त, सुविदितं मे ब्रह्म।

अनु०—यदि मन्यसे सुविदितं ब्रह्मेति, तर्ह्यविदितमेव तत्, यतस्तन्निरस्ताशेषविशेषतया विदिक्रियाया अपि नार्हत्येव कर्मभावमनुभवितुम्।

जीवः—

न बद्धो नापि मुक्तोऽहं परमार्थनिरूपणे। मोहाद्बद्ध इवाभूवं बोधान्मुक्त इवाऽधुना ॥
भगवन्, त्वं हि मे पिता, यो मे तमसः पारं दर्शितवान्। (इत्यनुग्रहस्य पादयोः पतति।)

अनु०—राजन्, अचिरादाप्नुहि जीवन्मुक्तिकरग्रहणकल्याणम्। त्वदनुकम्पनायैव प्रेषितोऽहमनुग्रहनामा श्रीदेशिकचरणैः।

जीवः—एष संप्रति कृतार्थोऽस्मि सुगृहीतनाम्नो भगवतोऽवलम्बनेन। अद्य हि,

स्वस्थे मयि स्वरसस्वसुखावबोधे व्यामोहतो जगदिति व्यपदिश्यते यत्।
अन्यत्र कुत्रचिददृष्टमरूपरूपमस्थानचित्रमिति निश्चिनुमस्तदेतत् ॥ २८ ॥

अपि च,

मिथ्या समुल्लसतु नाम जगद्विचित्रमेतावताऽपि मम तत्त्वविदो न हानिः।
स्वप्ने भयंकरगजादिनिरीक्षणेऽपि न स्वाप्निकत्वमनुमंदधतोऽस्ति भीतिः ॥ २९ ॥

अपि च,

कर्तेति कायिकविचेष्टितदर्शिनो मां गृह्णन्ति चेत्किमियतैव तथा भवामि।
पारिप्लवोऽयमिति पामरधीगृहीतश्चन्द्रस्तथा न हि चलाम्बुदसंनिकृष्टः ॥ ३० ॥

अपि च,

अद्यास्तमेतु वपुराशशितारमास्तां कस्तावताऽपि मम चिद्वपुषो विशेषः।
कुम्भे विनश्यति चिरं समवस्थिते वा कुम्भाम्बरस्य न हि कोऽपि विशेषलेशः ॥

किं बहुना,

आभासमात्रतनवो जगतीविकल्पा मां न स्पृशन्त्यपि निरस्तसमस्तसङ्गम्।
आरोपिता मलिनतादिविचित्रधर्मा लिम्पन्ति किं नु विमलं वियदन्तरालम् ॥ ३२ ॥

अनु०—एतावदेव खल्वमृतत्वम्।

जीवः—(सदृष्टिक्षेपम्) भगवन्, क एष पुरुषो ज्योतिर्लताहस्त इत एवाभिवर्तते ?

अनु०—एष सखा मे शिवप्रसादो ब्रह्मविद्याऽऽख्या सिद्धाञ्जनौषधिं तवोपहरति ।

जीवः—(साक्षात्कुर्वन्।)

अनन्तकोटिमार्तण्डमण्डलाखण्डिताकृति । किमेतज्ज्योतिषां ज्योतिराक्रामति जगत्त्रयम् ॥

अनु०—

धाराभुजङ्गधरणीविवरादिरूपां भ्रान्त्युत्थितां परिणतिं रशनेति धीवत् ।
आविद्यकं द्रुमरुदादिविकारमात्ममात्कुर्वती परिचकास्ति चिदद्वितीया ॥ ३४ ॥

जीवः—आश्चर्यम्, आश्चर्यम् ।

सूर्योऽप्यत्र न भासते दशशतैरावार्यमाणः करै-
श्चन्द्रस्येह कथाऽपि का जडमयीं मूर्तिं निजां बिभ्रतः ।
ताराणां तडितां ततिर्नभसि खद्योताकृतिः कुत्र वा
सज्वालोऽपि कुतोऽयमग्निररसप्रायेन्धनालम्बनः ॥ ३५ ॥

अपि च,

जडताशरणं समस्तमेतज्जगदानागहिरण्यगर्भलोकम् ।
अनुभात्यमुमेव भान्तमन्तर्यमयन्तं स्वत एव चित्प्रकाशम् ॥ ३६ ॥

अनु०—इदमेव ते पारमार्थिकं रूपम्, यदनवबोधेन चिरमनुभूतवानसि संसारसंकटम् ।

जीवः—एष धन्योऽस्मि धन्योऽस्मि धन्योऽस्मि धरणीतले ।
यतः साक्षात्स्वयं ब्रह्मास्म्यहं ब्रह्माद्यगोचरः ॥ ३७ ॥

अपि च,

इह जनुष्यथ पूर्वजनिष्वपि भ्रमकृतश्रुतिकिंकरताजुषा ।
बत मया समयानुपरोधिना कियदमुष्य कृते सुकृतं कृतम् ॥ ३८ ॥

(आनन्दातिशयेन स्तम्भं नाटयन्स्थितः ।)

(ततः प्रविशति शिवप्रसादः ।)

शिवप्रसादः—धन्यो जीववसुन्धरापरिवृढः पुण्यैः पुरोपार्जितै-
र्ब्रह्माद्वैतमहाध्वसंस्तवमनुप्राप्तः शमादिक्रमात् ।
मीमांसाश्रवणान्वयेन च परिज्ञातात्मतत्त्वः स्वयं
साक्षात्कारमयीं करेऽद्य कुरुते श्रीब्रह्मविद्यामपि ॥ ३९ ॥

अथ वा,

एतस्येयं करमनुविशेद्ब्रह्मविद्येति नैतांचित्ते
धत्ते मम कुतुकितां विस्मयं वा स्मयं वा ।
येन स्वैरं निरवधिपरानन्दकन्दायमाना
जीवन्मुक्तिः करतलगता साऽपि सद्यो भवित्री ॥ ४०

अनु०—राजन्, एष महात्मा प्रत्युद्गमनेन संभावनीयः ।

जीवः—(तथा कृत्वा)

ओं नमस्ते प्रशस्ताय संसारध्वान्तभानवे । परमानन्दकन्दाय प्रणवार्थप्रदर्शिने ॥४१॥

(इति शिवप्रसादं प्रणमति ।)

शिव०—

भो राजन्ब्रह्मविद्येति ख्याता सिद्धाञ्जनौषधिः ।
गृह्यतामियमाशीर्भिः सहैव शिवशासनात् ॥ ४२ ॥

(इति ब्रह्मविद्यामुपहरति । जीवः सविनयं नाट्येनाभिनयाय बुद्ध्या संयोजयति ।)

बुद्धिः—(हर्षपारवश्येन संस्कृतमाश्रित्य)

अद्भुतेयमखण्डेयमात्रानन्दशेवधिः । ममैवैषा परिणतिर्महाप्रणयसंपदः ॥ ४३ ॥

जीवः—शृणु देवि,

अङ्गैरङ्गविमिश्रणादभिनवोद्रेकप्रकारोदय-
प्रावण्यैकशरण्यपुण्यमहसोर्भेदुषोरेकताम् ।
त्वद्ब्राह्मौषधिगात्रयोः सहजतासंपत्तियोगादिव
प्रेमाणं प्रतिजग्मुषोर्झटिति मे भेदभ्रथा लुप्यते ॥ ४४ ॥

(बुद्धिः ब्रह्मविद्यां जीवस्य कण्ठे समर्पयति)

जीवः—(सानन्दम्)

सिद्धाञ्जनौषधिरियं निहिताऽधिकण्ठमानन्दमेकमधिवाङ्मनसं तनोति ।
प्रायेण भाविनि समागमने शिवाया लीलावलाङ्कुलतया विनिवेशितेव ॥ ४५ ॥

हन्त, इदानीं स्वेन रूपेणाभिनिष्पद्य परं ज्योतिरुपसंपन्नोऽस्मि । तथा हि,

प्रकाशश्चाप्राप्यप्रकटनधुरीणौषधिबलादहं
साक्षाद्भूतोऽप्यधिकमपरोक्षः सगभवम् ।
इदानीमाश्चर्यं गगन इव गन्धर्वनगरं
समन्तादध्वस्तं मयि जगदशेषं विलसति ॥ ४६

अनु०—सखे शिवप्रसाद, किमासीदज्ञानवर्मा ।

शिव०—स किल,

क्षीणः शक्त्याऽऽवरणचणया ब्रह्मविद्याग्रहोभि-
र्दग्धो दग्धाम्बरमिव तनुच्छाययैवावशिष्टः ।
प्रारब्धस्य स्वयमथ वशे स्थ पितोऽयं मया
तज्जीवन्मुक्तेः परिणयविधौ नोऽपि नास्त्यन्तरायः ॥ ४७ ॥

जीवः—क्व पुनरिदानीं तत्रभवती ।

शिव०—

अस्मिन्ब्रह्मपुरे मनोहरतरं हृत्पुण्डरीकाभिधं
वेश्म स्वस्त्ययनं समस्ति रजसा शून्यं विशुद्धं च यत् ।
तस्यान्तर्महदङ्गणं दहरमित्याख्यायते यद्बुधै-
र्जीवन्मुक्तिरिहैव तिष्ठति भवान्यस्तौतु पाणिग्रहम् ॥ ४८ ॥

जीवः—कथमत्रैव संनिहिता तत्रभवती । गुहायां व्योम्नि प्रतिष्ठितति खलु सा श्रूयते ।

शिव०—

हृत्पुण्डरीकमेवेदं गुहाशब्देन गीयते । व्योमेति दहराकाशं तदन्तर्वर्ति कीर्त्यते ॥ ४९ ॥

तद्विवाहाङ्गणमेव प्रविशामः ।

(तथेति परिक्रम्य सर्वे दहराङ्गणप्रवेशं नाटयन्ति)

शिव०—

स एष दहराकाशो भूताकाशकृतोपमः । द्यावापृथिव्याद्यखिलं यस्यान्तः सुसमाहितम् ॥

इयं चात्र जीवन्मुक्तिर्विवाहोचितवेषा सख्या भवितव्यतया सह संलपन्ती वर्तते ।

जीवः—(निरूप्य सपरितोषम्)

यत्पारे मनसो गिरामपि गुणा यस्मिन्नलभ्योदया
रूपं यस्य च दुर्निरूपमखिलैर्यच्च स्वतः सुन्दरम् ।

यल्लब्ध्वा कृतिनस्तनोऽपि न परं लब्धव्यमाशामते
यत्प्रेमास्पदमद्भुतं च तदिदं साक्षात्कृतं नः सुखम् ॥ ५१ ॥

देवि, त्यज्यतां बहिर्व्यासङ्गः ।

स्वप्नारामविरामसीमनि पुरा निःसीमकामोद्यमा
या मे कामपि निर्वृतिं व्यतनुत प्रत्यस्तबाह्यान्तराम् ।
सैषा मे वरवर्णिनी समदशाविद्योतिविद्युल्लता-
रेखासंशयदायिकायनियतच्छाया दरीदृश्यते ॥ ५२ ॥

(ततः प्रविशति जीवन्मुक्तिः भवितव्यता च ।)

जीवन्मुक्तिः—हला भवितव्वदे, अवि सच्चं दे वअणं ? [हला भवितव्यते, अपि सत्यं ते वचनम् ?]

भवितव्यता—कहं अण्णहा कहइस्सं । सच्चं एव्व सो जीवराओ तुज्झ विरहेण महन्तं अणत्थं अणुहोदि । जदवत्थं तं दट्ठूण परिच्चत्तमच्छरा देवी सअं एव्व दुवेण तुम्हाणं संघडणे पउत्ता उवट्ठिदं वि अप्पणो तादस्स अ विणासं ण लक्खेदि । [कथमन्यथा कथयिष्यामि । सत्यमेव स जीवराजस्तव विरहेण महान्तमनर्थमनुभवति । यदवस्थं तं दृष्ट्वा परित्यक्तमत्सरा देवी स्वयमेव द्वयोर्युवयोः संघटने प्रवृत्तोपस्थितमप्यात्मनस्तातस्य च विनाशं न लक्षयति ।]

जीवन्मुक्तिः—कहं वावादिओ सो अण्णाणवम्मा ? [कथं व्यापादितः सोऽज्ञानवर्मा ?]

भवितव्यता—किं इदो वि सन्देहो । पेक्ख दाव तस्स विलासो पुढमं विअ ण दिस्सइ । [किमितोऽपि संदेहः । पश्य तावत्तस्य विलासः प्रथममिव न दृश्यते ।]

जीवन्मुक्तिः—जदि एव्वं सोहणं होदि । [यद्येवं, शोभनं भवति ।]

भवितव्यता—(निरूप्य) हला जीवम्मुत्ती, कहिं पेक्खसि । इदो आअदो एव्व सपरिवारो जीवराओ देवी अ । [हला जीवन्मुक्ते कुत्र पश्यसि । इत आगत एव सपरिवारो जीवराजो देवी च ।

(जीवन्मुक्तिः ससंभ्रमं स्थिता ।)

भवितव्यता—एहि देवि, एसा णो पिअसही इदो एव्व वट्टइ जा अप्पणो वि अहिअअरं तुह पेमहाअणं । [एहि देवि, एषा नः प्रियसखीत एव वर्तते याऽऽत्मनोऽप्यधिकतरं तव प्रेमभाजनम् ।]

(बुद्धिरुपसृत्य जीवन्मुक्तिं परिष्वजते ।)

जीवन्मुक्तिः—(परिष्वज्य) दिट्ठिआ खु दाणिं सङ्गदम्हि सहीए । [दिष्ट्या खल्विदानीं संगताऽस्मि सख्या ।]

बुद्धिः—एव्वं एव्व अम्हाणं अज्जउत्तेण वि सङ्गदा होहि । [एवमेवास्माकमार्यपुत्रेणापि संगता भव ।]

जीवन्मुक्तिः—(स्वगतम्) कहं एसा अम्हाणं त्ति मन्तेदि । [कथमेषाऽस्माकमिति मन्त्रयते ।]

(इति लज्जानतमुखी तिष्ठति ।)

प्रसादानुग्रहौ—

देव श्रेयान्मुहूर्तोऽयमनुजानीमहे वयम् ।
अयोनिजायाः कन्यायाः पाणिं गृह्णीष्व पाणिना ॥ ५३ ॥

जीवः—(सपरितोषम्) तथा । (इत्युपसृत्य)

अयि विलासिनि वासगृहेऽपि ते नवरसादतिसाहसमागतः ।
अयमसौ समसौख्यसमुत्सुको मयि दयस्व तव स्वमहं यतः ॥ ५४ ॥

(इति जीवन्मुक्तिं करे गृह्णाति ।)

(जीवन्मुक्तिः शृङ्गारलज्जामभिनयति । आकाशे सुमनोवृष्टिः । नेपथ्ये वाद्यघोषः । सर्वे चाशिषः प्रयुञ्जते ।)

जीवः—(स्पर्शसुखमभिनीय)

स्पर्शेन ते परमसुन्दरि दुर्निरूपं निर्वाणमुन्मिषति मे दुरवापमन्यैः ।
सद्यः प्रसीदति गणश्च ममेन्द्रियाणां चैतन्यमुल्लसति शाम्यति कामरोगः ॥ ५५ ॥

बुद्धिः—हला भविदव्वदे, सम्पदं सिथिलिआहिआरम्हि संवुत्ता । ता अदिदिग्घं णिद्दं आसादिअ विस्समसुहं अणुहोम्मि । [हला भवितव्यते, सांप्रतं शिथिलिताधिकाराऽस्मि संवृत्ता । तदतिदीर्घां निद्रामासाद्य विश्रमसुखमनुभवामि ।] (इति गन्तुमिच्छति ।)

भवितव्यता—हला देवि, मं उज्झिअ दाणिं एव्व कहिं णिवट्टेसि । चिट्ठ दाव खणमेत्तं । दुवे वि अम्हे समं एव्व णिव्वट्टम्हो । [हला देवि, मामुज्झित्वेदानीमेव कथं निवर्तसे । तिष्ठ तावत्क्षणमात्रम् । द्वे अप्यावां सममेव निवर्तिष्यावहे ।]

जीवः—

सा त्वं देवि ब्रह्मविद्या च सेयं सैषा जीवन्मुक्तिरद्योपपन्ना ।
यद्वा किंचिद्दृश्यमध्यासिद्धं तन्मे सर्वं नात्मनोऽन्यद्विभाति ॥ ५६ ॥

प्रसादानुग्रहौ—राजन्, प्राप्तोऽसि स्वपदम्, आप्तकामः कृतकृत्यश्च । किं ते भूयः प्रियमुपहरावः ।

जीवः—


अथाप्यात्मरतिक्रीडामिथुनानन्दलक्षणान् । व्यवहारान्यथारब्धमाचरिष्याम्यतः परम् ॥
तथापीदमस्तु भरतवाक्यम्—

आ सुप्तेराऽऽयुरन्तादवहितमनसः साधवो बुद्धतत्त्वा
वेदान्तोदाहृतार्थप्रचयपरिचयैरेव कालं नयन्तः ।
प्रत्यग्ब्रह्मैक्यसाक्षात्कृतिमतिविशदामन्तरासेदिवांसो
विद्वांसो धूतदृश्यव्यसनविततयो भूरि विश्वं पुनन्तु ॥ ५८ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति पञ्चमोऽङ्कः ।

इति श्रीकौशिककुलजलधिचन्द्र श्रीबालचन्द्रमखीन्द्रतनूभवनल्लाध्वरिविरचितं
जीवन्मुक्तिकल्याणं नाम नाटकं संपूर्णम् ॥



द्रव्याणां सुवर्णादीनां चयैः समुदायैः सह बहवोऽनेकप्रकारा व्रीह्यः शाल्यादयः पतन्ति वसन्ति। कर्षकाणां कोशवृद्धिर्भवतीत्यर्थः। इत्थमनेन प्रकारेण सर्वेषां विश्वेषां जनानामवने रक्षणे प्रतिभुवे जगत्काय दीनानां दरिद्राणां या आवली समूहः तस्या बन्धवे हितकराय भवते तुभ्यं भूयस्योऽधिका आशिष आशीर्वादा अद्यदानीं भूयासुः भवन्तु ; नीरोगहृढगात्रत्वाद्यर्थमिति भावः ॥ ३० ॥

नित्यं हन्त विवर्धमानसुमहादुष्प्राभवोत्साहव-
दुर्भूपालकृपालवच्युतरुशत्याकर्णनोदीर्णयोः।
निर्व्याजं मम कर्णयोस्त्वममृतं हुंकारवं चाकृथा
दिष्ट्या संप्रति सीदसीह महिष क्षेत्रेषु कृष्युन्मुखः ॥ ३१ ॥

नित्यमिति। नित्यं सत्यहम्, विशेषेण वर्धमानौ उपचीयमानौ सुमहान्तौ अतिवृहन्तौ दुष्प्राभवोत्साहौ दुष्प्रभुत्वदुरभिमानौ तद्वन्तो ये दुर्भूपाला दुष्टा राजानस्तेषां या कृपा करुणा तस्या लवो लेशस्तेन च्युता रहिता या रुशती क्रूरवाक्, 'रुशती वागकल्याणी' इत्यमरः। तस्या आकर्णनेन श्रवणेन उदीर्णयोर्भिन्नयोर्मम कर्णयोः श्रवणयोर्निर्व्याजं यथा तथा अद्भुत सुखप्रदम्, हुंकारवं शब्दविशेषमकृथाः कृतवान्। हे महिष दिष्ट्या दैवेन संप्रतीदानीं क्षेत्रेषु केदारेषु कृष्यां कर्षणे उन्मुख उत्सुकः सन्सीदसि क्लिश्यसि च ॥ ३१ ॥

मूढाभासधनोष्मभीष्मवदनक्ष्मापालपाशाङ्गणे-
ष्वाशापाशविकृष्यमाणहृदया व्यर्थां स्थितिं तन्वते।
अस्मद्भूपतिमाश्रयन्ति न बुधाः कामप्रदं सैरिभं
योऽस्मानक्षति रक्षति क्षितिफलैः सौम्यः समस्तैरपि ॥ ३२ ॥

128 V. Rama Iyah, Bridge Engineer, S. I. R, Trichy
129 K. G Narayanasami Iyer, Advocate ,,
130 K. N. Raghunathasami Iyer, Andanallur

***

SRI SANKARAGURUKULAM AND ACHARYAVIDYA PEETHAM TRUST.

The objects of this Institution, as declared in the Trust Deed are as follows :—

1. The due and regular performance of the daily pujas both in the morning and evening and the annual celebration of the Jayanti and Navaratri festivals for the deities consecrated in the Temple here for the welfare of all the Astika people between the Himalayas and Cape Comorin and for the spread of the Advaita Philosophy.

2. By the grace of the Acharyal, to make all arrangements to train boys

here by precept and example in the observance of our cultural customs and practices as detailed in the Shastras and as traditionally interpreted, and to produce scholars learned in the Vedas and Sastras possessing full and deep knowledge of the Advaita Sastra.

3. In pursuance of the above objects, to hold often assemblies of learned people (Vidvat Sabhas) and arrange Bhajanas, Harikathas, Lectures, Expositions of Puranas and Ithihasas by learned Pandits and Scholars.

4 To train a number of lecturers to go throughout the country at the cost of this Institution and lecture about the greatness of our religion and our Vaidika Dharma and about the utility of following our traditional customs and thus make the people follow our ancient Religion and Dharma and Culture.

5. To train Purohits who could understand the rationale of the various Vaidikakarmas now in vogue by learning the meanings of the various Sutras and the Mantras contained therein and become experts.

6. To collect and publish ancient Sanskrit Manuscripts and Sastraic works and make them useful to the public.

7. To accommodate and feed the Brahmin Sannyasis that go to the Temple here and utilise their knowledge and learning in such a way as would be useful to this Institution.

8. In accordance with the above objects to draw out a regular syllabus of the various subjects and to hold examinations in those subjects once a year and confer Titles and Prizes to those who come out successful in the Examinations.

9. To collect all printed Sanskrit books as well as Manuscripts in the Library called Sri Sacchidananda Bharati Bhandaram and make it useful to the public.

10 Further to do all such things as are not inconsistant with the above objects and are not opposed to the Sanatana Vaidika Dharma.

☞ *Any generous Astika gentleman who desires to encourage any of the above objects may do so by endowing any amount in the shape of movables or immovables as suits his convenience, earmarking the same for the particular object or objects desired by him to be encouraged. It will be most gratefully acknowledged and the proceeds shall be devoted to the specified object or objects. Enquiries for further details are quite welcome and will be replied to immediately.*



Mysore Government Oriental Series

स्मृतिचन्द्रिका—(श्राद्धकाण्ड., आशौचकाण्डश्च) श्री याज्ञिकदेवणभट्टोपाध्यायविरचिता। 2 Vols.

श्रीमद्ब्रह्मसूत्रभाष्यम्—श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्। श्रीमज्जयतीर्थ–व्यासतीर्थराघवेन्द्रतीर्थानां टीकाभिः समलंकृतम्। Vols. 3, 4

तैत्तिरीयब्राह्मणम्—(द्वितीयाष्टकम्) भट्टभास्करीयव्याख्यासायणभाष्याभ्यां युतम्।

अलंकारमणिहारः— श्रीकृष्णब्रह्मतन्त्रपरकालसंयमीन्द्रैः प्रणीतः Parts II, III & IV, 3 vols.

आयुर्वेदसूत्रम्—योगानन्दनाथभाष्यसमेतम्।

विद्यामाधवीयम्—(मुहूर्तदर्शनम्) विद्यामाधवविरचितम्। विष्णुशर्माविरचितमुहूर्तदीपिकायुतम्। 3 Vols.

कौटिलीयं अर्थशास्त्रम्—(तृतीयमुद्रणम्)

अर्थशास्त्रपदसूची—3 Vols.

अभिलषितार्थचिन्तामणिः (Part I) सोमेश्वरदेवविरचितः।

सरस्वतीविलासः—(व्यवहारकाण्डः) श्री प्रतापरुद्रमहादेवमहाराजविरचितः।

आपस्तम्बशुल्बसूत्रम्—कपर्दिभाष्येण करविन्दसुन्दरराजव्याख्याभ्यां च सहितम्।

तर्कताण्डवम्—श्री व्यासतीर्थविरचितम् श्री राघवेन्द्रतीर्थकृतन्यायदीपाख्यव्याख्यासमलंकृतम। 4 Vols.

तत्त्वमुक्ताकलापः— श्रीमद्वेङ्कटनाथदेशिकप्रणीतः— स्वकृतया सर्वार्थसिद्ध्याख्यवृत्त्या आनन्ददायिनी भावप्रकाशाभ्यां च संवलितः 2 Vols.

श्रीदेवीमाहात्म्यम्— N Rajam & Co, Vepery Madras.

श्रीविष्णुसहस्रनामस्तोत्रम्। With Tamil meaning by V. Narayanan M A., M.L., Published by Sri Kamakoti Publishing House, Sri Sankara Mutt, Kumbakonam.

श्रीविष्णुपादादिकेशान्तस्तोत्रम् by Do

मुकुन्दमाला Do,

भजगोविन्दम् Do,

OUR EXCHANGES.

Aryadharmam, Kumbakonam.

Brahmavidya : The Adyar Library Bulletin, Adyar,

The Sanskrit Sahitya Parishat Patrika,

The Divine Life, Rikhikesh,

The Vedanta Kesari, Mylapore.

The Mysore Sanskrit College Magazine, Mysore.

The Kalpaka, Coimbatore.

The Quarterly Journal of the Mythic, Society, Bangalore.

Madhuravani. Belgaum,

The Poona Orientalist, Poona.

The Journal of Oriental Research, Madras.

The Indian Thinker, Trivandrum.

The Journal of the Oriental Institute, Tirupati.

Journal of the University of Bombay.

Journal of Oriental Research,

MADRAS.

STARTED IN 1927

AND

WORKING SUCCESSFULLY FOR THE CAUSE OF ORIENTAL RESEARCH AND LEARNING

FOR THE LAST 12 YEARS

CONDUCTED BY A

Distinguished Editorial Committee

PRESIDED OVER BY

Sir P. S. Sivaswami Aiyar, LL.D., K. C. S. I., C. I. E.,

CONSISTING OF OTHER EMINENT SCHOLARS

viz.,

Mahamahopadhyaya S. Kuppuswami Sastri, M.A., I.E.S.,

Prof. M. Hiriyanna, M.A., L.T.

Prof. P. P. S. Sastri, B.A. (Oxon) M.A., (Madras)

Dr. A. Sankaran, M.A. Ph. D., L.T.

Dr. T. R. Chintamani, M.A., Ph.D., and others

AND

HIGHLY APPRECIATED BY

Eminent Foreign Scholars like

Dr Hermann Jacobi,

Dr. L. D. Barnett, Dr. J. Jolly,

Q. Strauss, Dr. F. O. Schrader,

Dr. Wilhelm Printz and

Dr. Sylvain Levi

AND BY LEADING INDIAN DAILIES AND JOURNALS

like the "Hindu", "Madras Mail", "Bombay Chronicle", the "Indian Antiquary" and the "Indian Review"

ISSUED IN FOUR QUARTERLY PARTS containing very learned Articles by Eminent Scholars and Students of Research.

ANNUAL SUBSCRIPTION

Inland: Rs 6 **Foreign: 10 sh.**

Each Part separately Rs. 2. Postage inclusive

For Particulars apply to —

"Ashrama" Luz, Mylapore Madras. } **Mr. K. BALASUBRAHMANYA IYER, B.A., B.L.** *Managing Editor.*

THE ADYAR LIBRARY

BRAHMAVIDYA

THE ADYAR LIBRARY BULLETIN APPEARING FOUR TIMES A YEAR

Director: Dr. G. Srinivasa Murti, B.A. B.L., M. B. & C. M., Vaidyaratna.

Editor: Prof. C. Kunhan Raja, M.A., D. Phil. (Oxon.)

Rates of Subscription:

Life Subscription	Rs.	100
or	$	50
or	£	10

PER ANNUM SINGLE COPY


India & Ceylon	Rs. 6	Rs 2—8
U. S. A.	$ 3.10	$ 1-25
British Empire	Sh. 12	Sh. 5
Other Countries	Rs. 9	Rs 3—8

All Communications to be addressed to:

The Director,

Adyar Library,

Adyar, Madras, S. India



Printed at the SRI VANI VILAS PRESS,
& Published at the Sri Sankaragurukulam, Srirangam,
by Gurubhaktasikhamani
T K. BALASUBRAHMANYA AIYAR B A

The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. IV. OCTOBER—DECEMBER NO. 15.



Editor :
Gurubhaktasikhamani,
Sastraprasarabhushana,
T. K. BALASUBRAHMANYA AIYAR
B A,
Founder, Sri Sankara-
gurukulam, Srirangam.

Literary Adviser :
Bharatakalanidhi
Vidyasagara,
Vidyavacaspati,
P.P SUBRAHMANYA SASTRI,
B. A. (Oxon) M A.
Professor of
Sanskrit, Presidency
College, Madras

ANNUAL SUBSCRIPTION { INLAND Rs. 6/—Post Free. FOREIGN SH. 12/—

॥ देवीस्तुतिः ॥

कल्पशाखिगणसत्प्रसूनमधुपानकेलिकुतुकभ्रम-
त्पदपदारवमनोहरे कनकभूधरे ललितमण्टपे ।
अत्युदारमणिपीठमध्यगनिवासिनीमखिलमोहिनीं
भक्तियोगसुलभां भजे भुवनमातरं त्रिपुरसुन्दरीम् ॥ १ ॥

एककालसमुदीयमानतरुणार्ककोटिसदृशस्फुर-
देहकान्तिभरघोरणीगलनलोहितीकृतदिगन्तराम् ।
वागतीतविभवां विपद्वनभयदायिनीमखिलदेहिनां
आगमार्थमनिदीपिकां निशमयाश्रये त्रिपुरसुन्दरीम् ॥ २ ॥

ईषदुन्मिषदमर्त्यशार्ङ्गकुलावलीविमलतारका-
वृन्दसुन्दरधांशुखण्डभृतीकृतातिगुरुकौशिकाम् ।
नीलकुञ्चितघनालकां ललाटभूषणायितविलोचनां
नीलकण्ठकृतोन्नतिं सततमाश्रये त्रिपुरसुन्दरीम् ॥ ३ ॥

लक्ष्महीनविधुलक्ष्मनिर्जयावलक्षणाननसरोरुहां
इक्षुकार्मुकशरानपाशतोचिह्निकायुगमताल्लिकाम् ।
लक्षये मनसि सततं सकलदुष्कृतक्षयविधायिनीं
उक्षवाहनपदोविभूतिमहदक्षरां त्रिपुरसुन्दरीम् ॥ ४ ॥

ह्रीमदप्रमदकामकौतुककृपादिभावपिशुनाय-
स्निग्धमुग्धविशदत्रिवर्णविमलालसालसविलोचनाम् ।
सुन्दराधरमणिप्रभामिलितमन्दहासनवचन्द्रिकां
चन्द्रशेखरकुटुम्बिनीमनिशमाश्रये त्रिपुरसुन्दरीम् ॥ ५ ॥

हस्तमृष्टमणिदर्पणोज्ज्वलमनोज्ञगण्डफलकद्वयी-
बिम्बितानुपमकुण्डलस्तबकमण्डितानसरोरुहाम् ।
स्वर्णपङ्कजदलान्तरेल्लासतकर्णिकासदृशनासिकां
कर्णवैरिमदसोदरीं मततमाश्रये त्रिपुरसुन्दरीम् ॥ ६ ॥

सन्मरन्दरसमाधुरीतुलनकर्मठाक्षरपदान्मिष-
न्नर्मपेशलवचोविलासपरिभूतनर्मसुधारसाम् ।
कम्रवक्त्रवनग्रहप्रचलदुन्मदभ्रमरमण्डलां
कुर्महे मनसि दामनेमसम्बिकां त्रिपुरसुन्दरीम् ॥ ७ ॥

कम्रकान्तिजितहारपूरमणिमेखलमङ्गलसद्गुलस-
त्कण्ठकाण्डकमनीयतापहृतकबुराजरुचिमण्डलाम् ।
किंचिदानतमनोहरांसयुगचुम्बिचारुमणिकर्णिकां
पञ्चबाणरिपुनिश्चयपुण्यलहरीं भजे त्रिपुरसुन्दरीम् ॥ ८ ॥

हस्तपद्मलसदिक्षुचापसृणिपाशपुष्पावली खोल्लस-
त्तप्तहेमरचिताभिरामकटकाङ्गदीयवलयादिकाम् ।
वृत्तनिस्तुलनिरन्तरालकठिनोन्नतस्तनतृणीभव-
न्मत्तहस्तिवरमस्तकां मनसि वर्तये त्रिपुरसुन्दरीम् ॥ ९ ॥

लब्धगाढपरिरम्भतुष्टहरहासगौरतरलोल्लस-
च्चारुहारनिकराभिरामकुचभारतान्ततनुमध्यमाम् ।
रोमराजिललितोदरीसरणिनाभिमखिलेश्वरीं
कामराजपरदेवतामनिशमाश्रये त्रिपुरसुन्दरीम् ॥ १० ।

ह्रींकमण्डलुनिरन्तरोल्लसितजातरूपमयमेखला-
चारुकान्तिपरिरम्भसुन्दरसुसूक्ष्मचीनवसनान्विताम् ।
मारवीररथचातुरीहृतिधुरीणतुङ्गघनस्थलां
धारये मनसि संततं त्रिदशवन्दितां त्रिपुरसुन्दरीम् ॥ ११ ।

स्मरसरसिकिरणानभिज्ञपरिवर्धमानकदलीतरु-
स्पर्धिमुग्धमधुरोरुदण्डयुगनन्दितेन्दुधरलोचनाम् ।
वृत्तजानुयुगवल्गुभावजितचित्तसंभवसमुद्भटकां
नित्यमेव परिशीलये मनसि मुक्तिदां त्रिपुरसुन्दरीम् ॥ १२ ॥

कण्ठकाण्डरुचिकुण्ठताकरणलीलया कलकोकिनां
जङ्घया तुलितकेतकीमुकुलसङ्गया भृशमुदाञ्चिताम् ।
अम्बुजोदरविडम्बिचारुपदपल्लवां हृदयदर्पणे
बिम्बितामिव विलोकये सततमम्बिकां त्रिपुरसुन्दरीम् ॥ १३ ॥

लभ्यपादकमलार्चनां प्रणतितत्परैरनिशमाश्रया
कल्पकोटिशतसंचितेन सुकृतेन कैश्चन नरोत्तमैः ।
कल्पशाखिगणकल्प्यमानकनकाभिषेकसुभगाकृतिं
कल्पयामि हृदि चित्पयोजवनषट्पदीं त्रिपुरसुन्दरीम् ॥ १४ ॥

ह्रीमिति प्रथितमन्त्रमूर्तिमचलात्मजेत्युदधिकन्यके-
त्यम्बुजासनकुटुम्बिनीति बहुधोपगीतमहिमोदयाम् ।
सेवकाभिमतकामधेनुममलागमोपनिषदैभवां
भावये मनसि भाविताखिलचराचरां त्रिपुरसुन्दरीम् ॥ १५ ॥

स्तोत्रराजमिममात्तमोदमहरागमे प्रयतमानसः
कीर्तयन्निह नरोत्तमो विजितवित्तपो विमलसंपदा ।
प्रार्थ्यमानपरिरम्भकेलिरबलाजनैरपगतैषणो
गात्रमात्रपतनावधावकृतमक्षयं पदमवाप्नुयात् ॥ १६ ॥

॥ श्रीकान्तिमतीश्वर्यष्टकम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीशृङ्गगिरि श्री जगद्गुरु श्रीसच्चिदानन्दशिवाभिनव-
नरसिंहभारतीस्वामिभिर्विरचितम् ॥

श्रीमद्वेणुवनेश्वरस्य रमणीं शीतांशुबिम्बाननां
शिञ्जन्नूपुरकोमलाङ्घ्रिकमलां केयूरहारान्विताम् ।

रत्नस्यूतकिरीटकुण्डलधरां हेलाविनोदप्रियां
श्रीमत्कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ १ ॥

तत्त्वज्ञानिहृदब्जमध्यनिलयां ताम्रापगातीरगां
कारुण्याम्बुनिधिं नटित्तुलितभां तालीदलश्यामलाम् ।
लीलासृष्टिविधायिनीं तनुभृतां तात्पर्यबोधाश्रये
तन्वीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ २ ॥

संगीतामृतबिन्दुमध्यभवनां साहित्यनित्यादरां
स्वारस्याद्भुतनाट्यवीक्षणपरां सालोक्यमुक्त्यादिदाम् ।
साधुभ्यः सकलामरार्थितमहासाम्राज्यलक्ष्मीप्रदां
माध्वीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ३ ॥

कल्याणीमखिलाण्डकोटिजननीं कल्हारदामोज्ज्वलां
कस्तूरीतिलकाभिरामनिटिलां कञ्जासनाराधिताम् ।
कामारेः कनकाचलेन्द्रधनुषः कारुण्यवारांनिधेः
कान्तां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ४ ॥

भक्तानां भयजालभञ्जनकरीं भान्वब्जशुक्रेक्षणां
भाग्योदारगुणान्वितां भगवतीं भण्डासुरध्वंसिनीम् ।
भास्वद्रत्नकिरीटकुण्डलधरां भद्रासनाध्यासिनीं
भव्यां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ५ ॥

देवानामभयप्रदां विधिनुतां दुष्टापहन्त्रीं सुखां
देशानेकदिगन्तमध्यनिलयां देहार्धदास्यप्रियाम् ।
माधुर्याकरचन्द्रखण्डमकुटां देवाङ्गनासेवितां
देवीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ६ ॥

दुष्टाटोपविनाशनैकनिपुणां दौर्भाग्यविच्छेदिनीं
दुर्मात्सर्यमदाभिमानमथिनीं दुःखापहां प्राणिनाम् ।

दर्वीरामितदैत्यमज्जनकरीं दुःखप्रहन्त्रीं शिवां
दुर्गां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ७ ॥

मन्दस्मेरमुखाम्बुजां मरकतश्यामां महावैभवां
मातङ्गीं महिषासुरस्य शमनीं मातङ्गकुम्भस्तनीम् ।
मन्दारद्रुमसन्निभां सुमधुरां सिद्धासनाध्यासितां
मान्यां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥ ८ ॥

॥ श्रीबालात्रिपुरसुन्दरीस्तवराजः ॥

श्रीसच्चिदानन्दतीर्थस्वामियतिवरविरचितः ॥

कल्हारपुष्पनिलया कलयन्त्युपान्ते
हस्तैरभीतिवरमाल्यसुपुस्तकाद्यान् ।
आशा दशाप्यरुणयन्त्यरुणात्मभामा
बालाम्बिका हृदि सदैव ममाधिरस्तु ॥

अम्ब त्वदीयमतिमञ्जुलमन्दहास-
माताम्रचारुदशनावलिमण्डितोष्ठम् ।
भास्वत्किरीटमणिकुण्डलदत्तशोभ-
माविष्कुरुष्व मम चेतसि मञ्जुलाभ्यम् ॥

पादानमज्जनमनोरथपूरयित्रि
पानाय सर्वजगतामपि जागरित्रि ।
पाकारिमुख्यपरिवन्दितपादपद्मे
पापान्यपाकुरु ममाम्ब परशजाये ॥ ३ ॥

पाथोरुहोदररुचिं प्रतिपेदुषीणां
पापान्धकारपटलीपरिपन्थिनीनाम् ।
पादश्रियां तव पन्नेलिमपाटलिम्नां
पन्थानमम्ब परिसंचिनुतां मनो मे ॥ ४ ॥

प्रायस्तव त्रिपुरसुन्दरि पाटलाभं
पादारविन्दमनुचिन्तयतो मनो मे ।
प्रत्याहृतं विषयतः प्रतिपन्नसौस्थ्यं
पारेगिरां कमपि वा लभते प्रमोदम् ॥ ५ ॥

प्राहुर्यदम्ब पुरुषाः प्रथमे परात्म-
ज्ञानोदयौपयिकमम्ब मनःप्रसादम् ।
त्वद्भक्तियोगसुलभं यदपीममाहुः
सर्वं तदेतदनुभूतिपथं गतं मे ॥ ६ ॥

नानामुखं जनमिमं धावदिदं हि चेत-
स्त्वय्यर्पितं बत कदाचिदिहान्तराले ।
निर्वाणमम्ब यदि यात्यतिमात्रमेव
तच्चेत्स्थिरं त्वयि तदा मम निर्वृतिः का ॥

मातः सदा त्रिपुरसुन्दरि तावकीने
पादारविन्दयुगले परिधावमानम् ।
मच्चित्तपोतमघसंहतिजातपङ्क-
त्वत्पादकान्तिसलिलैर्विमलीकुरुष्व ॥ ८ ॥

चारुस्मितं त्रिपुरसुन्दरि चन्द्रलेखा-
सौभाग्यहारिनिटिलं चटुलालिकोणम् ।
सौन्दर्यसारभव[illegible]मुदीक्ष्य जातः
स्वप्नेऽपि वा किमु कदाचन [illegible]

स्वप्ने पुनः पुनरहो कतिधा न सन्ति
वस्तूनि मातरधिचित्तमम[illegible]नि ।
अद्यापि तावकपदाञ्जलरूपधेयं
नैवाम्ब चित्तपथमाप कुतस्तदेतत् ॥१७॥

को नाम ते त्रिपुरसुन्दरि रूपधेयं
चित्ते निवेश्य ननु निर्वृतवानपि द्राक् ।
देवान्तरं शरणयेत्किमु गाङ्गनीर-
मास्वाद्य दृष्टरुचिरिति पुनः कुल्याम् ॥

स्त्रीव्यक्तिसंस्फुरणहेतुतया तवाम्ब
ध्यानं न योजयति दृक्पथे पुमांसम् ।
इत्यम्ब ते स्मृतिमुपेक्ष्य सुरा तेषु
भावं जडा विदधते किमिदं हि मौढ्यम् ॥

माङ्गल्यसारभवनात्तव पादपद्मा-
स्कंचिद्रजःकणमुपेत्य हि केऽपि देवाः ।
स्रष्टेति वा जगति पालयितेति वाऽत्र
ख्याता भवन्ति तदिदं न विदन्ति मन्दाः ॥

माङ्गल्यसारभवनं भवतीं वदन्ति
प्राञ्चो मुनीश्वरवराः खलु सप्रमाणम् ।
मातस्ततो न तु भवेत्त्वदुपासकस्य
कुत्राप्यमङ्गलमिति ध्रुवमेव वच्मि ॥१४॥

बालाम्बिके बहुविधान्विषयान्दुरन्ता
नाहं तवाम्ब सविधे मनसाऽपि याचे ।
त्वत्पादपद्मयुगलीं तु सदैकतानो
ध्यातुं यतिष्य इति तावदसि ततः कृती स्वाम् ॥

ध्यातुं यदा तव सुमङ्गलरूपधेयं
सोऽहं यते तदनु मानसमर्कटो मे ।
धावत्यहो कुपथ एष निरङ्कुशोऽयं
ध्यानात्कथं नु भवतीं परितोषयामि ॥

मोऽहं त्वदङ्घ्रियुगलीमनुसंदधानः
सिद्धो भवेयमिति निश्चितवान्पुरस्तात् ।
चित्तस्य दुर्ललिततामधुना तु पश्य-
स्तत्राप्यलब्धशरणोऽस्मि हि कुण्ठितात्मा ॥

मातस्त्वमेव यदि मय्यनुकम्पमाना
दास्यस्यनन्यमतिकं तव पादपद्मे ।
श्रेयस्तदा मम भवेद्ध्रुवमन्यथा त्व-
मेवैव विद्धि तनयं तव नष्टमेनम् ॥१८॥

रत्नप्रभापरिलसद्रमणीयहेम-
स्तम्भान्विते मणिमये सदने विशाले ।
कल्हारपुष्पमृदुहरे स्फुटमुल्लसन्तीं
स्वप्नेऽपि वा किमभिवीक्षितुमुत्सहे त्वाम् ॥

मातस्त्वदङ्घ्रिसरसीरुहसख्यकारि-
सौगन्धिकाख्यकुसुमोदितगन्धवाहः ।
त्वत्पादरेणुसचिवः शमयेत्कदा वा
तापत्रयं त्रिपुरसुन्दरि मामकीनम् ॥२०॥

मातः कदा सुलक्षितं तव रूपधेयं
साक्षात्स्फुटं समनुवीक्ष्य समाहितात्मा ।
पद्यैः स्वयं विरचितैः परिफुल्लगात्रो
नायन्यथाभिलषितं ननु निर्वृतः स्याम् ॥

किं वा कदाचिदपि तेऽम्ब समीपगामी
संवाहयन्सुरभिलं तव पादपद्मम् ।
आलिङ्ग्य हस्तयुगलेन निवेश्य वक्ष-
स्थानन्दनिर्भरमनाः सुहितो भवेयम् ॥

मातः कदा त्रिपुरसुन्दरि ते प्रसादा-
द्वाग्वैभवं परममस्खलितं प्रपद्य ।
भूत्यन्तसीमनि परां सुखचित्स्वरूपां
ब्रह्मात्मिकां भगवतीं परिशीलयिष्ये ॥

स्खालित्यमम्ब वचसामपनीय सर्वं
शुद्धां धियं त्रिपुरसुन्दरि मे वितीर्य ।
संसारघोरजलधेरिममुद्धरस्व
दासं तवैव करुणां प्रतिपालयन्तम् ॥२४॥

स्वद्रूपधेयजलधौ परितो विहारो
भूयात्सदैव मम मानसकच्छपस्य ।
मा गादयं परसुराख्यमरुस्थलेषु
निक्षेप एष निहितस्त्वामिमं गृहाण ॥

योषिद्धनादिविषयेष्वतितृष्णतां मे
निष्पाद्य मे मनसि निष्प्रतिबन्धमेव ।
एकाग्रतामुपजनय्य भवत्पदाब्जे
मामुद्धर त्रिपुरसुन्दरि पापकूपात् ॥ २६ ॥

संन्यस्य सर्वविषयांस्त्वदुपासनेच्छोः
प्रादुर्भवन्त्यहह मे कतिधाऽन्तरायाः ।
सर्वानिमान्समतिलङ्घ्य कदा तवाम्ब
विक्षेपशून्यहृदयो विदधीय सेवाम् ॥

वेदाः पुराणततयश्च यदि प्रमाणं
तत्रोक्तकारुणिकता यदि तेऽम्ब सत्या ।
सोऽहं त्वदेकगतिको यदि चास्मि तर्हि
मत्काङ्क्षितं सफलयिष्यसि निर्विलम्बम् ॥

सांसारिकीं कुसरणिं समनुप्रवेश्य
तापत्रयेण च कदर्थयितुं जडं माम् ।
विघ्ना हि ये विवरदर्शिन उद्भवन्ति
तान्नाशय त्रिपुरसुन्दरि संनतिस्ते ॥ २९ ॥

दुष्टाशयत्वमथ वा चपलात्मतां वा
दासस्य मे न गणयिष्यसि तावकस्य ।
एकाग्रतां त्वयि वितीर्य कृपावशान्मां
संसारमृत्युमुखतः परिमोचयस्व ॥ ३० ॥

विश्वस्य लोकजननीं भवतीं किलाह-
मद्यावधीह कृपणो धृतजीवितोऽस्मि ।
तस्मात्त्वमेव सततं विपदां मुखेभ्यो
निर्मोच्य मां घटय मुक्तिवधूकिशोर्या ॥

वाग्देवताऽसि वृषभध्वजवल्लभाऽसि
विष्णोः प्रियाऽसि परशक्तिरसि त्वमेव ।
त्वामन्तरा किमिह दैवमुपाश्रयिष्ये
तस्मात्त्वमेव परिपालय तावकीनम् ॥३२॥

मच्चिदानन्दतीर्थस्य कृतिरेषा शुभंकरी ।
धिनोतु धीमतां वृन्दं धुनोतु च मनोमलम् ॥

॥ चतुर्मतसारः ॥

[पोलकं ब्रह्मश्रीरामशास्त्रिभिर्विमृष्टः ॥]

(पूर्वतोऽनुवृत्तः)

एवं समासहस्रेणापि हेत्वाभासजटिलपरस्परपक्षप्रतिक्षेपकग्रन्थानिकुरुम्बेनाप्यपरिहरणीयस्य भागवतानां मिथः कलहस्य मूलकारणमिदमेव— यत्तेषां ज्ञानकाण्डस्योपासनाकाण्डात्पार्थक्यास्वीकारः, निर्विशेषस्वरूपज्ञेयब्रह्मणः सविशेषस्वरूपोपास्यब्रह्मातिरिक्तस्यापलापः, मोक्षहेतुत्वं भक्तेरेव, ज्ञानस्य तु भक्तिहेतुत्वमेवेति ज्ञानोपासनयोः पौर्वापर्यविपर्ययकरणम्, 'न तावद्वेदप्रतिपादितेऽर्थेऽनुपपन्ने वैदिकानां बुद्धिः खिद्यते, अपि तु तदुपपादनमेव गोचरयति' इति श्रीविद्यारण्यचरणोक्तरीत्या तत्त्वपरिज्ञानविषये श्रुत्येकशरणतायां न्यूनता चेति महतामाशयः। वस्तुतो निर्विशेषमस्थूलादिरूपं सच्चिदानन्दाद्यात्मकमद्वितीयं प्रत्यगभिन्नं नित्यशुद्धबुद्धमुक्तस्वभावमेव ब्रह्मोपनिषदां परमतात्पर्यगोचरं पारमार्थिकम्। अथापि तदेव ब्रह्म, 'चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना॥ यतीनां मन्त्रिणां चैव ज्ञानिनां योगिनां तथा। ध्यानपूजानिमित्तं हि तनुं गृह्णाति चेच्छया॥' इत्यादिवेदागमवचनानुसारेण 'न्यात्परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थम्' इत्यन्तस्तद्ब्रह्मार्थाधिकरणे 'ध्यानार्थेऽपि सत्यकामादिगुणोपदेशे तद्गुण ईश्वरः सिद्ध्यति' इति व्यतिहाराधिकरणे च भगवत्पादीयादिव्यसूक्तया 'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥ वशीकृते मनस्येषां सगुणब्रह्मशीलनात्। तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम्॥' इति कल्पतरूक्तया च भक्तानुग्रहार्थमनादिवासनासमुद्भूततत्तदधिकारिरुचिभेदानुसारिशिवविष्ण्वादिनानाविधव्यावहारिकसविशेषरूपाणि परिगृह्य तेन तेन रूपेणाविर्भूय स्वोपासकतत्तद्भक्तेभ्यस्तत्तदभीष्टफलानि वितीर्य तदनुकम्पयैवान्ते 'तेषां सततयुक्तानां · भास्वता' (गीता) इत्यादिभगवदुक्तरीत्या ज्ञानयोगप्रदानपूर्वकं स्वीयं शिवविष्ण्वादिसविशेषरूपं भक्तियोगगम्यं व्यावहारिकतया स्फुटीकृत्य ज्ञानयोगगम्यं निर्विशेषं पारमार्थिकं स्वस्वरूपं यथावत्प्रकाश्य अनावृतपरिपूर्णानन्दरूपेण सर्वदा तेभ्यः परिस्फुरति। एवं च सर्वेषामपि नानाविधशिवविष्ण्वाद्युपासनामार्गाणां चित्तैकाग्र्यादिद्वारेणैकविधनिर्विशेषज्ञानसाधनतया तत्र पर्यवसानेन लक्ष्यैक्याद्विरोधगन्धोऽपि नास्ति। एतद्विपरीत्येन ज्ञानयोगस्य तत्तद्वादिभिः स्वस्वानुगुणं वर्णितस्वरूपस्य भक्तियोगसाधनत्वे भक्तिमार्गस्य शिवविष्ण्वाद्युपास्यभेदेनानेकविधत्वाल्लक्ष्यैक्यस्योपपादयितुमशक्यतया एकलक्ष्यमार्गभेदाभावाद्भिन्नलक्ष्यभिन्नमार्गावलम्बिनां वादिनां कलहस्य वर्षायुतैरपि विनिवृत्तिर्दुर्लभैव॥

उपासनस्यानेकविधत्वे तत्त्वज्ञानस्य चैकविधत्वे इदमेव कारणं—यदुपासनं मानसक्रियारूपं पुरुषतन्त्रं, क्रियायां विकल्पसंभवात्कर्तुमकर्तुमन्यथाकर्तुं शक्यं, नत्रमाणवस्तुपरतन्त्रम्। ज्ञानं त्वक्रियारूपं प्रमाणवस्तुपरतन्त्रं, वस्तुनि विकल्पासंभवात् न कर्तुमकर्तुमन्यथाकर्तुं शक्यं, अत एव न पुरुषतन्त्रम्। किं च 'न खलु यथावस्तवोपासितव्यमिति कश्चिन्नियमोऽस्ति। किं तु यथावचनमेवोपासितव्यमित्येतावानेव नियमः' इति, 'न हि वस्तूना स्वभावानुसारेण किंचिदुपासनं प्रवर्तते; किं तु वचनानुसारेण' इति च ऐतरेयारण्यकभाष्यानुसारेण 'सर्वत्र हि शास्त्रप्राप्ता एव धर्मा उपास्याः, न विद्यमाना अप्यशास्त्रीयाः' इति च छान्दोग्यभाष्यानुसारेण च उपासने विद्यमानस्यापि अविषयीभावः, अविद्यमानस्यापि विषयीभावः। तत्त्वज्ञाने तु विद्यमानस्यैव विषयीभावः, न त्वविद्यमानस्य कस्याप्यंशस्य विषयीभावः। उपासनज्ञानयोर्वैलक्षण्यं च भगवत्पादैः समन्वयाधिकरणे स्फुटीकृतम्।

एवमुपासनस्य तत्त्वज्ञानान्महता विशेषस्य सद्भावऽपि ज्ञानं प्रत्यन्तरङ्गसाधनत्वात् ज्ञानोपासनयोः रहस्यत्वमनोवृत्तित्वाभ्यां साम्याच्च हेतोः ज्ञानानरूपणैदंपर्यप्रवृत्तायामप्युपनिषदि ज्ञानेन सार्कं ज्ञाननिरूपणप्रसङ्गेन उपासनानामपि बहुविधानां कीर्तन, तदनुसारेण ब्रह्ममीमांसायामपि उभयोर्निर्णयश्च। तत्रापि यथा चतुर्ष्वपि वेदेषु सर्वप्राण्यनुग्रहार्थं ब्रह्मभावाविरूपमहापुरुषार्थप्रतिपादनैदंपर्येणैव प्रवृत्तेषु तदुपयोग्यन्तःकरणशुद्धिजनककर्मनिरूपणार्थ एव भूयान् प्रपञ्चः; अधिकारिबाहुल्यात्, 'कृत्स्नभावात्तु गृहिणोपसंहारः' इति सूत्रोक्तन्यायतोऽत्रेण निरूपणीयकर्मबाहुल्याच्च। ब्रह्मनिरूपणार्थो वेदान्तभागस्त्वधिकारिबाहुल्याभावान्निरूपणीयबाहुल्याभावाच्च स्वल्पः। तथैव वेदान्तभागे तदर्थाविष्कारपरायां ब्रह्ममीमांसायां भगवत्पादीये तद्भाष्ये च निर्विशेषब्रह्मभावावाप्त्यर्थं तन्निदिध्यासनोपयोगितचित्तस्थैर्यायुपयोगिसगुणब्रह्मोपासनप्रसङ्ग एव भूयान्, अधिकारिबाहुल्यात्, निरूपणीयध्यानतदुपयोगिगुणादिबाहुल्याच्च। निर्विशेषब्रह्मस्वरूपज्ञाननिरूपणभागस्त्वधिकारिबाहुल्याभावान्निरूपणीयबाहुल्याभावाच्च स्वल्प एव। वेद इति उपनिषदिति च पदं ज्ञानकाण्डस्यैव, तत्रापि महावाक्यस्यैव च मुख्यवृत्त्या बोधकमन्यत्र गौण्या वृत्त्या। एतच्च संक्षेपशारीरके प्रपञ्चितम्॥

वेदोपनिषदादिपदमुख्यार्थभूतस्यापि ज्ञानकाण्डस्य स्वल्पत्वादेव तदपलापसाहसं परेषाम्। तदपलापेन चाविश्रान्तः कलहः। वेदान्तेषु क्षीरनीरयोरिवाविविक्तयोः अस्फुटागम्ययोर्द्वयोः ज्ञानोपासनयोर्विवेककरणादेव भगवत्पादानां परमहंसत्वं, न तु तिलतण्डुलवत् स्फुटागम्यभेदयोः पूर्वभागोक्तकर्मज्ञानयोर्विवेककरणमात्रात्। तत्त्वज्ञानोपासनयोः पूर्वोक्तवस्तुतन्त्रत्वपुरुषतन्त्रत्ववैलक्षण्यादेव ज्ञानमार्गे भेदमकृत्वा उपासनामार्गे भगवत्पादानां भेदकरणं उपासनसर्वधर्मिब्रह्मतत्त्वापकर्षकत्वं च। भक्तानुग्रहार्थं विभक्तेषूपासनामार्गेषु च तत्र तत्र तन्मयत्वेन भगवत्पादानां प्रकाशः प्रपञ्चसारसौन्दर्यलहर्यादिभगवत्पादीयस्तोत्रादिग्रन्थावलोकिनां स्फुटः। अहो भगवत्पादानां सामरस्यातिशयः सहृदयहृदयावर्जकः॥

इयता प्रबन्धेन च महाभिषग्रूपेण परमेश्वरेण प्रवर्तितानां भवरोगनानाविधचिकित्साशास्त्ररूपाणां सर्वासामपि विद्यानां सर्वेषां च मतानामधिकारिभेदेन सोपानारोहणन्यायेन भूमिकाक्रमेण च प्रामाण्यमेव, नाप्रामाण्यम्, यथाऽऽप तत्र वेदस्य, तत्राप्युपनिषदः, तत्रापि ज्ञानकाण्डस्य, सर्वप्रमाणोत्तमत्वं ज्ञानकाण्डान्तर्गतमहावाक्यसमुत्पन्नतत्त्वज्ञानस्यैव मोक्षाव्यवहितचरमभूमिकात्वमुपासनकाण्डादिबोधितोपासनलब्धीनां तत्पूर्वभूमिकात्वं चेत्युक्तम्। तत्रोपनिषदन्तर्गतोपासनज्ञानकाण्डयोर्विवरणरूपं मतचतुष्टयमेव क्रमिकभूमिकाचतुष्टयात्मकं चतुर्मतसाराख्यनिबन्धे श्रीमद्दीक्षितेन्द्रैः क्रमेण समुपनिबद्धम्। तत्रापि ज्ञानकाण्डावरणात्मकमुपनिषदन्तर्गततत्त्वमस्यादिमहावाक्यजनितप्रत्यगभिन्नब्रह्मगोचरनिर्विकल्पाखण्डाकारात्मसाक्षात्कारेण ह्रैवाज्ञानतत्कार्यात्मककृत्स्नबन्धनिवृत्त्युपलक्षितपरिपूर्णब्रह्मानन्दाविर्भावरूपं 'न तस्य प्राणा उत्क्रामन्ति' 'ब्रह्मैव सन् ब्रह्माप्येति' 'अत्र ब्रह्म समश्नुते' इत्यादिश्रुतिप्रदर्शनार्चिरादिगत्यनपेक्षं तत्तत्कर्मोपासनादिविधसाधनकलापैस्तत्तद्देशप्राप्तिपूर्वकं लभ्यं सर्वमपि फलजातं यावत्कूपसरित्तडागादिपानतुल्यं स्वात्मन्यन्तर्भावयत् सर्वतः संप्लुतोदकमुद्रायमाणं परममोक्षमभिव्यञ्जयत् भगवत्पादोद्घाटितं शुद्धाद्वैतमतं चरमभूमिकात्वेनान्ते निवेशितम्। इतराणि तु मतानि ज्ञानबाधनीभूतवैधोपासनाकाण्डविवरणरूपत्वेन पूर्वभूमिकात्वेन पूर्वं संनिवेशितानि। तत्रापि ब्रह्मणः स्वस्वामिभावेनोपासना, अहंग्रहोपासना चेति ब्रह्मोपासनाया भूमिकाद्वितयमस्ति। तत्र स्वस्वामिभावेनोपासना प्रथमा भूमिका। अहंग्रहोपासना च द्वितीया भूमिका। अहंग्रहोपासनायां च तत्त्वज्ञान इवोपास्योपासकयोर्जीवब्रह्मणोरभेदो भाति, अहंत्वेन स्वात्माभिन्नत्वेन ब्रह्मणो ग्रहो यत्रेति व्युत्पत्तेः। स्वस्वामिभावोपासनायां तु नाभेदो भासते। अपि तु भेद एव। स्वस्वामिभावोपासनायाः अहंग्रहोपासनातः पूर्वभूमिकात्वम् 'तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा। भगवच्छरणत्वं स्यात्साधनाभ्यासपाकतः॥' इत्यादिवचनैः स्वस्वामिभावोपासनाभ्यासपरिपाकेन अहंग्रहोपासनासिद्धिबोधनादवगम्यते। स्वस्वामिभावोपासनायामपि पृथक्सिद्धस्वस्वामिभावोपासना, अपृथक्सिद्धस्वस्वामिभावोपासना चेति भूमिकाद्वितयमस्ति। तत्र पृथक्सिद्धस्वस्वामिभावोपासना प्रथमभूमिका, अपृथक्सिद्धस्वस्वामिभावोपासना च द्वितीयभूमिका। विशिष्टाद्वैतमते हि 'यस्य पृथिवी शरीरम्' 'यस्यात्मा शरीरम्' इत्यान्तर्यामिब्राह्मणवाक्यानुसारेण चिदचिद्रूपयोः जीवजगतोः ब्रह्मणश्च शरीरशरीरिभावोऽभ्युपगम्यते। शरीरशरीरिणोश्च प्रभाप्रदीपगुणगुणिक्रियाक्रियावज्जातिव्यक्त्यवयवावयविनामिवापृथक्सिद्धिरिष्यते। तथा च जीवस्य ब्रह्मशरीरत्वात् ब्रह्मणा साकमपृथक्सिद्धिः। जीवस्य च ब्रह्मणश्चापृथक्सिद्धत्वेऽपि नाभेदः, नापि भेदाभेदः, अपि तु राजभृत्ययोरिव स्वस्वामिभावेनात्यन्तं भेद एव। एवं च जीवब्रह्मणोः शरीरशरीरिभावानुसंधानपूर्वक शेषशेषिभावापरपर्यायस्वस्वामिभावेनोपासनाऽपृथक्सिद्धस्वस्वामिभावोपासनेत्युच्यते। राजभृत्ययोरिव जीवब्रह्मणोरपि शरीरशरीरिभावानभ्युपगमेनापृथक्सिद्धत्वनङ्गीकारात् शरीरशरीरिभावानुसधानरहितस्वस्वामिभावोपासना पृथक्सिद्धस्वस्वामिभावोपासनेत्युच्यते। उभयोरपि स्वस्वामिभावोपासनयोरपि अभेदानवगाहनाद्भेदाग्रहणाद्अहंग्रहोपासनातः पूर्वभूमिकात्वमिष्यते। स्वस्वामिभावोपासनयोरपि मध्ये जीवब्रह्मणोरत्यन्तभेदसत्वेऽपि अभेदानवगाहनेऽपि च शरीरशरीरिभावमात्रेण शरीरवाचकानां शरीरिपर्यन्त-

त्वनियमात् 'अहं ब्राह्मणः' 'अहं मनुष्यः' इत्यादिशरीरात्मसामानाधिकरण्यव्यपदेशवत् 'अहं ब्रह्म' इति जीवब्रह्मसामानाधिकरण्यव्यपदेशसंभवादपृथक्सिद्धस्वस्वामिभावोपासनायाः द्वितीयभूमिकात्वं, पृथक्सिद्धस्वस्वामिभावोपासनायास्तु जीवब्रह्मणोः शरीरशरीरिभावाभावेन 'राजा भृत्यः' इत्यादिवत् 'अहं ब्रह्म' इति सामानाधिकरण्यव्यपदेशासंभवात् प्रथमभूमिकात्वमिति मन्तव्यम्। तथा च मध्वमते जीवब्रह्मणोः शरीरशरीरिभावानङ्गीकारेण पृथक्सिद्धस्वस्वामिभावोपासनाया वर्णनात्तस्य प्रथमभूमिकात्वम्। रामानुजमते जीवब्रह्मणोः शरीरशरीरिभावाङ्गीकारेणापृथक्सिद्धस्वस्वामिभावोपासनाया वर्णनात्तस्य द्वितीयभूमिकात्वम्। श्रीकण्ठमते जीवब्रह्मणोरभेदावगाह्यहंग्रहोपासनवर्णनात्तस्य तृतीयभूमिकात्वमवगन्तव्यम्॥

यद्यपि रामानुजभाष्ये दहराद्युपासना अहंग्रहोपासनाशब्देन व्यवहृता, 'अहमिति स्वात्मतयाऽनुसंधानम्' इति च व्यवहृतम्, तथाऽपि तत्र स्वात्मतयेत्यस्य स्वशरीरित्वेनेत्येवार्थः। तथा च अहंत्वेन स्वशरीरित्वेन ब्रह्मणो ग्रहो यत्रेति व्युत्पत्त्या स्वस्वामिभावोपासनाया एव अहंग्रहोपासनाशब्देन व्यवहारः, न तु तत्र स्वाभिन्नत्वेनापि परमात्मनो ग्रह इति भ्रमितव्यम्। यद्यपि श्रीकण्ठभाष्येऽपि रामानुजभाष्य इव अंशाधिकरणादौ शास्त्रदृष्टिसूत्रे च दहराद्यहंग्रहोपासनेषु शरीरशरीरिभावमूलकापृथक्सिद्धिविषयत्वमभ्युपगतं, तथाऽपि श्रीकण्ठभाष्य एव 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इत्यहंग्रहाधिकरणादौ शास्त्रदृष्टिसूत्रव्याख्यानान्तरे च दहराद्यहंग्रहोपासनासु जीवब्रह्माभेदगोचरत्वमपि स्पष्टतया प्रदर्शितम्। अहंग्रहोपासनासु प्रतीयमानाभेदश्च 'अद्वैतमागमाशिरोभिरुपासनायामुक्तं तवेति परमार्थतया न वाच्यम्। भेदः स्फुटो गरुडभान्त्रिकयोरलीकं तादात्म्यभावनमथापि विषं प्रमार्ष्टि॥' इति तात्पर्यमग्रहे सुदर्शनाचार्यवचनात् सुदर्शनाचार्यानुयायित्वाच्च श्रीकण्ठाचार्याणामारोपित इति भाति, तथाऽपि 'निवृत्तब्राह्मणादिदेहाभिमानमयपशुभावस्य निरतिशयस्वरूपानन्दसाक्षिस्वप्रकाशशिवरूपपराहंभावापत्तिर्मुक्तिरिति सर्वश्रुतितात्पर्यात्' इत्यहंग्रहाधिकरणभाष्यस्थवाक्येनारोपितार्थास्पर्शिन्यां मुक्तबुद्धावप्युपासनाकालाभ्यस्ताभेदभावनाप्रकर्षजवासनादार्ढ्यप्रयुक्तशिवाहंभावविषयकत्वानुवृत्त्युक्त्या पारमार्थिक एव जीवब्रह्माभेदः श्रीकण्ठाचार्याभिमत इति विशदमवगम्यते। यद्यपि श्रीकण्ठभाष्ये प्रतिपादितमहंग्रहोपासनानां शरीरशरीरिभावरूपस्वस्वामिभावविषयकत्वं जीवब्रह्माभेदविषयकत्वं चेति प्रकारद्वयं परस्परविरुद्धम्, तथाऽप्यधिकारिभेदेन तत्प्रकारद्वयं प्रदर्शितमिति न विरोधः। तथा हि— शुद्धब्रह्मावाप्तिरूपमहाफलश्रवणमात्रसंतुष्टस्तत्प्राप्त्यर्थं तन्निदिध्यासनसाक्षात्कारजननसमर्थचित्तैकाग्र्यरहितो मन्दस्तदुपयोगिनं सगुणोपासनमार्गमपहाय शुद्धब्रह्मविषयेषु श्रवणमननानिदिध्यासनेषु हठात्प्रवृत्तस्तदुचितं चित्तैकाग्र्यमनधिगच्छन्नुभयभ्रष्टो मा भूत्, दृढभक्तिपूर्वकाचिरनिरन्तरोपासनाराधितस्यानन्तकल्याणगुणादिव्यविग्रहविशिष्टस्य सगुणेश्वरस्य प्रसादान्निर्गुणविषयकचित्तस्थैर्यं प्राप्नोत्विति तदनुजिघृक्षया तं निर्गुणविषयप्रवृत्तेः प्रच्याव्य सगुणोपासनास्वेव स्थिरया भक्त्या प्रवर्तयितुं निर्गुणनिगूहनेन वेदान्तानां सगुणे समन्वयप्रदर्शनपूर्वकं भगवत्पादप्रदर्शित एव सगुणब्रह्माभेदोपासनामार्गो यथा श्रीकण्ठभाष्ये प्रदर्शितः, तथैव साक्षान्मोक्षोपयोगितत्त्वावबोधार्थे श्रवणमननपूर्वके निर्विशेषनिदिध्यासने वा तदपेक्षितात्यर्थचित्तै-

काग्रवादिसंपादनद्वारा तदुपयोगिनि दहरविद्यादिरूपे सविशेषब्रह्माभेदोपासने वा सामर्थ्यादिरूपस्य लौकिकस्य शास्त्रीयस्य वाऽधिकारिविशेषणस्य वैकल्यादधिकारपौष्कल्यरहितान्प्रति प्रवर्तितः पुराणेतिहासागमप्रसिद्धस्तत्कतुन्यायेन स्थानविशेषगतभगवत्कैङ्कर्यप्राप्तिफलकः स्थानविशेषप्राप्त्यनन्तरं तत्रैवाभेदोपासनादिद्वारा मोक्षफलकश्च योऽयं दासमार्गः, तन्मार्गावलम्ब्यधिकारिविशेषान्प्रति शरीरशरीरिभावरूपस्वस्वामिभावेनोपासनामार्गोऽपि श्रीकण्ठभाष्ये प्रदर्शित इत्यविरोधः। तत्र यथा भगवत्पादप्रदर्शितनिर्गुणज्ञानसगुणध्यानरूपमार्गद्वयमध्ये सगुणध्यानमार्गमेवाधिकृत्याधिकारिविशेषं प्रति श्रीकण्ठाचार्यैर्भाष्यं प्रणीतम्, तथैव श्रीकण्ठाचार्यप्रदर्शिताभेदोपासनशरीरशरीरिभावरूपस्वस्वामिभावोपासनरूपमार्गद्वयमध्ये शरीरशरीरिभावरूपस्वस्वामिभावोपासनमार्गमेवाधिकृत्याधिकारिविशेषं प्रति रामानुजाचार्यैर्भाष्यं प्रणीतमिति बोध्यम्॥

स्वस्वामिभावोपासनाहंग्रहोपासनतत्त्वज्ञानानां च पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्कृष्टभूमिकात्वमुत्तरोत्तरोत्कृष्टफलकीर्तनेन सूचितं श्रीमद्भास्कररायैस्त्रिपुराम्होपनिषद्भाष्ये। तथा हि— मुक्तिस्त्रावत्पञ्चधा— सालोक्यमेकम्, सामीप्यसारूप्यसायुज्यत्रितयम्, कैवल्यं चेति। तास्वाद्यान्त्रये प्रत्येकं द्वौ मार्गौ, मध्यमत्रयमेको मार्गः। तथा च तैत्तिरीया आमनन्ति— 'य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति' इति। अत्र य एव विद्वानिति विदूत्पदस्य प्रतीकोपासनात्रयवानिति, देवानां महिमानमित्यस्य सालोक्यादित्रयमिति, ब्रह्मणो विद्वानित्यस्य ब्रह्मज्ञानवानिति, एतौ अभिजयति इत्यस्य कर्मोपासनाप्राप्यौ सूर्याचन्द्रमसोर्महिमानौ सातिशयत्वादिदोषवन्तौ बुद्ध्या अभिजयतीति, तस्मादित्यादेः तस्मादधिकं निरतिशयं ब्रह्मणो महिमानमाप्नोतीति चार्थः। अयं भावः— स्वाश्रमोक्तकर्मानुष्ठानवतां चन्द्रलोकप्राप्तिः सालोक्यरूपा, प्रतीकोपासनया स्वस्वामिभावोपासनया अहंग्रहोपासनया च सामीप्यादित्रयरूपा आदित्यप्राप्तिः, निर्गुणब्रह्मज्ञानवतां तु कैवल्यरूपब्रह्मपदप्राप्तिरिति मार्गत्रैविध्याद्गन्तव्याः पुर्योऽपि तिस्रः। ईदृशपुरत्रयप्रापकत्वात्त्रिपुरेत्युच्यते। उक्तं च शक्तिरहस्ये—'आत्मबुद्ध्या प्रतीकेन मातृबुद्ध्याऽप्यहंधिया। कर्मणाऽपि भजन्मर्त्यः कैवल्यं पदमश्नुते॥' इति। शिवनामकल्पलतिकाख्यायां पद्यरूपायां शिवाष्टोत्तरव्याख्यायामपि तैरेवोक्तम्— 'प्रतीकविदहंग्रहो भृतक इत्युपास्तेर्निजाद्विधेः शिवसमीपताशिवतदात्मतासार्ष्टिताः। भवन्ति समलोकता अमृतताऽऽत्मविज्ञानतोऽखिलं फलमतो भवेदिति मतोऽपवर्गप्रदः॥' इति। सार्ष्टिता समानधर्मिता सारूप्यमिति यावत्। निजविधिः स्वधर्मः कर्म। भृतकः स्वस्वामिभावोपासक इति चार्थः। स्वस्वामिभावोपासनामार्गावलम्बित्वादेव सायुज्यशब्दस्य 'सालोक्यसारूप्यादिशब्दवत्सायुज्यशब्दोऽपि युक्तसाम्यपरः। सर्वं हि भगवता मुक्तेन च भोग्यत्वेन युक्तम्। सायुज्यशब्देन शरवत्तन्मयो भवेदित्यादिपूक्तसंयोगविशेषो विवक्षित इत्यपि साधु' इत्यर्थान्तरं वर्णितं वेङ्कटनाथेन; न तु तथा विवक्षितमत्र। किं तु तादात्म्यमेव सायुज्यशब्देन विवक्षितम्, अभेदोपासनारूपाहंग्रहोपासनस्य तत्कतुन्यायेन तादात्म्यप्राप्तिफलकत्ववर्णनस्यैवोचितत्वात्। एवं च

जीवब्रह्मणोः पृथक्सिद्धस्वस्वामिभावोपासनापृथक्सिद्धस्वस्वामिभावोपासनाभेदोपासनाभेदज्ञानानामुत्तरोत्तरप्रकृष्टभूमिकारूपत्वादेव तदवलम्बिनामानन्दतीर्थाचार्यगमानुजाचार्यश्रीकण्ठाचार्यभगवत्पादमतानां चतुर्मतसारे क्रमेणोपनिबन्धः कृत. इत्येकं कारणमुक्तम्। क्रममनिवेशे कारणान्तरं च वदिष्यते। तथा हि—

'भेदः प्रमान्तरैः सिद्धो न स्वागमसमाश्रयात्। पशवोऽपि हि जानन्ति भेदमक्षादिसाधनैः॥' इति वार्त्तिकाद्युक्तरीत्या आज्ञानिकस्वाभाविकबन्धहेतुद्वैतप्रतीतिनिरासेन वेदपरमतात्पर्यगोचरशास्त्राध्ययमुक्तिहेतुभूताद्वैतप्रतीत्युत्पादन एव सर्वेषामपि मतानां तात्पर्यम्। तत्र द्वैतवासनाभासितान्तःकरणानामधिकारिणां सहसा द्वैतप्रतीत्युन्मर्दनाद्वैतप्रतीत्युत्पादनस्याशक्यतयाऽद्वैतप्रतिपादकवेदवचनानामपि 'आदित्यो यूपः' 'यजमानः प्रस्तरः' इत्यादिवाक्यानामिव बाधितार्थकत्वभ्रमस्यापि निराकर्तुमशक्यतया तद्बुद्धयनुसारेणैव यथाकथंचित्तत्सम्मार्गे संग्रहर्णाया बुद्धिरित्याशयेन जीवजगद्ब्रह्मणां जीवानां जगतां च मिथ्या भेदमभ्युपगम्यैवाद्वैतवचनानामपि द्वैतार्थकत्व कंचित्परिकल्प्य, मुक्तावपि विषयभोगतारतम्यमानन्दानन्दनोर्भेद, मुक्तियोग्यतमोयोग्यनित्यसंसारिरूपजीवत्रयं, सर्वेषामपि जीवानामणुत्वं, ब्रह्मणो जगन्निमित्तकारणमात्रत्वं, नारायणाख्यपरब्रह्मणः स्वस्वामिभावेनोपासनेन स्वस्वयोग्यतानुसारेण मुक्तिलाभं च परिकल्प्य द्वैतमतं प्रथमभूमिकात्वेन श्रीमदानन्दतीर्थाचार्या बोधयामासुः। द्वैतमतमुख्यप्रमेयजातं च तन्निराकरणव्याजेन मदीय आचार्यमहिसप्रकाशे संगृहीतम्—'केचिद्धरो विषयवामनयाऽभिभूता मोक्षेऽपि वैषयिकभोगमनल्पमाहुः। लोकेऽतिवासितधियस्त्वपरे महान्तो नीचोच्चभावमपि तत्र समामनन्ति॥ आनन्दवास्तविकरूपमिहाविदन्तो भोगे त्रिपुट्यकलनं त्वपरागृभ्नन्तः। आनन्दभावमपुमर्थमपि प्रयन्त आनन्दिभावमपरे पुरुषार्थमाहुः॥ मुक्तेर्मिथस्तरतमत्ववतीमुपासां हेतुं वदन कथमेवं चदुतारतम्यम्। तस्मात्सुधीरपलपन्नविशेषबोध द्वैती जगाद किल मुक्तिषु तारतम्यम्॥ जीवानुदारमतयो भुवि मुक्तययोग्यान् कांश्चिद्विभज्य नरकार्णवनित्यमग्नान्। तत्रापि कांश्चिदपरान् ब्रुवते तु नित्यसंसारिणो बत दयाद्रवदन्तरङ्गाः॥ सन्मुक्तियोग्य इह जीवगणः सुखात्मा विष्णास्तु तत्त्वमवबुद्धय विधाय भक्तिम्। सन्मुक्तिभाक्निजसुखं परमात्मसौख्य नावर्तते ह्यनुभवन् विषयोत्थसौख्यम्॥ योऽमद्विमुक्त्युचितजीवगणः स दुःखरूपी द्विषन् हरिमहो विपरीतबोधात्। संप्राप्य मुक्तिमसतीं नरकोत्थदुःखं नावर्तते ह्यनुभवन्नपि नैजदुःखम्॥' इति। 'तत्र कर्माभ्यासस्य दृढीकृतत्वात्कर्मपरित्यागेनोपासने दुःखं चेतःसमर्पणं कर्तुमिति कर्माङ्गविषयमेव तावदादावुपासनमुपन्यस्यते' इति छान्दोग्यभाष्योक्तरीत्या कर्मवासनावासिताधिकार्यनुसारेण यथा छान्दोग्योपनिषदि कर्माङ्गावबद्धोपासनोपक्रमः; यथा वा 'अथातः संहिताया उपनिषद व्याख्यास्यामः' इति तैत्तिरीयोपनिषदि 'अथ अध्ययनानन्तरं अतः यतोऽत्यर्थं ग्रन्थभाविना बुद्धिः न शक्यते सहसा अर्थज्ञानविषये अवतारयितुमित्यतः संहिताया उपनिषदं संहिताविषयं दर्शनं ग्रन्थसंनिकृष्टामेव व्याख्यास्याम इत्यर्थः' इति भगवत्पादीयभाष्यरीत्या अध्ययनवासनावासिताधिकार्यनुसारेण संहितोपासनोपक्रमः, तथैव अनादिद्वैतवासनावासिताधिकार्यनुसारेण आनन्दतीर्थाचार्यद्वैतमतोपक्रमः कृत इति युक्तयते। अधिकारी

प्रथमता लोकाद्वयावृत्तः सन् शास्त्रवश्यो भवतु, लौकिककर्म्य... ...फलात्मकद्वैतपदार्थवासनाः परित्यज्य शास्त्रीयक्रियाकारकफलात्मकद्वैतपदार्थवासनावासितो भवतु, पश्चाद्वैतवासनया तामप्यपाकरिष्याम इति तेषामभिप्रायः। इत्थमेव हि सन्मङ्गत्वे निःसङ्गत्वं भविष्यतीति मत्वा" असत्सङ्गमपाकृत्य सत्सङ्गं कुर्वीति शास्त्रं विधत्ते। तथा 'निस्त्रैगुण्यो भवार्जुन' इति पूर्वं विधाय सत्वगुणस्थत्वे निस्त्रैगुण्यं भविष्यतीति मत्वा पश्चात् रजस्तमोगुणावपोह्य नित्यसत्वस्थो भवेति सत्वगुणाश्रयणं विधत्ते भगवान्। तथा 'विद्वान्नामरूपाद्विमुक्तः' इति श्रुत्युक्तनामरूपसामान्यविमोको भगवन्नामरूपानुसंधाने भगवदनुग्रहात् ज्ञानलाभद्वारा भविष्यतीति मत्वा लौकिकनामरूपानुसंधानं परित्यज्य प्रणवादिनामसविशेषभगवद्रूपानुसंधानं विधत्ते श्रुतिः। एवमेव शास्त्रीयसद्वासनास्वीकारे निर्वासनत्वं मनसो भविष्यतीति मत्वा दुर्वासनापरित्यागपूर्वकं सद्वासनास्वीकारं बोधयन्ति शास्त्राणि। इत्थमेव श्रुत्युक्तसत्कर्माचरणे क्रमेण नैष्कर्म्यसिद्धिर्भविष्यतीति मत्वा दुष्कर्माण्यपोह्य सत्कर्माणि कुर्विति वेदोऽनुशास्ति। तदुक्तं मदीये आचार्यमहिमप्रकाशे— 'सत्सङ्गसत्वगुणदेवतनामरूपसद्वासनासुकृतमेवनचोदकं श्रुतिः। तन्निद्विपक्षविनिवृत्त्यभिसन्धिमात्रास्त्याप्यपाकरण एव तु वेदनिष्ठा।' इति॥

एवमानन्दतीर्थाचार्यप्रवर्तितद्वैतमतपरिचर्यया लोकवासनापरित्यागपूर्वकं शास्त्रवश्यतामापन्नस्य तन्मतोक्तप्रकारेण भगवदुपासनाधीनभगवदनुग्रहवशात्समुपजातचित्तशुद्धिविवेकादिकस्याधिकारिपुरुषस्योन्नीषया श्रीमद्रामानुजाचार्यः विशिष्टाद्वैतमतं द्वितीयभूमिकात्वेन बोधयामासुः। तत्र च द्वैतवासनावासितपुरुषाणां द्वैतप्रतीत्यनुपमर्देनैव जीवजगद्ब्रह्मणां जीवानां जगतां च मिथो भेदानुपगम्यैवाद्वैतबोधकश्रुतिवचनानां पूर्वमत इव द्वैतार्थकत्वकल्पनक्लेशं विहाय, जीवजगद्रूपशरीरिचितोः ब्रह्म प्रति शरीररूपविशेषणत्वं तन्निबन्धनामपृथक्सिद्धिं च व्यावर्ण्य, चिदचिद्रूपशरीरात्मकविशेषणविशिष्टब्रह्मणो व्यतिरिक्ताविशेषणीभूतपृथक्सिद्धपदार्थाभावेनाद्वैतमुपवर्ण्य, एतदर्थबोधकत्वमद्वैतवचनानां परिकल्प्य, ब्रह्मणः केवलनिमित्तत्वनिराकरणपूर्वकमुपादानकारणत्वमपि प्रसाध्य, जीवाणुत्वं पूर्वमतोक्तमनपहायैव मुक्तौ तारतम्यं निराकृत्य, नारायणाख्यब्रह्मणः सर्वशरीरित्वरूपसर्वशेषित्वनोपासनां च विधाय विशिष्टाद्वैतमतं परिष्कृतवन्तः। विशिष्टाद्वैतमते जीवजगद्रूपशरीरिचितो ब्रह्मणश्च घटपटयोरिव न पृथग्भावरूपोऽत्यन्तभेदः, तदनन्यत्वश्रुतिविरोधात्। नाप्यत्यन्तभेदः, विरुद्धधर्मवत्त्वात्। नापि भेदाभेदः, भेदाभेदयोर्विरोधात्। किं तु गुणगुण्यादिन्यायेन लौकिकवैदिकपुरुषप्रसिद्धसामानाधिकरण्यनिर्वाहकतर्कगणिकभेदाप्रतिक्षेपकमपृथग्भावेनानन्यत्वमुच्यते। इदमेवानन्यत्वं विशिष्टाद्वैतपदेनाभिलप्यते। यथा लोके शरीरस्य शरीरिणश्च भेदे सत्यपि शरीरशरीरिणोर्घटपटादिनापृथक्सिद्धरूपभावेन शरीरविशिष्टस्य शरीरिणः एक एव देवदत्त इत्यद्वैतं व्यवह्रियते यथा वा नगरवृक्षादीनामनन्तमृतगृहप्रासादवीथीप्राकारगोपुरारामवापीकूपतटाकनद्यादिशाखोपशाखाकुसुमफलादिबहुविधपदार्थजातसत्त्वेऽप्येकमेवेदं नगरादिकमिति विशिष्टरूपेणैक्यं व्यवह्रियते तद्वत्। विशिष्टाद्वैतसिद्ध्यर्थमेव तन्मते जीवजगत्साधारणशरीरत्वपरिष्कारप्रयासोऽपि। मायावद्वा जगद्रूपपरिणामित्वेन विकारित्वेऽपि ब्रह्मणश्चाविकारित्वेऽपि च जगदाकारपरिणाम्यपृथक्सिद्धम

शरीरकत्वेन ब्रह्मणः उपादानत्वव्यवहारः। ब्रह्मणः केवलनिमित्तकारणत्वाभ्युपगमे कुलालादितो घटादेः पृथग्भाव इव ब्रह्मणोऽपि जगतः पृथग्भावः स्यात्; अतः उपादानत्वस्यापि वर्णनम्। तथा सति मृदादित इव घटादेर्ब्रह्मणः सकाशाज्जगतोऽपृथग्भावः स्यादिति भावः। एवं जगतो ब्रह्मशरीरत्वानभ्युपगमे पृथग्भावः स्यात्, अतः शरीरत्ववर्णनम्। एवं बन्धदशायामिव मुक्तिदशायामपि जीवतारतम्याङ्गीकारे तत एव परस्परविलक्षणत्वेन निश्चितानां बहूनां जीवानामेकेन ब्रह्मणा ऐक्यसंभावनाया अप्यभावेनोत्तरभूमिकायामद्वैतं बोधयितुं न शक्येतेति भावेन मुक्तानां परस्परं साम्यं मुक्तितारतम्यखण्डनेन साधितम्। तथा सति हि समानां वैलक्षण्याभावेनैव ऐक्यमपि बोधयित्वोत्तरभूमिकायामद्वैतं बोधयितुं शक्यं भवेदिति रामानुजाचार्याणामाशयः। एवं च मध्वमतवैलक्षण्येन ब्रह्मोपादानत्वं, मुक्तितारतम्यभङ्गः, शरीरशरीरिभावनिबन्धनविशिष्टाद्वैतं चेति त्रयं यद्रामानुजाचार्यैः प्रसाधितम्, तस्य फलमिदमेव, यत् द्वैतवासनातः प्रच्याव्याधिकारिणामद्वैतवासनासंपादनम्। यत्पुनर्जीवब्रह्मणोः परममुक्तिदशायामपि जगत्कारणत्वतदभावमूलकं स्वामित्वकिंकरत्वमूलकमणुत्वविभुत्वरूपधर्मभेदमूलकं च वैलक्षण्यम्, अणोरपि जीवस्य संकोचविकासशक्तिधर्मभूतज्ञानप्रसरेण कृत्स्नशरीरव्यापिसुखाद्यनुभवोपपादनम्, निर्विशेषाद्वितीयब्रह्मसिद्ध्युपयोगिभूतस्य वैशिष्ट्यानवगाहिनिर्विकल्पस्य खण्डनपूर्वकं गुणसंस्थानविशिष्टविषयकप्रथमपिण्डज्ञानस्य निर्विकल्पत्वव्यवस्थापनम्, अपञ्चमिथ्यात्वेना द्वैतसिद्ध्युपयोगिनो दृष्टान्तरूपस्य स्वाप्नपदार्थशुक्तिरजतादिमिथ्यात्वस्य खण्डनपूर्वकं सत्ख्यातिवादाङ्गीकारः, अहं मनुष्यो ब्राह्मण इत्यादिप्रत्ययतोऽन्येनाहं कर्तेत्यादिप्रतीतीनां भ्रमत्वमद्वैत्यभिमतं मा भवत्वित्याशयेनाहं मनुष्य इत्यादिप्रत्ययस्य गौणत्वव्यवस्थापनं चेत्यर्थपञ्चकम्, तत्, अधिकारिणो बलवद्द्वैतवासनावासितस्य सहसा अद्वैतबुद्ध्युत्पादासंभवादुत्तरभूमिकागमनेन क्रमेण पूर्णाद्वैतवासनासिद्धिर्भवतु, इदानीं प्रपञ्चसत्यत्ववासना, जीवब्रह्मभेदवासना, सर्वपदार्थसविशेषत्ववासना चास्तु; तावताऽपि न क्षतिः, अर्धं तावदपनीतं भारस्यति न्यायेन कियती अद्वैतवासना जाता खलु, तावता कृतकृत्याः स्मो वयमिति भावेनेति न कोऽपि विरोधः। विशिष्टाद्वैतसंबन्धिपूर्वोक्तविषयजातं खण्डनव्याजेन विवृतं मदीये आचार्यमहिमप्रकाशे—'केचिज्जगत्प्रकृतितां प्रकृतेः परस्य कर्तृत्वमात्रमवदन्नपरस्तदुक्तिम्। आक्षिप्य तत्प्रकृतित्वशरीरकत्वमात्रात्परस्य मनुते प्रकृतित्वसिद्धिम्॥ ईशे जगत्प्रकृतिता प्रकृतेः शरीरिमात्रत्वतो यदि घटेत कथं विभुत्वम्। ईशोऽप्यणुर्भवतु जीववदस्य धर्मज्ञानेन वस्त्वखिलमप्यवभासमेतु॥ ईशस्य जीवजगतां च मिथो विभेदे विस्पष्ट एव जडजीवविशिष्टमीशम्। एकं प्रदर्श्य कपटाद्वयबोधकानां केषांचिदद्वयवचोनयनं विचित्रम्॥ जीवं जगच्च परमस्य शरीरमाहुः काले क्षिपन्ति च शरीरपरिष्कृतौ ते। एतावता परिहृतं प्रथयन्ति लोके भेदाभिदाविषयवेदवचोविरोधम्॥ जीवाणुतां व्यपदिशन्परभेदसिद्ध्यै कैङ्कर्यमेव परमं पुरुषार्थमाख्यत्। न ब्रह्मभावमिह कश्चिदवोऽस्य मुक्तमल्पस्य नैव घटते हि महत्त्वलाभः॥ दीपप्रभावदणुजीवगधर्मभूतज्ञानस्य कृत्स्नवपुषि प्रसरो यदि स्यात्। तेजोऽधिवर्त्युपचितं हि यथा तथा स्याद्भूयांश्रितोऽपि कुहचिद्वपुषि प्रकाशः॥ जीवो यदा विपुलहस्तिवपुःप्रविष्टो ज्ञानं तदा प्रसृमरं विरलं ततोऽल्पम्। अल्पं यदा मशकदेहमनुप्रविष्टमत्यंकुचितविग्रहमप्यधिकं किल स्यात्॥ (क्रमशः)

अभिज्ञानशाकुन्तलानुशीलनम् ॥

मीमांसारत्नं, एम्. ए., बि. एल्., ए. टि. गोपालाचार्येण विरचितः ॥

पूर्वतोऽनुवृत्तः)

'इमि चुम्बि आइ भमरेहिम्'। अत्रापि पूर्वश्लोकाभिवाञ्छितार्थाः काव्यहृदयस्थाः, भाविनाटकवस्तून्यपि सूच्यन्ते। कण्वतपोवनस्य भ्रमरचुम्बितं वर्णनं भारते। अस्मिन्नाटके भूयान्मधुकरप्रस्तावः, शिरीषकुसुमाततप्रस्तावः, कुसुमानां सहृदयस्पर्शनिवेशनादिप्रस्तावश्च। 'बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकम्', 'कुर्वन्न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बिकेसरम्' 'एषा कुसुमनिषण्णा तृषिताऽपि सती भवन्तमनुरुक्ता। प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति॥' 'नादत्त प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्' इत्यादिकं वक्ष्यते। भ्रमरा अपि दृश्यन्ते, मृदु मृदु ईषच्चुम्बन्ति शिरीषकुसुमानि; किमु वक्तव्यं कुसुमसुकुमार्यः प्रमदाः दयास्नेहभरिताः अतिमार्दवेन शिरीषकुसुमानि कर्णे विन्यस्यन्तीति। 'कुर्वन्ति रावान्मधुरान् षट्पदा मधु लिप्सवः' इति भारतोपाख्यानवर्णने कविबुद्धिस्थम्। 'स्पृशसि बहुशो वेपथुमतीम्… स्वनसि मृदु कर्णान्तिकचरः। करं व्याधून्वत्याः पिबसि रतिसर्वस्वमधरम्' इति प्रथमाङ्के वर्ण्यमानो भ्रमरवृत्तान्तोऽपि सूच्यते प्रथमपादेन। नायकदम्पत्योर्भोगरसविधा अपि सूच्यन्ते। भ्रमरश्च नायकभृङ्गः, भ्रमरैरित्यत्र पूजायां बहुवचनम्। 'अधरः किसलयरागः' 'अपरिक्षतकोमलस्य यावत्कुसुमस्येव नवस्य षट्पदेन। अधरस्य पिपासता मया ते सदयं सुन्दरि गृह्यते रसोऽस्य॥' 'मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु' 'अक्लिष्टबालतरुपल्लवलोभनीयं पीतं मया सदयमेव रतोत्सवेषु। बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियायाः' इत्यादिकं वक्ष्यमाणं सूच्यत इति स्फुटम्। 'अभिनवमधुलोलुपो भवांस्तथा परिचुम्ब्य चूतमञ्जरीम्। कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्॥' इति हंसपादिकापद्ये कान्तो मधुकर इति संबोध्यते 'मधुप कितवबन्धो' इति भ्रमरगीतायामपि। हंसपादिका प्रगल्भा। सकृत्कृतपरिचयाऽपि निपुणमुपालभते नायकं राजानम्। अभिनवेऽपि सकृत्संगमे नितान्तलोलुपेन कामातुरेण राज्ञा भृशं निर्दयं परिचुम्बितेव। अतः 'तथा परिचुम्ब्य' इति गायति। यूनो निर्दयत्वं तत्कान्ताभोगायैवाभूत्। अत्र संस्कृताश्रयणे कठिना रूक्षाः स्युः शब्दा इति मृदु मृदु प्राकृतमाश्रित्य गीयते प्रमदामुखेन। शाकुन्तलनाटककृतेः रसिकविद्वद्भिश्चर्वणविषये कविमनोरथमप्यत्र श्लोको व्यञ्जयतीव। भ्रमराः काव्यरसास्वादिनः। 'नवतः सारमादाय पुष्पेभ्य इव षट्पदः' इत्यादिश्यते। 'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु। प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते॥' इति भट्टबाणगीतं स्मर्तव्यम्। 'इमि चुम्बि आइ भमरेहिं' इत्यत्रोद्दिष्टेषु रसिककविभ्रमरेषु बाण एकः। भोग्यतातिशयेन कणशः कणशः सादरमास्वादयन्ति काव्यमधु सहृदयाविद्वद्भ्रमराः। मधु नवमनास्वादितरसमपूर्वमचिरप्रवृत्तमुपभोगक्षमं नाटकम्। सुकुमारं काव्यं सदयहृदयैः सहृदयैः स्पृष्टं स्पृष्टाऽऽस्वाद्यते। 'व्यक्तुं

क्षणाः सदसतीर्विगताभ्यसूयाः सन्तः स्पृशन्तु सदयैर्हृदयैः स्तुतिं ते' इति पादुकासहस्रोपक्रमे इत्थमेव कविमनोरथः स्फुटीचक्रे । प्रमदाः युवत्वरसिकत्वशालिन्यो रसिकमनीषिमनीषाः अवतंसयन्ति सादरं कर्णभूषणीकुर्वन्तीदं कुसुममुकुमारं काव्यम् । 'वाचं विपञ्चीमिव वादयन्ति कर्णामृतेन ध्वनिना कवीन्द्राः' 'वाचं कवीनामुपलालयित्वा' इति शिवलीलार्णवश्लोकावत्र भाव्यौ । 'मधुरं रसवद्वाचि वस्तुन्यपि रसः स्थितः । येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥' इति हि काव्यलक्षणविदः । 'तत्र लक्षितपदविन्यासादिकृतं सदर्भरामणीयकं वाचो माधुर्यम् । अर्थस्य तु काव्येषु सहृदयास्वादनीयमहानन्दप्रतिबिम्बनोपयोगिरीत्यादिवृत्तिवामनाभिव्यञ्जनक्षमविभावानुभावादिरूपत्वम्' इति शिवार्कमणिदीपिकायां श्रीमद्दीक्षिताः ॥

मधुरसभरितभगवत्पादाम्बुजचञ्चरीका. भक्तिरसिका ब्रह्मविदोऽपि अनेन श्लोकेन सूच्यन्ते । 'तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति । स्थितोऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते ॥' 'आपाययति गोविन्दपादपद्मासवं मधु' 'सारङ्गानां वदाम्बुजम्' इत्यादिकं भाव्यम् । 'सार गायन्तीति सारङ्गाः, सानन्दं भगवद्गुणगानरसिकाः' इति श्रीधरमुनयः । 'सारङ्गेणातिरंहसा' इत्यनुपदमेवात्र वक्ष्यते । भगवद्गुणगाथाः कर्णभूषणानि, भगवच्चरणकमलचञ्चरीकाणाम् । मधुब्राह्मणे मधुमधुरब्रह्मात्मकस्य विश्वस्य मधुतुल्यत्वं सूचितम् । आनन्दघनब्रह्ममयं विश्वं मधुवन्मधुरमास्वाद्यते मधुकरैर्ब्रह्मविद्भिः । भगवतः षाड्गुण्यं भक्तषट्चरणरसनीयम् ॥

'अभिज्ञानशाकुन्तलम्' इति नाटकनाम । अभिज्ञानप्रधानं शाकुन्तलम् । विप्रयुक्तदिव्यमिथुनसंयोजकाङ्गुलीयकप्रधानसुन्दरकाण्डसमाधिरभिप्रेयत इव कविना एतन्नामकरणेन । द्वितीयाङ्कमेकं विहाय षट्स्वङ्केष्वप्यभिज्ञानप्रस्तावं पश्यामः । शाकुन्तलमिति नामैव पक्षिमृगादिसर्वभूतानां शकुन्तलायाश्च मिथः सहजबन्धुत्वं प्रख्यापयते । 'आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ।' 'सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥' इति सर्वभूतेषु बन्धुत्वबुद्धिर्बन्धुत्वाचरणं च ब्रह्मज्ञानफलकाष्ठा । कण्वतपोवनवासिनः सर्वभूतमित्राणि । विश्वस्य मित्रं विश्वामित्रर्षिः शकुन्तलाजनकः । 'मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः । अनुजग्मुर्महात्मानं विश्वामित्रं महामुनिम् ॥' इत्यादिकविर्वर्णयति । 'निवर्तयामास ततः पक्षिसङ्घान्मृगानपि' इति बलात्तेषां निवर्तनमपि वर्णितम् । काश्यपप्रजापतिः, 'अंसव्यापिशकुन्तनीडनिचयं बिभ्रज्जटामण्डलम्' इति सप्तमे वर्ण्यते । 'तं वने गहने गर्भं सिंहव्याघ्रनिषेविते । दृष्ट्वा शयानं शकुनाः समन्तात्पर्यवारयन् ॥ नेमां बालां वने हिंस्युः क्रव्यादा मांसगर्धिनः । इति मत्वा स्म रक्षन्ति शकुन्ता मेनकात्मजाम् ॥' 'पादयोः पतिता द्विजाः । अजुवन् शकुनाः सर्वे फलं मधुरभाषिणः । विश्वामित्रसुतां ब्रह्मन् न्यासभूतां भरस्व वै ॥' इति कण्वमवोचन् । जन्मक्षण एवेत्थं शकुन्तैः स्नेहेन रक्षिता शकुन्तला, तपोवने सर्वभूतसुहृद्भिर्मुनिभिः वृक्षैः पशुपक्षिमृगैः सह संवर्धिता सोदरस्नेहमयी अभवत्सर्वेषु जीवेषु । तद्विरहे रामविरहे इव तरुलतादयः पक्षिमृगादयश्च सर्वप्राणिनः भृशमतप्यन्तेति निरूप्यते नाटकमध्वमाङ्के मध्यमणिभूते चतुर्थे ।

'परित्यक्तनर्तना मयूरी' इति तत्र गीयतेऽनसूयया। यथा 'व्यसृजन कवलाञ्जागा गावो वत्साञ्च पाययन्' इति रामविरहे तिरश्चामपि स्नेहभावो वर्णितः। सर्वप्राणिषु सौहार्देन नमदर्शनं नाम योगिनां यो हृदयपरिपाकः, शकुन्तलायाः स सहजोऽभूत। प्रथमचतुर्थाङ्कयोरिदं सुविस्तरमुपपाद्यते। 'यत्र द्रुमा अपि मृगा अपि बन्धवो मे' इति वदतो रामस्येवात्मा जन्मसिद्धं सर्वभूतबन्धुत्वम्। 'अस्ति मे सोदरस्नेह एतेषु' इत्यस्याः वचनानिष्यन्दः प्रथमेऽङ्के। कौञ्चमिथुनावियोजनदर्शनेन संपन्नं मुनेः कारुण्यं रामायणग्रन्थत्वेन विपरिणामं समपद्यत। तिर्यक्स्नेहप्रवृत्तिमूलकं रामायणं भूयेष्ठं नायकस्य तिर्यक्षु मित्रभावं बन्धुभावं च प्रदर्शयतीत्युचितमेव। 'सुहृदो वा भवद्विधाः' 'त्वयि किंचित्समापन्ने किं कार्यं सीतया मम' इति नायको वक्ति वानर सुग्रीवं प्रति। 'अस्य सोम्य महतो वृक्षस्य यो मूले अभ्याहन्यात्, जीवन् स्रवेत्, स एष जीवेनात्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति' इति वृक्षस्य सजीवत्वं प्रदर्शित छन्दोगैः सद्विद्यायाम्। 'मधुरैरवशाखि लम्बयन्नपि तिर्यञ्चि शम निरीक्षितैः' इति द्वैतवने युधिष्ठिरं द्रष्टुमागतो मुनिर्व्यासोऽवर्णयत भारविना। 'पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि' इति। सर्वभूतेषु स्नेहमयतादात्म्यं सर्वोत्तमगुणः। ब्रह्मविद्रोष्ठीप्रसिद्धा सार्वात्म्यनिष्ठेति भगवत्पादा भाषन्ते ऐतरेयकभाष्ये। 'ऐतदात्म्यमिदं सर्वम्' इति सर्वस्य ब्रह्मात्मकत्वमुपदिशन्ती सद्विद्या वृक्षज्ञाताद्दृष्टान्तप्रदर्शनेन वृक्षादिष्वपि जीवेषु तादात्म्यभावं निर्बध्नाति तत्त्वमसीति निगमनेन। तत्पदं ऐतदात्म्यपरामर्शीत्यप्यन्वयः प्रदर्श्यते वेदान्तग्रन्थेषु। ब्रह्मतादात्म्यद्वारा सर्वभूततादात्म्यं न्याय्यमेव। अस्मिन्नाटके नायिकामुखेन सर्वभूतेषु तादात्म्यभावं सोदरस्नेहभावं च निपुणमुपदिशति कविः। इदमेव सर्ववेदान्तोपपाद्यं परमरहस्यम्। इदं च सर्वहृदयतया सर्वरसिकलोकसाक्षिकमध्यक्षीक्रियतेऽस्मिन दृश्यप्रबन्धे॥

'ला आदाने' शकुन्तैः स्वपक्षैः शिशुं प्रच्छाद्य परमवात्सल्येन आदानं कृतम्। विश्वस्य मित्राद्विश्वामित्राज्जाता मात्रा जननक्षण एव परित्यक्ता शकुन्तैर्मातृवात्सल्येन रक्षिता शकुन्तलानाम भेजे। 'विश्वामित्रसुताम्' इति वदन्वः शकुन्ताः 'मुने मुनिसुतेयं. अतः इमां त्वं भर्तुमर्हसि, विश्वामित्रसुतेयं, अतोऽस्यां त्वया मैत्री प्रदर्शनीया' इति भावं प्रादर्शयन्। 'न्यासभूतां भरस्व वै' इति शकुन्तैरर्पितं न्यासं स्मरतीव 'प्रत्यर्पितन्यास इवान्तरात्मा' इति चतुर्थाङ्कान्तिमश्लोके। जन्मकाले शकुन्तैः समर्पितन्यासस्य तदानीं भरणयोग्यभर्तरि प्रत्यर्पणलाभेन नैर्भर्यमलभ्यत। 'भर्ता रक्षति यौवने'। कन्याभरणं भर्तृप्रापणावधि। 'मुनिसुताप्रणयस्मृतिरोधिना' इति वदन्दुष्यन्तो विश्वामित्रमुनिसुतात्वमपि मनसि कुरुत इव। काश्यपकुलकूटस्थं 'अंसव्यापिशकुन्तनीडनिचयं जटामण्डलं बिभ्रत्' इति वर्णयन्कविः स्वयंदृश्यकाश्यपसंवर्धितायाः, तत्सुतात्वेन अभिमानविषयभूतायाः शकुन्तलायाः शकुन्तैः कृतस्योपकारस्य प्रत्युपकार स्वजटामण्डले शकुन्तनीडनिचयस्य अवकाशदानेन चिकीर्षतीव, आनृण्यं च संपिपादयिषतीवेति व्यञ्जयति। मद्योजातशिशोः लानं आदानं कृतं शकुन्तैः। अवस्थानां शकुटुम्बानामत्र वासनीडरचनस्यावकाशो दीयते। निचयशब्देन नीडबहुत्वं प्रदर्श्य बहूनां शकुन्तानां स्वजटामण्डले निवासस्यावकाशदानं प्रदर्श्यते। बहवः खलु शकुन्ताः संघीभूय

शकुन्तला स्वपक्षैररक्षत । यादृश उपकारः, तत्सदृशेन तदधिकेनापि प्रत्युपकारेण भाव्यम् । स्वदेहावयवैरुपकुर्वतां शकुन्तानां स्वजटामण्डलेऽवकाशाऽनीयत । शकुन्तैः कृतमादानं कतिपयक्षणावधिकम् ; प्रत्युपकारस्तु स्थिरनिवासगृहदानेन । पक्षैः कृतस्योपकारस्य शिरसा प्रत्युपकारः क्रियते । शिरसा बिभर्त्यय शकुन्तनीडनिचयं इति बिभ्रच्छब्देन चारु द्योत्यते । शकुन्तलोऽयं तापसः ; शकुन्तल च तज्जटामण्डलमिति कविर्व्यञ्जयति । 'नाटकमपूर्वम्' इति । 'अनाघ्रातं पुष्पं' इत्यादिकं नवस्यास्य नाटकस्य विषयेऽपि योजनीयम् । 'न जाने भोक्तारं कमिह समुपस्थास्यति विधिः' इति स्वस्य पुत्रीत्वाभिमतापूर्वकृतिविषयेऽपि स्वचिन्तां कविर्व्यञ्जयतीव । 'जामाता वेत्ति नो पिता' । 'नन्वस्मिन क्षणे विस्मृतं खलु मया' इदं च भाविविस्मरणसूचकम् । 'आर्ये, तवास्मि' इति कविरपि जगन्मातरं देवी शब्दाप्य नाटकारम्भे नाटकोपोद्घातान्ते 'तवास्मि' इति याचत इव । 'तवास्मीति च याचतः' इति प्रसिद्ध ईश्वरप्रपदनमार्गः । 'तवास्मि' इति राममुखेन आदिकविप्रयुक्तौ शब्दावेवात्र पठ्येते । प्रस्तावनायाः आदावन्ते च 'आर्ये' इति देवीं संबोधयति कालिदासः कविः सूत्रधारमुखेन । अत्र देवीप्रपत्तिः छन्नमिव क्रियते । नाटकान्ते तु स्पष्टमेव क्रियते परिगतशक्तिरित्यादिना । तत्र दक्षपुत्री दाक्षायणी नाटकपात्रम् । शकुन्तला राज्ञे ददात्येका दाक्षायणी । आर्यादाक्षायणी शाकुन्तलनाटककविनां ददाति कालिदासाय ॥

'तवास्मि गीतरागेण हारिणा प्रसभं हृतः' इति गायन्कविः भगवद्गीतागानरसं स्वमप्यवाप्तमिव व्यञ्जयतीव । अनुपदमेव सशरचापहस्तं रथस्थं राजानं ससूतं प्रवेशयति । भगवता गीता गीता कविबुद्धौ परिवर्तते । गीतास्मरणेन नाटकारम्भः । अन्ते च 'त्वमपि विततयज्ञः स्वर्गिणो भावयालम्' इति स्पष्टमनुकुरुते गीतागीतप्रजापत्यादेशस्मरम्वत्याः । गीतरागेण सारङ्गा मृगाः प्रसभं ह्रियेरन् । अत्र सारङ्गेण मृगेण राजा प्रसभ सुदूरं ह्रियते । शकुन्तलासहवसतिमुपेत्य तया सवर्धितः सारङ्गः स्वप्राणापायमप्यविगणय्य सारङ्गाक्षीसमीपं राजानमाकर्षतीव । घटयति च तयोः मिथः प्रेमवीक्षणम् । सारङ्गपदं भ्रमरवाचि च गजवाचि च । अत्र सारङ्गो भ्रमरः शकुन्तलां भीषयित्वा तद्भीतिनिवारणव्याजेन राजानं प्रवेशयति शकुन्तलायाः पुरतः । मृगभ्रमरौ द्वौ सारङ्गौ नायकं नायकीसमीपमुपनयन्तौ तत्संयोगघटकौ । एतदङ्कान्ते सारङ्गो वनगजः शकुन्तलाभ्याशाद्राजानमाकर्षति । आश्रममृगः सारङ्गः शकुन्तलाप्रियः, न तथा वनगजः सारङ्गः, स तु मूर्तो विघ्नः । 'मूर्तो विघ्नः' इत्युक्तिर्न केवलमाश्रमवासिजनतपसः, किं तु, नायकनायकीसहयोगस्यापि । शकुन्तलाप्रियसारङ्गयूथस्यापि भीषणो वनगजः सारङ्गः । अत्र सूत्रधारः स्थानादनुच्चलन्नपि प्रसभं ह्रियते ; यथा राजा 'अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः । स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥' भवति । एतदङ्कान्ते राज्ञः शरीरं पुरो गच्छति मन्द मन्दमहृदयम् । तन्मनस्तु पश्चात्प्रसभं धावति शकुन्तलासमीपम् । अनेन प्रस्तावनान्तिमश्लोकेन भाविबहुवृत्तान्ताः सूच्यन्ते । अनेकार्थकसारङ्गशब्दप्रयोगेण बहुर्थसूचनं लभ्यते । सुविहितोऽत्र सारङ्गशब्दप्रयोगः ॥

(क्रमशः)

अज अवगच्छ । मुहुर्मामवगच्छ अनुगृह्णीत्यर्थः । 'अज गतौ' इति धातोरकारलोपश्छान्दसः । सुखादीं दुःखनिधनाम् । अस्यार्थः— सुखमत्ति आदयतीति सुखादी सुखसंपादकः इन्दुः चन्द्रः वैन्दवस्थानगतः । खनिधनां खं वैन्दवस्थानमेव निधनं यस्याः सा ताम् । यद्वा, सुखादीं सुखप्रथमां सुखात्मिकाम् ; दुःखस्य निधनं नाशो यस्मादिति दुःखनिधनां अविज्ञातदुःखगन्धामित्यर्थः । यद्वा, सुखादीं शोभनेन खेन इन्द्रियेण मनसा आदीं आद्यां मनोवेद्यामित्यर्थः । दुःखनिधनां दुःखानां दुष्टेन्द्रियाणा चक्षुरादीनां अगोचरामिति । प्रतिमुञ्चस्व स्वां पुरम् । स्वां भगवतीं पुरं देहं प्रतिमुञ्चस्व अधितिष्ठ । मरीचयः स्वायंभुवाः ; अस्यार्थः—स्वयं भगवत्याः सकाशाद् भवा उत्पन्नाः मरीचयो मयूखाः ; सर्वाणि भुवनानि आवृत्य वर्तन्त इति वाक्यशेषः । सूर्यचन्द्राग्नीनां प्रकाशकत्वं स्वायंभुवमरीचिप्रसादादेवेति उत्तरत्र वक्ष्यते । ये मरीच्याख्यं कल्पयन् । अस्यार्थः— ये मयूखाः षष्ट्युत्तरत्रिशतसंख्याकाः अरीराणि कालात्मकानि षष्ट्युत्तरत्रिशतसंख्याकानि दिनानि, तान्येव संवत्सरः, 'संवत्सरो वै प्रजापतिः' (तै. ब्रा. १. ६. २.) इति श्रुतेः । ते तं देहं कल्पयन्तु । ते मरीचयः ते तव भगवत्याः देहं कल्पयन्तु देहमाश्रयन्तु । देहशब्देन देहावयवश्चरणमुच्यते । भवच्चरणोत्पन्ना इत्यर्थः । मा च ते ख्या स्म तीरिषत् । ते तव ख्या ख्यातिः ज्ञानं मा च तीरिषत् अस्मान् न जहातु, भवद्विषयज्ञानमस्माकं सदा सिद्ध्यत्वित्यर्थः । इतः परं पूज्यश्चक्रविद्यानुष्ठाने त्वरमाणाः परस्परं संगिरन्ते—उत्तिष्ठत मा स्वप्न । अग्निमिच्छध्वं भारताः । राज्ञः सोमस्य तृप्तासः । सूर्येण सयुजोषसः । ऋचोऽयमर्थः—हे भारताः, भायां भारूपायां ज्योतीरूपायां चक्रविद्यायामिति यावत्, रताः उपासनारताः । यद्वा, भारत्याः सरस्वत्याः श्रीविद्यायाः उपासकाः । सामान्यविहितप्रत्ययस्य विशेषवाचित्वात् भारता इति । उत्तिष्ठत उपासनोपक्रमं कुरुत । मा स्वप्न अप्रमत्ता भवत । अग्निमिच्छध्वं स्वाधिष्ठानगताग्निं प्रज्वलयत । राज्ञश्चन्द्रस्य । उमया सहितः सोमः । चन्द्रमण्डलान्तर्गतवैन्दवस्थानगतत्वादेव्याः, चन्द्रस्य सोमशब्दवाच्यत्वसिद्धिः । तस्य चन्द्रस्य निष्यन्दैः तृप्तासः तृप्ताः । सूर्येण अनाहतचक्रविशुद्धिचक्रयोर्मध्ये स्थितेन सूर्येण सयुजा, अग्निचन्द्रयोर्मध्यवर्तिना इत्यर्थः । यद्वा, सूर्येण सयुजा सखा तृप्तास इत्यन्वयः । कीदृशाः ? उषसः प्लुष्टमायामयकेशाः । यद्वा, उषसः उषःकाले ध्यानरताः, तस्मिन् काले भगवतीनिदिध्यासनादेर्विहितत्वात् । इतः परं पूजासामग्रीमुपदिशन्ति पूज्यः—युवा सुवासाः । युवा दृढाङ्गः स्वस्थः । सुवासाः शुभ्रवस्त्रः । इदं शुभ्राभरणशुभ्रमाल्यादीनामुपलक्षकम् । एवंविधः सन् पूजयेदिति शेषः । श्रीचक्रस्य स्वरूपं तावदाहुः—अष्टाचक्रा नवद्वारा । अष्टकोण दशकोणद्वितय चतुर्दशकोण अष्टपत्र षोडशपत्र त्रिवलय त्रिरेखात्मकानि अष्टौ चक्राणि यस्याः सा अष्टाचक्रा । अत एव नवद्वारा नव द्वाराणि त्रिकोणरूपाणि यस्याः सा नवद्वारा । देवानां पूर्वेभ्या । देवानामिन्द्रादीनां पूज्यत्वेन ब्रह्मविद्यानां पूः श्रीविद्यानगरम् । यद्वा, दीव्यन्तीति देवाः षड्विंशतितत्त्वानि, तेषां पूरधिष्ठानम् । यद्वा,

सूर्यचन्द्राग्नीनां [illegible], सोमसूर्याग्नितात्मकत्वात् श्रीचक्रस्य । तस्य पुरित्रयसमष्टिरूपत्वात् पूरित्येकवचन-सिद्धिरिति भ्येयम् । अयोध्या अताड्या, सम्बाधया [illegible] मिति शेषः । तस्यां हिरण्मयः कोशः । स्वर्गो लोको ज्योतिषाऽऽवृत । अस्यार्थः— तस्यां पुरि श्रीचक्रमध्ये हिरण्मयः कोशः, सहस्रदलकमल-कोश इत्यर्थः, बैन्दवस्थाने सहस्रदलकमलकोशस्य विद्यमानत्वात् । तस्य कोशस्य ज्योतिषा स्वर्गो लोकः आवृतः ज्योतिर्लोकः स्वर्गलोक इत्यर्थः । अथ पृश्नयः चक्रविद्योपासनायाः फलमाहुः— यो वै तां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः । अय-मर्थः—ब्रह्मणः ब्रह्मस्वरूपायाः भगवत्याः तां पूर्वोक्तां अमृतेन आवृतां चन्द्रमण्डलगलत्पीयूषधारा-वृतां पुरीं श्रीचक्ररूपां त्रिपुरायाः पुरं यो वेद, ज्ञानपूर्वकमर्चनं करोति, तस्मै विदुषे अर्चकाय, ब्रह्म च ब्रह्मस्वरूपा भगवती ब्रह्मा च ब्रह्मस्वरूपो भगवान् चकारद्वयमुभयोर्मेलनं समुचिनोति, मिलितयोरेव बैन्दवस्थाने सहस्रारे सुधासिन्धुमध्ये मणिद्वीपे चिन्तामणिगृहे निवासात् । एतौ उभौ आयुः जीवितं कीर्तिं यशः प्रजां संतानं ददुः दद्यातामित्यर्थः । 'व्यत्ययो बहुलम्' इति वचनव्यत्ययः । शिवशक्त्योः तत्रैव निवासमाहुः— विभ्राजमानाम् हरिणीम् । यशसा संपरी-वृताम् । पुरम् हिरण्मयीं ब्रह्मा विवेशापराजिताम् । ऋचोऽयमर्थः — विभ्राजमानां अनन्तकोटि-संख्याकरश्मिभिरिति शेषः, प्रकाशमानाम् । हरिणीं हिरण्यवर्णां 'हिरण्यवर्णां हरिणीम्' (श्रीसूक्तं) इति श्रुतेः । यशसा कीर्त्या सम्यक्परिवृताम् ; ये ये लोके कीर्तिमन्तः ते सर्वे भगवतीप्रसादसमा-सादितकीर्तिमन्त इत्यर्थः । तां बैन्दवीं पुरं चिन्तामणिगृहं ब्रह्मा सदाशिवः, 'ब्रह्मा शिवो मे अस्तु सदाशिवोम्' (तै. आ. १०, ५) इति श्रुतेः पुंलिङ्गब्रह्मशब्दसदाशिवशब्दयोरेक एवार्थः प्रतीतः । विवेश अध्यासितवान् । अपराजिता अनाख्या चन्द्रकला विवेश । वाक्यद्वयेन उभयोः प्रवेशभेद-प्रतिपादनम्, 'बैन्दवे चिन्तामणिगृहे सदाशिवः सर्वदा निवसति, अपराजिता कुण्डलिनीशक्तिः षट्चक्राणि भित्त्वा भूयो भूयः प्रविशति' इत्येतदर्थं ज्ञापयितुम् । शिवशक्त्यो-तस्मिन् चक्रे अवस्थितिप्रकारमाहुः — पराङ्नेत्र्यात्मयी । पराङ्नेत्र्यनाशकी । अस्यार्थः—पराङ् अधोमुखी चक्र-रूपिणी । शिवशक्त्योर्मध्ये शक्तिः अज्यात्मयी व्याप्तिरहिता नाशरहिता नित्या दुःखरहिता आनन्द-मयी इत्यर्थः । एति वर्तते । यद्वा, अज्यात्मयी, ज्या भूमिः, तेन तत्त्वभूतानि लक्ष्यन्ते, तन्मयी न भवतीति अज्यात्मयी मनस्तत्त्वादिमयी, शिवचक्रात्मकचतुर्योन्यात्मिकेति यावत्, शिवयोनीनां बैन्दवस्थानादधः अवाङ्मुखतया अवस्थानात् । अनाशकी नाशरहिता शक्तिचक्रात्मकपञ्चयो-न्यात्मिका पराङ् अधोमुखी एति, शक्तियोनीनामपि शिवयोन्यपेक्षया अवाङ्मुखत्वात् । एवं शिव-योनिशक्तियोन्योः परस्परमवाङ्मुखत्वं चक्रलेखनक्रमादवगम्यते । विदुषः फलमाहुः—इह चामुत्र चान्वेति । विद्वान्देवासुरानुभयान् । दीव्यन्तीति देवाः एकादशेन्द्रियाणि । असुराः असवः प्राणाः प्राणादिपञ्चवायवः तान् रान्ति आददत इति पञ्च तन्मात्रा उच्यन्ते । उभयान् उभयत्र देवासुरेषु

अन्वितान् मायाशुद्धविद्यामहेश्वरसदाशिवान् यो विद्वान् पञ्चविंशतितत्त्वातीतं विदित्वा शिवशक्तिसंपुटात्मकं पञ्चत्रिंशतत्त्वाविलक्षणं षट्त्रिंशत्तत्त्वं यस्तु वेत्ति स विद्वान् इह च इह लोके पूजातारतम्यवशात् अत्र च परलोके सार्ष्टिसालोक्यसामीप्यसारूप्यसायुज्यात्मिकया पञ्चविधया मुक्त्या अ चेति दृश्यते । सार्ष्ट्यादिस्वरूपं प्रपञ्चं पुरस्तात् प्रपञ्च्यते । अथ देवासुरोभयज्ञानोपायमाहुः— यत्कुमारी मन्त्रयते । यद्वोपित्पतिव्रता । अरिष्टं यत्किं च क्रियते । अग्निस्तन्नु वीति । अयमर्थः — कुण्डलिनीशक्तेरवस्थात्रयं विद्यते । यद्यस्मिन् चक्रे कुमारी कुमारावस्थामापन्ना सती सुप्तोत्थिता मन्त्रं ते तत्र वरं करोति, कुण्डलिन्याः सर्पात्मकत्वात् । सर्पो हि सुप्तोत्थाने मन्त्रस्वं करोति, तद्वदित्यर्थः । यद्वोपित् यस्मिन् चक्रे कुलयोषित् विष्णुग्रन्थिपर्यन्तं सत्वा, गतीति शेषः, 'कुलं योनौ कुलं लक्त्वा राते विष्णोः प्रभेदने' इति सनत्कुमारवचनात् । यत् यस्मिन् चक्रे पतिव्रता पत्या परशिवेन सार्धं सहस्रदलकमले विहरमाणा । रिष्टं शुभाभावं, 'रिष्टं क्षेमे शुभाभावे' इत्यभिधानात्; तदनरिष्टं शुभं, अमृतास्वादमित्यर्थः, यत्किंचित्क्रियते तत् स्वाधिष्ठानगतोऽग्निः अनुवेधनि सहायं करोति । अतश्च अभ्यासवशात् वायुना अग्निं प्रज्वाल्य अग्निशिखानुविद्धविलीनचन्द्रमण्डलगलत्पीयूषधारानुभवे पञ्चविंशतितत्त्वातीता परमेश्वरी इति ज्ञातुं सुशकमित्युपदेशः । चक्रविद्योपासनं वर्णिनामाश्रमिणां ज्ञानिनामज्ञानिनां च फलदायकमित्यभिसंधायाहुः—अशृतासः शृतासश्च । यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्षन्ते । अयमर्थः — अशृतासः अपक्वाः अक्षपितान्तःकरणकलमषा इत्यर्थः । शृतासश्च पक्वाश्च, 'आज्जसेरसुक्' इत्यसुगागमः, क्षपितान्तःकरणकलमषा इत्यर्थः । यज्वानः यजनशीलाः त्रैवर्णिकाः आश्रमिणश्च । अयज्वनः यागरहिताः शूद्रादयः 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' (तै. सं. ७. १. १) इति श्रुतिः त्रैवर्णिकैकनियताधिकारयज्ञशब्दवाच्याग्निष्टोमादिपरा । चक्रविद्योपासने शूद्राणामपि अधिकारचोदनात् निषादस्थपतिवत् वैदिके कर्मण्यधिकारसिद्धेः न काचित्क्षतिः । यन्तः, 'इण् गतौ' चक्रविद्यामवगच्छन्तः स्वः स्वर्गं नापेक्षन्ते । चक्रविद्योपासनाव्यतिरेकेण देवतान्तरोपासनायामनिष्टमाहुः— इन्द्रमग्निं च ये विदुः । सिकता इव संयन्ति । रश्मिभिः समुद्रीरिताः । अस्माल्लोकात्तमुष्माच्च । अयमर्थः— सुरासुरमुखवन्दितचरणारविन्दायाः सर्वभूतान्तर्याभिन्याः सर्वव्याप्यायाः जगदुत्पत्तिस्थितिलयहेतोश्चक्रविद्याया अन्यत्वेन ये इन्द्रमग्निं, चकारात् यमादिलोकपालान् पृथिव्यादिसदाशिवान्ततत्त्वानि च उपास्यत्वेन ये विदुः, ते सिकता इव बालुककणा इव संयन्ति, परस्परं विरला भ्रष्टा भवेयुरित्यर्थः । किं च, रश्मिभिः यमपाशैः, उत्तरप्रबन्धे 'अपेत वीत' इत्यादौ अतिपादितैः, समुद्रीरिताः संयता बद्धा भवेयुरित्यर्थः । किं च, अस्माल्लोकात् अमुष्माल्लोकाच्च भ्रष्टा भवेयुरिति शेषः । अत एव श्रुत्यन्तरम् — 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते' (ई. उ. ९) । अयमर्थः— आवद्यां विद्याविरुद्धां ज्ञानमार्ग-

विरुद्धां इन्द्रादिसेवां 'वाचं धेनुमुपासीत' (बृ. ७. ८. १) इत्येवमभ्यारोपितसेवां च ये कुर्वते, ते अविद्वांसः अन्धं तमः प्रविशन्ति, अन्धतामिस्रं प्रविशन्तीत्यर्थः। चकारः प्रकरणसमाप्तिद्योतकः। ऋषिभिरदात्पृश्निनामभिः ॥ पृश्निननामभिः ऋषिभिः एतत्सर्वमदात्, अदायि। कर्मणि लुङ्। छान्दसः कर्मणि प्रत्ययलोपः, कर्तृप्रत्ययव्यत्ययश्च। ऋषिभिः पृश्निभिरेवमुक्तमित्यर्थः। यद्वा, पृश्निभिः ऋषिभिः सहितः ऋषिसङ्घः एवमदात्, वाचमिति शेषः, उक्तवानित्यर्थः ॥ ११ ॥

॥ सौभाग्यवर्धनी ॥

'शिवाधारे चक्रे' इत्यादि श्रीचक्रं सूचितम्। इदानीं श्रीचक्रस्य स्वरूपमात्रमाह—**चतुर्भिरिति**। चतुर्भिः श्रीकण्ठैः शिवैः शिवयुवतिभिः शक्तिभिः। शिवानामध ऊर्ध्वाग्रास्त्रिकोणाः शिवाः, अधोमुखकोणाः शक्तयः ताभिः प्रभिन्नाभिः शंभोर्नवभिः मूलप्रकृतिभिः श्रीचक्रभूताभिर्नवयोनिभिः, त्रयश्चत्वारिंशत्कोणाः वसुदलकलास्त्रित्रिवलयत्रिरेखाभिः अष्टदलषोडशदलवृत्तत्रयभूगृहत्रयैः सह तव चरणकोणाः परिणताः। तव चरणयोः कोणपरिणतय एवेत्यर्थः। तदुक्तं भवति—श्रीचक्रान्तर्गतबिन्दुरूपस्य शंभोरूर्ध्वाधःस्थितनवयोनिभिः श्रीचक्रमूलकारणभूताभिर्निष्पन्नत्रिकोणाष्टकोणदशारद्वयचतुर्दशाराणां त्रिचत्वारिंशत्कोणाः अष्टदलषोडशदलवृत्तत्रयचतुर्द्वारोपशोभितभूगृहत्रयैः सार्धं तव चरणकोणाः परिणताः। तव चरणकोणपरिणतिरूपं श्रीचक्रं विलसितमिति भावः। तदुक्तं संकेतपद्धतौ—'पञ्चशक्तिचतुर्बह्निसंयोगाच्चक्रसंभवः' इति। चतुर्वह्नयः रुद्रा इत्यर्थः, 'रुद्रो वा एष यदग्निः' इति श्रुतेः। अथर्वणश्रुतिरपि सौभाग्यकाण्डे—'तिस्रः पुरस्त्रिपथा विचर्षणा अत्राकृथा अक्षराः संनिविष्टाः। अधिष्ठायैना अजरा पुराणी महत्तरा महिमा देवतानाम् ॥ नवयोनि नव चक्राणि दीधिरे नवैव योगा नव योगिन्यश्च। नवानां चक्रा अधिनाथाः स्योना नव भद्रा नव मुद्रा महीनाम् ॥ एका स आसीत्प्रथमा सा नवासीदा सोनविंशादा सोनत्रिंशत्। चत्वारिंशादथ तिस्रः समिधा उशतीरिव मातरो माऽऽविशन्तु ॥' इति। अस्योद्धारक्रमस्तु 'वृत्तं कृत्वेष्टमानेन सूत्रं पूर्वापरायतम्। विन्यस्य विभजेदष्टचत्वारिंशद्विभागतः ॥ षष्ठे षष्ठे पञ्चमे च तृतीयेऽथ तृतीयके। चतुर्थेऽथ तृतीये च षष्ठे षष्ठांशके पुनः ॥ विधाय नव चिह्नानि तेषु सूत्राणि तापयेत् ॥ नव याम्योत्तराग्राणि तेषामुभयपार्श्वतः। आद्यद्वितीयतुर्याणां तथा पञ्चमषष्ठयोः ॥ अष्टमान्तिमयोर्विद्वान्नग्निबाणे कलांशकान्। पुराणद्वयषष्ठवेदाग्निसंख्यांशान्मार्जयेत्क्रमात् ॥ शनिमध्ये रवेरन्तौ चन्द्रान्तौ केतुमध्यतः। मङ्गलान्तौ वृत्तमध्ये बुधान्तौ राहुमध्यतः ॥ गुरोरन्तौ भौममध्ये शुक्रान्तौ सोममध्यतः। शन्यन्तौ वृत्तमध्ये तु राहुन्तौ रविमध्यतः। केत्वन्तौ बुधमध्ये तु योजयेत्क्रमतो बुधः ॥ मध्यवह्निस्फुरद्रूपमष्टद्विदशवह्निकम्। चतुर्दशानलद्योतं श्रीचक्रं जायते परम् ॥ तद्बहिर्वसुपत्राब्जं तद्बहिः षोडशच्छदम्। वृत्तत्रितयसंशोभं त्रिरेखाञ्चितभूगृहम् ॥ त्रिधामनिलयं द्वारचतुष्टयसुशोभितम्। सर्वतेजोमयं दिव्यं सोमसूर्यानलात्मकम् ॥' इति ॥ षोडश कलाः सप्तविंशतिनक्षत्राणि; तेन त्रिचत्वारिंशत्कोणात्मना सोमरूपता। द्वादश कलाः द्वादश मूर्तयः, द्वादश राशयः, वेदत्रयी, उदात्ताद्याः स्वराः; तेन त्रिचत्वारिंशत्कोणात्मना सूर्यरूपता। मध्यत्रिकोणः साक्षात्स्फुरद्रूपबिन्दुचक्रतेजोविलासः। तस्य विलासाः अष्टकोणात्मना अष्टौ मूर्तयः—जातवेदाः सप्तजिह्वः हव्यवाहनः कौमारतेजाः अश्वोदरजः वैश्वानरः विश्वमुखो देवमुख इति। दश कलाः दश विभूतयः—

विराट् स्वराट् सम्राट् अभिभूः सुभूः विभूः प्रभ्वी प्रभूतिः शिवा विभूतिः इति। दशकलात्मनाऽन्तर्दशारं, दशविभूत्यात्मना बाह्यदशारम् ; सात्त्विकराजसतामसजिह्वात्मना चतुर्दशारमिति बहिरूपता ; तथा च श्रुतिः— 'प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह। विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे' (तै. सं. ४. ६.५.) इति। अस्यार्थः—अग्नेः प्राची दिशमनु ध्यात् प्रदिशं विदिशं प्रेहि प्रकर्षेण इहि गच्छ। सर्वत्र दीप्यस्व, विद्वान्, यतस्त्वं विद्वान् सर्वं रहस्यं वेत्सीति भावः। अग्नेरग्ने पुरः अग्निर्भवेह ; त्रिकोणस्य त्रिकोणस्य पुरः अग्निर्भवेह ; एतावता त्रिकोणचतुष्टयमूर्ध्वमुखं स्पष्टीकृतम्। विश्वा आशा दीद्यानः, आशा दिशः, विश्वा विश्वसंख्याः प्राप्य दीप्यमानः विभाहि ; विश्वं भुवनं तत्संख्यां चतुर्दश, तेन चतुर्दशारारूपेण दीप्यस्वेति संपन्नोऽर्थः। ऊर्जं नो धेहि द्विपदे चतुष्पदे। मनुष्यगवादिचतुष्पदे अन्नं धेहि। एतच्चतुर्दशारदशारद्वयाष्टकोणबिन्दुभिः स्फुरद्रूप दिव्यचक्रमष्टदलषोडशदलचतुरश्रत्रयगतद्वारचतुष्टयैः षट्त्रिंशत्तत्त्वात्मकैर्वेष्टितं परदेवताया आसनमिति सिद्धम्। श्रुत्यन्तरं च— 'ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे' (तै. सं. १. ५. ११) इति। अस्यार्थः—विश्वानराणां संबन्धी वैश्वानरः ; सर्वदेवमुख इत्यर्थः, 'अग्निमुखा वै देवाः' इति श्रुतेः। ऋतस्य ज्योतिषस्पतिम्। ऋतमग्निम्, 'अग्निर्वा ऋतम्' इति श्रुतेः। जात्येकवचनम्। अग्निमात्रस्य पतिम् ; अजस्रं अचः अस्राणि यस्य सोऽजस्रः स चासौ चतुर्दशारश्च वा, बिन्दुविसर्गयोरचां मध्ये गणनाभावाच्चतुर्दशैवाचः ; ईमहे जानीमहे। अथवा, विश्वसंबन्धी वैश्वः, वैश्वश्चासावनलश्च वैश्वानरः ; रलयोरभेदः। यथा 'सरिरस्य मध्यात्' इति। विश्वाकारेण चतुर्दशभुवनरूपाकारेण दीप्यमानानामपरमजस्रं नवास्रं घर्मं सूर्यात्मकमीमहे इति चक्रोद्धारप्रपञ्चो गुरुमुखादवगतो ज्ञापितः ॥ ११ ॥

अरुणामोदिनी

अथेदानीमिन्दुमण्डलात्मकं तादृशं चक्रमुपदिशति— चतुर्भिरिति। हे देवि, चतुर्भिः चतुःसंख्याकैः श्री. शोभा कण्ठे यस्य सः श्रीकण्ठः शिवः। राजकीयपुरुषो राजेत्यादिवदुपचारात्तदात्मकाः कोणा अपि श्रीकण्ठा इत्युच्यन्ते। अथ वा, श्रीकण्ठः शिवः एषां प्रतिपाद्यत्वेनास्तीति वा श्रीकण्ठाः कोणाः ; अर्शआदित्वान्मत्वर्थीयोऽचूप्रत्ययः। तैः कोणैः, 'चतुर्भिः शिवरूपैश्च' इत्यागमात्। तथा शं परमानन्दं भावयतीति शिवासस्पर्शेनेति व्युत्पत्त्या 'बिन्दुरूपः शिवः स्वयम्' इत्यागमाद्वा शंभुरित्यनेन बिन्दुरुच्यते। तथा च शंभोर्बिन्दुमादाय परिगृह्णेति कर्मणि ल्यब्लोपे पञ्चमी ; शुद्धपञ्चमीपक्षे 'अन्यारात्' इति सूत्रे अन्यशब्देनार्थग्रहणात्साधुत्वम्। प्रभिन्नाभिः प्रकर्षेण भिन्नाभिः, बिन्दुना मध्ये स्थित्वा विविक्ताभिरित्यर्थः ॥

यत्तूक्तम्— शंभुशब्देन चत्वारः श्रीकण्ठा उच्यन्त इति, तदसत्। शंभुश्रीकण्ठपदयोः पर्यायत्वेन पौनरुक्त्यापत्तेः, शक्तेर्भिन्नैश्चतुर्भिरिति च वक्तव्यत्वप्रतीतेश्च। एतेन शंभुशब्देनोर्ध्वमुखत्रिकोणचतुष्कमुच्यत इत्यपि परास्तम्। पञ्चभिः पञ्चसंख्याकैः 'शक्तिरूपैश्च पञ्चभिः' इति वचनादिति भावः। शिवस्य युवतिर्जाया शक्तिः, तत्प्रतिपादकाः कोणाश्चोपचारात्तत्पदेनोच्यन्ते। अत्र युवतिपदेन यौति मिश्रीभवतीति व्युत्पन्नेन देवयोस्तद्देहयोश्चैक्यं सूच्यते। इत्येवंप्रकारेण

नवभिर्नवसंख्याभिः । अत्रोक्तं चतुःशत्याम्—'चतुर्भिः शिवरूपैश्च शक्तिरूपैश्च पञ्चभिः । नवचक्रैश्च संसिद्ध श्रीचक्रं शिवयोर्वपुः ॥ त्रिकोणमष्टकोणं च दशकोणद्वयं तथा । चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥ बिन्दुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकम् । चतुरस्रं च चत्वारि शिवचक्राण्यनुक्रमात् ॥ त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुजम् । दशारयोः षोडशारं भूगृहं भुवनाश्रके ॥ शैवानामपि शाक्तानां चक्राणां च परस्परम् । अविनाभावसंबन्धं यो जानाति स चक्रवित् ॥ त्रिकोणमष्टकोणं च दशकोणद्वयं तथा । मनुकोणं चतुष्कोणं कोणचक्राणि षट् क्रमात् ॥ मूलाधारं तथा स्वाधिष्ठानं च मणिपूरकम् । अनाहतं विशुद्धाख्यमाज्ञाचक्रं विदुर्बुधाः ॥ नवाधारस्वरूपाणि कोणचक्राणि पार्वति । त्रिकोणरूपिणी शक्तिर्बिन्दुरूपः शिवः स्वयम् । अविनाभावसंबन्धस्तस्माद्बिन्दुत्रिकोणयोः ॥' इति ॥ मूलप्रकृतिभिः प्रपञ्चसृष्ट्यादिकर्तृत्वेन अष्टैरुत्त्वात्मकत्वेन च मूलकारणैरित्यर्थः । तदुक्तम्—'त्वगसृङ्मांसमेदोऽस्थिधातवः शक्तिमूलकाः । मज्जाशुक्राणजीवधातवः शिवमूलकाः ॥ नवधातुमयो देहो नवयोनिसमुद्भवः । दशमी योनिरेवैषा पराशक्तिस्तरीश्वरी ॥ शरीरपिण्डाण्ड समुत्पन्न तद्ब्रह्माण्डसमुद्भवौ । पञ्च भूतानि शाक्तानि मायादीनि शिवस्य तु ॥ माया च शुद्धविद्या च महेश्वरसदाशिवौ । पञ्चविंशतितत्त्वानि तत्रैवान्तर्भवन्ति ते ॥ शतशक्त्यात्मकं विद्धि जगदेतच्चराचरम् ॥' इति ॥ यद्वा, मूलप्रकृतिभिर्वसुदलादीनां त्रिकृतिरूपत्वात् मूलकारणैः, तथा वसुशब्देनाष्टसंख्योच्यते, 'अष्टौ वसवः' इति श्रुतेः । तेन वसुदलमष्टदलमित्यर्थः । कलाशब्देन षोडशसंख्योच्यते, इन्दुकलाः षोडशेति प्रसिद्धेः । अश्रशब्देन दलान्युच्यन्ते । तेन कलाश्रं षोडशदलमित्यर्थः । त्रयाणां वलयानां समाहारस्त्रिवलयम् ; मेखलाकारेखात्रयमित्यर्थः । पात्रादित्वान्न ङीप् । तिस्रश्च ता रेखाश्च त्रिरेखाः प्राकारवलयाकाररेखाश्चतुर्दिक्षु द्वारयुक्तं भूपुरत्रयमित्यर्थः । सर्वेषां द्वन्द्वः । ताभिः सार्धं वसुदलषोडशदलमेखलात्रयभूपुरत्रयैः सह परिणताः परिणामं प्राप्ताः । लोकोपकारार्थं चक्रात्मनाऽवस्थिताः तव भवत्याः शरणस्य श्रीचक्रात्मनिवासगृहस्य ; 'शरणं गृहरक्षित्रोः' इति विश्वः । चरण इति पाठे चरणं श्रीचक्रम् ; 'चरणं तो लोके क्षुधितां दधातु', 'चरणं पवित्रं विततम्' इत्यादिमन्त्रवर्णात् ; चरन्तीत्यनेनोपासकाः सर्वान् पीष्टार्थान्, चरन्त्यस्मिन्सर्वे लोका इति वा चरणं चक्रम् ; तस्य कोणास्त्रयश्चत्वारिंशत् त्रिसख्योत्तरा चत्वारिंशदित्यर्थः । नवयोनिभिः वसुदलकलाश्रत्रिवलयत्रिरेखाभिर्बिन्दुत्रिकोणाभ्यां च संख्यापूर्तिः । चतुश्चत्वारिंशदिति पाठे त्रिकोणाधःस्थितकोणद्वयस्याष्टकोणान्तर्गतत्वेन न संख्याविरोध इति लक्ष्मीधरः । चक्रलक्षणं तूक्तमाचार्यैः—'बिन्दुत्रिकोणवसुकोणदशारयुग्ममन्वश्रनागदलसंयुतषोडशारम् । वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रमेतदुदितं परदेवतायाः ॥' इति । अस्य श्रीचक्रस्य माहात्म्यं कथितं रुद्रयामले—'पृश्नयो नाम मुनयः सर्वे चक्रमुपाश्रिताः । सेवमानाश्चक्रविद्यां देवगन्धर्वपूजिताम् ॥ अग्नीषोमात्मकं चक्रमग्नीषोममयं जगत् । अग्नावन्तर्बभौ भानुरग्नीषोममयः स्मृतम् ॥ त्रिखण्ड मातृकाचक्रं सोमसूर्यानलात्मकम् । महालक्ष्म्याः पुरं चक्रं तत्रैवास्ते सदाशिवः ॥' अत्र चक्रस्य सोमसूर्यानलात्मकत्वमवरोहणक्रमेणोक्तम् । श्रीचक्रस्य मूलाधारादिना षड्रूपस्य त्रिखण्डात्मनेति केचित् । 'सर्वतेजोमयं दिव्यं सोमसूर्यानलात्मकम्' इति वचनात् ; षोडशकलानां तत्क्षेत्रसप्तविंशतिनक्षत्रैः सह त्रयश्चत्वारिंशत्कोणात्मना सोमरूपता । द्वादश कलाः, द्वादश नित्याः, द्वादश राशयः, वेदत्रयी, उदात्तादिस्वरास्तेन त्रिचत्वा-

रिंशत्कोणा इति सूर्यरूपता । मध्यत्रिकोणः स्फुरद्रूपबिन्दुचक्रतेजोविलासस्तस्य विलासाः अष्टकोणात्मका अष्टौ मूर्तयः—जातवेदाः सप्ताजिह्वः हव्यवाहनः कौमारतेजाः अश्वोदरो वैश्वानरः विश्वमुखो देवर्षिः; दश कलाः दश विभूतय —विराट् स्वराट् सम्राडभिभूः सुभूः प्रभूः प्रभूतिः शान्ता शिवा विभूतिः; सात्त्विकराजसतामसजिह्वात्रतया वह्निरवतेत्यन्ये । 'सहस्रामेतदर्णायां तां वदत्यारण्यकश्रुतिः । प्रेक्ष्यो लक्ष्मीधरात्मवों विशेषः साधुबुद्धिभिः । अत्रोपरम्यतेऽस्माभिरतिविस्तरभीरुभिः ॥

त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिञ्चिप्रभृतयः ।
[1]यदालोकौत्सुक्यादमरललना यान्ति मनसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीम् ॥ १२ ॥

॥ लक्ष्मीधरः ॥

त्वदीयं तव संबन्धि त्वद्देहगतमित्यर्थः । सौन्दर्यं लावण्यम् । तुहिनगिरिकन्ये तुहिनप्रधानो गिरिः हिमाद्रिः, तस्य कन्या पुत्री, तस्याः संबुद्धिः । तुलयितुं तुलया समीकर्तुम् । कवीन्द्राः विद्वच्छ्रेष्ठाः कल्पन्ते शक्नुवन्ति कथमपि कथंचिदपि, न कल्पन्त इत्यर्थः । विरिञ्चिप्रभृतयः विरिञ्चिः ब्रह्मा प्रभृतिर्येषां ते हरीन्द्रादयः । यत् यस्मात्कारणात् आलोकौत्सुक्यात् आलोके भवत्सौन्दर्यालोके यदौत्सुक्यं तस्मात्, स्यब्लोपे पञ्चमी, औत्सुक्यमवलम्ब्य । यद्वा, निमित्तपञ्चमी । अमरललनाः देवयोषितः यान्ति प्राप्नुवन्ति मनसा अन्तःकरणेन तपोभिः कृच्छ्रचान्द्रायणादिभिः दुष्प्रापां प्राप्तुमशक्यां, अपिर्विशेषे, गिरिशसायुज्यपदवीम् ॥

अत्रेत्थं पदयोजना— हे तुहिनगिरिकन्ये, त्वदीयं सौन्दर्यं तुलयितुं विरिञ्चिप्रभृतयः कवीन्द्राः कथमपि कल्पन्ते । यद्यस्मात्कारणात् अमरललनाः आलोकौत्सुक्यात् तपोभिः दुष्प्रापामपि गिरिशसायुज्यपदवीं मनसा यान्ति ॥

अयमर्थः - वाणीपतिर्वाचस्पतिप्रभृतीनामपि त्वत्सौन्दर्यं सदृशान्तरं परिकल्प्य वर्णयितुमशक्यम्, त्वत्सदृशसुन्दरवस्त्वन्तराभावात् । ऊर्वशीतिलोत्तमादीनामप्सरसां त्वत्सौन्दर्यलेशतुलायामपि तत्कोटिप्रवेशो दूत एवापास्तः । यतश्चाप्सरसः त्वत्सौन्दर्यदर्शने पुंभावं प्रार्थयमानाः पुरुषान्तरदुरधिगमे त्वत्सौन्दर्यवस्तुनि सदाशिवैकगम्ये दुर्लभसदाशिवसायुज्यमनोरथा वर्तन्ते इति । स्वयमेवाप्सरसः स्वसौन्दर्ये जुगुप्सितवत्य इति भावः । अत्र अनन्वयालंकारो ध्वन्यते, लोके क्वापि तुल्यवस्तुनः असद्भावात्, स्वस्य स्वयैव तुल्यमिति प्रतीतेः ॥ १२ ॥

---

1. यदालोक्यौत्सुक्या०

॥ सौभाग्यवर्धनी ॥

इति श्रीचक्रमुक्त्वा तदधिष्ठात्र्याः परदेवतायाः सौन्दर्यगुणान् स्तोतुं भूमिकां रचयति— **त्वदीयमिति** । हे तुहिनगिरिकन्ये त्वदीयं सौन्दर्यं ब्रह्मादयः कवीन्द्राः वेदविद्याप्रणेतारः भवत्सौन्दर्यं तुलयितुमुपमानोपमेयभावेन वर्णयितुं कथमपि कल्पन्ते ; न कथमपीत्यर्थः, उपमानाभावादिति भावः । यदालोक्य औत्सुक्यादौत्कण्ठ्याद्विशेषात् मनसा आलोक्य ध्यात्वा अमरललना देवाङ्गनाः तपोभिः दुष्प्रापां गिरिशसायुज्यपदवीं यान्ति ; अमरभोगान्विहाय त्वद्ध्यानयोगेन शिवसायुज्यं प्राप्नुवन्तीति भावः । अथ वा, अमराणां ललनं विलासो येषां ते अमरविलासा अप्रतिहतवैभवाः तपोभिः दुष्प्रापां गिरिशसायुज्यपदवीं यान्ति । तव ध्यानयोगेन अमरोचितनानाभोगाननुभूयान्ते शिवसायुज्यं प्राप्ता इति भावः ॥ १२ ॥

॥ अरुणामोदिनी ॥

एवं चक्रस्वरूपं निरूप्य तत्र स्थिताया भगवत्या रूपसंपदो निरूपयितुमाह— **त्वदीयमिति** । तुहिनगिरिर्हिमवान्, तस्य कन्या पुत्री तस्याः संबुद्धिः ; हे तुहिनगिरिकन्ये, अत्यद्भुताकारेण बाल्यकाल एव हिमवन्मोहके भक्तवत्सले देवि ; एतेन महाकुलीनत्वं सूचितम् । विरिञ्चिप्रभृतयः चतुर्मुखप्रमुखाः कवीन्द्राः कवयितृश्रेष्ठाः ; अत्यद्भुतवर्णनाकुशला इत्यर्थः । तवेदं त्वदीयं तावकम् 'त्यदादीनि च' इति वृद्धसंज्ञा ; 'वृद्धाच्छः' 'प्रत्ययोत्तरपदयोश्च' इति त्वादेशः । सौन्दर्यम्, 'अङ्गप्रत्यङ्गकानां यत्संनिवेशो यथोचितम् । संश्लिष्टसंधिबन्धं तत्सौन्दर्यमिति कथ्यते ॥' इत्युक्तलक्षण रम्यत्वं तुलयितुमुपमातु केनचित्समीकर्तुमित्यर्थः । कथमपि कथं वा कल्पन्ते शक्नुवन्ति ; न कथंचिदप्युपमातुं शक्नुवन्तीत्यर्थः । कुत इत्यत्राह— **यदिति** । यस्य सौन्दर्यस्यालोके दर्शने ; 'आलोको दर्शनोद्योतः' इति रत्नमाला । औत्सुक्यादानन्दात् ; 'इष्टार्थोद्युक्त उत्सुकः' इत्यमरः । अमरललना उपमानीकरणा उर्वश्यादयः सुराङ्गनाः । तपोभिः कृच्छ्रचान्द्रायणादिभिरपि दुष्प्रापां प्राप्तुमशक्याम् ; किमुतान्यैरित्यपेरर्थः । गिरिशसायुज्यपदवीं शिवैक्यानुसंधानसरणिम्, मनसा अन्तःकरणेन यान्ति । भवत्संभोगेच्छया अनेकतपोभिरपि दुर्लभं भवन्नित्यसहचरशंकरसायुज्यं मनोभिरेवाक्रामन्त इत्यर्थः । अतः स्त्रीणामपि मोहकं भवत्सौन्दर्यं लोकातिशायीति कविवर्णनागोचरं न भवत्येवेत्यभिप्रायः । हिमवतीव प्रवृत्तस्त्वदनुग्रहो मां प्रेरितवानित्यभिप्रायः । अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थं प्रति हेतुत्वात्काव्यलिङ्गमलंकारः । स चासङ्गतिप्रतीयमानान्वयालंकाराभ्यां संकीर्यते ॥ १२ ॥

नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापाङ्गालोके पतितमनुधावन्ति शतशः ।
गलद्वेणीबन्धाः कुचकलशविस्रस्तसिचया
हठात्त्रुट्यत्काञ्च्यो विगलितदुकूला युवतयः ॥ १३ ॥

॥ लक्ष्मीधरा ॥

नरं मनुष्यमात्रं वर्षीयांसं अतिवृद्धं नयनविरसं नयनाभ्यां विरसं काचकामलपटलादिनेत्रदोषयुक्तं नर्मसु जडं नर्मसु रतिकलासु जडं अनिपुणं तव भवत्याः अपाङ्गालोके कटाक्षवीक्षणे पतितं, कटाक्षैकगोचरमित्यर्थः । अनुधावन्ति अनुधावमानाः शतशः शतसंख्याकाः, शतशब्दः संख्यातीतोपलक्षकः, भूर्भुवःस्वर्लोकस्थिताः सर्वा इत्यर्थः । गलद्वेणीबन्धाः गलन्तो वेणीबन्धा यासां ताः, कुचकलशविस्रस्तसिचयाः कुचकलशाभ्यां विस्रस्ताः शिथिलाः सिचयाः चेलाञ्चला यासां ताः, हठात्त्रुट्यत्काञ्च्यः हठात् शीघ्रं त्रुट्यन्त्यः गलन्त्यः काञ्च्यो रशनाकलापाः यासां ताः, विगलितदुकूलाः स्रस्तनीवीबन्धाः युवतयः तरुण्यः ॥

अत्रेत्थं पदयोजना— हे भगवति, वर्षीयांसं नयनविरसं नर्मसु जडं तवापाङ्गालोके पतितं नरं शतशः युवतयः गलद्वेणीबन्धाः कुचकलशविस्रस्तसिचयाः हठात्त्रुट्यत्काञ्च्यः विगलितदुकूलाः सत्यः, तादृशं नरं मदनमिति मत्वेति शेषः, अनुधावन्ति । एतादृशान्मादनप्रयोगान् 'मुखं बिन्दुं कृत्वा' इत्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः ॥ १३ ॥

॥ सौभाग्यवर्धनी ॥

यत्र ब्रह्मादयोऽपि वर्णने कुण्ठितास्तत्र हि त्वत्सौन्दर्यवर्णने को वा वराकः, तथाऽपि तवैव दयाकलितापाङ्गकणिकापातेन तव सौन्दर्यादिगुणवर्णने प्रवृत्तोऽस्मीति वदन्नेवापाङ्गमहिमानं वर्णयति— नरमिति । नरं वर्षीयांसं वृद्धं कुरूपं नर्मसु क्रीडासु जडमनभिज्ञं तव कृपातरङ्गितापाङ्गपातेन अनुगृहीतं विगलितकबरीभाराः कुचस्रस्तवसनाः हठात् त्रुट्यत्काञ्च्यो विगलितदुकूला अनुधावन्ति शतशः अहमहमिकया पश्चाद्धावन्ति । लज्जापरित्यागेन तदेकचित्ता उन्मादाख्यव्यभिचारिभावपरवशा भ्राम्यन्ति । एतावता तवापाङ्गमहिमा एतादृशः; त्वत्सौन्दर्यगुणं कः समर्थो वेत्तुमिति भावः ॥ १३ ॥

॥ मरुणामोदिनी ॥

'स्वयं समृद्धः परान्समृद्धान्करोति' इति न्यायेन देव्या अत्यद्भुतसौन्दर्यवत्त्वात्तत्कृपापात्रभूतोऽपि निकृष्टोऽपि मदनायत इत्याह—नरमिति । हे देवि! अतिशयेन वृद्धो वर्षीयान् तमतिवृद्धम्; 'प्रियस्थिर...' इत्यादिना वृद्धशब्दस्य वर्षादेशः । 'द्विवचनविभज्य' इत्यादिना ईयसुन्; 'वर्षीयान्दशमी ज्यायान्' इत्यमरः । अत एव नयनाभ्यां विरसं द्रष्टुमक्षममित्यर्थः; नयनविलासरहितमिति ध्वनिः । यत्तूक्तम्—काचकामलादिदोषयुक्तमिति, तदविचारितोत्तरम् । काचादीनां बाधकानपेक्षत्वेन वर्षीयांसमिति विशेषणविरोधापत्तेः । अत एव नर्मसु शृङ्गारक्रीडासु; 'क्रीडा खेला च नर्म च' इत्यमरः । जडमपटुं नरं मानुषमात्रमपि, तव भक्ताभीष्टार्थवितरणभुजिष्य । भवत्या अपाङ्गालोके कटाक्षवीक्षणे, किमुत सपूर्णदृष्टाविति ध्वनिः । पतितं सन्तं भवत्कृपाकटाक्षपात्रीकृतं सन्तमित्यर्थः । शतशः शतसंख्यातिरिक्ता युवतयः शृङ्गाररसानुभवाभिज्ञाः

संपूर्णयौवनाः स्त्रियः ; गलन्तः स्वयमेव विगलिताः वेणीबन्धाः यासां ताः, कुचकलशाभ्यां विस्रस्ताः स्वयमेव विच्युताः सिचया वसनानि यासां ताः ; दर्शितकुचमण्डलाः सत्यः हठादकस्मादेव त्रुट्यन्त्यः काञ्च्यो यासां ताः ; अत एव विगलितदुकूलाः स्रंसमानक्षौमाः सत्यः, अनुधावन्ति धावन्तमनुसृत्य पश्चादायान्तीत्यर्थः । शीघ्रगतावेव 'पाद्याध्मा' इत्यादिना सर्तेर्धावादेशः । अहो स्वदीयकटाक्षमहिमा कियती वर्णनीयेति भावः । उक्तं च चर्चास्तवे—'यस्मिन्मनागपि नवाम्बुज-पत्रगौरां गौरि प्रसादमधुरां दृशमादधासि । तस्मिन्निरन्तरमनङ्गशरप्रकीर्णसीमन्तिनीनयनसंततयः पतन्ति ॥' इति । अत्र वेणीबन्धगलनादीनां शृङ्गारानुभावानां निबन्धनात्प्रेयोऽलंकारः ॥ १३ ॥

क्षितौ षट्पञ्चाशद्द्विसमधिकपञ्चाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले ।
दिवि द्विःषट्त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम् ॥ १४ ॥

॥ लक्ष्मीधरा ॥

क्षितौ पृथिवीतत्त्वयुक्ते मूलाधारे षट्पञ्चाशत् षडुत्तरपञ्चाशत्संख्याकाः, द्विसमधिक-पञ्चाशत् द्वाभ्यां समधिका पञ्चाशत् उदके उदकतत्त्वयुक्ते मणिपूरस्थाने, हुताशे वह्नितत्त्वयुक्ते स्वाधिष्ठानचक्रे द्वाषष्टिः द्वौ च षष्टिश्च द्वाषष्टिः । 'विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्' इति सूत्रेण द्विशब्दादिकारस्य आकारः । चतुरधिकपञ्चाशत् चतुःसंख्यया अधिका पञ्चाशत् अनिले वायुतत्त्वयुक्ते अनाहतचक्रे, दिवि आकाशतत्त्वयुक्ते विशुद्धिचक्रे द्विःषट्त्रिंशत् द्विरावृत्तषट्त्रिंश-त्संख्याकाः द्विसप्ततिसंख्याका इत्यर्थः, मनसि मनस्तत्त्वयुक्ते आज्ञाचक्रे चतुःषष्टिः, इति एवं-प्रकारेण ये प्रसिद्धाः शास्त्रेषु आगमेषु, स्वसंवेद्यत्वेन च योगिनां प्रसिद्धाः मयूखाः सन्ति तेषां मयूखानामप्युपरि सहस्रदलमध्यवर्तिचन्द्रबिम्बात्मके बैन्दवापरनामके सुधासिन्धौ तव भगवत्याः पादाम्बुजयुगं वर्तते विद्यते । एवं समयसंप्रदाय इति शेषः ॥

अन्वेत्थं पदयोजना— हे भगवति, ये मयूखाः क्षितौ षट्पञ्चाशत्, उदके द्विसमधिक-पञ्चाशत्, हुताशे द्वाषष्टिः, अनिले चतुरधिकपञ्चाशत्, दिवि द्विःषट्त्रिंशत्, मनसि चतुः-षष्टिः इति तेषामुपरि तव पादाम्बुजयुगं वर्तत इति शेषः ॥

अत्र षट्पञ्चाशदित्यादिसंख्याशब्दानां संख्येयपरत्वात् संख्येयानां मयूखानां बहुत्वे-ऽपि एकवचनान्तत्वमेव । यथा— 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः । संख्यायें द्विबहुत्वे स्युः... ॥ न तु संख्येये इति नियमात्, संख्येयानां मयूखानां नियमाप्रवृत्तेर्बहुवच-

नत्वं सिद्धम् । अत्रेदं तत्त्वम्— षट्पञ्चाशदित्यादिसंख्यानां संख्येयविशेषणत्वेऽपि न शुक्लादिगुणतौल्यम् ; यथाऽऽह पदमञ्जरीकारः— 'विंशत्यादयो गुणाः न शुक्लादिभिर्गुणैः समानधर्माणो भवितुमर्हन्ति । विंशत्यादयो हि तावत् पृथक्त्वयोगिषु द्रव्येषु वर्तन्त इति व्यामव्यवृत्तयः, शुक्लादयस्तु प्रत्येकपर्यवसायिनः' इति । अत्रेदमतिरहस्यम्— संख्येयपराणां संख्याशब्दानां बहुवचने षट्पञ्चाशतो मयूखा इति प्राप्तौ षट्त्रिंशदुत्तरशतोत्तरत्रिसहस्रसंख्याकाः भवेयुः । अतो न विवक्षितार्थसिद्धिरिति नियमफलमिति ॥

अत्रेदमनुसंधेयम्—आधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञाचक्रात्मकं श्रीचक्रं त्रिखण्डं सोमसूर्यानलात्मकम् । मूलाधारस्वाधिष्ठानचक्रद्वयमेकं खण्डम् । मणिपूरानाहतचक्रद्वयमेकं खण्डम् । विशुद्ध्याज्ञाचक्रद्वयमेकं खण्डम् । अत्र प्रथमखण्डोपरि अग्निस्थानम् । तदेव रुद्रग्रन्थिरित्युच्यते । द्वितीयखण्डोपरि सूर्यस्थानम् । तदेव विष्णुग्रन्थिरित्युच्यते । तृतीयखण्डोपरि चन्द्रस्थानम् । तदेव ब्रह्मग्रन्थिरित्युच्यते । 'सोमसूर्यानलात्मकम्' इति अवरोहक्रमेणावगन्तव्यम् । तत्र प्रथमखण्डोपरि स्थितो वह्निः स्वज्वालादिभिः प्रथमखण्डमावृणोति । द्वितीयखण्डोपरि स्थितः सूर्यः स्वकीयैः किरणैः द्वितीयखण्डमावृणोति । तृतीयखण्डोपरि स्थितः चन्द्रः स्वकलाभिः तृतीयखण्डमावृणोति । आधारचक्रे महीतत्त्वात्मके वह्नेः षट्पञ्चाशज्ज्वालाः, मणिपूरके उदकतत्त्वात्मके स्वोपरिस्थिते द्विपञ्चाशज्ज्वालाः । एवमष्टोत्तरशतं वह्नेः ज्वालाः । सूर्यस्य अग्नितत्त्वात्मके स्वाधिष्ठाने द्वाषष्टिकिरणाः, अनिलतत्त्वात्मके अनाहतचक्रे चतुःपञ्चाशत्किरणाः । सूर्यकिरणानां मणिपूरं विहाय स्वाधिष्ठानप्रवेशः सूर्याग्न्योरैक्यात्, सूर्यान्तर्भावादग्नेश्च । स्वाधिष्ठानमणिपूरयोस्तु सूर्याग्निस्थानयोः मध्ये अग्निस्थाने सूर्यप्रवेशः सूर्यस्थाने अग्निप्रवेशः । [1]जगद्दहनाग्निनामकसंवर्तमेघात्मकसूर्यकिरणजनितवर्षोत्पत्त्यर्थम् । एतत्तु 'तटित्वन्तं शक्त्या' इत्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः । एवं सूर्यस्य षोडशोत्तरशतं किरणा भवन्ति । चन्द्रस्य कलाः वियत्तत्त्वात्मके विशुद्धिचक्रे द्विसप्ततिः, मनस्तत्त्वात्मके आज्ञाचक्रे चतुःषष्टिः । एवं चन्द्रस्य षट्त्रिंशदुत्तरशतं कलाः भवन्ति । यथोक्तं भैरवयामले भैरवाष्टकप्रस्तावे—'अष्टोत्तरशतं वह्नेः षोडशोत्तरकं रवेः । षट्त्रिंशदुत्तरशतं चन्द्रस्य च विनिर्णयः ॥' इति । एवं सोमसूर्यानलाः पिण्डाण्डब्रह्माण्डे आवृत्य वर्तन्ते । पिण्डाण्डब्रह्माण्डयोरैक्यात् पिण्डाण्डावृतिरेव ब्रह्माण्डावृतिरिति रहस्यम् । एवं [2]पिण्डाण्डमतीत्य वर्तते सहस्रकमलम् । तच्च व्योमनामयो लोकः । तत्रत्यश्चन्द्रमा नित्यकलः । एतच्च 'तवाज्ञाचक्रस्थम्' इत्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः । 'आज्ञाचक्रोपरिस्थितश्चन्द्रः' इति यदुक्तं तत्तु चन्द्र-

1. जगद्दहनाग्निनामक० 2. पिण्डाण्डमावृत्य

कलावस्थानमात्रम्, न तु चन्द्रस्य स्थानमिति । यदुक्तं सुभगोदये —षोडशकलानां षोडशनित्यात्मकत्वात्, तासां प्रतिपदादिशुक्लपक्षकृष्णपक्षतिथ्यात्मकतया वृद्धिक्षयसद्भावात्, चन्द्रस्यापि सहस्रकमलगतस्य वृद्धिक्षयौ भवत एवेति, तत्तु चन्द्रमसः वृद्धिक्षयौ न भवतः, किं तु षोडशनित्यात्मकाः षोडश [1]चन्द्रकलाः प्रतिपदादिपौर्णमास्यन्ततिथिप्रवर्तिकाः, तथैव कृष्णप्रतिपदमारभ्य अमावास्यान्ततिथिप्रवर्तिकाः स्वात्मतिरोधानातिरोधानाभ्यामिति मन्त्रविद्रहस्यम् ॥

इदमत्रानुसंधेयम्—श्रीविद्यायाः चन्द्रकलाविद्यापरनामधेयायाः पञ्चदशतिथिरूपत्वात् षट्त्युत्तरत्रिशतं मयूखाः दिवसात्मकाः, तेन संवत्सरो लक्ष्यते । तस्य कालशक्त्यात्मकस्य संवत्सरस्य प्रजापतिरूपत्वात्, प्रजापतेः जगत्कर्तृत्वात्, मरीचीनां जगदुत्पत्तिस्थितिलयकरत्वम् । ते च मरीचयः अस्मिन्ब्रह्माण्डे पिण्डाण्डे च षट्त्युत्तरत्रिशतसंख्याकाः । एवमनन्तकोटिपिण्डाण्डब्रह्माण्डेषु । एवमेव प्रतिब्रह्माण्डं प्रतिपिण्डाण्ड षट्त्युत्तरत्रिशतसंख्याकाः मयूखाः । अतश्चानन्तमयूखाः । ते च मयूखाः सूर्यचन्द्राग्निसंपृक्ताः भगवतीपादारविन्दजन्मानः तांस्तान् लोकान् प्रकाशयन्ति । अयं च 'लोकस्य द्वारमर्चिमत्पवित्रम्' (तै. ब्रा. ३. १२. ३.) इति श्रुत्या मयूखानां भगवतीपादारविन्दसंभव उक्तः । तथैव च 'मरीचयः स्वायंभुवाः' (तै. आ. १. २७) इति श्रुत्या तेषां मरीचीनां सृष्टिस्थितिलयकरत्वमुक्तम् । एतदुक्तं भवति - सूर्यचन्द्राग्नयः भगवतीपादारविन्दोद्भूतानन्तकोटिकिरणमध्ये कतिपयान् किरणानाहृत्य भगवतीप्रसादसमासादितजगत्प्रकाशनसामर्थ्यात् जगन्ति प्रकाशयन्तीति । अतश्च सर्वलोकातिक्रान्तं चन्द्रकलाचक्रं वैन्दवस्थानमिति । तत्र वर्तमानं चरणाम्बुजम् । अनेककोटिब्रह्माण्डपिण्डाण्डावच्छिन्नमयूखानां उपर्येव वर्तमानत्वात् 'तेषामप्युपरि तव पादाम्बुजं वर्तते' इति सिद्धानुवादः, न त्वारोपस्तुतिरित्यनुसंधेयम् । यथोक्तं भैरवयामले चन्द्रज्ञानविद्यायां गौरीं प्रति महेश्वरेण— 'साधु साधु महाभागे पृष्टं त्रैलोक्यसुन्दरि । गुह्याद्गुह्यतमं ज्ञानं न कुत्रापि प्रकाशितम् ॥ कलाविद्या पराशक्तेः[2] श्रीचक्राकाररूपिणी । तन्मध्ये वैन्दवस्थानं तत्रास्ते परमेश्वरी ॥ सदाशिवेन संपृक्ता सर्वतत्त्वातिगा सती । चक्रं त्रिपुरसुन्दर्याः ब्रह्माण्डाकारमीश्वरि ॥ पञ्चभूतात्मकं चैव तन्मात्रात्मकमेव च । इन्द्रियात्मकमेवं च मनस्तत्त्वात्मकं तथा ॥ मायादितत्त्वरूपं च तत्त्वातीतं च वैन्दवम् । वैन्दवे जगदुत्पत्तिस्थितिसंहारकारिणी ॥ सदाशिवेन संपृक्ता तत्त्वातीता महेश्वरी । ज्योतीरूपा पराकारा यस्या देहोद्भवाः शिवे ॥ किरणाश्च सहस्रं च द्विसहस्रं च लक्षकम् । कोटिर्बुदमेतेषां परा संख्या न विद्यते ॥ तामेवानुप्रविश्यैव भाति लोकं चराचरम् । यस्या देव्या महेशानि भासा सर्वं विभासते ॥ तद्भासा रहितं किंचिन्न च यत्र प्रकाशते । तस्याश्च

---

1. चन्द्राः 2. पराशक्तिः

शिवशक्तेश्च चिद्रूपायाश्चितिं विना । आन्ध्यमापद्यते नूनं जगदेतच्चराचरम् । तेषामनन्तकोटीनां मयूखानां महेश्वरि ॥ मध्ये षडुत्तरं तेऽमी विंशतं किरणाः शिवे । ब्रह्माण्डं व्याप्नुवानास्ते सोमसूर्यानलात्मना । अग्नेरष्टोत्तरशतं षोडशोत्तरकं रवेः । षट्त्रिंशदुत्तरशतं चन्द्रस्य किरणाः शिवे ॥ ब्रह्माण्डं भासयन्तस्ते पिण्डाण्डमपि शांकरि । दिवा सूर्यस्तथा रात्रौ सोमो वह्निश्च सन्ध्ययाः ॥ प्रकाशयन्तः कालांस्ते तस्मात्कालात्मकाः क्वयः । षष्ट्युत्तरं च विंशतं दिनान्येव च हायनम् ॥ हायनात्मा महादेवः प्रजापतिरिति श्रुतिः । प्रजापतिर्लोककर्ता मरीचिप्रमुखान्मुनीन् सृजत्येते लोकपालान् ते सर्वे लोकरक्षकाः । संहारश्च हरायत्तः उत्पत्तिर्भवनिर्मिता ॥ रक्षा तु मृडसंलग्ना सृष्टिस्थितिलये शिवः । नियुक्तः परमेशाल्या जगदेवं प्रवर्तते ॥' इति । 'तमेवानुप्रविश्य' इत्यादिना 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (कठ. ५. १५) इति श्रुत्यर्थोऽनूदितः । अत्र बहु वक्तव्यमस्ति, तदुत्तरत्र मन्त्रकूनिरूपयिष्याम. ॥ १४ ॥

॥ सौभाग्यवर्धनी ॥

अपाङ्गमहिमानमभिधाय चरणमहिमानमाह—क्षितावितिं । अत्रैवं व्यवस्था । अत्र पूर्वतन्त्रमुत्तरतन्त्रमिति द्वैविध्यम् । पूर्वतन्त्रं शक्तिपुरःसरम् ; उत्तरतन्त्रं शिवपुरःसरम् । शक्तिपुरःसरं शाक्तमुच्यते ; शिवपुरःसरं शांभवमुच्यते । शांभवे शिवशक्त्योस्तेजोभिरुत्पन्ना आवरणदेवता रश्मय उच्यन्ते । शांभवं षडन्वयात्मकं तन्त्रम् । षडन्वयास्तु मानसनाभसवायव्यतैजसाप्यपार्थिवाः । एतेषामुत्पत्तिक्रम उच्यते । निर्गुणस्य सकलप्रपञ्चसाक्षिणः सच्चिदानन्दरूपस्य शिवस्य विश्वोत्पादनलीलासमुल्लसितस्फुरणविशेषादिदिनेशशक्तेः सकाशात्परा नाम शक्तिरुत्पद्यते । सा च प्रपञ्चोन्मीलनलीलानुग्राहकमनोऽधिष्ठात्री सती ब्रह्मरन्ध्रादिभ्रूमध्यान्तव्यापिनीमुपाधिसरणिं समासाद्य मज्जादिदेवतेति निगद्यते । तया चेच्छाज्ञानक्रियाकुण्डलिनीमातृकेति देवता उत्पन्नाः, नभोवायुतेजोजलभूमिस्थानेषु कण्ठहृदयनाभिलिङ्गगुदोर्ध्वविभागेषु विशुद्धयनाहतस्वाधिष्ठानमणिपूरमूलाधारसंज्ञेषु विलसन्ति । ताश्च त्वगसृङ्मांसमेदोऽस्थि देवताः । तथा चैताभिर्देवताभिः सचराचरं विश्वं समुज्जृम्भते । तन्मध्ये कुण्डलिनीमातृकाभ्यां षडन्वयं तन्त्रमेतच्छांभवमुत्पन्नं सर्गादौ ; पश्चात्सकलः प्रपञ्च उत्पन्नः । तदुक्तं कुब्जिकातन्त्रे—'शिवस्य निष्प्रपञ्चस्य परमार्थशरीरिणः । चिदुल्लासात्परा जाता पञ्चानां मातृरूपिणी ॥ अन्वयानां मार्गयोगात्सैका षोढा प्रजायते । परा चेच्छा तथा ज्ञानक्रियाकुण्डलिनीति च ॥ मातृका चाष्टधा प्रोक्ता पराभेदास्ततः स्मृताः । कुण्डलिनीमातृकाभ्यां च षोढा भिन्नं मयूखकम् ॥ नानाविधं सुविततं तन्त्रमेतत्षडन्वयम् । उत्पन्नं शांभवं पश्चाज्जगदेतच्चराचरम् ॥' इति । तथा च श्रुतिः—'इयमेव सा या प्रथमा व्यौच्छत् । सा रूपाणि कुरुते पञ्च देवी । द्वे स्वसारौ वयतस्तन्त्रमेतत् । सनातनं विततं षण्मयूखम्' इति । अस्यार्थः— सा या प्रथमा व्यौच्छत् सा प्रसिद्धा इयमेव या प्रथमा जगदादिः व्यौच्छत् प्रकटीबभूव, परेति यावत् । सा रूपाणि पञ्च देवी दीव्यतीति देवी स्वलीलया इच्छाज्ञानक्रियाकुण्डलिनीमातृकेति पञ्च रूपाणि कुरुते । तत्र द्वे स्वसारौ कुण्डलिनीमातृके, एतच्छांभवं तन्त्रं षोढा विस्तीर्यमाणमयूखं सनातनम्, अनादिसिद्धपरम्परयाऽनुवर्तमानं वयतः विस्तारयतः पृथिव्यादिस्थानेषु षट्पञ्चाशदादिभेदेन मयूखजालं विस्तारयन्तीत्यर्थः । क्षितौ पार्थिवतत्त्वरूपा अष्टाविंशति

रश्मयः । पार्थिवतत्त्वानि तु पञ्च तन्मात्राः पञ्च भूतानि पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि अन्तः-करणचतुष्टयं कालः प्रकृतिपुरुषमहत्तत्त्वानीत्यष्टाविंशति. । शिवशक्तिसंबन्धभेदेन द्विविधानि; तेन षट्-पञ्चाशत् । तेषां नामानि अग्रे वक्ष्यन्ते । आप्यतत्त्वानि षड्विंशतिः—पञ्च भूतानि पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि दश, तेषामर्था दश मन इति । शैवशाक्तभेदेन द्विपञ्चाशत् । तैजसतत्त्वानि एकत्रिंशत् —पञ्च भूतानि पञ्च तन्मात्राः ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि सार्थानि मन इत्येकत्रिंशत् । शिवशक्त्योर्वि-भागेन द्विषष्टिः । वायव्यतत्त्वानि सप्तविंशतिः महत्तत्त्वन्यूनपार्थिवतत्त्वानि ; शिवशक्तिविभागेन चतुः-पञ्चाशत् । दिवि षट्त्रिंशत्—शिवः, शक्तिः, सदाशिवः, ईश्वरः, शुद्धविद्या, माया, कला, विद्या, रागः, कालः, नियतिः, पुरुषः, प्रकृतिः, अहंकारः, बुद्धिः, मनः, ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, शब्दस्पर्शरूप-रसगन्धाः पञ्च, पञ्च भूतानीति । शिवशक्तिविभागतः द्विसप्ततिः । मानसतत्त्वानि द्वात्रिंशत् । तथा हि— परा चतुर्विधा—परा पश्यन्ती मध्यमा वैखरीति । इच्छा पञ्चविधा—कर्तुं कारयितुमुपकर्तुं प्रतिकर्तुमुदासितु-मिति । ज्ञाना चतुर्विधा । 'ज्ञानं द्विविधम्, सालम्बं निरालम्बं च । सालम्बं त्रिविधम्—ज्ञातृज्ञेयज्ञातिरूपेण । निरालम्बमपि त्वमहं त्वदीयं मदीयमिति चतुर्विधम्' इति योगिनीहृदये । क्रिया सप्तधा—इष्टं पूर्तं स्वाध्यायो जपः पूजा तपो दानमिति । कुण्डलिनी चतुर्विधा भूमिकाभेदेन— उन्मनीः लयः प्रत्यावृत्तिर्विश्रान्तिरिति । मातृकाऽष्टधा वर्गाष्टकभेदेन । एवं द्वात्रिंशत्तत्त्वानि मानसानि । एवं पार्थिवादितत्त्वरूपाः षष्ट्युत्तरत्रिशतं मरीचयः शांभवाः । तथा च कुब्जिकातन्त्रे— "आदौ परा चतुर्धा स्याद्द्वितीयेच्छा च पञ्चधा । तृतीया वेदधा ज्ञाना चतुर्थी सप्तधा क्रिया ॥ पञ्चमी कुण्डलीद्विधिः षष्ठी स्यान्मातृकाऽष्टधा । परातोऽजायतेच्छा हि सा च व्योमपतिः स्मृता ॥ षट्त्रिंशन्नायिकाः प्रोक्ता कण्ठस्थानसमाश्रिता । इच्छातो जायते ज्ञाना सा च वायोरधीश्वरा ॥ सप्तविंशतिरश्मीनां पतिः साऽनाहताश्रया । ज्ञानतोऽभूत्क्रिया व्यक्ता सा च वह्नीश्वरा मता ॥ एकत्रिंशद्रश्मिपतिः स्वाधिष्ठानं समाश्रिता । क्रियातः कुण्डली व्यक्ता सा स्यात्सलिलनायिका ॥ सप्तविंशतिरश्मीनां मणिपूरं समाश्रिता । कुण्डल्या मातृका जाता सा क्षितेरीश्वरी मता ॥ अष्टाविंशतिरश्मी-नामक्षीवाधारमाश्रिता । शिवशक्तिविभागेन द्विविधा शांभवाज्ञया ॥ षष्ट्युत्तर तु त्रिशतमेवं शंभुमरीचयः । परादिशक्तिभिः षड्भर्नायकैः सहिता पुनः । द्विसप्तत्यधिकं त्रीणि शतान्याहुर्मनीषिणः ॥ एषां स्मरणमात्रेण जीवन्मुक्तो महीं चरेत् । सर्वेषां स्मरणाशक्तः षट्सु चैकमथ स्मरेत् ॥ एतेषां स्मृतितो लोकः पापहा पूजनात्पुनः । लक्ष्मीवान्ध्यानतो जीवन्मुक्तो गरिमकुले वसेत् ॥' इति ॥ मूलाधारमध्ये अग्रे वक्ष्यमाणौ शिवौ पूज्यौ । एतयो रश्मयः,— १ उड्डीश्वरः, २ उड्डीश्वरी, ३ जलेश्वरः, ४ जलेश्वरी, ५ पूर्णेश्वरः, ६ पूर्णेश्वरी, ७ कामेश्वरः, ८ कामेश्वरी, ९ श्रीकण्ठः, १० गगना, ११ अनन्तः, १२ स्वरसा, १३ शंकरः, १४ मतिः, १५. पिङ्गलः, १६ पातालदेवी, १७ नारदाख्यः, १८ नादा, १९ आनन्दः, २० डाकिनी, २१ आलस्यः, २२ डाकिनी, २३ महानन्दः, २४ लाकिनी, २५ योग्यः, २६ काकिनी, २७ अतीतः, २८ शाकिनी, २९ पादः, ३० हाकिनी, ३१ आधारेशः, ३२ रक्ता, ३३ चक्रीशः, ३४ चण्डा, ३५ कुरङ्गीशः, ३६ कराला, ३७ मद्रथीशः, ३८ महोच्छुष्मा, ३९ अनादिविमलः, ४० मातङ्गी, ४१ सर्वज्ञ-विमलः, ४२ पुलिन्दा, ४३ योगविमलः, ४४ शम्बरी, ४५ सिद्धविमलः, ४६ वाचापरा, ४७ समयविमलः ४८ कुलालिका, ४९ मित्रेशः, ५० कुब्जा, ५१ उड्डीशः, ५२ लघ्वी, ५३ षष्ठीशः, ५४ कुलेश्वरी,

५५ चर्याधीशः, ५६ अजा ; सर्वत्र शिवे आनन्दनाथश्रीपादुकां पूजयामीति योजनीयम् । शक्तौ अम्बादेवीति पूजायाम् । एते पार्थिवरश्मयो मूलाधारे चतुर्दले पश्चिमादि प्रतिदल सप्तसप्तक पूर्यते । भाषयेद्वा । अथवा, शिरसि षट्कोणं विचिन्त्य पश्चिमादितो रश्मीनां चतुष्कं पञ्चक षट्क चतुष्कं पञ्चकं पुनश्चतुष्कमिति पूज्याः । तदुक्तं पद्यवाहिन्याम्— 'षट्कोणं शिरसि ध्यात्वा [illegible]ष्विनुक्रमात् । कोणेषु पूजयेदष्टाविंशकं च यथाक्रमात् ॥ चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चकं पुनः । चतुष्कमिति संभिन्नाः क्रमात्पार्थिवरश्मयः ॥' इति। भ्रूवौ वा विलिख्य पूजयेत् । इति पार्थिवरश्मयः । एतेन क्षितौ षट्पञ्चाशदिति व्याख्यातम् । अथाप्यरश्मयः मणिपूरे ; अत्र शांभवे स्वाधिष्ठानमणिपूरयोर्व्यत्ययः । रश्मयस्तु—१ सद्योजातः, २ माया, ३ वामदेवः, ४ श्रीः, ५ अघोरः, ६ पद्मा, ७ तत्पुरुषः, ८ अम्बिका, ९ अनन्तः, १० निवृत्तिः, ११ अनाथः, १२ प्रतिष्ठा, १३ जनाश्रितः, १४ विद्या, १५ अचिन्त्यः, १६ शान्ता, १७ शशिशेखरः, १८ उमा, १९ तीव्रः, २० गङ्गा, २१ मणिवाहः, २२ सरस्वती, २३ अम्बुवाहः, २४ कमला, २५ तेजोऽवीशः, २६ पार्वती, २७ विद्यावागीश्वरः, २८ चित्ता, २९ चतुर्विधेश्वरः, ३० सुकमला, ३१ उमागङ्गेश्वरः, ३२ मन्मथा, ३३ कृष्णेश्वरः, ३४ श्रिया, ३५ श्रीकण्ठः, ३६ लया, ३७ अनन्तः, ३८ सती, ३९ शंकरः, ४० रत्नमेखला, ४१ पिङ्गलः, ४२ यशोवती ४३ साध्याख्यः, ४४ हंसानन्दा, ४५ परदिव्यौघः, ४६ वामा, ४७ मारदिव्यौघः, ४८ ज्येष्ठा, ४९ पीठौघः, ५० रौद्री, ५१ सर्वेश्वरः, ५२ सर्वमयी ; एते आप्यरश्मयो मणिपूरे षड्दलेषु पूज्याः चतुष्कं चतुष्कं षट्कं चतुष्कं पञ्चकं त्रिकमिति । तदुक्तं पद्यवाहिन्याम्—'चतुष्कं च चतुष्कं च षट्कं भूयश्चतुष्ककम् । पञ्चकं त्रिकमित्येव भिन्ना जलमरीचयः ॥' इति। पूर्ववच्छिरसि वा भ्रूवौ वा पूजयेत् । इत्याप्यमरीचिप्रपञ्च. । एतेन द्विसप्तधिकपञ्चाशदुदक इति व्याख्यातम् । अथ तैजसरश्मयः—१ परापरः, २ चण्डेश्वरः, ३ परमः ४ चतुष्मती, ५ तत्परः, ६ गुह्यकाली, ७ अपरः, ८ संवर्ता, ९ चिदानन्दः, १० नीलकुब्जा, ११ अघोरः, १२ गन्धा, १३ समरसः, १४ रसा, १५ ललितः, १६ स्मरा, १७ स्वच्छः, १८ स्पर्शः, १९ भूतेश्वरः, २० शब्दः, २१ आनन्दः, २२ डाकिनी, २३ आलस्यः, २४ रत्नडाकिनी, २५ प्रभानन्दः, २६ चक्रडाकिनी, २७ योगानन्दः, २८ पद्मडाकिनी, २९ अतीतः, ३० कुब्जडाकिनी, ३१ स्वादः, ३२ प्रचण्डडाकिनी, ३३ योगेश्वरः, ३४ चण्डा, ३५ पीठेश्वरः, ३६ कोशला, ३७ कुलकोलेश्वरः, ३८ पावनी, ३९ कुक्षेश्वरः, ४० समया, ४१ श्रीकण्ठः, ४२ कामा, ४३ अनन्तः, ४४ रेवती, ४५ शंकरः, ४६ ज्वाला, ४७ पिङ्गलः, ४८ कराला, ४९ मदाख्यः, ५० कुब्जिका, ५१ कालरात्रीगुरुः, ५२ परा, ५३ सिद्धगुरुः, ५४ शान्त्यतीता, ५५ रत्नगुरुः, ५६ शान्ता, ५७ शिवगुरुः, ५८ विद्या, ५९ मेलगुरुः, ६० प्रतिष्ठा, ६१ समयगुरुः, ६२ निवृत्तिः ; एते स्वाधिष्ठाने दले पश्चिमादिनवदले पुत्रिकात्रिकक्रमेण पूजयित्वा दशदले चतुष्कं पूजयेत् । षट्कोणपूजायां पञ्चकं पञ्चकं षट्कं चतुष्कं पञ्चकं षट्कमिति पूजयेत् । तदुक्तं पद्यवाहिन्यां चतुर्थाह्निके—'पञ्चकं पञ्चकं षट्कं चतुष्कं पञ्चकं पुनः । षट्कमित्थं क्रमाद्भिन्नास्तैजसक्रमरश्मयः ॥' इति । एतेन हुताशे द्वाषष्टिरिति व्याख्यातम् । अथ वायव्यमरीचयः—१ खगेश्वरः, २ भद्रा, ३ कूर्मः, ४ आधारा, ५ मेषः, ६ कोशा, ७ मौनः, ८ मल्लिका, ९ ज्ञानः, १० विमलः, ११ महानन्दः, १२ शर्वरी, १३ तीव्रः, १४ लीला, १५ प्रियः, १६ कुमुदा, १७ कौलिकः, १८ मेनका, १९ डामरः, २० डाकिनी, २१ रामः, २२ राकिनी, २३ लामरः, २४ लाकिनी, २५ कामरः, २६ काकिनी, २७ सामरः, २८ साकिनी, २९ हामरः, ३० हाकिनी, ३१ आधारेशः, ३२ राका, ३३

चक्रीशः, ३४ बिन्दुः, ३५ कुक्कुरः, ३६ कुला, ३७ मयश्रीशः, ३८ कुब्जिका, ३९ हृदीशः, ४० कामकला, ४१ शिरसः, ४२ कुलदीपिका, ४३ शिखेशः, ४४ सर्वेशा, ४५ वर्मा, ४६ बहुरूपा, ४७ अस्त्रेशः, ४८ महत्तरी, ४९ परगुरुः, ५० मङ्गला, ५१ पराविगुरुः, ५२ कोशटा, ५३ पूज्यगुरुः, ५४ रामा; एते अनाहते द्वादशदले पद्मे पश्चिमादि पूज्याः । तृतीयषष्ठनवमदलेषु त्रिकं त्रिकमन्येषु द्वयं द्वयम। अथ वा, प्रथमान्त्यषष्ठयोस्त्रिकं वा, चतुष्कम, अन्येषु द्वयं द्वयमिति। षट्कोणे पूजायां चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चक त्रिकमिति पूजयेत्; भूमौ वा। तदुक्तं पद्यवाहिन्यां तृतीयाह्निके—'चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चकं त्रिकम्। इति क्रमेण भिन्नाः स्युर्वायवीया मरीचयः ॥' इति। एतेन चतुरधिकपञ्चाशदनिल इति व्याख्यातम्। अथ नाभसाः—१ हृदयः, २ कौलिकी, ३ धरः, ४ कान्ता, ५ भोगः, ६ विश्वा, ७ भयः, ८ योगिनी, ९ महा १० ब्रह्मसारा, ११ शवः, १२ शबरी, १३ द्रवः, १४ कालिका, १५ रसः, १६ जुष्टचण्डाली, १७ मोहः, १८ अघोरेशी, १९ मनोभयः, २० हेला, २१ केकः, २२ महारक्ता, २३ ज्ञानगुह्यः, २४ कुब्जिका, २५ खरः, २६ डाकिनी, २७ ज्वलनः, २८ शाकिनी, २९ महाकुलः, ३० लाकिनी, ३१ भियोज्ज्वलः, ३२ काकिनी, ३३ तेजः, ३४ शाकिनी, ३५ मूर्धा, ३६ हाकिनी, ३७ वायुः, ३८ णपक्षी, ३९ कुलः ४० सिंहः, ४१ संहारः, ४२ कुलाम्बिका, ४३ विश्वंभरः, ४४ कामा, ४५ कौटिलः, ४६ कूलमाता, ४७ गालवः, ४८ कङ्काली, ४९ व्योमः, ५० व्योमा, ५१ श्वसनः, ५२ नादा, ५३ खेचरः, ५४ महादेवी, ५५ बाहुलः, ५६ महत्तरी, ५७ तातः, ५८ कुण्डलिनी, ५९ कुलातीतः, ६० कुलेशी, ६१ अजः, ६२ ईधिका, ६३ अनन्तः, ६४ दीपिका, ६५ एषः, ६६ रेचिका, ६७ शिखः, ६८ मोचिका, ६९ परमः, ७० परा, ७१ परः, ७२ चित्; एते विशुद्धिषोडशदले पूज्याः। आद्यन्तदलयोस्त्रिकं त्रिकम, अन्येषु दलेषु द्वयं द्वयमिति। षट्कोणपक्षे प्रतिकोणेषु षट्कं षट्कं पूजयेत्। तदुक्तं पद्यवाहिन्यां तृतीयाह्निके—'षट्कं षट्कं पुनः षट्कं षट्कं षट्कं पुनश्च तत्। इति क्रमात्समुद्दिष्टा नाभसा दिव्यरश्मयः। साधकेन समभ्यर्च्यो मध्ये देवो यथाविधि ॥' इति। इति नाभसरश्मिप्रपञ्चः। अथ मानसरश्मयः—१ पटः, २ परा, ३ भरः, ४ भरा, ५ चित्, ६ चित्परा, ७ महामाया, ८ महामायापरा, ९ सृष्टिः, १० सृष्टिपरा, ११ इच्छा, १२ इच्छापरा, १३ स्थितिः, १४ स्थितिपरा, १५ निरोधः, १६ निरोधपरा, १७ मुक्तिः, १८ मुक्तिपरा, १९ ज्ञानः, २० ज्ञानपरा, २१ सत्, २२ सतीपरा, २३ असत्यः, २४ असतीपरा, २५ सदसत्, २६ सदसतीपरा, २७ क्रिया, २८ क्रियापरा, २९ आत्मा, ३० आत्मपरा, ३१ इन्द्रियाश्रयः, ३२ इन्द्रियाश्रयपरा, ३३ गोचरः, ३४ गोचरापरा, ३५ लोकमुख्यः, ३६ लोकमुख्यापरा, ३७ वेदवत्, ३८ वेदवत्परा, ३९ सवित्, ४० संवित्परा, ४१ कुण्डलिनी, ४२ कुण्डलिनीपरा, ४३ सौषुम्नी, ४४ सौषुम्नीपरा, ४५ प्राणसूत्रः, ४६ प्राणसूत्रपरा, ४७ स्यन्दः, ४८ स्यन्दपरा, ४९ मातृकः, ५० मातृकापरा, ५१ स्वरोद्भवः, ५२ स्वरोद्भवापरा, ५३ वर्णजः, ५४ वर्णजापरा, ५५ शब्दजः, ५६ शब्दजापरा, ५७ वर्णज्ञातः, ५८ वर्णज्ञातापरा, ५९ वर्गजः, ६० वर्गजापरा, ६१ संयोगः, ६२ संयोगजापरा, ६३ मन्त्रविग्रहः, ६४ मन्त्रविग्रहापरा इति मानसरश्मयः आज्ञायां द्विदले पूज्याः। चतुष्कं च चतुष्टय वामदले, चतुष्कं चतुष्टयं दक्षिणदले। षट्कोणपक्षे चतुष्कं पञ्चकं चतुष्कं सप्तकं चतुष्कमष्टकमिति। तदुक्तं पद्यवाहिन्यां प्रथमाह्निके—'चतुष्कं पञ्चकं चैव चतुष्कं सप्तकं पुनः। चतुष्कमष्टकं चेति क्रमान्मानसरश्मयः ॥' इति। मूलाधारादिचक्रेषु पूजयेद्वा प्रकारतः। रश्मिपूजा-

कृतसोपानाद्यभेदाध्यवसायादुत्प्रेक्षा। न च रेखायमाणमित्यत्र जाह्नव्यामित्यत्र चोपमा, पुरत्रयविजयसूचनार्थकृतरेखात्रयललाटादित्यकान्तरुद्रजाह्नव्याश्चानसिद्धेः, उपमानप्रसिद्धावेवोपमालंकार इत्यालंकारिकसमयात्। अत एव विद्यानाथेन — उपमालक्षणे उत्प्रेक्षाव्यावृत्तये स्वतः सिद्धेनेत्युपमानविशेषणमुपात्तम्। अलंकारभेदनिरूपणप्रस्तावे चोपमानस्य प्रसिद्धत्वाप्रसिद्धत्वाभ्यामुपमोत्प्रेक्षयोर्भेद इति चोक्तम्। न च रेखायमाणमित्यत्र क्यङनुपपत्तिः, रेखाया अप्रसिद्धत्वेऽप्युपमानत्वानपायाद्विशेषस्य तत्रानुपादानात्। तासां चोत्प्रेक्षाणामुडुपरुक्पाण्डरमित्युपमायामङ्गेन संकरः ॥ ८ ॥

कुध्यद्गौरीप्रसादानतिसमयपदाङ्गुष्ठसंक्रान्तलाक्षा-
बिन्दुस्पर्धि स्मरारेः स्फटिकमणिदृषन्मग्नमाणिक्यशोभम्।
मूर्ध्न्युद्यद्दिव्यसिन्धोः पतितशफरिकाकारि वो मास्तकं स्ता-
दस्तोकापत्तिकृत्यै हुतवहकणिकामोक्षरूक्षं सदाऽक्षि ॥ ३ ॥

स्फटिकान्तःस्थमाणिक्यशोभ ललाटवीक्षणम्।
मूर्धस्थगङ्गापतितमीनाभं वर्ण्यते विभोः ॥

कुध्यदिति ॥ कुध्यन्त्याः प्रणयकलहकाले कुप्यन्त्याः गौर्याः प्रसादः प्रसन्नता, तस्य आनतिस्तत्करुणाभूता नमस्क्रिया; हेतुहेतुमद्भावसंबन्धे षष्ठ्याः समासः। न च तादर्थ्ये चतुर्थ्याः समासोऽस्तीति वाच्यम्, प्रकृतिविकारभाव एव तन्नियमनात्। अत एवाश्वघासादयः षष्ठीसमासा इति सिद्धान्तः। अथवा, गौरीं प्रसादयतीति गौरीप्रसादी तदेर्ण्यन्तात् 'कर्मण्यण्' इत्यण्, 'टिड्ढाणञ्' इत्यादिना ङीप्। सा चासावानतिश्चेति कर्मधारयः। 'स्त्रियाः पुंवत्' इत्यादिना पुंवद्भावः। तस्या आनतेः समये पदाङ्गुष्ठेन नमस्क्रियमाणपार्वतीपदाङ्गुष्ठेन संक्रान्तायाः संलग्नाया लाक्षाया अलक्तकस्य बिन्दुना स्पर्धत इति तथोक्तम्। तद्वद्भासमानमित्यर्थः। किं च, स्फटिकमणिदृषदि स्फटिकरत्नशिलायां मग्नस्य माणिक्यस्य लोहितमणेः शोभेव शोभा यस्य तत्तथोक्तम्। मूर्ध्नि शिरसि उद्यन्त्याः प्रसरन्त्या दिव्यसिन्धोर्मन्दाकिन्याः स्वकाशात्पतितायाः शफरिकायाः मीनप्रियायाः आकार आकृतिः सोऽस्यास्तीत्याकारि, तदाकारसदृशमित्यर्थः। हुतवहस्याग्नेः कणिकानां कणानामा-

मोक्षणेनासञ्जनेन रूक्षं तीक्ष्णं मास्तकम्, लक्ष्यते यत्तकाधःस्थितललाटस्थितं स्मरारेः शिवस्याक्षि मदा वो युष्माकम्, अस्तोकाजामनस्कानामापदां क्षत्यै विघाताय स्याद्भवेत्। उपमालंकारः। शफरिकाकारीत्यत्र पदार्थवृत्तिनिदर्शना; नेत्रे शफर्याकारस्यासंभवेन, तत्र तत्सदृशाकाराक्षेपात्; 'अन्यस्यान्यधर्मासंभवात्तत्र तत्सदृशधर्माक्षेपः पदार्थवृत्तिनिदर्शना' इति लक्षणात् ॥ ३ ॥

भूत्यै दृग्भूतयोः स्याद्यदहिमहिमरुग्बिम्बयोः स्निग्धवर्णो
दैत्यौघध्वंसशंसी स्फुटति परिवेषाद्यशेषो विभाति।
सर्गस्थित्यन्तवृत्तिर्मयि समुपगतीव निर्वृत्तगर्वं
शर्वाणीभर्तुरुच्चैर्युगलमभिदधद्विभ्रमं[1] तद्भ्रुवोर्वः ॥ ४ ॥

नेत्रभूतार्केन्दुबिम्बपरिध्यर्थमिव स्फुरत्।
दैत्येन्द्रविध्वंसशंसि भ्रूयुगं वर्ण्यते विभोः ॥

भूत्या इति ॥ सर्गस्थित्यन्तवृत्तिः सृष्टिस्थितिसंहारव्यापारः मयि समुपगता सम्यक्प्राप्ता सृष्ट्यादिहेतुत्वमपि मयि प्राप्तमित्यर्थः। इति-शब्दो हेत्वर्थे, 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः। अस्माद्धेतोरित्यर्थः। निर्वृत्तगर्वं निष्पन्नाहंकारमिवोच्चैरुन्नतं विभ्रमं विलासमभिदधत् बिभ्रत् शर्वाणीभर्तुः परमेश्वरस्य भ्रुवोर्युगलं युग्मम्, दृग्भूतयोर्नेत्रभूतयोः, अहिमहिमरुचोरर्कचन्द्रयोर्बिम्बयोर्मण्डलयोः स्निग्धवर्णः कान्तिमान् सान्द्रवर्णः, दैत्यानामोघस्य समूहस्य ध्वंसशंसी नाशशंसनशीलः, 'सुप्यजातौ' इत्यादिना ताच्छील्ये णिनिः। परिवेषस्यावशेषोऽर्ध इवेत्युत्प्रेक्षा। स्फुटं विभाति, तद्भ्रुयुगं वो भूत्यै संपदे स्याद्भवेत्; प्रार्थनायां लिङ्। अत्र यद्यप्यभिदधदित्येतत्पदं कथनार्थपरत्वेन प्रसिद्धम्, धारणार्थपरत्वेन प्रयुक्तमसमर्थत्वदोषदुष्टमन्यार्थदोषदुष्टं वा; 'योगमात्रप्रयुक्तं यदसमर्थं तदुच्यते। यद्बुद्धिप्रच्युतं नाम तदन्यार्थमुदाहृतम् ॥' इति तयोर्दोषयोर्लक्षणात्; तथाऽपि महाकविप्रयुक्तत्वान्न दोषः। न च कथनार्थमेवात्रेति वाच्यम्। भ्रूयुगलयोः विलासकथनस्यानुपलम्भेनाबाधितत्वात्। न च [illegible], उत्प्रेक्षावाचकाभावात्। न च

1. ०युगलमथ दधद्विभ्रमं

गम्योत्प्रेक्षाऽस्तु, निमित्तस्योपादाने गम्योत्प्रेक्षाया अयोगात् ; विलासकथने निमित्तस्यात्रानुपादानात् ; तस्मादुक्तमेव समाधानं बोध्यम् । अत्र भ्रुवोरौन्नत्यं विलासवत्त्वं च स्वत एव, न तत्र मदादिव्यापारप्राप्तिजनिताहंकारो हेतुरित्यहेतोस्तस्य तद्धेतुत्वेनोत्प्रेक्षणाद्धेतूत्प्रेक्षा । वस्तुतस्तादृगहंकारस्तयोर्न सिद्ध इत्यसिद्धावेषया इव-शब्दप्रयोगाद्वाच्या । तस्या उक्तवस्तूत्प्रेक्षायाश्च संसृष्टिः ॥ ४ ॥

युग्मे रुक्माब्जपिङ्गे रह इव विहिते द्राग्ययोः प्राग्दुहित्रा
शैलस्य [1]ध्वान्तनीलाम्बररुचिरबृहत्कञ्चुकोऽन्तःप्रपञ्चः ।
[2]त्र्यक्षस्यैते पवित्रे त्रिदशवरघटाऽमित्रजैत्रोग्रशस्त्रे
नेत्रे वेत्रे भवेतां द्रुतमिह भवतामिन्द्रियाश्वान्नियन्तुम् ॥ ५ ॥

दुर्जयामरविद्वेषिविध्वंसनपटीयसी ।
शस्त्रे नेत्रे पुरारातेरस्तां भवतः सदा ॥

युग्म इति । रुक्माब्जपिङ्गे सौवर्णपद्मवत्पिङ्गे ययोर्नेत्रयोर्युग्मे शैलस्य हिमवतो दुहित्रा पुत्र्या पार्वत्या प्राक्पूर्वं रह इव सुरतादिकाले एकान्तदेश इव कदाचिल्लीलार्थं नेत्रयोः सूर्यचन्द्रात्मकपरीक्षार्थं वा द्राक् शीघ्रं पिहिते इति श्लेषः स्थावरजङ्गमात्मकं जगत् ध्वान्तनीलाम्बररुचिरबृहत्कञ्चुकः ध्वान्तमन्धकार एव नीलाम्बरस्य नीलवस्त्रस्य रुचिरो मनोहरो बृहत्कञ्चुको यस्य तथोक्तः, नीलवस्त्रनिर्मितबृहत्कञ्चुकेनाच्छादितमिव गाढान्धकारसंवृतं जगदभूदित्यर्थः । पवित्रे सूर्यचन्द्रात्मकत्वात्पवने त्रिदशवराणां देवश्रेष्ठानां घटा समूहस्तस्या अमित्राणां शत्रूणां राक्षसानां जैत्रे जयशीले उग्रे रौद्रे शस्त्रे शस्त्ररूपे त्र्यक्षस्य त्रिनेत्रस्य, एते नेत्रे इह संसारे वर्तमानानां भवतां द्रुतं शीघ्रम्, इन्द्रियाण्येव अश्वास्तान्नियन्तुं निगृहीतुं वेत्रे भवेताम् । अत्र घटाशब्दो गजसमूहवाची, न समूहसामान्यवाची । तथा च तेन देवसमूहाभिधानं कथमिति चेत्, सत्यम् ; तथाऽप्यर्थविशेषव्यञ्जनार्थं तदुपादानम् । तथा च गजसमूहवाचिना घटाशब्देन देवानां गजत्वेन निरूपणं राक्षसानां सिंहत्वेन निरूपणमवगम्यत इति वस्तुनो अलंकारध्वनिः । तेन च तथा दुर्जयानां राक्षसानां

1. ध्वान्तनीलाम्बररचित• 2. ते त्रैनेत्रे

वधमपि रौद्रदृष्टिमात्रेण कृतवान् शिव इति तस्य सर्वातिशायी महिमा गम्यत इत्यलंकारेण वस्तुध्वनिश्च। यद्वा घटा घटना गोष्ठी च, 'घटः कुम्भे समर्थे च घटा तु गजबृंहतौ। घटनायां च गोष्ठ्यां च' इति भास्करः। गोष्ठी च सभा, तथा च देववरघटनाप्रभाविघातकराक्षसजैत्ररौद्रास्त्ररूपे इत्यर्थः। अत्रापि राक्षसानां देववरघटनाविघातकत्वोक्त्याऽन्योन्यं संबध्य सभां कृत्वाऽवस्थितौ प्रकाशे सति राक्षसाः पश्येयुरिति भीत्या यत्र कुत्रापि निलीय प्रच्छन्नवासार्थं त्रिधा मेलनं गोष्ठीं चाकृत्वा देवतास्तिष्ठन्तीति देवतानामतिकष्टम्, राक्षसानामत्यौद्धत्यम्, तादृशानपि तान्नायासेन संहृतवत शिवस्य विश्वातिशायी महिमा च ध्वन्यते ॥ ५ ॥

चण्डीवक्त्रार्पणेच्छोस्तदनु भगवतः [1]चण्डरुक्पाण्डुगण्ड-
[2]प्रोद्यत्कण्डूर्विनेतुं विनतुत इव ये रत्नकोणैर्विघृष्टिम्।
चण्डार्चिर्मण्डलाभे सततनतजनध्वान्तखण्डातिशौण्डे
चाण्डीशे ते [3]श्रियः स्तामधिकसवनताखण्डले कुण्डले वः ॥

गण्डयोः कण्डूपाकृत्या इव तद्धर्षणे विभोः।
कुण्डले रत्नकोणैर्ये ते देयास्तां शुभानि वः॥

चण्डीति। तदनु तदनन्तरम्, अस्य पदस्य कुण्डले इत्यत्रान्वयः। चण्डीवक्त्रार्पणेच्छोः वक्त्रस्य मुखस्यार्पणं समर्पणं वक्त्रार्पणं चण्ड्याः पार्वत्या वक्त्रार्पणं चण्डीवक्त्रार्पणम्, 'मृडानी चण्डिकाऽम्बिका' इत्यमरः। तत्कर्तृकं वक्त्रार्पणमित्यर्थः। 'कर्तृकर्मणोः कृति' इति कर्तृषष्ठ्याः 'कृद्योगलक्षणा षष्ठी' इति संज्ञायाः। तदिच्छोश्चुम्बनार्थमिति भावः। भगवतः परमेश्वरस्य संबन्धिनी ये कुण्डले चण्डरुक् सूर्य इव पाण्डू पीतसंवलितश्वेतवर्णौ, 'हरिणः पाण्डरः पाण्डुः' इत्यमरः। 'पाण्डुस्तु पीतभागार्धः केतकीधूलिसंनिभः' इति शब्दार्णवे। तादृश्योर्गण्डयोः प्रोद्यत्कण्डूः येन केनापि हेतुनोत्थिताः कण्डूतीर्विनेतुमपनेतुं रत्नकोणैः स्वप्रत्युप्तानां रत्नानां कोणैरग्रैः विघृष्टिं विघर्षणं विनतुत इव स्थिते इत्युत्प्रेक्षा। सा च गण्डयोः कुण्डलान्दोलनस्य तत्संयोगरूपधर्मसंबन्धेन निमित्तेन गण्डकण्डू-

1. पाण्डुरुक्० 2. प्रोद्यत्कण्डूं 3. श्रिये स्ता०

त्यपनयहेतुभूतरत्नकोणघर्षणक्रियात्वेनोत्प्रेक्षणाद्वस्तूत्प्रेक्षा ; विषयस्यान्दोलनस्यानुपादानादनुक्तविषया च । चण्डार्चिषः सूर्यस्य यन्मण्डलं तस्याभेदेन या यथोक्तथोक्त इत्युपमा । सततमजस्रम्, नतजनस्य नमस्कृतवतो जनस्य भक्तजनस्य ध्वान्तमज्ञानतमः, तस्य खण्डने अतिशौण्डेऽतिसमर्थे, अवनताखण्डले अवनतो नमस्कृतवानाखण्डल इन्द्रो याभ्यां तथोक्त इति चतुर्थीबहुव्रीहिः । चाण्डीशे चण्डीशस्य इमे एत कुण्डले अधिकमत्यर्थं वो युष्माञ् श्रियास्तां पुष्यास्ताम्, 'डुभृञ् धारणपोषणयोः' इत्यस्मादाशार्षिङ्. 'रिङ्शयग्लिङ्क्षु' इति रिङादेशः । वृत्त्यनुप्रासालंकारेणोपमोत्प्रेक्षयोः संसृष्टिः ॥ ६ ।

खट्वाङ्गोदग्रपाणेः स्फुटविकटपुटो वक्त्ररन्ध्रप्रवेश-
प्रेप्सूदञ्चत्फणोरुश्वसदतिधवलाहीन्द्रशङ्कां दधानः ।
युष्माकं कम्रवक्त्राम्बुरुहपरिलसत्कर्णिकाकारशोभः
[1]शश्वत्प्राणाय भूयाद्बलमतिविमलोत्तुङ्गकोणः स घोणः ॥

मुखरन्ध्रप्रवेशेच्छुः फणीव परमेशितुः ।
मुखाब्जकर्णिकाशोभो घोणः प्राणर्द्धयेऽस्तु वः ॥

खट्वाङ्गेति । खट्वाङ्गमुदग्रे उन्नते पाणौ यस्य तस्य तथोक्तस्य महेशस्य संबन्धी 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः' इति वक्तव्यत्वात्पाणिशब्दस्य परनिपातः । स्फुटविकटपुटः स्फुटं स्पष्टं विकटे विशाले रम्ये वरपुटे यस्य तथोक्तः । 'विकटः पृथुले रम्ये विशालविकरालयोः' इति भास्करः । वक्त्रस्य मुखस्य रन्ध्रं तस्य यः प्रवेशस्तस्य प्रेप्सया इच्छया उदञ्चन्नुद्गच्छन् फणो यस्य तस्य तथोक्तस्य, उरुश्वसतः उर्वधिकं श्वसत उच्छ्वासनिःश्वासक्रिये कुर्वतः, अतिधवलस्यातिस्वच्छस्याहीन्द्रस्य शङ्कां संभावनां दधानः पुष्णात्विवेत्युत्प्रेक्षा । कम्रं कान्तिकरं शोभाकरम् ; 'नामिकम्पि' इत्यादिना कमेः रप्रत्ययः । तस्य वक्त्राम्बुरुहस्य मुखपद्मस्य परिलसन्त्याः कर्णिकाया आकारेण शोभत इति तथोक्तः । रूपकमलंकारः । 'शुभ शुम्भ शोभायाम्' इति ण्यन्तात्पचाद्यच् अतिविमल उत्तुङ्ग उन्नतः

1. शश्वत्राणाय

कोणो नासाग्रं यस्य सः, घोणो नासिका युष्माकमलमत्यन्तं प्राणाय बलाय भूयात्। 'प्राणोऽभून्मारुते बाले काव्यजीवेऽनिले बले। पुंलङ्ग पूरिते वाच्यलिङ्गः पुंभूम्नि चासुषु।' इति सुधाकरः ॥ ७ ॥

क्रुध्यत्यद्धा यथोः स्वां ननु मतिलसतोर्बिम्बितां लक्षयन्ती
भर्त्रे स्पर्धासिनिघ्ना मुहुरितरवधूशङ्कया शैलकन्या।
युष्मांस्तौ शश्वदुच्चैरबहुलदशमीशर्वरीशातिशुभ्रा-
वव्यास्तां दिव्यसिन्धोः कमितुरवनमल्लोकपालौ कपोलौ ॥

अत्यच्छादर्शवद्बिम्बग्राहि गण्डयुगं विभोः।
शुक्लपक्षस्थदशमीन्द्वाभं स्तां भवतां मुदे ॥

क्रुध्यतीति। शैलकन्या पार्वती अतिलसतोरतिमात्रं विराजतोर्ययोः कपोलयोः बिम्बितां प्रतिबिम्बितां स्वां स्वकीयां ननु, 'स्वो ज्ञातात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः। मुहुः पुनः पुनः लक्षयन्ती पश्यन्ती सती इतरवधूशङ्कया अन्यस्त्रीभ्रान्त्या स्पर्धासिनिघ्ना स्पर्धायामत्यन्तमधीना अस्पर्धापरवशा सती, 'अधीनो निघ्न आयत्तः' इत्यमरः। भर्त्रे पत्ये शिवाय क्रुध्यति कुप्यति, अद्धा सत्यम्। 'क्रुधद्रुह...' इत्यादिना भर्तुः संप्रदानत्वाच्चतुर्थी। उच्चैरतौ अबहुलदशमीशर्वरीशातिशुभ्रौ शुक्लपक्षदशमीचन्द्र इवात्यन्तनिर्मलौ अवनमन्तौ लोकपाला यौ तौ तथोक्ताविति द्वितीयाबहुव्रीहिः। दिव्यसिन्धोः गङ्गायाः कमितुः पत्युः शिवस्य तौ कपोलौ शश्वत्सदा 'पुनःसदार्थयोः शश्वत्' इत्यमरः। युष्मान् अव्यास्तां रक्षताम्। अत्र पौर्णमासीचन्द्रस्य पूर्णमण्डलत्वेन स्फुटप्रतीयमानकलङ्कत्वादशमीचन्द्रस्य किंचिन्न्यूनपूर्णमण्डलस्य तदभावात् कपोलयोस्तत्सादृश्यमुक्तमिति बोध्यम् ॥ ८ ॥

यो भासा भात्युपान्तस्थित इव [1]निभृतः कौस्तुभो [2]द्रष्टुमिच्छुः
सोत्थस्नेहान्नितान्तं गलगतगरलं पत्युरुच्चैः पशूनाम्।

1. निभृतं 2. द्रष्टुमिच्छन्

प्रोद्यत्प्रेम्णा यमाद्रीं पिबति गिरिसुता संपदः सातिरेका
लोकाः शोणीकृतान्ता यदरुणमहसा सोऽधरो वो विधत्ताम् ॥

सोदर्येक्षेच्छयाऽभ्यर्णस्थकान्तुभ इव स्फुरन् ।
स्वभासा शोणितजगत्पुरारर्वण्यैतेऽवर. ॥

य इति पशूनां पत्युः शिवस्य योऽधरः, उच्चैरुन्नत गलगतगरलं कण्ठगतविषं सोत्थस्नेहात् सहोत्तिष्ठतीति सोत्थः उन्नेरापः क्षीराब्धौ संभवात्, 'तुपि स्थः' इति कप्रत्ययः । अथ वा, सह उत्थानं सहोत्थ, सुपीति योगविभागात् स्थ इति भावे कप्रत्ययः । सह उत्थं यस्य सः सोत्थः; सहोदर इत्यर्थः । 'गोपसर्जनस्य' इति सहस्य समावः । पृषोदरादिषु वाऽयं द्रष्टव्यः । तस्मिन् स्नेहात् नितान्तमतिमात्रं द्रष्टुमिच्छुः; अत एव निभृतो निश्चलः, उपान्तस्थितः सहोदरगरलसमीपांस्थितः कौस्तुभ इव कान्त्युत्प्रेक्षा । भासा कान्त्या भाति । गिरिसुता पार्वती प्रोद्यता प्रकटेन प्रेम्णा आर्द्रा सरसान्तःकरणेत्यर्थः; यं पिबति । लोकाः यदरुणमहसा यस्याधरस्यारुणकान्त्या, 'अव्यक्तरागस्त्वरुणः' इत्यमरः । शोणीकृता अन्ता मध्यप्रदेशा येषां ते तथोक्ता भवन्तीति शेषः । 'शोणः कोकनदच्छविः' इत्यमरः । तद्गुणालंकारः, 'स्वकीयगुणतिरोधाय अन्यदीयगुणाहरणं तद्गुणः' इति लक्षणात्। सोऽधरो वो युष्मभ्यं सातिरेका अतिशयिताः संपदः विधत्तां कुरुताम् ॥ ९ ॥

अत्यर्थं राजते या [2]वदनशशधरादुच्चरच्चारुवाणी-
पीयूषाम्भःप्रवाहप्रसरपरिलसत्फेनपुञ्जावलीव[3] ।
देयात्सा दन्तपङ्क्तिश्चिरमिह दनुदायाददर्पारिकस्य
[4]दीप्त्या दीप्तेन्दुकुन्दच्छविरतिशयितां[5] प्रोन्नताभा मुदं वः ॥ १० ॥

मुखे मन्दोच्चरद्वाणीपीयूषाम्भःप्रवाहगा ।
फेनावलीवेशदन्तपङ्क्तिर्वो भवतां मुदे ॥

---

1. यदधरमहसा 2. वदनशशधरादुद्गलच्चा० 3. °फेनविच्छावलीव 4. द्युत्या
5. °च्छविरमलतर०

अत्यर्थमिति । दनोर्दायादः पुत्रो बाणासुरः 'दायादौ सुतबान्धवौ' इत्यमरः । तस्य दौवारिको द्वारे नियुक्तः; 'तत्र नियुक्तः' इति आग्रहतीयष्ठक्, 'द्वारादीनां च' इत्यैजागमः । तस्य शिवस्य या दन्तपङ्क्तिः वदनशशधरान्मुखचन्द्रात् उच्चरन्ती निर्गच्छन्ती चारुर्मनोहरा या वाणी सैव पीयूषाब्धेः सुधाम्बु तस्य यः प्रवाहस्तस्य प्रसरेण परिस्फूर्त्या परिलसन्ती समन्ताच्छोभमाना फेनानां पुञ्जस्यावली पङ्क्तिरिवेत्युत्प्रेक्षा । सा च वदनचन्द्रादेरूपकेणाङ्गेन संकीर्णा । अत्यर्थमतिमात्रं राजते । दीप्त्या कान्त्या दीप्तयोः कान्तिमतोरिन्दुकुन्दयोश्चन्द्रमाध्यपुष्पयोः छवेरिव च्छविर्यस्याः सा इत्युपमा । प्रोन्नतान्यग्राणि यस्याः सा तथोक्ता सा दन्तपङ्क्तिरिहास्मिँल्लोके, इदमुपलक्षणम्; अमुत्र च वो युष्मभ्यं चिरमभिततरामत्युत्कृष्टामपरिच्छिन्नां च मुदं देयात् । इहात्युत्कृष्टां मुदममुत्रापरिच्छिन्नानन्दरूपं मोक्षं च देयादित्यर्थः ॥ १० ॥

न्यक्कुर्वन्नुर्वराभृन्निभघनसमयोद्धुष्टघोघर्घघोषं
[1]स्फूर्जद्वाद्योत्थितोरुध्वनिमपि परब्रह्मभूतो गभीरः ।
सुव्यक्तो व्यक्तसूतेः प्रकटितकरणः शाश्वतोऽथस्य सत्यः
प्रीत्या वः [2]संविदध्यात्फलविकलमलं जन्मनाधः[3] स नादः ॥

प्रणवात्मा परब्रह्मभूतो भवनिवारणः ।
आविर्भूतः शिवमुखान्नादोऽस्त्वक्षय्यसौख्यदः ॥

न्यक्कुर्वन्निति । उर्वरां भूमिं बिभ्रतीत्युर्वराभृतः पर्वतास्तत्संनिभास्तत्सदृशा घना मेघास्तेषां समये वर्षर्तौ उद्धुष्टा उद्धुष्टवन्तः; उद्धुष्टघोषवन्त इत्यर्थः । 'घुषिर् अविशब्दने' इति भौवादिकादवर्धकात् 'गत्यर्थ...' इत्यादिना कर्तरि क्तः । 'घुषिरविशब्दने' इति निष्ठायाः इडभावः । तादृशानां मेघानां ओघस्य समूहस्य घोषम्, किं च, स्फूर्जद्वज्रनिर्घोषमिव घोषं कुर्वत्, 'टु ओ स्फूर्जा वज्रनिर्घोषे' इत्यस्माद्धातोर्लटः शत्रादेशः । ततादिचतुर्विधं यद्वाद्यं तस्मादुत्थितमुरु अधिकं ध्वनितं ध्वनिमपि, 'ध्वन शब्दे' इत्यस्माद्धातोर्भावे क्तः । न्यक्कुर्वन् तिरस्कुर्वन् परब्रह्मभूतः परब्रह्मभावं प्राप्तः

---

1. स्फूर्जद्वार्थ्युत्थितो० 2. संविदध्यात्फलविकलमलं 3. जन्म नादः

यत्तेश्च । न हि धर्माधर्मौ मानान्तरेण सिध्यतः । तथा च विधिनिषेधविरहादुन्मत्तप्रायं जगदापद्येत । किं च, ज्योतिरादिसर्वशब्दाः किं विष्णौ रूढा यौगिका वा ? नाद्यः, ततो गुणपूर्वसिद्ध्यापत्तेः, अन्यत्रैव रूढत्वाच्च । न द्वितीयः, योगमात्रेण रूढार्थापहारायोगात् । किं च, योगो दुर्वचः । योगो हि अवयवशक्तिरूपः । अवयवाश्च यदि विष्णावेव शक्तास्तर्हि भगवन्नामानामावृत्तिमात्रमेव कृतं स्यात् ; न तु विशिष्टार्थलाभः । यदि विष्णोरन्यत्रावयवानां शक्तिस्तर्हि समुदायस्यापि तथाऽस्तु । एवं प्राप्ते, ब्रूमः—ज्योतिरादिशब्दवाच्यो हरिरेव । यस्मादेके शाखिनः तथा सर्वशब्दाभिधेयत्वेन हरिमेवाधीयते, तस्यैवोपक्रमात् । सूत्रे ज्योतिरिति शब्दान्तराणामप्युपलक्षणम् । तुशब्द एवकारार्थः । अयं भावः—ऐतरेयके द्वितीयारण्यके द्वितीयाध्याये 'एष इमं लोकमभ्यार्चत्पुरुषरूपेण' इत्युपक्रम्य 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्' इति श्रूयते । अस्यार्थः—यास्ता एताः सर्वा ऋचस्तासामेकैव व्याहृतिः ; कर्माणि क्वित्, एकमेव व्याहृतेरभ्यम्, किं तदिति चेत्, प्राण एव, प्राणो विष्णुः । किं च, ये सर्वे वेदास्तेषामीश्वर एव प्रतिपाद्यः, किमुतर्चाम् । अपि च, ये समुद्रादिघोषास्तेषामपि, किमु वेदानाम् । तत्र ऋचस्तु विशेषतः परमात्मप्रतिपादका इति जानीयादिति । एवं च कर्मकाण्डस्थानामपि सर्वशब्दानां हरौ यौगिकत्वं युक्तमेव । न च रूढ्या योगापहारः शङ्क्यः, 'तस्माच्छतर्चिन इत्याचक्षते एतमेव सन्तम्' 'तस्मान्माध्यमा इत्याचक्षते एतमेव सन्तम्' इत्यादिभिः पूर्वोक्तोपक्रमोपसंहारमध्यस्थवाक्यैर्योगेन रूढेरपहारोक्तेः । एतमेव परमात्मानं मुख्यतो यौगिकार्थं सन्तं शतर्चादिनामभिराचक्षते, न तु मुख्यतो रूढत्वेऽपि मुनीनिति प्रतीतेः । यद्यपि पङ्कजादिशब्दे रूढेर्योगापहारित्वं दृश्यते, तथाऽप्याचक्षत इति विद्वद्रूढिसहितत्वेनोक्तयोगस्य रूढ्यपहारित्वं युक्तमेव ॥

यत्तूक्तं धर्माधर्मोच्छेदः स्यादिति तदुद्धारार्थं सूत्रान्तरम्—

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ ११ ॥

यथा मधुविद्यायां मधुशब्दस्येश्वरे वृत्तावपि न विरोधः, एवं सर्वशब्दानामीश्वरे वृत्तावपि न कर्मादिविरोधः, अन्यत्रापि वृत्त्यभ्युपगमात् । अयं तु विशेषः । लोके बह्व्यो वृत्तयः—रूढिः, योगः, योगरूढिः, रूढोपचारः, रूढलक्षणा, उपचारः, लक्षणा चेति । प्रयोगमात्रबाहुल्यं रूढिः ; यथा—घटपदस्य कुम्भे । योगः पाचकादौ । प्रवृत्तिनिमित्तं प्रयोगबाहुल्यं च योगरूढिः ; यथा—पङ्कजादिशब्दानां पद्मादौ । गौणस्य प्रयोगबाहुल्यं रूढोपचारः ; यथा—क्रिये सिंहः इति । रूढलक्षणा यथा—ग्रामो गच्छतीति पुरुषेषु ग्रामशब्दस्य । उपचारस्तु—अग्निर्माणवक इति । लक्षणा यथा—नद्यां घोष इति । हरौ तु महायोगो महारूढियोगश्च । तत्र तदितरत्र

प्रसिद्धशब्दानां महायोगः, निरतिशयप्रवृत्तिनिमित्तसद्भावात् । तदेकनिष्ठानां महारूढियोगः ; नारायणादिशब्दानां बहुप्रयोगयुक्तत्वान्निरतिशयप्रवृत्तिनिमित्तसद्भावाच्च । स्तम्भादिशब्दानां हरौ विद्वद्बुद्धिसद्भावेऽपि सार्वजनीनताभावेनाल्पत्वाच्चतो भेदः । अतः कर्मादिवाचिनामपि शब्दानां हरिर्वाच्य इति स्थितम् ॥

एवं कृत्स्नः कर्मकाण्डः कर्मब्रह्मोभयपर इति स्थिते तस्य ब्रह्मपरत्वं स्थालीपुलाकन्यायेन केषुचिद्वाक्येषूदाहृतमनुव्याख्याने—'जातमोतं हरौ यस्माज्ज्योतिः षः प्राणरूपतः । आयजेतश्चायजेतो वसन्तिश्च वसन् स्थितः ॥ विगतच्छादनत्वात्तु गच्छो भूतभयंकरः । भुक्ष्वेत्युक्तो हरिर्हुं च हुतमस्मिन् जगद्यतः ॥ स्वीयं संस्कुरुते यस्मात्स्वाहेत्युक्तो जनार्दनः । नमन्त्यस्मिन्गुणा यस्मान्नम इत्येव कथ्यते ॥ स्फुटत्वात्फडिति प्रोक्तः' इत्यादि । व्याकृतं च सुधायाम् । तत्र वसन्तवाक्ये यथा—वसतीति वसः पचाद्यच्, तनोतीति तिः, औणादिको डिप्रत्ययः, पूर्वपदस्य च नकारागमः, वसंश्चासौ तिश्चेति वसन्तिः, सर्वत्र व्याप्तो वर्तमानो जगत्कर्ता चेत्यर्थः । तत्र संबुद्धिः वसन्त । द्विरुक्तिरादरार्था । जि जातम् ; पूर्ववज्जनेर्डिप्रत्ययः, ओतिः ओतम् ; अवतेः क्तिः । जातं जगत् ओतं प्रविष्टं यस्मिन् स ज्योतिः । षः प्राणः, चेष्टकत्वात्, 'षकारः प्राण आत्मा' इति श्रुतेः । ज्योतिश्चासौ षश्च ज्योतिषः, तस्य संबुद्धिः ज्योतिषेति । आयजेत इत्यपि संबुद्धिः । आ समन्तात् यजैर्देवैर्यजनीयः प्राप्तेत्यर्थः. यजेः 'घञर्थे कविधानम्' इति कः । संप्रसारणाभावश्छान्दसः । इन्द्रागच्छेत्यत्र इन्द्रेति अ इति गच्छेति संबोधनानि । गमेश्छदेश्च डप्रत्यये सति गं गतं छं छादनं यस्मादसौ गच्छः, निरविद्य इत्यर्थः । स्वाहाशब्दे स्वमात्मीयं यज्ञादिषु दत्तं हविरादि आहरति स्वीकुरुते इति स्वाहः । हृञो डप्रत्ययः । तदनन्तरम् 'अ' इति विष्णुनाम । तयोः समासे संबुद्धिः । नमःशब्दे नमेरविकरणार्थेऽसुन्प्रत्ययः । नमन्ति नियमेनास्मिन् वर्तन्ते कल्याणगुणा इत्यर्थ इति । इत्थं सर्वं कर्मकाण्डं व्याख्येयमिति मध्वमतस्थितिः ॥

अत्रेदं वक्तव्यम्—उदाहृतायाः 'ता वा एताः सर्वाः' इत्यादिश्रुतेरन्य एवार्थः, न तु त्वदुक्तः । तथा हि—ताः प्रकृताः वै प्रसिद्धा बृहतीरूपाः एता वर्णसमुदायात्मिकाः प्रत्यक्षाः सर्वा ऋचः पादबद्धा मन्त्राः, सर्वे वेदा ऋग्वेदाद्याः, सर्वे घोषा घाद्या वर्णाः ध्वनिविशेषा वा एकैव भूम्यात्मिका देवैरुपास्यमाना, न त्वन्या, व्याहृतिः भूरिति सुप्तस्य व्याहरणरूपा । भूरादिसर्वव्याहृतिगर्भाः प्राण एवोक्तः क्रियाशक्तिरेव यस्मात्ततः प्राण ऋच इत्येव विद्यादिति तावद्दीपिकायां व्याख्यातम् । युक्तं चैतत्, 'स एषोऽसुः स एष प्राणः स एष भूतिश्चाभूतिश्च वै भूतिरिति देवा उपासांचक्रिरे, ते बभूवुस्तस्माद्वाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसिति' इत्युपक्रमात्, सामानाधिकरण्यलाभाद्व्याहारकेशाभावाद्बृहद्बलीयस्त्वाद्व्याकरणानुगुण्याच्च । त्वत्पक्षे हि तासां तेषामिति चाध्याहारेण वैयधिकरण्येन च क्लिष्टता । व्याहृतिर्व्याहृतव्यमिति तु कृत्यर्थ-

परित्यागेन यौगिकार्थपरिग्रहः व्याकरणस्वरसमङ्गश्च । 'अकर्तरि च कारके संज्ञायाम्' इति सूत्रेण हि संज्ञायां स्वारसिकः प्रत्ययः । व्यवहितयोजनामाश्रित्य चादसंज्ञायामपीति व्याख्यानेऽपि संज्ञायां चेत्येवंरूपपदद्वयवैयर्थ्यपरिहाराय संज्ञायामेवेत्युत्सर्गः, अगत्या तु क्वचिदसंज्ञायामिष्यत इति सूत्रकाराशयव्याभियुक्तैः स्थापितत्वात् । तस्मात्कर्मकाण्डग्रन्थसकलपदानां हरौ यौगिकत्वमिति निर्मूलमेव । एवं च वसन्तादिवाक्यान्युदाहृत्य यज्जल्पितं तदपि गर्भस्रावेणेव गतम्, अव्युत्पत्त्यतिशयसूचकं च । तथा हि— यजेः यज्वाभिरिति व्याख्याय घञर्थे कः इति वदता घञर्थः सम्यग्बुद्धः । लंप्रसारणाद्विभ्यता छान्दसतां च शरणीकुर्वता वस इत्यत्रैव पचाद्यच् कर्त्रर्थे विस्मृतः । न हि वसयजयोरण्वपि वैषम्यमस्ति । स्वाहेत्यत्र समासे संबुद्धिरिति वदता संबुद्धिलोपो दुर्लभ इति न ज्ञातम्; व्याप्ते हि लोपः सुलभः । किं चानेनानर्थकारिणा समासेन 'आमन्त्रितस्य' इति षाष्ठिकस्वरश्च प्रतिपदं प्राप्नोतीति महान् दोषः, वैदिकप्रसिद्धलक्षणपारंगृहीतपदविभागविरोधश्च प्रसिद्ध एवेत्यलं मृतहननेन ॥

वाजसनेयके श्रूयते— 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः । तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम् ॥' इति । तत्र पञ्चजनादिशब्दवाच्यो विषयः । विष्णुरन्यो वेति संदेहः । अन्य इति प्राप्तम्, यस्मिन्निति सप्तम्या निर्दिष्टस्य वाक्यशेषबलेन परमात्मतया तदाधेयानां पञ्चजनाकाशानां परमात्मत्वायोगात् । न ह्येकस्यैवाधारधेयभावो युज्यते । एवं प्राप्ते सिद्धान्तमाह—

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ १२ ॥

अपिशब्दः पूर्वसूत्राद्विरोधपदमाकर्षति । विष्णोरेव पञ्चजनाकाशादिशब्दवाच्यत्वे विरोधो नास्ति, स्वगतभेदशून्यस्यापि नानारूपत्वेन बहुत्वसंख्योपसंग्रहाविरोधात् । न च प्रतिशरीरं परमात्मनो बहुरूपत्वमप्रामाणिकम्, शरीरान्तर्गताकाशप्राणादिपञ्चजननियामकत्वेन तेषु नानाभावस्य न्यायप्राप्तत्वात् । यस्मिन्नित्याधारतया निर्दिष्टादतिरेकेण तदाधेयाकाशादिषु भगवतोऽवस्थानाद्याधाराधेयभावोऽपि युज्यते । अतः परमात्मन एव पञ्चजनादिशब्दवाच्यत्वाद्युक्तं समन्वयसूत्रम् ॥

भगवतः पञ्चजनशब्दवाच्यत्वे लिङ्गमाह—

प्राणादयो वाक्यशेषात् ॥ १३ ॥

'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनः' इति हि वाक्यशेषात् पञ्चजनाकाशावत्प्राणादीनां प्राणत्वप्रदाः । प्राणत्वादिप्रदत्वं च भगवत एव संभवतीति वाक्यः ॥

ननूक्तरीत्या माध्यन्दिनशाखायां पञ्चजनोक्तावपि काण्वशाखायामन्नस्याग्निमत्त्वा-भावज्ञानात् कथं निर्वाहः इत्याशङ्क्यायमाह—

ज्योतिषैकेषामसत्यन्ने ॥ १४ ॥

'तदेवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' इति किंचिदूरे आम्नातेन ज्योतिषा काण्वानां पञ्चकम्। तथा च ज्योतिरन्नशब्दयोरैकार्थ्यं पृथगेव वा पञ्चकमिति भावः। अधिकरणखण्डनं प्राग्वत् ॥

'आत्मन आकाशः संभूतः। आकाशाद्वायुः' इत्यादि श्रूयते। तत्राकाशवाय्वादिशब्दवाच्यं विष्णुरन्यद्वेति संशये, अन्यदिति प्राप्तम्, तेषां कार्यत्वश्रवणात्। सिद्धान्तमाह—

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १५ ॥

आकाशादिषु विष्णुरेव स्थितः। अतस्तच्छब्दैरभिधीयते। कारणत्वेन चात्कार्यत्वेन। न च कार्यकारणभावविरोधः, 'य आकाशे तिष्ठन्' इत्यादिना तत्स्थत्वसिद्धेः। न च तत्रापि विष्णुः कुत इति वाच्यम्, यथा विष्णुरविदितत्वादिरूपेण श्रुतिषु व्यपदिष्टस्तादृशस्यैवाकाशादिषु 'यमाकाशो न वेद' इत्यादिनोक्तेः। तथा चाकाशाद्युत्पत्तावाकाशाद्यन्तर्गतत्वेन भगवतोऽभिव्यक्त्या वाय्वादिगतत्वरूपाभिव्यक्तिहेतुत्वेन चावान्तरकारणत्वं युक्तम्। कार्यत्वे सति कारणत्वं ह्यवान्तरकारणत्वम्। तथा च विष्णोरवान्तरकारणाभिधायकशब्दवाच्यत्वाद्युक्तं समन्वयसूत्रमिति माध्वाः। तत्तुच्छम्, तात्स्थ्यात्ताच्छब्द्योक्तौ मञ्चाः क्रोशन्तीत्यादिवदमुख्यत्वापत्तेः। मुख्ये संभवति गौणग्रहणायोगाच्च। 'नामानि सर्वाणि यम्' इति तु महातात्पर्यविषयत्वमात्रपरम्। एतेन 'सर्वे वेदा यत्पदमामनन्ति' इत्यादि व्याख्यातम्। सामान्यखण्डनान्यपीह यथासंभवं योज्यानि ॥

इत्थमुक्तस्य परमात्मनि सर्वशब्दसमन्वयस्य बाधकमाशङ्क्य तत्परिहारार्थमष्टसूत्री प्रवर्तते। तथा हि— सर्वशब्दानां परमात्मवाचकत्वे कथमन्यत्र व्यवहारः? यत्तु वैश्वानराधिकरणे 'साक्षादप्यविरोधम्' इति सूत्रेण समाहितम्, तदयुक्तम्, अवाचकैर्व्यवहारे अव्यवस्थापत्तेः। यदप्यस्मिन् पाद एवोक्तम्— 'शरीररूपकविन्यस्तैस्तत्संबन्धादन्यद्व्यवह्रियते' इति, तदपि न, लोके लक्षणेतरवृत्त्यभावापत्तेः। यदपि 'कल्पनोपदेशाच्च मध्वादिवत्' इति सूत्रेऽन्यत्रापि रूढिमभ्युपेत्य समाहितम्, तदपि न, तथा सत्यक्षादिवज्ञानार्थतापक्ष्या परमात्मन एव मुख्यवाच्यत्वमिति प्रतिज्ञाव्याकोपात् इत्याशङ्क्यायां समाधत्ते सूत्रकारः—

समाकर्षात् ॥ १६ ॥

अस्यार्थः— न तावद्व्यवहारानुपपत्तिः, अन्यत्रापि रूढ्यादेरभ्युपगमात्। न चैव-

मश्वादिवदुभयत्र मुख्यता स्यादिति वाच्यम्, वैषम्यात्। अश्वादीनां ह्युभयत्रान्योन्यनिरपेक्षा शब्दवृत्तिः। इह तु नैवम्। किं तु स्वतो मुख्यया वृत्त्या परमात्मैकवाचिनां शब्दानां व्यवहारसिद्ध्यर्थं ततः समाकृष्यान्यत्र रूढत्वेन संकेतः। प्रवृत्तिनिमित्तानां च भगवदधीनेति। उक्तं हि पाद्मे—'परस्य वाचकाः शब्दाः समाकृष्येतरेष्वपि। व्यवह्रियन्ते सततं लोकवेदानुसारतः॥' इति। लौकिकवैदिकव्यवहारसिद्ध्यनुसारत इत्यर्थः। उदाहृतसूत्राणां का गतिरिति चेत्, शृणु; प्रथमसूत्रे स्वातन्त्र्येण वाच्यत्वं नास्तीत्येतावन्मात्रमभिप्रेतम्। द्वितीये परमात्मसंबन्धोक्त्याऽत्रोक्तमेवाभिसंहितम्। तृतीयेऽप्यविवेचितरूढ्यायुक्तम्। इह पुनस्तस्यैव विवेचनमिति विशेषः॥

कथं तर्हि घटादौ मुख्यस्वव्यवहारः? तत्राह—

जगद्वाचित्वात्॥ १७॥

परमात्मन औपनिषदत्वादविदुषां जगत्येव शब्दमुख्यताभिमानः, अनवगताप्रमाणवके वर्त्मेति भावः॥

जीवमुख्यप्राणलिङ्गादिति चेत् तद्व्याख्यातम्॥ १८॥

यदुक्तम्—'तदधीनत्वात्तच्छब्दवाच्यत्वम्' इति, तज्जीववायोरपि लिङ्गम्। 'अस्य यदैकां शाखां जीवो जहाति अथ सा शुष्यति' 'प्रायुना हि सर्वे लोका नेनीयन्ते' इत्यादिश्रुतिभ्य इति चेत्, न, तल्लिङ्गाभिधायकश्रुतीनां तत्तदभिमानिभगवत्परतया व्याख्यातत्वात्॥

समाकर्षस्य फलमाह—

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके॥ १९॥

समाकर्षेण हि वेदः कर्म वक्ति। तच्च परमात्मज्ञानार्थमिति जैमिनिः। 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति। तस्मै स होवाच। द्वे विद्ये वेदितव्ये।' 'कथं नु भगवः स आदेशो भवतीति। यथा सौम्यैकेन मृत्पिण्डेन' इति च प्रश्नव्याख्यानाभ्याम्। अत्र हि सर्वमिदं कर्मादि कस्मिन् विज्ञाते विज्ञातं भवति, विज्ञातस्याप्यस्य फलं कस्मिन् ज्ञाते भवतीति शौनकप्रश्ने, सर्वमपरविद्यया विज्ञातं भवति, परविद्याविषयपरमात्मज्ञानेन च सफलं भवतीत्यतो द्वे विद्ये वेदितव्ये इत्यङ्गिरसो व्याख्यानम्, श्वेतकेतुप्रश्ने चोद्दालकस्य व्याख्यानमिति भावः। स्पष्टं चैवमेके शाखिनः पठन्ति—'ऋचो अक्षरे' इत्यादि। अस्यार्थः—तदक्षरं यो न वेद सः कर्मादिमात्रविषयया ऋचा किं करिष्यति। यतः सर्वा ऋचः परमे व्योम्यक्षरे, तज्ज्ञानार्थमेव कर्मादिकं वदन्ति, तस्यैव सर्ववेदाधारत्वात्। ये पुनस्तदक्षरं विदुस्ते सम्यगासत इति॥

स्यादेवम्। वेदेन कर्म न वक्तव्यम्, परमात्ममात्रकथनेनापि कृतकृत्यत्वात्। न च अनुपस्थितिरुपपत्तिः, खण्डपदानामन्यथाचकत्वेन तदुपपत्तेः। ततोऽन्वयकथनस्याफलत्वान्न तत्र शक्तिरिति शङ्कते इत्याशङ्क्याह—

वाक्यान्वयात् ॥ २० ॥

अयं भावः—अन्याक्षेपे पदान्वय एव स्यात्, न तु वाक्यान्वयः। तथा चोत्तमाधिकारिव्यतिरिक्तानां ज्ञानं न स्यादेव, 'कश्छन्दसां योगमावेद' इति श्रुतेः। तथा च कर्मकाण्डस्य भगवति पदान्वयोऽपि कर्मभिश्चित्तशुद्धिं [1]संपाद्य बोद्धव्य इति तान्यवश्यं वक्तव्यानीति स्थितम् ॥

कर्मोक्तेः परमात्मज्ञानार्थत्वं केन प्रकारेणेत्याकाङ्क्षायामाह—

प्रतिज्ञासिद्धेर्लिङ्गमित्याश्मरथ्यः ॥ २१ ॥

'नान्यः पन्था अयनाय विद्यते' इति प्रतिज्ञासिद्धेर्लिङ्गत्वेन कर्मादिकमुक्तवत इति आश्मरथ्यो मन्यते। सपरिकरे हि कर्मण्युक्ते यस्मादेवमनित्यफलमिदं तस्मान्नान्यः पन्था इति ज्ञानातिरिक्तमोक्षोपायनिषेधो युक्यत इति सिध्यति। श्रूयते च—'परीक्ष्य लोकान् कर्मचितान्' इति ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २२ ॥

उत्क्रमिष्यतो मुमुक्षोः एवंभावात् मोक्षजनकज्ञानसाधनत्वात् कर्म वक्तीत्यौडुलोमिः। फलोक्तिस्तु स्तुत्यर्था। तदुक्तम्— 'रोचनार्था फलश्रुतिः' इति ॥

अवस्थितेरिति काशकृत्स्नः ॥ २३ ॥

कर्मणां [2]सत्त्वशुद्धिद्वारेणाराद्युपकारकत्वं तावदस्त्येव। किं तु सर्वं कर्मादिकं परमात्मनि स्थितम्। अतः सर्वाधारत्वरूपेण ज्ञातव्य इति 'एष सेतुर्विधरणः' इत्यादौ वक्तुमाधेयं कर्मापि वेदेनोक्तमिति साक्षादपि परमात्मज्ञानोपयोगितां काशकृत्स्नाचार्य आहेत्यर्थः। सर्वेषामप्येषां पक्षाणामात्ममतत्वेऽपि शिष्यप्रसिद्ध्यर्थं तत्तन्नामोपन्यासः। अधिकारिभेदाच्च न विरोधः। उक्तं च पाद्मे— 'कृष्णद्वैपायनमतादेकदेशमतः [3]परे। वदन्ति ते यथाप्रज्ञं न विरोधः कथंचन ॥' इति। अतो भगवज्ज्ञानार्थं वैदिकादिशब्दानामन्यत्र समाकर्षेण व्यवहारोपपत्तेर्युक्तं हरेः सकलशब्दमुख्यार्थत्वमिति मान्याः। अत्र समाकर्षप्रसक्तानुप्रसक्त्या यत्कर्मणोऽपि ज्ञानं प्रति शेषत्वं कथितं तेनैव 'सर्वे वेदा यत्पदमामनन्ति' 'नामानि सर्वाणि यमाविशन्ति' इत्यादीनां गतार्थत्वात् समाकर्षस्तावन्निर्मूलो दुरुपपादश्च। तथा हि— कोऽयं समाकर्षः? न तावद्भगवच्छास्त्रायां

---

1. संपाद्य 2. सत्त्वशुद्धिद्वारेण तदुप॰

इवाकर्षणम्, शब्दस्य तदयोगात्, परमात्मसंबन्धस्य भङ्गापत्तेश्च। न च सत्येव परमात्मसंबन्धे-ऽन्यत्रापि संकेतमात्रम्, संकेतस्यापीश्वरेच्छारूपत्वेन नित्यत्वात् अक्षादिसाम्यतादवस्थ्याच्च। अनित्यत्वे तु वेदपौरुषेयतापक्षप्रवेशः। यदाहुः— 'यस्मतो हि निषेध्या नः पुरुषाणां स्वतन्त्रता' इति। सकलमहर्षिवचनविरोधश्च। यथाऽऽह जैमिनिः— 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इति। कात्यायनोऽप्याह— 'सिद्धे शब्दार्थसंबन्धे' इति। तत्रैव महाभाष्यकारोऽपि सिद्ध-शब्दं नित्यपर्यायतया [1]अव्याकृत्। माधवग्रन्थेष्वपि 'न विलक्षणत्वादस्य तथात्वं च' इत्यादिसूत्रेषु तथोक्तेश्च। उपजीव्यविरोधश्च, लोकगृहीतशक्त्यनुसारेणैव समाकर्षबोधकवचसामपि प्रवृत्तेः। किं च, निरूढलक्षणयैव गतार्थत्वात् समाकर्षे प्रमाणं नास्ति। विनिगमकाभावाद्धि सैन्धवादिपदानां नानार्थतेति सकलतान्त्रिकमर्यादा। न च त्वन्मते विनिगमनाविरहोऽस्ति। समाकर्षशब्देन निरूढलक्षणैव विवक्षितेति चेत्, न, अपसिद्धान्तात्। 'कल्पनोपदेशाच्च' इति सूत्रे तत्त्वप्रकाशिकादौ लोके वृत्तेः साम्नविध्योक्तेरिति दिक् ॥

श्रीशब्दा अपि तस्मिन्नेवेत्याह—

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात् ॥ २४ ॥

'इन्तैतमेव पुरुषं सर्वाणि नामान्यभिसंवदन्ति, यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिसंविशन्त्येवमेवैतानि नामानि सर्वाणि पुरुषमभिसंविशन्ति' इति प्रतिज्ञादृष्टान्तानुरो-धात् प्रकृतिशब्दवाच्यः स एव ॥

अभिध्योपदेशाच्च ॥ २५ ॥

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति श्रुतौ हि मायायाः प्रकृतिशब्दवा-च्यत्वमुक्तम्। माया चेश्वरेच्छैव, 'महामायेत्यविद्येति नियतिर्मोहिनीति च। प्रकृतिर्वाऽनेत्येवं सर्वेच्छाऽनन्त कथ्यते ॥' इति स्मृतेः। इच्छैव चाभिध्या। साऽपि भगवत्स्वरूपैव, 'सोऽभि-ध्या स जूतिः स प्रज्ञा स आनन्दः' इति श्रुतेः। जूतिः प्रेरणा। नन्विच्छा न भगवत्स्वरूपम्, 'मायिनं' 'तवेच्छा' इत्युदाहरणस्थल एव संबन्धाभिधानादिति चेत्, न, 'ध्यायति ध्यानरूपो-ऽसौ सुखी सुखमतीव च। परमैश्वर्ययोगेन विवक्षार्थतयेष्यते ॥' इति ब्रह्माण्डवचनात् ॥

नन्वेवमपि इच्छाद्वारेण प्रकृतिशब्दवाच्यत्वमागतं न तु साक्षात्; अत आह—

साक्षाच्चोभयाम्नानात् ॥ २६ ॥

'एष स्त्री एष पुरुष एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष आलोको योऽसौ हरिरादि-

---

1. व्याकृवाति

रनादिरनन्तोऽन्तः परस्यः परादिश्चरूपः' इति पैङ्गिश्रुतौ साक्षादेव प्रकृतिपुरुषत्वाम्नानादित्यर्थः ॥

तत्र प्रकृतिशब्दस्य प्रवृत्तिनिमित्तमाह--

आत्मकृतेः परिणामात् ॥ २७ ॥

प्रकृतिं प्रविश्य महदादिरूपेण परिणता कृत्वा आत्मानं च महदादिरूपेण प्रेरणाव बहुधा करोतीति प्रकर्षेण करोतीति व्युत्पत्तिर्वोध्यत्वर्थः । 'अथ ह्येव आत्मा प्रकृतिमनुप्रविश्यात्मानं बहुधा चकार । तस्मात्प्रकृतिरित्याचक्षते' इति भाल्लवेयश्रुतेः । 'अविकारोऽपि परमः प्रकृतिं तु विकारिणीम् । अनुप्रविश्य गोविन्दः प्रकृतिश्चाभिधीयते ॥' इति नारदीये ॥

योनिश्च हि गीयते ॥ २८ ॥

अव्यवधानेनोत्पत्तिद्वारत्वं च प्रकृतित्वम् । तथास्यैव गीयते— 'यद्भूतयोनिं परिपश्यन्ति धीराः' इति । 'व्यवधानेन सूतिस्तु पुंस्त्वं विद्वद्भिरुच्यते । सूतिरव्यवधानेन प्रकृतिश्चेमिति स्थितिः ॥ उभयात्मकसूतित्वाद्वासुदेवः परः पुमान् प्रकृतिः पुरुषश्चेति शब्दैरेकोऽभिधीयते ॥' इति ब्रह्माण्डे । किं च, भगवतः स्त्रीरूपत्वादपि स्त्रीशब्दोपपत्तिः । न स्त्रीति निषेधस्तु अज्ञेयतामात्रार्थः । अन्यथा 'न स्त्री न षण्डो न पुमान् न जन्तुः' इति निषेधात्पुंस्त्वमपि न सिध्येत् । तस्माद्विष्णोरवाशेषस्त्रीशब्दवाच्य इति युक्तमेव समन्वयसूत्रमिति माध्वाः । खण्डनं तूक्तमेव ॥

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २९ ॥

शून्यादिशब्दानां परमात्मवाचित्वाभावात् समन्वयानुपपत्तौ आम्नायां सिद्धान्तमाह— एतेनेति । एतेन तदधीनत्वाद्युक्तयुक्तिसमुदायेन सर्वे शून्यादिशब्दा अपि भगवद्विषयतया व्याख्याता इत्यर्थः । 'एष ह्येव शून्य एष ह्येव तुच्छ एष ह्येवाभाव एष ह्येवाव्यक्तोऽदृश्योऽचिन्त्यो निर्गुणश्च' इति महोपनिषदि । 'शमूनं कुरुते विष्णुरदृश्यः सन्परः स्वयम् । तस्माच्छून्य इति प्रोक्तस्तोदनात्तुच्छ उच्यते ॥ नैष भावयितुं योग्यः केनचित्पुरुषोत्तमः । अतोऽभावं वदन्त्येनं नाशयत्वान्नाश उच्यते ॥ सर्वस्य तदधीनत्वात्तच्छब्दाभिधेयता । अन्येषु व्यवहारार्थमिष्यते व्यवहर्तृभिः ॥' इति महाकौर्मे । शमूनमिति ; स्वसुखादन्यसुखमल्पं करोतीत्यर्थः । भावयितुमुत्पादयितुमशक्यत्वादभावः । नाशयत्वात् ; अशयो भक्ष्यो न भवतीति हेतोः न अश्यते भक्ष्यते इति व्युत्पत्त्या नाश इत्यर्थः । सर्वस्येति ; एतेन 'असद्वा इदम्' इत्यादौ प्रयुज्यमाना असदादयः शब्दा अपि संगृहीताः । न चासतोऽन्याधीनत्वायोगः, एतत्स्मृतिबलादेव स्वीकर्तव्यत्वात् । अलीकत्वादीनामपि भगवत्प्रेरणामन्तरेणानुपपत्तेश्च । न हि कारणमन्तरेण तत्रैव तदुपपद्यते । ईश्वरस्य तु स्वातन्त्र्याददोषः । द्विरुक्तिस्तु अध्यायार्थस्य दार्ढ्यार्था । 'अवधारणार्थं सर्वस्याप्युक्तस्याध्यायमूलतः । द्विरुक्तिं कुर्वते प्राज्ञा अध्यायान्ते विनिर्णये ॥' इति वाराहसंहितायाम् । विनिर्णये

प्रामाण्यमस्ति न वेति विचार्य पश्चाद्गुणविधिनामधेयविचारो दर्शितः। तदनेन शास्त्रारम्भप्रयोजनसमर्थनावसरे 'पूर्वं प्रमाणरूपाभ्यां पादेनाद्यस्य निर्णयः' इति वार्तिकं दृष्ट्वा प्रथम एव पादे प्रामाण्याप्रामाण्यचिन्ता समाप्ता। त्रिपाद्यां तु कथंलक्षण इति थमुना प्रतिज्ञातः प्रामाण्यप्रकारो निरूप्यते --विध्यर्थवादमन्त्रनामधेयस्वरूपैर्धर्मे प्रामाण्यं वेदस्येति। प्रकारतद्वतोरनतिभेदात्समस्तोऽध्यायः प्रमाणलक्षणमाख्यायत इति ये मन्यन्ते ते निराकृताः। तथा सति हि नामधेयस्वरूपप्रकारचिन्तनाद्यथाभाष्यमेवाधिकरणं संगतं स्यात्। तस्मान्न तावदयं पक्षो वार्तिककारस्य संमतः। न च युक्तः, स्मृतिपादस्य त्रिपाद्यामसंगतिप्रसङ्गात्। न हि तत्र वेदप्रामाण्यप्रकारनिरूपणम्। तस्मात्सर्वेष्वेवाध्याये धर्मे प्रमाणतदाभासनिरूपणमेव क्रियत इति वक्तव्यम्। तत्र चोदनैव साक्षात्प्रमाणम्। अर्थवादमन्त्रस्मृतिनामधेयानि तच्छेषत्वेन तन्मूलत्वेन च प्रमाणं भवन्तीति धर्मप्रमितेरितिकर्तव्यतास्थाने नियतं निपतन्ति। चोदना तु प्रधानं प्रमाणम्। तस्याश्च प्रथमपाद एव समाप्तं प्रामाण्यमित्यनेनाभिप्रायेणोक्तम् 'पादेनाद्यस्य निर्णयः' इति। चोदनैव हि साक्षात्प्रमाणम्; तत्तु प्रथमपादेनैव निर्णीतमित्यभिप्रायः। त्रिपाद्यां त्वप्रधानप्रमाणनिरूपणमित्येतावान्भेदः।

चोदनाप्रामाण्यविचारः समाप्तः। त्रिपाद्यां तु श्रुतिस्मृत्यादिप्रामाण्यद्वारभूतं प्रामाण्यप्रकाररूपं विषयान्तरमिति वार्तिककारस्याभिप्रायः प्रतीयते। अतः स्वातन्त्र्येण प्रकारचिन्तैव त्रिपाद्याम्' इति। तेषां मतं गुणविधिनामधेयचिन्तार्थत्वेन प्रामाण्यविचारं प्रथमं प्रवर्तितवता वार्तिककारेणैव निरस्तमित्याह—तदनेनेत्यादिना। स्मृतिपादासंगतिप्रसङ्गात्तेषां मतं न युक्तमित्याह—न च युक्त इति। यदि धर्मप्रमाणनिरूपणं शाक्यागमादितदाभासविवेचनसहितं चोदनासूत्रेण प्रतिज्ञातमध्यायार्थं इति नोच्येत, चोदनाया वेदस्य प्रामाण्यं प्रतिज्ञातं, तत् प्रथमपाद एव समापितमित्युच्येत, तदा स्मृत्याचारतदाभासविवेचनाय प्रवृत्तस्य स्मृतिपादस्यासंगतिः स्यादित्यर्थः। न हि तत्रेति। यद्यपि वेदस्य प्रत्यक्षावगतिरेव न प्रामाण्यप्रकारः, किं तु स्मृत्यादिलिङ्गकानुमितिरपीति प्रकारविशेषनिरूपणार्थत्वमपि स्मृतिपादस्य वक्तुं शक्यम्; स्मृतिपादारम्भे 'कथंलक्षणः' इति थमुप्रत्ययसहितभाष्यानुवादेन तादर्थ्यमपि ग्रन्थकृतैव सूचितं च; तथाऽपि तत्र स्वातन्त्र्येण प्रकारनिरूपणं नास्तीत्यत्र तात्पर्यम्, तत्स्वातन्त्र्यनिराकरणप्रस्तावात्। ततः कृत्स्नोऽप्यध्यायः सापवादधर्मप्रमाणनिरूपणार्थ एव; तच्छेषत्वेन परं तत्र तत्र प्रकारविशेषनिरूपणमिति स्वमतमुपसंहरति—तस्मादिति। 'पूर्वं प्रमाणरूपाभ्याम्' इति वार्तिकं तु प्रामाण्ये चोदनाया अर्थवादादीनां चान्यव्यवधानव्यवधानरूपप्रधानोपसर्जनभावसत्त्वात्प्रधानप्रामाण्यनिरूपणस्य प्रथमपाद एव कृतत्वाभिप्रायम्; न तु

प्रमाणचिन्तात्मकत्वं तु सकलस्याध्यायस्याविशिष्टमिति स एवैकोऽध्यायार्थः । तदिह संभवदाख्यातसामानाधिकरण्याद्बुद्धिद्रभिजविशाज्यपृषदाहिष्पवमानाग्निहोत्राधारश्येनादिशब्दानुदाहृत्य चिन्त्यते – किमेते धर्मं प्रति प्रमाणं न वेति । तत्र—

विध्यर्थवादमन्त्रांशैर्वेदाद्धर्मः प्रतीयते । न चोद्भिदादिशब्दानां तेष्वन्तर्भावसंभवः ॥

न तावदर्थवादत्वं स्तुतिबुद्धेरभावतः । उत्तमामन्त्रणास्यन्तत्वान्तरूपाद्यभावतः ॥

मन्त्रप्रसिद्ध्यभावाच्च मन्त्रतैषां न युज्यते । न च विध्यन्तपातित्वं साध्याद्यनभिधानतः ॥

न तावदेते साध्यमभिदधति, अफलवचनत्वात् । न साधनम्, समानपदोपात्तधात्वर्थसाधनावरोधाद्भावनायाः । न च गुणविधानेनेतिकर्तव्यतान्तर्भावः ; उद्भिदादिरूपस्य लोके गुणस्याप्रसिद्धत्वात्मत्वर्थलक्षणादोषाच्च, चित्यादिषु वाक्यभेदप्रसङ्गात्, आग्नहोत्रादिषु तत्प्रख्यशास्त्रान्तरसद्भावात्, श्येनादिषु उपमानानुपपत्तेः । न च नाम्न इतिकर्तव्यतान्तर्भावः, नाम्नोऽनितिकर्तव्यतारूपत्वात्, अवृत्तिविशेषकारित्वेन च नाम्नोऽनर्थकत्वादप्रसिद्धत्वाच्च । तस्माद्प्रमाणमेवंजातीयकमिति पूर्वः पक्षः । सिद्धान्तस्तु —

प्रथमपाद एव प्रामाण्यविचारस्य समाप्तत्वाभिप्रायम्, 'चोदनासूत्रनिर्दिष्टो यः प्रमाणपरिग्रहः । स प्रकारः स आद्येन लक्षणेन प्रपञ्चितः ॥ इति बृहट्टीकोक्तरित्यभिप्रेत्याह—तत्र चोदनेत्यादिना। वार्तिकदर्शितमुपोद्घातमधिकरणप्रान्तीयं तादृशं । उद्भिदाद्यधिकरणेषु यानि प्रत्येकं विषयवाक्यानि तानि सर्वाण्यत्रोदाहरणानीत्याह— ये विदिताः ॥

उद्भिदादिपदानां विध्यर्थवादमन्त्रांशतमरूपेण धर्मप्रामाण्युपयोगाभावमाद्यश्लोकसंगृहीतं विवृणोति—न तावदिति । उत्तमेति । 'स्योनं ते सदनं कृणोमि' इत्यादिषूत्तमपुरुषः । 'यत्ते प्राञ्चो चिच्छिदुः सोमराजन्' इत्यादिष्वामन्त्रणम् । 'बर्हिरसि देवब्रह्ममसि' इत्यादावस्यन्तता । 'इषे त्वा' इत्यादिषु त्वान्तता । आदिशब्देन 'य इमं यज्ञमवान् ये यज्ञपतिं वर्धान्' इत्यादिमन्त्रश्रुताः यज्ञपतिवृद्ध्याशारादयो गृह्यन्ते । 'चत्वारि शृङ्गात्रया अस्य पादा' इत्यादीनामुत्तमपुरुषाद्यभावेऽपि मन्त्रप्रसिद्धिमात्रेण मन्त्रता ॥

गुणस्याप्रसिद्धत्वादिति । उद्भिद्बलाभदादिनामकस्य यज्ञसाधनार्हस्य कस्यचिद्गुणस्य रूढ्या योगेन वा लोके प्रसिद्ध्यभावादित्यर्थः । मत्वर्थलक्षणावाक्यभेदतत्प्रख्योपमानानुपपत्तयस्तु क्रमेणोद्भिदाद्यधिकरणचतुष्टये ग्रन्थकृतैव स्पष्टीकरिष्यन्ते ॥

---

1. न्यायसुधा—पृ. ३९३

सकलस्यैव वेदस्य स्वाध्यायविधिवाक्यतः । ज्ञात पुरुषार्थत्वमुद्भिदादेरपि ध्रुवम् ॥

तत्र त्वदुक्तेनैव मार्गेण मन्त्रार्थवादन्यासंभवाद्विध्युशेषान्तर्भावस्य च प्रत्यक्षत्वात्तत्रैव गुणत्वेन नामधेयत्वेन वा प्रामाण्यम् । स्वाध्यायविध्यध्यापितत्वालर्थक्यासंभवात्सर्वानुपपत्तिपरिहारेणार्थवत्त्वमध्यवसितव्यम्[1] । एतदधिकरणे स्थितम्—भाव्यं तावत्प्रामाण्येनेति । तदेतदर्थवादप्रस्तावे मिहित प्यनेकविचारान्तर्हितमितिकृत्वा विशेषविचारायानेन सूत्रेणोपस्थाप्यते ॥

उद्भिदादिपदानामुक्तरीत्या मन्त्रार्थवाद[illegible]स्वाध्यायविधिसिद्धपुरुषार्थपर्यवसानाभाय गुणविधानेन नामधेयत्व[illegible]वा प्रामाण्यमवश्यवक्तव्यमिति सिद्धान्तयति—सकलस्यैवेति ॥

ननु द्वारविशेषानिर्धारणेनाध्ययनविधिमहिम्ना प्रामाण्यस्य प्रामाण्यलक्षणसमर्थनसमर्थे सूत्रप्रस्ताव एव कृतम्, किमर्थमिह पुनस्तत्समर्थनमित्याकाङ्क्षायामाह—तदेतदिति । विशेषविचारायेति । गुणविधानेन, नामत्वेन वा केनचित्प्रकारेण निधारणं विशेषविचारः ; तदर्थं पुनरुपस्थाप्यते । तदभावे हि स्वतन्त्रेयं प्रकारविशेषचिन्तेति शङ्का स्यात् । तत्सत्त्वे प्रथमाधिकरणसमर्थितानवद्यभावप्रामाण्यप्रतिष्ठाविघ्नपरिहारत्वेन तच्छेषता स्फुटीकृता भवतीति भावः ॥

उद्भिदधिकरणम् । २ ॥

अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात् । २ ॥

जैमिनीयन्यायमाला ॥

गुणोऽयं नामधेयं वा खनित्रेऽस्य निरुक्तितः । ज्योतिष्टोमं समाश्रित्य पश्वर्थं गुणचोदना ॥ ३ ॥
फलोद्देशात्समानैषा निरुक्तिर्यागनाम्न्यपि । नामत्वमुचितं यागसामानाधिकरण्यतः ॥ ४ ॥
लौकिके गणयागेऽस्य विधेः सापेक्षतेति चेत् । निरुक्त्या श्रौतयागस्य नामत्वान्निरपेक्षता ॥ ५ ॥

विधित्वेन प्रामाण्यमित्येतावदवस्थितम् । तच्च द्वेधा संभवति—गुणविधानेन, नामधेयत्वेन वा । यावदनयोरन्यतरन्नोपपाद्यते, तावत्पूर्वावगतमपि प्रामाण्यं न प्रतितिष्ठतीति तत्प्रतितिष्ठापयिषया गुणविधिनामधेयचिन्ता प्रस्तूयते । तत्र प्रथमं तावद्यौगिकेषूद्भिदादिषु

---

1. परिहारेणाध्यवसितव्यम्

चिन्त्यते— किं गुणविधिः कर्मनामधेयमिति । तदर्थं किमेषां वैयधिकरण्येनाख्यातसंबन्धः, सामानाधिकरण्येन वेति ॥

तत्रावयवयोगेन खनित्रादौ प्रसिद्धितः । प्रवृत्त्युपयिकत्वाच्च गुणो यागे विधीयते ॥

यद्यपि व्रीह्यादिवदेते न क्वचित्समुदायरूपेण रूढाः, तथाऽप्यवयववद्वाग्गोद्भेदनसाधनेषु खनित्रादिषु प्रसिद्धिसंभवात्कर्मणि च कथंचिदप्यप्रसिद्धेर्नामधेयत्वेऽपि च यजितः

अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात् ॥

पूर्वाधिकरणस्थितार्थानुवादपूर्वक गुणविधिनामधेयपेटिकां तेन संगमयति—विधित्वेनेति । उद्भिदधिकरणविषयमाह—तत्रेति । तावच्छब्दश्चित्राज्याधिकरणादीनामुद्भिदधिकरणानन्तर्यरूपक्रमार्थः । तत्र हेतुगर्भविशेषणम्— यौगिकेष्विति । प्रथम यौगिकानां यागनामत्वे स्थापिते हि, भवतु तेषां यागनामत्वम्, गुणेष्वपि यौगिकत्वाविशेषात् । चित्राज्यादयस्तु गुणेषु रूढाः, न यागेष्विति विशेषात् तेषां गुणविधिरेव युक्त इति प्रत्युदाहरणसंगत्या चित्राज्याधिकरणमवतरतीति भावः । यौगिकेष्वपि न सर्वेष्वत्र विचारः, आधाराग्निहोत्रपदयोर्न्यायान्तरव्युत्पादनीयनामभावयोरेतदधिकरणन्यायाविषयत्वात्; किं तु केषांचिदेवेत्याह—उद्भिदादिष्विति । किमेषामिति । उद्भिदादिपदानां वैयधिकरण्ये यजितो भिन्नार्थवृत्तित्वे तदर्थरूपगुणविधिर्भवति; सामानाधिकरण्ये यज्येकार्थवृत्तित्वे यागनामत्वं भवति, विधान्तरेण सामानाधिकरण्यायोगादिति फलफलितभावः ॥

उद्भित्पदस्यावयवप्रसिद्ध्या वैयधिकरण्येन यजिसंबन्धं समर्थयमानः पूर्वपक्षयति—तत्रेति । उद्भित्पदस्यावयवयोर्धातूपसर्गयोर्विदारणोर्ध्वताशक्तिरूपयोगेनोर्ध्वविदारणसमर्थे खनित्रकुद्दालादौ प्रसिद्धिरस्ति; न तु यागे, उद्भेदनं प्रकाशनं पशुफलस्यानेन क्रियत इति योगकल्पनस्य क्लिष्टत्वात् । न ह्यत्र धातोरुपसर्गस्य वा प्रकाशने शक्तिरस्ति । न च पशुफलोत्पादके तत्प्रकाशनोक्तिः स्वारसिकी । किं च, गुणविधिपक्षे प्रवृत्त्युपयोगिताऽस्ति, न यागनामत्वं, तेन यजितोऽधिकप्रवृत्त्यलाभात् । अपि च, गुणविधिपक्षे तद्विषयप्रवृत्तिप्रयोजनमस्ति । यागनामत्वे तु तद्वा अन्यद्वा न किंचित्प्रयोजनं भवति । 'सामानमितरत् इयेनेन' इत्यादिषु व्यवहारलाघवस्य गुणवाचिनैव लक्षणया यागोपस्थापनेनापि संभवात् । 'यदीष्ट्या यदि पशुना यदि सोमेन यजेत (आप. श्रौतसूत्र. १० २. ८.) इत्यादिषु तथा व्यवहारदर्शनात् । तस्माद्यागाङ्गगुणः फलार्थं यागाश्रितगुणो वा विधीयत इत्यर्थः श्लोके प्रतीयते । हेतुश्चकारेण समुचितः ॥

श्लोकं व्याचष्टे— यद्यपीति । कथंचिदप्यप्रसिद्धेरिति । उद्भेदनं पशूनामनेन क्रियत इति योगकल्पना त्वतिक्लिष्टेति भावः । आनर्थक्यापत्तेरित्यनेनैव व्यवहारलाघवरूपप्रयोजनान्तरा-

प्रकृत्यन्तरानुपदेशादानर्थक्यापत्तेः; गुणविधिपक्षे तु गुणे प्रकृत्युपयिकत्वेन प्रयोजनवत्त्वाद्गुणविधानमेव युक्तम्। न च मत्वर्थलक्षणा, यागानुवादात् यदि ह्यत्र यागो विधीयेत, ततस्तस्य करणत्वादुद्भिदाद्यपि करणमिति करणस्य करणान्तरेण संबन्धायोगात् भिन्नार्थयोश्च श्रुत्या सामानाधिकरण्याभावाद्भिदुच्छब्देन तदन्तं याग लक्षयित्वोद्भिदता यागेनेति सामानाधिकरण्येन गुणो विधातव्य इति भवेन्मत्वर्थलक्षणा। यदा तु प्रकृतज्योतिष्टोमयागानुवादेन गुणमात्रमनेन विधीयते, तदा विश्विवाक्ये करणत्वेनोपदिष्टस्यापि यागस्यासाधितस्य करणत्वानुपपत्तेरर्थाक्षिप्तं साध्यत्वं तदनुवादेन तदर्थतया तदाश्रित्य वा वाक्यान्तरेण फलाय गुणे विधीयमाने नास्ति मत्वर्थलक्षणा। उद्भिदा यागः कर्तव्य इति, यागसाधनेन वोद्भिदा पशून्भावयेदिति।

भावोऽपि क्रोडीकृतः। ननु गुणविधिपक्षे यागोऽप्यप्राप्तोऽवश्यं विधेयः। अत उभयोः प्रत्येकं विधाने वाक्यभेदः स्यादिति तत्परिहारायैव विशिष्टावधानार्थमुद्भिदता यागेनेष्टं भावयेदित्युद्भित्पदस्य मत्वर्थलक्षणाऽऽश्रयणीया। तथा च लक्षणैव गुणविधिपक्षे दोष इत्याशङ्क्याह, यागोऽत्र न विधीयते, किं तु 'दध्ना जुहोति' इत्यत्र होम इवानूद्यत इति परिहरति— न चेति। यागानुवादपक्षे मत्वर्थलक्षणाभाव दर्शयितुं प्रथमं यागविधिपक्षे मत्वर्थलक्षणामुपपादयति— यदि हीति। करणान्तरेण संबन्धायोगादिति। 'क्रियां कुर्वद्धि कारकम्' इति कारकाणां क्रियायैवान्वयनियमादित्यर्थः। न च यागकरणिकायां क्रियायामेव गुणस्यापि करणतया अन्वयः शङ्क्यः, समानपदोपात्तकरणान्तरावरोधात्। ननु अनुवादपक्षेऽपि करणस्य करणान्तरान्वयासंभवरूपदोषः समानः। पुरोवादेन करणतया प्राप्तितस्य यागस्य करणतयैवानुवादस्य वाच्यत्वात्, 'यथाप्राप्त्यनुवादः' इति न्यायादित्याशङ्क्याह— यदा त्विति। पुरोवादेन यागस्य श्रुतितः करणत्वमिवासाधितस्य करणत्वासंभवादाक्षेपतः कर्मत्वमपि प्राप्तिमस्तीति कर्मत्वेनानुवादाद्धात्वर्थकर्मिकायां क्रियायां गुणस्य करणतयाऽन्वय उपपद्यत इत्यर्थः। कर्मणि गुणविधानमिति वार्तिककारपूर्वपक्षपक्षद्वयमपि तदनुवादेन तदाश्रित्य फलाय गुणे विधीयमान इति दर्शितम्। वाक्यान्तरेणेति। पक्षद्वयेऽपि वाक्यान्तरान्वय दर्शयति— उद्भिदेति। अस्मिन् पक्षे पशुकाम इत्ययं 'एकस्मै वा अन्ये यज्ञक्रतवः कामाय ह्रियन्ते, सर्वेभ्यो ज्योतिष्टोमः' इति सार्वकाम्यवाक्यप्राप्तपशुफलानुवाद इति द्रष्टव्यम्। यागसाधनेन वोद्भिदेति। उद्भिदेति तृतीयया कादाचित्करणकारकभूतो भिदुद्भिदुः पशुफलाय वाक्येन विधीयत इति गुणफलविधिपक्षे योजना। ततश्च तृतीययोक्तकरणत्वमाश्रयभूतं यागं प्रत्येव पर्यवस्यतीति यागसाधनेनेत्युक्तम्॥

नन्वेवं ज्योतिष्टोमवाक्येऽपि ज्योतिष्टोमगुणविधानान्न यागविधिरस्ति। तथा ऽन्यत्रापि सर्वत्रोपपदश्रवणात्तद्विधिरेवेति क्वचिदपि कर्मविध्यभावाल्लौकिककर्माश्रयणेन गुण-विधीनां सापेक्षत्वेनाप्रामाण्यप्रसङ्ग.। नैष दोषः। प्रकृतकर्माभावेन गत्यभावाज्ज्योतिष्टो-मवाक्ये कर्मविधानम्। तस्मिंश्च विधीयमाने नेकविधिदोषान्मत्वर्थलक्षणादोषाच्च ज्योति-ष्टोमपदमेकं कर्मनामधेयं भविष्यति। यद्वा तदेकं मत्वर्थलक्षणामाश्रित्य गुणविशिष्टकर्म-विधानम्। उद्भिदादयस्तु त्रैव प्रकृते कर्मणि गुणविधयः; वरं हि लक्षणाश्रयणमप्रामाण्यात्।

अत्र चोदनाप्रामाण्याक्षेपपर्यन्तप्राभाकरपूर्वपक्षं दूषयितुं तन्मुखेन ज्योतिष्टोमयागानुवादा-नुपपत्तिमाशङ्कते—नन्वेवमिति। सर्वेषां यागादीनां शेषपदत्वेन उपपदाकृष्टाविधिशक्तिकतया उद्भि-दन्यायतोऽपि भेदे क्वचिदपि यागविधान नास्तीति सर्वैरपि वादिभिर्गुणविधिभिर्लौकिकमेव दानादिक-माश्रयणीयम्। अतः सापेक्षत्वलक्षणं तेषामप्रामाण्यं प्रापितमित्यर्थः। उपपदसद्भावे ज्योतिष्टोम-वाक्ये कर्मविधानमनुपपन्नमिति परिहरति—नैष दोष इति। प्रकृतकर्माभावेनेति। प्रकृतं हि कर्मानूद्य गुणो विधातव्यः। न च ज्योतिष्टोमविधिवाक्यात्प्राक्किंचित्कर्म विहितं प्रकृतमस्ति। अतस्त-न्नागत्या कर्मविधानमाश्रीयते। कर्मविधौ सति गुणस्यापि प्रत्येकं विधानेऽनेकविधिरूपो वाक्य-भेदः। गुणविशिष्टकर्मविधाने कर्मणि गुणवैशिष्ट्यप्रत्यायनार्थं मत्वर्थलक्षणाऽपेक्षितेति सैव दोषः। अतो दोषद्वयपरिहाराय ज्योतिष्टोमपदरूपमेकमुपपदं नामधेयमभ्युपगम्यत इत्यर्थः। ज्योति-ष्टोमपदस्यापि उद्भिदन्यायेन प्रसिद्ध्यादिहेतुत्रयलभ्यमवयवशक्त्यादिज्योतिःसमूहरूपगुणपरत्वं न त्यक्त-व्यमिति तल्लाभाद्विशिष्टविधिपक्षमाह—यद्वेति। प्रकृते कर्मणीति नन्वविशिष्टविधिपक्षे प्रकृते कर्मणि ज्योतिष्टोमरूपोत्पत्तिशिष्टगुणावरोधाद्गुणान्तरविधानं न घटते नामपक्षेऽपि न घटते। तस्मिन् पक्षे ज्योतिष्टोमवाक्यं फलश्रवणादधिकारवाक्यमिति 'सोमेन यजेत' इति सांनहित-वाक्यस्य तदुत्पत्तिवाक्यतापर्यवसानेन उत्पत्तिशिष्टसोमावरोधादिति चेत्, नामपक्षे तावन्नैष दोषः। ज्योतिष्टोमवाक्य एव यागविधारिति पूर्वपक्षणोऽभिमतम्। तस्मिन् पूर्वपक्षे सोमवाक्यं यागानुवादेन सोमगुणमात्रविधायक भवेत्। ततश्चोत्पन्नाशिष्टत्वाविशेषाद्गुणविधिभिर्दानादीनां तेन विकल्प एव सिद्धयेन्न बाधः। सोमवाक्यस्योत्पत्तिवाक्यत्वेन सोमस्योत्पत्तिशिष्टत्वेऽपि तेषां न तेन बाधः। उद्भेदादिवाक्येषु पशुकामादिपदानि ज्योतिष्टोमिकसावकाश्यवाक्यप्राप्तफलानु-वादकानीति ह्युक्तम्। तदनुवादवैयर्थ्यपरिहाराय पश्वादिफलविशेषनिमित्तं उद्भेदादिगुणविधान-मिष्यते। यथा—'यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौमेरण स्तुवीत' इति वृष्ट्या-दिफलत्रयसाधनत्वेन विहितस्य सौमेरसान्नस्तदुत्फलविशेषनिमित्ते 'हीषति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय' इति निधनविशेषनियमनम्। एवं च नित्य विकल्प निविशमान नैमित्तिकं फलचमसन्यायेनोत्पत्तिशिष्टस्यापि नित्यस्य बाधकमिति न दोषः। अत एव

---

1 तल्लाभात्

न च लक्षणायाः प्रमाणान्तरापेक्षत्वेनाप्रामाण्यम्, पदसमभिव्याहारादेव लक्षणासिद्धेः। इतिकर्तव्यतासंनिधिविशेषाच्च 'भूयस्त्वेनोभयश्रुति' (जै. सू. ३. ३. १०) इत्यनेन न्यायेन ज्योतिष्टोमवाक्यस्थ एव कर्मविधानं नेतरेषु भवतु वा ज्यातिष्टोमवाक्येऽपि गुणमात्रविधानम्; एवमपि नाप्रामाण्यम्, 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्. 'विश्वजिता सर्वपृष्ठेनातिरात्रो भवति' इत्यादिष्वनेकगुणोपादानेन

विशिष्टविधिपक्षेऽपि नायं दोषः। एवं च 'सोमेन यजेत' इत्यत्रैव सोमविशिष्टयागविधिः। ज्योतिष्टोमवाक्यं तु उद्भिदादिवाक्यवत्तत्र गुणावधायकवाक्यमित्यपि पूर्वपक्षप्रकारान्तरं संभवतीति द्रष्टव्यम्। एवं सत्यगत्या ज्योतिष्टोमवाक्यमात्रे यागविधिरिति न वक्तव्यम्। उद्भिदादिपदवद्यौगिकस्य ज्योतिष्टोमपदस्य गुणविध्यर्थत्वेऽपि सोमवाक्यस्थैव विधास्यमानसर्वगुणाश्रययागसमर्पकत्वात् तत्रोपपत्तेः सोमशब्दस्य रूढत्वेन ज्योतिष्टोमपदवदेतदधिकरणविषयत्वशङ्कानास्पदत्वात्। मत्वर्थलक्षणाया लक्षणैव दोष इत्याशङ्क्य परिहरति— वरं हीति। लक्षणाश्रयणेनापि औत्सर्गिकप्रामाण्यसंरक्षण युक्तमिति भावः। ननु लक्षणापक्षेऽप्यविशिष्ट एवाप्रामाण्यापातः। मानान्तरेण वाक्यार्थेऽवगते हि तान्नर्वाहकपदार्थसमर्पणाय लक्षणाकल्पनम्। अत एव 'न विधौ परः शब्दार्थः' इत्यभियुक्तप्रसिद्धिरित्याशङ्क्याह—न च लक्षणाया इति। पदसमभिव्याहारादिति; अप्राप्तगुणयागसमर्पकज्योतिष्टोमयजिसमभिव्याहारात्। प्रत्येकावधाने वाक्यभेदपरिहाराय लक्षणा स्वयमेव न्यायतः प्रवर्तते। 'न विधौ परः शब्दार्थः' इत्येतत्तु अनुवादमुख्यतानुसारेण विधौ न लक्षणेत्येवंपरम्। अत एव 'अर्धमन्तर्वेदि' इत्यादिविधिष्वपि लक्षणाश्रयणमिति भावः। ननु उद्भिज्ज्योतिष्टोमपदयोर्यौगिकत्वाविशेषे किमित्याद्ये गुणमात्रविधिरन्यत्र यागविधिराश्रीयते; विपरीतं किं न स्यात्? न च ज्योतिष्टोमस्य प्रकृतत्वात्तदाकाङ्क्षया तत्रैवोद्भिदादिगुणविधिः; सहस्रदक्षिणयागविधिव्यवहितस्य ज्योतिष्टोमस्य प्रकृतत्वासिद्धेरित्याकाङ्क्षायां विनिगमकमाह—इतिकर्तव्यतेति। वेदद्वये श्रूयमाणस्य यागस्य यत्र वेदेऽङ्गभूयस्त्वं तत्र विधिः, अन्यत्र तदङ्गमात्रविधिः। यथा— द्विविधे सेनासंनिवेशे यत्र रथगजादिभूयस्त्वं तत्र राजा; अन्यत्र तत्परिवारमात्रमिति 'भूयस्त्वेनोभयश्रुति' (जै. सू. ३. ३. १) इत्यस्मिन् तृतीयाध्यायाधिकरणे न्यायो दर्शितः, स न्याय इहापि समानः। ज्योतिष्टोमे हि भूयांस्यङ्गान्यम्नातानि नोद्भिदादिष्विति। यद्यपि कल्पसूत्रेषु उद्भिद्यागानुष्ठानानन्तरं संवत्सरपर्यन्तमाग्नेयाष्टाकपालप्रयनुष्ठानम्, सवत्सरान्ते वैष्णवियागानुष्ठानमिति इष्टिरूपेतिकर्तव्यताभूयस्त्वमुक्तम्, तथाऽप्युद्भिदि इतिकर्तव्यतालघुत्ववचनं शाखाविशेषाभिप्रायम्; उद्भित्तन्त्रमध्ये तादृतिकर्तव्यतारूपेण अनुष्ठेयभूयोङ्गाम्नानाभावाभिप्रायं वा योज्यम्। यद्वा एतदस्वरसादाह— भवतु वेति। यदाग्नेयवाक्ये त्वष्टसु कपालेषु संस्कृतः पुरोडाशः, अग्निर्देवता चेत्यनेकविधानम्; विश्वजिद्वाक्ये रथन्तरबृहद्रूपवैराजशाक्वररैवतस्तोमानां

कर्मणोऽवश्यं विधातव्यत्वात्। तत्रैव ज्योतिष्टोमोद्भिदादिगुणविधिसंभवान्न लौकिककर्माश्रयणादप्रामाण्यम्। कथमप्रकृतेषु गुणविधानम्? इति चेत्, लौकिकं वा किं प्रकृतम्, येन तत्र गुणो विधीयेत; तेन यदि तावदप्रकृतेऽपि विधिः स्यात्ततो विश्वजिदादिष्वेव विधानान्नाप्रामाण्यम्। अथ न तत्र, लौकिकेऽप्यविधानाद्विशिष्टविधिरित्युभयथाऽपि नाप्रामाण्यम्। न चौत्पत्तिकज्योतिष्टोमादिगुणावरोधादुद्भिदादिगुणानामविधानम्, काम्यत्वेन तेषां नित्यगुणबाधकत्वात्। 'उद्भिदा यजेत पशुकामः' इति हि प्रकृतं ज्योतिष्टोममाश्रित्योद्भिदुणः पश्वर्थत्वेन विधीयते। तस्माद्गुणविधिरिति प्राप्ते, अभिधीयते—

धातोरत्यन्तपारार्थ्याद्विप्रकृष्टविधेस्तथा। फले कर्मणि वा नेह गुणो वाक्ये विधीयते॥

फले तावद्विधीयमाने गुणे परपदसंबन्धविधानाद्धातोरत्यन्तपारार्थ्यं स्यात्, विप्रकृष्टार्थविधिश्चापद्यते। अथ तु कर्मण्येव गुणो विधीयते, तथाऽपि विप्रकृष्टार्थविधानम्, धातोश्च किंचित्पारार्थ्यमस्त्येव, फलपदं चानर्थकं स्यात्॥

द्वादशाहिकपृष्ठसाम्नां कात्स्न्र्यम्, अतिरात्रसंस्था चेत्यनेकगुणविधानम्। विशिष्टविधिरिति। अप्रकृतत्वं तल्लौकिकेष्विव ज्योतिष्टोमदर्शपूर्णमासविश्वजिदादिष्वपि गुणविधौ। उद्भिदादिष्वेव मत्वर्थलक्षणामङ्गीकृत्य गुणविशिष्टकर्मविधिरित्यर्थः। कर्मणि गुणविधानपक्ष इव कर्माश्रित्य फलाय गुणविधिरिति पक्षे उत्पत्तिशिष्टगुणावरोधशङ्कैव नावतरतीत्याह— न चौत्पत्तिकेति। कर्मणि फले वा गुणविधिरिति पूर्वपक्षमुपसंहरति— तस्मादिति॥

धातोरिति। फलाय गुणविधौ धातुः केवलं प्रत्ययानुग्रहार्थः, न तु फलार्थगुणस्याश्रयसमर्पणार्थः। गुणस्य फलसंबन्धवदाश्रयसंबन्धस्यापि वाक्येनैव बोधने वाक्यभेदापत्त्या गुणफलविधिषु प्रकरणादेवाश्रयलाभस्य वक्तव्यत्वादिति धातोरत्यन्तपारार्थ्यम्। प्रकरणादाश्रयलाभे च गुणफलविधिरेव वक्तव्यः। समानपदोपात्तं यांजमुल्लङ्घ्य पदान्तरोपात्तस्य गुणस्याख्यातेन विधानं विप्रकृष्टविधानम्। कर्मणि गुणविधौ यजेः प्रत्ययानुग्रहमात्रार्थत्वकृतात्यन्तपारार्थ्याभावेऽपि स्वयं विधेयसमर्पकत्वाभावात्कर्मणि गुणविधानार्थमनुवाद्यसमर्पणार्थत्वादस्ति पारार्थ्यं, पूर्ववद्विप्रकृष्टविधानं च। एतैर्हेतुभिः फले कर्मणि च गुणविधानं न संभवतीत्यर्थः॥

श्लोकं व्याचष्टे—फले तावदिति। परपदसंबन्धविधानात्; पशूद्भित्पदसंबन्धविधानात्। फलपदं चेति। फलविशेषे निमित्ते कर्मणि गुणविशेषविधानार्थतया कथंचित्फलपदस्याफल्योपपादने तु पूर्वोक्तो धातुपारार्थ्यविप्रकृष्टविधिदोषो द्रष्टव्यौ॥

श्रीः

॥ बालभारतम् ॥

मनोहराख्यया व्याख्यया सहितम् ॥

चतुर्थः सर्गः ॥

कौरवस्य सचिवः पुरोचनः प्रस्थितः प्रथममेव तत्पुरम् ।
वह्निना शमयितुं पृथासुतानाशु जातुषमकारयद्गृहम् ॥ १ ॥

वल्लसद्वेणि चाणूरमल्लमर्दि महात्मनाम् ।
वल्लभं वस्तु किमपि वल्लवीवल्लभं भजे ॥

कौरवस्येति । पुरोचनः पुरोचनाख्यः कौरवस्य सुयोधनस्य सचिवः मन्त्री 'मन्त्री सहायः सचिवौ' इत्यमरः । प्रथमं युधिष्ठिरगमनात् पूर्वमेव । ज्वरादिपाठात् प्रथममित्यव्ययम् । तत्पुरं वारणावतं प्रस्थितः, वारणावतमुद्दिश्य प्रस्थित इत्यर्थः । प्रपूर्वात्तिष्ठतेः कर्तरि क्तः । 'यातिस्थतिमास्थामित्ति किति' इति आकारस्य इकारः । अत्र प्रस्थानक्रियायाः अकर्मकत्वेऽपि तदङ्गभूतोद्देशक्रियापेक्षया सकर्मकत्वम् । अस्ति च धातूनां क्रियान्तरोपसर्जनस्वार्थाभिधायकत्वम् ; यथा कुसूलात् पचतीत्यादौ आदानक्रियागर्भः पाको विधीयत इति । पृथासुतान् कुन्तीपुत्रान् वह्निना अग्निना 'वह्निरक्षणि ह्येऽग्नौ च' इति रत्नमालायाम् । शमयितुं नाशयितुम् ; 'मितां ह्रस्वः' इति ह्रस्वः । जतुनो लाक्षाया विकारो जातुषम् । 'तस्य विकारः' इत्यण् । 'त्रपुजतुनोः षुक्' इति षुगागमः । 'जतुत्रपुविकारे तु जातुषं त्रापुषम्' इत्यमरः । गृहमाशु शीघ्रमकारयत् कारितवान्, क्षिपिभिरिति शेषः । करोतेर्हेतुमण्ण्यन्ताल्लङ् । अस्मिन् सर्गे रथोद्धतावृत्तम्, 'राजराविह रथोद्धता लगौ' इति लक्षणात् ॥ १ ॥

वारणावतमुपागतः पुरे पौरलोचनसुधां युधिष्ठिरः ।
सद्म दुष्टसचिवेन दर्शितं संभृतोपकरणं ददर्श सः ॥ २ ॥

वारणावतमिति । पुरे सर्वेषां पौराणां तेषां लोचनानां नेत्राणां सुधामृतं चन्द्रस्तद्वदाह्लादकः इत्यर्थः । युधिष्ठिरो धर्मात्मजो वारणावतं पुरमुपागतः सन् दुष्टसचिवेन दुष्टमन्त्रिणा दर्शितम्, संभृतानि सोपकरणानि राजयोग्यवस्तूनि यस्मिन् तत् तथोक्तम् । सद्म गृहं आवसथदेवसद्मनिकेतनम्' इत्यमरः । विशेषेण ददर्श ॥ २ ॥

भोज्यवस्तुषु विषं निधास्यतो वासवेश्मनि च जातवेदसम् ।
क्षत्तुरास वचसा पुरोचनात्पाण्डवा विपदमाशशङ्किरे ॥ ३ ॥

भोज्येति । पाण्डवाः भोज्येषु भक्ष्येषु 'भोज्यं भक्ष्ये' इति निपातनात् कुत्वाभावः । वस्तुषु पदार्थेषु विषं गरलम्, वासवेश्मनि गर्भगृहे 'गर्भागारं वासगृहम्' इत्यमरः । जातवेदसमग्निं च निधास्यतः निक्षेप्स्यतः 'लटः सद्वा' इति शतृप्रत्ययः । पुरोचनात् सकाशात्, क्षत्तुः विदुरस्यास्यवचसा 'पुरोचनः युष्मान् येन केनापि प्रकारेण घातयिष्यति, अप्रत्यक्षमस्तिष्ठत' इत्येवंरूपेण हितवचनेन विपदमापदमाशशङ्किरे शङ्कितवन्तः । 'शंक शङ्कायाम्' इत्यस्माद्धातोर्लिट् ॥

तेन यद्यदुपनीतमन्वहं भूषणांशुकविलेपनादिकम् ।
धारयद्भिरतिगूढमाङ्गितं नैव तैरपरीक्ष्य नाददे ॥ ४ ॥

तेनेति । तेन पुरोचनेन भूषणान्याभरणानि 'अलंकारस्त्वाभरणं परिष्कारो विभूषणम्' इत्यमरः । अंशुकानि वस्त्राणि 'चेलं वसनमंशुकम्' इत्यमरः । विलेपनं चन्दनादि 'वर्णकोऽस्त्री विलेपनम्' इत्यमरः । भूषणांशुकविलेपनम्, 'जातिरप्राणिनाम्' इत्येकवद्भावः । तदादियस्य तत् । यद्यद्वस्तु अन्वहं प्रतिदिनमुपनीतं उपहृतं तत्तद्वस्तु अतिगूढमनाकृतं यथा भवति तथा इङ्गितं चेष्टाम्, हृदयगतं भावं वा इङ्गितम्, 'इङ्गित गतिचेष्टयोः' इति रत्नमालायाम् । 'इङ्गितो हृद्गतो भावः' इति सज्जनः । धारयद्भिर्धानरैः पाण्डवैरपरीक्ष्य परीक्षामकृत्वा नाददे, किं तु परीक्ष्य गृहीतमित्यर्थः । ददातेः कर्मणि लिट् ॥ ४ ॥

वासराणि मृगयादेशतः काननेषु नयति स्म पौरवः ।
तेन सर्ववदधिष्ठिते गृहे जाग्रदेव रजनीश्च सानुजः ॥ ५ ॥

वासराणीति । पौरवो युधिष्ठिरः... ॥ ५ ॥

जातु निद्रितपुरोचने गृहे मारुतिर्निशि निधाय पावकम् ।

भ्रातृमातृसहितः [1]सुरङ्गया निर्ययौ विदुरभृत्यकल्पया ॥ ६ ॥

भ्रातृभिरिति । भ्रातृभिः युधिष्ठिरादिभिः मात्रा कुन्त्या च सहितः सन् विदुरस्य भृत्येन किङ्करेण कल्पया, पाण्डवबन्धुत्वेन विदुरेण तेषां निःसारणार्थं प्रागेव कारितयेत्यर्थः । सुरङ्गया बिलद्वारेण निर्ययौ निर्गतवान् । चोरादिभिर्गृहप्रवेशार्थं कृतं बिलं सुरङ्गेत्युच्यते ॥ ६ ॥

ज्वालजालविषये पुरोचने पार्थविद्विषि भृशं प्रहृष्यतः ।

अट्टहास इव जातवेदसः शुश्रुवे झटिति दाहनिस्वनः ॥ ७ ॥

ज्वालेति । पार्थविद्विषि पाण्डववैरिणि पुरोचने ज्वालजालानामर्चिःसमूहानां विषये गोचरे सति भृशमत्यर्थं प्रहृष्यतो लब्धतः जातवेदसो वह्नेः अट्टः अतिशायितो हासः अट्टहास इव 'अट्टावतिशयक्षौमौ' इत्यमरः । दाहनिस्वनो दाहध्वनिः, झटिति शीघ्रम् 'द्राग्झटित्यञ्जसाहाय' इत्यमरः । शुश्रुवे श्रुतः । जनेरिति शेषः । 'श्रु श्रवणे' इत्यस्माद्धातोः कर्मणि लिट् ॥ ७ ॥

या पुरोचनगिरा गरं फले दित्सुराश्रितवती चिरं पृथाम् ।

सा च तत्र शयिता वनेचरी पञ्चभिः सह सुतैरदह्यत ॥ ८ ॥

येति । या वने चरतीति वनेचरी भिक्षुकी । 'चरेष्टः' इतिवात् ङीप् 'तत्पुरुषे कृति बहुलम्' इति समासे अलुक् । पुरोचनस्य गिरा वचनेन फले गरं विषं दित्सुर्दातुमिच्छुः सती, ददातेः सन्नन्तादुप्रत्ययः । 'सनि मीमा' इत्यादिना इसादेशः । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । चिरं बहुकालं कुन्तीमाश्रितवती ; श्रयतेः 'निष्ठा' इति भूतार्थे क्तवतुप्रत्ययः । 'उगितश्च' इति ङीप् । सा वनेचरी तत्र गृहे शयिता निद्राणा सती, शेयतेः कर्तरि क्तः, 'निष्ठा शीङ्' इत्यादिना निष्ठायाः कित्वनिषेधात् गुणः । 'निद्राणशयितौ समौ' इत्यमरः । पञ्चभिः सुतैः सहादह्यत भस्मीभूता । दहेः कर्तरि लङ् । यद्वा, अदह्यत दग्धा अग्निनेति शेषः । कर्मणि लङ् ॥ ८ ॥

प्रातरत्र पुरवर्तिनो जना भस्मनेहृतबिलाननं[2] गृहे

वीक्ष्य दग्धवपुषं वनेचरीं सात्मजां यदुसुतामसंशत ॥ ९ ॥

प्रातरिति । प्रातः प्रभाते । 'सायं चाये प्रगे प्रातः' इत्यमरः । पुरवर्तिनो वारणावतवासिनो जना एत्यागत्य भस्मना निहृतं छादितं बिलाननं सुरङ्गामुखं यस्य तत्तस्मिन् । 'सुषिरं विवरं बिलम्' इत्यमरः । गृहे दग्धवपुषं भस्मीकृतदेहाम् । 'गात्रं वपुः संहननम्' इत्यमरः । वनेचरीं वीक्ष्य दृष्ट्वा, सात्मजां सपुत्रां यदुसुतां कुन्तीं असंशत मेनिरे । मन्यतेर्लुङ् ॥ ९ ॥

---

1. सुरङ्गया 2. °बिल°

तां प्रवृत्तिमुपलभ्य शोचतो नागसाह्वयपुराधिवासिनः ।
उद्यया विव जनस्य मानसे निर्वृतो जतुनिकेतनानलः ॥ १० ॥

तामिति । निर्वृतः प्रशान्तः जतुनिकेतनानलः लाक्षागृहाग्निः, 'राक्षा लाक्षा जतुन्यपि' इत्यमरः । तां प्रवृत्तिं पाण्डवदाहरूपां वार्तामुपलभ्य श्रुत्वा 'वार्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः । शोचतो रुदतः नागसाह्वयपुराधिवासिनः हस्तिननगरवासिनः । 'नगरं नागसाह्वयम्' इति महाभारते । जनस्य मानसे चित्ते उद्यया इव उदभूदिव । जतुगृहानलादपि दुःसहो दुःस्वाग्निर्जनहृदये जात इत्यर्थः ॥ १० ॥

पार्थनाशमुदिता नृपात्मजा बाष्पमूहुरभिनीतमन्यवः ।
आतपक्वथितपाथसो बहिः शीतगर्भसलिला इव ह्रदाः ॥ ११ ॥

पार्थेति । पार्थनाशेन कौन्तेयनाशेन, मुदिता हृष्टा नृपात्मजाः धार्तराष्ट्राः अभिनीतः अभिनयितो मन्युः शोको यैः ते तथोक्ताः सन्तः, बहिः प्रकटितशोका इत्यर्थः । 'मन्युशोकौ तु गुरू स्त्रियाम्' इत्यमरः । बाष्पं नेत्रजलम् । 'बाष्पो नेत्रजलोष्मणी' इत्यमरः । बहिः प्रदेशे आतपक्वथितपाथसः आतपपरितप्तजलाः शीतानि गर्भसलिलानि अन्तर्जलानि येषां ते । ह्रदाः जलाधाराः । बाष्पमूष्माणमिव । 'जलाशयो जलाधारस्तत्रागाधजले ह्रदः' इत्यमरः । ऊहुर्वहन्ति स्म । अन्तस्तुष्टा बहिर्दुःखिता इव बाष्पमुद्वहन्ति स्मेत्यर्थः । ऊहुरिति वहतेर्लिटि कृतसंप्रसारणस्य द्विर्वचनम्, सवर्णदीर्घः ॥ ११ ॥

निर्गतो बिलपथात्तु मारुतिर्भ्रातृभिः सह वहन्स्वमातरम् ।
ऊरुपातितसमीपपादपो गन्धनाग इव काननं ययौ ॥ १२ ॥

निर्गत इति । मारुतिर्भीमसेनस्तु बिलपथाद्बिलमार्गात् । 'ऋकपूः' इत्यादिना समासान्तोऽकारः । निर्गतो निष्क्रान्तः सन् भ्रातृभिः सह स्वमातरं कुन्तीं वहन् ऊरुभ्यां सक्थिभ्यां पातिताः समीपपादपाः येन स तथोक्तः सन् गन्धप्रधानो नागो गन्धनागः । मदगज इव, शाकपार्थिवादित्वादुत्तरपदलोपी समासः । काननं ययौ ॥ १२ ॥

तत्र तान्गमनवेगविह्वलानंसबाहुयुगलावतारितान् ।
स्वापमुद्रितदृशः सरस्तटे तिष्ठति स्म परिपालयन्नयम् ॥ १३ ॥

तत्रेति । अयं भीमसेनः तत्र वने सरसः कासारस्य । 'कासारः सरसी सरः' इत्यमरः । तटे, गमनेन वेगेन विह्वलान् विस्रस्तान् । विह्वलो 'विह्वलः स्यात्' इत्यमरः । अंसयोः स्कन्धयोः

बाहोः करयोश्च युगलाभ्यां सकाशादवतारितानवरोपितान् स्वापमुद्रितदृशः निद्रामुकुलितलोचनां-स्तान् मातृसहितान् भ्रातॄन् परिपालयन् परिरक्षन् तिष्ठन्ति स्म तस्थौ ॥ १३ ॥

काऽपि योषिदथ रूपशालिनी पाण्डवेन दृदृशे परिष्कृता ।
आगतेव वनमस्तकण्टकं स्वेन कारयितुमस्य देवता ॥ १४ ॥

काऽपीति । अथानन्तरं रूपशालिनी स्वरूपशोभिनी परिष्कृताऽलंकृता 'भूषितश्च परिष्कृतः' इत्यमरः । काऽपि योषित् स्त्री 'स्त्री योषिद्बला योषा' इत्यमरः । वनमरण्यमस्तकण्टकं नाशितक्षुद्रशत्रुकम् । 'सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः' इत्यमरः । स्वेनात्मनैव भीमेनेति यावत् 'इकोरन्यतरस्याम्' इति विकल्पात्तृतीया कारयितुमागता अस्य वनस्य देवतेव पाण्डवेन भीमेन । ददृशे दृष्टा ॥ १४ ॥

अब्रवीच्च तमुपेत्य कुर्वती दन्तरश्मिदलितं निशातमः ।
कस्त्वमङ्ग क इमे तवाग्रतः स्थीयते किमिह दारुणे वने ॥ १५ ॥

अब्रवीच्चेति । सा स्त्री तं भीमसेनमुपेत्य निशायां तमस्तिमिरं दन्तरश्मिदलितं दन्तरश्मिशकलितं कुर्वती सती । 'किरणप्रग्रहौ रश्मी' इत्यमरः । अब्रवीच्च । किमित्याह—अङ्गेति संबोधने 'अङ्गेत्यामन्त्रणेऽव्ययम्' इति रत्नमालायाम् । अङ्ग भोः, त्वं कः को वा ? तवाग्रतः पुरतः इमे वर्तमानाः के के वा ? दारुणे भीषणे । 'दारुणं भीषणं भीष्मं' इत्यमरः । इहास्मिन् वने किं किमर्थं स्थीयते उच्यते भावे लट् ॥ १५ ॥

अस्ति कश्चन हिडिम्ब इत्यमुं राक्षसो गहनगर्भमाश्रितः ।
मर्त्यगन्धमुदितेन तेन च प्रेषिताऽस्मि हनने यवीयसी ॥ १६ ॥

अस्तीति । कश्चन कश्चित् हिडिम्ब इति प्रसिद्धः रक्ष एव राक्षसः असुरः, प्रज्ञादिभ्यश्चेत्यण् । अमुं गहनगर्भं वनमध्यमाश्रितः सन् अस्ति वर्तते । 'गहनं काननं वनम्' इत्यमरः । मर्त्यगन्धमुदितेन नरगन्धहृष्टेन तेन हिडिम्बेन यवीयसी स्वसा अहं वो युष्माकं हननेवधनिमित्तमित्यर्थः । निमित्तात् कर्मसंयोगे सप्तमी । प्रेषिता प्रहिताऽस्मि ॥ १६ ॥

पुष्पसायकविकासकारिणो मूर्तिभाज इव कानने मधोः ।
जायते हि तव संनिधानतो वीरुधीव मयि रागपल्लवः ॥ १७ ॥

पुष्पसायकेति । कानने वने मूर्तिभाजः मूर्तिमतः पुष्पसायकविकासकारिणः मदनहर्षविधायिनः मधोः वसन्तस्येव 'मधुर्वसन्ते दैत्ये च' इति विश्वः । पुष्पसायकविकासकारिणो

मदनोद्दीपकस्य तव संनिधानतः सान्निध्यात् वीरुधि लतायामिव 'लता प्रतानिनी वीरुत्' इत्यमरः। मयि रागोऽनुराग एव पल्लवः प्रवालः अन्यत्र रागयुक्तः पल्लवः लाक्षारसे हि प्रादुर्भवति खलु, रागोऽनुरागे मात्सर्ये रक्तवर्णे रजःस्वाने। इत्यमरः। त्वद्दर्शनान्मम 'कामानुभाव' समजनीति भावः॥ १७॥

उज्झितोग्रवपुरीदृशाकृतिस्त्वाम्बुधेरनितरभ्यधामिषम्।
पङ्किलौघरहितः घनात्यये निम्नगेव विमलाम्बुरम्बुधिम्॥ १८॥

उज्झितेति। उज्झितं त्यक्तं उग्रं भयंकरं वपुर्यस्याः सा ईदृशी ईदृग्विधा आतेरम्या आकृतिर्यस्याः सा, 'स्त्रियाः पुवत्' इति पुवद्भावः। अहरुवीरगात्रश्चपलवृत्तिः स्त्री घनात्यये मेघान्ते शरदीत्यर्थः। पङ्किलेन पङ्कवता; पिच्छादिलाञ्छनात्[1]। ओघेन प्रवाहेण। ओघो वृन्देऽम्भसां रये' इत्यमरः। रहिता विमुक्ता विमलाम्बुः निर्मलजला निम्नगा नदी 'स्रवन्ती निम्नगाऽऽपगा' इत्यमरः; अम्बुधिं समुद्रमिवाभ्ययासिषम् स्वयमेवायातवती अभूवम्। यातेर्लुङि उत्तमपुरुषैकवचनम्॥ १८॥

आपतिष्यति विलम्बनेन हे रोषणः स पुरुषादपुंगवः।
रोमहर्षिणि करे गृहाण मां सुभ्रु वज्रिणमिव भवता सह नभः॥ १९॥

आपतिष्यतीति। हे सुभ्रु विलम्बनेन कालक्षेपेण रोषणः कोपनशीलः 'कुधमण्डार्थेभ्यश्च' इति युच्। पुरुषानदन्ति भक्षयन्तीति पुरुषादाः राक्षसाः, कर्मण्यण्। तेषां पुंवद्भावः श्रेष्ठः स हिडिम्बः आपतिष्यति आगमिष्यति। तस्मात् रोमहर्षिणि पुलकिनि। 'रोमाञ्चो रोमहर्षणम्' इत्यमरः। करे पाणौ मां गृहाण धारय; पाणिग्रहणं कुर्वित्यर्थः। भवता सह नभः आकाशमुत्पतामि उद्गच्छामि॥ १९॥

सस्मितः पवनसूनुरब्रवीदग्रजोऽयमविवाहमङ्गलः।
तेन सुभ्रु परिवेत्तृता मम त्वत्परिग्रहणकर्मणा भवेत्॥ २०॥

सस्मित इति। पवनसूनुः भीमसेनः सस्मितः सहास्यम् अब्रवीत् उक्तवान्। किमित्याह— अयमग्रजो ज्येष्ठभ्राता; न विद्यते विवाहमङ्गलं विवाहोत्सवो यस्य स तथोक्तः। तेन कारणेन हे सुभ्रु सुन्दरि त्वत्परिग्रहणकर्मणा भवत्पाणिग्रहणक्रियया मम परिवेत्तृता भवेत् परिवेत्तृत्वं स्यात्। 'परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात्' इत्यमरः॥ २०॥

---

1. कामानुरागः

एभिरत्र विपिनेऽभिरक्षितो भ्रातृभिः सह विहाय मातरम् ।
कुत्रचित्कुणपभोजिनो भयान्मा दृशः कथमिवेद्य जेष्यति ॥ २१ ॥

एभिरिति । अत्रास्मिं विपिनेऽक्षितौ वनभुवि ' 'अटव्यरण्यं विपिनम्' इत्यमरः । एभिर्भ्रातृभिः सह इमां मातरं विहाय त्यक्त्वा मादृशो मामेवोद्दिश्य इत्यर्थः । जनः कुणपभोजिनो शवभक्षकात् । भीत्रार्थानाम्' इति पञ्चमी । कुणपं शवक्लिब्यम्' इत्यमरः । भयाद्धेतोः । 'भीतिभीः साध्वस भयम्' इत्यमरः । कुत्रचित् कस्मिंश्चित् प्रदेशे कथमिव व्रजेत् । कंचित्प्रदेशं कथं गच्छेदित्यर्थः । 'इतराभ्योऽपि दृश्यन्ते' इति द्वितीयायाश्चल् । इवशब्दो वाक्यालंकारे । 'विभाषा कथमि लिङ् च' इति लिङ् ॥ २१ ॥

मुग्धबुद्धिरसि कः स्त्रिया पुमान्रक्ष्यते भयादविक्लवः ।
द्रक्ष्यसि त्वमिह ते सहोदरं भृङ्गकर्णणे वृकोदरं च माम् ॥ २२ ॥

मुग्धेति । हे भ्रुव । त्वं मुग्धबुद्धिरसि मूढबुद्धिरसि 'मुग्धः मुग्धरमूढयोः' इति विश्वः । कुत इत्यत आह— अविक्लवो निर्भयः कः पुमान् स्त्रिया कर्त्र्या परभयाद्रक्ष्यते त्रायते; न कोऽपि स्त्रिया रक्ष्यत इत्यर्थः । इहास्मिन् युद्धकर्मणि रणक्रियायां ते तव सहोदरं भ्रातरं वृकोदरं भीमसेनं मां च द्रक्ष्यसि । आधिक्ययद्योतनार्थं स्वनामग्रहणम् ॥ २२ ॥

रोषवह्निकणवर्षिलोचनं भीषणभ्रुकुटि बिभ्रदाननम् ।
सृक्किणी रसनया लिहन्मुहुः प्रादुरास पुरतो निशाचरः ॥ २३ ॥

रोषेति । रोषः कोप एव वह्निः तस्य कणाः स्फुलिङ्गाः तान् वर्षत इति तद्वर्षिणी ते लोचने यस्य तत्तथोक्तम्, भीषणा भयकरा भ्रुकुटिर्भ्रूभङ्गो यस्य तदाननम् । बिभ्रत् दधानो निशाचरो हिडिम्बः मुहुः पुनःपुनः रसनया जिह्वया सृक्किणी ओष्ठप्रान्तौ लिहन् आमृशन् पुरः अग्रे प्रादुरास आविर्बभूव । अस्तेः इदं रूपं न साधु भवति, 'लिट् च' इत्यार्धधातुकसंज्ञायाम् 'अस्तेर्भूः' इति भ्वादेशेन भवितव्यम् । ततश्च बभूवेति भवितव्यम् । आसेति ततो विभक्तिप्रतिरूपकमव्ययम् ॥ २३ ॥

प्राङ्नृणामसृजि कामुकाऽधुना लक्ष्यसे यदिह पुंसि कामुकी ।
मत्कुलादसि बहिष्कृतेति ना भाषितेन भवितोम वर्त्सयत् ॥ २४ ॥

प्रागिति । हे दुर्विनीते प्राक् पूर्वं नृणां नराणामसृजि रक्ते कामुका इच्छावती 'लषपत-पद...' इत्यादिना कमेरुकञ्प्रत्ययः । अधुना इदानीं यद्यस्मात्कारणात् इहास्मिन् पुंसि कामुकी वृषस्यन्ती मैथुनेच्छावती यर्थः । लक्ष्यसे दृश्यसे । 'जानपद...' इत्यादिना कामुकशब्दान्मैथुने-

ङ्ङ्यां ङीष्प्रत्ययः ; तदभावे टाप् । 'इच्छावती कामुका स्याद्वृषभ्यन्ती तु कामुकी' इत्युभयत्राप्यमरः । तत्तस्मात्कारणात् मम कुलादन्वयात् बहिष्कृता निर्यामिता । 'इदुदुपधस्य चाप्रत्ययस्य' इति विसर्जनीयस्य षकारः । असि भवसि । यस्मान्नरक्तधिरपायिनी त्वं नरमेवाभिगन्तुमिच्छसि, तस्मात्कुले स्थातुं न योग्याऽसि इति भावः । इति इत्थं भाषितेन वचनेन भगिनीं स्वसारमभर्त्सयत् निर्भर्त्सितवान् । यद्यपि चुरादिषु आकुस्मादात्मनेपदिन इति आकुस्मीयेषु 'भर्त्स' इति नित्यात्मनेपदी पठ्यते, अथापि भर्त्सयतेः परस्मैपदं तर्जयतीतिवत् कविसमयसिद्धम् । तथा च कालिदासप्रयोगः— 'तर्जयन्निव केतुभिः' इति ॥ २४ ॥

कान्तरूप धिगिमां निशाचरीं दिष्ट्यतामुपगतो नियुद्धतः[1] ।
भोक्ष्यसे दिवि सुराङ्गनामिति व्याहरन्ननिलसूनुमभ्यगात् ॥ २५ ॥

कान्तेति । हे कान्तरूप हे सुन्दरवपुः, अथ रूपं नपुंसकम् । स्वभावाकृतिसौन्दर्यवपुः सुश्लोकशब्दयोः' इति केशवः । इमां निशाचरीं राक्षसीं धिक्; धिग्योगे द्वितीया । धिक्शब्दो निन्दायाम् । नियुद्धतो बाहुयुद्धात् । 'नियुद्ध बाहुयुद्ध स्यात्' इत्यमरः । सुराङ्गनां सुरनारीं भोक्ष्यसे अनुभविष्यसि । इत्येवं व्याहरन् ब्रुवन् हिडिम्बः अनिलसूनं वृकोदरमभ्यगात् अभ्यगच्छत् ॥

निर्मितेन नियुयुत्सुनाऽमुना क्ष्वेलितेन भृशमाकुले वने ।
प्रत्यबुध्यत सुतैः समं पृथा शावकैरिव मृगेन्द्रगेहिनी ॥ २६ ॥

निर्मितेनेति । नियुयुत्सुना बाहुयुद्धं कर्तुमिच्छता अमुना हिडिम्बेन निर्मितेन कृतेन क्ष्वेलितेन सिंहनादेन भृशमत्यर्थमाकुले आकीर्णे वने पृथा कुन्ती सुतैः समं, शावकैः डिम्भैः 'डिम्भः पृथुकः शावकः शिशुः' इत्यमरः । मृगेन्द्रगेहिनी सिंहप्रियेव प्रत्यबुध्यत जजागार । बुधेर्दैवादिकात्कर्तरि लङ् ॥ २६ ॥

मूर्तयेव सविधे जयश्रिया वीक्ष्यमाणवपुषं हिडिम्बया ।
रक्षसा सह नियुद्धकारिणं भीममैक्षिषत पाण्डुनन्दनाः ॥ २७ ॥

मूर्तयेति । सविधे समीपे 'सदेशाभ्याशसविध...' इत्यमरः । मूर्तया साकारया जयश्रिया जयलक्ष्म्येव हिडिम्बया राक्षस्या वीक्ष्यमाणवपुषं विलोक्यमानमूर्तिं रक्षसा हिडिम्बेन सह नियुद्धकारिणं बाहुयुद्धविधायिनं भीमं वृकोदरं पाण्डुनन्दनाः ऐक्षिषत ददृशुः । ईक्षतेर्लुङ् ॥ २७ ॥

मुष्टिभिः कुलिशपातनिष्ठुरैः पीवरोरुभुजयन्त्रपीडनैः ।
निष्पिपेष [2]परुषं निशाचरं मारुतिर्मधुमिवादिपूरुषः ॥ २८ ॥

---

1. ०मभ्यगात् 2. सरुषं

मित्रीयन्ति दवीयन्ति कुम्भजीयन्ति यद्दृशः
आत्मानं मोहनीहारयापारण्य भवाब्धिषु ॥ २७ ॥

यदविद्यावशेनाथ मोमुह्यन्त्यखिला जनाः ।
ज्ञानात्मनो हि जिज्ञासा हरे ते नृविडम्बना ॥ २८ ॥

अथापि निवेदयितव्यतया अस्मदभिमतवृत्तान्तानुगुणानुयोगेन सरसवाङ्मिश्रणावसरलाभात्सफलोदन्तकथनैकलालसमपि मानसं भवता समवलम्बमानमवधानमभिलषतीति ॥

ततः—

अशेषजनतानन्दसंदोहस्यन्दिकामिमाम् ।
वाचमङ्कूरयामास नारदो वाग्विशारदः ॥ २९ ॥

श्रीमान्बृहत्सेन इति प्रतीतो मद्राधिभूर्भद्रगुणैकतानः ।

मित्रीयन्तीति । यद्दृशः कर्तृ ; मोहनीहारपापारण्यभवाब्धिषु क्रमात् स्वात्मानं मित्रीयन्ति सूर्यमिवाचरन्ति ; दवीयन्ति अरण्याग्निमिवाचरन्ति ; कुम्भजीयन्ति अगस्त्यमिवाचरन्ति ॥

यदिति । अखिला जनाः यस्याविद्यावशेन मायाधीनतया मोमुह्यन्ति मोहं प्राप्नुवन्ति । हे हरे ज्ञानात्मनस्ते जिज्ञासा ज्ञातव्येच्छा नृविडम्बना मनुष्यचर्यानुकरणम् ॥ २८ ॥

अथापीति । निवेदयितव्यतया कथनीयत्वेन अस्मदभिमतस्य वृत्तान्तस्य अनुगुणानुयोगेन अनुकूलप्रश्नेन ; 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः । सरसेन भवता वाङ्मिश्रणस्य उक्तिप्रत्युक्तिरूपवाङ्मिश्रणस्य अवसरलाभात्, सफलस्य उदन्तस्य वृत्तान्तस्य कथने एकलालसमपि मानसमवधानं विषयान्तरानासक्तिम् ; एकाग्रत्वमिति भावः । अभिलषतीति आवभाणेति पूर्वेणान्वयः ॥

अशेषेति । आनन्दसंदोहस्यन्दिकां आनन्दोत्पादिकामङ्कूरयामास ; अङ्कुरितामकरोत् । वक्तुमारभतेति भावः ॥ २९ ॥

श्रीमानिति । मद्राधिभूः मद्रदेशाधिपः अखिलदिग्वधूटीनां दिगङ्गनानां शाटीभवत्कीर्तिः वसनायितकीर्तिः ; दिगन्तव्याप्तयशा इति भावः ॥ ३० ॥

आस्ते किलाद्याखिलदिग्वधूटीशाटीभवत्कीर्तिरुदारचेताः ॥
लक्ष्मीसमालिङ्गितसर्वगात्रः षाड्गुण्यशक्त्युज्ज्वलधीः क्षितीशः ।
सौकर्यसंपादितरत्नगर्भो राजत्यसौ विष्णुरिव प्रतीतः ॥ ३१ ॥
जिष्णुः शुचिः पुण्यजनाधिनाथः सदागतिर्निर्ऋतिरीश्वरोऽयम् ।
यश्च प्रचेता इति धर्मराजो विशां पतिर्भाति दिगीशभावः ॥ ३२ ॥
तदोजसा भास्वति विष्टपेऽद्य पतङ्गतामापतरां दिनेशः ।
शुचाऽति तत्कीर्तिलवाभिभूतः कलङ्कितोऽभूदपि गौरभानुः ॥ ३३ ॥
औन्नत्यनीचीकृतरत्नसानुः गाम्भीर्यगाधीकृतसिन्धुराजः ।
भाग्यातिरेकाधरितालकेशश्चकास्ति राजा धरणीमरुत्वान् ॥ ३४ ॥

लक्ष्मीति । लक्ष्म्या सौन्दर्यसंपदा ; 'लक्ष्मीः संपद्रमा शोभा' इति रत्ने ; अन्यत्र रमया समालिङ्गितगात्रः । षाड्गुण्येन संविविग्रहादिषड्गुणकदम्बकेन, शक्तिभिः प्रभावोत्साह-मन्त्रोत्पन्नशक्तिभिश्च । सौकर्येण सौलभ्येन, सूकरभावेन च ; रत्नगर्भो पृथिवी, असौ क्षितीशो राजा ॥ ३१ ॥

जिष्णुरिति । अयं जिष्णुर्जयशीलः, इन्द्रश्च । शुचिः शुद्धः, अग्निश्च । पुण्यजनाधि-नाथः सुकृतिनां श्रेष्ठः, कुबेरश्च । सदागतिः सतामागतिः, आगमनं यस्मात् तथोक्तः, वायुश्च । निर्ऋतिः निर्दुःखः, निर्ऋतिश्च, 'ऋतिर्गमनदुःखयोः' इति सारः । ईश्वरः स्वामी, ईशानश्च । प्रकृष्टं चेतो यस्य प्रचेताः, वरुणश्च । धर्मराजः धर्मनियामकः, यमश्च । इति यः विशां पतिः राजा दिगीशानां भावः स्वभावो यस्य तथोक्तः सन् भाति ॥ ३२ ॥

तदिति । विष्टपत्रये तस्य ओजसा प्रतापेन भास्वति प्रकाशमाने सति पतङ्गतां खद्योत-तामिति श्लेषोक्तिः । गौरभानुश्चन्द्रोऽपि तत्कीर्तिलवाभिभूतः सन् अतिशुचा शोकेन कलङ्कितः संजातकलङ्कोऽभूत् ; 'कलङ्कोऽङ्कापवादयोः' इत्यमरः । मद्रराजप्रतापकीर्तिभ्यां सूर्यचन्द्रमसौ विरस्कृताविति भावः ॥ ३३ ॥

औन्नत्येति । रत्नसानुर्मेरुः । गाधीकृतः उत्तानीकृतः । धरणीमरुत्वान् भूलोकेन्द्रः ॥

यन्मार्गणौघा गुणविप्रयुक्ताः संमर्दकालेऽपि हि लक्ष्यमापुः ।
गजा यदीया अपि दानशौण्डा वदान्यतां तस्य कथं ब्रवीमि ॥

संश्रित्य धर्मं गुणकोटिसंश्रयाद्योऽजिह्मगानां सुगतिं प्रकाशयन् ।
प्रत्यर्थिनस्तानुपसर्गदुर्गतांश्चक्रे महीपः प्रधनेषु संस्थितान् ॥ ३६ ॥

धम्मिल्लश्रियमातनोति गगनं यत्कीर्तिवध्वा लस-
न्मल्लीतल्लजफुल्लसूनसुषुमां तारा: पुनर्बिभ्रति ।

यदिति । यस्य मार्गणौघाः अर्थिसङ्घाः, 'मार्गणो याचके शरे' इत्यमरः सद्गुणविप्रयुक्ताः सद्गुणहीना अपि संमर्दकाले जनसंबाधसमयेऽपि लक्ष्यं लक्षसंख्याकद्रव्यं आपुः । अन्यत्र, बाणसङ्घाः संमर्दकाले युद्धकाले ज्याविमुक्ताः सन्तः लक्ष्यं लक्ष्यमापुः । 'संमर्दः सङ्करो निघः' 'लक्षं लक्ष्यशरव्ये च' इत्यमरः । गजा दानशौण्डाः बहुप्रदाः मदेन मत्ताश्च ; 'स्युर्वदान्यस्थूलदानशौण्डा बहुप्रदे' 'मत्ते शौण्डोत्कटक्षीबाः' इत्यमरः ॥ ३५ ॥

संश्रित्येति । यो राजा गुणकोटीनां सद्गुणसङ्घानां सङ्गात् संपर्कात्, बहुसद्गुणशालित्वादिति भावः । धर्मं संश्रित्य अजिह्मगानां अकुटिलगतीनां सतामिति भावः । 'जिह्मस्तु कुटिलेऽलसे' इत्यमरः । सुगतिं सद्गतिम्, अर्थिनः प्रति याचकान्प्रति प्रकाश्य तान् उपसर्गहीनान् दारिद्र्योपाधिरहितान् प्रधनेषु प्रकृष्टधनेषु संस्थितान् सम्यक्स्थितान्, धनिकानिति भावः ; चकार इत्येकोऽर्थः । अन्यत्र—धर्मं चापं संश्रित्य ; 'धर्मस्तूपनिषद्ब्राह्मोः पुण्ये सौम्यस्वभावयोः । चापन्यायाध्वराहिंसायज्ञाचारयमेषु ना ॥' इति विश्वः । गुणस्य कोटिसङ्गात् चापाग्रसङ्गात्, ज्यारोपादित्यर्थः । 'स्यात्कोटिरश्रौ चापाग्रे संख्याभेदप्रकर्षयोः' इति विश्वः । अजिह्मगानां बाणानां सुगतिं प्रकाश्य, बाणान् प्रयुज्येत्यर्थः । प्रधनेषु संस्थितान्, महाधनिकानपीति भावः । तान् प्रसिद्धान् प्रत्यर्थिनः भूत्वा उपसर्गहीनान् ; प्रत्यर्थिशब्दे प्रतीत्युपसर्गेण हीने सति अर्थी इति भवति, तथा याचकान् चकार । सर्वभूतराज्यमपहृत्य तान् दरिद्रान् चकारेति भावः ॥ ३६ ॥

धम्मिल्लेति । यस्य राज्ञः कीर्तिरेव वधूः तस्याः गगनं धम्मिल्लश्रियं कचश्रियं आतनोति । तारा: पुनः लसता मल्लीतल्लजस्य उत्कृष्टमल्लिकायाः फुल्लसूनानां विकसितकुसुमानां सुषुमां शोभाम्, 'सुषुमा परमा शोभा' इत्यमरः । कलापुष्कलः कलाभिः पूर्णः चन्द्रः चन्दनचित्रकस्य

ज्योत्स्ना मञ्जुलहासपल्लवदशां धत्तेऽखिलाह्लादिनी
चन्द्रश्चन्दनचित्रकस्य भजते रीतिं कलापुष्कलः ॥ ३७ ॥

यः खलु निखिलराजन्यजनताशंसनीयविभवः, पुरोगमः पुण्यश्लोकानाम्, पौरस्त्यो वावदूकानाम्, प्राथमिकः कुलीनानाम्, प्राग्रहरो रसिकानाम्, आदिमो धार्मिकाणाम्, अग्रिमो मेधाविनाम्, उत्तमः सदाचारवताम्, अग्रणीराहितलक्षणानाम्, ग्रामणीः जितकाशिनाम्, वल्लभो जयेन्दिरायाः चिरंतनवसुमतीपालपालनचातुर्यलालितपौरजानपदप्रमोदः प्रथयामास भुजमहिमानमेधमानम् ॥

यं मधुमासवासरं चातुर्यकन्दस्य, खुरलीविहारप्राङ्गणं धर्मार्थयोः, पारावारममेयगुणरत्नानाम्, आलवालं क्षमालतायाः, आरामम्अविरामसद्धर्मपादपानाम्, प्रभवमहीधरं करुणातरङ्गिण्याः, मङ्गलभाजनं ज्ञानप्रदीपस्य, कल्याणकलशं सौजन्यामृतस्य, निर्वर्ण्य जनाः मेरुं सुमेरुम्, द्रविणेन कुबेरम्, गाम्भीर्येणाकूपारं च मेनिरे ॥

तिलकस्य; 'तमालपत्रतिलकचित्रकाणि' इत्यमरः । गगनादीनां कीर्तिवधूधम्मिल्लत्वादिरूपवर्णनया कीर्तेः सर्वलोकातिशायिता उक्ता ॥ ३७ ॥

यः खलिति । पौरस्त्यः प्रथमः; 'पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्याः' इत्यमरः । प्राग्रहरः उत्तमः; 'परार्ध्यप्राग्रहरप्राग्र्या...' इत्यमरः । आहितलक्षणानां 'गुणैः प्रतीते तु कृतलक्षणाहितलक्षणौ' इत्यमरः । 'जितकाशी जयावहः' इति सारे । चिरंतनवसुमतीपालानां पुरातनभूपानां पालनचातुर्येण लालितः पौराणां जानपदानां च प्रमोदो येन तथोक्तः । भुजमहिमानं भुजप्रभावं प्रथयामास प्रकटयामास ॥

यमिति । खुरलीविहारो मल्लक्रीडा । अविरामाणामविच्छिन्नानां सद्धर्मपादपानाम् । कल्याणकलशं कनककलशम्, सौजन्यं सुजनभावः तदेवामृतं तस्य । एतादृशं यं जनाः निर्वर्ण्य ॥

यस्य च हृदयपुष्पंधयः सनकसनन्दनादियोगिसमुदयधौरेयनीरजस्तमोगन्धबन्धुरहृदयमधुकरनिकरसजातिवर्गनित्यसंसर्गनिरासनिसर्गभीलुक इव, विमलनखमणिकिरणच्छटावटीनिगालित इव, कदाऽप्यदृष्टचरकमलसमधिकविलासाविर्भावनिरुपमसौन्दर्यविलोकनकौतुकपरतन्त्रस्वान्त इव अविरतकैवल्यकमलाविहारपदपदयजनाहृतहरिहयमुखबर्हिर्मुखसमुदयसादरेरितसंतानकतरुसुमसंतानसरदमितसुमरसधारासारनिरुच्छ्वाससेकविगतसण्डीनसमय इव, निजसंयमहेतुना कोशीभवता महाग्रहकरोपभोगक्षमेन किमेतेन कमलोदयेनेति सर्वबन्धनभिदापटीयसि सततकृतोल्लासे सुमनःसंहतिभूषितेऽस्मिन् पद्माकरे कृतानवरतावास इव, निरवधिकानन्दलहरीसमास्वादनतुन्दिल इव, अवाससमस्तकामतया अनाकाङ्क्षिताधिगन्तव्यस्थान इव, सेवा-

---

यस्य चेति। हृदयपुष्पंधयः, 'पुष्पंधयो मिलिन्दश्च भसलश्च शिलीमुखः' इति सारे। आवासकर्म निर्मातीति उत्तरेण संबन्धः। सनकसनन्दनादियोगिसमुदये धौरेयाः योगिश्रेष्ठा इत्यर्थः। तेषां नीरजस्तमोगन्धानि निर्गतरजस्तमोगन्धानि निर्गतरजस्तमोलेशानि शुद्धसत्त्वमयानीत्यर्थः; अत एव बन्धुराणि हृदयान्येव मधुकराः तेषां निकर एव सजातिवर्गः तदीयनित्यसंसर्गश्च निरासे त्यागे निसर्गभीलुक इव स्वभावाद्भीत इव; 'भीरुभीरुकभीलुकाः' इत्यमरः। ईश्वरपदकमल एव वर्तत इति भावः। छटा समूह एव वटी रज्जुः, तया निगालितः निबद्ध इव; 'रज्जुस्त्रिषु वटी गुणः' इत्यमरः; 'निगालितं निगलितम्' इत्यमरः। कदाऽप्यदृष्टचराणां पूर्वमनवलोकितानां कमलविलासानामाविर्भावेन निरुपमं यत्पदसौन्दर्यं तस्य विलोकने कौतुकपरतन्त्रं कौतुकाधीनं स्वान्तं यस्य तथोक्त इव। कैवल्यकमलायाः मुक्तिलक्ष्म्याः विहारपदस्य क्रीडास्थानस्य पदस्य चरणस्य यजने पूजायां आहृतानामादरविशिष्टानां हरिहयमुखानामिन्द्रादीनां बर्हिर्मुखानां देवानां समुदयेन; कुसुमसंतानस्य पतनेन सरतां स्रवतां सुमरसानां धारा एव आसारः, तस्य निरुच्छ्वाससेकेन निरन्तरसेकेन विगतः सण्डीनसमयो गमनावसरो यस्य तथोक्त इव। 'प्रतीक्षोद्दीनसण्डीनान्येताः खगगतिक्रियाः' इत्यमरः। निजसंयमहेतुना स्वीयबन्धनकारणेन, ऐश्वर्यस्य

हेवाकसमापतदम्बरचरनिकुरुम्बरचिनपद्मनघटितनवमणिखचिताकिरीटकोटिरुचिच्छटाकरम्बितत्तया परिणतामिव नानावर्णैरासेचनकदर्शनं मोक्तुमशक्त इव, श्रुतिसीमन्तिनीशीमन्तसीमावतंसे कुमुदिनीजारकोरकोत्तंसपदसारसेऽनवग्नभावासकर्म निर्माति ॥

तस्यास्ति लोकत्रयजित्वरस्य स्थानीयमुर्वीकमितुर्वरीयः ।
चकास्ति यस्य प्रतियातनेति व्योमाङ्गणादर्शतले हि नाकः ॥

यस्य तु—

सेनातुङ्गतुरङ्गकर्कशखुराघातक्षमामण्डली-
प्रोड्डीनाधिकधूलिकाततिलताः सान्द्रा नभःप्राङ्गणे ।

मदकारित्वेन संसारबन्धहेतुत्वात् ; कोशीभवता मुकुलीभवता ; अन्यत्र द्रव्यसमुदायीभवता ; 'कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इत्यमरः। महाग्रहः सूर्यः पिशाचश्च । एतेन सर्वेषामुपभोगायोग्येनेति भावः । कमलोदयेन कमलानामुदयो यस्मिंस्तथोक्तेन पद्माकरेणेत्यर्थः। अन्यत्रैश्वर्यरूपकमलाया लक्ष्म्या उदयेन किं प्रयोजनमिति अस्मिन्पदरूपे पद्माकरे । 'तुन्दिलस्तुन्दिमस्तुन्दी' इत्यमरः । अनाकाङ्क्षितमधिगन्तव्यस्थानं येन तथोक्त इव । हेवाकः संभ्रमः, करम्बितत्तया मिश्रितत्तया ; 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' इत्यमरः । श्रुतिसीमान्तिन्याः श्रुतिकान्तायाः सीमन्तसीमा शिरोभागः, उपनिषदित्यर्थः ; तस्या अवतंसे अलंकारभूते, उपनिषत्प्रतिपाद्ये इत्यर्थः। सीमन्तश्चस्त्रियां मस्ते केशवीथ्यामुदाहृतम्' ; 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे' इत्यमरः । कुमुदिनीजारकोरकः चन्द्रकला उत्तंसो यस्य तस्य पदसारसे आवासकर्म निर्माति ; तत्रैव वर्तत इत्यर्थः ॥

तस्येति । जित्वरस्य जयशीलस्य उर्वीकमितुः भूपतेः तस्य वृहत्सेननामकराजः वरीयः उत्तमं स्थानीयं पुरमस्ति । 'स्थानीयं नगरं पुरम्' इति सारः । यस्य प्रतियातना प्रतिबिम्बः नाकः स्वर्ग इति ; 'प्रतिमा प्रतियातना' इत्यमरः ॥ ३८ ॥

सेनेति । नभःप्राङ्गणे सान्द्राः, कर्कशखुराघातात् क्षमामण्डलीप्रोड्डीनाः अधिकधूलिकाः वा एव ततः मूलतले दानाम्बुधाराशतैः सिक्ताः, अथ लूनप्ररोहाः छिन्नाङ्कुराः सत्यः

चित्रं सिन्धुरगण्डमण्डलगलद्दानाम्बुधाराशतैः
सिक्ता मूलतलेऽथ नो ददृशिरे लूनप्ररोहाः क्षणात् ॥ ३९ ॥

सर्वज्ञवृन्दारकभोगिवर्यलक्ष्मीशतेजोनिधिलोकजुष्टम् ।
धरागतं यत्पुटभेदनं तु विराजते पञ्चजनाधिपस्य ॥ ४० ॥

नानन्दयन्नरपतिं विभवोऽपि तादृक् प्रौढानपत्यदुरितव्यथिताशयं तम् ।
दूनस्य शीर्षगुरुवेदनया स्वदेत पुंसः कथं नु मनसेऽपि समग्रमन्नम् ॥

ततस्तनयदुर्गतस्तरुणचन्द्ररेखाञ्चितं
गतिं मतिमतां वरः पशुपतिं ययौ भूपतिः ।
वदान्यतरुमानमज्जनमनोरथापूरणे
कृपारसधुनीधवं कृतमृकण्डुपाकावनम् ॥ ४२ ॥

नो ददृशिरे नादृश्यन्त । अम्बुसिक्ता अपि लताः क्षयं प्रापुरिति चित्रम् । एतेन तुरङ्गखुरोद्धतरजांसि गजमदेन अशाम्यन्त इति भावः ॥ ३९ ॥

सर्वज्ञेति । पञ्चजनाधिपस्य नरपतेः ; 'स्युः पुमांसः पञ्चजनाः' इत्यमरः । धरागतं तु भूतलगतमपि, सर्वज्ञः शिवः, वृन्दारकाः देवाः, भोगिवर्याः नागाः, लक्ष्मीशो विष्णुः, तेजोनिधिः सूर्यः एतेषां लोकैर्जुष्टं युक्तं सद्विराजत इति विरोधः । अन्यत्र, सर्वं जानन्तीति सर्वज्ञाः, वृन्दारका रूपवन्तः ; 'वृन्दारकौ रूपिमुख्यौ' इत्यमरः । भोगवतां वर्याः, लक्ष्मीशाः श्रीमन्तः, तेजोनिधयश्च ये लोकाः जनाः, तैर्जुष्टम् ॥ ४० ॥

नानन्दयन्निति । अनपत्यदुरितेन अपत्याभावदुःखेन । शीर्षगुरुवेदनया शिरोवेदनया दूनस्य संतप्तस्य 'संतापितसंतप्तौ धूपितधूपायितौ च दूनश्च' इत्यमरः । समग्रमपि अन्नं सुष्ठ्वन्नमपि मनसे कथं नु स्वदेत स्वादुतां प्राप्नुयात् ॥ ४१ ॥

तत इति । तनयेन दुर्गतः दरिद्रः भूपतिः । कृतं मृकण्डुपाकस्य मार्कण्डेयस्य अवनं येन तथोक्तम् । 'पोतः पाकोऽर्भको डिम्भः' इत्यमरः । पशुपतिं गतिं निजेच्छासाधनमार्गं ययौ । 'गतिस्तु गमने मार्गे दशायां बुद्धपुपाययोः' इति रत्ने ॥ ४२ ॥

तदा मनसः प्रकृतिवातुलतामिन्द्रियाणां विषयलोलुपतां च निगृह्य, कृतनियमपरिग्रहः क्षितिपरिग्रहोऽयमनभ्युदितः समुत्थाय, सर्वमङ्गलनिदानमावर्तयन् चन्द्रशेखराभिधानम्, विहितनियमाभिषेचनः समीचीनदुकूलरचितोद्गमनीयकृत्यो निखिलपापविध्वंसिन्या भूतिजनन्या विभूत्याऽलंकृतनिटालफलकः, भगवतीमुपास्य संध्यामुपस्थाय सकलप्राणिसमुदयहिताहितकरसाक्षिणं भगवन्तमाङ्गिजनीरमणम्, जप्त्वा भुवनजनयित्रीं गायत्रीमासाद्य विततमरकतशिलाघटितं स्फटिकमयस्तम्भगुम्भितं जलजरागवृषत्तुलोपचितं हीरमणिचारुविटङ्कं प्रवालवलभिसंभिन्नं कनकसालभञ्जिकापुञ्जरञ्जितविमलमुक्ताफलसंदानितवन्दनमालिकासुन्दरं नीलमणिसोपानबन्धुरमुदग्रहिमकरकान्तवेदिकासनाथं कुङ्कुमपङ्कसमालेपितं नूत्नरत्नमयमङ्गलरङ्गवल्लीविराजितं विक-

---

तदेति । वातुलतां चापलताम्; विषयलोलुपताम्, 'लोलुपो लोलुभो लोलश्चललम्पटलालसाः' इति सारे । क्षितिपरिग्रहः राजा, 'पत्नीपरिजनादानमूलशापाः परिग्रहाः' इत्यमरः । अनभ्युदितः उदयकाले जागरूकः सन्, 'सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च । अंशुमानभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमम् ॥' इत्यमरः । 'पणभागे दुकूलं तु क्षौमे सूक्ष्मांशुकेऽपि तत्' इति रत्ने । 'तत्स्यादुद्गमनीयं यद्यौतयोर्वस्त्रयोर्युगम्' इत्यमरः । 'निटालं निटलं निटम्' इति त्रिरूपे । आसाद्येति । पूजामण्टपमिति उत्तरत्र संबन्धः । जलजरागमयीभिः उपरिस्थाप्य दार्वाधारभूतैः स्तम्भाग्रपीठैः; 'दार्वाधारस्तम्भशिरः पीठे साम्ये तुला स्मृता' इति विश्वः । हीरमणिमयं वज्रमणिमयं विटङ्कं स्तम्भाग्रप्रसारिता दारुविशेषः । 'कपोतपालिकायां तु विटङ्कम्' इत्यमरः । प्रवालमयवलभिभिः संभिन्नं संयुक्तम्; 'आच्छादने तु वलभिर्गृहाणामिति कथ्यते इति सारे । 'मिश्रे पृथक्कृते भिन्नम्' 'बद्धे संदानितं मूतम्' 'तोरणस्योपरिस्थं यद्दाम वन्दनमालिका' । नूत्ना नूतना । आसनमध्यनस्थास्य आसनमध्य उपविश्येत्यर्थः । पुरः तन्मध्ये मण्टपमध्ये, मृष्टचन्द्रिका

Srirangam Sri Sankaraguruhula Series No. 10.

॥ श्रीः ॥

॥ जीवन्मुक्तिकल्याणम् ॥

नल्लाध्वरिविरचितम्

JĪVANMUKTIKALYĀNAM

A DRAMA BY NALLĀDHVARI

EDITED BY

Gurubhaktasikhamani, Sastraprasarabhushana

Sri T. K. BALASUBRAHMANYA AIYAR B. A.

SRIRANGAM

SRI VANI VILAS PRESS.

1944

Price Rs. 1-4-0] [Postage Extra.

PREFACE.

Jivanmuktikalyana nataka is an allegorical drama by Sri Nalladhvari after the model of *Prabodhachandrodaya*, *Sankalpasuryodaya* etc. This drama is full of Santirasa dealing with the marriage of Jivanmukti with King Jiva Several, sublime Vedantic truths such as the nature of pratyagatma, hidden in the Vedanta texts and difficult to understand even by those who always revel in the shastras are easily revealed in this drama in a very dexterous manner and in easy simple style. The hero of the drama King Jiva with his consort Buddhi, after constantly roaming with her in the waking, dreaming and sleeping states, becomes disgusted and desires to attain the Jivanmukti sukha. He is obstructed in this desire by the six enemies viz., Kama, Krodha, Lobha, Moha, Mada and Matsarya whom he finally subdues with the help of the eight Atmagunas such as Daya, Kshanti, Anasuya, Anayasa, Saucha, Mangala, Akarpanya and Aspriha. He then enters the fourth asrama and endowed with Sadhanachatushtava and helped by sravana etc., obtains Brahmasakshatkara by the grace of Sivaprasada and Desikanugraha, becomes Brahma and enjoys the pleasures of Jivanmukti. Such is the argument of the play The plot is developed with great skill and abstruse philosophic truths are expounded in very simple and easily understandable style

The author studied under one Ramanatha Dikshita a contemporary of Sri Ramabhadra Dikshita who flourished in the court of Sri Sahaji Maharaja of Tanjore. Even before he was twenty years of age he had composed *Sringarasarvasva Bhana* and *Subhadraparinaya Nataka.* In his later age he studied Vedanta under Sri Paramasivendra and Sri Sadasivendra and after carefully observing the nature of Jivanmuktas in the course of his association with Sri Sadasiva Brahmendra, he composed the two dramas *Chittavrittikalyana* and *Jivanmuktikalyana* as also the Vedanta Prakarana *Advaitarasamanjari* with his own commentary He appears to be a devotee of Ganesa as is evident from his introductory stanzas in all his works In the end of Advaitamanjari he himself says 'समाप्यवस्थाविभूतश्रीविघ्नेशनिदेशतः' We do not dilate on the various merits of this drama but leave them to our readers to judge for themselves It gives us great pleasure to be able to publish this hitherto unpublished drama for the first time and we hope to publish later on his other hitherto unpublished works also.

T. K. Balasubrahmanyam.

भूमिका



विदितमेवेदं विश्वेषामपि वैदिकपथाभ्यस्तानां भारतीयानाम्, यन्निखलपुमर्थशिरोमणिभूतनिःश्रेयससाधनस्य आत्मज्ञानस्य प्रकाशनायैव धर्मकारुणिकेन भगवता परमेश्वरेण प्रावर्तिषत सर्वेऽपि वेदा इति। कालक्रमेण च निखिलमपि वेदमवबोद्धुमपारयत्सु पुरुषेष्वनुकम्पया महात्मभिरुदतीर्णैरालोक्य नैकावेधानधिकारिविभेदान्, अपरोक्षीकृत्य योगमहिम्ना समस्तमपि मन्त्रजातम्, संप्रणीतानि भिन्नभिन्नया सरण्या तदीयार्थविवरणपराणि स्मृतीतिहासपुराणादिग्रन्थरत्नानि। तेभ्योऽपि वैदिके वर्त्मनि मानवानां स्वारसिकाप्रवृत्तिमभिवीक्ष्य महाकवयः स्वत एव तत्र प्रवृत्त्यान्मुख्यसंपादकानि व्यङ्ग्यप्रधानानि महाकाव्यानि व्यरीरचन्। तानि सर्वाण्यपि प्रायेण वैदिकमार्गावलम्बीन्येव, अथापि पूर्वकाण्डप्रतिपादितसामान्यधर्मविशेषधर्मप्रवृत्तिफलकानि शृङ्गारादिरसप्रधानान्येव भूयसा दृश्यन्ते। तेष्वपि क्वचित्क्वचित् श्रोतॄणां वैराग्योत्पादकाः संदर्भविशेषा विद्यन्ते, अथापि सामस्त्येनोपनिषदर्थप्रकाशकानि शान्तिरसप्रधानानि काव्यानि नितरां विरलतमान्येव। तत्र चेदंप्रथमतया प्रवृत्तं श्रीकृष्णमिश्रयतिप्रणीतं प्रबोधचन्द्रोदयं नाम नाटकरत्नम्; यन्मार्गमवलम्ब्य संकल्पसूर्योदयप्रभृतीनि नाटकानि प्रवृत्तानि। तेष्वेवान्यतममिदमौपनिषदार्थाभिप्रदर्शकमद्वैतसिद्धान्तमर्मोद्घाटकं रसिकहृदयसमास्वादनीयरसमाधुरीसमुद्भावितं जीवन्मुक्तिकल्याणं नाम नाटकम्। यस्य च कर्ता कौशिकगोत्रोत्पन्नश्छन्दोगश्चोलेषु कुम्भघोणनगरपरिसरवर्तिकण्डरमाणिक्याग्रहारभिजनो बालचन्द्रदीक्षिततनूजो नल्लाकविरिति श्रूयते। नाटके चास्मिन्नाम्नायान्तर्निगूढं शश्वच्छास्त्राणि परिशीलयद्भिरपि सुतरां दुरवगाहं प्रत्यगात्मस्वरूपमनितरसाधारणेन विषयविवेचनचातुरीचमत्कारेण सम्यगभिप्रकाशितम्। अत्र च कथानायको जीवराजः स्वतादात्म्यमापन्नया सहचारिण्या बुद्ध्या सार्धं जाग्रदाद्यवस्थासु पुनः पुनश्चरित्वा नितरां निर्विण्णो जीवन्मुक्तिसुखमभिप्रेप्सुस्तदन्तरायकारिणः कामादीनरिषड्वर्गान्निर्जित्य दयादिभिरात्मगुणाष्टकैः, परिश्रय च तुरीयमाश्रमम्, साधनचतुष्टयसंपन्नः श्रवणादिभिः शिवप्रसाददेशिकानुग्रहाभ्यां च ब्रह्मसाक्षात्कारं संप्राप्य ब्रह्मभावमापन्नो जीवन्मुक्तिसुखमनुभवतीत्येवमेतन्नाटककथासंग्रहः॥

अत्र च केषांचन जीवन्मुक्तौ विप्रतिपत्तेर्दर्शनान्किञ्चिदिव विचिन्त्यते । मुक्तिस्तावद्द्वेधाम्नाते द्विप्रकारा निरूपिता—जीवन्मुक्तिः, विदेहमुक्तिश्चेति । ब्रह्मसाक्षात्कारेणाविद्यापगमे सति सर्वाण्यपि कर्माणि प्रारब्धवर्जितानि स्वयमेव निवर्तन्ते । प्रारब्धमेकं तु तत्फलानुभवावसान एव विनश्यति । यथा वा इषुकारेण विसृष्टः शरो निष्पन्नेऽपि लक्ष्यवेधात्मके फले न तावता भूमौ पतति, अपि तु यावद्वेगं गत्वैव, एवमेव फलं प्रदातुमारब्धं कर्मापि न मध्ये निवर्तते । अतः प्रारब्धकर्मफलानुभवो ज्ञानिनामप्यवश्यमङ्गीकार्यः । एतदेव श्रुतिरुपदिशति—'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छा. ६) इति । 'तस्यास्य एवमाचार्यवतो मुक्तविद्याभिनद्धस्य तावदेव ताजानेव कालः चिरं क्षेपः, सदात्मस्वरूपसंपत्तेरिति वाक्यशेषः । कियान् कालश्चिरमिति, उच्यते—यावन्न विमोक्ष्ये न विमोक्ष्यते इत्येतत्पुरुषव्यत्ययेन, सामर्थ्यात्; येन कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयात् देहपातो यावदित्यर्थः । अथ तदैव सत् संपत्स्ये संपत्स्यते इति पूर्ववत्' इति व्याख्याता श्रुतिर्भगवत्पादैः । लोके सर्वस्याप्यविद्याकार्यत्वात्कारणमन्तरेण कार्यस्य स्थित्ययोगाच्च प्रारब्धकर्मापि स्वयं फलदानाय स्वकारणीभूताविद्यालेशद्वारा देहेन्द्रियादिकमप्यवस्थापयतीति न सर्वात्मनाऽविद्यानिवृत्तिर्विदुषामपि । ते च यावत्प्रारब्धं जीवन्मुक्ता इति व्यपदिश्यन्ते । प्रारब्धावसाने तु तदीयशरीरस्य स्वस्वकारणीभूतपृथिव्यादिपञ्चभूतेषु लयेन विदेहमुक्ता भवन्ति । एतादृश-जीवन्मुक्तेः स्वरूपम्, तत्प्रमाणसाधनफलानि च जीवन्मुक्तिविवेकाख्ये प्रकरणे श्रीविद्यारण्यस्वामि-भिर्विस्तरतः प्रतिपादितानि । तत्र 'तस्य तावदेव चिरम्', 'विमुक्तश्च विमुच्यते', 'अत्र ब्रह्म समश्नुते' इत्याद्याः श्रुतयः जीवन्मुक्तिमुपदिशन्ति । स्मृतिषु चायमेव वासिष्ठे जीवन्मुक्त इति, महा-भारते ब्राह्मण इति, श्रीभगवद्गीतायां स्थितप्रज्ञः, भगवद्भक्तः, गुणातीत इति, सूतसंहितायामति-वर्णाश्रमी इति च नामभिर्व्यवह्रियते । अपि च शारीरकमीमांसायां तुरीयाध्याये प्रथमचरणे 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' इति सूत्रेण विदुषामप्यनारब्धकार्याणामेव कर्मणां विनाशा-नुवर्णनाद्भगवत्पादाचार्याणामप्यभिमतैव जीवन्मुक्तिः ॥

तदेवमनेकप्रमाणसिद्धामपि जीवन्मुक्तिं केचन नाङ्गीकुर्वन्ति । तेषामयमाशयः— 'जीव-न्मुक्तिप्रतिपादकं शास्त्रं सर्वमप्यर्थवादमात्रम् । श्रोतव्यादिविधिभिर्विधीयमानं श्रवणादिकमतिप्रश-स्तम्, यस्यानुष्ठानाज्जीवतोऽपि मुक्तिर्लभ्यत इति श्रवणादिस्तावकमेव तत् । तथा च ज्ञानेन निरवशेषस्यैवाज्ञानस्य निवृत्तिः, न तु तल्लेशस्य तत्संस्कारस्य वाऽनुवृत्तिः । कर्मणा च सर्वेषामपि विद्यया विनाश एव । एव चाविद्याकर्मणोरभावाज्ज्ञानिनां शरीरेन्द्रियादिव्यवहारो नोपपद्यते । गीतायामपि भगवान 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति सर्वकर्मनिवृत्तिमेव प्रतिपाद-यति । कथं वा वह्निना दह्यमाने महति तूलराशौ अदग्धं किंचित्परिशिष्येत' इति । एतच्च भगवत्पा-दसिद्धान्तविरोधादुपेक्ष्यम् । तथा च 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' इत्यधिकरणे भाष्य-कारीयं वचनम्— 'अपि च नैवात्र विवदितव्यं ब्रह्मविदा कंचित्कालं शरीरं प्रियते न वा प्रियते इति । कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं चापरेण प्रतिक्षेप्तुं शक्येत ? श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरूप्यते । तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयो-र्विद्यासामर्थ्यात्क्षय इति निर्णयः' इति । एतच्च रामानन्दस्वामिभिरित्थमवतारितम्— 'शिष्याच्

प्रति जीवन्मुक्तौ स्वानुभवमाह— अपि च नैवेति' इति। आमत्यां च 'तदेवं मध्यस्थान् प्रतिपाद्य ये भाष्यकारमात्रं मन्यन्ते तान् प्रत्याह' इत्युक्तम्। जीवन्मुक्तिशास्त्रस्यार्थवादताकल्पनमभ्युपगम्यते, अथापि 'वज्रहस्तः पुरन्दरः' इत्यादीनामिवैषामप्यविरोधात्स्वार्थे तात्पर्यमस्त्येव। तथा च जीवन्मुक्तिशास्त्रावद्वदनुभवानुरोधेन प्रारब्धकर्मणां ज्ञाननिवर्त्यत्वकल्पनं युक्तमेव। इषुकारदृष्टान्तश्च पुरस्तात्प्रपञ्चितः। एवंविधप्रारब्धकर्मप्रतिबन्धवशादेव विद्या सर्वांशेन नाविद्यां निवर्तयतीत्यविद्यालेशानुवृत्तिरप्युपपन्ना। गीतायामपि सर्वकर्माणि इत्यस्य प्रारब्धव्यतिरिक्तानीत्यर्थं संकोचः कार्यः। रज्जौ सर्पभ्रमेण भयकम्पादिकमनुभवतो मानवस्य रज्जुतत्त्वज्ञानेन निवृत्तेऽपि सर्पाध्यासे तत्संस्कारवशात्कंचित्कालं तदनुवृत्तिर्दृश्यते, तद्वद्ब्रह्मज्ञानेन निवृत्तेऽप्यज्ञाने तत्संस्कारवशाल्लौकिकव्यवहारो ज्ञानिनामप्युपपद्यते। पञ्चदशप्रकरणे च सप्रपञ्चं समर्थितमेतच्छ्रीविद्यारण्यमुनीश्वरैः। जीवन्मुक्तिपदमाभिप्रपन्नैः श्रीसदाशिवब्रह्मेन्द्रैरपि आत्मविद्याविलासे स्वानुभवः सम्यगाभप्रकाशितः। तदेवं बहुप्रमाणवशाद्विदुषामनुभवाच्च प्रारब्धव्यतिरिक्तानामेव कर्मणां ज्ञाननाश्यतया यावत्प्रारब्धं ज्ञानिनामपि देहस्थितिरिति जीवतोऽपि मुक्तिः सिद्धा भवति॥

एतादृशजीवन्मुक्तिपदप्रापकानि यानि साधनानि श्रुत्यादिषूपदिष्टानि, तेषामेव श्रवणादीनां तत्प्रतिरोधकाना कामादीनां च नाटकपात्रतां प्रकल्प्यैतन्नाटकप्रणयनेन द्रष्टॄणां स्वत एव साधनेषु प्रवृत्तिर्भूयादिति कवेराशय ऊह्यते। यद्यपि तीव्रमुमुक्षावतां विरागतासंपन्नानां महात्मना काव्यनाटकादौ प्रवृत्तिर्न संभवति, अथापि विचित्रप्रज्ञत्वात्पुरुषस्य पुराणश्रवणेनाप्यनधिगततत्त्वानां बेदानधिकारिणां तीव्रावरक्तमतां पुरुषाणामनुग्रहायैवैतादृशनाटकप्रणयने प्रवृत्तिः कवयितृणाम्। इममेवाभिप्रायं मनसि निधाय कैश्चिदुक्तम्— 'वेदाधिकारविधुरान् विदुषो विलोक्य व्रात्यादिकान् विदितनाटककाव्यसारान्। तद्बुद्धिवृत्त्यनुगुणं कृपया करोति ब्रह्मोपदेशमपि नाटकरूपमेव॥' इति॥

नाटकं चास्मिन्नतिलालितपदविन्यासातिशयः, नितरां सरलतमया सहृदयहृदयंगमया शैल्या अतिमात्रगहनशास्त्रीयप्रक्रियाविष्करणम्, तत्तत्पात्रानुरूपो व्यवहारः, विनोदभाषणेनापि तत्त्वप्रदर्शनं इत्यादीन्यावर्जयन्ति सचेतसां चेतांसि। शब्दानुशासे च स्वकीयं पाटवं सम्यगनुप्रकाशितं शिवस्तुतौ॥

कविश्चायं सर्वतोमुखप्रमुखनैकमखयाजिनः, तज्ज्ञानगरीशस्य शहजिमहाराजस्य सदस्यात् श्रीमतो रामभद्रदीक्षितस्य समकालिकाद्रामनाथदीक्षिताद्वाल्य एवाधीतसर्वविद्यः ऊनविंशतय एव शृङ्गारसर्वस्वभाणं सुभद्रापरिणयनाटकं च प्राणैषीत्। तथा च तेनैवोक्तम्— 'प्रागेव विंशद्वयसः प्रबन्धा नल्लाकवीन्द्रेण सुधीश्वरेण। शृङ्गारसर्वस्वमिति प्रतीतः संदर्भितोऽयं सरसः प्रबन्धः॥' इति। अन्ते च परमशिवेन्द्रश्रीसदाशिवेन्द्रयोः सकाशाद्गृहीत्वा वेदान्तशास्त्रम्, संप्रेक्ष्य च श्रीसदाशिवब्रह्मेन्द्राणां जीवन्मुक्तचर्याम्, चित्तवृत्तिकल्याणजीवन्मुक्तिकल्याणाभिधाने द्वे नाटके, अद्वैतरसमञ्जर्याख्यमेकं वेदान्तप्रकरणम्, तद्वयाख्यानं च विरचयामास। अस्य च कृतिषु तत्र तत्र परस्परं श्लोकसारूप्यमपि दरीदृश्यते। तथा हि—एतन्नाटकस्थाः (अङ्क. ४. श्लो. २६, अङ्क. ५.

श्लो. १८, १९, २६, २८, २९, ३०. ३१, ३२) नव श्लोकाः अद्वैतरसमञ्जर्यां तथैव दृश्यन्ते ; 'स्पर्शेन ते परमसुन्दरि' (अङ्क. ५. ५५. इत्यय श्लोकः भाणेऽपि समुपलभ्यते। परं तु उत्तरार्धं परं तत्रान्यथा दृश्यते। 'यस्या दर्शनमेव (अङ्क. २. २१) इत्येतत्पद्यसमानार्थकं पद्य भाणे विद्यते। तृतीयेऽङ्के २५, २६ तमौ श्लोकावुभयत्र समानाक्षरौ संदृश्येते। कविश्चायं गणेशोपासक इति प्रतीयते। निखिलास्वपि कृतिषु आदौ विनायकस्तुतिर्वर्तते। भाणे तु कस्यचन मत्तगजस्य प्रवेशं परिकल्प्य नाटकपात्रमुखेन स्वाभिलषितमाविष्करोति। यथा— "नायं मदान्धो मत्तद्विपः ; किं तु प्रथमसमाराधनाकरणपरिकुपितस्य भगवतः करिवदनस्य प्रादुर्भाव एव। तदेनं स्तुत्या सान्त्वयिष्यामि तावत्। 'अञ्जलिरयं जनानामातङ्कच्छेदाविरुदाय। वरदाय दिव्यगन्धद्विरदाय ध्वस्तसर्वदुरिताय ॥ जय जय जगतां मूल जय जय भो जन्मकलमषद्वेषिन्। गजवक्त्र विघ्नशत्रो सुत्रामस्तुतचरित्र शिवपुत्र ॥' कथमेष स्तुतमात्र एव प्रसन्न इव परावर्तते।" इति। किं च, गणाधिपानुग्रहेणैव समवाप्तं काव्यनिर्माणनैपुण्यमिति स्वयमेव ब्रवीति—'असौ तत्र श्रीमानमृतरसधारासहचरीं गिरां देवीं बिभ्रद्वजमुखकृपातः परिणताम्' इति, 'मम श्रीमल्लम्बोदरदरकृपापाङ्गतगिरः प्रबन्धेऽस्मिन्नेतः कुतुकमनुबध्नाति तदपि' इति च। अद्वैतरसमञ्जर्या अवसाने च 'समाप्यवस्थाविभूबश्रीविघ्नेशनिदेशतः' इति कथयति ॥

तदेवमनन्तजन्मसुकृतपरिपाकवशाद्बाल्य एव सर्वतो विरक्तानां ब्रह्मदर्शनेन ब्रह्मभावमापन्नानां स्थितप्रज्ञादिलक्षणलक्षितानां योगमार्गेऽपि निरङ्कुशप्रवृत्तिमतां ब्रह्मसूत्रवृत्त्यादिबहुग्रन्थप्रणेतृणां जीवन्मुक्तानां श्रीसदाशिवब्रह्मेन्द्राणां शिष्यभावमापन्नैः सत्कविवृन्दप्रशंसापात्रभूतैः श्रीनल्लादीक्षितैर्विरचितमिदं नाटकं प्रकाशीकृतवतामेतादृशासंख्यग्रन्थप्रकाशनबद्धदीक्षाणां 'गुरुभक्तशिखामणिः' 'शास्त्रप्रमाणभूषणम्' इत्यादिविरुदावभूषितानां ब्रह्मश्री. टि. के. बालसुब्रह्मण्यार्याणां प्रवृत्तिमेतां सफलीकुर्वन्तु सर्वेऽप्यमरभारतीप्रणयिन इति शम् ॥

श्रीशंकरगुरुकुलम्
श्रीरङ्गम्.

के. एम्. वेङ्कटरामशास्त्री
श्रीसच्चिदानन्दभारतीभाण्डाराध्यक्षः ॥



श्रीः

॥ श्लोकानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्		पृष्ठम्
अकृत्रिम०	१३	आभासमात्र०	५२	कविरतिमनोज्ञ०	३
अक्षैरक्ष०	५४	आम्नायस्य गिरेरन्ते क्वचित्	१५	कामादयः सन्तु	७
अणुआ सत्त०	२४	आम्नायस्य गिरेरन्ते सेयं	१९	कासारान्तर०	९
अथ प्यात्म०	५८	आरभ्योर्वी०	२५	कुटजवकुल०	११
अद्भुतेयमखं०	५४	आरामेव	१२	कूटस्थनित्य०	५२
अद्य तावदियं	२३	आलोक्य	२७	कृच्छ्रेण क्षण०	३१
अद्यास्तमेतु	५२	आसिक्ता	३०	कृतौ कृत्यो	४८
अधीतस्था०	३१	आसुतेरा०	५८	क्वचित्प्रतिरुद्धा०	११
अनन्तकोटिः	५३	आस्तां तावः	२५	क्व वा पाग०	५१
अनुकलमपि	३७	इज्यादान०	३१	गत गतमितः	४८
अनेनैवानु०	३	इन्द्रियहयं	९	गत्वा चन्द्र०	५
अन्यस्मादपि	२५	इयं ते विज्ञप्ति०	४८	गन्तुं तत्पद०	४०
अन्योन्यात्मक०	४३	इयं या कल्याणी	१३	गुहायां निहिता	२५
अप्राकृताकार०	११	इह जन्तुष्वथ	५३	ग्रामाराम०	२५
अभेद गतयो०	१०	उच्चैरुच्चरतः	१७	चत्वारिंशत्म०	३३
अयं गलाक्षः	८	उत्क्षिप्ताऽसि	३५	चिज्ज्योतिरेव	४९
अयि विज्ञानिनि	५७	उद्गायन्ति	३०	चिरादेतावन्तं	८
अल्पायुर्विगो	४६	उद्बोधितोऽपि	४५	चिराय सोऽयं	७
अवहेलोत्पा०	४८	उन्मीलन वनं	५१	चोदनात्मा	३
अविचलयना०	४५	उपक्रमोपसं०	१२	छायैषा पुनः	४
अस्तं गच्छति	४५	उपर्युपरि	१२	जडताशरणं	५१
अस्तीति प्रति०	४५	एकाद्वित्रि	१४	जनजननावना०	४८
अस्मिन्ब्रह्म०	५५	एकामजां	२	जय जय देव	४८
अहं ब्रह्म	८	एकैकोऽप्यल०	२७	ततः स्वप्ना०	१५
अहह महति	४७	एतस्यामभि०	४४	तदेवेदं तस्या	१९
अहो मन	२७	एतस्येयं	५४	तातस्याध्य०	१४
आकीर्यन्ते	५०	एष धन्योऽस्मि	५३	तादात्म्येन	१
आकृष्य	३३	एषोऽस्मि	२७	तावत्स्मृति०	१०
आचारेऽभ्युदयं	२५	एह्येहि	२१	त्व देवान्न	४४
आचार्योपास्ति०	३७	ऐन्द्रं यत्पद०	३२	त्वं ब्रह्मासि	५१
आचूडात्त०	१८	ओं नमस्ते	५४	त्वं भूषणं त्व०	२३
आत्मस्वामिन०	७	करम्बयति	१३	त्वमसि जगतां	३४
आत्मोद्देश०	४६	कर्तेति कायिक०	५२	त्वमहमयमहं	२१
आत्मैव संस्त्व०	५१	कर्म कष्टमिति	२६	दधदधरस्य	४८
आपन्मत्सरि०	३१	कर्माणि स्वय०	२६	दधि मधुरं	१६

	पृष्ठम्		पृष्ठम्		पृष्ठम्
दार्णि पडिप्पहादं	२	बालातपश्च०	१२	नारदानुग्रह०	२
दीर्घा प्रदीप०	९	बुद्धित्यागेन	६	शुकैकैकि०	१२
दुःखं नाम	३१	भद्राकार०	१	श्रवणरसन०	८
दृशा लीढा	१७	भुक्ता भोगाः	४२	श्रीविष्णुः	१३
दृष्टा सा वर०	१६	भूयोभिर्भि०	३१	श्रोतव्यं श्रुति०	४१
देव श्रेयान्सु०	५७	भेददृष्टिभव०	४१	स एष दहरा०	५५
देवोऽयं स्वपदा०	६	भो राजन्ब्रह्म०	५४	स एष पाश०	४८
देवो वा दनु०	३०	मज्जन्त्यमी	५१	स एष मधुरः	७
धनदाना०	२७	मरकतमणि०	११	संध्यास्नान	२५
धन्यो जीव०	५३	मांसानां पालि०	३२	संसाराध्वनि	५
धारासुजङ्घ०	५३	मिथ्या समु०	५२	संसारोऽयमना०	४३
धावन्तो वि०	७	मीनस्त्रीव	१८	सखा वा बन्धु०	२७
ध्यायंस्ताम०	३७	मुग्धा तव	३०	स बद्धो	४६
ध्यायतीव	१०	मुग्धे देवि	१०	समस्तमभावि	४८
न कर्तव्यं	३६	मोहो मत्त०	२७	समूहो धूमाना०	२७
न बद्धो नापि	५२	मोहो मोह०	३१	सर्वः कर्मजितो	४१
नारीवङ्गने	२६	यत्पारे मनसो	५	सर्वे वेदा	३९
नालापेऽभि०	३८	यत्र द्वितै०	२१	सस्नेहं चार०	१६
निःशङ्कं मधु	३३	यद्या ना तन्व०	३८	सा त्वं देवि	१८
नित्यानित्व०	३५	यदि नाम कुतं	१९	सिद्धाञ्जनौषधि०	५३
निरुपधि पर०	३४	यद्भाव	२१	सूर्योऽप्यत्र	५३
नीरन्ध्रं	३०	यमाक्रष्टु	३२	सैषा वधूरिह	१८
नीरक्षीरवदा०	१०	यस्या दर्शनमेव	१९	सोऽयं न	४
नैषा दृष्टचरी	१८	यामप्राप्य	४०	स्पर्शेन ते	५७
नैषा लभ्या	४०	यामासाद्य	४०	स्मरणमरणि०	५५
नौस्तम्भाग्र०	४७	यावन्मांस०	३२	स्वप्नारामवि०	५६
पराक्रान्तंम०	३२	योगारूढोऽपि	२८	स्वप्नारामस्य	११
परुषगरिकगे०	४५	रथ्याना जनु०	९	स्वयमखिल०	४३
पादौ पद्मभुवः	१३	रागद्वेष०	५	स्वयमयमुप०	२८
प्रकाशस्वाभा०	५५	राजाऽह	३०	स्वर्गादि०	३
प्रक्रान्तान्यरु०	२६	विकारगोचरै०	१८	स्वर्गो मयि	५२
प्रपञ्चो मिथ्या	४९	विनोदन	१७	हरिष्यामीति०	१२
प्रमातृत्वावेशो	९	विधिगोचर०	३	हितमन्यहिते	४४
प्रागन्तर्निहित०	१९	विश्वं सगस्तमपि	४९	हृत्पुण्डरीक०	५५
प्राणान्पञ्च	३७	विक्षेपादृते०	६	क्षीणाः शक्त्या	१५

गुणानां त्वदीयशोभनगुणानामनुरूपं माहात्म्यं पूज्यत्वं कियद्वर्णयामि । अवाङ्मनसगोचरमहिमशालिनस्तव वर्णनं कर्तुं न शक्यत इत्यर्थः । मम अत्यादरादतिविश्वासात् , अधिकप्रीत्या बहुसंतोषेण । अर्थाः पदार्थाः वाक्यार्थाश्चाद्भुताः श्रेष्ठाः, तथा शब्दचयाः श्लिष्टशब्दसमुदायाः, सदा सर्वकालमहन्महामत्यग्रे पुरतः स्फुरन्ति प्रतिभान्ति, कापवार्थं शब्दं वा स्वीकुर्यामङ्गीकुर्याम् ; कमिव त्यजामि । शब्दार्थानां बहुप्रकारेण प्रतिभासमानानां कृतनवर्णनं दुष्करमिति भावः । तथा च लोकरीत्या पश्वादेरस्य महिषस्य वर्णयितुमशक्यत्वेऽपि स्वप्रतिभाया एतत्प्रबन्धरचनमत्यल्पमिति भावः ॥ ४९ ॥

तिष्ठन्तु क्षितिपा घनान्धतमसप्राग्भारदूरीभव
त्कृत्याकृत्यविवेकमत्तहृदया नैवाश्रये तानहम् ।
एहि त्वं सरसीतटं तव पुनर्मूर्धाभिषेकं जलै-
रस्मत्संवसथावनाय करवै राजेव मां रक्ष माम् ॥ ५० ॥

तिष्ठन्त्विति । घनमेवान्धतमसं गाढान्धकारस्तस्य प्राग्भारेणाधिक्येन दूरीभवन् तिरोभूता यः कृत्याकृत्यविवेकः सदसद्विवेकः, विहितानुष्ठाननिषिद्धत्यागधीरिति यावत् । तेन मत्तमुन्मत्तं हृदयं चित्तं येषां ते तथोक्ताः, क्षितिपा राजानः तिष्ठन्तु वर्तन्ताम् । तान्मत्तहृदयानहं नैवाश्रये नैवानुसरामि । त्वं सरसीतटं कासारतीरमेहागच्छ, तव पुनरस्मत्संवसथस्यास्महृहस्यावनाय रक्षणाय जलैर्मूर्धाभिषेकं करवै करोमि । त्वमित्यनुषङ्गः ; मां राजेव ममीचीननृप इव रक्ष पालय ॥ ५० ॥

भूपो भूप इतीव किं न्वनुगता जातिर्घटत्वादिव-
द्भूभावस्ति य एव रक्षति जनान् राजा स एव स्वयम् ।
किं भूमीपतयः शरारव इमे क्रूराः किराता इव
प्रायः सार्वजनीन कामरपते राजा त्वमेवासि नः ॥ ५१ ॥

ननु राजशब्दवाच्यक्षत्रियस्यैव 'राजानमभिषिञ्चति' इत्यभिषेकविधानात्कथं महिषस्य मूर्धाभिषेक इत्यत आह—भूप इति । भूपो भूपः, अयं भूमिपालोऽयं भूमिपाल इत्यनुगता क्षत्रियमात्रानुस्यूता घटत्वादिवद्घटत्वपटत्वादिजातिरिव ; भूपत्वजातिरित्यर्थाल्लभ्यते । भूमौ भूलोके, राजधर्माभिषेकादिप्रयोजकतयेति शेषः । अस्ति किं नु ? वर्तते किम् ? नास्तीत्यर्थः । अनुगतजातिमङ्गीकृत्य तस्यैव राजधर्माभिषेकप्रवृत्तिप्रयोजनकत्वाङ्गीकारे महिषस्य

मूर्धाभिषेकानुपपत्तिः, तस्य 'राजानमभिषिञ्चति' इति शास्त्रान्तर्गतराजशब्दार्थत्वाभावात्। किं त्वन्यदेव प्रजापालनादि राजधर्मप्रयोजकम्; तदेव राजपदप्रवृत्तिनिमित्तमपीति महिषस्यापि मूर्धाभिषेको युज्यत एवेति भावः। तदेवाह—य इति। य एव जनाँल्लोकान् रक्षति पालयति स स्वयं राजा भवतीति शेषः। रूढेर्योगानाक्रान्तविषयत्वादिति भावः। मनुष्यजातीयस्य राजशब्दार्थत्वं न संभवतीति मत्वाऽऽह—किमिति। किराता निषादा इव क्रूराः कठिनचित्ताः शरारवो घातुकाः 'शरारुर्घातुको हिंस्रः' इत्यमरः। इमे दृश्यमाना भूमीपतयः भूपाः किमित्यर्थः। सार्वजनीन सर्वोपकारक, हे कासरपते! त्वमेव नोऽस्माकं राजाऽसि। मनुष्यजातीयानां रक्षकस्वरूपयोगानाक्रान्तत्वादिति भावः। अत्र मीमांसकाः—राजपदं न प्रजापालनप्रवृत्तिनिमित्तकम्। किं तु क्षत्रियत्वजातिनिमित्तकमेव, प्रजापालनस्याभिषेकोत्तरभावित्वेनाभिषेकविधायेव 'राजानमभिषिञ्चति' इति राजशब्दप्रयोगात्। तस्य कर्मणीत्यधिकृत्य 'पत्यन्तपुरोहितादिभ्यो यक्' इति स्मृत्या पुरोहितादिगणपठिताद्राजशब्दाद्यगादिविधानेन राज्यशब्दस्य राजशब्दप्रसिद्धिपूर्वकत्वावगतेर्ब्राह्मेऽप्रयोगाच्च राजशब्दः क्षत्रियवचन एव। निर्णीतं चेदं भेदलक्षणे तृतीयचरणे 'अवेष्टौ यज्ञसंयोगात्' इत्यधिकरणे श्रीमदाचार्यशबरस्वामिभिरिति कथं राजशब्दस्य प्रजापालननिमित्तकत्वं कविनाऽभ्यधायीति वदन्ति। अत्र ब्रूमः, राजशब्दस्य क्षत्रियपरत्वेन तदधिकरणे निर्णीतत्वेऽपि 'राजानमभिषिञ्चति' इत्यादिना विधीयमानराजधर्मप्रवृत्तौ प्रजापालनमेव निमित्तम्, न तु जातिः, क्षत्रियमात्रस्याभिषेकादिधर्मप्राप्त्यापत्तेः। न चाधिकरणविरोधः। 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यत्र राजशब्दस्य प्रजापालनयुक्तक्षत्रियपरत्वस्यैव तदधिकरणनिर्णीतत्वेन तदधिकरणे योगपरित्यागाभावात्। अस्तु वा तदधिकरणे योगपरित्यागः, तथाऽभिषेकादि; मिताक्षरायां 'व्यवहारान्नृपः पश्येद्ब्राह्मणैः सहितः सभासदः कार्याः, अदण्ड्यान्दण्डयन्राजा' इत्यादौ क्षत्रियादन्योऽपि राज्याधिकारं कुर्वन्नेतादृशधर्मेऽधिक्रियत इति स्पष्टमेव प्रजापालनस्यैव तद्धर्मव्यवहारपरिच्छेदादिनिमित्तत्वमभिहितमित्यन्यत्र विस्तरः॥ ५१॥

सानन्दं महिषीशतं रमयसे मूर्धाभिषिक्तोऽन्वहं
त्वं बालव्यजनाश्रधूतिमसकृत्प्राप्नोषि शृङ्गान्वितः।
किं च स्वां प्रकृतिं न मुञ्चसि तृणप्रायं जगत्पश्यसि
स्वस्ति श्रीमहिषेन्द्र तेऽस्तु नियतं राजा त्वमेवासि नः॥ ५२॥

सानन्दमिति। हे महिषेन्द्र ते तव नियतं सार्वकालं स्वस्त्यस्तु शोभनं भवतु। महिषस्वामीःप्रार्थनायां हेतुमाह—राजा त्वमेवासि न इति। नोऽस्माकं त्वमेव राजाऽसि;

नान्यो मनुष्यजातीय इत्यवधारणार्थः; पूर्वश्लोकेनैव निराकृतत्वादिति भावः। तथा च राजलक्षणयुक्तत्वान्महिषस्याशीःप्रार्थनं युक्तमित्याशयः। कथं महिषे राजलक्षणम्? तत्राह—सानन्दमिति। आनन्देन सहितं यथा भवति तथा महिषीणां शतम्, शतमित्युपलक्षणम्, सहस्रमयुतं वेति बोद्धव्यम्। रमयसे क्रीडयसे। अन्वहं प्रत्यहं मूर्ध्नि शिरसि अभिषिक्तः स्नापितः, कालेन व्यजनं, तस्यावधूतिं चालनम्, असकृत्पुनः पुनः प्राप्तोषि। शृङ्गाभ्यां विषाणाभ्यामन्वितो युक्तः। किं च स्वां प्रकृतिं स्वकीयं जाड्यादिस्वभावं न मुञ्चसि न त्यजसि। तृणप्रायं तृणप्रचुरं जगत्पश्यसि ईक्षसे; भक्षणार्थमिति भावः। 'प्रायो वर्गेऽन्ये बाहुल्ये तुल्यानशनमृत्युषु' इत्यमरः। राजपक्षे—महिषीणां कृताभिषेकाणां राज्ञीनाम्; 'कृताभिषेका महिषी' इत्यमरः। शते सहस्रे वा परिगणिते रमयसे। अन्तःपुरस्त्रियः यथा संभोगादिना तुष्यन्ति, तथा कलाशास्त्रोक्तप्रकारेण ताभ्यां प्रीत्यतिशयं जनयति। 'मूर्धाभिषिक्तो राजन्यः' इत्यमरः। काले चामरं व्यजनं तालवृन्तादिकं तयोरवधूतिम्; शृङ्गेण प्रभुत्वेनान्वितः; 'शृङ्गं प्रभुत्वे' इति विश्वः। स्वां प्रकृतिं स्वकीयराज्याङ्गं स्वाम्यमात्यादिकम्; 'राज्याङ्गानि प्रकृतयः' इत्यमरः। जगद्भुवनं तृणप्रायं तृणसदृशं यथा भवति तथा पश्यति। जनेष्वैश्वर्याद्यल्पत्वेन तत्र राजस्तृणबुद्धिर्भवतीत्यर्थः। अत्र त्वमस्यस्त्वित्याशिषं प्रति राजत्वस्य हेतुत्वेन हेतुमता सार्कं हेतुवर्णनाद्धेत्वलंकारः। त्वमेव राजाऽसीत्यत्र रूपकालंकारः। रूपकस्य चैवकारेणान्यत्र मनुष्ये राजत्वस्यापह्नवादपह्नुत्यलंकारः। तयोरङ्गाङ्गिभावेन सङ्करोऽप्यलंकारः। रूपकविधया प्रतीतस्य राजत्वस्य सानन्दमित्यादिभिः समर्थनात्काव्यलिङ्गमलंकारः। तस्य च श्लेषोत्थापितत्वाच्छलेषालंकारः। शतसंख्यायामुपलक्षणत्वेनासकृदन्वहमित्यादिपदैर्महिषस्याधिक्यप्रतीतेर्विशेषालंकारो व्यज्यते। सानन्दमन्वहमिति मकारानुप्रासात्मकः शब्दालंकारः। एवं माधुर्यादेर्गुणस्यापि प्रतीतिर्बोध्या। तथा च—'काव्यं ह्यदुष्टौ सगुणौ शब्दार्थौ सदलंकृती' इति काव्यलक्षणम्, 'वाच्यातिशायि व्यङ्ग्यं यदुत्तमं तद्ध्वनिर्बुधैः स्मृतः' इत्युत्तमकाव्यलक्षणमिति काव्यप्रकाशोक्तं स्फुटतरमिति संक्षेपः॥ ५२॥

धात्र्युत्सङ्गतले विमुञ्चसि बहुर्विण्मूत्रमस्तत्रपं
धत्से नाप्यपलालमास्यमनिशं स्नेहेन संवर्धसे।
शृङ्ग्व्यापि पयः पिबस्यनुदिनं तस्मादुदन्तं मुखे
वत्स श्रीमहिषेन्द्र बालकमिव त्वां वीक्ष्य नन्दाम्यहम्॥ ५३॥

धात्रीति। वत्स श्रीमहिषेन्द्र बालकमिव स्त्रियं त्वां वीक्ष्य अहं नन्दामि संतुष्यामि। कथं बालकसादृश्यम्? तत्राह—धात्र्याः स्त्रियः उत्सङ्गतले ...प्रदेशे; अनेन गृहमध्यप्रदेशो लक्ष्यते।

विण्मूत्रं विष्ठामूत्रम्, अस्ता नष्टा त्रपा लज्जा यस्मिन्कर्मणि यथा भवति तथा विमुञ्चसि त्यजसि। न विद्यते पलालं यस्मिंस्तदपलालमास्यं न धत्से। अपि तु पलालसहितमेवास्यं धत्स इत्यर्थः, 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति न्यायात्। 'पलालोऽस्त्री स निष्फलः' इत्यमरः। स्नेहेन प्रीत्या संवर्द्धयसे। शङ्खेष्वपि ललाटास्थिष्वपि 'शङ्खो निधौ ललाटास्थ्नि' इत्यमरः। पयः जलमनुदिनं प्रतिदिनं पिबसि। 'पयः क्षीरं पयोऽम्बु च' इत्युभयत्राप्यमरः। मुखे अदन्तं भक्षयन्तम्। बालकपक्षे धात्र्या उपमातुः; 'धात्री स्यादुपमातोऽपि क्षितिरप्यामलक्यपि' इत्यमरः। अपगता लाला यस्मादपलालम्, 'सृणिका स्यान्दनी लाला' इत्यमरः। स्नेहेन तैलेन प्रत्यहं तैलाभ्यङ्गादिना संवर्ध्यसे। शङ्खेष्वपि कम्बुष्वाप्तम्। शङ्खो निध्यन्तरे कम्बुललाटास्थि····' इति विश्वः। पयः क्षीरम्। मुखे अदन्तं दन्तरहितम्। अत्र बालकमिवेत्युपमया श्लेषोज्जीवितवाक्यार्थैः समर्थनाच्छ्लेषकाव्यलिङ्गोपमानानामङ्गाङ्गिभावेन सङ्करोऽलंकारः ॥ ५३ ॥

ब्रूषे त्वं विविधस्वरान्बहुविधान्काण्डांश्च धत्से मुखे
प्राप्तश्चाध्ययनं पदक्रमविधिं किं चोच्चरन्गच्छसि।
अङ्गेषु श्रममादधासि बहुधा वृत्तिं करोष्यन्वहं
तत्सत्यं महिषाधिराज सततं वेदावधानीव नः ॥ ५४ ॥

ब्रूष इति। हे महिषाधिराज सततं सर्वदा वेदावधानीव वेदावधानवानिव नोऽस्माकं भासि। कथं वेदावधानीत्याह—ब्रूष इति। विविधस्वरान् मध्यमादिष्वनिभेदान्; 'मध्यमादिषु च ध्वनौ', 'उदात्तादिष्वपि प्रोक्तः स्वरः' इत्युभयत्रापि विश्वः। बहुविधाननेकप्रकारान् काण्डान् जलभेदान्; 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः। मुखे धत्से। अयनमधि अध्ययनम्, मार्गमध्य इत्यर्थः। अयनं वर्त्ममार्गाध्व' इत्यमरः। पदानां क्रमविधिं निक्षेपविधिं प्राप्तः। किं चोच्चरन् मूत्रयन् गच्छसि। मूत्रं प्रस्राव उच्चारः' इत्यमरः। अङ्गेष्ववयवेषु, 'अङ्गं प्रतीकोऽवयवः' इत्यमरः। श्रमं खेदमादधासि बिभर्षि। बहुधा बहुप्रकारेण वृत्तिं जीवनम्; 'वृत्तिर्वर्तनजीवने' इत्यमरः। अन्वहं प्रत्यहं करोषि। वेदावधानिपक्षे-विविधस्वरानुदात्तादिस्वरान्, काण्डान्वर्गान्; 'काण्डं वर्गेऽप्युदाहृतम्' इति विश्वः। अध्ययनं वेदम्, अध्ययनाध्येययोरनतिभेदात्। पदक्रमविधिं पदक्रमयोर्विधिमध्ययनरूपम्, संहितापदक्रमानिति यावत्। प्राप्तः, उच्चरन्नुच्चारणं कुर्वन्। अर्थाद्वेदस्य अङ्गेषु शिक्षाव्याकरणादिषु; 'शिक्षा व्याकरणं छन्दः' इत्यमरः। तथा आवृत्तिमिति भेदः। अत्रापि वेदस्येत्यनुषङ्गः। अत्रापि पूर्ववदलंकारः ॥ ५४ ॥

मुद्राधारणदग्धचर्मकतया [1]दृश्यैः किणैराङ्कितो
मध्याह्नात्परमेव मज्जसि जले सानन्दतीर्थादरः ।
शान्ताङ्गाररुचिं बिभर्षि च तनौ तिष्ठन्मते दण्डिनो
मध्वाचार्यमिवाधुनाऽनुकुरुषे श्रीमल्लुलायप्रभो ॥ ५५ ॥

मुद्रेति । श्रीमल्लुलायप्रभो मध्वानामाचार्यं गुरुमनुकुरुष इव; कथं ? तत्राह—मुद्रायाः प्रत्ययकारिचिह्नात्मिकाया धारणेन दग्धं चर्म यस्य स तादृशः तस्य भावो मुद्राधारणदग्धचर्मकता तया; 'मुद्रा प्रत्ययकारिणी' इति विश्वः । [2]दृश्यैः दृश्यमानैः किणैः व्रणसंजातचर्मविशेषैराङ्कितः; मध्याह्नात्परमेव मध्याह्नादनन्तरमेव जले मज्जसि; प्रातःकाले कृष्यादिकार्यव्यापृतत्वेन तदानीं जलावगाहनासंभवात् । सानन्दं यथा भवति तथा तीर्थे आदरो यस्य सः तथाभूतः, तनौ शरीरे शान्ताङ्गाररुचिं शान्ताग्निकोलकाकान्तिं बिभर्षि । दण्डिनो दण्डवतः, मते वर्त्मनि तिष्ठन् । अन्यत्र—मुद्राधारणेन तप्तमुद्राधारणेन । मध्याह्नात्परमेव जले मज्जति; मध्वानां वैदिकमार्गबहिष्कृतानां प्रायेण वेदाध्ययनाभावेन शुष्कतार्किकाणां तेषां प्रातःस्नानाभावस्य सर्वलोकप्रसिद्धत्वात् । आनन्दतीर्थ इति मध्वगुरुस्तस्मिन्नादर आनन्दतीर्थादरः तेन सह वर्तत इति सानन्दतीर्थादरः । शान्ताङ्गारेण रुचिं कान्तिं बिभर्ति । दण्डिनः संन्यासिनो मते तिष्ठन्; तन्मते सुमतीन्द्रादिमठभेदेनैकादश्याद्युपवासस्य भेददर्शनात् । अत्रापि पूर्ववदलंकारः ॥ ५५ ॥

त्वं वाचंयमतां दधासि सहसे शीतातपौ निश्चलः
किं चिन्नैव च याचसे भुवि यथाजातात्मना तिष्ठसि ।
प्राणाकर्षकृता यमेन नियमेनारूढ एवासि च
प्रायः कासरसार्वभौम नितरां योगीव संदृश्यसे ॥ ५६ ॥

त्वमिति । हे कासर महिष नितरामत्यन्तं महायोगीव संदृश्यसे । कथं योगिसादृश्यम् ? तत्राह—त्वं वाचंयमतां मौनित्वं दधासि; शीतातपौ शीतोष्णौ निश्चलः सन् सहसे । किंचिदप्यभिलषितं नैव याचसे । भुवि भूमौ यथाजातात्मना यथाजातरूपेण; 'अव्ययं विभक्ति—' इत्यादिनाऽव्ययीभावः । जननकाले यादृशो दिगम्बरत्वादियुक्तस्तादृशवेषेणेति यावत् । तिष्ठसि । प्राणानां प्राणवायूनामाकर्षणं देहान्निःसरणं करोतीति प्राणाकर्षकृत्; तेन यमेन धर्मराजेन नियमेनारूढः; कृतान्तस्य महिषवाहनत्वात् । योगिपक्षे वाचंयमतां मौनिताम्; निदिध्यासनात्मकं

---

1. स्पष्टैः 2. स्पष्टैः व्यक्तैः अत एव दृश्यैः किणैः

मौनमित्यर्थः। तथा च कहोलब्राह्मणम्—'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' इति। सहसे शीतातपौ निश्चल इत्यनेन द्वंद्वसहिष्णुता। तथा च भगवद्गीतायाम्—'शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः' इति। किंचिन्नैव च याचस इत्यत्रापरिग्रहरूपो यमोऽभिहितः। तथा च योगभाष्ये—'विषयाणामार्जनरक्षणक्षयसङ्ग-हिंसादिदोषदर्शनादस्वीकरणमपरिग्रहः' इति। भुवि यथाजातात्मनेत्यत्र परमहंसाश्रमरूपावधूत-चर्योच्यते। प्राणानां प्राणवायूनामाकर्षकृता निरोधकृता; प्राणायामेनेत्यर्थः। यमेनाहिंसादिना, नियमेन शौचादिनारूढः। योगस्य [1]यमनियमाद्यष्टाङ्गोपेतत्वात्। अत्र योगपातञ्जले व्यासचरण-भाष्यकृतः—'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि' इति। यमा-दिस्वरूपमपि तत्रैव वर्णितम्। 'अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहा यमाः' 'शौचसंतोषतपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः'। तत्र 'स्थिरसुखमासनम्' तद्यथा—पद्मासनम्, वीरासनम्, भद्रासनमित्यादि। 'तस्मिन्सति निःश्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः। सत्यासने बाह्यस्य वायोराचमनं निःश्वासः। कोष्ठस्थवायोर्निःसारणं प्रश्वासः। तयोर्गतिविच्छेदः उभयाभावः प्राणायामः इति॥ ५६॥

धत्से शृङ्गयुगं प्रतप्तमभितो [2]गात्रे च चक्राङ्कनं
श्रीरामानुजमण्डलस्य सदृशं चिह्नं च धत्से मुखे।
[3]पङ्क्तीभूय निजप्रबन्धसमये क्रन्दस्यमन्दारवं
[4]नूनं श्रीमहिषाधिराज भवसि श्रीवैष्णवाग्रेसरः॥ ५७॥

धत्स इति। तत्तस्मात्कारणात् हे श्रीमहिषाधिराज, श्रीवैष्णवाग्रेसरः श्रीवैष्णवश्रेष्ठो भवसि [5]नूनमिति संबन्धः। कस्मादित्याह—शृङ्गयुगं विषाणयुग्मं धत्से वहसि। प्रकर्षेण तप्तमभितः परितो [6]गात्रे देहे चक्रवदङ्कनं चिह्नं धत्स इत्यनुषङ्गः। रोगादिपरिहारार्थं महिषाणां गवां च अङ्गे शूलचक्रार्धचन्द्राद्याकारं चिह्नं तप्तायसशलाकया कुर्वन्ति कृषीबलाः। श्रीरामानुजमण्डलस्य श्रीरूपिणी या रामा तस्या अनुजश्चन्द्रः, तस्य यन्मण्डलं बिम्बं तत्सदृशं चिह्नं मुखे धत्से। श्वेतवर्तुलावर्त-शोभितललाटयुक्तस्य महिषस्य कृष्यादौ प्रशस्तत्वेन कृषीवलसंप्रदायो बोध्यः। [7]पङ्क्तीभूय पङ्क्तिस्थो भूत्वा निजस्य स्वस्य प्रकर्षेण बन्धो बन्धनं तस्य समये काले अमन्दारवमधिकशब्दं यथा भवति तथा

---

1. यमाद्यष्टाङ्गनियतत्वात् 2. देहे 3. श्रेणीभूय 4. सत्यं 5. सत्यमिति निश्चयार्थे। कथ-मित्यत आह— 6. देहे स्वीयदेहे 7. श्रेणीभूय एकीभूय.

क्रन्दस्युद्घोषयसि । वैष्णवपक्षे— शृङ्गयुगं शृङ्गसदृशरेखाद्वयम्; 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके' इति विश्वः । अभित उभयत्र भुजद्वयेऽपि प्रतप्तं चक्राङ्कनम्; तेषां तप्तमुद्राङ्कनस्य पाञ्चरात्राचारागमसिद्धत्वादिति भावः । श्रीरामानुजमण्डलस्य रामानुजसंबन्धिमण्डलस्य समूहस्य सदृशं योग्यं चिह्नं ललाटादौ मृत्तिकालेपादिकम् । निजप्रबन्धसमये स्वस्य द्राविडप्रबन्धस्य नालायिरप्रबन्धस्येति यावत् । वाचनसमय देवोत्सवादिवेलायां श्रेणीभूय अमन्दारवं अधिकस्वरं यथा क्रन्दन्ते ॥ ५७ ॥

शृङ्गाग्रेण मुहुर्मुहुर्निजतनुं कण्डूयसे मौनवान्
प्राग्वंशोपहितां प्रविश्य विपुलां शालां महिष्या समम् ।
अन्तस्तिष्ठसि धूलिधूसरतनुः कृष्णाजिनाच्छादित-
स्तन्मे भासि लुलाय दीक्षित इव त्वं वाजिमेधक्रतौ ॥ ५८ ॥

शृङ्गेति । शृङ्गाग्रेण विषाणाग्रेण मुहुर्मुहुर्वारं वारं निजतनुं स्वकीयदेहं कण्डूयसे । मौनवान् प्राग्वंशोपहितां प्राचीनाग्रवंशनिर्मितां विपुलां विस्तृतां शालां गोष्ठरूपां महिष्या समं प्रविश्यान्तस्तिष्ठसि । प्रागग्रैर्वंशैर्गोष्ठनिर्माणे पश्चादिवृद्धिरिति शिल्पशास्त्रात्; धूलिभी रेणुभिर्धूसरा रूक्षा तनुर्यस्य स तादृशः, सर्वदा कृष्यादावेव व्यापृतत्वात् । कृष्णेन नीलेन आजिनेन चर्मणा आच्छादितस्तस्माद्धेतोः; हे लुलाय, वाजिमेधक्रतौ अश्वमेधे अश्ववध इत्यर्थः । दीक्षित इवोक्त इव भासि, महिषस्य वाहद्विट्त्वात् । दीक्षितपक्षे— शृङ्गाग्रेण कृष्णविषाणाग्रेण, 'कृष्णविषाणया कण्डूयते' इति श्रुतेः । मौनवान्; 'मुष्टीकरोति वाचं यच्छति' इति श्रुतेः । प्राग्वंशेन प्राग्वंशसंज्ञिकशालामुखांशेन; 'प्राग्वंशः प्राग्घविर्गेहात्' इत्यमरः । महिष्या कृताभिषेकया, अश्वमेधे राज्ञ एवाधिकारात् । धूलिधूसरतनुः अवभृथपर्यन्तं दीक्षितस्य स्नाननिषेधात् । कृष्णाजिनेनाच्छादितः; 'आजिनेन दीक्षयति' इत्यनेन कृष्णाजिनस्य विहितत्वात् ॥ ५८ ॥

ग्राह्योऽसि श्रवणादिभिः परिचयात्तत्त्वावमर्शे कृते
सत्यज्ञानमयोऽसि किं च बृहदारण्यान्तरे दृश्यसे ।
प्रत्यक्षीक्रियसे च योगिभिरखण्डाकारवृत्त्या स्वयं
तस्मात्पुच्छमयं लुलाय परमं ब्रह्म त्वमेवासि नः ॥ ५९ ॥

ग्राह्योऽसीति । श्रवणादिभिः श्रोत्रादिभिः परिचयाद्ग्राह्यः हस्तेन ग्रहीतुं योग्यः । कर्षका हि चिरपरिचयेन कर्णे गृहीत्वा पशून् लाङ्गलेषु बध्नन्तो दृश्यन्ते । तत्त्वस्य महिषस्वरूपस्य

स्वाभाव्याद्धे जननि पदयोश्चिन्तविद्रावकारी धारावाही तरलयति मामान्तरः कोऽपि भावः ।
क्षेत्रेशान्यूनादधननिधानित्वरूपं ते संप्रतीक्षा विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

अनादिक्यां कुविषयसुखास्वादनाशापिशाच्यां निष्प्रत्यूहं हृदयमदयं म्वैरमानर्तयन्त्याम् ।
कुत्र स्यान्मे विषयविमुखीभावलाभावकाशो विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

त्वत्पादाब्जस्मरणसरणेर्मा दवीयांसमज्ञं पुण्यापाङ्गैः स्वपय करुणाऽऽलिङ्गितैरुत्तरङ्गैः ।
त्वत्तो मातः प्रणतशरणं दैवतं किं जगत्यां विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

यावद्यावद्विषयमरणौ जृम्भते मे जिहासा तावद्बन्धं द्रढयितुमहो अन्तरायाः कतीमे ।
उल्लङ्घयैताञ्जननि चरणौ द्रष्टुमीशे कदा ते विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

माहात्म्यं ते भुवनजननि स्तोतुकामा इयत्तां लोकेशाना हरिहरमुखा नैव संविद्रते चेत् ।
दौरात्म्यं हि प्रकटयति मे तस्य साक्षाच्चिकीर्षां विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

सेविष्येऽम्बां विषयविरतिस्तेन मे संभवित्री जिज्ञासाया उपचयवशाद्यं मोक्ष्यामि बन्धम् ।
प्रत्याशेयं जननि सफला संभवित्री कदा मे विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

आशा एता मनसि कलयन्हन्त संकल्पमात्राः क्लिश्ये मातः कति कति वृथा तत्समाधित्सयाऽहम् ।
मायाभिस्त्वं जननि कतिधा वञ्चयस्यर्भकं मां विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

स्वत्कारुण्यामृतरसपरिप्लावनिर्धूततापाः पुण्यात्मानः कतिचन भजन्त्यम्ब ते पादमूलम् ।
कैवल्यं वा तदुपरितनं वा किमेषामगम्यं विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

त्वत्पादाब्जं शिशरणयिषोरारुरुक्षोश्च मोक्षप्रासादं वा व्यवसितिरियं नैव साधीयसी मे ।
कोऽहं मातस्तदुपसदने त्वत्कृपाया दवीयान्विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

इत्थं मातः शरणयितुमप्यम्ब ते पादमूलं कामक्रोधाद्युपहतमतिर्नाधिकारी यदि स्याम् ।
मूढात्माऽहं किमिह करवाण्यम्ब मात्राऽप्यपास्तो विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम्

सेवा चेत्स्यात्तव चरणयोस्त्वत्कृपा संभवित्री कारुण्यं चेत्प्रभवति तदैवाम्ब सेवावकाशः ।
इत्यन्योन्याश्रितमिदमहो केन वा स्यात्सुमाधं विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम्

कारुण्यं ते यदपि सुलभं मादृशां दुर्विभाव्यं किं मे चेतः प्रसभमपि तल्लुब्धुकामं मयिन्धे ।
करीणोऽहं न खलु जडधीस्तत्प्रवृत्तिं निरोद्धुं विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

योगाभ्यासो न भवतु न वा ज्ञानमार्गोपलम्भस्त्वत्पादाब्जस्मरणसरणिस्त्वम्ब मां मा प्रहासीत् ।
आशैषैषा फलति यदि मे को मदन्योऽस्ति धन्यो विद्यां शुद्धामपि च धिषणां देहि मूकाम्ब मह्यम् ॥

यत्नप्राप्त्याम्यहमिति वृथा चापलं याति चेतस्तत्तदूरीभवति यदि किं तत्र वक्ष्यामि भावम् ।
केयं माया ननु जननि ते क्वाप्यविज्ञातपूर्वा विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

आशाभङ्गे प्रतिविषयमप्यापरोक्ष्येण दृष्टे वैमुख्येऽस्मिन्सपदि सुदृढं सर्वथा भावनीये ।
यत्सङ्गं द्रढयति मनः किं वदाम्यस्य मौढ्यं विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

संख्याऽतीतैरशनिकठिनैर्दुःसहैर्दुःखजालैर्गाढाविद्धं यदिह भजते नैव कंचिद्विकारम् ।
तन्मे मातर्द्रवति हृदयं त्वत्पदध्यानमात्राद्विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

त्वत्सेवायामभिरतिरियं किंनिमित्ता न जाने मातुः पादौ न शिशुरथवा हातुमीहे कदाचित् ।
नोपेक्षायां तव निजशिशोस्त्वम्ब जानामि मूलं विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

केवं मातस्तव चरणयोश्चित्तविद्रावशक्तिर्भक्तिं सूते नियतमथवा प्राक्तनः पुण्यराशिः ।
नोचेदीदृक् क्व नु खलु भवेन्मन्दभाग्यस्य भाग्यं विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

सेवालोभो यदपि सुतरां मानसे मे ममिन्धे तेनैवाहं यदपि सुतरामस्मि धन्याग्रगण्यः ।
नालंभावस्तदपि खलु मे त्वां तु साक्षाच्चिकीर्षोर्विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

स्मारं स्मारं जननि जगतां मङ्गलं ते स्वरूपं लावण्याम्भःपरिगतपरिप्लावमापादचूडम् ।
आनन्दोद्यत्पुलकभरितो निर्वृतः स्यां कदा वा विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

दुर्वात्सर्यं दुरितभरितं दूरमुद्धूनयन्ती रागद्वेषाद्यभिभवदशां भावयन्ती दविष्ठाम् ।
कैवल्याख्यं सपदि खलु मे सौधमादर्शयन्ती विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

आढं मातस्तव पदयुगीं संपरिष्वज्य दोर्भ्यां विन्यस्तास्यस्तदुपरि शिवे मातरम्बेति जल्पन् ।
अन्तर्बाष्पस्थगितनयनः स्तोतुमीशे कदा त्वां विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

विस्मृत्याहं वत जननि ते पुण्यनामानुभावं त्वत्पादाब्जप्रपदनमहाभागधेयं च हित्वा ।
मोक्षो मोक्षस्त्विति किमु वृथा व्याप्रिये तत्र मूढो विद्यां शुद्धामपि च विषणां देहि मूकाम्ब मह्यम् ॥

मातस्त्वदङ्घ्रिसरसीरुहमन्तरा मे नैवान्यदस्ति भुवने शरणं शरण्यम् ।
तस्मादिमं जडमतिं करुणाकटाक्षैरावध्य रक्ष सुतमम्ब भवान्धकूपात् ॥ ३३ ॥

किमिह बहुभिरुक्तैस्तावकीने पदाब्जे प्रसृमरमतिलोलं भृङ्गलीलां वहन्तम् ।
विषमविषयमार्गाद्वारयैनं सुतं ते सफलय मम वाञ्छां देवि मूकाम्ब सद्यः ॥ ३४ ॥

॥ मतं तत्प्रयोजनं च ॥

(पूर्वतोऽनुवृत्तम्)

ततोऽपि 'आयुः पूर्वं प्रार्थनीयं मनुष्यैः स्वस्थाभावे कस्य हेतोः प्रयासः' इत्याद्यभियुक्तसूक्तिसमर्थितावश्यकर्तव्यताकं वाङ्धातुकपुरुषविज्ञानपरमोपकरणं वैद्यकाध्ययनम्। ततस्तत्संबन्धिनश्चित्तस्य नैर्मल्यसंपादनायानुष्ठेयानि तत्तद्वर्णाश्रमोचितानि कर्माणि। चित्तैकाग्र्यसंपादनाय संप्राप्तस्ततो योगोऽपि। अथ तस्यैव योगस्य सालम्बस्य सगर्भप्राणायामादिसमलङ्कृतस्य समनुष्ठानाय मूर्तिविशेषमावनिष्ठं पाञ्चरात्रादिकमवश्यं विज्ञेयम्। अनुष्ठेयं च भगवदाराधनादिकम्। ततश्च निरालम्बतासिद्धिकाङ्क्षिभिरधिकारिभिरमूर्तपतितत्त्वप्रतिपादनपराणि ज्ञांभवानि तन्त्राणि, ततः सकलतत्त्वस्वरूपपरिज्ञानाय कापिलं तन्त्रम्, ततः सकलप्रपञ्चनिषेधे सत्यात्मतत्त्वविज्ञानस्वरूपानन्दविष्फूर्तिभ्यामभ्यसनीया सद्गुरुसंप्रदायप्राप्ता खल्वौपनिषदी मीमांसा। अथ ब्रह्मज्ञानेन विरतिशयस्वरूपानन्दाविर्भावो मोक्ष इति ॥

अतोऽत्र सर्वेषामनैकरूप्यात्तत्तदधिकारीणि शास्त्राणि भगवता भर्गेण निरमायिषत। यथाऽऽह भगवान् बादरायणः श्रीमति महाभारते शान्तिपर्वणि—'भूयः स भगवान् ध्यात्वा चिरं शूलवरायुधः' इत्यारभ्य 'अङ्गानि वेदाः' इति चतुर्दशापि विद्याः समुपन्यस्य 'तन्त्रं पाशुपतं नाम पाञ्चरात्रं च विश्रुतम्। योगशास्त्रं च विख्यातं तन्त्रं लोकायतं तथा ॥' इति। तत् स्वरुचिसानुसारिणि यस्मिन्कस्मिंश्चिन्मते विद्यमानोऽपि सर्वसामरस्यापादके 'इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः' इत्याद्यवलम्बिनि श्रीमत्यद्वैतसिद्धान्तेऽविरोधबुद्धयः स्वं स्वमिह समीहितमुपलभ्य परत्र च शाश्वतमेव सुखमुपयन्ति। यतोऽस्मिन्मते वसनेषूत सदनेषु, गात्रेषूत पात्रेषु कानिचित्सर्वथा संसत्पृथक्करणमात्रप्रयोजनानि अन्यत्र परिदृश्यमानानि नोपलभ्यन्ते। 'यो यो यां यां तनुम्' इति श्रीभगवद्वासुदेववचनमनुसृत्य च सर्वदेवतासमाराधनमभीप्सितविशेषायानुमतम्। उक्तं च तथैव कैश्चिच्छिवाद्वैतिभिः— 'विधातारं कश्चिद्भजति भजते कश्चन हरिं सुरानन्यानन्ये जगति सफलाः सर्वविधयः' इति। अतश्चास्य शमप्राधान्याद्बहुशमधनपरिग्रहादैकमत्याविनाभावाच्च श्रेयसः मतफलमश्नुतम्। द्वितीयं चास्तिक्यानियतम्। तृतीयं प्रथमप्रयोजननिबन्धनम्। चतुर्थं च ब्रह्मकाण्डप्रामाण्यनिबन्धनम्। तदस्य महतः प्रवृत्तस्य मतस्य परमेश्वरपक्षनाभादयः प्रवर्तका युगान्तरे। तदस्मिन् कलौ तु तच्छिष्यपरंपरासमवाप्तसकलसाद्विद्यो भगवत्परमेश्वरांशभूतः श्रीमान् भगवत्पादशंकरमुनिराज इत्यहो कीदृशी चाद्वैतमतस्य महत्ता, कीदृशश्च तत्प्रवर्तकानां श्रीमच्छंकरभगवत्पादाचार्याणां महिमेति स्वयमेव विदांकुर्वन्तु विद्वन्मूर्धन्यतमाः सहृदया इति शम् ॥

"शास्त्रसिद्धा"

॥ चतुर्मतसारः ॥

[पोलकं ब्रह्मश्रीरामशास्त्रिभिर्विमृष्टः ॥]

(पूर्वतोऽनुवृत्तः)

मुक्तेर्मिथस्तरतमत्ववतीमुपासां हेतुं वदन् कथमबोचदतारतम्यम् । तस्मात्सुधीरपल-पन्नविशेषबोधं द्वैती जगाद किल मुक्तिषु तारतम्यम् ॥ स्वाप्नं च शुक्तिरजतादि च वस्तु सत्यं सत्ख्यातिवादहठतोऽविगणय्य बाधं । संसाधयत्यहह यः फलमस्य किं वा यद्वाऽस्ति विश्वितथत्व-सपक्षचौर्यम् ॥ विश्वं मृषा कलयितुं स्वपनं महेशो निःस्वाग्रतो निधिमिव प्रकटीचकार । तत्रास्य मीलितदृशो गमनं यथा स्यात्स्वप्नेऽपि सत्यमतिरत्र तथा परेषाम् ॥ रूप्यांशसत्त्वमधिशुक्त्युपयन्ति ये ते त्वर्थक्रियां तदुचितां किमु नो लभन्ते । न्यूनत्वतो यदि तदाऽम्बुधितीरभागे लभ्येत किं शकटसंभृतशुक्तिपुञ्जात् ॥ नैयायिकाद्यभिमतामपि निर्विकल्पबुद्धिं निरस्य सविकल्पकबुद्धिभेदम् । तत्संज्ञया व्यवहरन्ति किमर्थमेके कस्मादिमे त्वपलपन्ति न निर्विकल्पम् ॥ प्राभाकरा हि कथयन्ति यथानियोगनिर्वर्तनं स्वयमहो पुरुषार्थभूतम् । श्रीनाथभागवतार्किकरभावमेवं केचित्स्वतः किल पुमर्थमुशन्ति लोके ॥ आगोपमाललनमा च मनीषिवृन्दान्मर्त्यो द्विजोऽहमिति च प्रथिताविवेकम् । देहात्मबोधमिह ये प्रवदन्ति गौणं तद्बोधमेव किल तत्त्वविदाह गौणम् ॥ 'देहात्मबोधः गौणः' इति प्रत्यय एव 'सिंहो माणवकः' इति प्रत्ययवद्गौणः । माणवकः न सिंहः इतिवत् 'देहात्मबोधो न गौणः, अपि तु मिथ्याप्रत्ययः' इति भेदग्रहे सति जायमानत्वादिति भावः । मुख्यं च गौण-मिति गौणमपीह मुख्यं ज्ञानं वदन्ति विपरीततया किलैके । मर्त्यो द्विजोऽहमिति गौणधियो वदन्ति चात्मा शरीरमिति मुख्यममी वदन्ति ॥ 'यस्यात्मा शरीरं' इति श्रुतौ शरीरभिन्ने आत्मनि ब्रह्मशरीरत्वव्यवहारो निषम्यत्वगुणयोगेन गौण इत्यद्वैतिनामाशयः ॥

एवं श्रीरामानुजाचार्यप्रवर्तितविशिष्टाद्वैतमतपरिचयवशेन तन्मतोक्तप्रकारेण भगवद्-पासनजनितभगवदनुग्रहवशेन च द्वैतवासनायाः किंचिदिव ह्रासमद्वैतवासनायाः किंचिदिव प्रादुर्भावं चाधिगतवतोऽधिकारिपुरुषस्योन्नीनीषया श्रीमच्छ्रीकण्ठाचार्याः शक्तिविशिष्टशिवाद्वैतमतं तृतीयभूमिकात्वेन बोधयामासुः । तत्र च, प्रायशो रामानुजाचार्यप्रवर्तितविशिष्टाद्वैतमतवदेव स्थूलचिदचिद्वस्तुविशिष्टं ब्रह्म कार्यं, सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणमिति कार्यकारणोभयावस्थं

ब्रह्म विशिष्टाद्वैतरूपं, ब्रह्मप्रपञ्चयोः शरीरशरीरिभावः, ब्रह्मणः सविशेषत्वं, प्रपञ्चसत्यत्वं, जीवाणुत्वं, अर्चिरादिना मार्गेण लोकान्तरस्थं ब्रह्म प्राप्य तत्सादृश्यापत्तिर्मुक्तिरित्यादिप्रमेयनिरूपणं कृतम्, पूर्वमतवासनावासितमेव पुरुषमधिकृत्य किंचिदिव ततोऽप्युपरि निनीषयाऽस्य मतस्य प्रवृत्तेः। तथाऽपि विशेषो वर्तते। तथा हि—रामानुजमते प्रकृतिरूपा जडशक्तिरेव चिदचिद्रूपप्रपञ्चात्मना परिणमते, न तु ब्रह्मणो धर्मज्ञानरूपा चिच्छक्तिः। सा च चिच्छक्तिर्ब्रह्मणो भिन्ना ब्रह्मगुणगणात्मिका। ब्रह्मणो नित्यानां मुक्तानां च भोग्यभोगोपकरणभोगस्थानशरीरादिरूपविविधपदार्थाकारा जडाभिन्ना च नित्यविभूतिः शुद्धसत्त्वशब्दिता ब्रह्मचिच्छक्तिभ्यां भिन्ना। ब्रह्मचिच्छक्तिनित्यविभूतिभ्यो भिन्ना स्वतन्त्रचेतनान्तररूपा महालक्ष्मीर्ब्रह्ममहिषी। तस्याः ब्रह्मशक्तित्वादिवादाः पत्नीत्वादिरूपेण ब्रह्मविशेषणत्वाभिप्राया इत्यभ्युपगम्यते। श्रीकण्ठमते तु न तथाऽभ्युपगम्यते। किं तु परमेश्वरस्य सकलजगत्कर्तुर्धर्मज्ञानरूपा चिच्छक्तिरेव केनचिदंशेन प्रथमं नारायणात्मना परिणता सती, तद्द्वारा चिदचिद्रूपप्रपञ्चात्मना पश्चात्परिणमते। अत एव नारायणस्योपादानत्वव्यवहारः श्रुतिषु। अचित्प्रपञ्चस्य स्वरूपान्यथाभावरूपा उत्पत्तिः। चित्प्रपञ्चस्य तु नारायणांशभूतस्य धर्मज्ञानसंकोचविकासरूपैव उत्पत्तिः; न तु स्वरूपान्यथाभावः, चित्प्रपञ्चस्य मुक्तिभाक्त्वेन नित्यत्वात्। सा चिच्छक्तिरेव परब्रह्मणः शिवस्य ज्ञानेच्छाकृतिबलतेजःप्रभृतिगुणरूपेण शरीरेन्द्रियमनःप्राणरूपेण विविधभोग्यभोगस्थानोपकरणरूपेण सह भोक्तुर्दिव्यमहिषीरूपेण च परमेश्वरमाश्लेषते। स्वयमपि ज्ञानेच्छादिरूपैरुकैः सर्वैरप्युपेता नारायणाख्यपुरुषरूपेण दिव्यमहिषीयुक्ता च भवति। उक्तं चाभियुक्तैः—'शक्तिः शरीरमधिदैवतमन्तरात्मा ज्ञानं क्रिया करणमासनजालमिच्छा। ऐश्वर्यमावरणमायतनानि च त्वं किं तन्न यद्भवसि देवि शशाङ्कमौलेः॥ योऽयं चकास्ति गगनार्णवरत्नमिन्दुर्योऽयं सुरासुरगुरुः पुरुषः पुराणः। यद्वाममर्धमिदमन्तक सूदनस्य देवि त्वमेव तदिति प्रतिपादयन्ति॥ एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले। भोगे भवानी पुरुषेषु विष्णुः कोपे तु काली समरे तु दुर्गा॥' इति। श्रीमदप्पय्यदीक्षितैश्च शिवाच्छक्तिनिरूपणपरे आनन्दलहरीग्रन्थे उक्तम्—'शम्भोर्ज्ञानक्रियेच्छाबलकरणमनःशान्ततेजःशरीरस्वर्लोकागारदिव्यासनवरमहिषीभोग्यवर्गादिरूपा। सर्वैरेतैरुपेता स्वयमपि च परब्रह्मणस्तस्य शक्तिः सर्वाश्चर्यैकभूमिर्मुनिभिरभिनुता वेदतन्त्राभियुक्तैः॥' इति। तैरेव रत्नत्रयपरीक्षायामप्युक्तम्—'धर्मः पुंरूपमाप्त्वा सकलजगदुपादानभावं बिभर्ति' इति, 'यश्चोपादानभूतः पर इह पुरुषः सैष नारायणोक्त्या ख्यातः' इति 'तस्यैवाद्यस्य पुंसः परिणतिरखिलोऽप्यंबरादिर्विकारस्तस्यैवांशो विरिञ्चावधिरिह सकलोऽप्येष संसारिवर्गः' इति च। ब्रह्मणश्च सकलजगत्कर्तृभूतस्य निर्विकारत्वश्रुतिविरोधेन न साक्षादुपादानत्वं, अपि तु स्वापृथक्सिद्धचिच्छक्तिवदंशनारायणद्वारकमित्यभ्युपगम्यते इति श्रीकण्ठमतस्य रामानुजमतापेक्षया विशेषः॥

एवं चिदचिद्रूपप्रपञ्चपरिणामित्वेन चिदचिद्रूपप्रपञ्चाभिन्नतया उपगमाच्च चिच्छक्तेर्ब्रह्माभिन्नत्वमपि श्रीकण्ठाचार्यैर्भाष्ये बहुषु स्थलेषूद्घोषितम्। नैतदौपचारिकतया नयतमर्हति, तात्पर्येण पौनःपुन्येन ब्रह्मचिच्छक्त्योरभेदस्य तत्र वर्णनात्। एवं च श्रीकण्ठभाष्ये समधिगतं ब्रह्मचिच्छक्तेः सकलचेतनाचेतनप्रपञ्चाकारत्वं, तस्या एव ब्रह्माभिन्नत्वं तदीयसकलगुणगणरूपत्वं ब्रह्मणो निर्विकारत्वं चेत्यर्थचतुष्टयं, ब्रह्म निर्गुणं निष्प्रपञ्चं जीवाभिन्नं शुद्धाद्वैतरूपमित्यर्थस्य व्यञ्जकं सत् श्रीकण्ठाचार्याणामद्वैते तात्पर्यं तन्मतस्याद्वैतमतसन्निकृष्टत्वेन तत्पूर्वभूमिकात्वं च स्फुटमवगमयति। तथा हि— चिच्छक्तेर्ब्रह्माभेदे तस्या एव तदीयसकलगुणगणरूपत्वे च ब्रह्मणः स्वभिन्ना गुणा न सन्ति, किं तु स्वयमेव कल्पितभेदेन गुणवदप्यवभासते, वस्तुतो निर्गुणमेव ब्रह्म इति सिद्ध्यति। न ह्यभेदे मुख्यो गुणगुणिभाव उपपद्यते। न चाभेदस्येव भेदस्याप्यङ्गीकारान्मुख्यगुणगुणिभाव उपपद्यत इति वाच्यम्, श्रीकण्ठाचार्यैर्विरोधेन भेदाभेदयोरेकत्र प्रतिक्षेपात्। एवं वियदादिसकलप्रपञ्चाकारायाश्चिच्छक्तेर्ब्रह्माभेदाभ्युपगमेन वियदादिप्रपञ्चस्तद्विवर्त इति सिद्ध्यति। अन्यथा वियदादेरनित्यस्य तत्परिणामत्वाभ्युपगमे तदभिन्नस्य ब्रह्मणो निर्विकारत्वाभ्युपगमविरोधापत्तेः। एवं सकलचेतनप्रपञ्चाकारत्वस्य चिच्छक्तावभ्युपगमेन ब्रह्मणश्च चिच्छक्त्यभिन्नत्वाभ्युपगमेन चेतनप्रपञ्चस्य नित्यस्य वियदादिवद्विवर्तत्वाभावेन जीवब्रह्माभेदोऽपि सिद्ध्यति। एवं सन् घट इत्यादिप्रत्यक्षस्य मतान्तर इव प्रपञ्चगतसत्यत्वविषयकत्वमनभ्युपगम्योपादानभूतसद्रूपब्रह्मतादात्म्यविषयकत्वं यदभ्युपगतं श्रीकण्ठाचार्यैः, तत्प्रपञ्चमिथ्यात्वनिबन्धनाद्वैतसिद्धौ तदभिमतिमावेदयति। एवं घटः स्फुरतीत्यादिजीवधीष्वनुभूयमानस्य स्फुरणस्य ब्रह्मस्फुरणरूपत्वम्, अहं सुखीति जीवैरनुभूयमानस्य सुखस्य ब्रह्मानन्दरूपपरशक्त्यंशत्वं च यदभ्युपगतं श्रीकण्ठाचार्यैः, तत् जीवब्रह्माभेदाभिमतिं तेषामावेदयति। जीवब्रह्मणोर्भेदेऽन्यज्ञानेनान्येषां स्फुरणवत्त्वस्यान्यानन्देनान्येषां सुखित्वस्य चायोगात्। एवं 'अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम्' इत्यधिकरणे प्रथमं ब्रह्मोपासनामात्रेऽर्चिरादिगतिं व्यवस्थाप्य, अनन्तरं 'केचिदाहुः अनियमः सर्वेषामुपासकानामर्चिरादिगतौ नियमाभावः। तथा सति श्रुतिस्मृतिभ्यामविरोधः इति' इति मतान्तरमुपन्यस्य 'तत्रापि न दोषः, निरन्वयोपासकानां तदपेक्षाभावात्' इति तस्यापि सौत्रयोजनान्तरस्याद्वैतिसंमतस्यादुष्टत्वमुपपादितम्। तथा 'तदापीतेः संसारव्यपदेशात्' इत्यधिकरणावसाने 'केचिन्निरन्वयोपासकानामिह शरीरपात एव मुक्तिरित्यर्चिरादिगतिमानयनमाहुः' इत्युपन्यस्तम्। एवं 'अर्चिरादिना तत्प्रथितेः' इत्यधिकरणावसानेऽपि 'निरन्वयोपासकानां नार्चिरादिगतिरिति केचित्' इति कथितम्। एवं यत्र यत्राधिकरणे ब्रह्मविदो गतेरुत्क्रान्तेर्वा व्यवस्थापनं क्रियते, तत्र सर्वत्रापि तस्य तस्याधिकरणस्य सकलब्रह्मवित्साधारण्यशङ्कापरिहारार्थमन्य मतस्योपन्यासात्, अनियमाधिकरणे स्वयमप्यस्योपपादनाच्च श्रीकण्ठाचार्याणां, निर्गुणज्ञानिनामिहैव मुक्तावद्वैत्यभि-

[illegible]नभिमतिः स्पष्टं प्रतीयते । केचिदित्युपन्यासस्य स्वयमिदानीं सगुणविद्यानिरूपणनिष्ठ एव, न तु भगवत्पादवन्निर्गुणविद्यानिरूपणनिष्ठ इति द्योतनार्थत्वमेव, न तु स्वानभिमतिद्योतनार्थत्वमिति मन्तव्यम् । जीवब्रह्माभेदगोचरत्वमुपासनस्य यत्तैर्वर्णितं, तदपि तेषां जीवब्रह्माभेदाशयमभिव्यनक्ति । इदं सर्वमपि श्रीदीक्षितैरेव आनन्दलहर्यां निरूपितम्—'उक्ता खल्वत्र मुक्तिर्गतिमुपारै विना निर्गुणोपासकानां जीवाभेदावलम्बा सगुणपरशिवोपासनाऽप्यत्र भाष्ये । सत्ताप्रत्यक्षबुद्धेर्जगति च विषयो वर्णितः सत्यतान्यः शुद्धं ब्रह्माद्वितीयं मतमिति बहुधाऽऽविष्कृतं तावदेवम ॥ तच्छक्तिं ब्रह्मणो यत्सकलचिदचिदाकारशालित्वरूपां सत्तां तस्य स्वरूपं यदपि गुणगणं यच्च तन्निर्विकारम् । आचार्याः प्रोचुरेतैः दृढमधिगमितं निर्विशेषं तदिष्टं जीवास्तेनैक्यभाजो वियदनिलमुखास्तद्विवर्ता इतीदम ॥' इति ॥ तदुव्याख्यायां चन्द्रिकायां तैरेव सर्वमिदं विवृतम । श्रीकण्ठाचार्याणामुक्तरीत्या अद्वैताशयः शिवाद्वैतविनिर्णयाख्यग्रन्थेऽपि—'श्रीकण्ठशिवाचार्याः सिद्धान्तं निजगदुः शिवाद्वैतम् । तदिदं विशिष्टमभिहितमविशिष्टं वेति चिन्तयामोऽत्र ॥' इति प्रतिज्ञाय श्रीमदीक्षितैरेव मध्वमुपपादितः ॥ किंच 'सन्ध्ये सृष्टिराह हि' इत्यधिकरणे शिवार्कमणिदीपिकायां श्रीमदीक्षितोक्तरीत्या श्रीकण्ठाचार्याणां मतान्तर इव स्वप्नदृश्यरथादीनां सत्यत्वमिथ्यात्वपक्षयोरभिनिवेशं विना स्वप्नव्यवहारः न जीवसंकल्पकृतः, किं तु परमेश्वरसंकल्पमात्राधीनः इत्येतावन्मात्रेऽभिनिवेशोऽपि स्वप्नसत्यत्ववादिमतापेक्षया श्रीकण्ठमतस्य स्वप्नमिथ्यात्ववाद्यद्वैतमतसंनिकृष्टतां सूचयति । यद्यपि मध्वमते जीवगतबन्धस्य मिथ्यात्वं, ब्रह्मणः स्वभिन्नधर्मगाहित्यं, मुमुक्षुज्ञेयब्रह्मणोऽनुपास्यत्वं, जीवस्य ब्रह्मप्रतिबिम्बत्वं, ज्ञाननिवर्त्यानादिभावरूपाज्ञानसत्त्वमित्याद्यद्वैतमतानुकूलं प्रमेयजातं निरूपितम् ; यद्यपि च द्वैतविशिष्टाद्वैतमतद्वयेऽपि मुक्तौ ब्रह्मानन्दानुभवः प्रतिपादितः जीवब्रह्माभेदसूचकः, जीवब्रह्मणोर्भेदेऽन्यानन्दस्यान्यं प्रत्यपुरुषार्थत्वात् । तदुक्तं मदीये आचार्यमहिमप्रकाशे—'ब्रह्मान्यभिन्नमुपयन्त्यथ मुक्तभोग्यं ब्राह्मं सुखं च कथयन्ति परे स्वभाष्ये । तद्भक्तिनां वचनमृच्छति नाऽऽत्मत्वं न ह्यन्यदीयसुखमन्यजनानुभाव्यम ॥' इति ॥ तथाऽपि शुद्धाद्वैतस्य श्रीकण्ठमत इव मध्वरामानुजमतद्वयेऽपि स्वाभिमतत्वेनाविष्कारात्, प्रत्युत साग्रहं दूषणाच्चेतरमतद्वयापेक्षया श्रीकण्ठमतमेवाद्वैतमतस्य संनिकृष्टमिति मन्तव्यम् ।

किंच, ब्रह्ममीमांसायां प्रत्यक्षादिप्रामाण्याभिनिवेशिनां सहसा शुद्धाद्वैतबोधासंभवमभिप्रेत्यात्यन्तभेदाश्रयणेन वेदार्थाद्वैतनिर्णयानुपयोगिनं लोकव्यवहारमात्रोपयुक्तमारम्भसंघातवादद्वयं निरस्याभेदांशेन वेदार्थभूताद्वैतसमर्थने उपकुर्वाणं भेदांशेन प्रत्यक्षादिकमपि अनुसरन्तं कर्मोपासनाकाण्डाधिकार्यनुकूलं परिणामवादं विवर्तवादप्रत्यासन्नं प्रत्यक्षादिप्रामाण्याश्रयणेऽपि नाद्वैतसमन्वये कश्चन बाधोऽस्तीति दर्शयितुं प्रथमतः 'भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्' इति सूत्रेण प्रदर्श्य भेदाभेदाश्रयणेनात्यन्तभेदाद्विमुखचित्तस्य पुरुषस्यानन्तरं भेदांशनिराकरणेन केवलाभेदो

बोधयितुं शक्यत इति भावेन पश्चात् 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यादिसूत्रेण श्रुतिपरमतात्पर्यगोचरकेवलभेदपर्यवसायी ज्ञानकाण्डाधिकार्यनुकूलो विवर्तवादः प्रदर्शितः। ब्रह्मणोऽन्यथाभावस्य सत्यत्वे परिणामवादो मिथ्यात्वे विवर्तवाद इत्येतावानेव विवर्तपरिणामवादयोर्विशेषः। सत्यत्वबुद्ध्यनुपमर्देनैव कर्मोपासनाकाण्डयोः प्रवृत्तिः; सत्यत्वबुद्ध्युपमर्देन ज्ञानकाण्डप्रवृत्तिः; अतः परिणामवादस्य प्राथम्यम्। एवं च यथाकथंचिदभेदबोधकमतस्य भेदमात्रबोधकमतापेक्षया अद्वैतमतसंनिकृष्टत्वम्। तथा च रामानुजमते ब्रह्मपरिणामित्वस्य जगत्यनङ्गीकारेऽपि भेदाभेदवादखण्डनेऽपि च भेदस्यैव जगत्परिणामिप्रकृत्यपृथक्सिद्धब्रह्मणः चिदचिद्विशिष्टरूपेणाभेदस्याप्यङ्गीकारान्मध्वमतापेक्षया संनिकृष्टत्वम्। श्रीकण्ठमते ब्रह्मपरिणामित्वस्यानङ्गीकारेऽपि जगदाकारपरिणामिचिच्छक्त्यभिन्नत्वस्य निर्विकारे ब्रह्मण्यङ्गीकारात्तस्य च विवर्तवादसूचकत्वस्य पूर्वमुक्तत्वाद्रामानुजमतापेक्षया श्रीकण्ठमतस्य संनिकृष्टत्वम्। साक्षात् ब्रह्मपरिणामित्ववादिनां प्राचीनवृत्तिकारप्रभृतीनां आधुनिकभास्करयादवप्रकाशप्रभृतीनां च मतस्य भेदाभेदगोचरस्याद्वैतसंनिकृष्टस्य सत्वेऽपि चिच्छक्तिपरिणामित्ववादस्य श्रीकण्ठाचार्यपक्षस्य विवर्तवादपर्यवसायिनः इतरापेक्षया विशेषतः संनिकृष्टत्वादेव वृत्तिकारादिमतपरित्यागेन श्रीकण्ठमतस्यैव चतुर्मतसारग्रन्थे निबन्धनं कृतम्। तच्च श्रीकण्ठाचार्यमतसंनिकृष्टत्वं चतुर्मतसारग्रन्थकृतैव शिवाद्वैतविनिर्णयानन्दलहर्यादिग्रन्थेषु प्रदर्शितमिति तदभिमतमेवेत्यत्र न कोऽपि संशयः। अभेदादिगोचरधियामुत्तमादिभावो मदीये आचार्यमहिमप्रकाशेऽप्युक्तः—'या भेदधीर्भवकरी ह्यधमा तु सा या भेदाभिदामतिरवान्तरमुक्तिहेतुः। सा मध्यमा परममुक्तिनिदानभूता या चाभिदाविषयधीरियमुत्तमोक्ता॥' इति। भगवत्पादैरपि हिरण्यगर्भपदं समष्टिव्यष्ट्यात्मकं द्वैतैकत्वशब्दितमुपासनाफलत्वेन वर्णितम्। तदेव विशिष्टाद्वैतपदेनेतरैर्व्यवह्रियते। नीलकण्ठदीक्षितैरपि 'त्यक्तव्यो ममकारः त्यक्तुं यदि शक्यते नासौ। कर्तव्यो ममकारः किं तु स सर्वत्र कर्तव्यः॥' इति श्लोकेनेदमेव द्वैतैकत्वं व्यवहृतम्। तच्च द्वैतैकत्वं द्वैतस्याद्वैतस्य च मध्यभावीति युक्तमेव द्वैतद्वैतैकत्वाद्वैतावलम्बिनां मतानां क्रमेण संकलनमिति बोध्यम्॥

एवं श्रीकण्ठाचार्यप्रवर्तितशक्तिविशिष्टशिवाद्वैतमतपरिचयवशेन तत्पक्षोक्तप्रकारेण शक्तिविशिष्टशिवोपासनाजनितपरमेश्वरानुग्रहवशेन च समुपजातपूर्णाद्वैतवासनस्याधिकारिपुरुषस्य साधनचतुष्टयसंपन्नस्य कैवल्यशब्दिते परिपूर्णस्वाराज्ये अभिषेचनाय तुरीयपदप्रापकं 'नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकं धर्मो धर्मीति रूपद्वयमधत्ते पृथग्भूय मायावशेन। धर्मस्तत्रानुभूतिः सकलविषयिणी सर्वकार्यानुकूला शक्तिश्चेच्छादिरूपा भवति गुणगणाश्रयस्थैक एव॥' इति रत्नत्रयपरीक्षायां श्रीमदीक्षितेन्द्रोक्तरीत्या श्रीकण्ठभाष्योक्तचिच्छक्तिशिवात्मकधर्मधर्मिरूपमायिकरूपद्वयकल्पनाधिष्ठानभूतशुद्धचित्प्रकाशकं शुद्धाद्वैतमतं तुरीयभूमिकात्वेन भगवत्पादा बोधयांबभूवुः॥

एतावता ग्रन्थेन मतानां क्रमसंनिवेशे द्वितीयं कारणमुक्तम्। अन्यच्च तृतीयं कारणमुच्यते—भगवत्पादश्रीकण्ठरामानुजानन्दतीर्थाचार्याणामाविर्भावः क्रमेण। प्रथमतो भगवत्पादैराविर्भूय लोकोद्धारायाद्वैतमतं प्रकाशितम्। अनन्तरं तन्मतपरिज्ञानाशक्तानुद्दिश्य करुणया क्रमेण तदुद्धाराय श्रीकण्ठाचार्यैराविर्भूय शिवाद्वैतमतं प्रकाशितम्। अनन्तरं तत्राप्यशक्तानधिकारिण उद्दिश्य रामानुजाचार्यैराविर्भूय विशिष्टाद्वैतमतं प्रकाशितम्। ततः परं च तत्राप्यशक्तपुरुषोद्देशेनानन्दतीर्थाचार्यैराविर्भूय द्वैतमतं प्रकाशितम्। एवमुत्तरोत्तराचार्यैरधिकारिणामशक्तितारतम्येनोत्तरोत्तरमतानि बोधयित्वा तत्राधिकारिणां प्ररोचनायानादरवारणाय च पूर्वपूर्वमतदूषणपुरःसरमुत्तरोत्तरमतस्यैव मोक्षहेतुत्वं वर्णितमिति बोध्यम्। एवं भगवत्पादादिमतानां पूर्वपूर्वाशक्तोद्देशेन क्रमेणाविर्भावेऽपि तत्प्रातिलोम्येन द्वैतमतभूमिकाधिरूढस्य विशिष्टाद्वैतमतं, तदधिरूढस्य शिवाद्वैतमतं, तद्भूमिकाधिरूढस्याद्वैतमतमिति भूमिकाक्रमेण चतुर्मतसारे निबन्धनं दीक्षितेन्द्रैः कृतमिति मन्तव्यम्। आनन्दतीर्थाचार्यसमयात्पूर्वं रामानुजाचार्यसमयः, ततः पूर्वं भगवत्पादसमय इत्यत्र केषांचिदपि विप्रतिपत्तिर्नास्ति। रामानुजाचार्यसमयात्पूर्वं भगवत्पादसमयादनन्तरं श्रीकण्ठाचार्यसमयः इत्यत्र केचन विप्रतिपद्यन्ते। वल्लभाचार्यविरचिताणुभाष्यस्य व्याख्यायां प्रकाशाख्यायामानुनिकपुरुषोत्तमविरचितायां पौनःपुन्येन 'रामानुजमतचौर्यकृच्छ्रैवस्तु' इति श्रीकण्ठाचार्यानुद्दिश्य लिखितम्। येन रामानुजाचार्यसमयादनन्तरं श्रीकण्ठाचार्यसमय इति प्रतीयते तथाऽपि तन्न श्रद्धेयम्। यतो वैष्णवसम्प्रदायस्य पुरुषोत्तमस्य वचने चौर्यपदं, श्रीकण्ठाचार्यान्तरमिदंतया विना एतत्सम्प्रदायप्रवेशपदेन व्यवहारश्च तस्य वैष्णवसम्प्रदायेषु स्वाचार्याभिमानमूलकरागं, विजातीयाभिनवसम्प्रदायप्रवेशपदं च व्यनक्ति। तस्य च रागद्वेषमूलकव्यवहारश्च तदीयग्रन्थदर्शिनां विदुषां हृदयपरम्परये। श्रीकण्ठाचार्यसमयविषयकतत्परिज्ञानं तु श्रीमदप्पयदीक्षितग्रन्थपरामर्शेन जायते। तथा हि—आनन्दलहरीव्याख्यायां चन्द्रिकायां प्रथमश्लोकव्याख्यावसरे 'आनन्दमयो ब्रह्म, तत्प्रतिष्ठारूपं ब्रह्मापि पारिपूर्णानन्दरूपं ब्रह्मैव। अनन्यप्रतिष्ठत्वज्ञापनाय स्वस्य स्वप्रतिष्ठत्वोक्तिरिति विशिष्टाद्वैतवादिभिर्वैष्णवैरुक्तम्। श्रीकण्ठाचार्यैरेव आनन्दमयो ब्रह्मवत्प्रतिष्ठारूप इति स पन्था दर्शितः' इति दीक्षितेन्द्रैरुक्तम्। एवं च श्रीकण्ठाचार्यप्रदर्शितमार्गेण वैष्णवैराश्रयणोक्त्या श्रीकण्ठाचार्यसमयः रामानुजाचार्यसमयात्पूर्वं इति स्पष्टं ज्ञायते। अत एव श्रीमद्दीक्षितेन्द्रैः शिवार्कमणिदीपिकायाम् 'व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने। पूर्वाचार्यैः कलुषितं श्रीकण्ठेन प्रसादते॥' इति श्रीकण्ठभाष्यकारश्लोकव्याख्यानावसरे शाङ्कररामानुजीयादिभाष्येषु कथित्कथित् शिष्टाप्यादारादिना व्याससूत्रजातस्य कलुषीकृतत्वमुपपाद्य 'अप्रसिद्धश्रुतिस्मृत्यादिकल्पनाबहुल्यनवभाष्यकारादिभिस्तु छन्नमपि ज्ञानं कलुषितमिति स्पष्टमेव' इति नवभाष्ये कलुषितत्वमुक्त्वा 'दशमवर्षीयनवभाष्यादिप्रणेतॄणां ये पूर्वपूर्वोपदेष्टार आसन्

तानुद्दिश्य पूर्वाचार्यैः कलुषितमित्युक्तिः' इत्युपसंहृतम्। अत्र रामानुजाचार्यादिपूर्वकालिकेन-श्रीकण्ठाचार्येण पूर्वाचार्यपदेन कथं रामानुजाचार्यादीनां निर्देश इत्याशङ्कापरिहारायैव रामानुजाचार्यादीनां पूर्वपूर्वोपदेष्टार एव श्रीकण्ठाचार्यपूर्वकालिकाः पूर्वाचार्यपदेन व्यवहृता इति परिहृतम्। एवं माधवीये संक्षेपशंकरविजये भगवत्पादसमकालिकत्वेन श्रीकण्ठाचार्याः व्यवहृताः। तैः सह भगवत्पादानां वादश्च समभूदिति वर्णितम्। शंकरविजयस्य काव्यत्वेन कविवर्णनचातुर्येण क्वचित्क्वचिद्वस्तुतत्त्वस्यान्यथाकरणसंभवेऽपि भगवत्पादानां रामानुजाचार्यैः सह वादमनुपन्यस्य श्रीकण्ठाचार्यैः साकमेव वादस्य वर्णनेन वादस्याभूतत्वेऽपि रामानुजाचार्याणां प्राचीनाः श्रीकण्ठाचार्याः भगवत्पादानन्तरकालिका इत्येतावदभ्यूहितुं पर्याप्तम्, तत्प्रमाणमिति ज्ञायते। रामानुजभाष्यश्रुतप्रकाशिकादिषु श्रीकण्ठभाष्यकारमतास्वण्डनात् श्रीकण्ठाचार्यस्यानन्तरकालिकत्वं वक्तुं न शक्यते; यतो विशिष्टाद्वैतमतसंबन्धिप्रक्रियासामान्यस्य ब्रह्मणः शिवविष्णुनामकरणभेदमात्रभिन्नस्य श्रीकण्ठभाष्यत एव ग्रहणेन तत्खण्डने उपजीव्यविरोधभयेन खण्डनं न कृतम्। शिवपारम्यार्थशाः स्वानभिमताः श्रीकण्ठभाष्यकारोक्ताः श्रीकण्ठाचार्यनामग्रहणं विना प्रायशः खण्डिता एव रामानुजभाष्यादौ। श्रीकण्ठाचार्यैः शास्त्रयोनित्वाधिकरणे भगवत्पादीयप्रथमवर्णकस्य केचिदाहुरित्यादिनाऽनूद्योपपादनात्, स्वकान्वरेषु च बहुषु भगवत्पादीयव्याख्यानामनूद्योपपादनाच्च भगवत्पादानन्तरकालिकाः तत्पक्षपातिनश्च श्रीकण्ठाचार्या इत्त्र संशयलेशस्यास्थानवसरः। एवं च श्रीकण्ठमतचौर्यकुट्टैण्वस्तु इति वक्तव्ये रामानुजमतचौर्यकुच्छैवस्तु इति पुरुषोत्तमलेखनं सहृदया एव विवेचयन्तु इति सहृदयेषु भारं निक्षिप्य वयमुदासीना भवामः। एवं च पूर्वोपदर्शितकारणत्रयवशान्मतचतुष्टयसारापि क्रमिकत्वस्योपपन्नतया 'आनन्दतीर्थमुनिलक्ष्मण वेशिकेन्द्रश्रीकण्ठयोगिपदवीरदवीयसीर्नः। आचार्यपादसरणिं च विविच्य बोद्धुं संगृह्यते मतचतुष्टयसारलेशः॥' इति चतुर्मतसारोपक्रमे श्रीमद्दीक्षितेन्द्राणां क्रमेण द्वैतविशिष्टाद्वैतशक्तिविशिष्टशिवाद्वैतशुद्धाद्वैतमतसारसंग्रहणप्रतिज्ञानं मतचतुष्टयसारदर्शिनां सहृदयानामतीव चेतसि चमत्कारातिशयमावहतीत्यत्र सहृदयहृदयमेव परमं प्रमाणम्।

एवं प्रतिज्ञाय च श्रीमद्दीक्षितेन्द्राः प्रथमं न्यायमुक्तावल्या 'न्यायमुक्तावली रम्या विशदार्था विरच्यते' इति स्वोक्तरीत्या मध्वभाष्यतट्टीकादिभिरपि विशदतयाऽवगन्तुमशक्यस्य द्वैतमतस्य सुविशदं प्रकाशनेन द्वैतमतसारजिज्ञासूनां मनांसि मोदमेदुराण्यकुर्वन्। अनन्तरं च नयमयूखमालिकया 'श्रियः पतिं प्रेप्सतां प्रियहिताध्वदर्शिनी तन्यते नयमयूखमालिका' इति स्वोक्तरीत्या श्रीवैकुण्ठाख्यपरमपदादिदृक्षूणां भागवतानां श्रियं हितं च परमपदारोहणसाधनीभूतं श्रीमल्लक्ष्मणाचार्यसंमतं वेधं श्रीमन्नारायणोपासनामार्गं सम्यक् प्रादर्शयन्। पश्चाच्च नयमणिमालया 'सोपानपङ्क्तिकल्पा सोमाभरणपदमाकङ्क्षूणां क्रियते नयमणिमाला' इति स्वोक्तरीत्या ब्रह्मलोकगोलोकपरापरविष्णुलोकापरशिवलोकस्कन्दलोकोमालोकानत्यधिक्रम्य ऊर्ध्वभागे स्थितं महाकैलास-

शङ्कितं परशिवलोकारूढं परपदमारुरुक्षूणां परमशाम्भवानां सोपानायितं परशिवलोकारोहणसाधनीभूत श्रीकण्ठाचार्यदृष्टं वैधं श्रीमत्पाञ्चपरमेश्वरोपासनामार्गं सम्यक् प्राकाशयन्। अन्ते च आत्मबोधसाधनीभूतया नयमञ्जर्या ब्रह्मसूत्रारूढसकलाभिमतार्थप्रदातृपारिजातवृक्षसंबन्धिशाखाभेदरूपनानाभाष्योदितान् नानाभाष्याहतवैधविद्याविशेषैस्तत्तदेशप्राप्तिरूपारोहणलभ्यान्नानारसाढ्यान् सगुणफलविशेषानपेक्ष्यातिमधुरं 'सगुणफलततिर्वैधविद्याविशेषैस्तत्तदेशाप्तिरम्या सारादेव सकला यत्र वात्यंशभावं तस्मिन्नानन्दसिन्धावधिमहति फले' इति स्वीकरीत्या सारदृष्टाणां पूर्वोक्तफलविशेषाणां समुद्रायमाणं 'यस्मिन् मूले निरूढं फलमधिकतरं स्वादुनाढ्यं लभ्यम्' इति स्वीकरीत्या अर्चिरादिगतिरूपारोहणक्रमं चैनैव सूत्रात्मकपारिजातवृक्षमूलायितभगवत्पादभाष्ये इह लोक एव स्थितैर्लभ्यमतिरुच्यं भगवत्पादप्रदर्शितसूत्रकृदाशयानुसारिणं महाफलं तत्कालेभ्यो मुमुक्षुभ्यः कृते स्फुटीचक्रुः। इत्थं 'सर्वेषामपि पृजनी सुमनसां मरकृतिः' इति स्वीकरीत्या मनश्चक्षुष्यावलम्बिनां सर्वेषामपि विदुषां परमानन्दहेतुभूतचतुर्मतसारसंग्रहाभिधलोकोत्तरग्रन्थनिर्माणेन महान्तं लोकोपकारमातेनुः॥

चतुर्मतेष्वपि सामरस्यमावहन्नोऽपीमे श्रीकण्ठादीनामिव भगवत्पादानां नामनिर्देशमकृत्वा आचार्यपादा इत्येव व्यवहारेण भगवत्पादेषु 'आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते॥' इत्युक्ताचार्यलक्षणपरिपूर्तिमनितरसाधारणीं निखिलदर्शनसाराद्धारविवेचनप्रभवां भगवत्पादभक्तिं च प्रकटीचक्रुः। तदुक्तं मदीये आचार्यमहिमप्रकाशे—'शास्त्रार्थनिर्णयविधावधिकौशलत्वादाचारमार्गनयनाज्जगतोऽखिलस्य। लोकस्य संग्रहकृते निजवृत्तवृत्तेराचार्यकं भवति लोकगुरो सु र्णम्॥ निष्पक्षपातमखिलं भुवि दर्शनं चेद्दृश्येत भक्तिरुदियान्महती तदैव। आचार्यपादपदपङ्कजयोर्ध्रुवं तदाचार्यपादमहिमा न हि मानमेति॥' इति। प्रमाणाप्रमाणविभागमकृत्वा श्रुतिस्मृतिपुराणागमादिसकलशास्त्रपरमतात्पर्यगोचरपरमार्थब्रह्मनिर्णयकौशलेन परमाचार्यानामाचार्यत्वमनितरसाधारणमिति, द्वैतविशिष्टाद्वैताद्वैताद्वैतादिसकलदर्शनानामामूलचूडं परामर्श एव दर्शनतारतम्यपरिज्ञानद्वारा सोपानायितसर्वदर्शनसामरस्ययुतहर्म्यस्थानायिताद्वैतदर्शनसर्वोत्तरत्वाभ्यवसायतः परमाचार्यभगवत्पादेषु भक्तिः परिपोषं गच्छदिति च भावः॥

श्रुतिसीमन्तिनीकण्ठाभरणायमानानां नयमणिमालानवमयूखमालिकान्यायमुक्तावलीनां क्रमशस्तैस्तैर्महाभागैः प्रकाशितत्वेऽपीयता कालेनाप्रकाशितां श्रुतिसीमन्तिनीशिरोभूषायेयां नयमञ्जरीं प्रकाशनेन विकसितामापादयतां नयमञ्जरीविकासंभूतामोदभराकृष्टाखिलपण्डितमधुपमण्डलानां गुरुवर्योनुगृहीतगुरुभक्तशिखामणिविरुदं गुरुनमगुर्वालयनिर्माणगुरुवरप्रतिष्ठापनगुरुवरसंततताराधनगुरुकुलस्थापनगुरुकृतमगुरुवरसरस्वतीभाण्डागारस्थापनगुरुग्रन्थमुद्रापणप्रकाशनादिगुरुकृतमगुरुवर्यसंततकैङ्कर्यकरणेनान्वर्थयतां टि. के. बालसुब्रह्मण्यार्याणामन्तर्हृदयसंततनिवसदाचार्यपादानुस्मरणेनोपसंहरामि चतुर्मतसारसंग्रहविमर्शमिमम्॥

इति जम्बुकेश्वरस्थे विद्यास्थाने जगद्गुरोर्भगवतः। पोलकनामग्रामाभिजनश्रीरामशास्त्रिणा लिखितम्॥

॥ श्रीमदाचार्येन्द्रमहिमानुवर्णनम् ॥

श्रीसच्चिदानन्दशिवाभिनवनरसिंहभारतीगुरुवरचरणकमलसेवासमासादित-
ब्रह्मविद्यावैशद्येन श्रीसच्चिदानन्दतीर्थभिक्षुणा कृतम् ॥

श्रौतमार्गसमुद्धारबद्धादरजनारतम् । अमानुषचरित्राढ्यमाचार्येन्द्रमुपास्महे ॥

अयि मद्गुरुचरणसेवावशंवदीकृतस्वान्ताः, शान्ताः, मद्गुरूपदेशशमितान्तरध्वान्ताः, अङ्गीकृतश्रौतमार्गसिद्धान्ता धीमन्तः ! कर्णं कुरुत किमपि कमनीयमिदं वाङ्मयम् ॥

विदितचरमेव हि नामेदं विश्वेषां विदुषाम्, यत्किल सुखप्रेप्सादुःखपरिजिहीर्षाभ्यामेव समेऽपि खल्वमी प्राणभृतः तदुचितमुपाय पर्येषमाणाः यावद्बुद्धिबलोदय च कंचिदुपायमवगत्य तदनुरोधेनैव प्रवर्तमाना अपि स्वसमीहितं संपादयितुमपार्यमाणाः, तेनैव स्वप्रतिभाशक्तेः कुण्ठीभावमुपलभमानाः, तेन च स्वबुद्धिमात्रस्य न कुत्रापि स्वातन्त्र्येण समीहितार्थसंपादने सामर्थ्यं संभवतीति समालोच्य, अन्ततः अतीन्द्रियार्थप्रकाशक वेदमेव शरणीकृत्य तदुपदिष्टवर्त्मनैव प्रतिष्ठमानाः समधिगच्छन्ति समीहितमात्मीयमिति ॥

अधुना पुनराधुनिकशिक्षावशंवदैः प्राक्तनचर्याप्रमरणप्रमुषितप्रज्ञालोकैः पाश्चात्यविपश्चितां निश्चयसरणिमेव निश्चलमन्धगोलाङ्गूलन्यायानुरुन्धानैश्च नास्तिकवैरैरतितरामाक्रन्द्यमाना हि सा तपस्विनी श्रुतिर्यवनकरगता धेनुरिव कियतीमहो यातनामनुभवति ? यदा चैवं श्रुतिरेव महतीमियतीं यातनामनुभवति, तदा तु का कथा स्मृतिपुराणादीनाम् ? । स्मृतिं चैवं श्रुतिस्मृतिपुराणादिप्रदर्शितदिशैव संचरमाणानामास्तिकवराणामप्रतीकारदारुणा दुरवस्था काचिदियमुपनता कथमिव प्रतिनीयतां नाम । न चायं श्रौतमार्गो मानुषमात्रेण केनचित्प्रतिष्ठापयितुं पार्येत, अन्तरा भगवन्तं चन्द्रचूडम् ॥

अत एव भगवांश्चन्द्रचूडः श्रीमच्छंकरभगवत्पादरूपेणावतीर्य, ईदृशीं दुरवस्थां भविष्यन्तीमुत्प्रेक्ष्य, तन्निरासार्थं विविधग्रन्थजातप्रणयनेन, आसेतुहिमाचलं पर्यटनेन, धर्मप्रचारेण, दुर्मतनिरसनेन, अद्वैततत्त्वप्रतिबोधनेन च, श्रौतमार्गव्यवस्थापनार्थं महान्तमायासमनुभूय कृतकृत्यः सन् द्वात्रिंशत्तमे वत्सर एव कैलासवासमूरीचकार । तदेवं स्थिरीकृतेऽपि वैदिकमार्गे कालक्रमेण पुनश्च तस्य शिथिलतामुपलक्ष्य स एव परमेश्वरः श्रीमत्सच्चिदानन्दशिवाभिनवनरसिंहभारतीगुरुरूपेण प्रादुर्बभूव । न चैषामीश्वरावतारत्वे विप्रतिपत्तिः समुचिता । मूर्तिरेव हि तेषां शिवावतारतां स्वयमाख्याति । अमानुषं तेषां चरित्रं तु तदेव द्रढयति, अद्भुततरा प्रज्ञा तु तदेव सुदृढीकरोति । आजानुलम्बिकरयुगलां, अत्यद्भुतमन्दस्मितसुन्दरां, लोचनासेचनकरूपविशेषसमाकृष्टसर्वजनस्वान्तां, करुणाकन्दलितकटाक्षविक्षेपसंधुक्षितभक्तिरसप्रवाहां, मौनेऽपि भक्तजनेभ्यः

किमपि किमपि कथयन्तीमिव भासमानां, अव्याजसुन्दरीं श्रीमदाचार्येन्द्रमूर्तिमध्यक्षीकृत्यापि को नाम विप्रतिपद्येत तेषां शिवावतारत्वे । ईदृशास्ते महापुरुषाः श्रौतमार्गव्यवस्थापनार्थं भगवत्पादावेशवाऽप्यधिकमेव परिश्रममनुभूय कृतकृत्याः सन्तः स्वकीये चतुःपञ्चाशत्तमे वत्सर एव कैलासवासमाद्रियामासुः ॥

तदेवं श्रीमद्भगवत्पादानां श्रीमदाचार्येन्द्राणां च शिवावतारत्वे समानेऽपि, एका मूर्तिः द्वात्रिंशत्वत्सर एव तिरोभूत, अन्या मूर्तिस्तु चतुःपञ्चाशत्वत्सरे, इति वैलक्षण्ये किं निमित्त इति चेत्; तत्रेदमेव निमित्तं नः प्रतिभाति । भगवत्पादानां समये नास्तिकप्रपञ्चे बहुधा विद्यमानेऽपि तदानींतनपण्डितानां नैतावती वैतण्डिकता संजभूव, नैतावान् दुरभिनिवेशः परवशीचकार, कलिपराक्रमोऽपि नैतावदाचक्राम भुवनतलम्, विदेशीयविविधजनापशब्दानां दुरुपदेशवैशसमपि नैतावत् श्रद्धधति स्म, विषमतरश्रद्धेषविषविशेषविसर्पणमपि नाधुनेव साधुजनमनःकषायदोषं पोषयामास, स्वप्रतिभामात्रश्रमाणताभिमानोऽपि नैतावान् प्राक्तनानां प्रादुरासीत्, विदेशीयशासनप्रयुक्तविविधवेषभाषादिदोषोऽपि न दूषयामास पूर्वपुरुषान्, प्रत्युत भगवत्पादकालीनाः गुणगृह्याः पण्डिताः पामरा वा सकृदुपदेशमात्रेणापि सौलभ्येन श्रौतमार्गमवतारयितुं शक्या एव समभूवन् । श्रीमदाचार्येन्द्रकालीनास्तु विदेशीयजनपिशाचसमावेशपरवशितान्तःकरणतया, स्वप्रतिभामात्रप्रवणतया, वेदवैदिकद्वेषदावानलदग्धतया च महाचार्वाका एव संवृत्ता इति तादृशानां तेषां वैदिकमार्गप्रवर्तनात्मकेऽस्मिन् साहसकृत्ये श्रीमदाचार्येन्द्राणां परिश्रमाधिक्यं भवतीति तु युक्तरूपमेव ॥

भगवत्पादानां आचार्येन्द्राणां च आकृतिविशेषे वा, प्रज्ञायां वा, महिमातिशये वा, कारुण्यादिगुणविशेषे वा न किमपि वैसादृश्यं पश्यामः । यदि किंचिद्वैलक्षण्यं वक्तव्यं स्यात्, तर्हि वयःप्रयुक्तमेव तदिदमङ्गीकरणीयम्, यतो द्वात्रिंशे भगवत्पादानां, चतुःपञ्चाशे च श्रीमदाचार्येन्द्राणां कैलासवासः समभूत् । तस्मिन्नपि वैलक्षण्ये प्रागुक्तनिमित्तमेव युक्तरूपमुत्पश्यामः ॥

एतादृशमहापुरुषाणामवतारपुण्यदिनेऽस्मिन् तदीयदिव्यमूर्तिसंदर्शनतत्पूजनतत्स्मरणतीर्थसंसेवनतन्महिमानुवर्णनतत्कथाश्रवणादिना सफलीकृतपुण्यजन्मानो वे भक्तप्रवराः मन्ये, त एव धन्यतमाधेक्षयाऽपि धन्यतमाः इत्येतावदेव कथयित्वा पिष्टपेषणव्यवसायादस्मादुपरंस्यामः । इति शम् ॥

अभिज्ञानशाकुन्तलानुभवः ॥

मीमांसारत्नं, एम्. ए., बि. एल्., ए. वि. गोपालाचार्येण विरचितः ॥

(पूर्वतोऽनुवृत्तः)

सशरचापहस्त इति । 'विसृज्य सशरं चापम्' इति गीतागानप्रारम्भोक्तमत्र स्मरति कविः । रथेन राजानं सूतं च प्रवेशयन्, कृष्णसारपदं च नाटकादौ कीर्तयन्, प्रस्तावनान्ते च गीतगानेन हरिणा प्रसन्नं हरत्वं वर्णयन्, कृष्णेन भगवता कृष्णाख्यस्यार्जुनस्य रथे गीतं, कार्ष्ण्य-

वेदत्वेन प्रख्याते महाभारते कृष्णमुनिना निबद्धं भारतसारमपि कृष्णसारशब्देन स्मरतीव । कृष्णसारेणोपक्रान्तं नाटक 'परम्परं भावयन्तः श्रेयः परमवाप्स्यथ' इति गीतासारभूतकर्मयोगादेश-स्मारणेनोपसंहृतम् । 'रथं स्थापय' इति गीतारम्भे रथिना सूतं प्रति यथा कुरुक्षेत्रसमरद्वारे आदिष्टं, तथाऽत्रापि 'रथं स्थापय' इत्याश्रमद्वारे राज्ञा सूत आदिश्यते । रामायणपारायणमिव प्रत्यहं गीतापारायणमपि कृतवतेन कविना । यथा रामायणरसभरितो कविबुद्धिः, तथा गीतारस-भरिताऽपि ॥

'कृष्णसारे ददच्चक्षुः' । अत्र दक्षयज्ञवृत्तान्तं भावयति कविः । तत्र च नैकप्रयोजनानि कविबुद्धिस्थानि । सतीदेवीवियोगः समजनि जगदीश्वरस्य । कतिपयदिवसविप्रयोगानन्तरं पर्वतराजपुत्रीत्वेनावतीर्णया तया हिमवद्गिरौ भगवान् समयुज्यत । शकुन्तलायाश्च तादृशदीर्घ-विरहो भविष्यति । हेमकूटगिरौ च नायकेन पुनः संयोगो भविष्यति । 'स्मृत्वा देवीमचलतनयां विप्रयुक्तः शिवेन । रक्षात्मानं कथमपि शिवे जीवितालम्बनं मे' इति हंसपदेशान्ते सीता आश्वा-स्यते पार्वत्यनुभूतविरहस्मारणेन । दक्षयागावसरस्य नाटकारम्भे कविबुद्धिस्थत्वान्नान्दीश्लोके केवल-मीश्वरमात्रं तुष्टावेव कविः । 'पतिः पशूनामपरिग्रहोऽभूत् इति तदवसरः परिग्रहरहितः । अस्मि-न्नाटके प्रारम्भनिवेशितेयं मृगमृगयः शुभोदर्का । 'पश्यैनं व्यापाद्यमानं' इत्युक्त्वा शरप्रक्षेपक्षणे ऋषयो मध्ये आयन् । मृत्युमुखात्प्रामोचयन्नाश्रममृगम् । पुनर्जात इवाभून्मृगः । दक्षयज्ञवृत्तान्तेऽपि दक्षो मृत्युमुखात्प्रमोच्य समजीव्यत करुणाजलधिना ईश्वरेण । मृगरूपेण धावन् यज्ञः प्रथम प्रध्व-स्तोऽपि पुनर्यथाशास्त्र प्रायोजि । नाटकारम्भश्लोके देवीविरहित ईश्वरो नाटकान्तिमश्लोके 'परिगत-शक्तिः' इति देव्या संयुक्तत्वेन स्तूयते । यथा दिव्यदम्पत्योः केनापि निमित्तेन दीर्घविरहः सम-भवत्, तथा नाटकनायकदम्पत्योरपि । अनादिसद्धवैदिकयज्ञभागव्यवस्था आकुलिता अदक्षेण दक्षेण । अवाप्तसमस्तकामोऽपीश्वरः अनादिकृतं यज्ञभागं लम्भनीय एव । 'अयज्ञभागं तमवेक्ष्य चाध्वरं' इति भागवते ईश्वर्या निर्वेदकारणमुक्तम् । व्यवस्थातिक्रमेण महान् क्षोभः समजनि ; यज्ञो ध्वस्तो यजमानश्च । पुनर्यथाविधि यज्ञभागव्यवस्थया सह यज्ञः प्राचलत् । ध्वस्तोऽपि यजमानः पुनः समजीव्यत । कल्पितस्तद्यज्ञभागे तस्य तस्य भागिनो निरतिशय आदरः सहजः, यद्यपि स भागी अवाप्तसमस्तकाम ईश्वर एव भवेत् । 'श्रुत मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखात् —यज्ञभागोत्सुका देवा एव तथाऽनुतिष्ठन्ति यथा त्वां धर्मपत्नीं अचिरेण भर्ता अभि-नन्दिष्यतीति' इति सानुमती वक्ति षष्ठाङ्के । तेन च पत्नीविरहाद्यज्ञा अननुष्ठिता राज्ञेति गम्यते । 'भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरं'' द्वन्द्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकान्तरम् ॥' इति सप्तमाङ्के यज्ञभागव्यवस्था कविबुद्धिस्थेति स्पष्टम् । अत्र नाटकारम्भे कविबुद्धिस्था दाक्षायणी ईश्वरी ; दक्षश्च तद्बुद्धिस्थः । अन्तिमाङ्केऽपि दक्षप्रस्तावमपरां दाक्षायणीं च पश्यामः । अस्मिन्नाटके भूयान् यज्ञरक्षणप्रस्तावः । 'वहति विधिहुतं या हविर्या च होत्री' इति नान्दीश्लोक एव विधिवद्यज्ञानुष्ठानं प्रास्तूयत । अविधिना अयज्ञभागव्यवस्थया दक्षप्रयुक्तप्रथमयज्ञे तत एव हेतोर्ब्रह्मा विष्णुश्च न सन्निदधतुः । ईश्वरं प्रसाद्य तत्कृपया प्राणाङ्कँश्च पुनर्यथाविधि प्रयुज्यमाने

यज्ञे तथापि तौ सम्यगूधाताम्। 'दक्षं बभाषे आभाष्य प्रीयमाण इवानघ। अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्॥ त्रयाणामेकभावानां यो न पश्यति वै भिदाम्। सर्वभूतात्मनां ब्रह्मन्' इति श्रीभागवते महति यज्ञभङ्गे विष्णुना दक्षाय त्रिमूर्त्यैक्यरूपं कालिदासनिगूढं तत्त्वमुपादेशि। महाभारते च किरातवेषमीश्वरं 'शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे। दक्षयज्ञविनाशाय हरिरूपाय ते नमः॥ ललाटाक्षाय शर्वाय मीढुषे शूलपाणये। पिनाकगोप्त्रे सूर्याय भङ्गल्याय च वेधसे॥' इत्यर्जुनस्तुष्टाव। लेभे च तस्मात्सरहस्यं पाशुपतास्त्रम्। 'पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावना' इति षष्ठाङ्के काश्यपाश्रम. हिमवत्प्रान्तेऽवस्थित इति वर्ण्यते। रहसि गान्धर्वेण दत्तः शकुन्तलापरिणयो गौरीपरिणयस्थलसमीपे अभूत्। 'ईशार्थमन्मसि चिराय तपश्चरन्त्या यादोबिलङ्घनविलोलावलोचनायाः। आलम्बताग्रकरमत्र भवो भवान्याः इच्योतनिद्रमधमालिलाङ्गुलेन कर्णेन॥ अस्मिन्नगुह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोकितायाः। विन्यस्तमङ्गलमहौषधिरश्मिगर्भः स्रस्तांगप्रालेयकरेण करेण पाणिः॥' इति किरातार्जुनीये दीर्घतपस्तपनेन दीर्घः। हन्त गौरी ईक्षय गाढानुरागया त्रियुक्तो भर्ता समधिरूढवतास्मिन् हिमवद्गिरौ। शकुन्तलाऽपि काश्यपाश्रमं भर्तृविरहिता 'वसन पारधूसरे वसाना नियमक्षामसुखी धृतैकवेणी। अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बहन्ती॥' इति सप्तमाङ्कवर्णितप्रकारेण अशोकवने सीतावदेकवेणीधरा 'भूमौ च शय्या नियमश्च धर्मे पतिव्रतात्वम्' इति पतिव्रतोचितविरहव्रतं सुदीर्घमनुष्ठायानन्तरं भर्त्रा समयुज्यत गौरीग्रन्थे। शकुन्तलायाः प्रतीपं दैवं शमयितुं सोमतीर्थं गच्छति कण्वः। उमाया अभिमुखीकरणन्यायवश्यकता तेन द्योत्यते। 'परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकलापनम्। करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथैव वनमेति जानकी॥' इत्युत्तररामचरिते भवभूतिः। ईश्वरमिथुनस्यापि दीर्घविरहवृत्तान्तस्मारणेन भाविविरहे तस्य कथंचिदोढव्यता च नाटकारम्भ एव सूचयति कविर्नान्दीश्लोके देव्यानिर्देशेन, नाटकप्रथमश्लोकेऽत्र दक्षयज्ञवृत्तान्तस्मारणेन च। अन्यश्लोकस्योत्तरार्धमपि भारतबुद्धोपक्रमे गीतागानावसरपरत्वेऽपि सगच्छते। कृष्णस्य आयुधाग्रहणप्रतिज्ञानेन जोषमवस्थानस्य निबन्धत्वात् पाशुपतास्त्रानुग्रहीता महेश्वरोऽहङ्कारत्वेन विजयरथपुनः स्थित्वा प्रतिभटान् सञ्जहारेति भारते स्मर्यते। 'कौरव्याः पशवः' इत्युक्तरीत्या कौरव्या मृगा राजन्ययुद्धे पिनाकिना अन्वेष्यन्त इव। अदृश्यमीश्वरं कौरव्यमृगानुसारिणं पश्यति भगवान् कृष्णोऽर्जुनश्च यथासुखं। भूयसी रुचिः कवेः कुरुक्षेत्रयुद्धवृत्तान्ते। 'ब्रह्मावर्तं जनपदमधश्च्छायया गाहमानः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः। राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि॥' इति मेघश्लोको ज्ञेयः। इयं मृगमृगया चरमा दुष्यन्तस्य। 'न नमयितुमधिज्यमुस्सहिष्ये धनुरिदमाहितसायकं मृगेषु' इति वक्ष्यति। शकुन्तलापाणिग्रहणेन मृगयाशीलोऽपि राजा सर्वप्राणिसुहृद्भवति। आश्रममृगोऽयं शकुन्तलया संवर्धितो भवेत्। सर्वथा शकुन्तलाप्राणा एव स्यात्। अस्य हननेन शकुन्तलाप्रणयिनो न सुलभः सख्यो वा भवेत्। सुदूरमनुना सारङ्गेण अयमाकृष्यते। यथा विनाकृतानुसृतो मृगोऽवसाने न नष्टः, तथाऽयमपि मृगोऽवसाने मृत्योर्विमोक्ष्यते। इत्थं च पूर्णोपमेयं श्लोकप्रदर्शिता॥

'ग्रीवाभङ्गाभिरामम्' । पुनः पुनर्विवृत्तवदनेन ग्रीवाभङ्गः क्रियते शरपतनभिया । प्राणभङ्गभिया ग्रीवाभङ्गः पूर्वकायप्रवेशरूपपश्चार्धसंकोचनं च । भिया कृते ग्रीवाभङ्गे अभिरामत्वबुद्धिर्मृगबाल्यसूचिनी राज्ञः । ईदृशमृगानुधावनदर्शनं न सहेत शकुन्तला । विपुलोलूखले बद्धोऽभाग्यवद्गोपालशिशुः—'परिवर्तितकन्धरं भयेन स्मितफुल्लाधरपल्लवं भजामि' इति । अधर्मकृतं कन्धरापरिवर्तनं दर्शनीयं तत्र । भयभावनामात्रं तत्र । 'आसीद्विवृत्तवदना च विमोचयन्ती शाखासु वल्कलमसक्तमपि द्रुमाणाम्' 'दृष्टो विवृत्य बहुशोऽप्यनया सतृष्णमन्तरे श्रवणकाबरतां गतोऽस्मि' इति मृगाक्ष्याः सग्रीवाभङ्गमुखपरिवर्तनशोभां मुहुर्मुहुः कीर्तयति राजा । 'अनुपतति मुहुः स्यन्दने बद्धदृष्टिः' । स्यन्दनोऽनुपतति शरः पतेदिति भीः । भूयसा पश्चार्धेन भूयसा पूर्वकाय प्रविष्टः । मृगाणां पश्चार्धं भूयः, पूर्वार्धं च तनीयः । भूयोऽपि पश्चार्धं तनीयसि पूर्वकाये संकोच्य प्रवेशयतीव । अर्धावलीढा दर्भा रोमन्थवर्तने । अर्धावलीढा दर्भा अतिवेगधावनश्रमेण विवृतान्मुखाद्भ्रश्यन्ति । उदग्रप्लुतत्वात् आकाशे बहुतरं, अल्पं च उर्व्यां प्रयाति । नात्र अर्धमर्धं यथा द्वितीयतृतीयपादयोः । भयानकरसमुत्पादयद्वस्माकं मृगयाशीलस्य राज्ञोऽभिरामं रङ्गकम् । यत्तस्याभिरामं तदेवास्माकं भयानकम् । एतन्नाटकवस्तु विशति स्वर्गं बहुतरं स्तोकमुर्व्यां च संचरति । ग्रीष्मसमये उपक्रान्तं वस्तु । अङ्कचतुष्टये ग्रीष्मसमयः । षष्ठाङ्के शरदृतुः । आम्रकूटपर्वते काश्यपाश्रमे नैकसंवत्सराः उषिता भरतशकुन्तलाभ्याम् । नायिकाप्रधानमिदं नाटकम् । तन्नाम्नाऽभिधानं कृतं कविना नाटकस्य । 'काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्' । रामायणसज्ञा देवलोके कृता । रामायणनामकरणं न स्वायत्तं प्राचेतसस्य । स्वायत्तत्वे सीतायनमिति नाम कृतं स्यात् । अत्र स्वायत्तत्वान्नामकरणस्य शाकुन्तलमिति नाम कृतं कविना । इतरनाटकद्वये उभयोरपि प्राधान्यम् । कतिपयान्मासानेवोवासोर्व्यां शकुन्तलाऽस्मिन्नाटके । सुदीर्घं काल विशति काश्यपाश्रमे उवास ॥

'मुक्तेषु रश्मिषु निरायतपूर्वकायाः' । पूर्वं मृगधावनस्वभावो वर्णितः । अत्र अश्वधावनस्वभावो वर्ण्यते अश्वस्वभावज्ञेन सूतेन । अत्र धावने पूर्वकायस्य विस्तारणं वर्ण्यते । पूर्वोक्तपूर्वकायशब्द एव परिगृह्यते । तत्र मृगशरीरसंकोचः, अत्र अश्वशरीरविस्तारः । तत्र भयात्पलायने शरलक्ष्यभूतशरीरस्य संकोचनम्, अत्र अश्वानां मृगानुधावने तादृशभयाभावात् स्वशरीरस्य विस्तरणम् । अतिवेगधावने चामरशिखानां निश्चलत्वम्, ऊर्ध्वस्य कर्णस्य निश्चलत्वं च । 'मृगजवाक्षमयैव' । इतरवेगासहिष्णुत्वं, तन्निमित्तेन द्रुततरधावने स्पर्धालुत्वं च मृगाणां स्वभावः । 'रथ्याः' । रथे बद्धत्वान्मृगजवो नातिशेते पार्यत इति अश्वभावो व्यज्यते । यद्यपि कृष्णसारस्य दृष्टिः रथे मुहुर्बद्धा, न तच्छरीरं रथे बद्धम्, यथा अश्वानाम् । 'आत्मोद्धतैरपि रजोभिरलक्ष्यनीयाः' । पार्थ प्रयान्तः पान्थाः दूष्यन्ते धूसरीक्रियन्ते स्वोत्थापितै रजोभिः, स्वात्मा तु न दूष्यते इति चित्रम् । आत्मोत्थितै रजोभिरात्मनो दूषणं न्याय्यम् । इदं तु विपरीतम् । अनुभवगोचरमिदं द्रुतशकटयायिनाम् । कर्मणः फलं कर्तुरिति न्यायस्यापवादोऽयम् ॥

उत्खातिनी भूमिरिति भाविविषमापदः सूचनम् । 'अस्मिन्नलक्षितनतोन्नतभूमिभागे मार्गे पदानि खलु ते विषमीभवन्ति' इति कण्ववचनेनापीदं सूच्यत इव । नाटकान्ते तु विषमापत्तिस्थानानन्तरं 'रथेनानुत्खातस्तिमितगतिना' इति श्लोकेनाशीर्दीयत इति सहृदयैर्भाव्यम् ॥

'यदालोके सूक्ष्मम्' । अत्र उर्व्या जवेन रथधावन वर्ण्यते । सप्तमाङ्के द्युलोकात् वेगेन रथावतरण वर्ण्यते—'शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी वर्णस्वारस्तरलीनतां विजहति स्कन्धोदयात्पादपाः । संतानं तनुभावनष्टसलिला व्यक्तं व्रजन्त्यापगाः केनाप्युत्क्षिपतेव मर्त्यभुवनं मत्पार्श्वमानीयते ॥' इति । उभयत्रापि स्वभावाः यथावच्चारु वर्ण्यन्ते । यादवाभ्युदये स्वर्गलोकात् द्वारकामवतरता कृष्णेन सत्यभामां प्रति गीतः 'विधाय वार्क्ष्यं गगनाध्वपोत्तं सार्धं मया देवि समाव्रजन्तीम् । प्रत्युत्थितेव प्रतिभाति भव्या दूरादियं द्वारवती पुरी त्वाम् ॥' इति श्लोकोऽपि भाव्यः । योगेन ब्रह्मदर्शनविषये 'यदालोके' इति श्लोकोक्त चारु श्लिष्यति । योगारोहे यत् दिदृक्षितभगवद्विग्रहबिम्बं सूक्ष्म किंचिदेव दृश्येत, उपर्युपरि भगवदनुग्रहण तत्सहसा विपुलतां भजेत । भजति, भक्तजनहृदये विपुलतां भजति । योगे आरूढ पूर्वमर्धे मध्ये विच्छिन्नानां वृत्तीनां तैलधारावदविच्छिन्नः संतानो भवति । अर्धे विच्छिन्ना वृत्तयः कृतसधाना इव भवन्ति । 'सन्तानं व्रजन्ति' इति सप्तमाङ्कश्लोकोक्त भाव्यम् । अत्र नायकनायकीसमागमेषु प्रथमं समुखे सुसूक्ष्मं गूढ-गूढ भावप्रदर्शन भवति । उदिते परस्परभावे सहसा तस्य वैपुल्य भवति । तस्य स्पष्टदृश्यता च भवति । अर्धे विच्छेदो भवत्यन्तरायैः । अनन्तरं च संधानं क्रियते । अभिज्ञाटके आपनार्धे विच्छेदो भवति । अनन्तरं च संधानं क्रियते । 'अणीयसे विश्वविधारिणे नमो नमोऽन्तिकस्थाय नमो दवीयसे' इति किरातरूपिणो भगवतो अर्जुनस्तुतिः । 'तदूरे तद्वन्तिके' 'दूरात्सुदूरे तदिहान्तिके च' इत्युपनिषत् । यदूरे अयोगिनामभक्तानाम्, तन्मनोवृत्तिसंततिरूपमनोरथवेगेन भक्तानां सहसा अन्तिक भवति । 'न मे किंचिदूरे क्षणमपि न पार्श्वे रथजवात्' इति चतुर्थपादे ब्रह्मविषयकभजनाभजनाभ्यां तस्यान्तिकवदूरत्व उपनिषद्भिः श्रावित स्मार्यते इव । योगिमनोरथवेगः कामिमनोरथवेग इत्येतदुभयमपि रथजवादित्यनेन व्यज्यत । 'समीपं राजहंसस्य रामस्य विदितात्मनः । संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥' इत्यादिकं भाव्यम् । 'अवान्तरार्थविच्छेदे बिन्दुरुच्छेदकारणम्' इति लक्षणमपि स्मार्यत इव ॥

'न हन्तव्यो न हन्तव्यः' इति तापसानां वीप्सया आश्रममृगो मृत्युमुखात्प्रमोच्यते । 'ब्राह्मणो न हन्तव्यः' इति श्रौतनिषेधः । ब्राह्मणवद्भवत्यय ब्राह्मणसवर्धित आश्रममृगः । ब्राह्मणे गवि हस्तिनि तापसाः पण्डिताः समदर्शिनः । 'कृष्णसारस्यान्तरे तपस्विन उपस्थिताः' । उपस्थेयाः तपस्विनो राजानमुपस्थिताः । 'उपस्थेयैरुपस्थितः' इति रामवचन स्मार्यते । आत्मनातृतीयः शिष्यद्वयसहितः । द्वौ शिष्यौ पुरस्कृत्य पश्चादायातीव प्रधानतापसः । द्वौ तापसौ पुर आयातौ मङ्गलकरौ राज्ञः । परिणयः खलु भविष्यति । साधुकृतसंधानं सायक प्रतिसंहर । अनागसि साधौ आश्रममृगे कृतसंधान सायकं प्रतिसंहर । साधुसंहरणं न न्याय्यम् । कृतसंधान सायक साधु आशु प्रतिसंहर । कृतसंधानस्य शरस्य मोघीकरण सुदुष्करम् । संहितस्य, तत्रापि साधु संहितस्य प्रतिसंहरणं दुष्कृत्यम्, अद्भुतदयाकार्यं च । 'आर्तत्राणाय व. शस्त्रम' इत्यनेन 'क्षत्रियैर्धार्यते शस्त्रं नार्तशब्दो भवेदिति' इति रामवाक्यं स्मारेतमिव । 'सदृशमेतत्पुरुवंशप्रदीपस्य' । 'प्रवर्तितो दीप इव प्रदीपात्' इति रघुवंशे । प्रदीपः पिता, तस्मादीपः पुत्रः प्रवर्तताम् । 'पुरुवंशः' । 'पुरोर्वंशे' इति वंशनामाभ्यस्यते । इतः परमयं भरतवंशो भविष्यति । दुष्यन्तपर्यन्तमेव पुरुवंशनाम । 'वृक्षरूप-

मिद तव'। पुरः क्षत्रियः प्राप्तं यौवनं पित्रे प्रदाय तज्जरां परिजगृहे। त्वं च वीरव्रतं संहितशस्त्रामोघत्वं परित्यज्य संहितं प्रतिसहृतवान। 'चक्रवर्तिनं पुत्रमाप्नुहि' इत्यत्र त्रिः पठ्यते त्रिभिस्तापसैः। चक्रवर्तिलक्षणोपेतपुत्रप्राप्तिप्रस्तावं भाव्यङ्केषु पश्यामः। नाटकान्ते च इदं पठ्यते। अत्र आशीर्वचनमात्र पुत्रजन्मनः। तत्र जातस्य पुत्रस्य चक्रवर्तित्वमाशास्यते। 'पुत्रं लभस्वात्मगुणानुरूपम्' इति कौत्साशीर्वचनवत् अत्र 'एवंगुणोपेतं' इत्युच्यते। एवगुणोपेतं इत्यस्य आत्मगुणानुरूपमित्यर्थः। 'कण्वस्य कुलपतेः'। पुरुकुलस्यापि शकुन्तलापितृत्वाभिमानेन कण्वः कथंचित्कुलपतिर्भविष्यति। 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति'। भरतस्य तस्मिन् पितृत्वाभिमानो दृढ इति पूर्वमेव प्रदर्शितम्। 'प्रतिहतविघ्नाः क्रियाः'। अनेन भाविविघ्नप्रसङ्गः सूच्यते। विवाहक्रियानिर्वर्तितं दाम्पत्यं प्रतिहतविघ्नं भूयात्। 'भुजो मौर्वीकिणाङ्कः' भाविप्रतिसराङ्कस्यापि सूचनम्। प्रोषितेन कुलपतिना शकुन्तला आतिथ्यकरणे नियुक्ता। सत्स्वपि बहुषु तापसेषु तावास्तस्यां धर्मशीलाया क्षत्रियदारिकायां कुलपतेरभिमानः। अतिथिपरिचरणरूपधर्मकार्ये तापसेभ्योपि तस्या अधिकं कौशलमिव। न तन्निमित्तं तापसानामभ्यसूयेति व्यज्यते अनेन तापसवचनेन॥

'नीवाराः'। नीवारास्तपोवनवासिनां तपस्विनां शुकानां मृगाणां च साधारण आहारः। वनभवेषु नीवारेषु सर्वे वनप्राणिनो भागिनः। वनचराणां तपस्विनां रीतिरीदृशी। नीवारपदेनाश्रमवर्णनश्लोकः उपक्रमते। नीवारधान्यषष्ठभागप्रस्तावमुत्तराङ्के पश्यामः। चतुर्थाङ्के 'नीवारमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृतकः' इति। यदन्नास्तत्रत्यास्तापसाः, तदन्नास्तत्रत्यशुकमृगादयोऽपि। इत्थं च आत्मौपम्येन तिरश्चोऽपि भावयन्ति तपस्विन इति सूच्यते। भूयान्कवेर्नीवारधान्ये व्यामोहः। नीवाराः स्वस्तिवाचनिकाः अक्षताः। अपि नाम नीवाराशी तपस्वी भवेयम्? इति कवेर्भाव इव। कोटं दुर्गं राति ददातीति कोटरः। मुनिवनतरुकोटरं गिरिदुर्गमिव तच्छरणानां शुकादीनाम्। 'गर्भभूतास्तपोधनाः' इति दण्डकारण्यवासिनो मुनयो रामं प्रति। गर्भभूताः शुकास्तपोधनानां तन्निवासवनतरवश्च। निर्भयं वसन्ति कोटरेषु शुकाः सकुटुम्बम्। शुकादीनामाहाराय प्रभूता नीवाराः क्षिप्यन्ते मुनिभिः। अस्मिंस्तपोवने उपला अपि प्रकर्षेण स्निग्धा इवेति ध्वन्यते प्रस्निग्धा उपला इति। इङ्गुदीफलतैलं तापसैर्मृगैश्चोपयुज्यते। 'यस्य त्वया व्रणविरोपणमिङ्गुदीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे' इति चतुर्थाङ्के इङ्गुदीफलतैलस्य मृगाणामप्युपयोगित्वमुच्यते। 'इङ्गुदी तापसतरुः' इत्यमरः। इङ्गुदीतरवोऽपि तापसाः। तापसतरुफलं तापसैरुपयुज्यते। आश्रमप्रदेशाभ्यन्तर एव मृगाणामभयत्वबुद्धिः। आश्रममृगाणामपि नाश्रमाद्बहिस्तादृशो विश्वासः। यदा मृगा आश्रमाभोगान्तस्तिष्ठन्ति, तदैव तेषां निर्भयत्वम्। मृगाणामत्र विश्वासोपगमः, अभिन्नगतित्वं शब्दसहनं च तदवस्थानप्रदेशस्य तपोवनाभोगत्वं सुनिश्चितं गमयति। मनुष्येभ्यो न भयं मृगाणामाश्रमान्तःस्थानाम्। वनगजेभ्यस्तुभयं स्यादिति 'भिन्नसारङ्गयूथः' इत्यङ्कान्ते प्रदर्श्यते। तत्र भीताद्वनगजाद्विशेषतो भयम्। सूच्यन्त इति शब्देन शब्दशक्त्या नगरेषु जनपदेषु च यत् सूच्यन्तेन फलभेदनादिकं कार्यं निर्वर्त्येत, तत् तपोवने उपलैर्निर्वर्त्यते इति सूच्यते। उपलैः फलभेदनं च तपोवनाभोगत्वे लिङ्गम्। अन्यत्र, उपलानां न प्रस्निग्धत्व-

संभवः । उपला अपि तापसानां स्नेहमयत्वस्वभावेन आक्रान्ता इव । उपलानां सूच्यन्ते तीक्ष्ण-सूक्ष्मान्त भाग एव स्निग्धत्वम्, तीक्ष्णाग्रेणैव इङ्गुदीभेदनसंभवः । स्नानानन्तरं आर्द्रवस्त्रम-निष्पीड्य गृहमागच्छेयुः स्त्रियः । 'वानप्रस्थानां वस्त्रनिष्पीडनं न युक्तं इति स्मृतिः' इति चारु प्रदर्शितं वैखानसव्याख्यायाम् । 'यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः' । स्वात्मनोऽपि प्रियतरा अश्वा राज्ञाम् । अश्वघासार्थमर्थी बभूव रामो गुहाश्रम, स्वस्मा उपनीतमातिथ्यं क्षत्रियस्य अनुचितमिति प्रतिषेधन् स्वयं च पत्न्या सह अश्वक्षो भूत्वा-पवसन् । 'धुर्यान् विश्रामय इत्युक्तं वसिष्ठाश्रमद्वारे सूत प्रति दिलीपेन । 'उदग्रवेगानुदधेः समीपे वीतान् क्षणं विश्रमयाम्बभूव' इति यादवाभ्युदये रुक्मिणीसहितः कृष्णः । 'स्नानार्द्र-पृष्ठतया विगतश्रमेषु वाजिषु' इति कादम्बरी । 'शान्तमिदं' । शुभनिमित्तेन कामविशेषाप्तिः सूच्यते । इत्थमेव, सप्तमाङ्के भरतदर्शनपूर्वक्षणे बाहोः स्पन्दनमभवत् । 'मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा' । तत्र पुत्रदारोभयप्राप्तिः, अत्र दारमात्रप्राप्तिः । तत्र नैराश्येन संशयक्रान्त-मभून्मनः । अत्र अनागरिके तपोवने स्वानुरूपकामफलभावस्यासभावनामात्रम् । अत्र दुष्यन्त-वचनं भगवद्गीतावचनस्य प्रतीपत्वं पुष्फोरयिषितमिव कविना । 'अशान्तस्य कुतः सुखम्' इति भगवान् गायति । शान्ते आश्रमपदे कुतः फलम्? इति पृच्छति दुष्यन्तः । शान्तेः तदध्यक्षणस्य च स्वयं महाफलत्वेऽपि विरक्ताधिकारिणामेव तस्य स्वतः फलत्वं भासेत । नायमद्यापि विरक्तः । अनपत्योऽयं युवा राजा । नेदानीमकामः, मोक्षकामो मुमुक्षुर्वा । वेत्त्ययं शमप्रधानानां तपोधनानां गूढ दाहात्मकं तेजः । तथाऽपि, न विषयवैतृष्ण्यसंपत्तिः, अपुन-र्भवेच्छा वा अद्यापि निष्पन्ना । 'अथवा भवितव्यानाम्' । भवितव्यशब्दो भाव्यशुभयो-रुक्तोऽपि । 'सर्वंकषा भगवती भवितव्यतैव' इति मालतीमाधवे । 'अथवा भवितव्यता बलवती' इत्यत्रैव षष्ठाङ्के विदूषकवचनम् । 'को नाम पाकाभिमुखस्य जन्तोर्द्वाराणि दैवस्य पिधातुमीष्टे' इत्यत्रेवेहापि भाविदीर्घविरहरूपाशुभस्यापि दुष्यन्तस्यावशवाचा सूचनमपि कविनाऽभिसंहित-मिव । अवशादश्लीलवाक् दुष्यन्तः । भवितव्यशब्दस्य भाविशुभाशुभोभयसंग्राहकत्वेऽप्यत्र भाव्युभयमपि कविना सुसूचयिषितं स्यात् । 'दक्षिणेन वृक्षवाटिकाम्' । प्रथममत्र श्रवणम्, अनन्तरं दर्शनम् । 'बालपादपेभ्यः पयो दातुं' । 'संवर्धितानां सुतनिर्विशेषम्' इति रघुवंशे आश्रम-पादपानां सुतवत्संवर्धनमुक्तम् । कुमारसंभवे, 'गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्य-मपाकरिष्यति' इत्युक्तम् । भरतात्पूर्वजाः कुमारा इवेमे बालपादपाः । पयःशब्दस्य क्षीरवाचकत्व-प्रसिद्धिरस्त्येव । बालाः बालपादपेभ्यः पयो ददति । अनुरूपमेव तत् । न केवलं सेचनघटाः एतासां बालकन्यकानां स्वप्रमाणानुरूपाः; पयसा सिच्यमानाः पादपा अपि तद्बाल्यवयःप्रमाणा-नुरूपा इत्यानुरूप्यं सर्वतः ॥



स्थानानां ग्रन्थगौरवभयादेतावदेवोक्तम् । इति श्रीजगद्गुरुश्रीमत्प्रपञ्चः । एतेन मनसि चतुःषष्टिरिति ये मयूखाः इत्येतद्व्याख्यातम् । तेषामुपरि तव पादाम्बुजयुगं सर्वेषां रश्मीनां मूर्धन्यं सर्वप्रकाशकमिति यावत्, सर्वतत्त्वतेजोमयत्वात् । तदुक्तं मानसोल्लासे— 'सर्वतत्त्वमनेजोभिरुद्धं तव पदाम्बुजम् । ध्यायञ्छिववरारोहे साक्षात्तेजोमयो भवेत् ॥' इति । अथवा, शिरसि तव निर्वाणचरणद्वयं पूर्वोक्तमानन्दरूपं सर्वेषां मयूखानामुपरि जागर्ति साक्षाच्छिवपदे; तस्यैव प्रसादेन सर्वतेजोविशेषाः प्रकाशन्त इति भावः ॥ १४ ॥

॥ अरुणामोदिनी ॥

एवं प्रासङ्गिकं देवीसौन्दर्यं कटाक्षकरुणां चोपवर्ण्य तत्पादाम्बुजमहिमानं स्तौति— क्षिताविति । हे भगवति, क्षितौ भूतत्त्वात्मके मूलाधारे षडधिका पञ्चाशत् षड्डुत्तरपञ्चाशद्ये मयूखाः, सन्तीत्यध्याहृतक्रियया यन्मयूखशब्दयोरन्वयः । तथा उदके जलतत्त्वात्मके मणिपूरे द्वाभ्यां समधिका च सा पञ्चाशच्चेति द्विसमधिकपञ्चाशत्; द्व्युत्तरपञ्चाशदित्यर्थः । एते च चक्रद्वये वर्तमानाः अष्टोत्तरशतं किरणा रौद्राः । तथा हुताशे अग्नितत्त्वात्मके (विशुद्धिचक्रात्मके) स्वाधिष्ठाने द्वयधिका षष्टिर्द्वाषष्टिः; 'विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्' इति दीर्घः । तथा अनिले वायुतत्त्वात्मके अनाहते चतुरधिका च सा पञ्चाशच्च चतुरधिकपञ्चाशत्; इत्येवं चक्रद्वयेऽप्युक्ताः षोडशोत्तरशतं किरणाः सौराः । तथा दिव्याकाशतत्त्वात्मके विशुद्धिचक्रे, द्वौ क्रियाभ्यावृत्ती द्वि, क्रियाभ्यावृत्तिगणने 'द्वित्रिचतुर्भ्यः सुच्' इति सुच्प्रत्ययः । षड्डुत्तरा त्रिंशत् षट्त्रिंशत्, द्विश्चासौ षट्त्रिंशच्चेति समासः । द्विगुश्चेता षट्त्रिंशत् द्विःसप्ततिसंख्याका इत्यर्थः । मनसि मनस्तत्त्वात्मके आज्ञाचक्रे चतुरधिका षष्टिः चतुःषष्टिः । एते च चक्रद्वये स्थिताः षट्त्रिंशदुत्तरशतं किरणा ऐन्दवाः । एते च क्षितौ पार्थिवतत्त्वरूपा अष्टाविंशतिः; पञ्चतन्मात्राः, पञ्चभूतानि, ज्ञानेन्द्रियपञ्चकम्, कर्मेन्द्रियपञ्चकम्, अन्तःकरणचतुष्टयम्, कालः, प्रकृतिः, नियतिः, पुरुष इत्यष्टाविंशतिः; शिवशक्तिसंयोगेन षट्पञ्चाशत् । अप्सु पञ्चभूतानि, ज्ञानकर्मेन्द्रियाणि दश, तेषामर्थाः, मन इति पूर्ववद्द्विपञ्चाशत् । तेजोरश्मयः— पञ्चभूतानि, तन्मात्राः, ज्ञानकर्मेन्द्रियतदर्थाः, मन इति पूर्ववद्द्वाषष्टिः । वायव्यरश्मयः— महत्तत्त्वन्यूनपार्थिवतत्त्वानि, पूर्ववच्चतुःपञ्चाशत् । आकाशरश्मयः— शक्तिः शिवेश्वरशुद्धविद्याः, माया, कला, विद्या, रागः, कालो नियतिः पुरुषः प्रकृतिरहंकारो बुद्धिर्मनो ज्ञानकर्मेन्द्रियाणि शब्दस्पर्शरूपरसगन्धाः पञ्चभूतानीति पूर्ववद्द्वासप्ततिः । मानसरश्मयः— शिवशक्तिसदाशिवेश्वरविग्रहिता उक्ता एव पूर्ववच्चतुःषष्टिः । एतेषां नामानि सौभाग्यवर्धन्यां द्रष्टव्यानि । एवंप्रकारेणागमप्रसिद्धाः पिण्डाण्डब्रह्माण्डे समवभासयन्तो ये मयूखाः सन्ति, तेषां संघीभूय षष्ठ्युत्तरत्रिशतसंख्यापन्नानां मयूखानामप्युपरि ऊर्ध्वं स्थिते सहस्रारकमले तव भवत्याः पादाम्बुजयुगं पद्मद्वन्द्वं वर्तत इति शेषः । 'मूलाधारादिषट्चक्राणा त्रिखण्डं मातृकाचक्रम्' इति वचनात् त्रिद्विकत्वापत्तेः, प्राथमिकचक्रद्वयोपर्यग्निस्थानम्, तदेव रुद्रग्रन्थिः; द्वितीयखण्डोपरि सूर्यस्थानम्, तदेव विष्णुग्रन्थिः; उत्तरखण्डोपरि चन्द्रस्थानम्, तदेव ब्रह्मग्रन्थिरित्यागमात्तत्र तत्र स्थितानां सोमसूर्यानलानां किरणानामुक्तसंख्यारूपेणोक्तस्थानेषु प्रकाशः । एते च किरणाः 'लोकस्य द्वारमार्चिमत्पवित्रम्'

मरीचयः स्वायम्भुवाः' इति श्रुतेः, कलातत्त्वातीतसदाशिवकलान्तर्वर्तितेजोमयचन्द्रमण्डलस्थितभगवतीपादाविन्दजन्मानः । तांश्च तत्तदनुग्रहशक्त्या यथायथं समुपादाय सोमसूर्याऽनलाः जगन्ति भासयन्तीति सकलाः सर्वजगत्कारणत्वं शास्त्रसमेव प्रकाशितम् । उक्तं चाम्बास्तवे— 'शमौ निवृत्तिरुदिता पथसि प्रतिष्ठा विद्याऽनले मरुति शान्तिरतीतशान्तिः । व्योम्नीति याः किल कलाः कथयन्ति विश्व तासां हृदूरगमनं पदं त्वदीयम् ॥' इति । माहात्म्यमत्र रुद्रयामलेऽम्बाभिधे । रहस्यसनुपृच्छन्त्यै पार्वत्यै शंभुनोदितम् । 'साधु साधु महाभागे पृष्टं त्रैलोक्यसुन्दरि । गुह्याद्गुह्यतमं ज्ञानं न कुत्रापि प्रकाशितम् ॥ कलाविद्या पराशक्तिः श्रीचक्राकाररूपिणी । तन्मध्ये बैन्दवं स्थानं तत्प्राप्ते परमेश्वरि ॥ सदाशिवेन संयुक्ता सर्वतत्त्वातिगामिनी । चक्रं त्रिपुरसुन्दर्या ब्रह्माण्डाकारमीश्वरि ॥ पञ्चभूतात्मकं चैव तन्मात्रात्मकमेव च । इन्द्रियात्मकमेवं च मनस्तत्त्वात्मकं तथा ॥ महदहंतत्त्वरूपं च तत्त्वातीतं च बैन्दवम् । बैन्दवे जगदुत्पत्तिस्थितिसंहारकारिणी ॥ सदाशिवेन संयुक्ता तत्त्वातीता महेश्वरी । ज्योतीरूपा निराकारा सर्वदा देहोद्भवाः शिवे । किरणाश्च सहस्रं च द्विसहस्रं च लक्षकम् । कोटिकोटिसमेवैषां परा संख्या न विद्यते ॥ तामेवानुप्रविश्यैव भाति विश्वं चराचरम् । तस्या भासा महेशानि सर्वं विश्वं विभासते ॥ तद्भासा रहितं किंचिन्न च यच्च प्रकाशते । स्वाश्च शिवशक्तिश्च चिद्रूपायाश्चितं विना ॥ आन्ध्यमापद्यते नूनं जगदेतच्चराचरम् । तेषामनन्तकोटीनां व्यूहानां महेश्वरि ॥ मध्ये षष्ट्युत्तरं देवि त्रिशतं किरणाः शिवे । ब्रह्माण्डं व्याप्नुवानास्ते सोमसूर्याग्निलाञ्छनाः ॥ अग्नेरष्टोत्तरशतं षोडशोत्तरकं रवेः । षट्त्रिंशदुत्तरशतं चन्द्रस्य किरणाः शिवे ॥ ब्रह्माण्ड भासयन्तस्ते पिण्डाण्डमपि शांकरि । दिवा सूर्यस्तथा रात्रौ सोमो वह्निश्च संध्ययोः ॥ प्रकाशयन्तः कालांस्ते तस्मात्कालात्मकाश्रयाः । षष्ट्युत्तरं च त्रिशतं दिनान्येव तु हायने ॥' इत्यादि ॥ १४ ॥

[1]शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमकुटां
वरत्रासत्राणस्फटिकघटिकापुस्तककराम्[2] ।
सकृन्न त्वा नत्वा कथमिव सतां संनिदधते
मधुक्षीरद्राक्षामधुमधुरिणाः फाणितगुडाः ॥ १५ ॥

॥ लक्ष्मीधरा ॥

सारूप्यप्रयोगमाह— शरदिति । शरज्ज्योत्स्नाशुभ्रां शरदि शरत्काले ज्योत्स्ना चन्द्रिका तद्वच्छुभ्रामतिशुभ्राम् । शशियुतजटाजूटमकुटां शशिना चन्द्रेण युतो युक्तः जटाजूटो मकुटो यस्यास्ताम्, चन्द्रकलावतंसामित्यर्थः । वरत्रासत्राणस्फटिकघटिकापुस्तककरां वरः इष्टदानमुद्रा,

---

1. शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां 2. °घुटिकापुस्तककराम ।

त्रासत्राणं अभयदानमुद्रा, स्फटिकघटिका स्फटिकपानपात्रम् ; स्फटिकाक्षमालेति केचित् ; तस्मै स्फटिकघुटिकेति पाठः । पुस्तकं विद्यामुद्रा, पुस्तक वा; एतैर्युक्तकराम् । शाकपार्थिवादित्वात् मध्यमपदलोपः, न तु स्फटिकघटिकापुस्तकानि करेषु यस्याः इति सप्तमीबहुव्रीहिः, 'प्रहरणादिभ्य उपसंख्यानम्' इति तस्य प्रहरणादिभ्य एवेति ज्ञापनत्वात् । सकृत् एकवारम् । नकारो निषेधार्थः । त्वा त्वामित्यर्थः । नत्वा नमस्कारं कृत्वा । कथं कथंचित् । इवेति वाक्यालंकारे । सतां कवीश्वराणाम् । संनिदधते संविधानं प्राप्नुवन्ति । मधु-क्षीरद्राक्षामधुरिमधुरीणाः फणितयः मधु क्षौद्रं क्षीरं पयः द्राक्षा वृद्धिका एतेषां मधुरिमा माधुर्यं तत्र धुरीणाः धुरं वहन्तीति धुरीणाः अग्रेसराः तद्वन्मधुरा इत्यर्थः फणितयः वाग्वैदग्ध्यः ।

अत्रेत्थं पदयोजना— हे भगवति, शरज्ज्योत्स्नाशुद्धां शशियुतजटाजूटमकुटां वराभयत्राणस्फटिकघटिकापुस्तककरां त्वां सकृन्नत्वा सतां मधुक्षीरद्राक्षामधुरिमधुरीणाः फणितयः कथमिव न संनिदधते ॥

अयमर्थः— अत्र व्यतिरेकमुखेन सकृन्नमस्कारोऽपि कवित्वबीजभूतसंस्कारोत्पादकः । तदभावे प्रकारान्तरेण येन केनापि तद्बीजोत्पत्तिर्नास्तीति सूचितम् ॥ १५ ॥

॥ सौभाग्यवर्धनी ॥

एवं चरणमहिमानमभिधाय वक्ष्यमाणाया आगमबीजकाम्यराजशक्तिसंज्ञककूटत्रयात्मिकायाः प्रथमकूटस्य सात्त्विकध्यानमहिमानमाह— शरज्ज्योत्स्नेति । शरच्चन्द्रिकारुचिं चन्द्रकलाशोभिजटाजूटघटितमकुटाम्, वराभयस्फटिकाक्षमालाकरामेतादृशीं त्वां (अ)नत्वा मधुक्षीरद्राक्षामाधुर्यधुरंधराः सूक्तयः सतां त्वदेकभक्तिरसानामिव कथं संनिदधते संनिहिता भवन्ति ; जिह्वाग्र इति शेषः । इवशब्दोऽत्र हेतुविक्षेपे । त्वद्भजनमन्तरेण कारणान्तरं नास्तीत्यर्थः ॥ १५ ॥

॥ अरुणामोदिनी ॥

अथ 'नरं वर्षीयांसम्' इत्यादिना प्रक्रान्तं देव्याः सर्वाभीष्टप्रदातृत्वं प्रकटयितुं कांश्चिदुत्थानभेदान्निरूपयति सप्तश्लोक्या । तत्रादौ सारस्वतध्यानमाह—शरदिति । हे देवि, शरज्ज्योत्स्ना शारदचन्द्रिका सेव शुभ्रां धवलवर्णां, शशिना चन्द्रेण युतः जटाजूटः जटासंघात एव मुकुट किरीटं यस्यास्ताम्; चन्द्रकलायुतसामित्यर्थः । वराऽभीष्टमुद्रा, त्राणाद्भयत्राणमभयमुद्रा, स्फटिकघुटिका स्फटिकाक्षमालिका, घटिकेति पाठे पानपात्रमिति लक्ष्मीधरः । पुस्तकं पुस्त मुद्रा वा, कृतद्वन्द्वैरेतैर्युक्ताः कराः पाणयो यस्यास्ताम्; धृतवरादिमुद्राबाहुचतुष्टयामित्यर्थः । त्वा त्वाम्, वाग्वादिनीरूपिणीं भवतीम्; 'त्वामौ द्वितीयायाः' इति युष्मदो द्वितीयैकवचनस्य त्वादेशः । सकृदेकवारमपि नत्वा प्रणम्य सतां वर्ष्मानानाम्; जनानामिति शेषः । मधुक्षीरद्राक्षाणां क्षौद्रदुग्धगोस्तनीनां मधुरिमा माधुर्यं तेन धुरीणा धुरंधराः ; तद्वन्नानाविधास्वादा इत्यर्थः । फणितयो वर्णसंततयो वाक्यविशेषाः कथमिव कथंचिन्न संनिदधते न सानिध्यं कुर्वन्ति । सकृदभि-

वादनेनैव नानाविधस्वादा वाग्वैखर्यः प्रसरन्तीत्यर्थः । अथ वा, सकृदप्यनत्वा सतां नमस्कारमकुर्वतां फणितयः कथमिव संविदधते; कथं प्रादुर्भवन्ति; नमस्कारेणैव नान्येनेति वा योजना । एतेन वाग्वादिनीरूपायाः भवत्याः सकृन्नमस्कारोऽपि कविताकारणभूत इति तात्पर्यम् । उक्तं चाम्बास्तवे— 'यः स्फाटिकाक्षगुणपुस्तकचारुकुण्डकाढ्यां व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् । पद्मासनां च हृदये भवतीमुपास्ते मातः स विश्वकविनार्किचक्रवर्ती ॥' इति । लघुस्तवे चोक्तम्— 'वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे भक्तेभ्यः परमामृतैकभरितं पूर्णं च कुम्भं करे । मन्दारोत्पलकैरवं कर्पूरकुन्दोज्ज्वलाम्; उज्जृम्भाम्बुजपत्रकान्तिनयनां मन्दस्मितप्रभालोकेनीं ये स्मरन्ति मनसा तेषां कवित्वं कृतः ॥' इति ॥ १५ ॥

कवीन्द्राणां चेतःकमलवनबालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम् ।
[1]विरिञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरी-
गभीराभिर्वाग्भिर्विदधति सतां रञ्जनममी ॥ १६ ॥

॥ लक्ष्मीधरा ॥

कवीन्द्राणां कविश्वराणाम् । चेतःकमलवनबालातपरुचिं चेतांस्येव कमलानि पद्मानि तेषां वनं षण्डं, तस्य बालातपरुचिः प्रभातिकारुणकान्तिः तां भजन्ते सेवन्ते ये सन्तः सत्पुरुषाः कतिचित् विरलाः अरुणामेव अरुणवर्णां त्वां विरिञ्चिप्रेयस्याः विरिञ्चिः ब्रह्मा तस्य प्रेयस्याः प्रियायाः सरस्वत्याः तरुणतरशृङ्गारलहरीगभीराभिः तरुणतरे अतियौवने । यद्वा, तरुणतरश्चासौ शृङ्गारश्च तस्य लहरी उद्रेकप्रवाहः । यद्वा, लहरीशब्देन समुद्रस्य चन्द्रोदये वाहश उत्सेकः स उच्यते । लहरीयुक्तगभीराभिः अतिगम्भीराभिरित्यर्थः । वाग्भिः वाग्विलासैः विदधति कुर्वन्ति सतां सभाजनं रञ्जनं हृदयानुरञ्जनम् । अमी सन्तः परामृश्यन्ते ॥

अत्रेत्थं पदयोजना— हे भगवति, कवीन्द्राणां चेतःकमलवनबालातपरुचिं अरुणामेव भवतीं कतिचित् ये सन्तः भजन्ते, अमी सन्तः विरिञ्चिप्रेयस्याः तरुणतरशृङ्गारलहरीगभीराभिः वाग्भिः सतां रञ्जनं विदधति ॥

अयमर्थः— हृदयकमले भगवतीमरुणां ध्यायन्तः पुंभावमापन्ना सरस्वतीव शृङ्गाररसप्रधानैः वाग्विलासैः सभारञ्जनं कुर्वन्ति । भगवत्याः मातृकात्मकत्वात् सरस्वतीरूपत्वेनैव सारस्वतप्रदत्वम् । अरुणवर्णध्यानमहिम्ना शृङ्गाररसप्राधान्येन वाग्विलासप्रवृत्तिरिति । यथोक्तं

---

1. विरिञ्चिप्रेयस्यास्तरलतर०

वामकेश्वरतन्त्रे— 'अरुणाख्यां भगवतीमरुणाभां विचिन्तयेत् । पाशाङ्कुशधरां देवीं धनुर्बाणधरां शिवाम् ॥ वरदाभयहस्तां च पुस्तकाक्षस्रगन्विताम् । अष्टबाहुं त्रिनयनां खेलन्तीममृताम्बुधौ ॥ स करोत्येव शृङ्गाररसास्वादनलम्पटान् । सभासदस्तथा सर्वान्साधकेन्द्रः सभास्थले ॥' इति ॥ अत्र परम्परितरूपकमलंकारः, बाला[illegible] ज्ञेयम् । [illegible] इति लक्षणात् ॥ १६

॥ सौभाग्यवर्धनी ॥

तस्यैव राजसध्यानमाह—कर्णेन्द्राणामिति । कवीन्द्राणां चेतःकमलानां कलानपरुचिं; हेत्वलंकारः । कतिचित् ये सन्तः अरुणामेव; अन्ययोऽन्वयलक्षणेऽपि वयम् । भजन्ते [illegible] स्तरलतरा उत्तरोत्तरमहस्त्रिकया विजृम्भमाणा शृङ्गारस्य प्रधाना लहर्य इव परा; तद्वद्वाग्भिर्विविध-शृङ्गाररससमवेतावेशानुभावसात्त्विकव्यभिचारिभावसुष्ठु वाग्भिः सतां सहृदयतया श्लाघनीयगुणानां रञ्जन विदधति । एतादृश्यन्तर्योपासनेन साक्षात् रसानुवादविभूतगद्यपद्याद्याः शृङ्गारप्रधानाः प्रस्फुरन्तीति भावः ॥ १६

॥ अरुणामोदिनी ॥

देव्याः प्रधानरूपमारुण्यमपहाय रूपान्तरध्यानमेषामत्रैवाभिनिविष्टचित्तानामपि कविताप्राप्तिमेव फल सविशेषमाह— कवीन्द्राणामिति । हे देवि, ये केचित् सन्तः सत्पुरुषाः कवीन्द्राणां कवयितृश्रेष्ठाना ब्रह्मादीनां चतान्येव फलदान तेषा बालारुणरुचि तरुणारुणच्छविरूपाम्, तद्विकासहेतुमिति हेतुगर्भविशेषणम्। ध्यातृणां शब्दार्थपूर्णं नाद्भुतमित्यभिप्रायः। भवतीं त्वाम्, अरुणामरुणवर्णामेव; न तु शुभ्रादिवर्णान्तरयुक्तामित्येवकारार्थः। भजन्ते ध्यायन्ति। अमी ते ध्यातारः सन्तः। अद इस्तदर्थकत्व यद्योगे प्रसिद्धम्। विरिञ्चिप्रेयस्याः सरस्वत्याः तरुणतरोऽतिमधुरो यः शृङ्गारः, 'शृङ्गार एव मधुरः परब्रह्मात्को रसः' इति वचनादतिमधुरो रसविशेषः; तस्य लहर्यः तद्विक्तप्रवाहा इव गभीराभिः शृङ्गाररसभरभरिताभिरित्यर्थः। वाग्भिः वागुपन्यासैः सता सहृदयानाम्; रसतत्त्ववेदिनामित्यर्थः। रञ्जनमाह्लादन विदधति कुर्वते। ये केचिद्भक्ता मातृकारूपिणीं भवतीमरुणरूपामेव ध्यायन्ति तषां शृङ्गाररसप्रधानवाग्विलासैः सभारञ्जनरूप फलं भवतीति भावः। अत्रोक्तं वामकेश्वरतन्त्रे— 'अरुणाख्यां भगवतीमरुणाभां विचिन्तयेत्। पाशाङ्कुशधरां देवीं धनुर्बाणधरां शिवाम्॥ वरदाभयहस्तां च पुस्तकाक्षस्रगन्विताम्। अष्टबाहुं त्रिनयनां खेलन्तीममृताम्बुधौ ॥ स करोत्याशु शृङ्गाररसास्वादनलम्पटान्। सभासदस्तथा सर्वान्साधकेन्द्रः सभास्थले ॥' इति ॥ १६ ॥

सवित्रीभिर्वाचां शशिमणिशिलाभङ्गरुचिभि-
र्वशिन्याद्याभिस्त्वां सह जननि संचिन्तयति यः ।

स कर्ता काव्यानां भवति महतां [1]भङ्गिरुचिभि-
र्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥ १७ ॥

॥ लक्ष्मीधरा ॥

सवित्रीभिः जननित्रीभिः वाचां निगां शशिमणिशिलाभङ्गरुचिभिः चन्द्रकान्तमणिशकलतुल्यकान्तिभिः ललितचन्द्रशेखरेण. अतिशयस्य लोकसिद्धम् । वशिन्याद्याभिः वशिनीप्रमुखाभिः । तदुक्तसंविज्ञानो बहुव्रीहिः— वशिनी आद्या यासां ताः शक्तयोऽष्टौ वशिन्याद्याः, योगिन्यो द्वादश, गन्धाकर्षिण्यादयश्चतस्रः, इति वशिन्याद्याः । अत्र एकस्य आद्यशब्दस्य लोपः, वशिन्याद्याद्या इत्यर्थः । वशिन्यष्टकं— वशिनी, कामेश्वरी, मोदिनी, विमला, अरुणा, जयिनी, सर्वेश्वरी, कौलिनी । एताभिः त्वां भगवतीं सह यः जनने हे मातः, संचिन्तयति यः, सः साधकः कर्ता रचयिता काव्यानां प्रबन्धानां भवति समर्थः प्रभवति महतां महात्मनां कालिदासप्रभृतीनां भङ्गिरुचिभिः भङ्गीनां रचनाणां रुचिभिः स्वादुभिः वचोभिः वाग्विलासैः वाग्देवीवदनकमलामोदमधुरैः वाग्देव्याः भारत्या वदनकमले यः आमोदः परिमलः तेन मधुरैः अव्यक्तैः, पुंभावमापन्नायाः भारत्याः वाग्विलासा इमे इत्येवं भ्रमजनकैरित्यर्थः ॥

अन्वयार्थं पदयोजना— हे जननि, वाचां सवित्रीभिः शशिमणिशिलाभङ्गरुचिभिः वशिन्याद्याभिः सह त्वां यः संचिन्तयति स महतां भङ्गिरुचिभिः वाग्देवीवदनकमलामोदमधुरैः वचोभिः काव्यानां कर्ता भवति ॥

अत्रेदमनुसंधेयम् — 'वशिन्याद्याभिस्त्वाम्' इत्यत्र त्वामित्यनेन भगवत्याः स्वरूपमुक्तम् । भगवत्याः स्वरूपं तु पञ्चाशद्वर्णात्मिका मातृकैव । एतत्तु 'शिवः शक्तिः कामः' इत्यादिश्लोकव्याख्यानावसरे उपपादयिष्यते । सेयं पञ्चाशद्वर्णात्मिका मातृका अष्टवर्गात्मिका भवति । ते चाष्टवर्गाः अकचटतपयशादयः । अ आदयः षोडश स्वराः प्रथमवर्गः । कादयः पञ्च द्वितीयः । चादयः पञ्च तृतीयः । टादयः पञ्च चतुर्थः । तादयः पञ्च पञ्चमः । पादयः पञ्च षष्ठः । यादयश्चत्वारः सप्तमः । शादयः पञ्च अष्टमः । एवं अष्टवर्गात्मिका भगवती मातृका त्रिपुरसुन्दरी अकचटतपयशवर्गेषु यथाक्रमं वशिन्यादिशक्तिभिर्योजिता बिन्दुत्रिकोणात्मकशिवचक्रचतुष्टयवसुकोणदशारद्वितयचतुर्दशकोणात्मकेषु अष्टसु चक्रेषु योजिता ध्याता सती काव्यकर्तृत्वसंपादिका । वशिन्याद्याभिरिति आदिशब्देन कामेश्वरीप्रभृतीनां अष्टानां संग्रहणं विद्यादिद्वादशयोगिनीसंग्रहणं गन्धाकर्षिण्यादिचतुष्टयसंग्रहणं कृतमित्युक्तं भवति । वशिन्यष्टकमुक्तम् । योगिनीद्वादशकं तु— विद्यायोगिनी, रोचिकायोगिनी, मोचिकायोगिनी, अमृतायोगिनी, दीपिकायोगिनी,

---

1, भङ्गिसुभगैः

ज्ञानयोगिनी, आप्यायनीयोगिनी, व्यापिनीयोगिनी, मेधायोगिनी, व्योमरूपा योगिनी, सिद्धिरूपा योगिनी, लक्ष्मीयोगिनी। एवं द्वादशयोगिनीभिः सार्धं वशिन्याद्यष्टकं मिलित्वा विंशतिकलाः भवन्ति। ताः विंशतिकलाः शुद्धस्फटिकसंकाशाः शशाङ्कशकलेषु संचेन्द्रियाः उक्तफलदाः। अयं च भूप्रस्तारभेदः भूप्रस्तार, 'चतुःषष्ट्या तन्त्रे' इत्यादिश्लोकव्याख्यानावसरे निपुणतरं निरूप्यते। गन्धाकर्षिणी, रसाकर्षिणी, रूपाकर्षिणी, स्पर्शाकर्षिणी च चतुर्दलेषु योजिताः उक्तफलदाः। तथा च श्रुतिः —गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ अस्या अर्थः— गन्धद्वारां गन्धरसरूपस्पर्शाः गन्धशब्देन संगृहीताः, तेन गन्धाकर्षिण्यादयः अधिदेवताः संगृहीता भवन्ति— गन्धाकर्षिणी, रसाकर्षिणी, रूपाकर्षिणी, स्पर्शाकर्षिणी चेति। तामिति चत्वारि चत्वाराणि यस्यां सा गन्धद्वारा, तां गन्धद्वाराम्। दुराधर्षां दुष्प्रधर्षां, मन्दभाग्यैर्नाभिभवनीयाम्। नित्यपुष्टां नित्यानन्दस्वरूपिणीम्। करीषिणीं गन्धाद्याकर्षिणीमित्यर्थः। अथवा, करीषैः शुष्कगोमयैः ईषिणीं परिवृताम्। ईश्वरीं अधिदेवतां सर्वभूतानाम्। तां इह चक्रे उपह्वये श्रियं श्रीविद्याम्। गन्धद्वारामिति गन्धाकर्षिणीचतुष्कं वशिन्याद्यष्टकं योगिनीद्वादशकं संगृहीतम्। तथा च श्रुतिवचनम्— 'मातृकां वशिनीयुक्तां योगिनीभिः समन्विताम्। गन्धाद्याकर्षिणीयुक्तां स्मरेत्त्रिपुराम्बिकाम्॥' इति।

अत्रेदमनुसंधेयम्—वशिन्यादयः शक्तयः पञ्चाशद्वर्णात्मिका इत्युक्तम्। तत्र वशिनी शक्तिः स्वरात्मिका। स्वराः षोडश अकारादयः। तेषां स्वरूपं सनत्कुमारसंहितायां पञ्चशत्यामुक्तं संक्षेपेण कथ्यते - अकारात्मिका शक्तिः अष्टभुजा पाशाङ्कुशवराभयपुस्तकश्रीलाकलण्डलुव्याख्यामुद्राकरा। एवं आकाराद्यात्मिकाः शक्तयः शुभ्रवर्णाः। ध्यानं तु विशेषः— अकारात्मिकायाः शक्तेः मण्डलं अशीतिलक्षयोजनायतम्। आकारस्य तद्द्विगुणम्। इकारस्य नवतिलक्षयोजनायतम्। ईकारस्य तद्द्विगुणम्। उकारस्य कोटियोजनपरिमितपरिणाहं मण्डलम्। ऊकारस्य तद्द्विगुणम्। ऌकारस्य पञ्चाशल्लक्षयोजनपरिमितं मण्डलम्। तद्द्विगुणं ॠकारस्य। तद्द्विगुणं ऌकारॡकारयोरपि। एवं एकारस्य सार्धकोटिपरिणाहं मण्डलम्। ऐकार ओकार औकाराणां सप्तभेव एकारेण। बिन्दुविसर्गयोस्तु अकारद्विगुणं मण्डलम्। व्यञ्जनशक्तीनां अकारमण्डलादर्धं मण्डलम्। ताः शक्तयः पाशाङ्कुशाक्षमालाकमण्डलुधराः। अन्तस्थास्तु पाशाङ्कुशाभयवरकराः। ऊष्माणस्तु पाशाङ्कुशाक्षमालावरकराः। ळकारक्षकारौ पाशाङ्कुशेक्षुचापशराल पुष्पबाणयुक्तकरौ। एताः शक्तयः पञ्चाशद्वर्णात्मिकाः॥

केचित्तु— स्वरात्मिकाः शक्तयः स्फटिकाभाः, कादयो मावसानाः विद्रुमाभाः, बादयो नव पीतवर्णाः भकारः अरुणवर्ण इति। अपरे तु - अकाराद्यो धूम्रवर्णाः, ककारादयः ठान्ताः सिन्दूरवर्णाः डादिफान्ताः गौरवर्णाः बादिलान्तः अरुणवर्णाः, वादिसान्ताः कनकवर्णाः,

हन्नौ [illegible] [illegible] [illegible] चन्द्रकलायां [illegible] चन्द्रकलाप्रस्थं भगवत्पादाचार्याणामपि [illegible] भगवद्भक्त्याख्यानाय [illegible] चन्द्रकलायां सम्यङ्निर्मापितमस्माभिः ॥

॥ भाग्यवर्धनी ॥

[illegible] सात्त्विकव्याख्यान्तरमाह—मानसमिति । चन्द्रशिलाखण्डरुचिभिः; वाणनी, कामेश्वरी, मोदनी, विमला, अरुणा, जयिनी, सर्वेश्वरी, कौलिनीत्यष्टवाग्देवताभिः सह हृदये यश्चिन्तयति, [illegible] कृता काव्यालीः [illegible] । वाग्देवीवदनकमलामोदमधुरैर्वचोभिः सरस्वतीमुखाम्भोजसौरभ्यमनोहरैः वचनैः चातुरीभिः सुभगः शोभमानः भगः ऐश्वर्यं; विशेषालंकारादिनिरूपणलक्षद्वारेति भावः ॥

॥ अरुणाभाष्यम् ॥

[illegible] मालवव्यञ्जनेन मधुरवचनाभिः अरुणः अनलसुतः [illegible] व्यालविशेषण महाकाव्यकर्तृत्व फलमाह— वाग्विशेषैरिति । हे जनानि मानवसमूहाः, वाग्देव्याश्चित्रमैशक्तीनां कारणभूते इति वा । य उपासकः महाकाव्यकर्तृत्व [illegible] कामयमान इत्यर्थः । वाग्देवीं गिरां सवित्रीभिः; जनयित्रीभिः मातृकाभिरवलम्बनादिति भावः, शीतांशुमालालङ्कृतशिरसि चन्द्रकान्तरत्नशकलशुभ्रगोभाभिः; वशिन्यादीनां स्फटिकसङ्घावलम्बागमेषु प्रसिद्धम् । [illegible] यासां ताभिरिति तद्गुणसंविज्ञानो बहुव्रीहिः । वशिनी कामेश्वरी मोदिनी विमला अरुणा जयिनी सर्वेश्वरी कौलिनीसमाख्याभिः अकचटतप शसर्यङ्क्षु स्थितिभिः [illegible] । [illegible] सह; इदं वाग्देवतारूपं योगिन्यादीनाम्; तथा च विद्या, रोचिका, मोचिका, अमृता, ह्रीं का, ज्ञाना, व्याप्यायिनी, व्यापिनी, मेधा, व्योमरूपा, सिद्धेश्वरी, लक्ष्मीप्रिया [illegible] [illegible] योगिन्यः; तन्मन्त्ररूपस्तन्मातृकार्षिणीनां चतुष्टयम्, एताभिश्च सहेत्यर्थः; [illegible] [illegible] [illegible]

परब्रह्मप्रकृतिकत्वेनोंकारस्य परब्रह्मभूतत्वं परब्रह्मप्रतीकत्वं च, 'ओंकारमभिध्यायन्ते' इति श्रुतावोंकारमिति शब्दःप्राधान्यलिङ्गात्। अथवा, परब्रह्मभूतः स्ववाचकत्वेन परब्रह्म प्राप्तः। ओंकारस्य परब्रह्मवाचकत्वम्, 'अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः। प्रणवो वाचकस्तस्य तेनाहूतः प्रमीदति॥ सोऽयं महेश्वरः साक्षान्नित्यमस्यास्य गोचरः। तदेव च परं ब्रह्म सर्ववेदान्तगोचरम्॥ सर्वेषामादिभूतस्य शिवस्य परमात्मनः। स्वप्रकाशस्वरूपस्य वाचको यः परो मनुः॥ अकारश्चाप्युकारश्च मकारश्चेति संवृताः। तिस्रोमात्राः समभरदज ओमित्यति प्रभुः॥ तस्मिन्देवः शिवः साम्बः सर्वज्ञस्त्ववभासकः। प्रतिबिम्बितवांस्तेन प्रणवस्तस्य वाचकः॥' इति स्मृते, 'क्लृशक्लिविप काशयरपरायृष्टः पुरुषविशेष ईश्वरः' 'तस्य वाचकः प्रणवः' इति योगपातञ्जल्याच्चावधन्तव्यम्। गभीरो गम्भीरः सुव्यक्तः प्रकटितानि करणानि ओष्ठादीनि स्थानानि येन स तथोक्तः; अलघूच्चार्यमाण इत्यर्थः। जन्मनाधः जन्म देहपरिग्रहं बाधते उपतापयति पीडयति बाधत इति यावत्; जन्मबाधः स्वोपासकानां पुनर्जन्मनिवारक इति फलितोऽर्थः। 'नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु' इत्यस्मात्कर्मणीत्यण्प्रत्ययः। व्यक्तमूर्तेः लीलापरिगृहीता शुद्धसत्त्वात्मिका तनुर्यस्य तस्य, सत्याः दाक्षायण्याः प्राणनाथस्य शिवस्य संबन्धी यः प्रमिद्धो नादः ओंकाररूपः शब्दः वो युष्मभ्यम्, अलं संपूर्णममलं निर्दोषं फलं मोक्षरूपं फलं संविदध्यात्कुर्यात्॥ ११॥

भासा यस्य त्रिलोकी लसति परिलसत्फेनपुञ्जार्णवान्त-[1]
र्व्यामग्नेवातिगौरस्तुलितसुरसरिद्वारिपूरप्रसारः।
पीनात्मा दन्तभाभिर्भृशमभिसविकासातिभीमः [3]सदेष्टां
पुष्टां तुष्टिं कृपीष्ट स्फुटमिह [4]भवतां हर्षहासोऽष्टमूर्तेः॥

स्वर्णदीवारिपूराभः सर्वलोकावभासकः।
हर्षहास उमाभर्तुर्वर्ण्यते भक्ततुष्टिकृत्॥

भासेति। यस्य हर्षहासस्य भासा शुभ्रकान्त्या त्रिलोकी परिलसन्तः फेनपुञ्जाः यस्मिन् तस्यार्णवस्यान्तर्मध्ये व्यामग्नेव लसति राजति। अतिगौरोऽतिमात्रशुभ्रः, तुलित-

---

1. विन्दूर्णवान्त० 2. महहहका० 3. सदेष्टां 4. भवतामष्टहासो

सुरसरिद्वारिपूरप्रसारः उपमितदेवनदीजलप्रवाहप्रसारः ; प्रपूर्वात्सरतेः स्वार्थण्यन्तादेरचू । गङ्गाप्रवाहतुल्य इत्यर्थः । तन्तानां धामिः कान्तिभिः पीनात्मा पीनो वृद्धिभागात्मा स्वरूपं यस्य सः, ताभिर्द्विगुणितबृहत्कान्तिरित्यर्थः । भृशमत्यर्थमभिश्रवस्तिरस्कारः स एषामस्तीत्यभिभविकाः, 'अत इनिठनौ' इति ठन्प्रत्ययः । लोकोपद्रवकारित्वेन पुण्यात्माभिरनादृता इत्यर्थः । तादृशानामरातीनां शत्रूणां भीमो भयंकरः, अष्टमूर्तेः शिवस्य स हर्षहासः, इह पूर्ववदुपलक्षणम्, अत्र च भवतां मदा स्फुटं पुष्टां समृद्धामिमामस्मासु प्रत्यक्षां तुष्टिमस्मासु यादृशी परमा तुष्टिस्तादृशीं तुष्टिं कृषीष्ट, करोतेराशीर्लिङि तङ् । उपमालंकारः । इमां तुष्टिमित्यत्राचार्याभिष्टुतुष्टेरन्यत्रासंभवेन तत्सदृशतुष्ट्याक्षेपात्पदार्थवृत्तिनिदर्शनालंकारश्च ॥ १२ ॥

सद्योजातास्यमास्यं [1]वियदमलमुदग्वर्त्ति यद्वामदेवं
धाम्ना हेम्ना सदृक्षं जलदनिभमघोराह्वयं दक्षिणं यत् ।
यद्बालार्कप्रभं तत्पुरुषनिगदितं पूर्वमीशानसंज्ञं
यद्दिव्यं तानि शंभोर्भवदभिलषितं पञ्च वक्त्राणि दद्युः ॥ १३ ॥

ईशानाद्यभिधानानि दिव्यानि परमेष्ठिनः ।
स्तूयन्ते पञ्च वक्त्राणि सर्वाभीष्टाप्तये मम ॥

सद्योजातास्यं । वियदमलं वियदिवामलं वियत्याकाशे वाऽमलम्, सद्योजातमुखस्योर्ध्वदिगवस्थितत्वादिति भावः । सद्योजाताख्यं तन्नाम यदास्यम्, तथा उदग्वर्त्युत्तरदिगवस्थितं धाम्ना कान्त्या हेम्ना सदृक्षं कनकेन सदृशं वामदेवनदाख्यं यदास्यम्, तथा जलदनिभं मेघसदृशं तद्वन्नीलमित्यर्थः । दक्षिणं दक्षिणादिगवस्थितमघोराख्यं यदास्यम्, तथा बालार्कस्य प्रभेव प्रभा यस्य तत्, तत्पुरुषनिगदितं तत्पुरुषमिति निगदितं कीर्तितं षष्ठिमिति शेषः, यदास्यम्, तथा पूर्वं पूर्वादिगवस्थितं दिव्यं द्योतनात्मकमीशाननामकं यदास्यं तानि शंभोः पञ्च मुखानि भवतामभिलषितमिष्टार्थं दद्युः । १३ ॥

आत्मक्षमणा भवान्या स्वयमिव रचिताः सादरं [2]मंथवन्या
मध्या निस्तः सुनीलाञ्जननिभरुचिरेखाः क्षमाभानि यस्याम् ।

---

1. यद्विमलमुदग्वर्ति 2. सांवनन्या

आकल्पानल्पभासा [1]भृशतररुचिराः कम्बुकल्पाऽम्बिकायाः
पत्युः साऽत्यन्तमन्तर्विलसतु सततं [2]बन्धुरा कंधरा वः ॥

यस्यां गौरीविराचलगोलरसा इव स्फुटम् ।
गरलरेखा विराजन्ते सा श्रावा वर्ण्यते शिवोः ॥

आल्पेति । पार्वत्या आत्मप्रेम्णा संगवत्या सामिश्रितया. योनेः कर्मणि ह्युटि, 'टिड्ढाणञ्' इत्यादिना ङीप् । मध्या मादृशं स्वयं लिखिता इव स्थिताः, आकल्पस्यालंकारस्यानल्पभासा बहुलकान्त्या भृशतररुचिरा अत्यन्तमनोहराः नीलवर्णकण्ठाभरणबद्धिकान्त्या अतिमात्रं राजमाना इत्यर्थः । तिस्रः सुनीलं यदञ्जनं कज्जलम् ; 'अञ्जना वायुपत्न्यां ना दिग्गजे कज्जलेऽञ्जनम्' इति भास्करः । तन्निर्मास्तत्सदृशाः शरस्य विषस्य रेखा यस्यां ग्रीवायां समाभान्ति सम्यक्स्फुरन्ति । कम्बुकल्पः शङ्खसदृशी 'ईषदसमाप्तौ' इत्यादिना कल्पप्प्रत्ययः बन्धुरा मञ्जुला अम्बिकायाः पार्वत्याः पत्युः सा कंधरा ग्रीवा वो युष्माकमन्तरन्तःकरणे सततमत्यन्तं विलसतु । उपमालंकारः ॥ १४ ॥

वक्त्रेन्दोर्दन्तलक्ष्म्याश्चिरमधरमहाकौस्तुभस्याप्युपान्ते
सोत्थानां [3]प्रार्थयन्स्वस्थितिमचलभुवे वारयन्त्यै निवेशम् ।
प्रायुङ्क्षेवाशिषो यः [4]प्रति पतिममृतत्वे स्थिनः कालशत्रोः
कालं कुर्वन्गलं वो हृदयमलमलं श्यामयत्कालकूटः ॥ १५ ॥

वक्त्रेन्द्वादिमहोत्थेषु यत्प्रीत्यैव तदन्तिके ।
आस्त यः कालकूटोऽसौ वर्ण्यते शंभुकण्ठगः ॥

वक्त्रेति । यः कालकूटः वक्त्रेन्दोर्मुखचन्द्रस्य. दन्तानां लक्ष्म्याः. अधर एव महान्कौस्तुभः तस्यापि, एषां सोत्थानां स्वेन सह श्रीराब्धावुत्पन्नत्वेन महोदराणामुपान्ते समीपे चिरं स्वस्थितिं स्वस्यावस्थानं प्रार्थयन्नाकाङ्क्षमाणः मम निवेशं स्वनिवासं वारयन्त्यै निवारयन्त्यै, कालकूटस्य मारकत्वादिति भावः । अचलभुवे अचलाद्भिमवतो भवतीत्यचलभूः पार्वती तस्यै पतिं प्रति अमृतत्वे मृतिरहितत्वे आशिषः तद्विषया आशिष इत्यर्थः । प्रायुङ्क्षेव

1. भृशरुचिरतराः 2. मन्थरा 3. प्रार्थयन्स्थि० 4. प्रतिपद०

ग्रयुक्तवानिव स्थितः कालकृत्वोः कालस्य शत्रोः शिवस्य गलं कण्ठं कालं नीलं कुर्वन् स कालकूटः वो युष्माकं हृदयमलं मनःकलमषमलमन्यन्त क्षालयेत् । अत्र मालिन्यसंपादकत्वेन मलक्षालनविरुद्धात्कालकूटान्मलक्षालनकार्योत्पत्तिवर्णनाद्विभावनाविशेषोऽलंकारः ॥ १५ ॥

प्रौढप्रेमाकुलाया दृढतरपरिरम्भेषु पूर्णेन्दुमुख्याः
पार्वत्याश्चारुचामीकरवलयपदैरङ्कितं कान्तिशालि ।
[1]तुङ्गं भोगाङ्गदाढ्यं सपदि सकलमावाहितं कर्म निर्मूलयेत्तद्-
दोर्मूलं निर्मलं वश्चिरमपहृदि दुरितमपास्यार्जितं धूर्जटेर्वः ॥ १६ ॥

पार्वतीम्वर्णवलयैरङ्कितमुज्ज्वलम् ।
नागाङ्गदाढ्यं दोर्मूलं महादेवस्य वर्ण्यते ॥

प्रौढेति । दृढतरेषु गाढतरेषु परिरम्भेष्वालिङ्गनेषु प्रौढेन समृद्धेन प्रेम्णाऽऽकुलाया युक्तायाः पूर्णेन्दुः पूर्णमासीचन्द्रः पूर्णचन्द्र इति यावत् । स इव मुखं यस्यास्तस्याः पार्वत्याश्चारूणां मनोहराणां चामीकरवलयानां सुवर्णकटकानां पदानि स्थानविशेषा अवयवविशेषा इति यावत् । तैरङ्कितं चिह्नितं कान्तिशालि तुङ्गप्रभं भोगाङ्गदाढ्यं सर्परूपकेयूरसंपन्नं ; 'केयूरमङ्गदं तुल्ये' इत्यमरः । धूर्जटेर्दोर्मूलं निर्मलं बाहोर्मूलं वो हृदि मनसि चिरं संचितं दुरितमपास्य निरस्य सकलमविलम्बं निपिद्य निर्मूलयेन्निःशेषं नाशयेत् ॥ १६ ॥

कण्ठाश्लेषार्थमासा दिव इव कमितुः स्वर्गसिन्धोः प्रवाहाः
क्रान्त्यै संसारसिन्धोः स्फटिकमणिमहासंक्रमाकारदीर्घाः ।
तिर्यग्विष्कम्भभूता स्त्रिभुवनवनतेर्भिन्नदैत्येभदेहाः
बाह्वा वस्तां हरस्य [2]द्रुतमिह निवहानंहसां संहरन्तु ॥ १७ ॥

संसारासन्धुतरणे स्फाटिकाः संक्रमा इव ।
दीर्घा महेशस्य भुजा वर्ण्यन्ते पापहारिणः ॥

---

1. रङ्गन्नागाङ्गदाढ्यं 2. द्रुतमिह

कण्ठेति । कमितुः कान्तस्य शिवस्य, आयादय आर्धधातुके वा' इति कमेर्णिङभावः । कण्ठाश्लेषार्थं कण्ठालिङ्गनार्थं दिवः आकाशात् आत्मा आगताः स्वर्गसिन्धो स्वर्गंगा गङ्गायाः प्रवाहा इव स्थिताः । अत्र दिव आत्मा इति शिवावरोहणस्य शिवकण्ठाश्लेषार्थं दिव आकाशाद्गङ्गाया आगमने हेत्वपेक्षया, तदीयमनस्य गङ्गागमनं विनाऽभूतत्वात् । अन्यथा यथाश्रुते शिवकण्ठाश्लेषार्थं प्रवाहाणामौचित्यभङ्गात् । लोके हि पतिकण्ठालिङ्गनार्थं नदीवल्लीनामेव गमनं नाम दृष्टं च; तथात्रापि प्राणान्तात्शिवकण्ठाश्लेषार्थं दिवः आकाशादागताया गङ्गायाः प्रवाहा इव स्थिता इत्यर्थः । वस्तूत्प्रेक्षा । संसारसिन्धोः क्रान्त्यै तदुत्तरणाय स्फटिकशैलीना महान्यः संक्रमः सेतवः तस्याकारा इव दीर्घाः, त्रिभुवनवपतेः त्रयाणां भुवनानां समाहारस्त्रिभुवनम्, पात्रादित्वात् न ङीप् । तदेव वसतिर्गृहं तस्याः तिर्यग्विष्कम्भभूताः तिर्यग्भित्तिरेखालरूपा इति रूपकम् । भिन्ना विदारिता दैत्येन्द्राणां देहा याभिस्तथोक्ताः । हरस्य या बाहवः भुजाः, 'बाहुर्बाहा त्विषा त्विषी' इति द्विरूपकोशः । ताः द्रुतं शीघ्रम्, इवशब्दो वाक्यालंकारे । अंहसां पापानां निवहान् समूहान् संहरन्ताम् ॥ १७ ॥

[1]रक्षोवक्षोविफालं स्मरहरवनिताऽक्षीणवक्षोजकान्तं
वक्षो निक्षिप्तमालं मलयजमिलदङ्गं विभस्मोक्षितं यत् ।
क्षिप्रं तद्रूक्षचक्षुःश्रुतिगमफणरत्नौघभाभीक्ष्णशोभं
युष्माकं शश्वदेनः स्फटिकमणिशिलामण्डलाभं क्षिणोतु ॥

आश्लिष्यद्भिरिवाक्षोजातङ्कमुद्रितम् ।
रक्षःशिक्षादक्षशिववक्षो रक्षतु सर्वदा ॥

रक्षेति । रक्षोवक्षोविफालं राक्षसवक्षोविदारणम् : मल्लयुद्धादिवेलायां स्वकर्तृकविघट्टनेन विदारितानन्तराक्षसवक्षस्कमित्यर्थः । 'विफला विशरणे' इत्यस्माद्धातोः 'कर्मण्यण' इत्यण्प्रत्ययः । स्मरहरस्य शिवस्य वनिता पार्वती तस्या अक्षीणाभ्यां पीनाभ्यां वक्षोजाभ्यां कान्तं मनोहरम्; आलिङ्गनक्षमत्वेत्यर्थः । निक्षिप्ता निहिता

1. वक्षो दक्षद्विषोऽलं स्मरभरविनमद्दत्तजाङ्गी वक्षोजान्तर्निक्षिप्तशुम्भम्म०

माला मणिमालिन्यः यस्मिन्नर्थोक्तम्। मलयजमालतीद्रवाभिमन्त्रोक्षितं मलयजेन चन्दनद्रवेण मिश्रितं श्रितपुङ्खानि च यद्वक्त्रं तेनाञ्चितं शोभितं तस्मिन्, तेन लिप्तमित्यर्थः। एतादृशं यद्वक्षः अन्तीति शेषः। रूक्षस्य तीक्ष्णस्य चक्षुःश्रुतीनां सर्पाणां गणस्य फणेषु यो रत्नौघः तस्य भाभिः कान्तिभिः अवीक्ष्णमत्यर्थं शोभा यस्य तत्तथोक्तम्। स्फटिकमणिशिलामण्डलस्यारोक्षाः अस्य तत्तथोक्तं तद्वक्षः अश्वन्मनक् 'दाऽर्थयोः शश्वत्' इत्यमरः। युष्माकमेनः पापं क्षिप्रं शीघ्रं क्षिणोतु नाशयतु। 'क्षिणु हिंसायाम्' इत्यस्मात्लोनादिकादाशिषि लोट् ॥ १८ ॥

मुक्तामुक्तं विचित्राकुलवलिलहरीजालशालिन्यवाञ्च-
न्नाभ्यावर्तं विलोलद्भुजगवरयुतं कालशत्रोर्विशाले।
युष्मच्चित्तत्रिधामा भवदमलगङ्गासलिलं मलीलं
शेतां शीतांशुगौरे चिरतरमुदरक्षीरसिन्धौ सविलासं ॥ १९ ॥

मुक्तावतीहिलक्ष्मीन्दुशोभनं क्षीरसिन्धुवत्
उदरं परमेशस्य वर्ण्यते चित्तशुद्धकृत् ॥

मुक्तेति मुक्तामुक्तं एकत्र मुक्ताभिहारमणिभिरामुक्तं संबद्धं; अन्यत्र मुक्तोत्पत्तिस्थानत्वात् स्वाभिस्थितास्ताभिस्ताभिः जलकूले विचित्रा नानाकुला नानाविधाश्च वलीनां तिमिङ्गिलादिरेखाणां लहर्य कान्तिपूरास्तासां जालेन शालते शोभत इति तथोक्तं अवाञ्चन् अप्रदक्षिणा नाभ्यावर्तो यस्मिंस्तथोक्तं विलोलद्भुजगवरयुते एकत्र विलोलद्भिः चलद्भिः भुजगवरैराभरणभूतैः सर्पश्रेष्ठैर्युते; अन्यत्र प्रभावतः स्थितैस्तैर्युते विशाले विपुले प्रतिक्षणमभिनवः रुचिरो मनोहरश्च तस्मिंस्तथोक्ते कान्तिलक्ष्म्या मन्दिरे शीतांशुगौरे एकत्र शीतांशुवद्गौरे, अन्यत्र शीतांशुना गौरे, कालशत्रोः कालान्तकस्य शिवस्य उदरक्षीरसिन्धौ उदररूपक्षीरसमुद्रे युष्मच्चित्तत्रिधामा भवन्मनोगङ्गासलिलं मलीलं सविलासं सुखोपमिति यावत्। चिरतरं शेतां शयनं करोतु। 'शीङ् स्वप्ने' इत्यस्मात्कर्तरि लोट्, ततस्तङ्। यथा समुद्रं प्राप्य गङ्गा तत्तादात्म्यं प्राप्नोति, एवं युष्मच्चित्तं शिवोदरं ध्यात्वा ध्यानपरिपाकप्राप्ततत्तादात्म्यं सुनिश्चलं परमसुखमनुभवत्वित्यर्थः। श्लेषसंकीर्णरूपकमलंकारः ॥ १९ ॥

वैयाघ्रं यत्र कृत्तिः स्फुरति हिमगिरेर्विस्तृतोपत्यकान्तः
सान्द्रावश्यायनिघ्ना परित इव वृता नीलजीमूतमाला ।
आबद्धाहीन्द्रकाञ्चीगुणमतिपृथुलं शैलजाक्रीडभूतं
तद्वो निःश्रेयसे स्याज्जघनमतिघनं बालमीतांशुमौलेः ॥२०॥

वैयाघ्रचर्मेव हिमस्थलीभ्रमं राजते ।
अस्मिन्नजघनं शंभोर्विणमतेऽखिलभीक्षयकृत् ॥

वैयाघ्री नि । यत्र यस्मिञ्जघने वैयाघ्री व्याघ्रस्येयम्; 'तस्येदम्' इत्यणि, 'न य्वाभ्यां' इत्यादिना ऐजागमः । कृत्तिश्चर्म हिमगिरेः हिमवत्पर्वतस्य विस्तृतायाः विशालायाः उपत्यकायाः आसन्नभूमेरन्तः सान्द्रेणावश्यायेन हिमेन मिश्रा, परितोऽभितः वृता प्रसृता नीलजीमूतमाला श्यामघनपङ्क्तिरिव स्फुरति । आबद्धः अहीन्द्र एव काञ्चीगुणः कटिसूत्रं यस्मिंस्तथोक्तम् । यद्यपि, 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना स्त्रियाम्' इत्यमरात् काञ्चीशब्दः पुंस्कट्यां न युक्तः, तथाऽपि स्त्रीकट्यामित्यत्र स्त्रीत्वमात्रविवक्षतम्; तेन पुंस्कट्यामप्ययं शब्द इति क्षीरस्वामिवचनान्न दोषः । अतिपृथुलमतिविशालम्, शैलजायाः पार्वत्या आक्रीडभूतमुद्यानभूमिरतिघनमतिनिबिडं बालमीतांशुमौलेः बालेन्दुशेखरस्य शिवस्य तज्जघनं वो युष्माकं निःश्रेयसे मोक्षाय स्यात् । यद्यपि 'अचतुर ...' इत्यादिसूत्रेण निःश्रेयसशब्दोऽकारान्तो निपातितः, तथाऽपि समासान्तविधेरनित्यत्वान्न दोषः । उपमालंकारः । अत्र हिमशैलोपत्यकास्थितवैयाघ्रकृत्तिसदृशोपमानोपमेयभावप्रतीत्या हिमगिरिविषयोपत्यकाघनदेशयोरुपमानोपमेयभावे व्यज्यत इत्यलंकारेणालंकारध्वनिः ॥ २० ॥

पुष्टावष्टम्भभूतौ [1]पृथुतरजघनस्येव नित्यं त्रिलोक्याः
सम्यग्वृत्तौ पुरन्ध्रीकरवरकरिकाकान्ति दधानौ ।
सारवूरू पुरारेः प्रणमनसमये घट्टयन्सस्मरो यत्
भक्तैरत्यर्द्रचित्तैरधिकमजनयो वाञ्छितं वो विधत्ताम् ॥२१॥

---

1. ०भूमिः 2. पृथुतरजघनस्यापि

ऐरावतकरोदारकान्तिभाजावभीष्टदौ ।
ऊरू त्रिलोक्या आधारौ वर्ण्येते गिरिजापतेः ॥

पुष्टेति । पृथुतरस्यातिविशालस्य जघनस्येव नितम्बस्येव त्रिलोक्याः, कुक्षिस्थाया इति शेषः । पुष्टावष्टम्भभूतौ दृढतराधारस्तम्भभूतावित्युत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । 'अवाचालम्बनाविदूर्ययोः' इति स्तम्भे मकारस्य नकारादेशः । सम्यग्वृत्तौ वर्तुलौ सुरेन्द्रस्य शक्रस्य द्विरदवर ऐरावतस्तस्य करः शुण्डा तस्योदारां महतीं, 'उदारो दातृमहतोः' इति विश्वः । कान्तिं दधानौ ऐरावतकरकान्तिसदृशीं कान्तिं दधानावित्यर्थः । अत एव पदार्थवृत्तिनिदर्शनालङ्कारः । भारौ श्रेष्ठौ प्रसभं गाढं आरघटाघसृणौ शत्रुसमूहनाशनशीलौ, घसृराविति यत्र 'घस्लृ अदने' इत्यस्माद्धातोः 'सृघस्यदः क्मरच्' इति ताच्छील्ये क्मरच्प्रत्ययः । भस्मना शुभ्रौ अत्यार्द्रं भक्तिरसेनात्यन्तासिक्तं चित्तं येषां तैः भक्तैरधिकमत्यर्थमवनतौ पुरारेरूरू वो युष्मभ्यं वाञ्छितसिद्धार्थं विधत्ताम् ॥ २८ ॥

आनन्दायेन्दुकान्ते पलर चितसमुद्रायिते ये मुनीनां
चित्तानन्दं[1] विधातुं विदधति चरणे ताण्डवाकुञ्चनानि ।
काञ्चीभोगीन्द्रभूर्ध्नां प्रतिमुहुरुपधानायमाने [2]तदानीं
[3]शश्वत्तन्मन्त्रकारैर्धुनिविजितसुधाभानुना जानुनी वः ॥

मुनिचित्तसमाधाननिधाने परमेशितुः ।
जानुनी ह्युपवर्ण्येते जितपूर्णेन्दुमण्डले ॥

आनन्दायेति । मुनीनां चित्तानन्दं मनःसन्तोषं निधातुम्, इन्दुकान्तोपलेन चन्द्रकान्तशिलया रचिते सदृशे संप्रत्यके तादिवाचरिते, 'कर्तुः क्यङ्' इति क्यङ् । तदन्तात्कर्तरि क्तः । चरणे पादे ताण्डवाकुञ्चनानि ताण्डवेनाकुञ्चनानि शरीरवक्रतासंपादकधर्मविशेषान्विदधति च कुर्वति सति तदानीं तत्क्षणमात्रम् ; आकुञ्चनकालस्य तावन्मात्रत्वात् । काञ्चीभोगीन्द्रभूर्ध्नां कटिसूत्रभूतस्य सर्पराजस्य शिरसां प्रतिमुहुः पुनः पुनः उपधानायमाने उपबर्हणवदाचरती । पूर्ववदाचारक्यङन्तात्शटः शानजादेशः । ताण्डववेलायामाकुञ्चन-

---

1, चित्तादर्शं 2. क्षणं ते 3. कान्ते


निर्णयग्रन्थे । तस्मात्सिद्धं सकलस्वरवर्णवाक्यात्मकशास्त्रयोनित्वं ततोऽनन्तगुणत्वं चेति माध्वाः । तत्र नादघोष्यादिकं प्रागेव खण्डितम् । शिवविरिञ्चयोरतिप्रसक्तिरप्युक्ता । किं चैतद्बलेनाभ्यर्थो-भित्वमेकं सर्वशब्दैः सिध्येत्, न गुणान्तरम् । किं बहुना ? ज्ञानानन्दादिरूपताऽपि न स्यात्, आनन्दादिशब्दानामपि असदादिशब्दवन्नियामकनामात्रपर्यवसायित्वात् । सिध्येद्वा अलीकताऽपि, 'आत्मकृतेः परिणामात्' इति सूत्रे वर्णितस्यात्मनः कार्यत्वबहुरूपत्वादेरिव 'स्वाप्ययात्' इति सूत्रोक्तलयस्येव चालीकत्वस्याप्यचिन्त्यशक्तावविरोधात् । अलीकत्वेऽपि कारणप्रभो भगवद्धीनत्वया विर्वाहश्चेत्यादिचर्चाऽत्र माध्वस्यैव शोभते, न तु विदुषाम् । गुणानां स्वरूपमात्रत्वे इष्टापत्तिश्च । विशेष इत्यपि शब्दमात्रमित्युक्तमिति दिक् । तस्माद्वचनाभासकल्पनामात्रमवलम्ब्य प्रकृतमिदं भाष्यमसमञ्जसम्, न त्वत्र न्यायलेशोऽपीति स्थितम् ॥

भट्टोजिभट्टरचिते ग्रन्थेऽस्मिंस्तत्त्वकौस्तुभे ।
समाप्तं प्रथमाध्यायभाष्यस्य खण्डनम् ॥

इति श्रीमद्विद्वन्मकुटमाणिक्यलक्ष्मीधरभट्टसूरिसूनुभट्टोजिभट्टविरचिते
श्रीतत्त्वकौस्तुभे द्वितीयपरिच्छेदे प्रथमस्याध्यायस्य
चतुर्थः पादः ॥

समाप्तश्च प्रथमोऽध्यायः ॥





द्वितीयोऽध्यायः ॥

प्रथमेऽध्याये विष्णौ समन्वय उक्तः । तत्र युक्त्यादिविरोधं निराकर्तुं द्वितीयाध्याय आरभ्यते इति माध्वाः ; तन्न, त्वदभिमतेऽनन्तगुणपरिपूर्णे समन्वयो दुरुपपाद इति प्रथमाध्यायगतत्वदधिकरणशतेन स्फुटीभूतत्वात् । एवं च द्वितीयाध्यायस्तद्वैयर्थ्यात् अभिनिविचित्रायते । किं च, तर्कागोचरे परमेश्वरे युक्तिविरोधोऽकिंचित्कर इति वदतस्तव मतेऽविरोधाध्यायोऽकाण्डताण्डवप्रायः । एवं च समन्वयसंविरोधं चोपजीव्य प्रवृत्तौ साधनफलाध्यायावप्यफलावेवेति समूलमुन्मूलितमेव मध्वदर्शनम् । तथाऽपि तत्र तत्र दूषणान्तराणि बहूनि सन्तीति स्फुटीकर्तुं प्रवर्तामहे ॥

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥

विष्णौ समन्वयश्चेत्तर्हि पाशुपताद्यागमस्वरूपेऽनवकाशत्वं स्यात् । तथा च तद्विरोधात् श्रुतिरन्यथा नेयेति पूर्वपक्षः । एवं सति पाञ्चरात्राद्यागमस्थानवकाशता स्यात् । तथा च सर्वज्ञपरमात्मनिष्णुप्रणीतपाञ्चरात्रोपबृंहणात् श्रुतेर्विष्णावेव समन्वय इति सिद्धान्तः ॥

ननु एवं पाशुपतादेरप्रामाण्यं स्यादिति चेत्, इष्टापत्तिः । तथा च सूत्रम्—

इतरेषां चानुपलब्धेः ॥ २ ॥

इतरेषां पाशुपतादिषूक्तानां फलानर्थानामनुष्ठानपरित्यागयोः कृतयोरपि प्रत्यक्षतोऽनुपलब्धेः । तथा च तानि मोहनार्थानीवेति भावः ॥

ननु योगफलं दृश्यत इत्याशङ्क्य नेत्याह—

एतेन योगः प्रत्युक्तः ॥ ३ ॥

योगफलस्याप्यभावकालेऽदर्शनादित्यर्थः । एवं चावैदिकस्मृतीनामप्रामाण्यात् न समन्वयविरोध इति माध्वाधिकरणशरीरम् । तुच्छं चैतत् । पाशुपतपाञ्चरात्रयोर्वैषम्यस्य ब्रह्मणा-

ऽपि दुरुपपादत्वात् । तथा हि — तत्रैतेषां शिवविष्ण्वोः [1]परमात्मत्वेन श्रुत्यादिषु कथनम्, फलविशेषस्य प्रत्यक्षेणोपलब्धिः, अनुपलब्धि स्थले व्यङ्ग्यून्नाकल्पन[illegible], क्वचित्तु कालान्तरे फलमिति स्वीकारः, [2]शापदग्धब्रह्माद्यधिकरिपरं पूर्वतन्त्रे अप्रामाण्यस्थापनं चेत्यादि तावदुभयोस्तुल्यम् । स्फुटीकृतं चेदं प्रागेव । अस्मत्पक्षे तु [illegible] स्वर्गविभूतिरुद्रादेरनेकोपनिषत्संवादः, अथर्वशिख्यथर्वशिरःश्वेताश्वतरैकल[illegible]नियत[illegible]लभि[illegible]श्च[illegible]लि[illegible]बहुशस्तदर्शनात् । तथा शिवोत्कर्षपराणि शिवपुराणादीनि [3]अ[illegible]विष्णुपुराणादिभ्योऽधिकानीति स्पष्टमेव । पुराणसंख्याबाहुल्यमपि प्रभासखण्डे [illegible]ति[illegible]ब्रह्मविष्णुभ्यां ब्रह्मा तथा रविः । अष्टादशपुराणेषु शेषेषु भगवान् शिवः ।' इति उक्तानामपि तु शिवपराणामेव बहूनीति स्पष्टमेव तद्दर्शिनाम् । भूयसामनुग्रहश्च न्यायः । तथा चोक्तं जैमिनिना — 'विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वम्' इति । वस्तुतस्तु न हि निरवकाशत्वात् विरोध एव नास्ति । किं तु 'शैवागमोऽपि द्विविधः श्रौताश्रौतविभागतः' इति वायुसंहितावचनात् श्रौतपाशुपतस्योपनिषत्संवादिनो वैदिकविषयता ; इतरस्य तु पाञ्चरात्रवत् भ्रष्टविषयतेति विवेकः ॥ १ ॥

स्यादेतत् । श्रुत्यादिसामान्यलभ्यत्वं [illegible]ति भवेत्, कारीर्याद्यनुष्ठानेऽपि फलादर्शनात् । क्वचित्कफलस्य काकतालीयत्वात् पाशुपतादिवदिति प्राप्ते आह सूत्रकारः—

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

अस्य श्रुत्यादेस्तथात्वं पाशुपतादिसाम्यं न, कुतः ? श्रुतेरपौरुषेयतया पाञ्चरात्रादेश्च वेदानुसारितया पाशुपतादिभ्यो विलक्षणत्वात् । ननु वेदस्यापौरुषेयत्वमपि कुत इत्याकाङ्क्षायामाह सूत्र्या 'अस्य तथात्वं च शब्दात्' इत्युत्तरम् । 'वाचा विरूपनित्यया' (ऋ. ८-६४-६) 'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा' इत्यादिश्रुतिस्मृतिवचनादित्यर्थः । न चैवं वक्तृवाक्यार्थयथार्थज्ञानरूपगुणाभावे प्रामाण्यानुपपत्तिः, प्रामाण्यस्योत्पत्तिज्ञप्त्योः स्वतस्त्वात् ॥

दृश्यते तु ॥ ५ ॥

इति सूत्रम् । कारीर्यादिफलं दृश्यते इत्यर्थः । भविष्यत्पुराणे— 'ऋग्यजुःसामाथर्वाख्या मूलरामायणं तथा । भारतं पाञ्चरात्रं च वेद इत्येव शब्दिताः ॥ पुराणानि च यानीह वैष्णवानि विदो विदुः । स्वतः प्रामाण्यमेतेषां नात्र किंचिद्विचार्यते ॥ यद्येषूक्तं न दृश्येत पूर्वकर्मात्र कारणम् । नाप्रामाण्यं भवेदेषां दृश्यते ह्यधिकारतः ॥ इतः प्रामाण्यमन्येषां न स्वतस्तु

---

1. परमात्मत्वेन 2. शापदग्धब्रह्माद्यधिकारिता, पूर्वतन्त्रे प्रामाण्यस्थापनं 3. ग्रन्थसंख्यायां

कथंचन। अदृश्योक्तौ ततस्तेषामप्रामाण्यं न संशयः॥' इति। इहापि खण्डनं प्राग्वत्। आगमानां वैषम्यस्य दुर्वचत्वात्। इतराप्रामाण्योक्तेर्न हि निन्द्यान्यायेनैव नेयत्वादिति दिक्॥ २॥

यदनवीदित्यादिवाधितार्थकथनाद्वेदप्रामाण्यमयुक्तमिति प्राप्ते आह—

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्॥ ६॥

यदाद्यभिमानिदेवता व्यपदिश्यते। तासामितरेभ्यो विशिष्टं सामर्थ्यमनुगतिश्च सर्वत्रापि। अतो भाषणादिकं युज्यते॥

दृश्यते च॥ ७॥

दृश्यते च तासां सामर्थ्यं महद्भिः। भविष्यत्पुराणे च— 'पृथिव्याद्यभिमानिभ्यो देवताभ्यः प्रसूतोऽग्निः। अचिन्त्याः शक्तयस्तासां दृश्यन्ते मुनिभिश्च ताः। वाय्वं सर्वगता वित्यं वासुदेवैकसंश्रयाः॥' इति। अस्माकमप्यविरुद्धोऽयमर्थः॥ ३॥

स्यादेतत्। विष्णोर्जगत्कारणत्वं न युक्तम्, 'असदेवेदमग्र आसीत्' 'असतः सज्जायत' इत्यादिश्रुत्या असतः कारणत्वोक्तेः, तदुपष्टब्धात्कारणं प्रलयेऽसत्, वस्तुत्वात् कार्यवत् इत्यनुमानाच्चेति प्राप्ते सूत्रम्—

असदिति चेन्न प्रतिषेधमात्रत्वात्॥ ८॥

असत् न कारणम्, प्रतिषेधबुद्धिविषयत्वात्, शशशृङ्गवत्। किं च,

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्॥ ९॥

असतः कारणत्वमसमञ्जसम्, प्रलये कारणीभूतासन्मात्रावशेषप्रसङ्गादित्यर्थः॥

इष्टापत्तिं परिहर्तुं सूत्रान्तरम्—

न तु दृष्टान्तभावात्॥ १०॥

प्रलये सर्वासत्त्वं न युज्यते, दृष्टान्तभावादित्युपलक्षणम्। वियदाद्युत्पत्तिः सम्मूला उत्पत्तित्वात् घटोत्पत्तिवत्, विमतो नाशः सशेषः, नाशत्वात् घटनाशवत् इत्यनुमानस्य 'सन्मूलाः सोम्येमाः प्रजाः' इत्याद्यनेकश्रुतीनां च सत्त्वात् इत्यर्थः॥

स्वपक्षदोषाच्च॥ ११॥

प्रलये सर्वासत्त्वमित्युक्तिः प्रलयकालाभ्युपगमेनैव व्याहतेति सूत्रार्थः॥

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः ॥ १२ ॥

तर्केण सतः कारणत्वमसतो नेति यदुक्तं तदाक्षिप्यानेन समाधीयते । तथा हि—यत्तर्केण साध्यते ततोऽन्यथाऽपि प्रतितर्केण सुसाधमिति सर्वानुमानाप्रामाण्यमिति चेत्, एवं सर्वत्रानुमानाप्रामाण्ये शब्दस्यापि संगतिग्रह हिमूलकस्याप्रामाण्यापत्तौ मोक्षोऽपि न सिध्येत् । किं च, यस्तर्कः सोऽप्रतिष्ठः इत्येवंरूपव्याप्तेरभ्युपगमेऽयमेव तर्कः सुस्थ इति न सर्वतर्कापलापः सुकरः । तथा च प्रामाणिकतर्को न प्रत्याख्येय इति भावः ॥

स्यादेतत् । मा भूदसतः कारणत्वम् । तथाऽपि विष्णोस्तन्न सिध्यति । जगत् निष्कारणम्, अचेतनकारणम्, जीवकारणं वा, कार्यत्वात् द्व्यादिवदिति युक्त्या अकस्मादित्यादिश्रुत्वष्टब्धया विरोधादित्याशङ्क्याह—

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १३ ॥

सकारणत्वे दृष्टान्तभावेन निष्कारणत्वादौ तदभावेन चेत्यर्थः । द्व्याद्यपि पक्षसमम् । न च घटादिदृष्टान्तेन जीवकर्तृकत्वं सिध्यति, जीवस्य व्यापकतावच्छेदककोटिप्रवेशे निष्प्रमाणकगौरवात् । तथा च विष्णोः सिद्धं जगत्कारणत्वमिति माध्वाधिकरणशरीरम् । खण्डनं प्राग्वत् । किं च, शशशृङ्गादिवन्न जनकमिति माध्वेन दुरुपपादम् । अलीकस्यापि ज्ञानविषयतां दृष्टान्वतां निषेधप्रतियोगितां स्वीकुर्वता जनकताऽपि कुतो न स्वीकार्या । 'सर्वस्य तदधीनत्वात्' इति स्मृतिबलेनासतो विष्ण्वधीनतां प्रथमाध्यायान्ते सिद्धान्तयता 'असतः सदजायत' इति श्रुतिसिद्धकारणतायाः सुतरां स्वीकार्यत्वात् । न च 'एतेन सर्वे व्याख्याता व्याख्याताः' इत्यत्रासदादिशब्दानां विष्णुरर्थ इत्युक्तत्वादयुक्तमिदमिति वाच्यम्, ब्रह्मवाचकत्वेऽपि इतरवाचकतायाः 'समाकर्षात्' इति सूत्रे स्वीकृतत्वात् । अन्यथा प्रकृताधिकरणस्य निरालम्बनत्वापत्तेः । यत्तु प्रकृताधिकरणमेव प्रागभावप्रध्वंसयोर्जनकतानिराकरणपरमित्यनुव्याख्यानन्यायसुधयोरुक्तम्, तदपि दुरुपपादमेव । तथा हि—सर्वे पदार्थाः भावाभावोभयात्मकाः । प्रागभावप्रध्वंसाभावात्यन्ताभावेष्वपि प्रमेयत्वादेर्भावरूपस्य सत्वात्, तस्य च धर्मिणा सहात्यन्ताभेदात् । एवं घटादिरप्यन्योन्याभावेन सहात्यन्ताभिन्नत्वादभावरूप इति सुधायां स्पष्टम् । 'खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत् । भावाभावस्वरूपत्वान्नान्योन्याभावता पृथक् ॥' इति त्वत्सिद्धान्तानुगुणं च । एवं स्थिते कथमभावकारणतां निराकुर्याः ?

स्यादेतत् । सर्वे भावाभावोभयात्मका इति सत्यम् ; तथाऽप्यस्ति घटो भावः प्रागभावादित्वभावः इति व्यवस्था । 'विशेष्यतैव धर्मित्वं प्रथमप्रतिपत्तिषु । निषेधविधिरूपत्वं भावा-

भावत्वमत्र हि[1] ॥' इति अनुव्याख्यानं विवृण्वता सुधाकृता घटो हि प्रथमं विधित्वेन धर्मिरूपेण प्रतीतोऽनन्तरं पटो नेति पटनिषेधात्मतया प्रतीयते। प्रागभावादिस्तु प्रथमं निषेधत्वेनावगतोऽनन्तरं विधित्वेन प्रतीयत इति व्यवस्थोपपादनादिति चेत्, भवेदेव यदि धर्मधर्मिणोर्भेदः स्यात्। भेदप्रतिनिधिर्विशेष इति तु प्रागेव निराकृतम्। किं च, भावादिशब्दैर्नञादिभिश्च प्रतीतिरनियतेति कथं प्राथम्यादिनिर्वाहः? एवमनुमितिरप्यनियता। प्रत्यक्षबोधस्त्वतीन्द्रिययोर्भावाभावयोर्नास्ति। तस्मात् भावत्वाभावत्वे अखण्डोपाधी इति निष्कर्षात्कुतस्त्वदुक्तो विभागः? एवमभावत्वप्रमेयत्वादीनां घटत्वादिजातीनां च व्यक्त्याभेदाच्छङ्खान्निर्विकल्पकापत्तिः; शक्तिग्रहानुपपत्तिश्च। सादृश्योपाधौ शक्तिग्रह इत्यपि तुच्छम्, सादृश्येऽपि 'यावद्वस्तु न भेदवत्' इति तत्त्वविवेकोक्तेः। 'एतादृशं च सादृश्यं पदार्थेषु पृथक्पृथक्। एकस्मिन् प्रविनष्टेऽपि यतोऽन्यत्रैव दृश्यते॥' इति वैशेषिकनिरासे अनुव्याख्यानोक्तेश्च त्वद्रीत्या जातितौल्यात्। 'आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा' इति वदता माध्वेन लौकिकैः करपादादिभिः मत्स्यकूर्मवराहादिभिश्च ब्रह्मणः सादृश्यस्य दुरुपपादत्वाच्च। अचिन्त्यशक्तौ सर्वं स्वीकुर्वता एकत्वानेकत्वाणुत्वमहत्त्वादिवच्छून्यत्वप्रागभावत्वप्रध्वंसत्वादेरप्युक्तश्रुतिबलेन सुवचत्वादिति दिक्॥ ४॥

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्॥ १४॥

भोक्तुर्जीवस्यापत्तेः 'परेऽव्यये सर्वे एकीभवन्ति' इति मोक्षे ब्रह्मत्वापत्तिश्रवणात् तयोरविभागो भेदाभावः। ततो न ब्रह्मणो जगत्कारणत्वं युक्तमिति पूर्वः पक्षः। सिद्धान्तस्तु—स्यादेवं यदि मुक्तस्य ब्रह्माभेदे प्रमाणं लभ्येत। एकीभावोक्तिस्तु स्याल्लोकवत्। यथा एकीभूता ब्राह्मणाः एकस्थाना एकमतयो वा तथेहापीत्यर्थः। खण्डनं प्राग्वत्॥ ५॥

तदनन्यत्वमारम्भणशब्दादिभ्यः॥ १५॥

हरेः स्वातन्त्र्येण जगत्कारणत्वे युक्तिविरोधं निराकर्तुमिदमधिकरणम्। कर्त्रनधीनसत्ताशक्त्यादिमत्कारणान्तरसापेक्षा खलु घटादिसृष्टिर्दृष्टा। ततो महदादिसृष्टिरपि कर्तृव्यतिरिक्तस्वतन्त्रकारणसापेक्षा, सृष्टित्वात् घटादिसृष्टिवत्। ततश्च न ब्रह्मणः स्वातन्त्र्यमिति प्राप्ते, महदादिसृष्टौ यत् स्वतन्त्रं कारणं तस्य तदनन्यत्वं ब्रह्मानन्यत्वमिति प्रतिज्ञा। ब्रह्मणोऽन्यस्य स्वतन्त्रकारणता नास्तीति फलितोऽर्थः। कुतः? 'किंस्विदासीदधिष्ठानमारम्भणम्' इति श्रुतेः। अनया हि अधिष्ठानमुपादानमारभ्यतेऽनेनेत्यारम्भणं साधनं वा कतमदासीत् इति स्वतन्त्रमन्य-

1. भावाभावत्वमस्ति हि

नासीदित्येवोच्यते। ननु किंशब्दस्य प्रश्नऽपि दर्शनात् कथमिहाक्षेपार्थतानिर्णय इति चेत्, 'किंस्विद्विद्मस्य' इत्यत्र 'अग्निर्हिमस्य' इत्यादेरिवेहोत्तरस्यानुक्तेः। तस्मादाक्षेप एवायम्। किं च,

भावे चोपलब्धेः ॥ १६ ॥

यदि भगवत्सृष्टौ स्वतन्त्रं कारणान्तरं स्यात्, तर्हि श्रुतिस्मृत्यादिभिरुपलभ्येत इति सूत्रार्थः ॥

ननूपलभ्यत एव 'अद्भ्यः संभूतः', 'प्रकृतिं स्वामवष्टभ्य' इत्यादिश्रुतिस्मृतिषु इत्याशङ्क्यायां सूत्रान्तरम्—

सत्त्वाच्चापरस्य ॥ १७ ॥

अस्यार्थः—स्यादयं दोषो यदि वयं ब्रह्मातिरिक्तं कारणमेव नास्तीति ब्रवीमहि। न चैवम्, अपरस्य तदधीनस्य प्रकृत्यादेः कारणस्य सत्त्वात्। तथा च श्रुतिः—'द्रव्यं कर्म च कालश्च स्वभावश्चेतनो धृतिः। यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया॥' इति। चेतनो जीवः। धृतिः चित्प्रकृतिः, धारकत्वात् ॥

असद्व्यपदेशान्नेति चेन्न, धर्मान्तरेण वाक्यशेषात् ॥ १८ ॥

इति सूत्रान्तरम्। ईश्वराधीनं प्रकृत्यादि स्वीकृत्य समाहितम्। तन्नोपपद्यते—'नासदासीत्' इत्यादिना महाप्रलये ब्रह्मातिरिक्तसकलनिराकरणादिति चेन्न, स्वातन्त्र्यरूपधर्मान्तरेण निराकरणस्याभिप्रेतत्वात्। तथा च वाक्यशेषः—'तम आसीत्' इति। प्रकृतिरेव हि तमः, आच्छादकत्वात्। 'तस्माद्वान्यत्' इति वाक्यशेषः। तस्मात् ब्रह्मणोऽन्यत् प्रकृत्यादिकं परस्परं स्वातन्त्र्यादिधर्मोपेतं नासीदिति तत्स्वरूपाभ्युपगमेन परत्वमात्रं निषिध्यते, अन्यथा परशब्दवैयर्थ्यादिति भावः ॥

स्यादेतत्। सिद्धान्तेऽपि प्रकृत्यैव महान्तं महतैवाहंकारं सृजतीति तत्रापि प्रकृत्यादिकमुपादानीकृत्यैव कालादिकं निमित्तीकृत्यैवेति स्वीक्रियते। तत्कथं स्वातन्त्र्यम्? वैपरीत्यस्यापि सुवचत्वात् इत्याशङ्कानिरासार्थं सूत्रम्—

युक्तेः शब्दान्तराच्च ॥ १९ ॥

अस्यार्थः—सत्यमस्ति भगवतोऽपि सहकारिनियमः। किंतु नासौ कुलालादेरिव बाह्यमपेक्ष्य व्यत्यस्य वा करणे शक्त्यभावनिबन्धनः, येन तस्य स्वातन्त्र्यं तेषां पारतन्त्र्यं वा न स्यात्। किं नाम? स्वेच्छायत्त एव नियमः। स्वेच्छायत्तमेव चेतरेषां सत्ताशक्त्यादि। उक्तं च—

'साधनानां साधनत्वं यदाऽऽत्माधीनमिष्यते। तदा साधनसंपत्तिरैश्वर्यद्योतिका भवेत्॥' इति। शक्तस्यापीश्वरस्य तत्ताद्रूप्यमानुसरणेच्छा तु स्वभावादेव युज्यते; तदिदमुक्तं—युक्तेरिति। शब्दान्तरात् स्वातन्त्र्यादिबोधकश्रौतशब्दादित्यर्थः॥

पटवच्च॥ २०॥

विमता सृष्टिः कर्तृव्यतिरिक्तसाधनसाध्या, सृष्टित्वात् पटसृष्टिवदित्यर्थः॥

अस्तु तर्हि तद्वदेव कर्त्रनधीनसत्ताशक्तिसत्कारणसाध्यताऽपीत्याशङ्कापनोदनार्थं सूत्रान्तरम्—

यथा च प्राणादि॥ २१॥

यथा हि प्राणशरीरेन्द्रियादयो भगवदधीना एव दण्डादयोऽपि, न तु स्वतन्त्राः। तथा च साध्यविकलो दृष्टान्त इति भावः। अतो भगवतः स्वातन्त्र्येण सर्वैकर्तृत्वे विरोधाभावात् युक्तं सर्वगुणपरिपूर्णत्वं विष्णोरिति माध्वाधिकरणशरीरम्। खण्डनं प्राग्वत्॥ ६॥

स्यादेतत्। विष्णुर्जगत्कर्तेत्ययुक्तम्, अहं करोमीति प्रत्यक्षसिद्धकर्तृताकस्य जीवस्यैव जगत्कर्तृत्वे लाघवात्, अतिरिक्तविष्णुकल्पने गौरवात्, 'जीवाद्भवन्ति भूतानि' इत्यादिश्रुतेश्चेति प्राप्ते, सिद्धान्तमाह—

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥ २२॥

यद्युक्तश्रुत्यादिबलाज्जीवः स्वतन्त्र इति ब्रूषे तर्हि तस्य हिताकरणमहितकरणं च न स्यादित्यर्थः॥

ननु विष्णोरपि जगत्कर्तृत्वे श्रमादिप्रसङ्ग इत्याशङ्क्याह—

अधिकं तु भेदनिर्देशात्॥ २३॥

ब्रह्म अधिकं जीवापेक्षया अधिकशक्तिकम्, श्रुतिषु भेदेन जीववैलक्षण्येन निर्देशात्। अतो न तस्य श्रमादिप्रसक्तिरिति भावः॥

ननु जीवः अन्यनिरपेक्षः चेतनत्वात् ब्रह्मवत् इत्याशङ्क्याह—

अश्मादिवच्च तदनुपपत्तिः॥ २४॥

अस्वातन्त्र्यश्रवणात् बाधितमनुमानमिति भावः॥

दध्यादौ गत्यभावेन सर्वमेतत्समञ्जसम्। उद्भिदादिषु तत्रैवं नामधेयत्वसंभवात्॥

'दध्नेन्द्रियकामस्य जुहुयात्' 'व्रीहिभिर्यजेत' इत्येवमादिषु दधिव्रीह्यादिपदानामर्थान्तरे नित्यं रूढत्वात् न सामानाधिकरण्येन यजिनामत्वं शक्यं कल्पयितुम्। अप्रसिद्धार्थं हि प्रसिद्धपदसामानाधिकरण्येन निर्णीयते। दध्यादयस्तु निरूढत्वान्न कथंचिदपि धातुसामानाधिकरण्यं प्रतिपद्यन्त इति गत्यभावाच्चत्र धातुपारार्थ्यं विप्रकृष्टार्थविधानं चाभिमतम्। उद्भिदादयस्तु यथैवावयवद्वारेण खनित्रादौ वर्तन्ते, तथैव स्वफलोद्भेदनकारित्वाद्यागेऽपीति नात्र धात्वर्थविधानं बाधितव्यम्॥

विशिष्टविधिपक्षे तु भवेन्मत्वर्थलक्षणा। सोमादौ गत्यभावात्सा न त्वत्र गतिसंभवात्॥

उद्भिदादयो हि करणत्वेन श्रूयन्ते। करणं च कारकत्वात्क्रियायैव संबध्यते, नाम्येन। क्रिया चात्र प्रत्ययवाच्या फलभावनैव। न च तस्यामुद्भिदादीनां करणत्वं

ननु 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यादिषु प्रकरणादाश्रयकाभाद्धातोरत्यन्तपारार्थ्यम्, विप्रकृष्टविधानम्, प्रकरणवाक्यात्तेतिकर्तव्यताविशेषानुपदेशात्प्रकरणिन प्रत्यानर्थक्यं चेष्यते। तथेह किं न स्यादित्याशङ्क्याह— दध्यादाविति॥

दध्यादिषु गत्यभावमुद्भिदादिषु गत्यन्तरसद्भावं च प्रदर्शयन् श्लोकं व्याचष्टे— दध्नेति। ननु यथा दध्यादयोऽर्थान्तरेष्वत्यन्तनिरूढा इति न स्वार्थादपनेतुं शक्याः, तथैवोद्भिदादयोऽप्यूर्ध्वविदारणसामर्थ्यादिमत्सु खनित्रादिष्वेवावयवशक्तिमन्त इति ततोऽपनेतुं न शक्या इत्याशङ्क्याह— उद्भिदादयस्त्विति। उद्भिच्छन्दोऽवयवशक्त्या ऊर्ध्वविदारणसमर्थ[1] इव समुदायशक्त्या प्रादुर्भावेऽपि 'उद्भिन्नविद्युद्वलयो घनस्ते' (रघु. १३. २१) इत्यादिप्रयोगेषु प्रसिद्धः। प्रादुर्भाव इह फलत्योत्पत्तिः; तद्द्वारा प्रकाशो वाऽस्तु। उभयथाऽपि नामपक्षे शक्तिरविशिष्टेत्यर्थः॥

ननु समानपदोपात्तधात्वर्थविधानवत्प्रवृत्तिविशेषकरं गुणविधानमपि न बाधितव्यम्। न चोभयविधाने वाक्यभेदः, विशिष्टविध्युपपत्तेरित्याशङ्क्याह— विशिष्टविधिपक्षे त्विति॥

ननु नास्ति विशिष्टविधिपक्षे मत्वर्थलक्षणापत्तिः। सहार्थतृतीयया उपलक्षणतृतीयया वा वैशिष्ट्यसंभवादित्याशङ्क्याह— उद्भिदादयो हीति। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति करणार्थ एव प्राप्तः। न च प्रकृत्यंशस्य मत्वर्थलक्षणादोषपरिहाराय उपपदविभक्तित्वाश्रयणं युक्तम्, प्रकृतिप्रत्ययोः प्रत्ययार्थस्य प्रधानतया उपसर्जनानुरोधेन प्रधानान्वयाकरणायोगादिति भावः। ननु तर्हि फले करणतयाऽन्वयोऽस्तु। मा भूदात्मर्थविशेषणत्वसिद्धयर्थं

---

1. °सामर्थ्यं

संभवति, समानपदोपात्तधात्वर्थापरोधादिति भावार्थाधिकरणे वक्ष्यमाणः। न च धात्वर्थेनोद्भिदादीनां संबन्धः। तस्य धात्वर्थस्य प्रत्ययार्थं प्रति करणत्वेनोपादानात्क्रियारूपतयाऽन्वयात्, क्रियारूपत्वे वा धात्वर्थस्य प्रत्ययार्थं प्रति करणत्वानुपपत्तेः। न च सत्यपि प्रत्ययवाच्यायाः फलभावनाया धात्वर्थान्तरोपेक्षार्थनिष्ठया धात्वर्थभावनयोद्भिदादीनां संबन्ध इति वक्तव्यम्, तस्या इहाश्रुतत्वात्, अश्रुतया च तया शब्दान्तरस्यान्वयायोगात्। फलभावना त्वत्र श्रुता, न च धात्वर्थभावना। न चाध्याहृत्य धात्वर्थभावनां तया संबन्धः— उद्भिदा भाव्यमानेन यागेन पशून्भावयेदिति, विनाऽप्यध्याहारेण वाक्यसमन्वयोपपत्तेः। यदवश्यं यदत्र प्रत्ययार्थे करणं यागस्तत्रैव तृतीयान्तैरुद्भिदादिपदैर्वर्तितव्यम्, नान्या गतिरस्ति। तत्र [1]गुणविधिपरत्वेऽर्थान्तरवाचिनामुद्भिदादिपदानामर्थान्तरे यागे वृत्तिर्मत्वर्थलक्षणया स्यात्— उद्भिद्वता यागेनेति। नामधेयत्वे तु श्रुत्या।

मत्वर्थलक्षणेत्याशङ्क्याह— करणं चेति। फलं हि भावना प्रति कर्मकारकम्। न च कारकेण कारकान्तरस्यान्वयोऽस्ति; किं तु क्रिययैवेति भावः। [2]नन्वत्र या क्रिया तस्यामेव तर्हि करणतयाऽन्वयोऽस्त्वित्याशङ्क्य, भावना चात्र क्रिया; या समानपदोपात्तधात्वर्थरूपा करणावरुद्धेति तस्यामन्वयो न संभवतीत्याह— क्रिया चेति। ननु भावनाया उद्भिदान्वयोऽपि क्रियैव; तत्रान्वयोऽस्त्वित्याशङ्क्याह— न च धात्वर्थेनेति। धात्वर्थेन शब्दितस्यापि क्रियात्वेऽपि भावनाकारकत्ववादिना तदभावात्, कारकान्तरेण च करणकारकस्यान्वयानुभवसिद्धेः सोऽपि पक्षो न संभवतीत्यर्थः। ननु फलभावनायाः करणान्तरापेक्षेऽपि न धात्वर्थभावनायाः सोऽस्तीति तस्यां करणतयाऽन्वयः स्यात्। तस्याः शब्दान्तरापेक्षेति अनाक्षिप्तस्य धात्वर्थस्य करणत्वासंभवेन अर्थादाक्षिप्तत्वादित्याशङ्क्याह— न च सत्यपीति। उक्तेत्यादि। अश्रवणस्य तवाप्यभिमतत्वादित्यर्थः। आक्षिप्तया च तया अन्वयः, शाब्दिकन्यायसंकोचादित्याह— अश्रुतया चेति। अध्याहारशङ्कावतामाशयमाह— फलभावना हीति। ननु अध्याहारशङ्का अनुपपन्ना; 'उद्भिदा यागं भावयेत्, यागेन [3]फलं भावयेत्' इति वाक्यभेदापत्तेरित्याशङ्क्य अध्याहारेऽप्येकवाक्यतयाऽन्वयं दर्शयति— उद्भिदेति। विनापीति। उद्भिदेत्यस्यान्वयार्थः स्वत्वध्याहारोऽपेक्ष्यते, नामतयाऽप्यन्वयोपपत्तेः न तदपेक्षाऽस्तीत्यर्थः। तस्माद्वैयधिकरण्ये कथमपि करणान्तरान्वयासंभवात् करणार्थकत्वाक्षिप्तसामानाधिकरण्यादुद्भिदादिपदानामर्थान्तरं यागे मत्वर्थलक्षणा विनैव निर्वहतीति, ततो वर्तं नामतेवेति श्लोकपूर्वार्धमनूद्य गृहीतमर्थमुपसंहरति—

---

1. गुणविधित्वे 2. नन्वत्र इति नास्ति 3. पशून्

'सोमेन यजेत' इत्यादिषु तु सोमादिशब्दानामर्थान्तरेऽत्यन्तनिरूढत्वाद्याग इव कथंचिदप्यप्रसिद्धेरप्रसिद्धकल्पनातो वरं प्रसिद्धार्थद्वारेण [illegible]अगाश्चयामीति [illegible]स्तुत्यर्थं गुणगुणविशिष्टयागविधानमङ्गीकृतम्— सोमेन। यागेन [illegible]तीतिं कुर्यादिति। उद्भिदादीनां

तदवश्यमिति। तदुत्तरार्धमगृहीत्वार्थं विवृणोति—सोमेनेति। ननु सोमादिशब्दोद्भिदादेरप्यविशिष्टो गत्यन्तराभावः। उद्भिदः, ह्रूर्छविमुह्यादिभ्यः कर्मण्यड्प्रत्ययेन न प्रकाशनमुच्यते। खनित्रादिना भूमेरूर्ध्वविदारणे बहूनामङ्कुरादिप्रकाशो जायत इति प्रकाशोद्भिदोर्न कार्यकारणभावसत्वात्, कारणवाचिनः कार्ये प्रकाशे लक्षणया प्रयोग उचित एव समुद्रशक्तिरल्पकाभावादित्याशङ्क्याह— उद्भिदादीनां त्विति। ऊर्ध्वविदारणसमर्थेन जलादिप्रकाशे पर्यवसन्ने लक्षणा संभवति, न प्रकाशान्तरे, गङ्गाशब्दस्य नीरान्तरवत्। तस्मात् 'तं वा एतमुद्भिमाजेयमजानन्तम्' 'गूढोऽयं मन्त्रः केनोद्भिन्नः' इत्यादिप्रयोगानुपपत्तिरत्र समुद्रशक्तेरेव आश्रयणीयेति रूढेर्बलीयस्त्वात्फलरूपपशुप्रकाशनप्रवृत्तिनिमित्तयोद्भिदर्थत्वं न श्रुत्या, तया कथंचिल्लाक्षणिकत्वेऽपि ततः परया उद्भित्प्रातिपदिकार्थगतकरणत्वप्रतिपादिकया विभक्तिश्रुत्या वाऽवगतयागसामानाधिकरण्यनिर्वाहाय करणीभूतयागनामत्वमेव युक्तमिति भावः॥

ननु उद्भिन्नामधेयस्य पशुफलप्रकाशने न लिप्सितम्। किं त्वन्यदेव। एवं हि छन्दोगब्राह्मणे अन्दाख्यायते— 'असुराणां वै बलस्तमसा प्रावृतोऽश्मापिधान आसीत्, तस्मिन गर्भं वस्यन्तरासीत्, त देवा नाशक्नुवन् भेत्तुम्; ते बृहस्पतिमब्रुवन्— इमान्न उत्सृजेति। स उद्भिदैव बलं [2]व्यापयत्; तं बलभिदाऽभिनत्, तानुत्सेधेनैवोदसृजत्, निषेधेन पर्यगृह्णात्; पशुकामो यजेत' (ताण्ड्यमहाब्राह्मण. अ. १९. ख. ७) इति। अस्यार्थः— असुराणां मध्ये प्रधानभूतो बलः कश्चिद्बिले अश्मना पिहितो वसति स्म; 'इन्द्रो बलस्य बिलमपौर्णोत्' (तै. सं. २. १. ५) इति श्रुत्यन्तरात्। तस्मिन् बिले गर्भं गोसबन्धि वसु गोभहिंस्यादिजीवधनमासीत्। जीवधनग्रहणार्थं तं बलं देवा भेत्तुं नाशक्नुवन्। ते बृहस्पतिम्, 'इमान् पशून् बलेन निरुद्धान् अस्मभ्यं मोचय' इत्यब्रुवन्; स बृहस्पतिरुद्भिद्यागेनैव बलं [3]व्यापयत्, अश्मापिधानापनयेन विदृतवान्; तं बलं बलभिद्यागेन हिंसितवान्; उत्सेधाख्येनोद्भिद्यागस्य ब्रह्मसामरूपेण साम्ना तान् पशून् मोचितवान्; निषेधाख्येन बलभिद्यागस्य ब्रह्मसामरूपेण साम्ना तान् पशून् परिगृहीतवान्। एवं पशुप्राप्तिसाधनाभ्यां उद्भिद्बलभिद्भ्यां पशुकामो यजेत इति। अत्र बलविदरणमुद्भित्पदप्रवृत्तिनिमित्तम्, बलेनेन बलभित्पदप्रवृत्तिनिमित्तं च व्यवस्थितयोक्तम्। एवं च पशुफलोद्भेदनं नोद्भित्पदप्रवृत्तिनिमित्तमिति युक्तम्; श्रुतिविरोधात्, तस्योद्भिद्बलभिदोः समुच्चित्य पशुफलयोर्गविशिष्टत्वेन विशिष्योद्भित्पदप्रवृत्तिनिमित्तत्वायोगाच्चेति चेत्; उच्यते—उपाख्यानस्य अनर्थवादत्वात्, तस्यापि ततः [4]पशूद्भेदन-

---

1. °कल्पना° 2. व्यव्यावयत् 3. व्यव्यावयत् 4. बलोद्भेदन°

पर्यन्तत्वाच्च। विधिवाक्यगतफलश्रवणानुसारेण पशुफलोद्देशेन प्रवृत्तिनिमित्तमुक्तम्; तेन च प्रवृत्तिनिमित्तेन उद्भिदादस्य पशुजादिवद्योगरूढ्या क्वचिदेव प्रवृत्तिरिति न विरोधः॥

अत्र पूर्वपक्षे गुणविधिप्रकाराणां सिद्धान्ते तन्निराकरणप्रकाराणां च ग्रन्थकृता विवक्षितानामयं संक्षेपः—गुणमात्रस्य विधिर्यागस्यानुवाद इति, तस्यापि विधिरिति च प्रथमं तावत् द्वौ पक्षौ। अनुवादपक्षे ज्योतिष्टोमयागस्य, दर्शपूर्णमासिकस्य आग्नेयादियागस्य, विश्वजिदादियागस्य वा अनुवाद इति त्रयः पक्षाः। ज्योतिष्टोमानुवादपक्षे ज्योतिष्टोमवाक्ये यागविधिरिति, सोमवाक्ये यागविधिरिति च द्वौ पक्षौ। तत्र आद्यपक्षे ज्योतिष्टोमपदं यागनामेति, अग्न्यादिसमूहरूपगुणविधिरिति च द्वौ पक्षौ। अत्र यागनामपक्षे सोमस्योद्भिदादिगुणानां च उत्पन्नाशिष्टत्वाविशेषादुत्पन्नविशिष्टगुणान्तराबरोधाभावाच्चानैमित्तिको वैकल्पिककर्माङ्गत्वेन विधिः, पशुकामादिपदं सार्वकाम्यवाक्यप्राप्तफलानुवाद इति, फलविशेषे निमित्ते नैमित्तिककर्माङ्गत्वेन गुणविधिरिति, कर्मान्वितः फलार्थो गुणविधिरिति च त्रयः पक्षाः। अग्न्यादिगुणविधिरिति पक्षे नैमित्तिककर्माङ्गगुणविधिरिति, फलार्थगुणविधिरिति च द्वौ पक्षौ। सोमवाक्ये आग्नेयादिवाक्ये वा यागविधिरिति पक्षे उत्पत्तिशिष्टसोमपुरोडाशाबरोधात् ज्योतिष्टोमोद्भिदादिवाक्यैः फलविशेषनिमित्तकः फलार्थो वा गुणविधिरिति द्वौ पक्षौ। विश्वजिदादिवाक्येषु यागविधिरिति पक्षे उत्पत्तिशिष्टद्रव्यान्तराबरोधाभावात्सोमस्य नित्यो विधिः, ज्योतिष्टोमोद्भिदादिगुणानां गोदोहनवत्फलार्थो विधिरिति च व्यवस्था। उद्भिदादिवाक्येष्वेव यागविधिरपीति प्राथमिकद्वितीयपक्षे वैयधिकरण्येनान्वयः, सामानाधिकरण्येन वेति द्वौ पक्षौ। आद्यपक्षे उद्भिदादिगुणवाचिभ्यः सहार्थादितृतीया करणतृतीया वेति द्वौ पक्षौ। करणतृतीयेति पक्षे फले धात्वर्थे फलभावनायां धात्वर्थभावनायां वा करणतया गुणानां विधिरिति चत्वारः पक्षाः। सामानाधिकरण्ये तु गुणक्रियावाचिनोः स्वतः सामानाधिकरण्यायोगान्मत्वर्थलक्षणेत्येक एव पक्षः। अत्र सर्वेष्वपि गुणविधिपूर्वपक्षेषु [1]खनित्राद्यभक्ष्ययोगदोषः साधारणः। मत्वर्थलक्षणापक्षमेकं विहाय अन्येषु सर्वेषु गुणविधिपक्षेषु तृतीयाविभक्त्यवगतभावनाकरणयागसामानाधिकरण्यबाधः साधारणः। गुणमात्रविधिपूर्वपक्षेषु सर्वेषु धातुपाराध्यर्थविप्रकृष्टविधानदोषो साधारणौ। कर्मान्वनैमित्तिकगुणविधिरिति पक्षेषु फलपदानर्थक्यं च। तेष्वपि ज्योतिष्टोमवाक्येऽनुवाद्ययागविधिः, ज्योतिष्टोमपदमग्न्यादिगुणविधानार्थमिति पक्षे, सोमवाक्ये आग्नेयादिवाक्ये वा यागविधिरिति पक्षयोश्च उद्भिदादिगुणानामुत्पत्तिशिष्टतत्तद्गुणाबरोधादनन्वयः, विषमशिष्टविकल्पो वा। ज्योतिष्टोमे आग्नेयादियागेषु वा नैमित्तिकगुणविधिरिति पक्षे नैमित्तिकेन नित्यस्य बाधः। फलार्थं गुणविधिरिति पक्षे काम्येन नित्यस्य बाधः, यजेः प्रत्ययानुग्रहमात्रार्थत्वादत्यन्तपारार्थ्यं च। उद्भिदादिवाक्येष्वेव तत्तद्यागविधिरपीति पक्षे, तत्रापि वैयधिकरण्येन गुणान्वय इति पक्षे सहार्थतृतीयादिपक्षस्य कारकविभक्तिबलीयस्त्वेन बाधः। करणतयाऽन्वय इति पक्षेषु फले करणे वाऽन्वय इति पक्षयोः कारकस्य कारकान्तरान्वयासंभवेन बाधः। फलभावनान्वय इति पक्षस्य समानपदोपात्तधात्वर्थरूपकरणान्वयेन बाधः। धात्वर्थभावनान्वयपक्षस्य शाब्दन्यायाविरोधेन अश्रुताध्याहारदोषेण वा बाधः।

1, खनित्राद्यभक्ष्य०

त्वत्रयवद्वारेण कर्मण्यपि प्रसिद्धिरस्तीति श्रुत्या [1]नामधेयत्वं युक्तम्। प्रयोजनं च [2]नाम्नां सर्वत्र व्यवहार एव। न ह्यन्तरेण नामधेयमृत्विग्वरणादिषु अनेनाहं यक्ष्ये इति लघुराख्यानोपायः स्यात्। क्वचिच्च गुणफलोपबन्धेनार्थवत्ता। 'दर्शपूर्णमासावारप्स्यमानोऽन्वारम्भणीयामिष्टिं निर्वपेत्' इति गुणोपबन्धः। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलोपबन्धः। क्वचिच्च भेदकतयाऽर्थवत्त्वं, यथा— 'अथैष ज्योतिः' इत्यादिषु वक्ष्यते। यथा चात्रैव 'उद्भिदा यजेत पशुकामः' इति। नामधेयत्वाभावे हि प्रकृतस्यैव ज्योतिष्टोमस्य फलविधिरयं स्यात्। नामधेयत्वे तु यागान्तरविधानात्सिद्धमर्थवत्त्वम्॥

सामानाधिकरण्येन गुणान्वय इति विशिष्टविधिपक्षे मत्वर्थलक्षणा, विशिष्टविधिना विशेषणविशेष्यविधिकल्पनागौरवम्, नामधात्वाख्यातानां त्रयाणामपि विशेषणविशेष्यान्यविशिष्टविधानार्थत्वरूपं पाराश्यम्, उद्भित्प्रातिपदिकार्थस्य श्रुतकरणत्वभङ्गः, तस्य प्रतीतयजिसामानाधिकरण्यभङ्ग इति पञ्च दोषाः। एवं सर्वविधिगुणविधिपक्षप्रसक्तदोषजातपरिहाराय नामत्वमेवाश्रयणीयमिति॥

ननु गुणपक्षे प्रवृत्तिविशेषलाभोऽस्ति प्रयोजनम्, नामपक्षे तु न किंचित्प्रयोजनमिति शङ्कां परिहरति— प्रयोजनं चेति। ननु नामधेयरहितकाम्येष्टिपशु[3] विशेषाणामिवान्येषामपि द्रव्यदेवतादिविशेषैरुपलक्ष्य[4] व्यवहारो भविष्यतीति किं नाम्नेति शङ्कां निवर्तयति— लघुरिति। लघूपायसंभवे गुरूपायोऽनुपायप्रायो नाश्रयणीयः। न ह्यप्रतिपन्ननामेव प्रतिपन्ननामाऽपि चैत्रमानयेत्यनिर्दिश्य श्यामदीर्घलम्बकर्णत्वादिचिह्नविशेषैरुपलक्ष्यते। अतो [5]नामसद्भावे द्रव्यविशेषाद्युपनिबन्धो गुरूपायोऽनुपायप्रायः इति ऋत्विग्वरणादिव्यवहारो नाम्नः प्रयोजनमित्यर्थः। ननु नामाप्यनेकसाधारणम्, ऋत्विग्वरणादौ कर्तव्ये इतरव्यावर्तकविशेषणापेक्षणान्न लघूपायः। यथोद्भिन्नामैव तावत्साधारणम्, 'अथैष एकत्रिकः प्रजापतेरुद्भित्। एतेन वै प्रजापतिरेषां लोकानुदभिनत्' (ताण्ड्यमहाब्रा० १६. १६. १) इति ऋत्वन्तरेऽपि श्रुतत्वादिति चेत्, सत्यम्। क्वाचित्कमेव साधारण्यमिति न प्राथमिकलघूपायत्वहानिः। आदिशब्देन मीमांसार्थनिर्णयौ गृह्येते। न ह्यत्वधिकरणोपक्रमेषु 'वाजपेये श्रूयते' 'राजसूये श्रूयते' इत्यादिप्रकारेण प्रकरणिन्यालिखिते तदवगत्यधीनः पूर्वपक्षसिद्धान्तविचारस्तदधीनो वाक्यार्थनिर्णयश्च भवेदित्यर्थः। प्रयोजनान्तराण्याह— क्वचिदिति। '[6]आरप्स्यमाण' इत्येतावत्युक्ते हि अग्निहोत्राद्यारम्भेऽप्यन्वारम्भणीया कर्तव्या स्यात्। 'स्वर्गकामो यजेत' इत्येतावत्युक्ते सन्निहितत्वाविशेषादुत्पत्तिवाक्येषु[7] अमावास्यापौर्णमासीकालयुक्ताग्नेयादीनामिवाकालयुक्तानां प्रयाजादीनामपि स्वर्गफलसंबन्धेन प्राधान्यं भवेत्।

---

1. नामधेयत्वमिति 2 नाम्नः 3. ०विशेषणादीनामिव 4. ०रुपलक्ष्यतेति किं नाम्नेति
5. नाम्नामसद्भावे 6. आरप्स्यमान 7 आवृत्तिवाक्येषु

'अथैष ज्योतिः इति नामधेयेनोपक्रमाधारे प्रकृते ज्योतिष्टोम एव 'एतेन सहस्रदक्षिणेन यजेत' इति दक्षिणारूपगुणविधिर्भवेत्। किं बहुना? सहस्रदक्षिणागुणविधानानन्तरं 'उद्भिदा यजेत' इति निर्देशोऽपि यागान्तरव्यवधानाभावात् पूर्वपक्षयुक्तरीत्या गुणविधानार्थो भवेत्। नामधेयसद्भावे तु ततो विशेषलाभात् नैताः शङ्काः प्रवर्तन्त इति सप्रयोजनं नामधेयम्॥

चित्राज्याधिकरणम् ॥ ३ ॥

यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः ॥ ३ ॥

जैमिनीयन्यायमाला ॥

यच्चित्रया यजेतेति तद्गुणो नाम वा भवेत्। चित्रस्त्रीत्वगुणो रूढेरग्नीषोमीयके पशौ ॥ ६ ॥
द्वयोर्विधौ वाक्यभेदः वैशिष्ट्ये गौरवं ततः। स्याद्धाम पृष्ठाज्यबर्हिष्यवमानेषु तत्तथा ॥ ७ ॥

इह ये लोके जातिगुणवचनतया निरूढा गुणफलोपबन्धेषु वाक्येषु श्रुताः कर्मण्यपि योगवशेन संभवद्भ्य उत्पत्तिवाक्ये फलवाक्ये गुणवाक्ये वा तृतीयानिर्देशेन कर्मसमभि-

---

यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः।

इह ये लोके इति। अत्र यौगिकज्ञानानुदाहरणत्वं व्यावर्तयितुं निरूढा [1]इत्यन्तम्। आज्यपृष्ठादिगुणविधानात्यधिकारो गुणवाक्येषु प्रवर्तनीय इति वक्ष्यमाणमनुसृत्य 'गुणोपबन्धेषु' इति वाक्यविशेषणम्। चित्रावाक्येऽपि वाक्यभेदरूपसिद्धान्तयुक्तसाधारण्यात्तत्संग्रहार्थं फलविशेषणम्। दधिसोमादीनामुदाहरणत्वं व्यावर्तयितुं 'कर्मण्यपि' इत्यादिविशेषणम्॥

[2]योगवशेनेति। अत्र योगशब्देन अवयवशक्तिलक्षणो मुख्यार्थसंबन्धलक्षणश्च योगो विवक्षितः। ततश्च 'यदाजिमीयुस्तदाज्यानामाज्यत्वं; यस्माद्देवाः प्रजापतिवचनादेतेषु स्तोत्रेषु आजिमधावत तस्मादेतानि आज्यानि' इत्येवमर्थवादबलादाज्यशब्दः आजिशब्दात् 'तत्र साधुः' इति यत्प्रत्यये सत्यवयवयोगेन कर्मणि संभवद्वृत्तिः। 'आपो वा ऋत्वियमार्च्छन्, तासां वायुः पृष्ठे व्यवर्तत' इत्यार्तवयुक्तानामपां पृष्ठे वायोः स्पर्शे सति रथन्तरादीन्युत्पन्नानीति स्पृशतेर्धातोः

---

1. इत्युक्तम् 2. 'म' पुस्तकोपलब्धोऽयमधिकः पाठः श्रीसोमनाथकृतमयूखमालिकातः सङ्गृहीत इति प्रक्षिप्तोयं भाग इति प्रतीयते।

व्याहृताः शब्दास्ते सर्वे उदाहरणम्। यथा— 'चित्रया यजेत पशुकामः' 'पञ्चदशान्याज्यानि' 'सप्तदशानि पृष्ठानि' 'त्रिवृद्बार्हिष्पवमानः' इति चित्राज्यपृष्ठबार्हिष्पवमानशब्दाः; ते गुणविधयः कर्मनामधेयानि वेति संशयः। तदर्थं च किं गुणविधौ वाक्यभेदो भवति, न वेति चिन्तयितव्यम्। कस्मात्पुनरुत्पत्तिवाक्यमेव 'आज्यैः स्तुवते' इत्यादिकं नोदाहृियते? पक्षद्वयेऽपि निर्णयकारणाभावात्, गुणवाक्याधीन एव निर्णय इति तदेवोदाहृतम्। तथाहि— न तावदाज्यैः स्तुवत इति गुणविधिरवगन्तुं शक्यते। घृतस्य स्तुतौ करण-

---

निष्पन्नः पृष्ठशब्दः स्वदर्शनजनितेषु रथन्तरादिषु योगेन संभवद्वृत्तेः। तथा 'सोमः पवते' इत्यादौ पवनक्रियाकर्तृत्वेन प्रसिद्धसोमे यौगिकः पवमानशब्दस्तद्वाचकत्वान्नलाभे स्तोत्रे मुख्यार्थसंबन्धेन सदसो बहिः क्रियमाण स्तोत्र बहिष्पवमानमित्येवं संभवद्वाच तथा दृष्यादिविशिष्टद्रव्यकत्वाभ्युख्यार्थसंबन्धेन चित्राशब्दोऽपि कर्मणि संभवद्वृत्ति रेति भावः। कर्मणि संभवद्वृत्तित्वमात्रेण न कर्मनामत्व, किं तु तत्सामानाधिकरण्येन निर्देशे सति इति नामत्वलाभनार्थमाह— उत्पत्तिवाक्य इति। आज्यपदं बार्हिष्पवमानपदं चोत्पत्तिवाक्ये कर्मसमानाधिकृतम्। चित्रापदं सिद्धान्ते फलवाक्ये कर्मसमानाधिकृतं, पूर्वपक्षे तु गुणवाक्य इत्यधिप्रेत्य फलवाक्ये वेत्युक्तम्। इदं च प्रदर्शनमात्रम्। तेन 'पृष्टैः स्तुवते' इत्यनुवादवाक्ये कर्मसमानाधिकृतपृष्ठशब्दसंग्रहः। यद्वा 'पृष्टैः स्तुवते' इत्यनुवादबलात् 'सप्तदशानि पृष्ठानि' इति गुणवाक्यगतपृष्ठशब्दः स्तोत्रपरोऽवयवः इति गुणवाक्यशेषत्वाद्गुणवाक्यशब्देन 'पृष्टैः स्तुवते' इत्यनुवादवाक्यमेव विवक्षितं बोध्यम्॥]

वाक्यभेदेन गुणविधिनिरासे सति कर्मनामत्वं तृतीयानिर्देशावगतभावनाकरणत्वार्थसामानाधिकरण्येन स्फुटं भवतीति तदर्थं 'उत्पत्तिवाक्ये' इत्यादिविशेषणम्। 'आज्यैः स्तुवते' इत्युत्पत्तिवाक्ये तृतीया; चित्रयेति फलवाक्ये। गुणविधिवाक्ये तृतीयानिर्देशस्योदाहरणमन्वेष्यम्। यद्वा, गुणभूतं वाक्यं, गुणवाक्यम्। तेन 'पृष्टैः स्तुवते' इत्यनुवादवाक्ये तृतीयानिर्देशः संगृहीतः। पवमानशब्दः पवनक्रियाकर्तृत्वेन श्रुते सोमे पाचकशब्दवद्यौगिकः। तस्य तत्प्रकाशकेषु 'उपास्मै गायता नरः' इत्यादिमन्त्रेषु लक्षणा। ततस्तत्साध्येषु स्तोत्रविशेषेषु लक्षितलक्षणेत्येवं लक्षितलक्षणया तेषु निरूढः। कस्मात्पुनः इति। तृतीयानिर्देशेन भावनाकरणस्तोत्रसामानाधिकरण्यात्, 'यदाज्यमीयुस्तदाज्यानामाज्यत्वम्' इति वाक्यशेषाच्चोत्पत्तिवाक्यगतान्नामत्वं स्फुटं भवतीति तदर्थमुत्पत्तिवाक्योदाहरणं युक्तमिति शङ्कार्थः। पूर्वपक्षे तो गुणत्वनिर्णयः, अस्य सिद्धान्ते नामधेयत्वनिर्णयः, तस्योभयस्याप्युत्पत्तिवाक्योदाहरणे लाभाभाव तदुदाहरणमित्याह—पक्षद्वयेऽपीति। उक्तमर्थमुपपादयति—तथा हीति। उत्पत्तिवाक्यमुदाहृतं यत्, तत्राज्यपदरूढिमवलम्ब्य घृतस्य वा स्तोत्रकरणत्वमुच्यते, घृतसंबन्धिमन्त्राणां वा? नाद्यः, प्रगीतमन्त्रसाध्यगुणनिष्ठगुणाभिधानरूपे स्तोत्रे

---

1. चेत्

स्वासंभवात् तत्र लक्षणया घृतसंबन्धिभिर्मन्त्रैरिति वक्तव्यम्। न च घृतसंबन्धिनः केचिन्मन्त्राः प्रसिद्धाः, ये लक्ष्येरन्। तत्रानेनैव वाक्येन लक्षणया घृतसंबन्धं मन्त्राणां विधाय, तैश्च स्तोत्रे विधीयमानेऽत्यन्तगौरवम्। विधौ च लक्षणाऽत्यन्तक्लिष्टा समाश्रिता स्यात्। तद्वरं 'यदाजिमीयुस्तदाज्यानामाज्यत्वम्' इत्यादिवाक्यशेषावगतयोगाश्रयणेन नामधेयत्वमङ्गीकृतमिति न गुणविधित्वाध्यवसानम्। रूढत्वाच्च नामधेयत्वमपि न स्वभ्यवसानम्।

घृतस्य करणत्वासंभवात्। न द्वितीयः; घृतप्रकाशकानां विधान्तरेण घृतसंबन्धिनां वा स्तोत्रसाधनानां मन्त्राणामदर्शनात्। अत्रैव वाक्ये प्रदेशान्तरस्थितघृतप्रकाशकमन्त्राणां स्तोत्रसाधनत्वविधानस्यैतत्प्रदेशान्नातस्तोत्रसाधनमन्त्राणा घृतसंबन्धस्य वाऽभ्युपगमे गौरवाच्च उत्पत्तिवाक्ये गुणविधिनिर्णयो न भवतीत्यर्थः। ननु स्तोत्रसाधकेषु द्वादशसु मन्त्रेषु द्वितीयचतुर्थमन्त्रौ 'घृतेन वर्धयामसि' इति 'घृतैर्गव्यूतिमुक्षतम' इति च घृतप्रकाशकाविति तत्संबन्धादजहल्लक्षणया गृहीतानां तेषां विधान स्यादिति चेत्, न. बहिष्पवमानस्तोत्रसाधनानां 'उपास्मै गायता नरः' इत्यादीनां नवानामाम्नानानन्तरमाम्नातानाम् 'अग्न आयाहि वीतये' इत्यादीनां त्रिचतुष्टयात्मकानां तेषां मन्त्राणां बहिष्पवमानानन्तरकर्तव्येषु चतुर्ष्वप्याज्यस्तोत्रेषु यथासंख्याम्नानलक्षणेन क्रमेणैव अन्वयसिद्धया तद्विधानानपेक्षणादिति भावः। तद्वरमिति। विधिवाक्यगतस्य आज्यपदस्य रूढ्यर्थो यदि करणत्वेनान्वययोग्यः स्यात्, यदि वा [1]करणत्वान्वययोग्याः घृतसंबन्धिनो विधातव्या मन्त्रा लभ्येरन्, तदा विधिवाक्यश्रुतपदरूढेः प्रोद्गातृन्यायेन (मी. अ. ३. ५. ७) रूढिपूर्वकलक्षणायाः प्रावल्यादर्थवादार्पितो यौगिकार्थो नादरणीयः स्यात्। अत एव आपस्तम्बेन 'यो ब्रह्मवर्चसकामः स्यात्तस्मा एतां दर्शपूर्णमासाभ्यामिष्ट्वा अमुमेवादित्यं स्वेन भागधेयेनोपधावति' (तै. सं. २. १. ४) इति श्रुते दर्शपूर्णमासपशुके काम्यपशुबन्धविधिवाक्ये देवताश्रवणाभावात् 'दर्शपूर्णमासौ देवतामीमांसा' इत्युपक्रम्य 'आदित्या स्थात्प्राजापत्या वा' इत्यादिना अर्थवादसमर्पितादित्यो वैषां [illegible] स्यात्; प्राजापत्य कदुमालभेत' (तै. सं. २. १. ४) इति तेषु दशमस्य पशोः प्राजापत्यत्वश्रवणान्नैषोपाधौ [illegible] प्रजापतिर्देवता इत्यादि(पक्षान्तरेषूक्तेष्वेते) बहवः पक्षा देवताश्रवणरहितेषु [illegible] देवताग्रहणोपायत्वेन न्यायव्युत्पादनार्थं सूत्रकृतोक्ताः। दर्शपूर्णमासाभ्यामादितो नवाना पशूनां इन्द्रा दृश्य [illegible] 'वालेन्द्रानालभेत' इति शाखान्तरगते विधौ तथाश्रवणादिति स्वशाखागतमप्यर्थवादमनादृत्य शाखान्तरगतविध्यनुसारेण देवतानिर्णयं चक्रुर्न्यायाभिज्ञा व्याख्यातारः। इह त्वर्थवादानादरहेतुभावात् प्रत्युत तृतीयार्थभूताज्यप्राप्तिपरिकार्थगतकरणतानुग्राहकत्वाच्च तदर्पितयौगिकार्थग्रहणमेव युक्तमित्यर्थः। यद्यपि 'रथघोषेण माहेन्द्रस्तोत्रमुपाकरोति' इति तृतीयाश्रुत्या रथघोषस्य वाजपेयगतमाहेन्द्रस्तोत्रोपाकरणे कालोपलक्षणतयैव घृतस्यापि 'अग्निमुपनिधाय स्तुवीत' इति विहिताग्निवत्पुरतोऽवस्थानेन करणत्वमाज्यैरिति तृतीयाश्रुत्या अत्रोच्यत इति कथंचिदुपपाद-

---

1. करणत्वानन्वययोग्यः

मुष्टिभिरिति । कुलिशपातवद्वज्रप्रहारवन्निष्ठुरैः कठिनैः 'कुलिशं भिदुरं पविः' इत्यमरः। मुष्टिभिः साधनैः, 'हस्तो मुष्ट्या तु बद्धया' 'निष्कनिष्ठेन मुष्टिना' इति चामरसिंहेन लिङ्गद्वयस्य प्रदर्शितत्वाद्वा मुष्टिशब्दः पुलिङ्गः । पीवराभ्यामूरुभ्यां भुजयन्त्रेण च यानि पीडनानि तैः, परुषं निष्ठुरं निशाचरं आदिपूरुषो विष्णुः मधुं दैत्यमिव मारुतिर्भीमो निष्पिपेष चूर्णितवान् ॥

उन्मिषत्युषसि तस्य रक्षसो रक्तमुष्णमिव पातुमुत्सुकाः ।
स्वापमाकलितमानिशात्ययं वासवृक्षमिव तत्यजुः खगाः ॥ २९ ॥

उन्मिषतीति । उषसि प्रत्यूषे 'प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि' इत्यमरः । उन्मिषति किंचित् प्रकाशमाने सति खगा विहगाः, 'शकुनिर्विहगो खगः' इत्यमरः । तस्य रक्षसो हिडिम्बस्य उष्णं रक्तं पातुमुत्सुका उद्युक्ता इव आनिशात्ययं निशावसानपर्यन्तं आकलितमारब्धं स्वापं निद्राम्; 'स्यान्निद्रा शयनं स्वापः' इत्यमरः । वासवृक्षमाश्रयद्रुमिव तत्यजुः, वासवृक्षं स्वापमपि मुमुचुरित्यर्थः ॥ २९ ॥

तावदुच्छ्रितकरस्तमोमयं राक्षसं विशकलय्य भानुमान् ।
भीमसेन इव पार्थमानसान्यम्बुजानि ददृशे विकासयन् ॥ ३० ॥

तावदिति । उच्छ्रितकरः उच्छ्रितकिरणः 'बलिहस्तांशवः करः' इत्यमरः । तम एव तमोमयम्, स्वार्थे मयट् । राक्षसं विशकलय्याम्बुजानि पद्मानि विकासयन् भानुमान् भास्कर इव ददृशे दृष्टः । सूर्योऽप्युदित इत्यर्थः ॥ ३० ॥

मन्मथार्तिमुदिता हिडिम्बया धर्मसूनुरुपलभ्य मातृतः ।
स्वीकृतं मधुररूपया तया भीममाप्रसवमादिशत्सुधीः ॥ ३१ ॥

मन्मथेति । सुधीर्विद्वान् धर्मसूनुर्युधिष्ठिरः हिडिम्बयोद्दीपितामुत्कां मन्मथार्तिं मदनपीडां मातृतः जनन्याः सकाशात् उपलभ्य ज्ञात्वा 'आख्यातोपयोगे' इत्यपादानसंज्ञायां पञ्चमी । मधुररूपया मनोहरमूर्त्या तया हिडिम्बया स्वीकृत परिगृहीत भीममाप्रसव प्रसूतिपर्यन्तम्, मर्यादायामव्ययीभावः । 'प्रसवो गर्भमोचने' इत्यमरः, आदिशत् आज्ञापितवान्; गर्भोत्पत्तिपर्यन्तं हिडिम्बां परिगृह्णीत्यादिष्टवानित्यर्थः ॥ ३१ ॥

संविदा मुदितया तया सह प्रस्थिता निहतरक्षसो वनात् ।
शालिहोत्रसरसि स्थितिं व्यधुस्ते पराशरसुतेन मानिताः ॥ ३२ ॥

संविदेति । संविदा युधिष्ठिरोक्तया प्रतिज्ञया 'संविदुद्दे प्रतिज्ञायाम्' इति विश्वः । मुदितया हृष्टया तया हिडिम्बया सह निहतं रक्षो यस्मिंस्तत्तथोक्तम्, तस्माद्धेतोः, 'ध्रुवमपाये-ऽपादानम्' इत्यत्र हेतुसंज्ञा । प्रास्थताः प्रचलिताश्चेते पाण्डवाः परागरसुतेन हितोपदेशार्थमागतेन व्यासेन मानिताः सत्कृताः सन्तः शालिहोत्रस्यर्षेः शालिहोत्रस्य सरसः समीपे; सामीप्ये सप्तमी । स्थितिं वसतिं व्यधुः चक्रुः । क्विपूर्वाद्धातोर्लोडि 'यातिस्था' इति मिचो लुक् । स्थितिमित्यत्र 'स्थागापापचो भावे' स्त्रियां क्तिन् । 'यातिस्थानिमास्थामित्ति किति' इति इत्त्वम् ॥ ३२ ॥

संगता पवनसूनुना दिवा स्वप्रभावरचितेषु वेश्मसु ।
नक्तमन्तिकगता निशाचरी कुन्तिभोजतनयामुपाचरत् ॥ ३३ ॥

संगतेति । दिवा दिवसे स्वप्रभावरचितेषु स्वसामर्थ्यनिर्मितेषु वेश्मसु गृहेषु पवन-सूनुना भीमेन सगता युक्ता सती, नक्तं रात्रौ अन्तिकगता कुन्तीसमीपवर्तिनी निशाचरी हिडिम्बी कुन्तिभोजतनयां कुमारीं कुन्तीं उपाचरत् सेवितवती ॥ ३३ ॥

काननेषु मृगनाभिगन्धिषु क्ष्माधरेषु मणिचित्रभानुषु ।
तत्र तत्र रमयांबभूव सा तं पुरूरवसमुर्वशी यथा ॥ ३४ ॥

काननेष्विति । सा हिडिम्बा मृगनाभिगन्धिषु कस्तूरीपरिमलवत्सु, 'मृगनाभिर्मृगमदः कस्तूरी च' इत्यमरः । काननेषु वनेषु मणिभिर्विचित्राणि नानावर्णानि भानूनि प्रस्थानि येषां तेषु । 'स्तुः प्रस्थः सानुरस्त्रियाम्' इत्यमरः । क्ष्माधरेषु पर्वतेषु तत्र तत्र तेषु तेषु प्रदेशेषु तं भीमसेनं उर्वशी स्वर्वेश्या पुरूरवसं यथा यथाशब्द उपमानवाचकः । यथाऽऽह-दण्डी— 'इववद्वायथा-शब्दाः' इति । रमयांबभूव रमयामास ॥ ३४ ॥

शक्रशस्त्रपतनार्हवत्सलं मारुतस्य तनयान्महोजसम्.[1] ।
प्रापदात्मजनसौ घटोत्कचं भूर्यथा नरकनादिवोत्रिणः ॥ ३५ ॥

शक्रेति । असौ हिडिम्बा महौजसः महाबलान्मारुतस्य तनयात् भीमसेनात् शक्र-शस्त्रस्य शक्तिनाम्न इन्द्रायुधस्य पतनस्यार्हं योग्यं वक्षो यस्य तं घटोत्कचं घटोत्कचाख्यमात्मजं पुत्रं भूर्भूमिः आदिपोत्रिणः आदिवराहात् । 'वराहः सूकरो घृष्टः कोलः पोत्री किरिः किटिः' इत्यमरः । नरकं यथा नरकाख्यमसुरमिव प्रापत प्राप्तवती । वराहरूपिणो जनार्दनस्य संसर्गात् भूमे-र्नरकासुरो जात इति पुराणप्रसिद्धिः ॥ ३५ ॥

---

1. महीयसः

[1]जातमात्रपरिपुष्टविग्रहः श्मश्रुलेन स मुखेन दंष्ट्रिणा ।
इष्टकर्मसु पुरा करोमि वः साह्यमित्यनुगतम्बया ययौ ॥ ३६ ॥

जातमात्रेति । जातमात्रः जात एव परिपुष्टविग्रहः प्रवृद्धकायः श्मश्रूणि मुखरोमाणि अस्य सन्तीति श्मश्रुलः, सिध्मादित्वाल्लच् । तेन दंष्ट्रिणा दंष्ट्रावता, ब्रह्मादित्वादिनेप्रत्ययः । मुखेनोपलक्षितः स घटोत्कचः वो युष्माकमिष्टकर्मसु ईप्सितव्यापारेषु साह्यं सहायं करोमि ब्रह्मणादित्वात् ष्यञ् । पुरा करोमि करिष्यामि । 'यावत्पुरानिपातयोर्लट' भविष्यार्थे लट् । इत्युक्तेरित्यर्थः । तया हिडिम्बया अनुगतः सन् ययौ । 'सद्योपलब्धिर्गर्भस्य सद्यः प्रसव एव च । प्रसूत एव हि जातस्य मातुरेव समं वयः ॥' इति उत्तररामायणे गौरीप्रियेण चन्द्रशेखरेणासुराणां करस्य उक्तत्वात् घटोत्कचोऽपि जातमात्रपरिपुष्टविग्रह इत्युक्तम् ॥ ३६ ॥

भूसुराकृतिभृतः क्रमेण ते वेत्रकीयपुरमेत्य कस्यचित् ।
आलये विदधुरग्रजन्मनो वासमाचितभैक्षवृत्तयः ॥ ३७ ॥

भूसुरेति । भूसुराकृतिभृतः द्विजवेषधारिणः 'द्विजातयस्तु भूदेवब्राह्मणाः' इत्यमरः । ते पाण्डवाः क्रमेण पर्यायेण वेत्रकीयं वेत्रकीयाख्यं पुरमेकचक्रनगरमित्यर्थः । एत्य प्राप्य कस्यचिदग्रजन्मनो ब्राह्मणस्य 'ज्यष्ठभ्रातर्यमजन्मा ब्राह्मणे चापि' इति रत्नमालायाम् । आलये गृहे भिक्षाणां समूहो भैक्षम्; 'तस्य समूहः' इत्यनुवृत्तौ 'भिक्षादिभ्योऽण्' 'भैक्षं भिक्षाकदम्बकम्' इत्यमरः; तेन वृत्तिर्जीवनं, 'वृत्तिर्वर्तनजीवनम्' इत्यमरः । आचिता विहिता भैक्षवृत्तिर्यैस्ते तथोक्ताः सन्तः वासं स्थितिं विदधुः चक्रुः ॥ ३७ ॥

तत्र जातु परिरभ्य पुत्रकौ भर्तुरङ्कभुवि शोचतः स्थितौ ।
पृच्छति स्म रुदतीं द्विजाङ्गनां शोकहेतुमुपसृत्य यादवी ॥ ३८ ॥

तत्रेति । तत्र गृहे जातु कदाचित् शोचतो रुदतः भर्तुरङ्कभुवि उत्संगप्रदेशे स्थितौ, पुत्रश्च दुहिता च पुत्रौ परिरभ्यालिङ्गय 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इति पुत्रशब्दशेषः । 'पुत्रौ पुत्रश्च दुहिता च' इत्यमरः । रुदतीं क्रन्दन्तीं द्विजाङ्गनां द्विजपत्नीं यादवी कुन्ती उपसृत्य उपगम्य शोकहेतुं दुःखकारणं पृच्छति स्म पप्रच्छ ॥ ३८ ॥

तां जगाद गृहमेधिनो वधूरन्तिकेऽस्य नगरस्य दारुणः ।
दुर्दमो बक इति श्रुतस्तटे यामुने वसति कोऽपि क्षौणपः ॥ ३९ ॥

---

1. जातमात्रपरिवृद्धविग्रहः

तामिति । गृहमेधिनो गृहस्थस्य वधूर्जाया तां कुन्तीं जगाद । किमित्याह— अस्य नगरस्य वेत्रकीयपुरस्यान्तिके समीपे दारुणो भीषण. दुर्नमो दुर्धर्ष. बक इति श्रुत: अवधृत: प्रसिद्ध इति यावत् । 'श्रुतं शास्त्रावधृतयो:' इत्यमर: । 'पुष्पभेदे बकं रक्षःपक्षियक्षवगा बका:' इति रत्नमालायाम् । कोऽपि कश्चित् कौणपो राक्षस: 'रक्षस: कौणप: क्रव्यात्' इत्यमर: । यामुने यमुनासंबन्धिनि तटे तीरे वसति तिष्ठति ॥ ३९ ॥

पूर्वमत्र गृहमेधिनोऽमुना बाधिता बलवतक्षता नरान् ।
प्रत्यहं प्रतिगृहं क्रमेण नैस्तृतयंऽस्य पुरुषः कृतो बलिः ॥ ४० ॥

पूर्वमिति । अत्र पुरे पूर्वं प्राक् बलवत सुष्ठु 'बलवत सुष्ठु किमुत' इत्यमर: । नरान् पुरुषानभता भक्षयताऽमुना बकासुरेण गृहमेधिनो गृहस्था बाधिता: पीडिता. । नैर्गृहस्थैस्तस्य बकासुरस्य तृप्तये क्रमेण पर्यायेण दिने दिने प्रत्यहं 'अनअ' 'नपुंसकादन्यतरस्याम्' इति अव्ययीभावे समासान्तष्टच् । गृहे गृहे प्रतिगृह पुरुषो बालभागधेय: कृत: 'भागधेयो बलि: कर:' इत्यमर: ॥

तेन वेतनमिदं द्विजास्पदं रक्षसा भुजबलेन लभ्यते ।
भागधेयविरहेण नः क्रमाद्भागधेयदिवसोऽयमागत. ॥ ४१ ॥

तेनेति । तेन रक्षसा बकासुरेण इद द्विजास्पदं ब्राह्मणस्थानं वेतनं भृति: 'कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनं' इत्यमर. । भुजबलेन बाहुपराक्रमेण लभ्यते, भृतित्वेन प्राप्यत इत्यर्थ: ॥ ४१ ॥

पुत्रकस्तु कुलनन्तुरेष मे कन्यका यदि परस्वमुच्यते ।
भर्तुरस्य विषहे न विप्लवं मामयं च न दहात्नि मृत्यवे ॥ ४२ ॥

पुत्रक इति । एतेन पुत्रस्यादेयत्वमुक्तम् । कन्यका यदि कुमारी विद्यत इति चेत् परस्वं परधनमित्युच्यते । 'स्योऽस्त्रियां धने' इत्यमर: । 'अर्थो हि कन्या परकीय एव' इति शाकुन्तलादित्यर्थ: । एतेन कन्याया अप्यदेयत्वमुक्तम् । अस्य भर्तुर्निष्फलं नाशं न विषहे न क्षमे । सहेर्लेटि उत्तमपुरुषैकवचनम् ; 'परिनिविषेभ्य:' इति षत्वम् । एतेन भर्तुरदेयत्वमुक्तम् । सर्वेऽपि विप्लवन्तु त्वं बलिर्भवेत्यत आह— मामिति । अथ च अयं मां च मृत्यवे न दहात्, त्रयाणामप्याधारत्वादित्यर्थ: ॥ ४२ ॥

अनेन कश्चित्पुरुष: क्रीत्वा बलि: क्रियतामित्यत आह—

क्रतुमद्य पुरुषं न मे धनं केन निस्तरणमापदो भवेत् ।
इत्युदीरितगिरं यथापुरं दुःखितामिति जगाद तां पृथा ॥ ४३ ॥

क्रेतुमिति । अद्य पुरुषं क्रेतुं द्रव्यविनिमयेन स्वीकर्तुं मे मम धनं नास्ति, दारिद्र्यादिति भावः । केन प्रकारेणापदो निस्तरणमतिक्रमण भवेदित्येवमुदीरितगिरमुक्तवाचं यथापुरं यथापूर्वं दुःखितां तां ब्राह्मणीं पृथा कुन्ती इति वक्ष्यमाणं जगाद ॥ ४३ ॥

कश्चिदस्ति तनयेषु मे बली तं ददामि सखि ते बलिं कुरु ।
मान्त्रिकः स हतराक्षसः पुरा दुर्दमं बकममुं हनिष्यति ॥ ४४ ॥

कश्चिदिति । हे सखि हे आळि, 'सख्यशिभ्यीति भाषायाम्' इति निपातनात् ङीष् । 'अम्बार्थ' इति ह्रस्वः । मे तनयेषु मध्ये बली बलवान् । मत्वर्थीय इनिः । कश्चित्तनयोऽस्ति । तं ते तुभ्यं ददामि प्रयच्छामि । दद्यातेर्लेटि मिप् । बलिमुपहारं कुरु, 'बलिः पूजोपहारे च' इत्यमरः । करोतेर्लोटि सेर्हिरादेशः । 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुक् । कथमात्मजं बलिं ददासीत्यत आह— मान्त्रिकः, जपमात्रेण फलदो मन्त्रः ; 'वेदभेदे गुप्तवादे मन्त्रः' इत्यमरः । तं वेत्तीति मान्त्रिकः । द्व्यजित्यादिना ठक् । अत एव पुरा पूर्वं हतराक्षसः मारितहिडिम्बः सः पवनतनयः दुर्दमं दुरुपशमं अमुं बकं हनिष्यति हिंसिष्यति । 'ऋदृनोः स्ये' इतीडागमः ॥ ४४ ॥

तद्वचःश्रवणतः सविस्मयौ दम्पती धृतमुदौ बभूवतुः ।
मातृशासनकरश्च मारुतिः संजहर्ष समरे समुत्सुकः ॥ ४५ ॥

तदिति । तद्वचःश्रवणत कुन्तीवाक्यश्रवणात्, पञ्चम्यास्तसिल् । सविस्मयौ साश्चर्यौ दम्पती जायापती 'जायाया दंभावजंभावौ वक्तव्यौ' इति दंभावः । 'दम्पती जम्पती जायापती' इत्यमरः, धृतमुदौ धृतानन्दौ बभूवतुः । मातुः कुन्त्याः शासनकरः आज्ञाकरणशीलः । 'कृत्यो हेतुताच्छील्ये' इति टप्रत्ययः । मारुतिः भीमश्च समरे रणे समुत्सुकः उद्युक्तः सन् संजहर्ष संतुतोष ॥

तं हिडिम्बवधदृष्टविक्रमैर्भ्रातृभिर्बहुमतोद्यमं रहः ।
विस्मितैर्निजजनैरुपर्युपर्यन्नमर्पितमभोजयद्द्विजः ॥ ४६ ॥

तमिति । हिडिम्बवधे दृष्टविक्रमैर्भ्रातृभिः रहो रहसि बहुमतोद्यमं प्रशंसितोद्योगमङ्गीकृतोद्योगमित्यर्थः । तं वृकोदरं द्विजः विस्मितैर्निजजनैः उपर्युपर्यर्पितमन्नं अभोजयत् भोजयामास । गतिबुद्धीत्यादिना अन्यन्तकर्तुः कर्मत्वम् । 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदम् ॥ ४६ ॥

रक्तमाल्यवसनानुलेपनः पौरलोचनकृतोत्सवः पुरात् ।
पूरितं शकटमोदनादिभिर्युक्तधुर्यमधिरुह्य निर्ययौ ॥ ४७ ॥

रक्तेति । रक्तानि रक्तवर्णानि माल्य माला वसनं वस्त्रमनुलेपनं चन्दनादिकं च यस्य सः । 'माल्यं मालाम्बुजौ मूर्ध्नि' इत्यमरः । पौरलोचनानां कृतः उत्सवो येन सः पौरलोचनकृतोत्सवः स भीमः ओदनादिभिरन्नादिभिः, आदिशब्देन अपूपादिक गृह्यते; पूरित भरितं, धुरं वहन्तीति धुर्या बलीवर्दाः । 'धुरो यत्' इत्यादिना यत् । 'धूर्वहो धुर्यधौरेय...' इत्यमरः । युक्ताः सयुक्ताः धुर्या यत्र तच्छकटमधिरुह्य पुरान्निर्ययौ निर्गच्छति स्म ॥ ४७ ॥

कङ्कजम्बुककदम्बकाकुलैराचितं नरकरङ्कराशिभिः ।
झिल्लिकामुखरसालमासदत्पूतिगन्धि पुरुषादकाननम् ॥ ४८ ॥

कङ्केति । कङ्काः लोहपृष्ठाः पक्षिविशेषाः । 'लोहपृष्ठस्तु कङ्कः स्यात्' इत्यमरः । जम्बुकाः शृगालाः; 'शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः' इत्यमरः । तेषां कदम्बकं वृन्दं; 'स्त्रियां तु संहतिर्वृन्द निकुरुम्ब कदम्बकम्' इत्यमरः । तेनाकुलैराकीर्णैः नरकरङ्कराशिभिः नराशिरोऽस्थिकूटैराचित व्याप्तं । 'करङ्को मस्तकाग्निश्च स्यात् नालिकेरफलेऽपि च' इति रत्नमालायाम् । झिल्लिकाभिः भृङ्गारीभिः । 'भृङ्गारी चीरुका चीरी झिल्लिका च समा इमाः' इत्यमरः । मुखरसालं शब्दायमानवृक्षं पूतिगन्धि दुर्गन्धवत् ; 'गन्धस्येत्' इतीकारः समासान्तः । पुरुषादस्य नराशनस्य काननं कर्म, भीमः आसदत् आससाद । सदेर्लुङि च्लेश्चिण्वादङ् ॥ ४८ ॥

कौणपे तु निहते मया ननो नैव भोक्तुमुचितं शवस्पृशा ।
वीतभीरिति विचिन्त्य तद्बलिं भोक्तुमारभत मारुतात्मजः ॥ ४९ ॥

कौणपेति । कौणपे राक्षसे निहते तु सति शवस्पृशा कुणपस्पृशा मया भोक्तुं नैवोचितं न युक्तमिति विचिन्त्य वीतभीर्निर्भयः मारुतात्मजः तद्बलिं तमुपहारं भोक्तुमारभत आरब्धवान ॥ ४९ ॥

स्वैरमभ्यवहरन्ननोगतः प्रौढमट्टहसितं चकार सः ।
घट्टयंश्च दशनान्मिथः क्रुधा निर्ययौ गिरिगुहाशयो बकः ॥ ५० ॥

स्वैरमिति । अनः शकटं गतः स भीमः 'क्लीबेऽनः शकटोऽस्त्री स्यात्' इत्यमरः । स्वैरं यथेच्छमभ्यवहरन् भक्षयन् प्रौढं प्रगल्भ अट्टहसित अट्टहासं चकार । गिरिगुहायां शेते इति गिरिगुहाशयः । 'अधिकरणे शेतेः' इत्यच् । बकश्च मिथः परस्पर क्रुधा कोपेन दशनान् दन्तान् ; 'रदना दशना दन्ताः' इत्यमरः । घट्टयन् पीडयन्, दन्तैर्दन्तान्निष्पीडयन्नित्यर्थः । निर्ययौ निर्जगाम ; गुहाया इति शेषः ॥ ५० ॥

कौणपेन कुपितेन पातिताः पार्श्वयोरसकृदस्य मुष्टयः ।
प्रत्युतोदरभुवि श्लथस्थितिं संहतां कवलसंहतिं व्यधुः ॥ ५१ ॥

कौणपेनेति । कुपितेन कौणपेन राक्षसेन बकेन अस्य भीमस्य पार्श्वयोरसकृद्बहुशः पातिताः वधार्थं पातिताः मुष्टयः प्रत्युत वैपरीत्येन उदरभुवि कुक्षिप्रदेशे श्लथस्थितिं शिथिलावस्थितिं कवलानां ग्रासानां ओदनपिण्डानामिति यावत्; संहतिं समूहं 'ग्रासस्तु कवलार्थकः' इत्यमरः । संहतां संश्लिष्टां व्यधुश्चक्रुः । यथा लोके धान्यादिपूरितं प्रस्थादिकं पार्श्वयोर्घट्टित पुनरप्यधिकधान्यप्रक्षेपार्थं लब्धावकाशं भवति तद्वदिति भावः । अपकारोऽप्युपकारो जात इति भावः ॥ ५१ ॥

अन्तिकस्थमनवेक्ष्य राक्षसं भूय एव बुभुजे स तद्बलिम् ।
किं महेभपिशिताशिनो ऽथवा विद्यते मृगपतेः सृगालतः ॥ ५२ ॥

अन्तिकेति । सः भीमः अन्तिकस्थं समीपवर्तिनं राक्षसं अनवेक्ष्य अगणयित्वेत्यर्थः । तद्बलिं भूय पुनरेव बुभुजे अभ्यवहृतवान् । 'भुजोऽनवने' इत्यात्मनेपदम् । महान्तं राक्षसमविगणय्य कथ भुक्तवानित्यत आह—महेभपिशिताशिनो महागजमांसभक्षकस्य मृगपतेः सिंहस्य । 'पतिः समास एव' इति षिसञ्ज्ञायां 'घर्ङिति' इति गुणः । 'ङसिङसोश्च' इति पूर्वरूपत्वम् । सृगालतो जम्बुकाद्भय विद्यते किम्? नास्त्येवेत्यर्थः । 'विद सत्तायाम्' इत्यस्मात् दैवादिकात् कर्तरि लट् ॥ ५२ ॥

अस्तशङ्कमखिलस्त्वया वटो भुज्यतां बलिरयं क गच्छति ।
न्यस्यते जठर एव तावके त्वां ग्रसामि सह तेन नन्वहम् ॥ ५३ ॥

अस्तेति । हे वटो हे माणवक, अस्तशङ्कं त्यक्तभयं यथा भवति तथा अखिलो बलिर्भुज्यताम् । कर्मणि लोट् । अय बलिः क गच्छति, कुत्रापे न गच्छतीत्यर्थः । किंतु, तावके त्वत्संबन्धिनि जठरे कुक्षावेव 'पिचण्डकुक्षिजठर ..' इत्यमरः । न्यस्यते निक्षिप्यते । कर्मणि लट् । अहं तेन बलिना सह त्वां ग्रसामि ननु भक्षयाम्येव । 'प्रश्नावारणानुज्ञानुनयामन्त्रेषु ननु' इत्यमरः । चक्षिङो क्ष्त्रिकरणज्ञापकेन अनुदात्तेतामात्मनेपदस्यानित्यत्वाद्त्र ग्रसतेः परस्मैपदम् ॥

इत्युदीरितमनेन भाषितं सस्मितं निशमयन्वृकोदरः ।
स्वैरमभ्यवहृतेरनन्तरं प्रत्युवाच परिमार्जितोदरः ॥ ५४ ॥

इतीति । इति इत्थमनेनोदीरितं भाषितं वाक्यं सस्मितं निशमयन शृण्वन वृकोदरः स्वैरं यथेच्छमभ्यवहृतेर्भोजनादनन्तरं परिमार्जितोदरः परिमृष्टजठरः सन्; 'विष्णुरत्ता यथैवान्नं

पारिणामश्च वै यतः। सत्येन तेन मद्भक्तं जीर्यत्वन्नमिदं तथा॥ इत्युच्चार्य स्वहस्तेन पारमार्थ्यं तथोदरम्।' इति विष्णुपुराणे स्मरणादिति भावः ॥ ५४ ॥

यन्नृशंस भवता नृणां वधादूर्जितं जगति शौर्यमार्जितम्।
शक्तिरस्ति यदि [1]तत्प्रदर्श्यतां मानुषे मयि हिडिम्बमर्दने ॥ ५५ ॥

यदिति। नृशंस, भवता त्वया नृणां मनुष्याणां वधात् निग्रहात् आर्जितं सपादितं ऊर्जितं प्रभूतं यच्छौर्यमस्तीति शेषः। शक्तिः, सामर्थ्यमस्ति यदि विद्यते चेत्, मानुषे मनुष्ये; एतेनात्मनो दौर्बल्यं सापहास्यं सूचयति। 'मनोर्जातौ' इत्यच्, युगागमश्च। हिडिम्बमर्दने हिडिम्बहन्तरि। एतेन स्वशौर्यं सूचयति। मयि विषये तच्छौर्यं प्रदर्श्यतां दर्शितं भवतु। दृशेर्ण्यन्तात् कर्मणि लोट् ॥ ५५ ॥

उद्धृतं तदनु सालमक्षिपन्मारुतेरुपरि यामिनीचरः।
धूतपत्रपटलं कृतारवं केलिपत्रिणमिवाग्रहीत्स तम् ॥ ५६ ॥

उद्धृतमिति। तदनु तदनन्तरं यामिनीचरो निशाचरः उद्धृतं स्वयमेवोत्पाटितं सालं द्रुमं, 'द्रुमप्राकारयोः सालः' इति विश्वः। मारुतेर्भीमस्योपरि; 'षष्ठ्यतसर्थ...' इति षष्ठी। अक्षिपत्क्षिप्तवान्। स भीमः धूतपत्रपटलं कम्पितपर्णसमूहम्; अन्यत्र कम्पितपक्षपटलं कृतारवं कृतस्वनं तं सालं केलिपत्रिणं क्रीडाशकुन्तमिवाग्रहीत् जग्राह। 'पतत्रिपात्रिपतग...' इत्यमरः। अनायासेन जग्राहेत्यर्थः ॥ ५६ ॥

तावुभौ च विपुलोपलोत्करौ तालसालकृतमालवर्षिणौ।
मुष्टियुद्धपरिनिष्ठितौ मिथः खेचरस्तुतिपदं बभूवतुः ॥ ५७ ॥

ताविति। विपुलाना बृहतामुपलाना पाषाणानां। 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला इषत्' इत्यमरः, उत्करौ विक्षेपकौ। 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः। किं च, तालाः तृणराजाः; 'तृणराजाह्वयस्तालः' इत्यमरः। सालाः सर्जकाः 'साले तु सर्जकाह्वयाश्वकर्णकाः' इत्यमरः। कृतमालाः सुपर्णका नाम वृक्षविशेषाः। 'आरेवतव्याधिघातकृतमालसुपर्णकाः' इत्यमरः। तान्वर्षयितुं शीलं ययोरस्तीति तौ तथोक्तौ, मिथः अन्योन्य मुष्टियुद्धे परिनिष्ठितौ व्याप्तौ तावुभौ भीमबकौ खे चरन्तीति खेचराः. 'चरेष्टः' इति टप्रत्ययः, 'तत्पुरुषे कृति' इत्यलुक्। तेषां खेचराणां देवानां स्तुतेः साधुवादस्य पदं स्थानं बभूवतुः देवैः स्तुतावित्यर्थः ॥ ५७ ॥

---

1. प्रकाश्यतां

चमल्लिकासुरभिमालिकाविताननसौरभसमापतदुन्मदनदन्मधुकरनिकरझाङ्करणविराविनं विमलमणिकन्दीपमालिकालंकृतं सुगन्धगन्धवर्तिकाधूपधूपितं कलधौतकाण्डदीर्घिकाशतसंकुलं निरवधिकाह्लादनिदानमतिविशालं पूजामण्टपम्, पूतमासनमध्यमध्यास्य, पुरस्तन्मध्यविहितस्य शरदुपगतोदयराकासुधाकरसृष्टचन्द्रिकासारगौरधौतकलधौतनिर्मितधरण्यन्ताधारतत्त्वपृष्ठप्रतिष्ठितस्य शिवदासजनसिन्धुरमदमन्थरदशकंधरापिचण्डदोर्भुजमण्डमण्डलीसमुत्तम्भितस्य नंक्रन्दनमुखदिशाबृन्दारकबृन्दकन्दलितस्तोभस्य सिन्धुरमुखशिखिवैनीतकप्रतियातनासनाथस्य नन्दिभृङ्गिमहाकालादिपशुपतिपार्षदपरिवृढानेकविरोजितस्य महतः कैलासशैलस्य उपरिष्टान्निष्टतचामीकरनिर्मितस्य नगनैर्मल्यातिरेकेण परितो बिम्बितैरनेकैरात्मनः प्रतिबिम्बैः संतानकतरुवाटिकासंगतिमुपसूचयतः कल्पभूरुहस्य मूलतले नितान्तशाणोपलसमालीढनवमणिसमुदयविस्मरबहुलधामधवलधलितसभान्तराले समुन्नमित-

---

निष्कल्मषचन्द्रिका ; 'निर्णिक्तं शोधितं मृष्टम्' इत्यमरः । धौतकलधौतेन शुद्धरजतेन ; 'कलधौतं रूप्यहेम्नोः' इत्यमरः । धरण्यन्ताधारतत्त्वानां अव्यक्ततत्त्वादिपृथिव्यन्तानां आधारतत्त्वानां पृष्ठे उपरिभागे ; 'तत्त्वं विलम्बमाने स्यात्स्वरूपे परमात्मनि' इति रत्ने । शिवदाससिन्धुरस्य शिवभक्ताग्रेसरस्य, समुत्तम्भितस्य रावणभुजमण्डलोन्नतिस्य ; दिशाबृन्दारकाणां दिग्देवतानां ; सिन्धुरमुखः गजमुखः, शिखी वैनीतकं वाहनं यस्य सः स्कन्दः, तयोः प्रतियातना प्रतिकृतिः तत्सनाथस्य संयुक्तस्य ; 'प्रतिमा प्रतियातना' इत्यमरः । 'प्रमथाः स्युः पारिषदाः' इत्यमरः । कैलासशैलस्य उपरिष्टात् निष्टप्तचामीकरेण नितरामग्निसंतप्तसुवर्णेन निर्मितस्य ; 'चामीकरं जातरूपं महारजतकाञ्चने' इत्यमरः । नगस्य रजतपर्वतस्य नैर्मल्यातिरेकेण ; कनकनिर्मितकल्पवृक्षः एकोऽपि परितो निजप्रतिबिम्बैरनेक इव भातीति भावः । तादृशकल्पभूरुहस्य मूले नितान्तं शाणोपले समालीढानां बहुलधामभिः धवलधलितं सभान्तरालं यस्य तादृशे परमाजने इत्यन्वयः ।

भुजगराजप्रतिकृतिफणाराजिगुम्भितताम्भोजरागमणिविजृम्भत्प्रभापुञ्जकिञ्जल्किते पार्वतीरमणशिरोलालितहिमकरशकलसंपूर्णताकलनाय सुधारसधारासहस्रवर्षिणाऽमृतकरबिम्बेनेव सर्वतो लम्बमानमुक्तासरदर्शनीयेनातपत्रेण विराजितोपरिभागे कदलीगर्भदलमृदुलगुणितदिव्यपट्टांशुकनिचोलितहंसतूलपेशले पावने परमासने निधाय किमपि स्फाटिकं पारमेश्वरं लिङ्गं, परितः परमोदग्रविपुलपीठिकानिषण्णवीणाक्वणितमधुरघनघण्टाघनारवनारकण्ठस्वरभूसुरवरोच्चारितऋग्यजुषसामघोषेण, एकत्र वैणिकवीणाक्वाणेन, अपरत्र वैणविकवेणुनिनादेन, इतरत्र काम्बविककम्बुगम्भीरनादेन, परत्र मार्दङ्गिककराङ्गुलिमार्दितमर्दलध्वानेन, अन्यत्र मौरजिकमुरजमार्जनया, कुत्रचित् घाण्टिकघण्टागणघणत्कारेण, क्वचित्परिवादिनीनादपरीवाददानकुशलकुशीलवोपक्रान्तगानतानचातुर्यानुवर्तिमहेशदासप्रस्तूयमानहरशिवावर्तनकोलाहलेन निपुणतरपाणिघपाणितलास्फालनेन निरवशेषविविधवाद्यवादनाड-

---

समुन्नमितायाः भुजगराजस्य प्रतिकृतेः प्रतिमायाः फणानां राज्यां गुम्भितेभ्यः अम्भोजरागमणिभ्यः पद्मरागमणिभ्यः विजृम्भत्प्रभापुञ्जेन किञ्जल्किते संजातकिञ्जल्के प्रभाविशिष्ट इति भावः । मुक्तासरैः मुक्तासंततिभिः; हराशिरसि चन्द्रशकलमसृणधाराभिः पूरयितुं समागतः पूर्णचन्द्र इव श्वेतातपत्रं भासत इति भाव । गुणितेन द्विगुणीकृतेन पट्टवस्त्रेण निचोलितैः छादितैः हंसतूलैः पेशले मनोहरे । वीणाक्वणितमिव मधुरः घनघण्टाघनारववत् नारश्च कण्ठस्वरो येषां तैः, ऋक् च यजुश्च ऋग्यजुषं, साम च तेषां घोषेण 'ऋक् च साम च ऋक्सामं तथर्ग्यजुषमित्यपि' इति सारे । 'वीणावादास्तु वैणिकाः' 'वेणुध्माः स्युर्वैणविकाः' 'कम्बुजीवी काम्बविकः' 'मार्दङ्गिका मौरजिकाः' इत्यमरः । 'मार्जना मुरजध्वाने' इति सारे । परिवादिनीनादस्य परीवादोऽपवादः, कुशीलवैर्गायकैः, गायकानां गानतानान्यनुसृत्य शिवभक्ताः शिवनामानि कीर्तयन्तीति भावः । 'पाणिवादास्तु पाणिघाः' इत्यमरः । निरवशेषाणां निखिलानाम्, आडम्बरेण

स्वरेण च नादब्रह्ममये समये समभ्यर्च्यार्घ्यतो निरन्तरानितान्तान्तरायधराधरभेदभिदुरायितशुण्डादण्डमागलदन्तावलं देवमाचितभजमाननिखिलेहं निरीहम् ॥

तदनु निध्याय हृदि गगनतरङ्गिणीसंगतोत्तमाङ्गं सुधाकरशतावधीरणधुरीणप्रभाधवलाङ्गं नतजनवाञ्छासर्वनिर्वहणलीलाधौरेयापाङ्गं निटिलनयनानलज्वालालवशलभायितानङ्गं किसलयारुणपाणिगृहीतान्नायमयलीलाकुरङ्गं भवानीपरिकर्मितवामाङ्गं दासेरजनताधीनकरुणामृतलहरीतरलितमृदुलान्तरङ्गं मानङ्गचर्मविरचितपरिधानोत्तरासङ्गं वलयीकृतराजभुजङ्गं निगमान्तवचनैरप्यगण्यं निखिलभुवनैकशरण्यं अखिलदेवताकुलाग्रगण्यं कोटिकन्दर्पलावण्यं मनोवागतीनसौगुण्यं, बालेन्दुरेखाकृतचूडालं दरहासचन्द्रिकापूरितकपोलं जगदाभीलदुहालाहलकबलननीलगलमूलं शूलहतिनिहतकालं शरासनीकृतसानुमन्तं सायकीकृतकमलाकान्तं शताङ्गीकृतमहितानन्तं अननुचिन्तिताद्यन्तं उमाकान्तमभ्यर्चितमावाह्य शाणोल्लिखितनव-

---

तस्य पाटवेन च नादब्रह्ममये नादब्रह्मस्वरूपे; 'प्राचुर्यार्थे विकारार्थे तादात्म्यार्थे मयट् त्रिधा'। नितान्तेति । अन्तरायधराधरस्य पर्वतस्य छेदे भिदुरायितः वज्रायितः; आगलदन्तावलं गजमुखं, आचिताः पूर्णाः भजमानानां भक्तानां निखिलेहाः निखिलेच्छाः येन तं निरीहं निःस्पृहं समभ्यर्च्य, गणपतिपूजां विधायेति भावः ॥

तदनु निध्यायेति । आम्नायमयः वेदमयः लीलाकुरङ्गः यस्य तथोक्तः; परिकर्मितं अलंकृतम्; दासेरजनतायाः भक्तसमूहस्य अधीनम्; परिधानं कटिवस्त्रम्, उत्तरासङ्गं उत्तरीयम्, 'अन्तरीयोपसंव्यानपरिधानान्यधोऽशुके । द्वौ प्रावारोत्तरासङ्गौ' इत्यमरः । कृतं चूडालं शिरोऽलंकरणं यस्य तम्; 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः । शरासनीकृतः चापीकृतः सानु-

माणिक्याचितोद्यपरमासनप्रतिष्ठिते दिव्यलिङ्गे, विनीय पाद्यार्घ्याचमनीयमधुपर्कानुदर्कसिद्धिदान् श्रीरुद्रादिकान् दधिमधुघृतैक्षवक्षीरधाराभिर्वरनारिकेरादिमफलरसैरेलासिताभ्रवासितैः कनककलशसंभृतैः पूतैः पाथोभिराप्लाव्य सुवर्णाम्बरेण हरिदम्बरम्, समर्प्य यज्ञोपवीतं सुज्ञानदायै, अनुलिप्य निर्लेपं रोचनाहिमवालुकामृगमदगन्धानुबन्धिना गन्धसारेण, विरच्य मार्जारिकामदनीदलेन फाले तमालपत्रमलंकृत्य बलक्षैरक्षतैरक्षतपदप्रदर्शालकाक्षम, परिष्कृत्य कनकमणिमालूरहारैः नवमालिकारचितनवमालिकाभिर्गृहीतबर्हिष्ठैरन्यैः कमनीयकुसुमदामभिः, संपूज्य वेदसारोदितदिव्यनामान्युच्चारयन्नकीटाभिहतैरयातयामैर्मृदुलबिल्वदलैः कोमलदूर्वाङ्कुरैः दग्धिकचविर्चाकलैर्विपुलविमलकमलैः फुल्लकल्हारतल्लजैः सुन्दरेन्दीवरबृन्दैः सान्द्रचन्द्रकदलीकुसुमैः सहितमालतीजातिभिरमन्दकुन्दसंदोहैरविरतरुचिरकरवीरनिकरैः परिमलमिलदलिनवकुलैः सुजातपारिजातजातैः सौरभसंपदाधिकचाम्पे-

---

मान् मेरुपर्वतो येन तम्; शताङ्गीकृता रथीकृता महिता अनन्ता पृथिवी येन तम्; 'भूर्भूमिरचलाऽनन्ता' इत्यमरः। त्रिपुरसंहारकाले भुव रथीचकारेति कथोन्नेया। अभ्यर्चितं हृदि ध्यानपूर्वकमर्चितं स्फाटिके दिव्यलिङ्गे आधाय; 'उदर्कः फलमुत्तरम्' 'सिताभ्रो हिमवालुका' इत्यमरः। हरिदम्बरं हरिदम्बरं; 'गन्धसारो मलयजः' इत्यमरः। 'मार्जारिका वेधमुख्या मदनी गन्धवेलिका' इति साम्रः। एतयोर्मदेन तमालपत्रं तिलकम्; 'बिल्वे शाण्डिल्यशैलूषमालूरश्रीफला अपि' 'समला नवमालिका' 'बालं ह्रीबेरबर्हिष्ठादीच्यं केशाम्बुनाम च' 'जीर्णं च परिभुक्तं च यातयामामिदं द्वयम्' इत्यमरः। 'मदयन्ती विचकिलो मल्लिका' इति सारे। 'सौगन्धिकं तु कल्हारम्' 'कुब्जका चन्द्रकदली दधिपुष्पार्डकेसरा' 'सुमना मालती जातिः' 'माद्र्यं कुन्दं रक्तकरतु' इति च। सौरभसंपदा अधिकैः चाम्पेयैः। 'अथ चाम्पेयश्चम्पको हेमपुष्पकः' इति। स्फुटितानां विकसितानां पाटलकुसुमानाम्; 'दलितोन्मी-

यैरनुत्तमनीलधुत्तूरैः स्फुटितपाटलपटलैरुन्मीलितपुंनागैरकुण्ठितवैकुण्ठैरनिन्द्यगन्धनन्द्यनन्द्यावर्तैः बहुलरसनिस्यन्दम्लानशम्याकैः नमेरुदमनमरुवकभारतीदलैश्च, तपनप्रहनादिमज्योतिरान्तरमहसे समर्घ्य धूपसहकृतां दीपमालिकाम्, निवेद्य रत्नमयामत्रसंनिधापितसांकर्येण चतुर्विधमतीतामृतरसमाधुर्यसङ्गेमन्नमाहारास्वादनीयमतिशीतलोपस्कृतरुचिरपानीयं निःशेषपरिमलावासपेटिकामपि सरसवीटिकाम्, नीराज्य प्रज्वलतासमूढकर्पूरेण तपनपवनगगनदहनकुम्भिनीसलिलहिमकरयजमानमभ्यर्च्य अष्टाभिः कुसुमाञ्जलिभिः, प्रदक्षिणीकृत्य सर्वाङ्गालिङ्गितवसुंधरातलं प्रणिपत्य वरशुभमूर्तिं देवगणानन्दितकीर्तिं निरवधिकदयानुवृत्तिं शतकृत्वः समुत्थाय शिरःसंघटितकमलमुकुलाकारकरसरोजः भक्तिभारपरवशः परमानन्दसागरलहरीनिमग्नमानसो रोमाञ्चकञ्चुकितकलेबरो निरर्गलगलत्प्रमोदबाष्पावसिक्तः सन्नस्तौषीत् ॥

स्निग्धोज्ज्वल उज्जृम्भस्फुटितस्मिताः । प्रबुद्धोद्बुद्धहसिताः प्रफुल्लश्च विशेषतः' ॥ इति सारे । अकुण्ठितद्रोणकुसुमैः द्रोणकुसुमैः, 'शौण्डीर्यवैकुण्ठमहाद्रोणदेवकतुम्बिकाः' । अनिन्द्यगन्धेन सुगन्धेन च, 'नन्द्यावर्तो नमोऽङ्गणः' इति सारे । बहुरसैः तिग्मद्युतिः आर्द्रैः अम्लानशम्याकैः 'आर्द्रं स्निग्धं तिमितं स्तिमितम्' 'आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः' इत्यमरः । 'नमेरुः सुरपुंनागः' । दमनो ब्रह्मजटा, 'समीरणो मरुवकः' 'तुलसी भारती समे' इति सारे । तपनदहनादिमानां ज्योतिषां आन्तरमहसे अन्तर्ज्योतिःस्वरूपाय । धूपसहकृतां धूपसहिताम् । रत्नमयामत्रेषु पात्रेषु, 'पात्रामत्रे च भाजने' इत्यमरः । अतिशीतलमुपस्कृतमेलादिवासितं च । निःशेषपरिमलस्य समग्रगन्धस्य आवासपेटिकां निवासस्थानीयां सरसवीटिकां स्वादुवीटिकाम्, 'रसो गन्धरसे स्वादौ तिक्तादौ विषरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे ॥' इति विश्वः । 'समूढः पुञ्जिते भुग्नेऽपस्मारे च धुरंधरे' इति विश्वः । तपनाद्यष्टमूर्त्यात्मकमभ्यर्च्य शतकृत्वः शतवारं बाष्पाभिषिक्तः सन् ॥

शैलाधीशसुतापयोधरतटीसीचिल्लिकाकेलिकृ-
त्यस्या हासलवस्तमालकुसुमश्रीबन्धुरा कंधरा ।
रेखा मौलिमलंकरोति रुचिरा सौधाकरी शांकरी
मूर्निर्मन्मथजित्वरी विहरतां चेतःसरोजाङ्गणे ॥ ४३ ॥

स्वच्छन्दं जनिभृत्प्रपञ्चमखिलं निर्माय गोपायसि
प्रान्ते च्छादयसि प्रभो पशुपते भ्रूक्षेपणादप्यहम् ।
हातुं कर्तुमनार्यकर्म परवानार्यं जगद्रक्षणे
निस्तन्द्रे त्वयि तत्फले मम कथं स्वातन्त्र्यमीषद्भवेत् ॥

यः पुष्टिं नमतां परां पशुपतिर्निर्माति यस्त्र्यम्बकः
पूजामृक्ततनुवाङ्मनोभिरनिशं यस्य ब्रवीत्युत्तमा ।

शैलेति । यस्याः शंकरमूर्तेः हासलवः, पयोधरतट्यां 'सीचिल्लिका तु त्वक्पुष्पं किञ्जल्कं मिञ्जसिञ्जिनी' इति मेदे । रुचिरा सौधाकरी रेखा यस्याः मौलिं अलंकरोति । मन्मथजित्वरी शांकरी शंकरसंबन्धिनी मूर्तिः ॥ ४३ ॥

स्वच्छन्दमिति । प्रभो हे पशुपते, अखिलं जनिभृतां उत्पत्तिमतां प्रपञ्चं विस्तारं जगदित्यर्थः । 'जनिरुत्पत्तिरुद्भवः' 'विपर्याये विस्तरे च प्रपञ्चः' इत्यमरः । भ्रूक्षेपणादपि स्वच्छन्दं यथा तथा; 'छन्दः पद्येऽभिलाषे च' इत्यमरः । प्रान्ते प्रलये छादयसि आत्मनि तिरोधानं करोषि । एवं जगन्नियामके त्वयि निस्तन्द्रे सति अहं अनार्यं निकृष्टं कर्म हातुं त्यक्तुम, आर्यं कर्म कर्तुमपि परवान् अस्वतन्त्रो भवामि । तत्फले सुकृतदुष्कृतफले मम स्वातन्त्र्यं ईषद्वा कथं भवेत् ? सर्वस्य भवदधीनत्वात् सर्वस्वतन्त्रो भवानिति भावः ॥ ४४ ॥

य इति । यः पशुपतिः नमतां परां पुष्टिं निर्माति, 'सुगन्धि पुष्टिवर्धनम्' इति श्रुतेः । यस्त्र्यम्बकः, तनुवाङ्मनोभिः यस्य पूजा उत्तमा ऋक् 'तयु ष्टुहि यः स्विषुः' इति ऋक् ब्रवीति । यो रुद्रः वह्नेः अप्सु च ओषधिगणे; 'ओषध्यः फलपाकान्ताः' इत्यमरः । सर्वेषु भुवनेष्वपि

यो रुद्रो दहनेऽप्सु यौषधिगणे सर्वेष्वपि प्राविश-
द्विश्वात्मा भुवनेषु नित्यमहसे तस्मै नमः शंभवे ॥ ४५ ॥

सत्याधीशसनन्दनादिभुनिभिर्मत्या महत्या युतैः
श्रुत्या नित्यगवेषणीयमखिलैर्गत्याऽन्यया दुर्गतः ।
नित्यानन्दघनं निरन्तरमहं वृत्यादिसंविद्रसं
सत्यालिङ्गितसव्यकायमतुलापत्याशये प्रार्थये ॥ ४६ ॥

इति स्तुवन् प्रणाय चिरमनुसंदधानो जनेशानश्चिरंतनमन्तरात्मानमखिलप्राणिसमुदायस्य यापयामास महान्तमनेहसम् ॥

ततः सपर्यया गणरात्राचरितया प्रसन्नचेतसो भगवतः कैरवबन्धुकलाचूडालस्य पचेलिमप्रसादमयी अनिवरसुलभकमनीयगुणाकृतिनिदानमनिमिषजगज्जनलोचनाञ्जनीयं अमृताञ्जनं कमलजकरकमल-

---

प्राविशत् ; अन्तर्यामितया प्रविष्टोऽभवत्, 'यो रुद्रो अग्नौ' इति श्रुतेः । नित्यमहसे शाश्वततेजोरूपाय तस्मै शंभवे नमः ॥ ४५ ॥

सत्येति । अन्यया गत्या दुर्गतः दरिद्रः, गत्यन्तरशून्य इत्यर्थः । अहं महत्या मत्या युतैः सत्याधीशः चतुर्मुखः सनन्दनादयो ये मुनयश्च तैः श्रुत्या वेदप्रमाणेन नित्यगवेषणीयम् ; ब्रह्मादिभिरपि मृग्यस्वरूपमित्यर्थः । नित्यानन्दघनं वृत्तीनां कामादिसर्ववृत्तीनां आदिसंविद्रसं साक्षिचैतन्यरूपम् ; सत्या पार्वत्या आलिङ्गितसव्यकायं वामभागम् ; अतुलस्य तुलारहितस्योत्कृष्टस्येत्यर्थः ; अपत्यस्य ॥ ४६ ॥

इतीति । जनेशानः राजा अनेहसं कालं यापयामास गमयामास ॥

'गणरात्रं निशा बहवः' इति । कैरवबन्धुकलाचूडालस्य चन्द्रशेखरस्य पचेलिमप्रसादमयी परिपाकानुग्रहरूपिणी ; 'प्रसादोऽनुग्रहे काव्यगुणभाव्यप्रशस्तिषु' इति केशवः । कमनीयगुणानामाकृतेश्च निदानं कारणम् । न विद्यन्ते अक्षराणि यस्मिन्निति अनक्षरं वर्णात्मकं न भवतीत्यर्थः । कमलजस्य ब्रह्मणः करकमलकोशस्य प्रशंसायाः औढवाचिकं प्रौढवचनम्, इदं कथञ्चा

कौशलप्रशंसाप्रौढवाचिकमनक्षरमद्भुतायत्नम्, अरविन्दमन्दिरेव कलशजलनिधेः, हैमवतीव अचलसार्वभौमस्य, वैदेहीव विदेहवसुमतीपतेः, शकुन्तलेव गाधिनन्दनस्य, शमनस्वसेव कलिन्दभूधरस्य, कादम्बरीव गन्धर्वधराकामितुश्चित्रसेनस्य कालेनोदपादि कन्यका मद्रमहीधरस्य ॥

सा शुक्लप्रतिपन्निशासमुदिता लेखेव नैशाकरी
नित्योल्लासमुपेयुषी जनदृशां सौभाग्यपारंपरी ।
कंदर्पैकशरण्यमिन्दुवदना तारुण्यमासेदुषी
लावण्यामृतवीचिका रसखनिर्नाम्नाऽभवल्लक्ष्मणा ॥ ४७ ॥

सौन्दर्यावाससीमा तनुरपि सुतनोः कार्मुकामास यस्या
बाणामासाक्षिकोणः करनियमितसल्लस्तकामास मध्यम् ।
राजी रोम्णां विनीला मधुपकृतगुणामास यामाश्रयन्स-
द्भानुष्कामास लोके कुसुमधनुरहो भाग्यभीदृक्क मृग्यम् ॥

ब्रह्मणो जगत्सर्जनसामर्थ्यप्रतिपादिकेव भारतीति भावः । कलशजलनिधेः क्षीरसागरात् अरविन्दमन्दिरेव लक्ष्मीरिव, गन्धर्वधराकामितुः गन्धर्वराजस्य, काचन कन्यका समजनिष्ट प्रादुरभूत् ॥

सेति । जनदृशां सौभाग्यपारंपरी जनलोचनानामानन्दकारित्वात् भाग्यपरंपरारूपिणीत्यर्थः । इन्दुवदना नाम्ना लक्ष्मणा सा कन्यका, कंदर्पस्य एकशरण्यं तारुण्यमासेदुषी प्राप्नुवाना सती लावण्यामृतस्य वीचिका ऊर्मिरिव रसस्य शृङ्गारस्य खनिः ; आकरस्तु खनिः खानिः' इति सारे । अभवत् । प्रतिपच्चन्द्रलेखेव दिने दिने प्रवर्धमानं यौवनं प्राप्य शृङ्गारशेवधिरभूदिति भावः ॥

सौन्दर्येति । यस्याः सुतनोः सौन्दर्यस्य आवासस्य सीमा तनु कार्मुकामास चापोऽभवत् । कार्मुकवत्कन्यकाऽपि जयसाधनमभूदिति भावः । अक्षिकोणोऽपि दृगन्तस्तु बाणामास बाणवत् हृदयभेदकमभूत । मध्यं करनियमितसल्लस्तकामास, 'लस्तकस्तु धनुर्मध्यम्' इत्यमरः । विनीला रोमराजिः मधुपकृतगुणामास मधुकररचितमौर्वी अभवत् । मदनचापस्य भृङ्गमौर्वीकत्वादिति भावः । कुसुमधनुः कामः यामाश्रयन् लोके सद्भानुष्कामास उत्तमधन्वी अभूत् । तस्या ईदृक् भाग्यं सौन्दर्यभागधेयं क्व मृग्यम् ; अहो ! अनेन तस्या अनुपमसौन्दर्यातिशयस्य लोकोत्तरत्वं सूचितम् ॥

इत्यधिकरणे श्रीभाष्यकारचरणैः। बृहदारण्यान्तरे बृहदारण्याख्यमहोपनिषन्मध्ये दृश्यमे। न च सर्वेषां वेदान्तानामद्वितीयब्रह्मपरत्वाद्बृहदारण्यान्तर इति विशेषग्रहणे प्रमाणं नास्तीति वाच्यम्। ब्रह्मविद्याया वार्तिकान्तत्वप्रसिद्ध्या महावार्तिकस्य तदुपरि प्रवृत्तत्वेनोत्तरमीमांसादौ बहुशस्तद्वाक्यस्यैवोदाहरणत्वेन, पञ्चमषष्ठाध्यायगोः जल्पवादकथाभ्यामद्वितीयब्रह्मनिरूपणेन च विशिष्य ग्रहणौचित्यात्। योगिभिः सनकादिभिः अखण्डाकारवृत्त्या प्रातिपदिकार्थमात्रविषयकवृत्त्या प्रत्यक्षीक्रियते। यद्वा, संसर्गानवगाहिन्या वृत्त्या प्रत्यक्षीक्रियते। तदुक्तमाकरे— 'संसर्गाभङ्गिमन्यग्धीहेतुता या गिरां प्रियम्। इक्काऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥' इति। प्रातिपदिकार्थमात्रपरत्वमखण्डार्थत्वमिति चतुर्थपादार्थः। महावाक्यजन्यवृत्तेर्निर्विकल्पकरूपत्वेन सिद्धान्तसिद्धतया संसर्गानवगाहित्वस्य प्रातिपदिकार्थमात्रपरत्वस्य च युक्तत्वादिति भावः। पुच्छमयमाधारस्वरूपम्, पुच्छशब्देनाधारलक्षणया। अनेन वार्त्तिकाराभिमतानन्दमयत्वनिराकरणेन पुच्छब्रह्मज्ञानमेव मोक्षहेतुरिति भाष्यकारसिद्धान्तः सूचितः। अत्र प्रसङ्गाच्छिष्यानुजिघृक्षया महावाक्यममानाकारं वाक्यं प्रयुङ्क्ते—'परं ब्रह्म त्वमेवासि' इति। तत्र ब्रह्मपदवाच्यस्य विभुत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणादिविशिष्टेक्यायोगादैक्यप्रतीतिनिर्वाहाय चिन्मात्रलक्षणया तद्विषयकनिर्विकल्पकात्मकः शाब्दबोध इति ध्येयम्। अन्ये तु—शब्दजन्यसप्रकारकबोधजनितश्चिन्मात्रगोचरो मानसः साक्षात्कारो मोक्षहेतुः। अद्वैतवेदान्तिकैश्चिज्ज्ञत्वसर्वज्ञत्वयोरैक्यासंभवेऽपि पदजन्यप्रतीतिविशेष्यीभूतचैतन्याद्वयानुगतचैतन्याभेदसंभवमात्रेणैव सामानाधिकरण्योपपत्तेर्न लक्षणेति वदन्ति। सर्वथाऽपि 'परं ब्रह्म त्वमेवासि नः' इत्यनेन महावाक्यार्थबोधसंभवात् तद्द्वारा परमपुरुषार्थप्राप्तिरेतद्ग्रन्थाध्ययनप्रयोजनमिति सुधीभिर्विभावनीयम्॥ ५९॥

[1]गोत्रोद्भेदनकौशलं प्रथयसे हल्यागलालिङ्गनं
प्रत्यूषे कुरुषे सकुक्कुटरवे बह्वप्सरःस्वादतः।
स्वस्थाने मुदितः स्वरूपगतया युक्तः श्रिया मद्गृहे
गोष्ठे तिष्ठ लुलायराज महतीं देवेन्द्रलक्ष्मीं वहन्॥ ६०॥

गोत्रेति। गोत्रायाः पृथिव्या उद्भेदने विदारणे कौशलं सामर्थ्यं प्रथयसे विस्तारयसि; 'गोत्रा कुः पृथिवी पृथ्वी' इत्यमरः। प्रत्यूषे प्रभाते सकुक्कुटरवे ताम्रचूडध्वनियुक्ते सति हलानां समूहः हल्या; 'पाशादिभ्यो यः' इति समूहार्थे यप्रत्ययः। तया गले कण्ठे आलिङ्गनमाश्लेषं कुरुषे। बह्वप्सरःस्वादतः बह्वप्सु यानि तानि तथोक्तानि, तानि च तानि सरांसि च तेष्वादतः; अद्भिर्युक्तानि सरांसि अप्सरांसि बहूनि च तान्यप्सरांसि चेति विग्रहः। एवं च

---

1. गोत्रोच्छेदन०

समाप्तान्तस्यानित्यत्वकल्पनादोषोऽपि निरस्तः। स्वस्थाने स्वावासस्थाने करीषकर्दमादियुक्तेऽपि मुदितः संतुष्टः। स्वस्य रूपेण स्वभावेन, 'रूपं स्वभावे सौन्दर्ये' इति विश्वः। गतया प्राप्तया श्रिया संपदा युक्तो विशिष्टः। हे लुलायराज त्वं महतीं विपुलां देवेन्द्रलक्ष्मीं वहन्सन् मद्गृहे गोष्ठे विभ्रत्। इन्द्रपक्षे—गोत्रस्य पर्वतस्य; 'अद्रिगोत्रगिरिग्रावा' इत्यमरः। अहल्यागलालिङ्गनमिति छेदः। इन्द्रो हि प्रभातसमये गौतमवेषेण गौतमाश्रमं प्रविश्याहल्यां भुक्त्वा गौतमेन शप्त इति श्रुतिस्मृतिपुराणादिषु प्रसिद्धिः। बह्वयश्च ता अप्सरसः रम्भाप्रभृतयस्तासु। स्वस्थाने स्वर्गस्थाने; 'स्वरव्ययं स्वर्गनाक....' इत्यमरः। स्वरुणा वज्रायुधेन; 'शतकोटिः स्वरुः शंबः' इत्यमरः॥ ६०॥

नित्यं धीरमनांसि कर्षसि सदा रत्यां समुत्साहवा-
न्मुग्धानामुपमासि मासि तपसि ज्याकर्षणेनोज्झितः।
सामर्थ्यं विषमेषु कर्मसु भजन्नग्रे वसन्तं स्पृश-
न्सत्यं श्रीमहिषेन्द्र मन्मथ इव [1]प्रत्यक्षमालक्ष्यसे॥ ६१॥

नित्यमिति। नित्यं प्रत्यहं धीरं यथा तथा अनांसि शकटानि, 'अनः शकटमस्त्रियाम्' इत्यमरः। कर्षसि आकर्षसि। सदा सर्वकालं रत्यां क्रीडायां समुत्साहवान् प्रीतिमान्। मुग्धानां मूढानामुपमासि दृष्टान्तोऽसि। उपमापदेन सादृश्यप्रतियोगी लक्ष्यते। 'मुग्धः सुन्दरमूढयोः' इत्यमरः। मासि तपसि माघमासे; 'तपा माघे' इत्यमरः। ज्यायाः भूमेः; 'क्ष्मा भूमी ज्या काश्यपी क्षितिः' इत्यमरः। कर्षणेन विलेखनेन उज्झितस्त्यक्तः; तदानीं कृष्यारम्भाभावात्। विषमेषु निन्दितेषु कर्मसु; अभक्ष्यभक्षणादिष्वित्यर्थः। सामर्थ्यं भजन् अग्रे पुरतः वसन्तं वर्तमानं स्पृशन् घर्षयन् हे महिषेन्द्र त्वं [2]मन्मथ इव प्रत्यक्षमालक्ष्यसे। मन्मथपक्षे—धीराणां योगिनां मनांसि चित्तानि कर्षसि क्षोभयसि। रत्यां स्वीयभार्यायाम्; मुग्धानां सुन्दराणाम्; तपोमासि ज्याकर्षणे मौर्वीविकर्षणे, 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः। नोज्झितः न त्यक्तवान्। 'उज्झ विसर्गे' इत्यस्माद्धातोर्भावे क्तप्रत्यये अर्शआद्यच्प्रत्ययः। तथा च ज्याकर्षणं नोज्झितवानित्यर्थः, पीता गावो भुक्ता ब्राह्मणा इति महाभाष्यानुसारात्। यद्वा, उज्झितं त्यागः, न विद्यते उज्झितं यस्य नोज्झितः। न च नलोपः शङ्क्यः, नञ्शब्दस्समासाङ्गीकारेण नलोपाप्रसक्तेरिति दिक्। विषमाः पञ्चसंख्याकाः ये इषवो बाणास्तेषां कर्मसु संधानादिषु; अग्रे वसन्तं वसन्ताख्यमृतुम्॥ ६१॥

मूर्तिं हन्त बिभर्षि नीलमसृणां नित्याभिषिक्तां नरै-
र्ग्राह्यः पञ्चपचक्रतः कलयसि त्वं बन्धमोक्षावपि।

---

1. प्रत्यक्षमाभासि मे 2. मे मम नेत्रयोः मन्मथ इव अनङ्ग इव प्रत्यक्षमाभासि दृश्यसे।

सुक्षेत्रश्रियमादधासि महताज्ञानेन पूज्योऽसि त-
त्सालग्राम इवावभासि नियतं श्रीकासराधीश्वर ॥ ६२ ॥

मूर्तिमिति । नीलां कृष्णां मसृणां कर्कशाम्, 'मसृणः कर्कशे स्निग्धः' इति विश्वः । नरैर्मनुष्यैः नित्याभिषिक्तां मूर्तिं शरीरं बिभर्षि । पञ्चषचक्रतः पञ्चषचक्रैः ग्राह्यः विक्रेतुं योग्यः । चक्रमिति द्रव्यपरिमाणविशेषे दाक्षिणात्यप्रयोगात् । बन्धो बन्धनं, मोक्षो बन्धनस्थानाद्रोष्टाद्वाङ्गलाद्वा मुक्तिः, तदुभयमपि कलयसि करोषि । महिषबन्धनमोक्षयोरन्यकर्तृकत्वेऽपि सौकर्यातिशयविवक्षया स्थाली पचतीतिवत्प्रयोगो गौणः । सुक्षेत्रस्य उत्तमशालीक्षेत्रस्य श्रियं सस्यादिद्वारा शोभामादधासि करोषि । महता अज्ञानेन जाड्येन पूज्यः संरक्षणीयः; विवेकिनां कृष्यादौ प्रवृत्त्यदर्शनात् । तत् तस्मात्कारणात् सालग्राम इवावभासि । हन्तेत्याश्चर्ये । सालग्रामपक्षे—पञ्चषचक्रतो ग्राह्यः, चक्राधिक्ये भगवत्संनिधानाधिक्यात् । बन्धमोक्षौ संसारापवर्गौ; सुक्षेत्रेण समीचीनक्षेत्रेण द्वादशमूर्तिसमावेशरूपेण श्रियं सार्वभौमादिसंपत्तिम्; महता ज्ञानेन अत्युत्तमश्रद्धारूपेण ॥

गम्भीरस्तिमितो न कम्पमयसे गर्ह्योऽस्यपानेन च
प्रायः किं च सदाशनक्रमकरो नित्यं नदीनोऽसि च ।
संपूर्णः पृथुरोमभिश्च भजसे वृद्धिं क्षयं चाश्नुषे
तत्त्वं कासरमण्डलेश्वर जलप्रायः [1]समुद्रोऽसि नः ॥ ६३ ॥

गम्भीर इति । गम्भीरश्चित्तचापलरहितः, तिमितो निश्चलः कम्पं भयं नायसे न प्राप्नोषि । अपानेनापानवायुना गर्ह्यो निन्द्यः । प्रायः प्रायेण सदाशनक्रमं भक्षणक्रमं करोवीति तादृशः । नित्यं सर्वदा नदीनः याच्ञादिदैन्यरहितः । पृथुभिर्महद्भिः रोमभिः संपूर्णो व्याप्तः । वृद्धिं भक्षणादिजनितशरीरवृद्धिं भजसे प्राप्नोषि । क्षयं गृहम्; 'निवेशः शरणं क्षयः' इत्यमरः । अश्नुषे गच्छसि । तत्तस्मात्कारणात् हे कासरमण्डलेश्वर महिषयूथाधिप जलप्रायो जडप्रायः, नोऽस्माकं समुद्रो मुद्रया चिह्नेन सहितः असि भवसि । समुद्रपक्षे— गम्भीरो निम्नरूपः; 'निम्नं गभीर गम्भीरम्' इत्यमरः । तिमितो मत्स्यविशेषात् कम्पं चलनम्; अपानेन पानाभावेन; दाशाश्च जलसंचारिनराः, नक्राः ग्राहाश्च, मकराः मत्स्यविशेषाश्च तैः सहितः, नदीनां गङ्गाप्रभृतीनां इनः पतिः, पृथुरोमभिर्मत्स्यविशेषैः; 'पृथुरोमा झषो मत्स्यः' इत्यमरः । क्षयवृद्धी ह्रासाधिक्ये ॥ ६३ ॥

---

1. सरस्वानपि

अर्कं भक्षयितुं प्रधावसि नवं कृत्यं जनानन्दनो
निःशङ्कं कुरुषे समुद्रतरणं प्रत्यक्षमाधावसि ।
वीर्याधिक्यवशादुपर्युपरि चोत्साहं च कामं भज-
न्मन्ये श्रीमहिषाधिराज भुवनेष्वन्यो हनूमान्भवान् ॥ ६४ ॥

अर्कमिति । नवं नूतनम्, अर्कमर्कवृक्षं भक्षयितुं प्रधावसि प्रकर्षेण गच्छसि । जनानां लोकानामानन्दनः संतोषजनकः सन्, समुत्र मुदा संतोषेण सहितं यथा भवति तथा रतं सुरत-रूपमेव रणं युद्धं कृत्यं कुरुषे । अक्षं शकटावयवदारुविशेषं प्रति क्रोधवशेन भक्षयितुमाधावसि । वीर्यस्य बलस्य आधिक्यवशात् उपर्युपरि उत्तरोत्तरमुत्साहं कामं मन्मथविकारं च भजन् हे महिषाधिराज भुवनेषु लोकेषु अन्यः प्रसिद्धहनुमत्सपेक्षया इतरो हनूमानिति मन्ये । हनूमत्पक्षे— अर्कं रविम्; कृती कुशलः, 'कृती कुशलः' इत्यमरः । अञ्जनाया नन्दनः पुत्रः; निःशङ्कं यथा तथा, निर्भयं यथा तथा समुद्रतरणं शतयोजनविस्तीर्णसमुद्रोल्लङ्घनम् । अक्षमक्षाख्यं रावणसुतम् । वीर्याधिक्यवशात्पराक्रमातिरेकात् उपर्युपरि कामप्यधिकमुत्साहं रणोत्साहम् । अत्र नवोदितार्कं फलबुद्ध्या भक्षयितुं प्रवृत्ते हनुमति इन्द्रप्रयुक्तवज्रायुधात्कुण्ठीभूते देवताभ्यो वरं प्राप्य शतयो-जनविस्तीर्णसमुद्रं तीर्त्वा अक्षकुमारादिसर्वराक्षसान्हत्वा श्रीरामप्रसादं संपादयामास हनुमानिति श्रीमद्रामायणादिकथाऽनुसंधेया ॥ ६४ ॥

लोकख्यातसहस्रदोषमखिलद्वीपेषु संचारिणं
क्रीडन्तं किल नर्मदाम्बुनि मुदा कीर्त्या समालिङ्गितम् ।
सम्यग्भूषितमादरात्सदसि संमर्देष्वपास्तत्रसं
प्रायः सैरिभ मन्वते भुवि जनास्त्वां कार्तवीर्यार्जुनम् ॥ ६५ ॥

लोकेति । लोके भुवने ख्याताः प्रसिद्धाः सहस्रं दोषाः अविवेकित्वादयो यस्य तादृशम्; अखिलेषु बहुषु द्वीपेषु जलमध्यस्थभूप्रदेशेषु संचारिणम्, नर्म सुखं ददातीति नर्मदं सुखप्रदं, अम्बु जलं तस्मिन्क्रीडन्तम्; मुदा संतोषेण कीर्त्या कर्दमेन 'कीर्तिर्यशसि कर्दमे' इत्यमरः । समालिङ्गितं समाश्लिष्टम्, सम्यगादराद्विश्वासाद्भुवि भूमौ उषितमुपविष्टम् । कर्षकैरुपवेशितमित्यर्थः । सदसि सभायां संमर्देषु संघर्षेषु च अपास्तः निरस्तः त्रासो भयं यस्य तादृशम्; 'त्रसी उद्वेगे' इत्यस्माद्धातोः घञर्थे कविधानमिति कप्रत्ययः । 'विश्वत्रसात्रसविलक्षणलक्षितायाः' इति प्राचीन-प्रयोगात्त्रसशब्दस्य भयपरत्वं बोध्यम् । अपास्तत्रपमिति पाठश्चिन्त्यः, महिषे लज्जाप्रसक्त्य-भावात् । प्रायो बहुशः हे सैरिभ कासर त्वां कार्तवीर्यार्जुनं कृतवीर्यात्मजं राजानं भुवि भूलोके

जनाः मनुष्याः मन्वते जानते । कार्तवीर्यार्जुनपक्षे—लोकख्याताः सहस्रं दोषो बाहवो यस्य सः तादृशम्, अखिलद्वीपेषु संचारिणम्; अखिलद्वीपेषु यज्ञानुष्ठानार्थं संचारस्य पुराणप्रसिद्धत्वात् । नर्मदाया रेवाया अम्बुनि जले; तस्य रेवातीरवासित्वात् । कीर्त्या यशसा; भूषितं भूषणैः किरीटादिभिर्भूषितम् । आदरात्संतोषेण, स्वन्तः मदीचीना ये असिसंमर्दाः खड्गयुद्धानि तेषु अपास्तस्त्रसो यस्य तादृशम् ॥ ६५ ॥

उल्लेखान्विविधान्करोषि च पदन्यासस्तवान्यादृशः
पद्यालोकनदत्तदृष्टिरसि च प्रायः प्रबन्धे स्थितः ।
कोशाधारतया स्थितश्चरसि कप्रायस्थले सादर-
स्तेन श्रीमहिषाधिराज सुकविं त्वामेव मन्यामहे ॥ ६६ ॥

उल्लेखानिति । उल्लेखान् कविविशेषान् विविधान् बहुविधकठिनमृदुपङ्क्त्यादिभेदेन बहुविधान् करोषि तनोषि । तव पदस्य चरणस्य न्यासः अन्यादृशः इतरविजातीयः । पद्याया मार्गस्य, 'सरणिः पद्धतिः पद्या' इत्यमरः । आलोकने दर्शने दत्तदृष्टिः प्रापितचक्षुष्कः, भक्षणार्थमिति भावः । प्रायः प्रबन्धे बन्धने एव स्थितः; गृहे वा केदारे वा सर्वदा बद्धत्वात् । कोशस्य धनधान्यादिसमुदायस्याधारतया मूलतया स्थितश्चरसि भक्षयसि; न तु त्वद्भक्षणं व्यर्थमिति भावः । कप्राये जलप्राये, 'कं शिरोऽम्बुनोः' इत्यमरः । स्थले प्रदेशे सादरः । तेन कारणेन हे महिषाधिराज सुकविं त्वां मन्यामहे । कविपक्षे—उल्लेखान् विविधान् बहुविधानुल्लेखालंकारानित्यर्थः । पदन्यासो वैदर्भ्यादिरीतिविशेषः । पद्यस्य श्लोकस्यालोकने आलोचने दत्तदृष्टिः, प्रबन्धे ग्रन्थकरणे; कोश अमरादिराधारो मूलप्रमाणं यस्य सः, तस्य भावस्तत्ता, तया स्थितश्च । रसिकप्राये रसिकभूयिष्ठे स्थले प्रदेशे सादरः, अरसिकेषु कवेः प्रयोजनाभावात् ॥ ६६ ॥

वर्णैर्नैकविधैर्युतोऽसि च रसाधारोऽसि बन्धोज्ज्वलो
वृत्तात्मा ध्वनिगर्भितश्च बहुभिः पादैरुपेतोऽसि च ।
तत्सत्यं महिषेन्द्र सत्कविकृतश्लाघ्यप्रबन्धायसे
त्वामालोक्य पुनः पुनर्नवरसालंकारमीहामहे ॥ ६७ ॥

वर्णैरिति । नैकविधैरनेकप्रकारैर्वर्णैर्नीलादिभिर्युतोऽसि च । रसा भूमिराधारः स्थानं यस्य स तादृशः; बन्धैर्बन्धनैरुज्ज्वलः शोभमानः, बन्धनपरित्यागे स्वेच्छया कर्दमादिलुठनेन मलिनत्वादिति भावः । वृत्तः पुष्ट आत्मा देहो यस्य तादृशः, ध्वनिगर्भितः सर्वदा क्रन्दनस्वभावः; बहुभिश्चतुर्भिः पादैश्चरणैरुपेतोऽसि । तत्तस्मात्कारणात् हे महिषेन्द्र सत्कविकृतः

कालिदासादिरचितः श्लाघयितुं योग्यो यः प्रबन्धो नाटकादिः स इवाचरसि, अत इति शेषः। अतः कारणात्त्वां पुनः पुनरालोक्य नवरसालंकारं नवश्चासौ रसाया भूमेरलंकारश्च तमीहामहे। इच्छामहे। प्रबन्धपक्षे— वर्णैः कादिभिरक्षरैः, रसानां शृङ्गारादीनामाधारोऽसि। बन्धेन सङ्गपद्धमुरजादिबन्धेन उज्ज्वलः, वृत्तात्मा, स्रग्धरादिवृत्तात्मा ध्वनिना व्यङ्ग्यार्थेन गर्भितः; युक्त इत्यर्थः। अत्र श्लाघ्यप्रबन्धायस इत्यनेन महाकविप्रणीतोत्तमकाव्यसादृश्यं प्रतिपिपादयिषितम्। तच्च पूर्वोत्तरविशेषणसंदर्भैः स्पष्टम्। तथा हि— रसाधारोऽसीत्यनेन नवरससंपत्तिः प्रतीयते। तया निर्दोषत्वमपि ध्वन्यते, दोषसत्त्वे रसाप्रतीतेः, रसाभिव्यक्तिप्रतिबन्धकस्यैव दोषत्वात्। तदुक्तमालंकारिकैः—'रसास्वादविरोधित्वं दोषत्वं परिकीर्तितम्' इति। बन्धोज्ज्वल इत्यनेन शब्दालंकारसंपत्तिः। ध्वनिगर्भित इत्यनेन वाच्यातिशायिव्यङ्ग्यप्रतीतिः। तदुक्तं काव्यप्रकाशे— 'वाच्यातिशायि व्यङ्ग्यं तद्भुत्तमं तद्ध्वनिश्च सः' इति। न च पूर्वार्धेन प्रबन्धसादृश्यं हेतुत्वेन प्रतिपाद्यम्। त्वामालोक्येत्यादिना नवरसालंकारप्रतिपादनात्प्रबन्धेऽपि नव रसा वक्तव्याः। तथा च काव्यप्रकाशविरोधः। तत्र रसनिरूपणावसरे अष्टानां रसानां प्रतिपाद्यमानत्वादिति वाच्यम्। तस्य नाट्याभिनेयरसपरत्वात्। तदप्युक्तं तत्रैव—'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्यरसाः स्मृताः॥' इति। शान्तरसस्याभिनेयत्वाभावेन नाट्यरसत्वाभावात्। 'निर्वेदस्थायिकः काव्ये शान्तोऽपि नवमो रसः' इति तत्रैव नवरसस्य व्यक्तत्वान्नवरसालंकारत्वं प्रबन्धे युक्तमेवेत्यन्यत्र विस्तरः॥ ६७॥

प्रीतिं यासि मृदङ्गतः कलयसे तालप्रमाणं तनौ
चातुर्यं बहुलास्यकर्मसु नृणां संदर्शयन्व्यङ्गकम्।
कुर्वन्स्वीयपरिश्रमाद्बहुविधादर्थैः समारं जनं
[1]सत्यं सैरिभमण्डलेन्द्र भरताचार्यत्वमालम्बसे॥ ६८॥

प्रीतिमिति। मृदा मृत्तिकया युक्तमङ्गं मृदङ्गम्; तस्मात्प्रीतिं संतोषं यासि प्राप्नोषि; कर्दमादिषु स्वाच्छन्द्येन प्रवृत्तिदर्शनादिति भावः। तनौ शरीरे तालप्रमाणं तालवृक्षसदृशौन्नत्यं कलयसे; तद्वदुन्नतो भवसीत्यर्थः। नृणां पुरुषाणां व्यङ्गकं स्वीयलिङ्गं संदर्शयन् बहुलमधिकं यदास्यकर्म महिषीमनोजगृहाघ्राणमुखोन्नमनादिरूपम्; तत्र चातुर्यं कलयसे इति पूर्वेणान्वयः। बहुविधादनेकप्रकारात्कृष्यादिरूपात्स्वीयपरिश्रमात्स्वकीयखेदात्कारणीभूतात्संपादितैरर्थैर्धनधान्यादिभिर्जनं लोकं भारयुक्तं कुर्वन् हे सैरिभमण्डलेन्द्र भरताचार्यत्वं भरतशास्त्रज्ञत्वम्; त्वमिति शेषः। आलम्बसे प्राप्नोषि। भरताचार्यपक्षे—मृदङ्गतो वाद्यविशेषाद्यर्मावनद्धमुखरूपात्। तदुक्तं

---

1. नूनं सैरिभसार्वभौम

संगीतरत्नाकरे वाद्याध्याये —'चतुर्विधं भवेद्वाद्यं वृत्तं सुषिरमेव च। अवनद्धं घनं चेति तत्त्वं च त्रिविधं भवेत् ॥ वीणादि सुषिरं वंशकाहलादि प्रकीर्तितम्। चर्मावनद्धवदनं वाद्यते पटहादिकम् ॥ अवनद्धं च तत्प्रोक्तं कांस्यतालादिकं घनम् ॥' इति। ततौ तालस्य तालाख्यस्य प्रमाणं शास्त्रोक्तं मानम्। तालस्वरूपमपि तत्रैवोक्तम्—'तालः काल इति प्रोक्तः सोऽवच्छिन्नो द्रुतादिभिः। गीतादिमानकर्ता स्यात्स द्वेधा कथ्यते बुधैः ॥' इति। लास्यकर्मसु नर्तनकर्मसु; 'लास्यं नृत्तं च नर्तनम्' इत्यमरः। बहु चातुर्यं चतुर्विधत्वम्। तत्स्वरूपमुक्तं संगीतसारोद्धारे—'निरूपिते गीतवाद्ये नर्तनं प्रोच्यतेऽधुना। नर्तनं गात्रविक्षेपविशेषः कार्यते बुधैः ॥' इति। व्यञ्जकमभिनयं संदर्शयन्; 'व्यञ्जकाभिनयौ समौ' इत्यमरः। तत्स्वरूपमपि तत्रैव निरूपितम्—'प्रकटीकुरुते पात्रमाभिमुख्येन योऽर्थगः। पदार्थगोऽप्यभिनयश्चतुर्धा स निरूपितः ॥ आङ्गिको वाचिकस्तद्वदाहार्यः सात्त्विकोऽपरः। आङ्गिकोऽङ्गैर्विनिर्वृत्तो नाटकादिस्तु वाचिकः ॥ आहार्यो हारकेयूरकिरीटादिनिरूपणम्। सात्त्विकः सात्त्विकैर्भावैर्नर्तकेन विभाविताः ॥' इति। एतेषां निरूपणं तु तत्रैव बोध्यम्। विस्तरभयान्न लिख्यते ॥ ६८ ॥

अथैकादशभिः भगवतः श्रीमहाविष्णोरवतारदशकं महिषेश्वरेऽपि निरूपयति—

त्वं श्रुत्युद्धरणं करोषि भृशमुन्मज्जन्निमज्जन्मुहुः
पारावारपयोऽन्तरालविहृतिप्राप्तप्रमोदोत्सवः।
संप्राप्नोषि ततो विधिं बहुमुखं प्रीत्यागमेष्वादरा-
त्तन्नूनं महिषक्षितीश्वर भवान्मत्स्यावतारो हरिः ॥ ६९ ॥

त्वमिति। त्वं मुहुर्मुहुरुन्मज्जन्निमज्जंश्च श्रुत्योः श्रोत्रयोरुद्धरणमूर्ध्वोन्नयनं करोषि। पारावारस्य समुद्रसदृशजलाशयस्य पयोऽन्तराले जलमध्ये विहृत्या विहारेण प्राप्तः प्रमोदः संतोष एवोत्सवो येन स तादृशः। ततो जलावगाहानन्तरं बहुमुखं बहुप्रकारं विधिं व्यापारं कृषिधान्यवहनादिकं प्रीत्यागमेष्वादरात्प्रीतिप्राप्तिष्वादरात् संप्राप्नोषि। तत्तस्मात्कारणात् हे महिषक्षितीश्वर भवान् मत्स्यावतारो हरिर्नूनम्। मत्स्यावतारपक्षे— पारावारस्य समुद्रस्य; 'पारावारः सरित्पतिः' इत्यमरः। श्रुत्युद्धरणं वेदोद्धरणम्। ततो वेदोद्धरणानन्तरम्, बहुमुखं चतुर्मुखम्, विधिं ब्रह्माणम्, वेदप्रतिपादनार्थं प्राप्त इति पुराणप्रसिद्धिः ॥ ६९ ॥

वज्रादप्यतिनिष्ठुरं तव पुनः पृष्ठं धराधिष्ठितं
निःश्वासास्तु पयोनिधेरपि वयःप्रक्षोभदक्षा इमे।

स्वीयत्वेन च कच्छपालिषु सदा प्रीतिं दधास्याशये
तेन त्वं महिषेन्द्र नूनमधुना कूर्मावतारो हरिः ॥ ७० ॥

वज्रादिति । वज्रादपि हीरकादपि अतिनिष्ठुरमतिकठिनं तव पृष्ठं धरायां भूम्यामधिष्ठितमुपविष्टम् । तव निःश्वासास्तु पयोनिधेरपि महाह्रदस्यापि, प्रक्षोभः कलुषीकरणम् ; तत्र दक्षाः समर्थाः । आशये जलाशय कच्छानामनूपानाम् ; 'आर्द्रभुरुण्येऽथ कच्छः स्यादनूप...' इति विश्वः । पालिषु समूहेषु स्वीयत्वेन स्वकीयत्वेन प्रीतिं दधासि । तेन कारणेन हे महिषेन्द्र कूर्मावतारो हरिर्नूनम् । कूर्मपक्षे— धरायां भूम्यामधिष्ठितं पृष्ठं पृष्ठभागः । कच्छपानां कूर्माणामालिषु समूहेषु, आशये अन्तःकरणे ; अन्यत्सर्वं समानम् ॥ ७० ॥

उत्साहेन पुरा वराहवपुषा शृङ्गेण गामुद्धर-
न्नुद्दामात्मगुणः सितस्ववदनं व्यावृत्य चालोकसे ।
सौकर्यं भुवनानि पातुमयसे वक्त्रे महाविस्तृते
तत्त्वां श्वेतवराहमूर्तिमधुना जाने महासैरिभ ॥ ७१ ॥

उत्साहेनेति । उत्साहेन संतोषेण पुरा प्रथमं वरः श्रेष्ठः आहवो युद्धं पुष्णातीति तादृशः ; तेन शृङ्गेण विषाणेन गां धेनुमुद्धरसि । गवा युद्धप्रसक्तौ गां शृङ्गाग्रेण क्षिपसीत्यर्थः । उद्दामः उत्सृष्टदामक आत्मगुणो यस्य स तादृशः । दामेति बहुपशुबन्धनयोग्यमहारज्जौ प्रसिद्धिः । तस्मादात्मबन्धनरज्जुं छित्वा धावसीत्यर्थः । सितं श्वेतं स्ववदनं स्वमुखं व्यावृत्य परावृत्य आलोकसे ईक्षसे । भुवनानि जलानि ; 'भुवनं विष्टपे लोके सलिलेऽपि वियत्यपि' इति विश्वः । पातुं सौकर्यं सूकरत्वं महाविस्तृते ; तटाकादाविति शेषः । अयसे प्राप्नोषि । तस्मात्त्वां श्वेतवराहमूर्तिमहं जाने । वराहपक्षे— वराहवपुषा सूकरदेहेन गां भूमिं ; महाविस्तृते वक्त्रे सौकर्यं सूकरभावम् ; कण्ठादधो मानुषाकारत्वादिति भावः । भुवनानि लोकानि पातुं रक्षितुम् ॥ ७१ ॥

क्षेत्रज्ञस्य हिरण्यवर्धनकृतः प्रह्लादमापुष्णतः
प्राप्तस्योपनिषद्वरं पृथुतरस्तस्माद्वहिर्निर्यतः ।
लोकानां स्थितये क्षितस्य च निजां केदारलक्ष्मीं परां
को भेदस्तव कामरेश्वर विभो श्रीमन्नृसिंहस्य च ॥ ७२ ॥

क्षेत्रज्ञस्येति । क्षेत्रं स्वकुटशाल्यादिक्षेत्रं जानातीति क्षेत्रज्ञः । गृहान्मुक्तः परिच्यवनात्स्वीयकेदारमेव गच्छतीति भावः । हिरण्यस्य सुवर्णस्य वर्धनं वृद्धिं करोतीति तादृशस्य

The Journal

OF THE

Sri Sankaraguru kulam

Srirangam

VOL. IV. NO. 16.

REVIEWS

SIDDHANTABINDU *of Sri Madhusudana Sarasvati with the commentary of Purushottama Sarasvati, edited by P C Divanji—Gaekwad's Oriental Series No LXIV, Price Rs, 11 0-0.*

The Siddhanta Bindu is a well known commentary on the Dasasloki of Sri Sankaracharya and has been published several times before. But the popularity of the work permits of any number of editions and we welcome this edition with the commentary of Sri Purushottama Sarasvati on Madhusudana's work.

The main topic of the Dasasloki is the realisation of the Inner Self of all by the process of eliminating the material adjuncts which prevent the former from being realised and which themselves put on the name of the Self in ordinary life. The subject is necessarily an interesting one and gives great scope for detailed treatment at the hands of any commentator, more so at the hands of Madhusudana the author of the famous work Advaita Siddhi.

The entire Text and commentary cover only 83 pages but the editor has prefaced it by an Introduction in English covering 142 pages and added at the end his own Notes and Translation which occupy 280 pages. The Introduction is a masterly review of the history and scope of Vedantic thought and an attempt to properly guage the position and importance of Madhusudana therein.

The editor in common with many modern writers has taken for granted many of the conclusions arrived at by western scholars and their Indian prototypes and has therefore assumed that the Vedanta "grew" out of something that went before and that the system of thought conveyed by that term developed from stage to stage and is perhaps still developing. This is only consistent with the meaning which he gives the word Brahman as denoting "That which grows"—an essentially unvedantic conception. Growth or Deterioration is possible only of imperfect and finite things and never of the Ever Perfect and Infinite. Words limited as they are in their denotations can never accurately describe Brahman and when we use that word we signify only "That which is great" and not "That which grows." If as we believe Vedanta is Truth, it must be eternal and can never develop.

As regards Madhusudana the Editor refers to a tradition said to be current in South India that he occupied the Sringeri Peetha but to the best of our knowledge there is no such tradition current here. The Editor has taken pains to show that the author belonged to North India and lived in the sixteenth and seventeenth centuries. We do not quarrel with his conclusions but desire to point out the futility of such enquiries

The fallacy underlying the results arrived at by "historical research" is well exemplified by the Editor's attempt to fix the anteriority of the Yoga Vasishta to the Sankshepa Sariraka of Sarvajnatma on the ground that Sri Rama is mentioned in the latter as having obtained Brahmopadesa and that such an incident is mentioned only in the Yoga Vasishta The sloka of Sarvajnatma is :

संकल्पपूर्वकमभूद्रघुनन्दनस्य
नाहं विजान इति कंचन कालमेतत् ।
ब्रह्मोपदेशमुपलभ्य निमित्तमात्र
तद्योत्ससर्ज स कृते सति देवकार्ये ॥

The most casual reader of Srimad Ramayana will easily recognise in this a reference to the following slokas in Chapter 120 of the Yuddhakanda :

अब्रवीत्त्रिदशश्रेष्ठान् रामो धर्मभृतां वरः ।
आत्मानं मानुषं मन्ये राम दशरथात्मजम् ॥

योऽहं यस्य यतश्चाहं भगवांस्तद्ब्रवीतु मे ।
इति ब्रुवन्तं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः ॥

अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ।
भवान्नारायणो देवः श्रीमाञ्शक्रायुधो विभुः ।

It is really an Upadesa by Brahma and not about Brahman.

We find the Notes and Translation very useful guides to the understanding of the Text and the Edition is on the whole a very scholarly one and we heartily welcome it as a valuable contribution to the field of Vedantic literature.

R. Krishnaswami Aiyer, M.A., B L.,

***

VEDANTARAKSHAMANIVIMARSA *by A. V. Gopalacharya M. A., B. L., Price Rs. 3.*

This is a criticism of Vedanta Rakshamani a recent Advaita work of Sri Mahamahopadhyaya Anantakrishna Sastri at the hands of a Vedanta scholar who is himself by birth and conviction a Visishtadvaiti but has deeply studied the other systems also The conflict of views between the Advaita and Visishtadvaita schools of thought is too deep and fundamental to be solved by anybody and it will be well for all concerned if the adherents of either school will agree to disagree and concentrate their attention on the innumerable points on which there is agreement as against other religionists and work for a consolidation of the Hindu spirit. Evidently the book under review was written with a view to remind the modern public that the days of dialectics are not yet over and that there are still persons capable of using their cudgels or wielding their shields as occasion may arise. We therefore welcome this book as a proof of the vigour of scholarship, even in these decadent days when learning in Sanskrit is at a discount, though it may take a sectarian turn.

NEWS AND NOTES

OURSELVES.

The very great difficulty experienced in procuring the requisite paper for this issue in spite of the exorbitant price is the cause for the delay and the reduced size of this complete issue of the Journal. Thank God we have been able somehow to finish this issue and thus finish the fourth Volume of the Journal. As usual we enclose a money order form in this issue and request our subscribers to remit their subscriptions for the next volume (Nos. 17–20) and thus avoid the unnecessary trouble and expenses of issuing the next number which commences the 5th Volume by V. P. P.

***

THE SANKARAGURUKULAM AND ACHARYA VIDYAPEETHAM.

We reproduce below once again the main objects of this Institution and the different funds that are being collected for

the maintenance of the same and the various purposes for which the different funds are utilised.

***

SRI SANKARAGURUKULAM AND ACHARYAVIDYA PEETHAM TRUST

The objects of this Institution, as declared in the Trust Deed are as follows :—

1. The due and regular performance of the daily pujas both in the morning and evening and the annual celebration of the Jayanti and Navaratri festivals for the deities consecrated in the Temple here for the welfare of all the Astika people between the Himalayas and Cape Comorin and for the spread of the Advaita Philosophy.

2. By the grace of the Acharyal, to make all arrangements to train boys here by precept and example in the observance of our cultural customs and practices as detailed in the Shastras and as traditionally interpreted, and to produce scholars learned in the Vedas and Sastras possessing full and deep knowledge of the Advaita Sastra.

3. In pursuance of the above objects, to hold often assemblies of learned people (Vidvat Sabhas), and arrange Bhajanas, Harikathas, Lectures, Expositions of Puranas and Ithasas by learned Pandits and Scholars.

4. To train a number of lecturers to go throughout the country at the cost of this Institution and lecture about the greatness of our religion and our Vaidika Dharma and about the utility of following our traditional customs and thus make the people follow our ancient Religion and Dharma and Culture.

5. To train Purohits who could understand the rationale of the various Vaidikakarmas now in vogue by learning the meanings of the various Sutras and the Mantras contained therein and become experts.

6. To collect and publish ancient Sanskrit Manuscripts and Sastraic works and make them useful to the people.

7. To accommodate and feed the Brahmin Sanyasis that go to the Temple here and utilise their knowledge and learning in such a way as would be useful to this Institution.

8. In accordance with the above objects to draw out a regular syllabus of the various subjects and to hold examinations in those subjects once a year and confer Titles and Prizes to those who come out successful in the Examinations.

9. To collect all printed Sanskrit books as well as Manuscripts in the Library called Sri Sacchidananda Bharati Bhandaram and make it useful to the public.

10. Further to do all such things as are not inconsistant with the above objects and are not opposed to the Sanatana Vaidika Dharma.

☞ *Any generous Astika gentleman who desires to encourage any of the above objects may do so by endowing*

any amount in the shape of movables or immovables as suits his convenience, ear-marking the same for the particular object or objects desired by him to be encouraged. It will be most gratefully acknowledged and the proceeds shall be devoted to the specified object or objects. Enquiries for further details are quite welcome and will be replied to immediately.

***

PUJA FUND SCHEME

This scheme was started at the suggestion of the late Sri Brahmananda Saraswati Swamigal of Benares who had come here in the course of his itinerary. After seeing the wonderfully realistic white marble images in the Temple here, and the unique design of the construction of the Temple, and after hearing that all the expenses connected with the Temple are met solely by the Founder, he suggested that such a unique Temple for our great Advaita Acharya built on the banks of the sacred Cauvery in Srirangam which is the central stronghold of Visishtadvaitism, should not be left to the mercies of a single individual though he may be the Founder, but deserved all support from every Advaitin and special arrangements should be made for the permanancy of the daily Puja. For this special purpose he suggested that astikas and advaitins all over the country should be appealed to, to come forward with a subscription of Rs. 100/- once for all, out of the annual interest of which one day's puja should be conducted every year in the Temple in the name of the subscriber on the date fixed by him. Thus with a small investment of Rs. 100/- once for all, he would have endowed permanently for one days's annual Puja in the Temple. The Swamiji himself subscribed for one day's puja to be performed in Bhadrapada Paurnima. Since then 414 friends have subscribed till now but 147 only have paid in full. Some others are paying in instalments, while some of them are dead and gone without making any arrangements. The register will be kept open till 365 *fully paid subscribers are secured*, For the first Rs. 10,000/-collected, House Property has been purchased in Srirangam which fetches 6 per cent interest in the shape of monthly rent of Rs. 50/-. For the next Rs. 10,000/- lands are to be purchased and hence we appeal to all subcribers to pay up their amounts at once and to secure afresh more subscribers. We also appeal to all followers of Sri Sankara who have not yet subscribed for this scheme to do so at once and thereby secure permanent sreyas (श्रेयस्)

***

BUILDING FUND,

Though buildings to the extent of Rs. 75.000/-have been constructed in the Sri Sankaragurukulam till now, yet they are all incomplete. Taking the Temple proper the Mahamantapam and the front Gopuram have yet to be completed. The Mahamantapam would cost Rs 15,000/- and

the front gopuram wherein two small shrines on the two sides for Gods Ganesa and Subrahmanya are planned would cost about Rs 3000/- These two are essential for a Temple according to our Silpa-sastras As regards the Library, three more similar halls have to be constructed As it is, the Library is cramped with Books and Manuscripts. Each Hall would cost about Rs. 3,000/- The Sankara Pushkarani Tank in the back of the Temple has to be protected with walls all round, the front steps alone having been already constructed This would cost about Rs. 3,000/- These additions are absolutely necessary and their total cost comes to Rs. 30,000/- We appeal to all charitably disposed gentlemen to come forward to help the construction of the above buildings at a cost of Rs. 30,000/- either in full or in part according to their capacity. The names of such gentlemen as donate Rs 500/- or more will be carved in marble stone and placed in a prominent part of the building.

***

EDUCATION FUND.

Besides the above two funds *viz.*, the Puja Fund and the Building fund, there is a third fund named as the Education Fund The educational activities of the Gurukulam are:—

1. Patasala for the teaching of the Vedas, Kavyas and Sastras. An attempt was made in this direction and continued for two years when it was discontinued for various reasons:—want of sufficient funds being the chief of them. This will be revived when sufficient funds accumulate, since it forms one of the main activities of the Gurukulam.

2. An extensive Library:-The Travancore, Mysore, Baroda and Kashmir Governments have sanctioned the free grant of all their Oriental publications, to this Library named 'Sri Sacchidananda Bharati Bhandaram' which was opened in 1938 and which now contains more than 5000 Volumes and about 400 Manuscripts,

3 About 200 lectures every year are delivered by eminent Pandits and Scholars from all over the country.

4. The publication of a Quarterly Sanskrit Journal *viz*, SRI SANKARA-GURUKULAPATRIKA which is now about to complete its fourth year

The other items of educational activities as mentioned in paras 3, 4, 5, and 8 of the objects mentioned in the Trust Deed *viz*, the holding of Vidwat Sabhas, the sending out of trained lecturers for propaganda purposes, the training of purohits and the holding of annual examinations have to be commenced only after sufficient funds are collected.

Hence we appeal to all lovers of Sanskrit to subscribe liberally to this fund earmarking the purpose for which they intend the same. Since these educational activities form the chief objects of the Institution and since the activities under

this head are many-sided the Education Fund should reach at least Rs. Five lakhs. Hence all Maharajas, Chiefs, Nobles, Zamindars and Commercial Magnates who are patriotic enough to love our land and culture, are requested to open unhesitatingly their purses and contribute generously to this noble cause.

***

GENERAL FUND.

Besides the above three funds there is a fourth known as the General Fund. This fund will be utilised chiefly for the Bhiksha of the Sanyasis that go over here, for the feeding of the Teachers and Vidyarthis that study here, for the extra expenses that may be incurred during the festivals, for the maintenance of the cattle (Gosala) that belong to the Institution, for the upkeep of the Nandavana (Flower garden) attached to the Institution, for the acquisition of more lands near-by, so that a small colony of astikas may be constituted with residential quarters for the Teachers, and Vidyarthis of the Gurukulam and the Pujakas and servants of the Temple and for the stay of the devotees that desire to stay here for some time. For all these purposes a sum of Rs Two lakhs may be required and we earnestly appeal to all generous minded astika gentlemen to contribute their mite to this fund ear-marking the same for any of the objects mentioned herein which they would like to promote.

***

JAYANTI-ARADHANA FESTIVAL OF THE SRINGERI JAGADGURU.

This year's Jayanti-Aradhana festival commenced on 20-3-44 with the Bhagavatam lectures as usual of Brahmasri Sivaramakrishna Sastrigal and continued for 17 days with unabated enthusiasm. On 20-3-44 which was the Jayanti day proper H. H. Sri Sacchidanada Thirtha Swamiji had sent an appreciative paper on the Acharyendral (which is printed elsewhere) and it was read and explained to the audience of devotees On 26 3 44 which was the Aradhana day of His Holiness the late Mahaswamigal of Sringeri, Brahmasri R. Krishnaswamy Iyer M.A., B.L., of Tinnevelly had sent some appreciatory slokas which were read before the commencement of the lectures. H. H. Sri Sankarananda Sarasvati Swamigal, who had come from Krishnarajapuram, lectured on the greatness of the Acharyendral and then the Bhagavata discourse was continued. The Bhagavatam lectures were concluded on the 5th of April in the midst of great enthusiasm. A very large number of devotees attended the lectures and in the end Brahmasri Sivaramakrishna Sastrigal was blessed with the prasadams of Lord Sri Sankara and Sri Maha Tripurasundari. The audience then gave Sambhavanas and kanikkais and cloths and silver vessels to the Sastrigal. The audience then dispersed wishing they could hear such discourses throughout the year.

***

THE SANKARA JAYANTI FESTIVAL.

The Sankara Jayanti festival was celebrated as usual. On 23–4–44 Brahmasri Kasi Visvanatha Ganapatigal of Kallidaikurichi delivered a lecture on Acharya Mahima. On the 24th idem, Brahmasri M. Ganapathy Bhagavatar delivered a lecture on Sri Ramapattabhishekam On the 25th idem Brahmasri Venkatarama Sastrigal of Kallidaikurichi delivered a discourse on Sopanapanchakam. On the 26th idem Gitopanyasacatura Brahmasri S. V. Subrahmanya Sastrigal, Principal of Pazhur Vedantapatasala delivered a lecture on Mukti and its various interpretations by different schools of philosophy and concluded by saying that the Advaita interpretation of Sri Sankara was the best On the 27th idem, Brahmasri Narayana Bhagavathar of Batlagundu lectured on Sri Sankara, His life and works. During all these festival days there were music parties during the nights after the procession of the Utsava Murty. On the 23rd Messrs. T. R Krishnamachari Bros. played on the Veena accompanied by Sri Alagirisamy Naidu's Mridangam and T.R. Narasimachari's Ghatam. On the 24th, Chidambaraiyer played on the flute with Vaidyanatha Iyer's Violin and Krishna Rao's Mridangam. On the 25th there was the Harikatha performance by Messrs, Balasubrahmanyam Bros., of Bhikshandaikoil, on Sitakalyanam. On the 26th Sri V. S. Krishnamurty sang orally with Sri V. H. Chellapa Iyer's fiddle and Master Vaidyanatha Iyer's Mridangam On the 27th Brahmasri Subrahmanya Dikshitar alias Hemambadasar played on the Harmonium in the morning during the Mahabhishekam for the Acharyal and gave a delightful party in the evening with his brother Sri Gopala Dikshitar playing the Jalatarangam and Narasimhachari playing the Ghatam On the 28th a young girl Meenakshi by name gave some dance expositions and after that Gopala Dikshitar brother of the Hemamba Dasar played on the flute. Thus ended the Sankara Jayanti festival commencing with Veena and ending with Venu. The decorations from the third day onwards were done by Kasi Viswanathan from Dindigul and they were all very much appreciated by the devotees The usual parayanams, Mahanyasa purvaka japams, abhishekams, archanas, naivedyams and deeparadhanas were performed with great eclat.

***

LECTURES

On the 1st and 2nd day '44 Sri Ramamurty lectured on Sitakalyanam and Anguliya pradanam respectively. On 4-5-44 Sri Krishnaswamy Iyer M.A., B L. of Tinnevelly delivered a well thought out lecture in a very simple style on "the Sadhanas for Mukti" On 28—6—44 Dewan Bahadur Sri K. S. Ramaswami Sastrigal Retd. Dt. and Sessions Judge delivered a lecture on "Ratna Trayam."

SRIRANGAM SRI SANKARA GURUKULA SERIES.

No. 1.	पञ्चरत्नकारिका: A poetic commentary on the Upadesa Panchakam of Sri Sankara Bhagavatpadacharya by Sri Sadasiva ; with a *Prastavana* by Sri Sacchidananda Tirtha Swamigal.	0	12	0
No. 2.	नयमञ्जरी A poetic commentary on the Brahma Sutras, by Sri Appayya Dikshita. With a Sanskrit Introduction by Sri Sacchidananda Tirtha Swamigal.	2	0	0
No. 4	बालभारतम् of Agastya Pandita with the Commentary *Manohara* of Salva Timmaya Dandanatha. Part I. Cantos 1–3	2	0	0
No. 5	कुमारसंभवचम्पू: by Sri Sarabhoji Maharaja of Tanjore; with an Introduction by Vidyasagara Vidyavacaspti P. P. Subrahmanya Sastri, B A. (Oxon), M. A , Professor of Sanskrit, Presidency College, Madras.	1	0	0
No. 6.	डमरुकम् A Sanskrit Farce by Pandit Ghanasyama with the Commentary of Chandrasekhara; Edited by Do.	0	8	0
No. 7.	शृङ्गारप्रकाश: by Maharajadhiraja Sri Bhoja Deva. Part I, Prakasas 1 & 2 Edited by Do.	1	8	0
No. 8.	मनीषापञ्चकम् of Sri Sankara Bhagavatpadacharya with a Summary of the Commentary of Sri Sadasiva Brahmendra and a Foreword by Rao Saheb N. Natesa Iyer B.A., B.L., President, All-India Varnasrama Swarajya Sangha, Madura. Edited by Gurubhaktasikhamani T. K. Balasubrahmanya Iyer.	0	6	0
No. ०.	स्तोत्ररत्नमाला Part I, Contains rare stotras by different ancient authors.	1	8	0
No. 10.	जीवन्मुक्तिकल्याणनाटकम् by Nalla Dikshitar.	1	4	0

IN THE PRESS.

No. 3. शास्त्रदीपिका of Parthasarathi Misra with the commentary *Muyukhavali* of Sri Appayya Dikshita.

No. 11. मद्रकन्यापरिणयचम्पू: by Gangadhara Kavi.

No. 12. तत्त्वकौस्तुभ: by Bhattoji Dikshita.

No. 13. सौन्दर्यलहरी with the commentaries of लक्ष्मीधरा, सौभाग्यवर्धनी and अरुणामोदिनी

No. 14. मेंढ्रिषशतकम् of Sri Vanchesvarakavi with the commentary of his great-grandson Sri Vanchesvara.

No. 15. शिवकेशादिपादान्तस्तुति: of Sri Sankara with the commentary of Sri Ramakrishna Suri.

The above Six books are being published serially in the ***Sri Sankara-gurukula Patrika***. Annual Subscription Rs. **6** only.

Apply to THE LIBRARIAN, *Sri Sankaragurukulam, Srirangam.*

Printed at the SRI VANI VILAS PRESS,
& Published at the Sri Sankaragurukulam, Srirangam,
by Gurubhaktasikhamani
T. K. BALASUBRAHMANYA AIYAR B. A.

CONTENTS (Contd.)

19 श्रीभागवतचतुःशती By Mayavaram Sivarama Krishna Sastrigal with Commentary of Mimamsa Ratnam A. V. Gopalachariar, M.A., B.L. 9—16

20 श्रीसत्यभामापरिणयम् By Tirumanur Sri Krishna Sastrigal

Reviews.

21 *Advaita Aksharamalika* published by the Kamakoti Kosasthanam, Kumbakonam. R. Krishnaswami Aiyar 29—30

22 Krtya Kalpataru of Bhatta Lakshmidhara Part V. VIII and XI Published in H. H. Gaekwad's Oriental Series. A. V. Gopalachariar M.A. B.L. 30—32

23 Sri Sita Rakshasi Samvadatatvam By A. Sankara Sastrigal 32—33

24 **Books Received** 33

25 **News and Notes.** 34—36

26 The Late T. K. Balasubrahmanya Aiyar. 37—44

27 **Our Exchanges**

OUR EXCHANGES.

Aryadharmam, Kumbakonam

Brahmavidya: The Adyar Library Bulletin, Adyar

The Sanskrit Sahitya Parishat Patrika, Calcutta.

The Divine Life, Rishikesh

The Vedanta Kesari, Mylapore.

The Mysore Sanskrit College Magazine, Mysore.

The Kalpaka, Coimbatore

The Quarterly Journal of the Mythic Society, Bangalore.

Madhuravani Belgaum.

The Poona Orientalist, Poona.

The Journal of Oriental Research, Madras.


The Indian Thinker, Trivandrum.

The Journal of the Oriental Institute, Tirupati.

Journal of the University of Bombay.

The Kalyana Kalpataru, Gorakhpur.

The Kalyani ,, ,,



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

संपु० १] [सचिका १९

देवे च वेदे च गुरौ च मन्त्रे
तीर्थे महात्मन्यपि भेषजे च ।
अस्य स्वरूपस्य यथा स्वभाव-
स्तथा तथा सिद्धिरिति पुंसाम् ॥

॥ श्रीसदाशिवब्रह्मेन्द्रविजयकाव्यम् ॥

संस्कृतकलाशालाप्रथमपण्डितचरेण आण्डःहुरं ना. साम्बशिवशास्त्रिणा विरचितम् ।

॥ द्वितीयः सर्गः ॥

पुरा द्विशत्याः किल पत्तनस्य च [illegible] तत्पुरमध्यवात्ताम् ।
विभ्युक्तमार्गानुसरौ तु कौचित् पुण्यक्षमाश्चेत्रगतौ तमञ्जौ ॥ १ ॥

तैलिङ्गदेशोद्भववंशजातौ त्रिलिङ्गभूतीश्वरभक्तिभाजौ ।
स्फुलिङ्गवद्भास्वरविप्रवर्चःस्फुलिङ्गनाम्यकृतसूनुमासौ ॥ २ ॥

अभ्यागतातिथ्यविधानशौण्डौ सभ्यागतेभ्योऽभयदायिचित्तौ ।
सभ्यान्तरङ्गेङ्गितचारुवृत्तावित्यादिशेऽपि च दम्पती तौ ॥ ३ ॥

चिरात्त्रयोः शीतलभानुभानुकुभानुचक्षुःपदपद्मसेवया ।
बभूव सूनुः सुतनुर्महज्ञानुः प्रदीप्तभानुर्भुवि कामधेनुः ॥ ४ ॥

पिता प्रसूतस्य तु तत्सुतस्य जन्मे [illegible] सूतिकिं प्रचक्रे ।
गोदानभूदानसुवर्णदानसुधान्यवस्त्रादिवरप्रदानैः ॥ ५ ॥

स्मृत्युक्तरीत्या खलु जातकर्म [illegible] चक्रे ।
चकार नुन्नं जनकः सुतस्य पौष्यक्रियाप्यञ्जनाः सुतस्य ॥ ६ ॥

तथा व्यधादद्विषिता सुतस्य संतोषकृन्नामलवं कनाम्नम् ।
एकादशे नैजकुलीनपूर्वनतेश्वरस्मारकमेव नाम ॥ ७ ॥

शिवश्च रामोऽपि तथैव कृष्ण आराधिताः पूर्वतनैस्तनोऽयम् ।
सूनोः पिता श्रीशिवरामकृष्ण इतीड्यमानामभिधां चकार ॥ ८ ॥

मासे चतुर्थेऽप्युपनिष्क्रमोऽन्नप्राशोऽपि षष्ठे लिखिनाऽब्दपूर्तौ ।
शिशोः क्रमात्तस्य तु कर्णवेधौ [illegible]

सर्वाश्चराभ्यासमपारजङ्घा [illegible]
आचार्यवर्यैः खलु पञ्चमाब्दे [illegible]

गर्भाष्टमाब्दे स तु [illegible]
पिताऽनुकूलं निजवं [illegible] च तस्मै ॥ ११ ॥

अथात्र गायत्र्युपदेशमात्रात्तन्मन्त्रदेवः सविताऽन्तरभ्रः ।
विकासयामास हृदब्जकोशं निशारिणीमिवृणिनिष्तदीयम् ॥ १२ ॥

तदा तदीयं श्रुतियुग्मलम्बिहिरण्मयकुण्डलवाभाषे ।
मदा प्रदीप्तं मुखमण्डलं तत्प्रचण्डभा [illegible]

दिने दिने प्रातरयं विहाय शय्यां सहोदराय कवेरजायाः ।
नीरे निमज्जन्निखिलं घमर्षसूक्तीः पठन्सान्ध्यविधिं चकार ॥ १४ ॥

तीरे जपंस्तत्र सहस्रवारं गायत्रमन्त्रान्त्र सहस्रभानुम् ।
अथारुणैरेकपदा च [illegible]

पञ्चाक्षरीं पञ्चदशाक्षरीं च षडक्षरीं गणपतेः च मन्त्रम् ।
जप्त्वाऽष्टलक्ष्मीविहितार्द्धिदात्रीमष्टाक्षरीं गेहनवाप नित्यम् ॥ १६ ॥

ततः समिद्धे समिधः कृशानौ समाधानोऽथ स मन्त्रपूर्वम् ।
भक्त्याऽनुरक्त्या पितरौ प्रणम्य गुरोर्विशालं कुलनाम तूर्णम् ॥ १७ ॥

आचार्यवर्यं तु ननाम सोऽथमाचान्तसर्वागममत्र भक्त्या ।
धीचापलोत्सारिकृपार्द्रदृष्टिं वाचाशिषां शिष्यसमूहरक्षम् ॥ १८ ॥

शुश्रूषमाणोऽथ गुरुं गभीरं तस्यानुवत्योपविशंस्तदग्रे ।
तदीयवक्त्रागतवेदवाक्यझरीसदुच्चारणदत्तदृष्टिः ॥ १९ ॥

लोपं [illegible]
मुहुर्मुहुर्नैजमनोनिरूढमाम्नायमभ्यातुमतित्वरोऽभूत् ॥ २० ॥

भिक्षामटन्शुद्धकुलेषु सोऽयं तृप्तां अदातुं माजिनिर्मलत्वम् ।
रथां तनोर्मध्यदिने बभार दीक्षां ब्रह्मज्ञानिह धर्तुमिच्छम् ॥ २१ ॥

एवं स नित्यं नियमोपपन्नः पौर्णिमुकं व र्षं यजानः ।
यज्ञोपवीतेन मृगत्वचार्धं मेदुम्बरं च दधुरे भिक्षुवृत्तः ॥ २४ ॥

इत्थं निरूढां निशितामबन्ध्यां शास्त्रीं लोक्यानुदिनं प्रशान्तः ।
दान्तः स विद्याग्रहणेऽत्र पूर्वे षड्वर्षदुर्ललपरो बभूव ॥ २३ ॥

कालक्रमादेवमयं प्रवीणः सवह्मचार्याहृतदेशिकाभ्यात् ।
स ब्रह्मचारी तु कुशाग्रबुद्धिः श्रुतीस्तदज्ञैः समनंस्यतीव्र ॥ २४ ॥

इत्थं हि गच्छत्सु स वत्सरेषु केष्वप्यधीयान इहातिमोदात् ।
विना निषिद्धानि दिनान्यथायं बभूव संपादितसर्वविद्यः ॥ २५ ॥

सोऽध्यैष्ट वेदांश्चतुरस्तदङ्गान्यपारनिस्तारधरान्षडेव ।
षड्दर्शनीं काव्यकलाकलापजरत्तु हि ब्रह्मचतुरोऽतिधीरः ॥ २६ ॥

एवं समभ्यर्जितवेदविद्यो भूदेवसम्भावितचारुचरितः ।
सोऽयं चतुर्थोऽग्निरिवाबभासे आस्थानिनाद्यः परोक्षितुल्यः ॥ २७ ॥

चतुर्षु वेदेषु चतुर्मुखं तं सर्वं सशाखं निगमोन्मुखाः ।
विचक्षणं तं ततशब्दशास्त्रे चक्रोक्षरे पाणिनिदेव शाब्दिकाः ॥ २८ ॥

न्यायेऽक्षपादं धृतभूरिवादं वैशेषशास्त्रेऽपि कणादमेव ।
वाक्ये मुनिं जैमिनिमेव सांख्ये शास्त्रे प्रवीणं कपिलं दयालुम् ॥ २९ ॥

वेदान्तसूत्रेऽप्युपमानहीनं द्वैपायनं तापसभासमानम् ।
भाष्येऽपि सौत्रेऽथ परैरधृष्ये तं शाङ्करे शङ्करमूचिरेऽत्र ॥ ३० ॥

साहित्यचातुर्यकलाप्रवीणं वल्मीकजन्मानमपीह्यकीर्तिम् ।
वसिष्ठनेवात्र गरिष्ठकर्मठं श्रोतुर्धुरास्तं भुवि शस्तवन्मठम् ॥ ३१ ॥

संगीतशास्त्रेऽपि च शौण्डमेनं गन्धर्वराजं जगतुर्जनौघाः ।
धन्वन्तरिं रोगनिदानदक्षं सत्ये हरिश्चन्द्रमहेन्द्रबुद्धिम् ॥ ३२ ॥

वाणीवृतं सुन्दरपूरुषं तं पाणिं ग्रहीतुं नवयौवनश्रीः ।
स्पर्धां वहन्तीव मुदाऽत्र चक्रे वपुः समालिङ्ग्य समस्तमस्य ॥ ३३ ॥

समाप्तविद्योऽसि गृहं प्रयाहि जायां कुलीनां विवहानुकूलाम् ।
सर्वोपकारोचितमाश्रमं द्राक् द्वितीयमाप्त्या वितरौ मर स्वम् ॥ ३४ ॥

इत्थं निजाचार्यकृतानुमत्या सन्ग्रहियाग्रहणार्हवित्तम् ।
वितीर्य भक्त्या गुरुदक्षिणां स वेदव्रतस्नात इहाप गेहम् ॥ ३५ ॥

बहवो बहुविद्यमादरात्तं विनिवृत्तं गुरुमन्दिरात्सुवृत्तम् ।
तरुणं विनिशम्य तत्र तस्मै निजकन्या वितरीतुमाचकाङ्क्षुः ॥ ३६ ॥

धनिका इह जन्मपत्रिकास्तज्जनकं प्राप्य ददुर्निजात्मजानाम् ।
सकलाः स तु ता मुदा गृहीत्वा निखिलान्प्रेषयदत्र सत्कृतांस्तान् ॥ ३७ ॥

रुचिरा रुरुचेऽत्र जन्मपत्री बहुसौहूर्तिकलोडितासु तासु ।
जनकाय सुधीमणेस्तदानीं सकले विषयेऽपि संगता कात्रित् ॥ ३८ ॥

बुधसंमतजन्मपत्रिकायां लिखितं नाम पिता पपाठ तूर्णम् ।
बुबुधे स तु कस्यचित्सुकन्यामथ मध्यार्जुनवासिनो द्विजस्य ॥ ३९ ॥

कुलशीलवयोधनातिरूपैरनुरूपामिह तां विवेद विप्रः ।
निजपुत्रमणेः पिता कुमारीं श्रुतिपारङ्गतविश्रुतस्य तस्य ॥ ४० ॥

स तु तस्य गृहं गतोऽथ विप्रो बहुमानादखिलैः कृतादरोऽयम् ।
तनयां विनयादिसद्गुणां तां निजपुत्राय ययाच पूर्वबन्धुम् ॥ ४१ ॥

प्रददामि सुतां भवत्सुताय भुवि विभ्रान्तयशोभृते वराय ।
इति याचनमस्य बन्धुवर्गैर्बहुमेनेऽथ समं सुतापिताऽपि ॥ ४२ ॥

सकलेडितसद्गुणेऽथ दृष्टे सुमुहूर्तेच मुहूर्तवेदिसाद्भिः ।
उभयोरनयोः समस्तु योग वरकन्यावरयोरिति प्रकल्प्तम् ॥ ४३ ॥

अथ तादृशि सत्तमे मुहूर्ते कृतवैवाहिकमण्डपे पिताऽयम् ।
अदिशत्सुवराय कन्यकां स्वां सहभार्यः कनकाङ्गसङ्गिभूषाम् ॥ ४४ ॥

सुमतिः पतिरत्र चारु वध्वा मृदुलं पाणिमथाग्रहीत्स मोदात् ।
शुभरेखकरेण साहसेन त्रिदशेन्द्रीविषदाहरन्नयोः श्रियम् ॥ ४५ ॥

कुलसंततिरत्र सत्तरत्नात् कुलजोद्धारकृते त्वदत्र दीर्घा ।
इति मङ्गलतन्तुजालभूतं महिलोरःस्थले बबन्ध सतो । ४६ ।

विकसत्कुसुमालिरिव्यवृष्टिः पिहितो दम्पतिमूर्धनीह कीर्णा ।
निपपात तदा श्रमोदहारी निरवच्छेदझरी झरीव पूर्णा ॥ ४७ ॥

अथ मङ्गलतुङ्गवाद्यघोषाः सकलाशान्तविसारिणः प्रतोषाः ।
बधिरीकृतसर्वकर्णपूराः प्रबभूवुर्गगनान्तरप्रचाराः ॥ ४८ ॥

श्रुतिपारगवल्लनिःसरत्सुकुमारामितवेदनादमोदा ।
निखिलेरितसाधुशब्दवादा परिषद्देवसभेव भासते स्म ॥ ४९ ॥

अथ सुन्दरकन्धरामिनिर्यन्मधुरापारगभीरगानसाराः ।
निकरा जगुरत्र चारु मोदाद् जिनवीणानिनदाः सुवासिनीनाम् ॥ ५० ॥

अथ वारविलासिनीस्त्रियोऽपि बहुलज्जापसृताप्सरःसमूहाः ।
ननृतुः प्रमुदाऽत्र भावगर्भैचतुराङ्गाभिनयानुरूपगीताः ॥ ५१ ॥

ज्वलनः पवनेन चाल्यमानो ज्वलितो दक्षिणगामिभिः शिखाभिः ।
महितोऽस्त्यनयोर्विवाह एव इति विश्लाघन .रिवद्भासे ॥ ५२ ॥

तदनु प्रमुखे विवाहवेद्यां ज्वलदग्रे ज्वलने जुहाव लाजान् ।
हृदयं विमलं सदाऽस्तु शुभ्रं त्विति संप्रार्थनकारिवद्युगं तत् ॥ ५३ ॥

समिधो विदहन्स मन्त्रपूर्वं निहितास्तत्र वरेण वह्निराशु ।
चटचच्छठशब्दकैतवेन पटुजाशीर्वचनं गदंश्चकाशे ॥ ५४ ॥

ध्रुवि सप्तरसज्ञतास्ति वह्नेरिति मत्वेव युवं प्रदक्षिणेन ।
अथ सप्तपदीविधिं वितन्वत्तदिमन्तं प्रजगाम सप्तवारम् ॥ ५५ ॥

चिरमुस्थिरभासुरोपले तद्गृहिणीपादमसौ वरो न्यधत्त ।
स्थिरता भवतादिहानिशं ते त्विति मन्त्रं प्रवदन्प्रबुद्धतन्त्रः ॥ ५६ ॥

इह दम्पतिभावमेत्य नौ व्याद्वयोः स्नेहभरो निरन्तरालः ।
अनले स तु तैलदीर्घधारामदिति प्राज्यमवादथान्यधाराम् ॥ ५७ ॥

अथ वैदिकसार्वभौमवर्यं परमाचार्यजतोषयद्वरोऽयम् ।
धनधान्यगुरुस्त्रहेमदानैः विलसच्छ्रोत्रियदत्तदक्षिणोऽत्र ॥ ५८ ॥

जनता विततार समागताऽभूदतुलं वीक्षितुमत्र तद्विवाहम् ।
प्रबलं धनिनोरितस्ततोऽपि पृथुकैतूहलपूरितान्तरङ्गा ॥ ५९ ॥

सदृशावखिलेषु संस्तौ तौ वरकन्यापितरौ तु सर्वसभ्यान् ।
सुमनीरसुमार्द्रचन्दनाद्यैरपि ताम्बूलफलैरथोपनेतुम् ॥ ६० ॥

बहुभक्ष्यगुलेह्यचूष्यपेयैः सहितं भोज्यमथुः प्रशस्तपात्रम् ।
इह शिष्टविशिष्टवैदिकेभ्यः प्रथमं तत्परिचारका विशुद्धाः ॥ ६१ ॥

मुदमापयतां स्वबन्धुवर्गान् नवसंबन्धभृतौ तु तौ नवीनैः ।
तपनीयमयार्हतन्तुवर्यग्रथितैः पट्टपटैरथातिमानैः ॥ ६२ ॥

तदनु प्रमुखैर्विपश्चिदुद्यैः समुपेता चलति स्म भोजनान्ते ।
परिषद्विदुषामपश्चिमेन सह वैवाहिकमण्डपे वरेण ॥ ६३ ॥

विबुधा निगमागमप्रवीणा विविधं तत्र विशारदं प्रवादम् ।
अगदन्विमदं विशिष्टशास्त्रे धुरि जामातुरतन्द्रिता धुरीणाः ॥ ६४ ॥

प्रवरोऽत्र वरोऽपि तत्र तत्र विदुषां वादविशोधनं वितन्वन् ।
वयसाऽचरमोऽप्यथाबभाते महनीयं परमोऽतिशास्त्रजेन ॥ ६५ ॥

सकलाश्च सुधा वधूवरेण्यधवयोस्तत्र सदाशिवं प्रचक्रुः ।
चिरजन्मजपुण्यपङ्कजातौ प्रथमं पुर्विधिसंस्तौ सुधास्तो ॥ ६६ ॥

उभयोः पितरौ प्रमोदभारौ विदधाते विदुषां महान्तमेषाम् ।
असमानममेयमातानां बहुसन्मानमथात्र तद्दिनेऽहम् ॥ ६७ ॥

विरते दिवसेऽथ सायमीड्यं निहितं कर्म विधाय भार्यया ऽयम् ।
गुरुणा चरुणा ऽनुचोदितः सन् विदधे होमविधिं प्रविष्टसत्र ॥ ६८ ॥

इति पञ्चदिनानि सङ्गतास्ते निवसन्तो धृतकौतुकाः पुरं स्वम् ।
विहिते सति शेषहोमकार्ये वरसत्कारसुमानिताः प्रजग्मुः ॥ ६९ ॥

उषिता निलयेऽत्र कन्यकाया वरसंबद्धजनास्तु मासैकम् ।
अथ नूतनतण्डुलान्नपाकात्परमीयुः पुरमाशु नैजनेते ॥ ७० ॥

निजभर्तृगृहप्रवेश आसीत् नववध्वा गुणनल्लभन्मुहूर्ते ।
अथ सा गृहिणीपदं प्रपेदे गृहमासाद्य निजं वधूः सुभर्त्रा ॥ ७१ ॥

परिणयावेधिरासीदेवमाशाप्रशस्तः
परिणतबुधधुर्यो नान्ध्रवंशोद्भवस्य ।
प्रथिततरुहशास्त्रारण्यदेशे विहर्तुः
कविवरनरसिंहस्यात्र विख्याताकीर्तेः ॥ ७२ ॥

॥ इति श्रीसदाशिवब्रह्मेन्द्रविजयकाव्ये द्वितीयः सर्गः ॥

॥ आर्यापञ्चदशीस्तोत्रम् ॥

करकलितचापबाणां कल्हाराङ्घ्रिं नमामि कल्याणीम् ।
कंदर्पदर्पजननीं कलुषहरां कामितार्थफलदात्रीम् ॥ १ ॥

एषा स्तोतुं वाणी नैव समर्था तवेशि महिमानम् ।
शेषोऽप्यब्दसहस्रैः शेषं क्षतवान्महेशि तव चरितम् ॥ २ ॥

ईशित्वादिसुपूज्यानिन्दिन्दिरकेशभारसच्छायाम् ।
इन्दीवरदलनयनामीप्सितदात्रीं नमामि शर्वाणीम् ॥ ३ ॥

लसदरुणभानुकोटिद्युतिनिधिमम्बां सुरेन्द्रलक्ष्यपदाम् ।
ललितां नमामि बाले लालितशिवहृदयकमलकलहंसीम् ॥ ४ ॥

ह्रींकारबीजरूपे हिमगिरिकन्ये हरीन्द्रभववन्द्ये ।
हिमकरवलक्षवक्त्रे हितायं नव नः सदा महाराज्ञि ॥ ५ ॥

हर्षोत्करजनयित्री हसितज्योत्स्ना तवेयमनवद्ये ।
हरगलहालाहलमपि हरचि त्रैलोक्यमोहनिर्मिते ते ॥ ६ ॥

सकलमनोरथपूराने नित्यपि जाग्रते नतस्य सदा निपुणे ।
मंसेऽच्छे सुन्दरु. कदाऽहं लोकैर्न लच्छकलदाता ॥ ७ ॥

कनकरुचे चतुरगते मठि कालहरणप्रकुशलधिये ।
कान्ते कङ्कणहस्ते कम्बुग्रीवे नमोऽस्तु ते करुणे ॥ ८ ॥

हरनयनानन्दकरे हराङ्कसंस्थे हरप्रमुखवन्द्ये ।
हरनटनपरायणभूते हरार्धदेहे नमोऽस्तु ते सुकृपे ॥ ९ ॥

लक्ष्मीं करुणा या लक्ष्मीपतिहृदयमम्ब कर्तुमलम् ।
लक्ष्यं कुरु मां नित्यं लावण्यामृततरङ्गमाले त्वम् ॥ १० ॥

हींकारगर्भे हिमाचलमन्दिरोल्लसिते ।
हेरम्बप्रियजनके हे वसुधे देहि मे क्षमां नित्यम् ॥ ११ ॥

सम्पत्प्रदानविधौ कटाक्षणं निगमसारतत्त्वमयि ।
साक्षिदयं वदने कलयाश्रयसुधाकटाक्षधारां ॥ १२ ॥

करकङ्कणनिर्दलयन्निव विकसितचरणकमलमकरन्दम् ।
करुणापयोनिधे मे कामपि स्वान्तषट्पदः पिबतु ॥ १३ ॥

लसदिक्षुचापसुमशरलक्षितदोर्लक्ष्मीर्यजनेन ।
लक्षाधिकदैत्यकुलं लघुपटवासं कृतं कथं चित्रम् ॥ १४ ॥

हींकारकेलिभवने हिमकरशीतलयङ्कमञ्जुपर्यङ्के ।
हृदयसरोजे मे वस हृदयानन्दप्रबोधपरहंसि ॥ १५ ॥

आर्यापञ्चदशीं तामार्यां यो भजति शुद्धधीर्नित्यम् ।
मार्ये लक्ष्मीवाण्यौ पर्यायतस्य सादरं भवतः ॥ १६ ॥

इत्यानन्दनाथपादपद्मोपासिना काश्यपगोत्रोत्पन्नेनान्ध्रेण त्यागराजनाम्ना विरचितमार्या-

पञ्चदशीस्तोत्रं संपूर्णम् ॥



पार्थिवसंवत्सरीयफाल्गुनमासे श्रीरङ्गक्षेत्रे विराजमाने श्रीशंकरगुरुकुले
जगद्गुरूणां श्रीमदाचार्येन्द्राणां जयन्ती–आराधनामहोत्सवावसरे मायूर-
क्षेत्रनिवासिनां श्रीशिवरामकृष्णशास्त्रिणां श्रीमद्भागवतकथापन्यासप्रसंगपूर्तौ
श्रीवेङ्कटरामशास्त्रिभिः समर्पितेयं

॥ श्लोकमञ्जरी ॥

शिवस्य रामस्य च नन्दसूनोरभिख्यां शुभामर्थवतीं दधानाः ।
येऽद्वैतमेव श्रुतिमौलिसिद्धं नाम्ना स्वकीयेन विबोधयन्ति ॥ १ ॥

कृष्णस्य रामस्य च मूर्तिभेदे स्थितेऽपि विष्णुर्भगवान्यथैकः ।
एवं ह्यभेदः शिवविष्णुमूर्त्योरिति स्फुटं यस्य च नाम वक्ति ॥ २ ॥

तेषां त्रयाणामपि पादपद्मे निर्व्याजभक्त्या हि विशुद्धचेतसः ।
गुणानुकीर्त्या हि महत्तमा ये कुर्वन्ति लोकं भुवि भक्तिमन्तम् ॥ ३ ॥

अस्मादृशानां किल भाग्यपुञ्जादाकर्षपादालयमागता नः ।
अमी महान्तो भगवत्कथाभिः पीयूषतुल्याभिरपाययंश्च ॥ ४ ॥

आचार्यपादेषु समर्पयन्तं सर्वं स्वकीयं महजीवितं च ।
प्रवर्तकं श्रीभगवत्कथानां न विस्मरामो *गुरुभक्तवर्यम् ॥ ५ ॥

अनन्यसाधारणवाग्विलासोऽप्यनन्यसाधारणभक्तिनिष्ठा ।
द्वयं द्वयोः संगतमत्र दृष्टं गुरोः कृपातश्चिरजीविनौ स्ताम् ॥ ६ ॥

---

* 'गुरुभक्तशिखामणिः' 'शास्त्रप्रसारभूषण' इत्यादिविरुदाङ्कित श्रीशंकरगुरुकुलाख्यधर्म-
स्थापकं ब्रह्मश्री टि. के. बालसुब्रह्मण्यार्यम् ।

॥ विवाहायननिर्णायकः ॥

नल्लूर् ग्रामाभिजनेन कल्याणसुन्दरशास्त्रिणा विरचितः ॥

(पूर्वतोऽनुवृत्तः)

एतावत्पर्यन्तं तात्पर्यदर्शनव्याख्यानानुसारेणोत्तरायणमेव विवाहस्य काल इत्यभिहितम् । इतः परं स्मृतिमुक्ताफलानुसारेणापि तान्निर्णयो लिख्यते । स्मृतिमुक्ताफले तुरीयपरिच्छेदे सौरमासे विशेषोऽभिहितः— 'पित्र्ये चान्द्रमसं श्रेष्ठं सौरं स्मार्तेष्वनिन्दितम् । स्मार्तेषु विवाहादिषु' इति । पुनश्च 'विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः । आब्दिके पितृकार्येऽपि चान्द्रो मासः प्रशस्यते ॥' इति । आब्दिके सांवत्सरिकश्राद्धे पितृकार्ये मासिकादौ । अपिशब्दान्माससंवत्सरसाध्ये यज्ञव्यतिरिक्ते सर्वस्मिन् देवकार्ये चान्द्रो मासः प्रशस्यते इति स्मृतिनिदर्शनाभ्यां चान्द्रेण संवत्सरेण पित्र्यादिश्राद्धानि कुर्वतामपि 'विवाहादौ स्मृतः सौरः' इति स्मृत्या सूत्रमनादृत्य सर्वैरपि शिष्टैः सौरमासा एव समावर्तने विवाहे चाङ्गीकृताः । तथा 'ऋतवः चान्द्राः सौराश्चेति द्विविधाः । अयं व्यवस्थितविकल्पः' इति वैद्यनाथदीक्षितीयवचनेन समावर्तने विवाहे च सौरा ऋतव एवाङ्गीकृताः । एवमेव 'श्रौतस्मार्तकर्मानुष्ठाने तु मकरकर्कटकसंक्रान्त्यादिक एव अयनद्वयकालः' इति अयनद्वयस्य सौरत्वप्रतिपादनेन सर्वैरपि शिष्टैश्चान्द्रमानबोधकं सूत्रमप्यनादृत्य समावर्तने विवाहे च सौरमयनमङ्गीकृतम् । इत्थमेव 'संवत्सरः चान्द्रः सौरश्चेति द्विविधः । अस्मिन् स्थले तुल्यबलविरोधे व्रीहियवयष्टिकल्पः । स च देशकुलाचारानुरोधेन व्यवस्थितो विज्ञेयः' इति वचनेन समावर्तने विवाहे च सौरः संवत्सर एवाङ्गीकृतः । एव स्मृतिमुक्ताफलानुसारेणापि विवाहादिः सौरे मासि सौरेषु ऋतुषु सौरे अयने सौरे संवत्सर एव कर्तव्यत्वेन विहितः । 'सर्वऋतवो विवाहस्य' इति सूत्रं तु कर्मविपाकप्रकाशतत्पर्यदर्शनस्मृतिमुक्ताफलवर्णाश्रमधर्मकाण्डेषु चान्द्रमानेन व्याख्यातत्वाच्चान्द्रे मासादौ कर्तव्यत्वेनाभिहितः । एवं परस्परं विरोधे प्राप्ते सति उदगयनसूत्रतात्पर्यदर्शनव्याख्यानं स्मृतिमुक्ताफलतुरीयपरिच्छेदवाक्यानि शिष्टानां पूर्वेषामाचारं चानुसृत्य सौरे मासि सौरेषु ऋतुषु सौरेऽयने सौरे उत्तरायण एव समावर्तनविवाहौ कर्तव्याविति निर्णयः । इत्थमेवानुतिष्ठन्ति इदानीमपि शिष्टाः । किं च 'सर्वऋतवो विवाहस्य' इति सूत्रानुसारेणायनद्वयेऽप्यभ्युपगते सति मिथुनमासदर्शनन्तरादिनादारभ्य कर्कटकसंक्रान्तेः प्राक् मध्ये उत्तरायणेऽपि मिथुनमासे विवाहस्य करणासंभवः स्यात्, आषाढमासस्य निषेधदर्शनात् । तथा धनुर्मासदर्शनन्तरादिनादारभ्य मकरसंक्रान्तेः प्राक् मध्ये पौषमासस्य निषेधादर्शनाद्दक्षिणायनेऽपि धनुर्मासे विवाहकरणस्य संभवः स्यात् । एतदुभयमपि सर्वेषामपि विदुषां सर्वेषाऽनिष्टमेव । एतेनापीदं सूत्रमनादर्तव्यम् । अपि च 'सर्वऋतवो विवाहस्य' इति सूत्रे सुदर्शना-

चार्यैः स्वरूपकथनेन पदार्थवर्णनमात्रं कृतम्; न तु स्वाभिमतेन वर्त्मना निर्णायकेन व्याख्यानेन वा व्याख्यातम्। विवाहादिकालनिर्णायकास्तु त एव, ये तावत् शिष्टपरंपराचारागताः स्वयमपि श्रुतिस्मृत्याद्युक्तान् कर्मणो ग्रहणे अग्रे उत्तिष्ठन्ति। यच्चाहशैः शिष्टैरभिमतकाले स्वयावर्तनविवाहादीनि कर्मणि कर्तव्यत्वेन गृहीतानि, तानि कर्माणि तन्मात्रनिर्णीतकाल एवास्माभिरपि संतुष्टेन मनसाऽनुष्ठेयानि।

किं च, सुदर्शनाचार्यैः 'निर्णये तु शिष्टाः प्रमाणं सर्वत्र' इति स्वकृतव्याख्यानभागेन कस्यचिद्विरोधस्य परिहारः सूचितः। तथा हि- बोधायनाचार्यैः प्रथमं 'विवाहे व्याख्यास्यामः उदगयन आपूर्यमाणपक्षे' इत्यत्र सूत्रेऽनेन सामान्येन हेम्न एकत्वेन प्राप्तावादितम्। अनन्तरं तैरेव 'सर्वे मासा विवाहस्य शुभकर्मण्यपरपक्षवर्जं' इति सूत्रेण सर्वे मासा प्राप्तेषादिताः। भरद्वाजमहर्षिभिस्तु 'उदगयन आपूर्यमाणपक्षे गृहीत उदगयनं व्याख्यास्यन्नेव पुनरिदं कर्म दाक्षिणायन इत्यपरं विज्ञायते दक्षिणायन आपूर्यमाणपक्षे पितृयुक्ते पुनर्विवाहकर्म' इति सूत्रेणोत्तरायणदाक्षिणायने उभे अपि विवाहकाले निर्दिष्टे। एवं सूत्रयोः परस्परविरुद्धार्थत्वं दृश्यते। न च विरोध इत्थं पूर्वाचार्यैः परिहृतः, 'उदगयन आपूर्यमाणपक्षे' इति पूर्वपूर्वं तावदुत्तरायणस्य मुख्यकालत्वबोधकम्, 'दक्षिणायन आपूर्यमाणपक्षे' इत्यादिसूत्रं तु दाक्षिणायनस्य गौणकालत्वसाधकम्। इयमेव रीतिः 'सर्वे मासा विवाहस्य शुभकर्मण्यपरपक्षवर्जं विवाहस्य' इत्यादेः सूत्रान्तरस्यापि। एवं च सर्वेषामपि सूत्राणां सार्थक्यं सिद्धम्। यं च मुख्यकाले उत्तरायणे समावर्तनं प्रथमविवाहः, गौणकाले दाक्षिणायने तु द्वितीयादिविवाहः कर्तव्य इति निर्णयः। अयमेव नियम एतावत्कालपर्यन्तं पूर्वैराचार्यैः प्रतिष्ठापितः, अस्मिन्नद्यतनैः शिष्टैश्चाद्रतो भवति। अयमेव नियमः बोधायनीयभरद्वाजीयग्रन्थेषु प्रसिद्धोऽस्माभिः सर्वैरप्यनुष्ठेयः अनुष्ठीयते च। पूर्वैरेव निर्णीतोऽयं नियमः। अत एव कालनिर्णये सुदर्शनाचार्यैरपि 'निर्णये तु शिष्टाः प्रमाणं सर्वत्र' इति व्याख्यानभागेन सूचितः। तस्मात्पूर्वोक्तरीत्या पूर्वैरेव शिष्टैरुदगयनसूत्रतात्पर्यदर्शनव्याख्यानस्मृतिमुक्ताफलादिनिर्णयैर्विवाहकालश्च। अयमनद्यतनैरद्यतनैश्च शिष्टैरनुसृतो विद्वांसो देशान्तरीयाणामान्ध्रमाहाराष्ट्रकर्णाटकादीनां निबन्धकर्तॄणां धर्मसिन्धुनिर्णयसिन्धुनिर्णयजातकामन्दकादीनि कदाचिदप्युदाहरणत्वेनाप्यनुदाहृत्य पूर्वनिर्णीतनिर्णयेनैव विवाहादिकं कृत्वा कारयित्वा च क्षेमवन्तो भवेयुरिति श्रीगिरिसुन्दरीकल्याणकुञ्जरो सप्रार्थयते इति शिवम्॥



॥ श्रीः ॥



श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमच्छंकरभगवत्पादप्रतिष्ठित
श्रीकाञ्चीकामकोटिपीठाधिप जगद्गुरु श्रीमच्चन्द्रशेखरेन्द्रसरस्वती
श्रीपादैः क्रियते नारायणस्मृतिः ।

शिवविष्ण्वादिमाहात्म्यप्रतिपादनपूर्वकं यथाधिकारमुपासकस्य, उपास्यव्यक्तिविषयभक्त्युद्रेकाधानपुरस्सरं उपासनादिधर्मप्रतिपादनार्थमेव पुराणादयो ग्रन्थाः प्रवृत्ताः । तेषां च सर्वेषामपि प्रामाण्यं तुल्यकक्षमेव न्यायेन सिध्यति ।

एवंसति क्वचिदेकत्र ग्रन्थे अन्यग्रन्थस्य तत्प्रतिपाद्यस्य विषयस्य वा यदि निन्दापराणि वचनान्युपलभ्येरन्, तदा तत्समाधानं 'नाहिनिन्दान्यायेनैव' कर्तव्यम् । तं च न्यायमनभ्युपगच्छतां स्वाभिप्रेतागमस्यापि प्रामाण्यं नैव सिद्ध्येत् । अतस्तादृशान्यपरवचनदर्शनमात्रेण निर्युक्तिकं अन्यतरपक्षे अभिमानं कृत्वा इतरग्रन्थानां तत्प्रतिपाद्यधर्माणां च दूषणोद्भावनं विदितशास्त्रमर्यादानां धीमतां नैव युक्तम् । श्रद्धावतो जनस्य मतिविपर्यासः, तेन च देवे देवताद्वेषः महाप्रत्यवायकरः भवतीति नैतदुपेक्षणमर्हति ।

अनेनैवाशयेन शिवपरवचसां विषये अन्यैरारोपितानां दूषणानां समुद्धरणनिमित्तं श्रीकालहस्तीशविलासादिग्रन्थकारैः कृतः प्रयत्नः प्राप्तावसरः सफलः शास्त्रानुगुणश्चास्ति ।

अस्मिन्नेव विषये शिवतत्त्वविवेकादिग्रन्थेषु श्रीमन्तो अप्पय्यदीक्षितेन्द्राः, शिवतत्त्वरहस्यग्रन्थे श्रीमन्तो नीलकण्ठदीक्षितेन्द्राः, वैदिकविजयध्वजकाराः, अन्येऽपि च बहवो निबन्धारः निपुणं तत्त्वनिरूपणं कृतवन्त एव ; तथापि अस्य श्रीकालहस्तीशविलासप्रबन्धकर्तुः तत्त्वप्रदर्शनशैली सर्वातिशायिनी उपलभ्यते । इयं च शैली न केवलं निष्कृष्टपरिष्कारसुभगा सती न्यायादिशास्त्रनिपुणानेव रञ्जयति, परं तु ललितललितं आपामरावबोधक्षमं निरावाधसुलभसुलभयुक्तिसंदृब्धा सती सर्वशङ्कातमोभानुः सहृदयहृदयाकाशे परं राजत इति, परं प्रमोदस्थानमिदं एतत्प्रबन्धमुद्रणं शास्त्रैकशरणानां श्रद्धावतां उपासकानां रसिकतल्लजानां च इति शुभम् ॥

विजययात्रास्थानम्, वसन्तकृष्णापुरम् ।
सर्वजित् संवत् भाद्रपदकृष्णतृतीया भृगुवासरः ॥

नारायणस्मृतिः

॥ श्रीः ॥

॥ शिवपरवचसां तामसत्वोक्तिभङ्गः ॥

[श्रीकालहस्तीशविलासादुद्धृतः]

अत्र केचिच्छिवप्रतिपादकानां पुराणागमानां तामसत्वं प्रतिपादयन्ति। तेषामयमाशयः—

मत्स्यपुराणे—

संकीर्णास्तामसाश्चैव सात्त्विका राजसास्तथा ।
यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा ॥

तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ।
अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते ॥

[* शिवपरवचसां तामसत्वोक्तिभङ्गाख्योऽयं लघुनिबन्धः श्रीकालहस्तीशविलासनाम्नि महति निबन्धे विद्यमानेषु बहुषु विलासेषु एकतमः। तत्र च परमशिवस्य सर्वोत्तमत्वम्, तदुपरि परैरुद्भावितानां दोषाभासानां निराकरणं च सम्यगनुवर्णितम्। तन्माहात्म्य च बहुधा प्रपञ्चितम्। अत्र तु परमशिवस्य तत्प्रतिपादकपुराणानां शैवागमानां च यत्तामसत्व शिवद्वेषविदूषिताशयैरुच्यते, तदनूद्य सयुक्तिकं सम्यक् खण्डनं क्रियते। एतच्च आस्तिकधुरीणानां सर्वेषामपि मनःप्रमोदाय भवेदितीदानीं प्रकाशीक्रियते। अस्य च मातृका श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीजगद्गुरु श्रीकाञ्चीकामकोटिपीठाधिपैः श्रीस्वामिवर्यैः 'अवश्यं सद्य एव प्रकाशीकरणीयेषु ग्रन्थेषु प्रथमतयोऽयम्' इति सानुग्रहं प्रदत्ता। एतस्मिन् विषये श्रीस्वामिवर्याणां सविधे बहुवारप्रणतिपुरस्सर कार्तज्ञ्यं विज्ञापयामः ॥]

राजसेषु तु माहात्म्यमधिकं ब्रह्मणो विदुः ।
सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ॥

येष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ।
संकीर्णेषु सरस्वत्या माहात्म्यमधिकं विदुः ॥ इति ।

एतदुक्तं भवति । अधिक्षेत्रज्ञ .. ब्रह्मणः । तस्यापि केषुचिदहःसु सत्त्वमुद्रिक्तम्, केषुचित्तमः, केषुचिद्रजः । तथा च केचिद्ब्रह्मकल्पाः सत्त्वप्रायाः, केचिद्रजःप्रायाः, केचित्तमःप्रायाः । एतेन सत्त्वप्रायेषु तदितरेषु चाहःसु यानि पुराणानि ब्रह्मणा प्रोक्तानि तेषां परस्परविरोधे सति सात्त्विकाहःप्रोक्तं पुराणमेव यथार्थम्, सत्त्वनिष्ठेन ब्रह्मणा प्रोक्तत्वात् ॥

गीतासु च— 'सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ (१४. १७)

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ (१८. ३०–३२) इति ।

सर्वान्पुराणार्थान् ब्रह्मणः सकाशादधिगम्यैव सर्वाणि पुराणानि पुराणकाराश्चक्रुः ।

यथोक्तं कथयामि..... दक्षाद्यैर्मुनिसत्तमैः ।
पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥

तस्मात्सत्त्वाद्युद्रेकवता ब्रह्मणा सात्त्विकादिषु कल्पेषु प्रोक्तत्वात्सात्त्विकादिव्यपदेशः पुराणानाम् । 'अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते' इति वचनाच्छिवप्रतिपादकानां पुराणानां तामसत्वम्; तत्प्रतिपाद्यत्वाच्छिवस्य तामसत्वम् । न च तस्य श्रेयःप्रापकत्वम्, 'तमसो मोह एव च' 'इत्यादिवचनात् । सत्त्वात्संजायते' ज्ञानं श्रेयसि तत्र खलु सत्त्वतनोर्नृणां स्युः' इति भागवतवचनात् । तत्प्रधानत्वाद्विष्णोरेव श्रेयःप्रापकत्वम् ॥

अन्ये तु— एष मोहं सृजाम्याशु यो जनान्मोहयिष्यति ।
त्वं वै रुद्र महाबाहो मोहशास्त्राणि कारय ॥

अतथ्यानि वितथ्यानि दर्शयस्व महाभुज ।
प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु ॥

इत्यादिवराहपुराणवचनेन शिवप्रतिपादकानां मोहार्थकत्वेनाप्रामाण्यमिति वदन्ति ॥

तदयुक्तम् । यद्यपि तमोगुणस्य मोहहेतुत्वं सर्वासिद्धम्, तथाऽपि शिवस्य तत्प्रतिपादकपुराणागमाना च न तामसत्वम्, प्रमाणाभावात् । तथा हि—

किमिदं तामसत्वम् ? तमोगुणजन्यत्वं वा, स्वेतरगुणासंसृष्टतमोजन्यत्वं वा, इतरानभिभूततमोजन्यत्वं वा, तमोगुणजन्यविशिष्टत्वं वा, तमोविशिष्टकर्तृकत्व वा, तमोगुणविशिष्टप्रतिपादकत्वं वा, तमोगुणप्रधानप्रतिपाद्यत्वं वा, अन्यद्वा ॥

नाद्यः, रुद्राद्यात्मना नित्यत्वेनातामसत्वात् । सर्वस्य प्रपञ्चस्य गुणत्रयजन्यत्वेन त्वत्संमतानां पुराणागमानामपि तामसत्वप्रसङ्गात् । न च तमोमात्रजन्यत्वं (वा) विवक्षितम्, एकस्यानारम्भकत्वेनासिद्धेः । अत एव न द्वितीयः, सत्त्वस्य गुणस्य गुणान्तरयुक्तस्यैव जनकत्वेनेतरासंसृष्टतमोगुणजन्यत्वस्याप्रसिद्धत्वात् । न तृतीयः— रुद्रस्य नित्यसिद्धेन प्रकृते तदासिद्धेः, तत्कर्तृकाणां शैवागमानाम्,

अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥

इति विष्णुपुराणवचनात् व्यासकृतानां सर्वेषामपि तामसत्वाभावात् । अन्यथा त्वदभिमतानामपि तामसत्वप्रसङ्गः, तुल्यन्यायत्वात् । नन्वस्तु तमोगुणजन्यदेहादिविशिष्टस्य रुद्रस्य तामसत्वमिति चतुर्थः पक्षः, रुद्रस्य संहारकर्तृत्वेन संहारस्य तमोगुणकार्यत्वेन सर्वपुराणप्रसिद्धत्वादिति चेत्, मैवम्, विष्णोः संहारकर्तृत्वाभावेनानीश्वरत्वप्रसङ्गात् । न च संहार प्रति रुद्रादिशरीरद्वारा कारणत्वं विष्णोः; पालनं प्रति तु साक्षादेवेति वाच्यम् । साक्षात्संहारकर्तृत्वस्याप्रामाणिकत्वेन तस्य तामसत्वासिद्धेः । त्वया सकर्षणस्यैव संहर्तृत्वकथनाच्च । सर्वत्र साक्षाद्वा परंपरया वा कारणत्वसंभवे तारतम्यकल्पनायां प्रयोजनाभावेन तस्यापि तामसत्वप्रसङ्गात् । वैपरीत्यस्यापि सुवचत्वाच्च । पालनस्य प्राकृतसत्त्वगुणप्रयोज्यत्वेन विष्णोरपि प्राकृतत्वप्रसङ्गात् । तस्यापि भूभारावताराय दैत्यादिसंहारकारणत्वेन रुद्रस्यापि कालकूटगिलनान्धकासुरत्रिपुरादिनिग्रहद्वारा जगद्रक्षकत्वस्य पुराणप्रसिद्धत्वेन सात्त्विकत्वतामसत्वव्यत्ययप्रसङ्गाच्च ॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तनुवा शंतमया गिरिशंताभिचाकशीहि ॥

इति शिवशरीरस्य तामसत्वनिषेधाच्च । अस्यार्थः— हे गिरिशंत, हे रुद्र, अपापाना काशते प्रकाशत इत्यपापकाशिनी, शिवा क्षेमंकरी, या तनूः शरीर, शंतमया अत्यन्तसुखहेतुभूतया तन्वा नः अस्मान् प्रतिचाकशीहि प्रकाशस्वेति । न हि तामसस्य शरीरस्याघोरत्वं आत्यन्तिकसुखहेतुत्वं, अपापान् प्रति प्रकाशमानत्वं वा संभवति । तस्माच्छिवशरीरस्य न तामसत्वम् ॥

तर्हि संहारस्य तमःकार्यत्वप्रतिपादकानां पुराणानां का गतिरिति चेत्, घोरशरीरविषयत्वात् । तथा च श्रुतिः— 'रुद्रो वा एष यदग्निस्तस्यैते तनुवौ, घोरान्या शिवान्या' इति । प्रत्युत शिवस्यैव विष्ण्वादिशरीरद्वारा पालनादिकर्तृत्वं वक्तुं युक्तम् । श्रूयते च विष्णोः रुद्रशरीरत्वम्— 'यद्रुद्रमोर्धारां जुहोति यैवास्य शिवा तनूस्तां तेन प्रीणाति', 'अग्निर्वसुस्तस्यैषा धारा विष्णुर्वसुस्तस्यैषा धारा''वसोर्धारां जुहोति' इति । अतोऽग्नेर्विष्णोश्च रुद्रशरीरत्वाभावे तदुभयदेवताकवसुधाराहुत्या रुद्रतनूः कथं प्रीता भवति, विनियुक्तविनियोगे विरोधात् । तदुक्तं शैवागमे—

घोरा तनूस्तव ब्रह्मन्नापो धर्मश्च चन्द्रमाः ।
शिवा तनूस्तव ब्रह्मन् सूर्यो विष्णुर्हुताशनः ॥ इति ।

अत्र विष्णोः शिवशरीरत्वेन विष्ण्वाधिक्यप्रतिपादकपुराणागमानां शिवाधिक्यपरत्वमेव निश्चीयते । शरीराधिक्यपराणामलंकारस्तोत्रादीनां शरीरिणि पर्यवसानात् ।

नन्वस्तु पञ्चमः तमोगुणप्रचुरेषु कल्पेषु तद्विशिष्टेन ब्रह्मणा कृतानि पुराणानि तामसानि, तत्प्रतिपाद्यत्वाच्छिवस्यापि तामसत्वमिति चेत्, तामसेषु कल्पेषु ब्रह्मणा कृतानां पुराणानामस्मिन्वर्तमाने श्वेतवराहकल्पे अनुवर्तमानत्वे प्रमाणाभावात् । अस्मिन्नपि कल्पे अष्टाविंशतितमेन व्यासेनेदानींतनपुराणकरणस्य श्रूयमाणत्वात् । तदुक्तं विष्णुपुराणे—

वैवस्वतेऽन्तरे तस्मिन् द्वापरेषु पुनः पुनः ।
वेदव्यासा व्यतीता ये अष्टाविंशति सत्तम ॥

वर्तमानस्य पराशरात्मजस्य वेदव्यासस्य प्रवर्तमानसर्वपुराणकर्तृत्वं च तत्रैव श्रुतम्— 'पुराणसंहिता चक्रे पुराणार्थविशारदः' इति । नानि चाष्टादशपुराणानि, तत्रैव गणयित्वा उत्पत्तिक्रमापेक्षया क्रम उक्तः— 'एतद्वैष्णवसंज्ञं वै पाद्मं तु तदनन्तरम्' । एवमर्थानामपि वर्तमानकल्पस्थश्रीरामकृष्णादीनां यदुवंशप्रभवत्वात्, दक्षकन्यानिमित्तदक्षाध्वरध्वंसादिनामेतत्कल्पमध्यस्थत्वात्, एतत्कल्पस्थशैववैष्णवप्रभावप्रतिपादनामेतत्कल्पजातेन अष्टाविंशतितमेन व्यासेनकृतानां पुराणानां परस्परं बलाबलचिन्तायां बहुकालव्यवहितानां तामसादिब्रह्मकल्पानामुपन्यासो निरर्थकः कथं प्रतिपादकस्य भ्रान्तिं नापादयतीति चिन्तनीयम् ॥

ननु पुराणकाराणां पुराणकर्तृत्वं ब्रह्मणः सकाशात् पुराणार्थानधिगम्यैवेत्युक्तम् ; सत्यम् , यत्रातीतकल्पस्थाः पुराणार्थाः ब्रह्मणा पुराणकारैश्च ते तथैव प्रतिपाद्यन्ते । यथा—पद्मकल्पे मार्कण्डे-

यस्य परमेश्वरानुग्रहः । यत्र तु वर्तमानकल्पस्थाः पुराणार्थाः श्रीरामावतारकृष्णावतारवराहावतार-प्रभृतयः । यथा वा, कालकूटभक्षणदक्षाध्वरध्वंसनादयः, तेऽप्येतत्कल्पस्थत्वेनैव ब्रह्मणा उपदिश्यन्ते । पुराणकारैरपि तथैव प्रतिपाद्यन्ते । तेषां परस्परविरोधे स्वाभिमतपुराणाधिक्यनिर्णयहेतुमपश्यता बहुकालव्यवहितातीतकल्पानां सात्त्विकतामसत्वाद्युपन्यास कुत्र केन कृत इति न जानीमः ॥

नापि षष्ठः, रुद्रसंबन्धिनो घोरशरीरस्य संहारकत्वेन तमोविशिष्टत्वेऽपि तच्छरीरिणः परमेश्वरस्य तमोऽतीतत्वात् । तथा च कैवल्योपनिषदि—

'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिम्' इति ।

यद्यपि देवदत्तादौ तमोगुणप्रधानशरीरादिविशिष्टे तामसत्वस्य व्यवहारो लोके दृष्टः, तथाऽपि न तन्मात्रविशिष्टत्वेन प्रतिपाद्याः, परमेश्वरसंबन्धिनां तमोऽतीतानामलौकिकप्रकाश-रूपाणामनेकेषां विग्रहाणां प्रमाणप्रसिद्धत्वात् । तथा च 'स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुभ्रेभिः पिपिशे हिरण्यैः' इत्यत्र 'शुभ्रेभिः' इति शुभ्रशब्देन सत्त्वमयत्वमुच्यते, लोहितकृष्ण-शुक्लामित्यादिवत् । अन्यथा विष्ण्वाधिक्यवादिनां मते तमोविशिष्टविष्णुप्रतिपादकत्वेन वैष्णवानां पुराणानामपि तामसत्वप्रसङ्गः । कथमन्यथा विष्णोर्भूभारावतरणाय यादवकौरवदैत्यादिसंहार-कर्तृत्वम् ? कथं वा दैत्यव्यामोहनाय महामोहाख्यपुरुषरूपेण दैत्यव्यामोहकबुद्धजिनादिशास्त्रप्रणे-तृत्वम् ? तदुक्तं विष्णुपुराणे—

इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः ।
समुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान् ॥

मायामोहोऽयमखिलान् दैत्यांस्तान्मोहयिष्यति ।
ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः ॥

न हि स्वस्य तमोवैशिष्ट्याभावे महामोहस्यान्यत्प्रसिद्धमुपादानम्, येन स्वशरीरस्य तामसत्व न स्यात् ॥

ननु विष्णोः कार्यार्थं तमोगुणसाहित्येऽपि तस्य सत्त्वेनाभिभूतत्वात् न प्राधान्यम् । रुद्रस्य तु सत्त्वरजसी तमसैवाभिभूते इति प्रधानं तमः; तद्विशिष्टतया संहारादिकर्तृत्वेन प्रति-पाद्यत्वमिति सप्तमः पक्षः कक्षीक्रियताम्इति । मैवम्, शत्रुसंहारमात्रप्रयोजनकेषु नृसिंहाद्यवतारेषु तत्प्राधान्येन तामसत्वप्रसङ्गात् । शिवस्य तमोमयत्वस्य निरस्ततयेन पक्षे बाधिततत्वाच्च । नान्त्यः, यः संहारकर्ता तामसः तस्यापि कश्चित् संहारकोऽस्ति न वा ? अस्ति चेत्तामसत्वेऽपि स एव सर्वाधिकः, सर्वसंहारत्वतन्त्रत्वात् । नास्ति चेदयमेव तामसः सर्वाधिकः इति तामसत्वं सर्वसंहर्तृ-

स्वात् सर्वाधिकत्वव्याप्तमिति विरुद्धो हेतुः । तस्माद्रुद्रः सर्वाधिकः सर्वसंहर्तृत्वात् व्यतिरेकेण जीववत् । न चाप्रयोजको हेतुः, प्रबलदुर्बलभाव विना बाध्यबाधकभावस्यैवासंभवात् । 'बृहुः सर्वत्र बाध्यते' इति न्यायेन सात्त्विकत्वस्य बाध्यत्वव्याप्तेः संहार प्रति विरुद्धत्वात् । न च साध्याप्रसिद्धिः, विश्वाधिको रुद्र इति पक्ष एव प्रसिद्धेः । तदनुग्रहार्थत्वादनुमानस्य न सिद्धसाधनत्वम् । एवं सात्त्विकत्वमुक्तप्रकारेण विकल्प्य दूषणीयम् ॥

ननु सत्त्वगुणप्रधानविष्णुप्रतिपादकत्वेन पुराणानां सात्त्विकत्वम् । विष्णोः सत्त्वप्राधान्यं च भागवते—

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥

इति विष्णोः श्रूयत इति चेत्, विष्ण्वाधिक्यप्रतिपादकानां मार्कण्डेयादिपुराणानां सात्त्विकत्वप्रसङ्गात् । रुद्राधिक्यप्रतिपादकानां पाद्मपुराणादीना तामसत्वप्रसङ्गात् । पाद्मपुराणे पूर्वोत्तरखण्डाभ्यां हरिहरयोराधिक्यवर्णनात् तदंशे तामसत्वमिष्टमिति चेत्, रामायणभागवतादावपि तदंशे तामसत्वप्रसङ्गात् । रामायणे बालकाण्डे—

तां वै धारयितुं राजन्नान्यं पश्यामि शूलिनः ।
उमापतिः पशुपतिः सर्वलोकनमस्कृतः ।

युद्धकाण्डेऽपि— एतदस्त्रबलं घोरं मम वा त्र्यम्बकस्य वा । इति ।

उत्तरकाण्डे च— कैलासनिलयव्यतिक्रमेण रावणनिग्रहेन्द्रजिदनुग्रहादिवर्णनस्य बहुतरत्वात्, रावणविनाशस्यापि रुद्रावज्ञानिमित्तत्ववर्णनात् ।

अथ राम महादेवः प्रहसन्वीक्ष्य तत्कृतम् ।
पादाङ्गुष्ठेन तं शैलं पीडयामास लीलया ।
ततस्ते पीडितास्तत्र शैलस्याधोगता भुजाः ।

पुनरपि तस्मिन्नेव—

शुशुभे तत्र तल्लिङ्गं नानारत्नविभूषितम् ।
अर्चयित्वा तु तं देवं यथा चरति रावणः ।
तत्सर्वं सिध्यते तस्य विधिनाऽर्चयतो हरम् ।
अथावज्ञां करोत्येष रावणो दुर्मतिर्यदा ।

ऋषिभिर्दैवतैश्चास्य मृत्युः संचिन्त्यते तदा ।
स तु मत्तो न जानीते विधिहीनं शिवार्चनम् ॥

एवमिन्द्रजितोऽपि । बहुवारं कपिसेनासहितस्य रामस्य पराजयकारणीभूतं वरदानादिकं महेश्वरकृतमिति शिवाधिक्यं बहुधा द्रष्टव्यम् । एवं विष्णुपुराणेऽपि बाणासुरामरत्ववरप्रदानादिकमपि द्रष्टव्यम् । न चैतस्यापि शिवाधिक्यप्रतिपादकस्य तामसत्वं वक्तुं युक्तम्, 'न ते वागनृता काव्ये काचिदत्र भविष्यति' इति ब्रह्मवाक्यविरोधात् । एवं भागवते तृतीयस्कन्धे दितिकश्यपसंवादे—

न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः।
वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां बत भुक्तभोगाम् ॥

यस्यानवद्यं चरितं मनीषिणो गृणन्त्यविद्यापटलाद्विभित्सवः ।
निरस्तसाम्यातिशयोऽपि यः स्वयं पिशाचचर्यामचरद्गतिः सताम् ॥

हसन्ति यस्याचरितं हि दुर्भगाः स्वात्मस्मृतस्याविदुषः समीहितम् ।
यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितम् ॥

ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं हि माया ।
आज्ञाकरी तस्य पिशाचचर्येत्यहो विभूम्नश्चरितं विडम्बनम् ॥

श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ।
भस्मावगुण्ठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते ॥

न चैतेषामपि शिवप्रतिपादकत्वेन तामसत्वम्, प्रथमश्लोकस्य 'भुक्तभोगामजोऽन्यः' इति, द्वितीयश्लोकस्य 'यस्मात्परं नापरमस्ति किंचित्' इति, तृतीयस्य 'स्थेम्नि सर्वं प्रतिष्ठितम्' इति, 'यो ब्रह्माणं विदधाति पूर्वम्' इत्यादिश्रुतिसमानार्थत्वेन तामसत्वायोगात् । एतद्विरोधेन विश्वाधिक्यप्रतिपादनार्थमेवाप्रामाण्यप्रसङ्गात् । प्रत्यक्षश्रुतिसंवादिनां शिवाधिक्यप्रतिपादकानां पुराणागमानामन्येषां स्मृत्यनवकाशनिराकरणे प्रत्यक्षवेदमूलानां मन्वादिस्मृतिवाक्यानां साङ्ख्यस्मृतिबाधकत्वमिव विष्ण्वाधिक्यप्रतिपादकमात्स्यकौर्मपुराणादिवाक्यबाधकत्वोपपत्तेः । एतेन सात्त्विकादिपुराणानां विशेषाकारेण परिगणनमपि निरस्तम् । त्वत्परिगणितसात्त्विकपुराणेष्वेव रुद्राधिक्यपरिगणनेन परिगणनवैयर्थ्यात् । तथोक्तं त्वया—

ब्राह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च ।
भविष्यद्वामनं ब्राह्मं राजसानि निबोध मे ॥

मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयं च षडेतानि तामसानि निबोध मे ।
वैष्णवं नारदीयं च तथा भागवतं शुभम् ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ।
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः ॥
तामसा निरयप्रदाः ..... इति ।

एवं ब्रह्माण्डवामनयोः राजसत्वे तदन्तर्गतरङ्गमाहात्म्यवेङ्कटाचलमाहात्म्ययोः राजसत्वेन मोक्षप्रदत्वं न स्यात् । तदन्तर्गतयोरपि रेणुकादुर्गामाहात्म्ययोः तद्वदेव मोक्षप्रदत्व स्यात् । सत्त्वं रजस्तम इति श्लोकानुसारेण सत्त्वस्य प्रकृतिगुणत्वेन तद्युक्तस्य विष्णोरपि प्राकृतत्वं स्यात् । तथा च प्रयोगः— सात्त्विकत्वं प्राकृतत्वव्याप्यं सात्त्विकत्वाद्यन्यतममात्रवृत्तित्वात्, तामसत्ववत् । न च 'सत्त्वं विशुद्धं भगवान् स्थितौ' इति वचनविरोधः । इतरानभिभूतस्यैव विशुद्धपदार्थत्वात् । एतेनाप्राकृतसत्त्वमस्तीत्याधुनिकमत निरस्तम्, अप्राकृतरजस्तमसोरपि सिद्धिप्रसङ्गात् । अत एव नाप्रयोजको हेतुः । एवं च शिवो गुणातीतः प्रकृत्यतीतत्वात् मुक्तपुरुषवत् । न वाऽप्रयोजकत्वमसिद्धत्व वा, 'तस्य प्रकृतिलीनस्य यः परः स महेश्वरः' इति प्रकृत्यतीतत्वप्रतिपादकश्रुतिविरोधात् । एवं 'तामसेषु शिवस्य च' इत्यादिमत्स्यपुराणमपि प्रत्युक्त त्वयैव । मत्स्यपुराणस्य तामसेषु परिगणनेन एतद्वाक्यप्रामाण्याप्रामाण्ययोर्व्याघातात् । यदि मत्स्य-पुराणं तामसत्वेऽपि प्रमाणं शिवस्य तामसत्वे सिद्धे शिवप्रतिपादकत्वेन च तामसत्वसिद्धया अप्रा-माण्यमित्यन्योन्याश्रयः । यदि शिवस्य तामसत्वसिद्ध्यर्थं तामसेषु परिगणितमपि मत्स्यपुराणं तस्मिन्नर्थे प्रमाणम्, तदा तुल्यन्यायत्वात् स्वर्गाधवर्गयोरपि प्रमाण ···। अन्यथा तत्पुराणवक्तुर्म-त्स्यमूर्तेरनाप्तत्वं स्यात् । मत्स्यावतारेण वेदोद्धारादिकमपि व्यर्थमेव स्यादिति बहु व्याकुलीभवेत्, अनाप्तत्वशङ्कायाः सर्वत्र सुलभत्वात् । एवं कूर्मप्रोक्त पुराणमपि उक्तन्यायेन समर्थनीयम् । शैवादि-पुराणानामपि शिवप्रतिपादकत्वेन यदि तामसत्वं, तदा तत्प्रतिपादकस्य प्रत्यक्षवेदभागस्य 'नमस्ते रुद्र', 'अणोरणीयान्' इत्यादेरनेकग्रन्थसंदर्भस्य तामसत्वप्रसङ्गेन तदङ्गीकरणे प्रामाणिकैस्तस्य बहिर्भाव एवोचितः । एतेन शिवाधिक्यप्रतिपादकानां शैवागमपुराणानां मोहशास्त्रत्वमपि प्रत्युक्तम्, 'एष मोह सृजामि' इति स्वस्याप्यनाप्तत्वप्रसङ्गात् । स्वोक्तानामपि पाञ्चरात्रागमानामप्रामाण्यापत्तेः । वस्तुतस्तु शिवाधिक्यस्य प्रत्यक्षश्रुत्यादिसिद्धत्वात् सात्त्विकत्वेन त्वदभिमतानामपि इतिहासपुराणानां तदुपबृंहकत्वेन दर्शितत्वात्, तद्विरोधिना च पुराणागमानां विरोधाधिकरणस्मृत्यनवकाशन्यायाभ्यां बाधितत्वात् सिद्धमप्रत्यूहं शिवाधिक्यमिति ॥

ननु शिवो गुणातीतत्वान्न तामस इत्युक्तम्, तदयुक्तम्, तस्य चतुर्मुखपञ्चमशिरोनि-कृन्तनेन ब्रह्महन्तृत्वात् । तदुक्तं वामनपुराणे—

तच्छ्रुत्वा क्रोधयुक्तेन शंकरेण महात्मना ।
नखाग्रेण शिरश्छिन्नं ब्राह्मं पुरुषवादि यत् ॥

तच्छिन्नं शङ्करस्यैव सव्ये करतलऽभवत् ।
एतत्तेन कदाचित्तु तच्छंकरकराच्छिरः ॥

न च ब्रह्मणो निधनाभावेन ब्रह्महत्त्या नास्तीति युक्तम् । तथा च—

ततः समागता रौद्रा नीलाञ्जनचयप्रभा ।
संरक्तमूर्धजा भीमा ब्रह्महत्त्या ह्यनान्तिकम् ॥

ब्रह्महत्त्याऽस्मि संप्राप्ता मां तच्छि त्रिलोचन ।
इत्येवमुक्त्वा वचनं ब्रह्महत्त्याविवेश तम् ॥

त्रिशूलपाणिनं रुद्रम्.....।

इत्यादि तत्रैव श्रवणात् । एवं च कपालित्वमपि तत्रैव श्रूयते—

एवं कपाली संजातो देवर्षिभगनेत्रहा ।
अनेन कारणेनासौ दक्षेण न निमन्त्रितः ॥

तस्मादधर्माधिकस्य शिवस्य कथं ब्रह्महत्त्या ब्रह्मकपालधारणं चेति; उच्यते— 'अत्ता चराचरग्रहणात्' इत्यत्र 'ब्रह्म च क्षत्रं चोभे भवत ओदनः' इति ब्रह्मक्षत्रादिसर्वभक्षकस्य परमेश्वरस्य संहर्तृत्वं गुण एवेति गुणदोषभ्रमा....। किं च, यागस्थदीक्षितब्राह्मणस्य दक्षस्य शिरश्छेदेन ब्रह्महत्त्याप्राप्तिः पुराणेषु न श्रुता । ब्रह्मणः पञ्चमशिरःकृन्तनेन अहंकारनिवारणेऽपि जीवंतं एव ब्रह्मणो हत्त्यां कथं पठिष्यति? मरणोद्देश्यकमरणफलकव्यापारस्य हिंसात्वेन मरणफलकत्वाभावे हिंसात्वाभावात्। अत एव श्येनादेर्वैरिमरणोद्देशेन विहितस्य हिंसात्वव्यवहारो लौकिकवैदिकानाम् । अत एव कूपखननकर्तुर्न हिंसकत्वव्यवहारः, मरणानुद्देश्यकत्वात् । अत एव मरणोद्देशेन क्षिप्तनाराचेन प्राणिवधाभावे क्षेप्तुर्न हिंसकत्वव्यवहारः, मरणफलकत्वाभावात् । न च ब्रह्मशिरश्छेदस्य मरणोद्देश्यकत्वम्, अहंकारमात्रनिरासप्रयोजनत्वात् । तदुक्तं वामनपुराणे—

वक्त्राणि दृष्ट्वाथ भवस्य मौढ्यात्पैतामहं वक्त्रमुवाच वाक्यम् ।
समाहतस्यास्य जलस्य बुद्बुदा भवन्ति किं तेषु पराक्रमोऽस्ति ॥

तच्छ्रुत्वा क्रोधयुक्तेन शंकरेण महात्मना ।
नखाग्रेण शिरश्छिन्नं ब्राह्मं परुषवादि यत् ॥

मरणोद्देश्यकत्वे शीर्षान्तरस्यापि छेदः संभवति, प्रतिषेधकाभावात् । तस्मादहंकारनिरासनमात्रप्रयोजनत्वेन.....त्वानुपपत्तेः । दक्षहिंसायामपि पुराणेषु ब्रह्महत्त्याया अवर्णनात् । ब्रह्मक्षत्रादिसकलसंहारकत्वस्य ईश्वरत्वसाधकत्वात् । अनेककल्पब्रह्माण्डमध्यवर्त्यनन्तचतुर्मुखसंहारकस्य रुद्रस्य ब्रह्महन्तृत्वव्यपदेशस्य भूषणत्वात् । ननु, 'ततः समागता रौद्रा' इति ब्रह्महत्याप्राप्तिवचनस्य का गतिरिति चेत्, तस्य काशीक्षेत्रस्य ब्रह्महत्यानिवर्तकत्वप्रतिपादनपरत्वेन स्तुत्यर्थत्वात् । तथा च वामनपुराणे तत्रैव प्रकरणे—

ईदृशायां सुरेशान वाराणस्यां महामते ।
तत्र गत्वा सुरश्रेष्ठ पापमोक्षमवाप्स्यसि ॥ इति ।

ननु, 'नारं स्पृष्ट्वाऽस्थि स्नस्नायु सवासा जलमाविशेत्' इति कपालस्यापवित्रत्वात् तद्धारकस्याशुचित्वसंपादकत्वमिति चेत्—मैवम्, काशीस्थकपालमोचनाख्यतीर्थमाहात्म्यप्रतिपादकत्वेनान्यपरत्वात् । तथा च तत्रैव—

कपालमोचने स्नस्नौ वेदोक्तविधिना मुनिः ।
स्नातस्य तीर्थे त्रिपुरान्तकस्य परिच्युतं हस्ततलात्कपालम् ।

नाम्ना बभूवाथ कपालमोचनात्तत्तीर्थवर्यं भगवत्प्रसादात् ॥
ततः कपाली लोके तु ख्यातो रुद्रो भविष्यति ।

कपालपरित्यागेऽपि कपालित्वप्रसिद्धिः । ब्रह्माद्यपेक्षया... सूचकत्वेनोत्कर्षहेतुत्वात् । अन्यथा विष्णोरपि पञ्चजनाख्यदैत्यशीर्षास्थिभूतपाञ्चजन्यधारणं..... विष्णुपुराणे—

दैत्यः पञ्चजनो नाम शंखरूपः स बालकान् ।
जग्राह सोऽस्ति सलिले मयैवासुरसूदन ॥

इत्युक्तेऽन्तर्जलं गत्वा हत्वा पञ्चजनं च तम् ।

विष्णुर्जग्राह तस्यास्थिप्रभवं शंखमुत्तमम् ।
तं पाञ्चजन्यमापूर्य..... ॥ इत्यादि ।

रावणहनने च ब्रह्महत्या, सेतौ रामेश्वरप्रतिष्ठया तन्निवृत्तिकथनं च पुराणेषु बहुतरं दृष्टमिति परेषामपि समो दोषः । आदित्यपुराणे एकत्रिंशे—

प्रतिष्ठाप्य महादेवं सेतुमध्ये स राघवः ।
लब्धवान्परमां भक्तिं शिवेज्ञानोरनुग्रहात् ॥

रामेश्वर इति ख्यातो महादेवः पिनाकधृत् ।
यस्य दर्शनमात्रेण ब्रह्महत्या व्यपोहति ॥

भृगुपत्नीहननेन स्त्रीहत्यादोषो रामायणे—

विष्णुना च पुरा राम भृगुपत्नी दृढव्रता ।
अनिन्द्यं लोकमिच्छन्ती काव्यमाता निषूदिता ॥

तेषामन्यपक्षत्वे प्रकृतेऽपि सम समाधानम् । वस्तुतस्तु परमेश्वरस्य सर्वज्ञता.... संबन्धलेपः । जडानामपि तत्त्वज्ञानान्तेऽवाप्तावर्णनात् । तथा च सूत्रम्— 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्' इति । एतेन कपालयोजनमपि व्याख्यातम् । पाञ्चजन्यपूरणस्य मुखसंबन्धं विना अनुपपत्तेः । भिक्षाटनस्य नवनीतचौर्यादिवत् समाहितत्वात् । वस्तुतस्तु ब्रह्मशिरश्छेदः कपालधारणं च, परमेश्वरांशभूतनमोगुणप्रधानसंहाररुद्राख्यभैरवेण कृतमिति न परमेश्वरस्य कपालित्वं ब्रह्महत्या वा । तथा चोपक्रमे— 'तमोमयस्तथैवान्यः समुद्भूतास्त्रिलोचनः । शूलपाणिः कपर्दी चाप्यक्षमालां निदर्शयन् । अहंकाराद्भुतो रुद्रः प्रत्युवाच पितामहम् ॥' इति । उपसंहारे च— 'तमोमूर्तिरहं द्वेषस्त्वदृशः क्रोधसंभवः' इति । न चैतदतिरिक्ते परमेश्वरे प्रमाणाभावः । तापनीये— 'ऐकात्म्यप्रत्ययहरं शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते' इति शिवस्य ब्रह्मरुद्रविष्ण्वपेक्षया चतुर्थत्वव्यपदेशेन..... भेदकत्वात् । न च तस्मिन् शंभुशंकरादिशिववाचकशब्दप्रयोगानुपपत्तेः । शिवांशाधिक्येन तत्साहचर्येण च राजपुरुषादौ राजपदप्रयोगवच्छिवादिपदप्रयोगोपपत्तेः । अत एव संहाररुद्रनिष्ठ कपालित्व परमेश्वरे आरोप्य तमवजानतो दक्षस्याहंकारभ्रमाक्रान्तत्वेन निग्रहपात्रत्वं वीरभद्रादिगणैः कृतमिति युक्तमुत्पश्यामः । तदुक्तम्— 'एव कपाली संजातो देवर्षे' इत्यादि ।

त्रयोऽग्नयस्त्रिभिर्नेत्रैः समं दक्षमवैक्षत ।
दृष्टमात्रस्त्रिनेत्रेण भस्मभूतोऽभवत्क्षणात् ॥

काशीखण्डे च— अयं ब्रह्म.....त्तो भैरवस्यैव रुद्रांश भूय वर्णित इत्येतत्संवादो द्रष्टव्यः । एवं परमेश्वरो निर्लेपः तत्त्वज्ञत्वात् सर्वज्ञत्वाच्च मुक्तात्मवत् । तस्मात्सर्वोत्तरः परमेश्वरः इति सिद्धम् ॥

॥ शुभमस्तु ॥

॥ श्रीः ॥

॥ भाष्यवार्तिकगाम्भीर्यम् ॥

श्रीसच्चिदानन्दतीर्थस्वामिना विरचितम् ।

भगवत्पादसंभूतामात्मास्मोनिधिगामिनीम् ।
भाष्यभागीरथीं भूयो भजामो भवशान्तये ॥

चन्द्रमौलिसमुपासनापरौ चन्द्रमण्डलसमानवर्चसौ ।
चन्द्रशेखरगुरूत्तमावुभौ चित्तरङ्गभुवि नृत्यतां मम ॥

इह खलु सर्वलोकहितैषी भगवान् बादरायणः सर्वतः समेधमानसमधिकसंसारदावदहनदन्दह्यमानान् स्वतस्तदुपशमोपायमजानानान् प्राणिनिकायानालक्ष्य तानेतान् कथंचिदुन्मुमोचयिषुर्विविधपुराणेतिहासप्रबन्धप्रणयनद्वारा सर्वतः प्रसृमरसदुपदेशामृतमयीं वृष्टिं वितीर्य सर्वमेव जगतीतलमाप्लावयामास । सैव खल्वमृतमयी वृष्टिरन्ततः सर्वात्मना एकीभूय शारीरकमीमांसारूपेण परिणमयामास्मात्मानम् ॥

सैषा सूत्रात्मिका शारीरकमीमांसा सपुनातटिनीव स्वान्तर्गतनिरवधिकपदार्थनिगूहनादस्फुटीकृताभ्यन्तरभावा भाष्यभागीरथीपाथःसंगमसमभिलाषेव चिरादवतस्थे । कलिन्दजा हि स्वयमेव पवित्रसलिलाऽपि अभङ्गुरगङ्गाजङ्गतरङ्गानुषङ्गेणैव पावनतायाः परां काष्ठां प्रतिपद्यते । स्वान्तर्निगूढविविधपदार्थप्रकटीकरणपाटवं च प्रतिपद्यते । तथैव हि शारीरकमीमांसा सेयं स्वान्तर्निगूढानां प्रपञ्चमिथ्यात्वजीवब्रह्मैक्यादीनां अलौनाचिन्त्येषु स्वयमेव स्फुटीकर्तुमप्रभविष्णुतया भाष्यगङ्गासंगमेनैव तादृशनिगूढार्थस्फुटीकरणं सुगकमिति तदुत्पत्तिकारणभूतानां भगवत्पादानामवतारावसरमेव चिरादपि प्रतीक्षांचक्रे ॥

अथ भगवान् सर्वविद्यानामीशानः सर्वज्ञः परमेश्वरो भगवत्पादात्मना स्वयमवतीर्य श्रुतिसूत्रार्थसामरस्यसमर्थनपटुतराम्, आत्मानात्मविवेकचतुरपरमहंसकुलसमाश्रिताम्, बाह्याभ्यन्तरसर्वविधसंतापसंततिसमुन्मूलनपटीयसीम्, अमृतत्वप्राप्तिप्रत्यनीकभूतानेरवधिकदुरितव्यूह-

निबर्हणनिपुणतराम् , आ सेतोरा च हिमाचलादनवरतप्रचारपवित्रीकृतधरित्रीतलाम् , श्रुतिमनोहरमधुरतरशब्दसंततिसमानन्दितसाधुजनसंदोहाम् , विस्तरयतीयसंदर्भगर्भीकृताम् , निर्भयलेशमर्मकैरप्यवगाह्यमानाभ्यन्तराम् , सोपानपञ्चकपरिष्कृतस्वावगाहनमार्गाम् , विज्ञाननौकासंचारसमलंकृतस्वपारेसरथाम् , विवेकचूडामणिप्रभाप्रकाशितस्वाभ्यन्तरपदार्थजाताम् , आनन्दलहरीपरिचयसमुत्सारितसर्वसंतापाम् , योगतारावलीप्रकाशशशिथिलिततमोऽनुबन्धाम् , प्रबोधसुधाकरकरनिकरप्रमथितबाह्याभ्यन्तरसंतमसाम् , नानाविस्तरामनिगम्भीरां परमानन्दसिन्धुमनुपतन्तीम् , भाष्यगङ्गामुत्पादयामास ॥

इमामेव भगवत्पादसंभूतां भाष्यभागीरथीमवलम्ब्य कृष्णद्वैपायनीयसूत्रमुक्तावलिरूपा कलिन्दजा कृतकृत्यामिव मेने आत्मानम् । अतिगम्भीरा हि सा भाष्यगङ्गा स्वसख्याः शारीरकमीमांसायाः महान्तमुपकारभरमारचयामास । तत्र प्रथमं तावदुपाधिदोषपिहितदृष्टीनां दृष्टिदोषवशात्प्रतीयमानमालिन्यस्य स्वधवलिम्ना प्रच्छादनम् । वैयासिकसूत्राणामपि अर्थान्तरपरत्वशंकया कलङ्कितवत्प्रतीयमानानां तत्तदाशंकापमयनेन भाष्यमेव हि परमां शोभामुपजनयति ॥

द्वितीयं तावत्तदन्तर्गतसर्वपदार्थाविष्करणरूपम् । यमुनायाः स्वयं पावनत्वेऽपि गङ्गासंगमविशेषेण पावनतरत्वप्राप्तिवत् सूत्रावल्याः स्वयमेव अज्ञाननिवर्तनसामर्थ्यसत्त्वेऽपि भाष्यसंगमेन तादृशसामर्थ्यातिशयत्वप्राप्तिरवश्यंभावनी । किं बहुना ? यमुनायाः गङ्गासंगमेन सर्वात्मना तत्तादात्म्यप्राप्त्या तदीयसर्वगुणप्राप्तिवत् वैयासिकसूत्रावल्याः भगवत्पादीयभाष्यसंगमेन पावनत्वप्रसन्नत्वगम्भीरार्थत्वादितत्तद्गुणानां समावेशः केन वार्यते । तथा वार्तिकावलिरूपसरस्वतीसंबन्धे तु ततोऽपि गुणातिशयः संभवति ॥

ननु भाष्यस्य गङ्गास्थानीयत्वं सूत्रस्य यमुनास्थानीयत्वं चात्यन्तविरुद्धमेव । ततश्च सूत्रव्याख्यारूपभाष्यस्य तद्वार्तिकस्य वा स्वमूलभूतसूत्रापेक्षया महिमातिशयो वर्ण्यमानः कथमुपपद्यताम् ? इति चेत्—नायमुपालम्भोऽस्मान् प्रति कर्तव्यः । अपि तु सूत्रभाष्यवार्तिकाभिधत्रिवेण्यामेव निरन्तरमवगाह्य तदीयगाम्भीर्यतारतम्यं स्वयमेवानुभूतवद्भिः सर्वतन्त्रस्वतन्त्राणां मधुसूदनसरस्वतीश्रीचरणानां स्वानुभूतिसभरितैः स्वैरोद्गाररूपैर्वचनैरेव तदिदमवगम्यत इति तान् प्रत्येव क्रियतामयमुपालम्भः । तथा च सिद्धान्तबिन्दौ—

न स्तौमि तं व्यासतदेकमर्थं सम्यङ्न सूत्रैरपि यो बबन्ध ।
विनाऽपि तैः संग्रथिताखिलार्थं तं शंकरं नौमि सुरेश्वरं च ॥

इति पद्ये भाष्यवार्तिककारयोर्विषये महान् पक्षपातः समदर्शिभिरपि तैः प्रादर्शि ।

वस्तुतस्तु भाष्यवार्तिकयोरेहिमातिशयवर्णनमपि सूत्रकार एव पर्यवसास्यतीति नात्र कश्चिद्वोद्यावसरः । अत एवात्र भाष्ये गङ्गासाधर्म्यस्य, सूत्रे यमुनासाधर्म्यस्य च निरूपणेन वयमपि नापराध्यामः । आस्तामेतत् । भाष्यवार्तिकयोः को नाम गाम्भीर्यातिशय इत्यत्रैव लेखनीं व्यापारयामः ॥

तत्र त्रिविधं गाम्भीर्यं संभवति—बह्वर्थावकाशदानसामर्थ्यम्, अनर्घ्यवस्तुनां स्वान्तर्निगूहनसामर्थ्यम्, अक्षोभ्यत्वं चेति । तत्र महापोतादिस्थूलस्थूलबहुपदार्थानामवकाशदानसामर्थ्यं गङ्गायां प्रत्यक्षमेव । तथा सुदुर्लभानामनर्घ्यरत्नादीनां स्वान्तर्निगूहनमपि गङ्गायां सम्यक् संभवति । अक्षोभ्यत्वमपि संभवति, महाझषादिजलजन्तुभिः महापोतादिभिरपि गङ्गाजलस्य कलुषीकरणासंभवात् । तदिदं त्रिविधं गाम्भीर्यमपि भाष्यवार्तिकयोः सूक्ष्मदृशां सुव्यक्तमेव ॥

तत्र बह्वर्थावकाशदानसामर्थ्यरूपं गाम्भीर्यं भाष्यवार्तिकयोः स्फुटीकरिष्यामः । अत्र च अध्यासभाष्यं संबन्धवार्तिकं चेति द्वयमेवास्माकं पर्याप्तं निदर्शनम् । तथा भाष्यव्याख्यानाय प्रवृत्ते भामतीप्रस्थाने विवरणप्रस्थाने च अवच्छेदवादप्रतिबिम्बवादादिबहुविधप्रक्रियाणां सूचनेन बह्वर्थावकाशदानसामर्थ्यरूपगाम्भीर्यं स्फुटीकृतमेव । दिङ्मात्रमुदाहरामः । तत्र भामतीप्रस्थाने तावत् मूलाविद्यातूलाविद्ययोर्जीवाश्रयत्वं प्रसाधितम् ; ब्रह्मणस्तु विषयत्वम् । विवरणे तु मूलाविद्यायाः ब्रह्माश्रयत्वम्, तूलाविद्यायाः जीवाश्रयत्वमिति । संक्षेपशारीरके तु आश्रयत्वं विषयत्वं च ब्रह्मण एवेत्याभिहितम् । तथा भामत्यां ब्रह्मसाक्षात्कारे मन एव करणमिति ; विवरणे तु महावाक्यरूपशब्दस्यैव करणत्वमिति गदितम् । भामत्यां निदिध्यासनस्य प्राधान्यम् ; विवरणे तु श्रवणस्य । भामत्यां निदिध्यासनस्य क्रियात्वमङ्गीकृतम्, विवरणे तु फलत्वम् । भामत्यां श्रवणस्य ज्ञानरूपत्वात्तत्र न विधिः ; विवरणे तु मानसव्यापाररूपत्वात्तत्र विधिः । इत्थमेव वार्तिकेऽपि बहुविधप्रक्रियाविशेषाणां सूचनेन तदीयगाम्भीर्यमपि उन्नेयम् । अथवा, एतावदेवास्य गाम्भीर्यमिति निर्णेतुं के वयं वराकाः ! भाष्यवार्तिकजलाशयस्याभ्यन्तरे विद्यमानानर्थान् बहिराविष्कृतवन्तः आनन्दगिर्याचार्या एव तदीयं गाम्भीर्यं वर्णयितुं प्रभवन्ति । वर्णयन्ति चैते तद्गाम्भीर्यम्— 'संबन्धवार्तिकमहाम्बुधिरेष तीर्णः' इत्यादिना । तदेवं बह्वर्थावकाशदातृत्वरूपगाम्भीर्यं भाष्यवार्तिकयोरुपपादितम् ॥

इत्थमेव अमूल्यानामर्थानां स्वान्तर्निगूहनसामर्थ्यरूपगाम्भीर्यमपि गङ्गायामिव भाष्यवार्तिकयोर्विद्यते । जाह्नवीह्रदेष्वद्यापि केनचिदपि अज्ञाताः अनर्घ्यतररत्नविशेषाः सन्तीति यथा श्रूयते, तथैव भाष्यवार्तिकयोरपि गुरुपरंपरामात्रसमधिगम्या अपूर्वार्थाः भामतीविवरणादिग्रन्थेष्वपि अप्रकाशिताः कति कति सन्तीति अनुभवशालिनामेवैतत्सुगमं भवति । अत एव

प्रागुक्तगाम्भीर्यापेक्षया निगूहनसामर्थ्यरूपगाम्भीर्यं पृथगेव वर्णितम्, प्रकाशितार्थानां निगूढार्थानां च भेदादिति ॥

एवमक्षोभ्यत्वरूपं गाम्भीर्यमपि गङ्गायामिव भाष्यवार्तिकयोरपि सूपपादम् । तथा हि—आत्मनि उपनिषदामेव स्वतन्त्रतया प्रमाणत्वम्, न तु अनुमानादीनामिति सिद्धान्तमाक्षिप्य अनुमानस्यापि तद्विषये प्रामाण्यमस्तु इति प्रत्यवतिष्ठमानान् तार्किकान् प्रति इदमुत्तरं भाष्यकाराणां बृहदारण्यकभाष्ये—'के यूयमनुमानकुशलाः इत्येवं पृष्टानां किमुत्तरं ?' इत्यारभ्य अन्ततः 'तत्र वयमनुमानकुशला इत्येवं वदद्भिः—शरीरेन्द्रियमनःसाधनाः आत्मानः प्रत्येकं वयमनेके—इत्यभ्युपगतं स्यात् । अहो! अनुमानकौशलं दर्शितमुच्छृंगैस्तार्किकवलीवर्दैः । यो ह्यात्मानमेव न जानाति स कथं मूढः तद्वतं भेदमभेदं वा जानीयात्' इत्यादिना तार्किकाणामाक्षेपान् प्रतिक्षिप्य अन्ते 'तस्मात् तार्किकचाटभटराजाप्रवेश्यमभयं दुर्गमिदमल्पबुद्धयगम्यम्' इति उपसंजहार । तार्किकशब्देन चात्र सांख्यादयो वैशेषिकान्तास्तीर्थकरा एवाभिधीयन्ते । तदीययुक्तयोऽप्यत्र कुण्ठीभवन्ति चेत् काऽन्येषां कथा शुष्कतार्किकाणाम् । तथा च तादृशतीर्थकराणां युक्तिभिरपि न क्षोभयितुं शक्यं भगवत्पादीयं भाष्यम् ॥

तद्विवरणरूपे वार्तिके च—

आत्मादीनां क्रियास्तित्वात्प्रत्येकं कारकत्वतः ।
अग्न्यादीनामिव तत आत्मानेकत्वमापतेत् ॥

बहुसाधनसाध्यत्वात् क्रियाणामिति हेतुतः ।
एवं लक्षणहेतूक्तिर्मौर्ख्यलिङ्गं भवेदतः ॥

इत्यादिना तार्किकयुक्तिभिरविचाल्यस्य भगवत्पादीयसिद्धान्तस्य अक्षोभ्यत्वं सुतरां स्फुटीकृतम् । तथा अनुमानेनैव आत्मभेदं साधयितुकामानां तादृशतार्किकाणां खण्डनाय महती युक्तिरियमुपनिबध्यते भाष्यवार्तिककाराभ्याम् । तत्र बृहदारण्यकद्वितीयाध्याये 'यानि लिङ्गानि आत्मभेदसाधनाय नामरूपवन्त्युपन्यस्यन्ति (तार्किकाः) तानि नामरूपगतान्युपाधय एवात्मनः' 'यद्यत्परः आत्मधर्मत्वेनाभ्युपगच्छति, तस्य तस्य नामरूपात्मकत्वाभ्युपगमात्, नामरूपाभ्यां च आत्मनोऽन्यत्वात्' इति वर्णितम् । तथा वार्तिकेऽपि—

अपक्षधर्मताहेतोर्नामरूपाश्रयत्वतः ।
धर्माभावात्प्रतीचश्च तद्भेदे हेतुता कुतः ॥

इत्यादिना आत्मनि भेदसाधनार्थमुपादीयमानानां सर्वलिङ्गानामपि तदुपाधिभूतनामरूपेष्वेव प्रसरणेन आत्मनि तेषां स्पर्शलेशोऽपि नास्तीति भाष्योक्ता युक्तिः प्रस्फुटिता । किं बहुना ? इयमेकैव युक्तिः प्रतिवादिमुखपिधानायालम् । ततश्च पुरा विश्वामित्रेण प्रेरितामस्त्रपरंपरामेकेन ब्रह्मदण्डेनैव निरुन्धन्नरुन्धतीजानिर्निर्विकार एव यथा स्वयमवतस्थे, यथा च सा सर्वोऽप्यस्त्रपरंपरा ब्रह्मदण्ड एव व्यलीयत, तथा भेदवादिभिः प्रयुज्यमानानि अनुमानास्त्राणि आत्मना पुरस्कृतस्य नामरूपप्रपञ्चस्यैव शिरसि निपतन्ति विलीयन्ते च; न तु पुनरात्मानं स्पष्टुमपि क्षमन्ते इत्ययमेव खलु भावार्थो भाष्यवार्तिकयोरभ्यन्तरे परिलुठति । तथा च एतादृक्षप्रबलतरयुक्तिरूपब्रह्मास्त्रेणैव प्रतिवादियुक्तीनां पराहतत्वात्, तादृशयुक्त्याभासाः भगवत्पादीयं भाष्यं सुरेश्वरीयं वार्तिकं वा क्षोभयितुं न क्षमन्ते इति अक्षोभ्यत्वं तयोः सिद्धमेव ॥

तदिदं त्रिविधं गाम्भीर्यमपि भाष्यगङ्गायां सूत्रावलिरूपयमुनासंगतायां सुसंगतमस्तीति वार्तिकावलिरूपसरस्वत्याऽपि संमिलितायामस्यां विवेण्यां गाहं गाहम्, तदुपदेशामृतानि पायं पायम्, तदीयगुणगरिमाणं गायं गायम्, तन्महिमानुवर्णनानि श्रावं श्रावं च समाश्रयन्तु सर्वे जन्मसाफल्यमिति सर्वतः शिवम् ॥

मानुष्यं समवाप्य दुर्लभमिदं तत्रापि भूदेवतां
तत्राद्वैतिकुलेऽपि जन्म भजतां किं ब्रूमहे धन्यताम् ।
इत्थं सत्यपि सूत्रवार्तिकमहाभाष्यत्रिवेणीपयः-
पूरे यो न तु गाहते प्रतिदिनं तस्मात् कृतघ्नोऽस्ति कः ॥

आचार्यपादोदितभाष्यवाचामाचाममात्रेण वयं कृतार्थाः ।
नीचाश्रयां तां चपलां श्रियं तु याचामहे नैव हि चाटुवाचा ॥

कामकोटिमहापीठगुरोः स्वर्णमहोत्सवे ।
भाष्यस्वामिकृतिः सैषा तत्पादाब्जे समर्पिता ॥

इति भाष्यवार्तिकगाम्भीर्यं सपूर्णम् ॥



॥ श्रीरस्तु ॥

॥ श्रीगुरुभ्यो नमः ।

॥ श्रीविघ्नप्रदगणपतये नमः ॥

। जीवातुस्तुतिः ।

जयति घननिभाङ्गं मङ्गलं मङ्गलानां
सुरुचिरशिशुभावं पावनं पावनानाम् ।
गुणमणिगणभूषं भूषणं भूषणानां
करधृतनवनीतं दैवतं दैवतानाम् ॥ १ ॥

श्रीनन्दनन्दन भवन्तमहं प्रणम्य विज्ञापयामि जगदीश्वर किंचिदज्ञः ।
तत्त्वं क्षमस्व करुणालय साहसं मे मूर्तिर्मुकुन्द महिता महतां क्षमा हि ॥ २ ॥

दयार्द्रैः पश्यन्मां गिरिधर दृगन्तैर्मृदु हस-
न्क्षणं बालस्योक्तिं करनिहितवेणुः शृणु मम ।
यथा लोके लुप्ताक्षरपदयुते बालफणिते
तथा किं प्रौढोक्तौ भवति महतां कौतुकभरः ॥ ३ ॥

याचे प्रसीद भगवन्निति ते दया चेदेका ममालपमला कमलापते सा ।
निःश्रेयसस्य चरमस्य च मूलहेतुर्निष्कामसौनिधन सैव भवाब्धिसेतुः ॥ ४ ॥

त्वां सेवन्ते शतमखमुखास्त्वं तु पार्थस्य वाहा-
न्ध्यायन्ति त्वां विमलहृदयास्त्वं तु भक्तेप्सितार्थान् ।
शान्तस्वान्ताः श्रुतिषु सुधियस्त्वां विचिन्वन्ति गोप्या-
स्त्वं तूत्सङ्गं सुलभममृतं दुर्लभस्त्वत्प्रसादः ॥ ५ ॥

कूर्मो जातोऽस्यमृतमथने किं च दिव्यो वराहो
भूम्युद्धारे बत बलिमखे याचकश्चाभवस्त्वम् ।

ब्रह्मादीनां तव पदपरागानुरागः पुमर्थः
कारुण्याब्धेस्तव तु भगवन्भृत्य इत्याहुकृत्यम् ॥ ६ ॥

जारो भवान्भवतु वल्लवबल्लभानां चोरोऽप्यहोऽस्तु मयलामतिदुर्लभानाम् ।
त्वत्पादपङ्कजरजोलवलोभ एव मुक्त्यञ्जनावरणवारिजवाल्यलाभः ॥ ७ ॥

मातुः पितुण्डनिरये मम शैशवे च मध्ये च दुर्व्यसनतो बत वृद्धतायाम् ।
मृत्यौ च दुर्गतिषु शुक्र महती त्वदीयामार्तिच्युत्यै दुरच्युत शोच्यतैव ॥ ८ ॥

लोभो महानुदयते न च कोऽपि लाभो दम्भश्च दैन्यमनृतं च विजृम्भते मे ।
पूरा मनोरथमहासरितामपारास्त्वामेव यामि शरणं करुणापयोधे ॥ ९ ॥

लोकाद्बहूनि हि तदावरणानि सन्ति तान्युत्तरोत्तरमतोऽपि भजात् भवतः ।
तृष्णाऽद्य कृष्ण मम तां न पटुर्निरोद्धुं तत्त्वं महं लिप्सुवनैकगतिं प्रपद्ये ॥ १० ॥

दुःखात्मकोऽपि भव एव सुखस्य वेषं धृत्वा मृगानिव हरे मृगयुर्मृगस्य ।
दीनान्प्रतारयति हन्त विचारहीनान् तन्निग्रहे तव मनो न जगत्पते किम् ॥ ११ ॥

संसार इत्यपि च संसृतिरित्यधीरा जल्पन्ति हन्त कुसृतिं बहुधाऽप्यसारम् ।
भ्रान्तिः प्रमाद उत वा वद विप्रलिप्सा को वाऽत्र हेतुरथ वा करणापटुत्वम् ॥ १२ ॥

भ्रान्त्या पतामि भवनाम्नि भयैकवह्नि दीपे पराङ्ग इव दीनमतिः प्रतीपे ।
जानामि नैव तव तत्त्वमहं महात्मन्नाबन्धवान्ध इवाब्जबन्धोः ॥ १३ ॥

आयुः प्रतिक्षणमदभ्रनिदाघतप्तवेशन्तशारिबदनच्छ विनाशयति ।
कालः करालहृदयो न दयालुरद्य का मे गतिर्बत भवानपि चेदुदास्ते ॥ १४ ॥

नासङ्गत्वादितर इव किं त्वं शुचां दुःसहत्वं
जानास्वासीत्तदियमधुना व्यत्ययादीनता ते ।
सीताजानेस्तव यदभवद्दुर्भरः शोकभार
स्तन्नाट्यं ते कथमभिनयैः स्याद्विकारोऽभिनेतुः ॥ १५ ॥

देवान्मनोभुवि पुरातनपुण्यबीजं सूते चिराय शुभधीषयमङ्कुरं मे ।
हा नाथ तावकदयामृतसेकहानात्शुष्यत्यनावहह नैष विलम्बकालः ॥ १६ ॥

शुभश्रेणीसङ्गा नवशरण पद्मारण्यक किं
वयं विभ्रस्त्रातुं तव चरणपद्मः प्रभुरिति ।
विपन्ना जानन्तो यदि नहु जनाथ शरणं
प्रपन्नाः स्याम त्वां भवजलधिनावमभयाः ॥ १७ ॥

व्यर्थं वयो गतमनेकमनोरथैर्मे प्रायः प्रभो न खलु कोऽपि मया पुमर्थः ।
मज्जामि दुःखजलधौ किमुपेक्षसे मामन्यापि किं न तव पात्रमहं दयायाः ॥ १८ ॥

प्रायो मुधा गलति जीवित मिलत्युषायः स्फारः जरा गिलति मातुरगीव घोरा ।
यास्यामि हन्त कथमन्तिकमन्तकस्य दीने निधेहि मयि नाथ दयामनाथे ॥ १९ ॥

छिन्धि प्रभिन्धि वट भीषय शोषयाशु क्षिप्तिते क्षिखिनि निक्षिप न क्षमार्हैः ।
इत्थं प्रचण्डतरदण्डधरोक्तिरीर्षत्कर्णे कृतापि नया वद किं विधेयम् ॥ २० ॥

माता पिता मम सुताः सुहृदश्च दाराः श्रीकृष्ण सन्तु शतशो धनचित्तचोराः ।
कर्षत्यमर्षविवशे शमने त्वदन्यस्त्रातुं प्रभो भवति को वद कोविदो माम् ॥ २१ ॥

फालोल्लटद्भ्रुकुटिपाटलदृष्टिसृष्टसाटोपयाम्यभटकोटिविपाटिताङ्गः ।
किं वा रटत्करटकूटमुदीक्ष्य दीनः प्रत्यग्रमांसरुचिं कंसरिपो विधास्ये ॥ २२ ॥

पुत्राः कलत्रमतिचित्रगिरश्च पौत्राः मित्राणि चेति मम शत्रव एव नूनम् ।
धिक् दुष्कृतं किमकृतं मुहुरेतदर्थे तद्दुर्विपाकमयि नाथ कथं सहिष्ये ॥ २३ ॥

चित्तं निवृत्तनिखिलेतरवृत्ति चेत्स्याद्विद्या भवेदपि दहेदखिलामविद्याम् ।
मा ते कृपां सदुपजीवति तत्तदूने दीने दयां मयि दयाम्बुनिधे निधेहि ॥ २४ ॥

सन्तोऽपि ते करुणयैव हि चिन्तयन्तः शान्ताश्चिरंतनगिरां तनिमन्तरङ्गे ।
यान्त्यन्तमस्य तमसस्तदहं चिरेण श्रान्तो मुरान्तक दयां तव हन्त याचे ॥ २५ ॥

न्यस्तं मनस्त्वयि सुखैकतनौ क्षणं वा नास्ते परं तु बहुधा भवदुःखपङ्के ।
क्लिश्नाति रुद्धमपि हन्त हठान्निपत्य कम्यांहसः कमलनाभ विपाक ईदृक् ॥ २६ ॥

हित्वा मनो मम सुखाम्बुधिमीश हि त्वां शुष्के यथाऽस्मिन् शुनकः शलभश्च दीपे ।
घोरे भवे पतति सीदति कैटभारे तद्वीक्ष्य रक्ष कमलाक्ष कृपाकटाक्षैः ॥ २७ ॥

श्रीकृष्ण कालियफणेषु विषाग्नितापं गोचारणादिषु च वन्यतृणादितैक्ष्ण्यम् ।
गोपीकुचे कठिनतां च मुहुर्विषेहे तन्मे कुतो हृदि न तिष्ठति ते पदाब्जम् ॥ २८ ॥

मोहाग्निपत्य भवदावशिखासु हा हा दग्धोऽपि निर्गमपथं न लभेऽतिमुग्धः ।
किं पापमेतदहह क्व तवानुकम्पा काऽन्याऽस्ति मे गतिरखण्डशिखण्डमौले ॥ २९ ॥

भानोः प्रभेव मधुनो ननु माधुरीव कान्तिर्मणेरिव सुमस्य सुगन्धितेव ।
स्वर्णस्य वर्ण इव किं बहुनाऽम्बुजाक्ष दीने जने तव दयैव विभो विशेषः ॥ ३० ॥

दीने दया न यदि निर्विषया भवेत्सा स्याच्चेत्तथैव पुनरस्य विभो विमुक्त्या ।
अन्त्ये तु सा फलवती भवताश्रिताऽऽद्ये कुम्भस्थदीप इव किं नु फलं लभेत ॥ ३१ ।

अन्धोऽपतं विषयभोगिमये भवाब्धौ दष्टश्च तैर्विषमुदञ्चति वासनाख्यम् ।
मोहोऽप्युदेति भुवनाभयदानधुर्यं हस्तं निधेहि गरुडध्वज मस्तके मे ॥ ३२ ॥

कारागृहेऽस्मि भवनाम्नि तमोमयेऽस्मिन्क्षयस्तो निबद्ध्य विधिना ममताख्यपाशैः ।
तद्भिन्धि बन्धमुपदर्शय चक्रपाणे स्वर्गापवर्गद विनिर्गममार्गमाशु ॥ ३३ ॥

मामीश पश्य कृपया मधुरैरपाङ्गैः कामादयो मम खला विलयं प्रयान्तु ।
मोहो विदाहमयतां मधुसूदनाद्य धन्यो भवान्यहमनन्यगतिः शरण्य ॥ ३४ ॥

कारुण्यमीश विमृशन्गजयूथनाथे काके क्षमामपि च दैत्यपतेरपत्ये ।
वात्सल्यमस्मि शरणागत ईहसे यत्कर्तुं प्रभोऽद्य मम तस्य भवामि पात्रम् ॥ ३५ ॥

जातो मृतोऽहमभवं कति वा न वारान् दुःखं सुखं च बत नान्वभवं कियद्वा ।
हा धिङ्ममालमलमस्य परिभ्रमस्य पश्येयमन्तमहमस्तगतिः कदा नु ॥ ३६ ॥

अज्ञानवारणनिवारणजागरूकविज्ञानकेसरिनिवासगभीरदर्या ।
आसिच्य मां भवदवानलदह्यमानमानन्दयिष्यसि कदा करुणालहर्या ॥ ३७ ॥

विशुद्धं चेतश्चेद्विषयसुखनिर्वेदमयते
नरो निर्विण्णश्चेद्भवति भवदानन्दरसिकः ।
क्व निर्वेदः क्वाहं मलिनहृदयस्तद्यदुपते
भवत्पादे भक्तिर्भवतु मम चेतोऽस्तु विमलम् ॥ ३८ ॥

दीप्ताद्विचारमरुता निगमान्तवह्नेरुत्पाद्य शान्तिघृतभाजि मनोदशाग्रे ।
विज्ञानदीपमखिलेश तमः प्रमथ्य संदर्शयिष्यसि कदा वद वस्तु सत्यम् ॥ ३९ ॥

अजानन्वा दीनानकरुण उताशक्तिरनघ-
न्न खिन्नः स्याच्चं तु स्फुरदखिलशक्तिर्निखिलवित् ।
दयालुं त्वां कल्पद्रुमसम विपन्नोऽहं सखज-
न्क्षयं कष्टं क्लिष्टोऽस्म्यपि च तव शोकाय महते ॥ ४० ॥

प्रभो यदूनां भवतापदूनान् कारुण्यसिन्धुः कथमार्तबन्धुः ।
उपेक्षसे किंचिदवेक्षसे चेन्निरस्तशोको निखिलोऽपि लोकः ॥ ४१ ॥

श्रीनन्दसूनो श्रितकामधेनो शश्वद्विपन्ने शरणं प्रपन्ने ।
क्लेशैककोशे किर मय्यनीशे कटाक्षमालाः करुणाजटालाः ॥ ४२ ॥

अनादौ काले काऽप्यजनि जनिरेकाऽपि न सती
श्रुतिं नीता नैतावति जनिचये तावकगुणाः ।
अतो हेतोर्यातो बत गरुडकेतो गतिमिमां
पराधीनं दीनं जननभयहीनं रचय माम् ॥ ४३ ॥

क्रीडन्त्यम्बु पिबन्त्यदन्ति किमपि स्वैरं हरेऽश्वादयः
शश्वन्नश्वरजीविता अपि मुदा पुष्णन्ति च स्वान्शिशून् ।
विद्युल्लेखसखे न किं भवसुखे मज्जन्ति धिक् जन्तव-
स्त्वत्पादाम्बुरुहावलम्बविरहे नृणां ततः का भिदा ॥ ४४ ॥

न तल्पे नाकल्पे न गुरुणि कुटुम्बे न च धने
न माने नो याने व्यसनमपि किंचिन्न वसने ।
शुनां जन्म श्लाघ्यं भृशमशनमात्रादितमुदां
जनान् श्रीकृष्ण त्वच्चरणविमुखान् धिक् व्यसनिनः ॥ ४५ ॥

वृथा नश्यत्यायुर्न दुरितमगारे प्रतिभये
न भीस्तत्याग भीर्भवति हृदि चिन्ता न तु शमः ।
कुधं मृत्युर्धत्ते भजति मम धैर्यं न च मनः
प्रसादस्ते स्यांचेद्भवति विपरीतं पुनरिदम् ॥ ४६ ॥

निमग्नानां घोरे मुरुरिपुवाराशिकुहरे
त्रिधानां त्वत्पदकमलनौकानवगमात् ।
गृहग्राहग्रामः कथमिव न विभ्राजत इको
ममेदंहोऽशेषं यदुतिलक शोषं गमय मे ॥४७॥

गोपाल कालियशिरोमणिशेखरालिर्गोपिकाभिमकरीललिताग्रवालम् ।
चित्ते ममास्तु मुनिचित्तसरःसरोजं श्रुत्यङ्गनाचिकुरहल्लकदाम तेऽङ्घ्रिः ॥ ४८ ॥

संसाराख्यखरांशुतप्तवपुषां संतापशान्त्यै त्वया
कारुण्यामृतपूरिता पथि सतां भक्तिःपा निर्मिता ।
दुर्दैवेन हता बताश्रुतशुकालापाश्च ते वञ्चिताः
कामाद्यैर्न भजन्ति जन्तव इह भ्राम्यन्ति तप्यन्ति च ॥ ४९ ॥

भुवननिवहमूले भूरिकारुण्यशीले भवजलनिधिकूले भक्तलोकानुकूले ।
भगवति घननीले भव्यदाशेषलीले भवतु विनतपाले भावना गोपबाले ॥ ५० ॥

पीताम्बरं पृथुनितम्बभरं दयार्द्रनेत्राम्बुजं लसितहास्यलवास्यबिम्बम् ।
आनन्दकन्दलमहर्निशमस्तु पूर्णं मत्स्वन्तरङ्गभुवि मे नवमेघवर्णम् ॥ ५१ ॥

यच्चुम्बितं कमलयाऽमलया कपोले तन्मन्दहासरुचिरं सुचिरं त्वदीयम् ।
सौन्दर्यसारसदनं वदनं दशोर्मे स्वामिन्कदाऽभिशमदं प्रमदं प्रसूते ॥ ५२ ॥

मुग्धस्मितांशुमधुराधरबिम्बचुम्बिवंशाग्रनादिमरसास्वाद मत्ताक्षम् ।
चक्षुः पिबेद्वद कदा नु मुदा मदीयं संपूर्णशारदसुधांशुसख मुखं ते ॥ ५३ ॥

कारुण्यवीचिकवलीकृतसर्वशोकं क्वेत्यादरान्मृगयमाणजनाथलोकम् ।
लावण्यनिर्जितनवाब्जदलप्रतीकं लप्स्ये कदा नु यदुनाथ तवावलोकम् ॥ ५४ ॥

दहन्वै त्रीन्लोकानपि बत कुतो नादहदिदं मनो मे दुर्वृत्तं मधुमथन संवर्तदहनः ।
अदाह्यं चेत्किंचिच्चव चरणरेणुं क्षिप ततो भवन्विज्ञानाग्निः प्रदहति समूलं तदचिरात् ॥

हृतं पापैः कामादिभिरपि च तत्सङ्गमलिनं निहत्यैतान्कृत्वा विमलमुपशान्त्यादिसलिलैः ।
मनोरत्नं गोप्तुं मुरहर मम प्रत्नमपटोर्दृढं पादूपीठे घटय घटनार्हं तव विभो ॥ ५६ ॥

रुजां पात्रे गात्रे रुदितभरिते श्रोत्रविवरे भृशं भ्रान्ते स्वान्ते प्रसरति च मोहेऽतिमहति ।
मतिस्त्वत्पादाब्जे मम कथमिदानीमभजतो भवेदन्तेऽहं ते मुहुरपतमन्ते चरणयोः ॥

मातर्मुकुन्दकरुणे शरणं प्रपद्ये त्वामेव मोऽपि भगवांस्त्वदधीन एव ।
तं मत्स्यकूर्मकिटिसिंहतनुं विधाय त्वं द्रौपदीकटितटे पटतां गताऽसि ॥ ५८ ॥

हेतुस्त्वमेव हि दयेऽब्ज यदम्ब भर्त्रा नानारताः सुनयनाश्च विहाय धानाः ।
हृत्वा कुचेलमुपगूह्य तदीयचेलाङ्क्ता ददौ चिपिटमुष्टिरपारतुष्टिम् ॥ ५९ ॥

न त्वं हरौ वसति चेत्तिलिहृद्यः तन् लोऽभ्य कावुरकृतिं स करोतु नाथः ।
छत्रस्य दण्ड इव दीप इव प्रभाया अन्धार एव हि दृशे न तवोपकर्त्र्याः ॥ ६० ॥

महानन्दं मन्द त्यजसि हरिनीलीवरुचिं पदे दातुं क्लेशान्यतमि विषये पाप विपदाम् ।
विहायाङ्के चेतः सरयमकलङ्कां कलिनीं महातङ्के पङ्के निदधसि पदं केऽतितृषिताः ॥

मुहुः पायं पायं भवविषमपायं व्रजसि किं महामोहोदर्के मधुरमिव चाभासि किमु ते ।
दृढाविद्यावद्यातुर हृदय नाद्यापि तव धीः सुखेच्छा स्याच्चेत्ते पिब हरिपदाम्भोरुहरसम् ॥

सुखाकारे घोरे कथय किमगारे तव सुखं चिरं नाके वा के सुकृतपरिपाकेऽपि सुखिनः ।
महानन्दे मन्देतरमहसि संदेहविधुरं मदाधारे धीरे विहर यदुवीरे हृदय रे ॥ ६३ ॥

सर्वार्तिमूलं जगदिन्द्रजालं निर्भूय दूरे नवनीतचोरे ।
कारुण्यभूषे कमनीयवेषे विवृद्धसत्वं क्षम मानस त्वम् ॥ ६४ ॥

चिरं गोपीनेत्रोत्सवपुषि चिदानन्दवपुषि
स्थिरामर्त्यश्रेणीहितजनुषि मे शार्ङ्गधनुषि ।
दयालौ दैतेयक्षयसुषि सुदा शेऽपि मदा
नवाम्भोदश्यामत्विषि निवस कंसद्विषि विभौ ॥ ६५ ॥

गते वा गीते वा शशिकरसिते वा विहसिते गले वा फाले वा वदनकमले वाऽतिविमले ।
करे वा हारे वा सरयमधरे वा हृदय रे रहे वा पादे वा निवस वसुदेवाङ्गजनुषः ॥

विण्मूत्रलोमनखरक्तवसास्थिमांसपिण्डे पृथग्वपुषि कृष्ण विवेचितेऽस्मिन् ।
को वा वदेदहमितीश जडोऽप्यथापि स्थूलः कृशोऽहमिति धिक् प्रलपन्विलज्जे ॥ ६७ ॥

प्राणेषु केशव न कोऽपि बहिर्व्रजत्सु ब्रूते व्रजामि बहिरित्यजडो जडो वा ।
एवं स्थिते क्षुधित इत्यहमल्पबुद्धिर्जल्पन् कथं न विदुषां परिहासपात्रम् ॥ ६८ ॥

नाहं मनो यदुपते न च बुद्धिरस्मि नैवानयोः किल सुषुप्तिषु भानमस्ति ।
अस्माभ्यमित्यनघ भामि सुषुप्तिसाक्षी दुःखी सुरूढ विशयवानिति धिक् प्रलापम् ॥

नैवास्मि कारणवपुर्न च तत्समाधावाभात्यमूनि हि वपूंषि हरे जडानि ।
वेद्यानि किं च न भवन्त्यनुवृत्तिभाञ्जि चिरसाक्ष्यहं कथममूनि सदानुवृत्तः ॥ ७० ।

चिद्रूप नन्वहमनुव्यवसाय एष वृत्तिर्न सा च विदितेति दृढाऽनवस्था ।
एकेति चित्त्वमहमस्मि विभो प्रसीद सर्वज्ञताद्यपि मिदावदुपाधिलभ्यम् ॥ ७१ ॥

नित्याशुचौ निखिलदुःखमये जडेऽस्मिन्भूत्वापि नित्यशुचिबोधसुखस्वभावः ।
दुःखी सुखीति विलुठामि मुहुर्विमुह्यन्नष्टात्मदृष्टिरनवाप्तभवत्प्रसादः ॥ ७२ ॥

त्वद्भृत्यपादरजसाऽतिपवित्रगात्रस्त्वद्भावनासुखसुधाम्बुधिमग्नचित्तः ।
श्रीकृष्ण विस्मृतसमस्तजगत्प्रवृत्तिः स्वामिन्कदा नु विहरेयमहं कृतार्थः ॥ ७३ ॥

मैत्रादिवृत्तिनिवहानपहाय दृश्यं तत्त्वावबोधदहने निखिलं च हुत्वा ।
पूर्णामलास्मितमबोधसुखाम्बुराशेः पद्मापते तव कदा दयया भवेयम् ॥ ७४ ॥

गन्तव्यदेशरहितो गतसर्वकृत्यः पर्याप्तशीतलशमः पारेपूर्णकामः ।
अस्माभिमत्यनुभवन्नसुखं सुखं वा धीरः कदा नु विहरेयमहं दयालो ॥

कारुण्यतस्तव विभो पिबति प्रबोधकुम्भोद्भवे निरवशेषमबोधसिन्धुम् ।
पार्थप्रियार्चिहर कालमरुत्प्रपन्नाः क्वत्याः प्रपञ्चमयतुङ्गतरङ्गमालाः ॥ ७६ ॥

वन्दारुकल्पतरवे गुरवे गुरूणां वागीशवागवधये निधये दयायाः ।
भृत्यन्तलभ्यमितये गतये गतीनां संसारसिन्धुतरये हरये नमस्ते ॥ ७७ ॥

त्वं सर्वशक्तिरसि सर्वविदस्यशेषलोकेश्वरोऽसि करुणावरुणालयोऽसि ।
किं वाऽस्ति वाच्यमिह शोच्यतमोऽहमस्मि त्वामेव यामि शरणं हि भवान्शरण्यः ॥

यद्वै तमः शमयितुं प्रभवेन्न दीपो नो चन्द्रमा न तपनो न तटिल्लता वा ।
कोऽप्येष गोपवनितास्तनमध्यभूषानीलो मणिस्तदधुना विधुनोति चित्रम् ॥ ७९ ॥

भृत्यस्तपादविनिवारितभृत्यखेद तापिञ्छ (वर्ण) तपनीयसनाभिचेल ।
मुग्धावतंस मुरलीधर मांसलांस गोपालवेष कुरु कौस्तुभभूष तोषम् ॥ ८० ॥

॥ श्रीः ॥

श्रीमत्परमहंसपरिव्राजकाचार्याणां ब्रह्मभूयं गतानां
श्रीविज्ञानानन्दसरस्वतीस्वामिनां विषये श्रीशंकर
गुरुकुलस्थश्रीसच्चिदानन्दभारतीभाण्डाराध्यक्षैः
ब्रह्मश्री वेङ्कटरामशास्त्रिभिः प्रणीताः इमे श्लोकाः ॥

श्रीरङ्गाख्यमहापुरे गुरुवरे निष्कामभक्त्या युतः
सुब्रह्मण्यसमाह्वयः सुरुचिरश्रीबालपूर्वाभिधः ।
योऽनल्पद्रविणव्ययेन रुचिरं संस्थाप्य गुर्वालयं
गुर्वाज्ञापरिपालनेन जनुषः साफल्यमाप्तोदिह ॥ १ ॥

वाणीविलासाख्यमभूतपूर्वं यस्यापथश्लोकसुगीतकीर्तिः ।
मुद्राप्य यः शांकरभाष्यमुख्यान् ग्रन्थानतानीद्भुवनोपकारम् ॥२॥

सोऽयं श्रीशंकरानन्दसच्चिदयतिवर्यनिर्व्याहृतवनः ।
पारिव्राज्यमथो लेभे कृपायाः सद्गुरोर्बलात् ॥ ३ ॥

सोऽयं सर्वजिदाख्यवत्सरवरे शूरे गते चोत्तरा-
माशां चाथ कृपाभिधानमहिते मासेऽसिते पक्षके ।
सौम्ये चापि सुवासरे परगुरौ चित्तं समाधाय वि-
ज्ञानानन्दसरस्वतीयतिवरो ब्रह्मैक्यमापन्मुदा ॥ ४ ॥

मायूरनिवासिभिः श्रीमद्भागवतादिप्रवचनधुरीणैः ब्रह्मश्री
शिवरामकृष्णशास्त्रिवर्यैर्विरचिता इमे श्लोकाः ॥

श्रीरङ्गाख्यमहाक्षेत्रे सर्वसज्जनसंमतः ।
उदारहृदयो बालसुब्रह्मण्याभिधो द्विजः ॥ १ ॥

वाणीविलासनाशानं स्थापयन्मुद्रणालयम् ।
भगवत्पादभाष्यादिग्रन्थान् मुद्राप्य सर्वज्ञः ॥ २ ॥

समर्प्य श्रीशृङ्गगिरिस्वामिपादारविन्दयोः ।
द्रव्यस्य जन्मनो बुद्धेः सार्थक्यं समपादयत् ॥ ३ ॥

रमणीयतरं सर्वदेवतास्मारकं शुभम् ।
विरचय्यालयं तत्र प्रतिष्ठाप्यादिशंकरम् ॥ ४ ॥

राजेश्वरीं च विधिना वैदिकेन प्रहृष्टधीः ।
पूजार्थं स्वस्य सर्वस्वं तदधीनं चकार यः ॥ ५ ॥

सोऽयं श्रीशंकरानन्दस्वामिनाप्युपदेशतः ।
तुरीयाश्रमं प्राप्य विज्ञानानन्दनामवान् ॥ ६ ॥

भगवत्यर्पिताध्यात्मस्तन्मनास्तत्परायणः ।
विसृज्य मौलिकं देहं ब्रह्मभूयं गतो महान् ॥ ७ ॥

तैः स्थापिताः सर्वधर्मा वर्धन्ताद्धरोत्तरम् ।
सर्वेश्वरश्च कृपया सद्गुरूणां प्रसादतः ॥ ८ ॥

॥ श्रीः ॥

लालगुडीवास्तव्यैः पण्डितप्रवरैः ब्रह्मश्री
अरुणाचलशास्त्रिभिर्विरचिताः ॥

अब्दे सर्वजिदाह्वये दिनकरे याते ह्युदीचीं दिशं
वासन्ते वृषमासि सौम्यदिवसे कृष्णादिमे चेन्द्रभे ।
कृष्णार्यात्मजनिर्गुरौ समधिकां भक्तिं वहन् बालसु-
ब्रह्मण्यार्यसुधीरगात्वरपदं संन्यासदग्धाशुभः ॥ १ ॥

योऽनल्पविस्तव्ययतः प्रतिष्ठां
वाणीविलासस्य चिराद्व्यतानीत् ।
मुद्रापय चाद्यस्य गुरोः प्रबन्धा-
न्प्राचारवत्प्राज्ञजनप्रतीक्ष्यान् ॥ २ ॥

तुङ्गोऽनुत्तमसद्गुणैर्धनवतां साद्येन भक्त्या च यः
श्रीरङ्गे निजशंकरालयवरे ह्याम्थापयच्छारदाम् ।
तुङ्गातीरविहारिमद्गुरुकृपाप्राप्तेज्यसच्छंकरा-
नन्दाभिख्ययतीश्वराश्रमसंन्यासोऽत्यजत्स्वां तनुम् ॥३॥

सोऽयं सद्गुरुभक्त्याश्रमंन्वामाश्रमभूषितः ।
श्रीविज्ञानानन्दपूर्वसरस्वत्यभिधोज्ज्वलः ॥ ४ ॥

गुरुशास्त्रोपदेशेषु श्रद्धामन्यादृशीं भजन् ।
प्रापद्ब्रह्मपदं पुण्यं मुमुक्षुभिरभीप्सितम् ॥ ५ ॥

॥ श्रीविज्ञानानन्दसरस्वतीचरितम् ॥

त्रिशिरःपुरीवास्तव्यैः ब्रह्मश्री पि. जि. सुन्दरशास्त्रिभिर्विरचितम् ॥

आसीच्छ्रारूयनगरे कृष्णस्वाम्याह्वयो द्विजः ।
हौण्यां वाण्यां च गैर्वाण्यां कुशलः स्वामिभक्तिमान् ॥ १ ॥

प्राड्विवाकश्चाद्वितीयः सद्वितीयोऽभवन्मुदा ।
असूत तद्धर्मपत्नी ज्येष्ठम्बाम्याह्वयं सुतम् ॥ २ ॥

परार्थवादी प्रथुश्च बुधोऽसौ क्रमशोऽभवत् ।
मातर्यस्य प्रमीतायां पिताऽभूद्दुःखकर्शितः ॥ ३ ॥

पुनः प्राप्तुं चाग्निमत्त्वमुपयेमे गृहान्तरम् ।
सुषुवे शिवकामाऽसौ सुब्रह्मण्याख्यबालकम् ॥ ४ ॥

सुतो मनोजवसोऽयं सिंहसंहननोऽभवत् ।
स्वामिभक्तः पिता चास्य स्वाम्यद्रौ स्वगृहान्तिके ॥ ५ ॥

निर्मायैकं धर्मसत्रं वित्तं व्यश्राणयद्बहु ।
लक्ष्मीजानिं समाराद्धुं श्रुतिरूपविमानगम् ॥ ६ ॥

वैकुण्ठसंमितं क्षेत्रं श्रीरङ्गाख्यमुपेयिवान् ।
चित्रवीथ्यां दक्षिणस्यां दक्षिणीयेषु भूरिदः ॥ ७ ॥

दक्षिणाभिमुखं गेहं निर्ममे निर्ममो मुदा ।
प्रगे भजनगोष्ठ्येका प्रत्यहं च तदादरात् ॥ ८ ॥

वीथिप्रदक्षिणं चक्रे गायकोद्धसुगीतिभिः ।
गायकान् भक्तिभरितान् संमानैर्बहुतोषयत् ॥ ९ ॥

मनोवाक्कायजगुणैर्वर्धते बालकोऽन्वहम् ।
अथ शास्त्रोक्तवयसि तातः सुतमुपानयत् ॥ १० ॥

पित्रोरभिप्रायवशात् प्राये कौमारकेऽपि च ।
माणवोऽयं विशालाक्ष्याः पाणिं जग्राह पाणिना ॥ ११ ॥

अभ्यस्यामावाङ्मलभाषां बी ए बिरुदमाप च ।
अधीत्य देवभाषां च लेभे तत्रापि नैपुणीम् ॥ १२ ॥

गते काले बहुतिथे वैकुण्ठं प्राप तत्पिता ।
अस्तूर्यपश्याऽस्य माता मेने प्राणैः समं सुतम् ॥ १३ ॥

पत्न्यां प्रीतियुतोऽप्येष मातृसेवापरोऽभवत् ।
मानितो बन्धुभिर्मित्रैः सुखेनोवास सत्पथे ॥ १४ ॥

(शिष्टमग्रे)

समस्तं शब्दस्पर्शरूपरसगन्धादिकं आत्मार्पणदृशा आत्मापर्ण[illegible]धया, सपर्यापर्यायः सपर्या पूजा तस्याः पर्यायः रूपान्तरं, सपर्यैवेत्यर्थः, तव ते भवतु भू[illegible] यद् प्रसिद्धमेव मे मम विलसितं विलासः ॥

अत्रेत्थं पदयोजना— हे भगवति, आत्मार्पणदृशा जपः जल्पः, सकलमपि शिल्पं मुद्राविरचना, गतिः प्रादक्षिण्यक्रमणं, अशनादि आहुतिविधिः, संवेशः प्रणामः, अखिलं सुखं मे यद्विलसितं च तव सपर्यापर्यायो भवतु ॥

अयमर्थः— जल्पादीनां जपादिरूपता यथार्हं कल्पिता । एवं नयनोन्मीलितनिमेषोन्मेषाङ्गभङ्गजृम्भादीनां यथार्हं सपर्यापर्यायता ऊह्या । शब्दादेः सुखकरस्य वस्तुनः षोडशोपचाराव्यतिरेकेण आत्मार्पणबुद्धया त्याग एव सपर्यापर्यायः, न तु स्वीकृतानाम् । यद्वा, शब्दादीनां यादृच्छिकसंभवेन सुखप्रादुर्भावे तत्सुखं मच्छेषं न भवति, किं तु सदाशिवायेत्यर्पणं सपर्यापर्यायः ॥

अत्रेदमनुसंधेयम्— समयिनां मते समयस्य सादाख्यतत्त्वस्य सपर्या सहस्रदलकमल एव, न तु बाह्ये पीठादौ । ये ये समयिनो योगीश्वरा जीवन्मुक्ताः संसारयात्रामनुवर्तमानाः सादाख्यतत्त्वमनुचिन्तयन्तः, आत्मैकप्रवणाः वर्तन्ते, तेषां 'जपो जल्पः शिल्पं' इत्यादिना सपर्याप्रकारो निरूपितः । ये तु समयिनो योगीश्वरा विजने गुहान्तरे वा बद्धपद्मासनाः निगृहीतेन्द्रियाः सादाख्यतत्त्वध्यानैकनिष्ठाः वर्तन्ते, तेषां वक्ष्यमाणचतुर्विधबहिर्धैक्यानुसंधानमेव भगवत्याः सपर्येत्यर्थादुक्तं भवति । अतश्च पञ्चद्वयेऽपि बाह्यपूजायां तत्क्रियाकलापे च तत्संपादनायां च क्वेशो नास्ति समयिनामिति रहस्यम् । यत्तु चन्द्रज्ञानविद्यायामुक्तम्— 'सूर्यमण्डलमध्यस्थां देवीं त्रिपुरसुन्दरीम् । पाशाङ्कुशधनुर्बाणान्धारयन्तीं प्रपूजयेत् ॥' इति बाह्यपूजाप्रकारकथनम्, तत्तु समयैकदेशिमतमिति पुरस्तात्प्रपञ्च्यते ॥ २७ ॥

॥ सौभाग्यवर्धनी ॥

प्रभावमहिमानमभिधाय सर्वनिवासभूतायाः सचक्रायाः परदेवतायाः स्वात्मत्वेन भावनाफलितमर्चनारूपमभिसंधत्ते — जप इति । सर्वोऽपि जल्पो वाग्व्यवहारः मातृकास्वरूपः; मातृका च त्वन्मयी । अतः शब्दरूपं सकलं जपत्वेन पर्यवस्यतु । शिल्पं सकलं हस्तव्यापाररूपं मुद्रात्वेन तव संतोषकरं भवतु; मुद्राणां हस्तचेष्टारूपत्वात् । गतिः प्रादक्षिण्यक्रमणं भवतु; प्रादक्षिण्यक्रमणस्य चरणव्यापाररूपत्वात् । अदनादि भक्षणादि भक्ष्यचोष्यपेयलेह्यानीत्यादि आदिशब्दाद्गृह्यते । अदनादिकर्म आहुतिविधिर्भवतु । प्रणामः संवेशः, शयनं प्रणामो भवतु; प्रणामस्यापि दण्डवत्प्रणिपातरूपत्वात् । निद्रादिसुखमाखिलमात्मार्पणदृशा स्वात्मनि परदेवतायाः अभेदेनारोपणबुद्धया यन्मे विलसितं तत्सर्वं सपर्यापर्यायो भवतु । सपर्यावत्तव संतोषकृद्भवतु । अयं श्लोकार्थः ॥

भावनाप्रकारस्तु— श्रीगुरुः सर्वकारणरूपा शक्तिः । तेन नवरन्ध्ररूपो देहः । नवचक्रशक्तिरूपं श्रीचक्रम् । वाराही [illegible] । गुरुरूपा कुण्डलिनी [illegible] । पुरुषार्थाः सागराः । देहो नवरत्नद्वीपः त्वगादिसप्तधातुरोमसंयुक्तः । [illegible] । तेजः कूर्मकोद्यानम् । रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसा पृथ्वी । इन्द्रियेषु, वैखरी वाक्, ज्ञाता होता; ज्ञातृज्ञानज्ञेयानामभेदभावनं श्रीचक्रपूजनम् । नियतिनिबद्धाः शृङ्गारादयो रसाः एताः अणिमादिसिद्धयः । कामक्रोधलोभमोहमदमात्सर्यपुण्यपापरूपा ब्राह्म्यष्टशक्तयः । ओंकारस्थाः पुरुषशक्तयः । पञ्च भूतानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि इदं मन इति कामाद्यर्चिष्यङ्गताः पीठदेवताः । वचनादानगमनविसर्गानन्दहानोपादानोपेक्षायुक्तयः अनङ्गकुसुमादयः शक्तयोऽष्टौ । अनन्तपद्मा कुहूर्विश्वोदरी वरुणा हस्तिजिह्वा यशोवती गान्धारी पूषा शङ्खिनी पयस्विनी सरस्वती इडा पिङ्गला सुषुम्णा चेति चतुर्दशनाड्यः सर्वसंक्षोभिण्यादिचतुर्दशशक्तयः । प्राणापानव्यानोदान समानरूपेण नवधा भिन्नाः सर्वसिद्धिप्रदादिबाह्यदशारदेवताः । एतद्गुरुशक्तिसर्वसिद्धिदेवीरेचकः पाचकः शोषकः दाहकः प्लावकः इति प्राणाद्युपेण पञ्चधा जठराग्नेर्भवति । स्वाङ्गे उद्गारकः श्लेष्मको जृम्भको क्षुत्क इति नागाद्यात्मना पञ्चविधः; अनुप्राणां देवताः अन्तर्दशारगताः । इतीत्थं चतुर्विधमन्नं पाचयति । तदुक्तं भगवद्गीतासु— 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥' (भ० गी० अ० १५-१४) । एता दशारस्थाः सर्वज्ञादिदशदेवताः अन्तर्दशारगताः । शीतोष्णसुखदुःखेच्छासत्त्वरजस्तमोगुणा अन्तर्दशारशक्तयः । भोगाः । पञ्चतन्मात्राः पञ्च पुष्पबाणाः । मन इक्षुधनुः । रागः पाशः । द्वेषोऽङ्कुशः । अन्तस्त्रिकोणे यः सदुत्तरखण्डमिति कामेश्वरी वज्रेश्वरी भगमालिनीति अन्तस्त्रिकोणगा देवताः । शुद्धा निगर्भयोनिः शक्तिचक्रेश्वरः । सदानन्दघनः पूर्णः स्वात्मैव परदेवता ललिता । लौहित्यकरणमेतस्य विसर्गः । अनया भावनया सर्वत्र सिद्धिः । भावनायामप्रमत्तता उपचाराः । अहं त्वं अस्ति नास्ति कर्तव्यमकर्तव्यमुदासीन्यमिति विकल्पानामात्मनि विलापनं होमः । भावनाविषयाणाममेदभावन तर्पणम् । पञ्चदशतिथिरूपेण कालस्य परिणामावलोकन पञ्चदश नित्या इति मुहूर्तत्रयं वा मुहूर्तमात्रं वा घटिकामात्रं वा भावनापरो जीवन्मुक्तः । तस्य देवता सर्वदा अभिमुखी तिष्ठति । चिन्तितकार्यसिद्ध्यत्वेन नित्यन्ति । एतादृशस्योपासकस्य, 'जगे जगरः' इत्यादिकं सर्वं तत्रैव भवति; न सदेहः । स एव शिवयोगीति निगद्यते इति कादिमतोक्त स्वात्मभावनाऽनेन श्लोकेन प्रतिपादिता ॥

॥ अरुणा-टीका ॥

जीवन्मुक्ता प्राप्य सर्वज्ञत्वादीनां [illegible] प्रकारमाह; अथवा— श्रीषोडशाक्षरीमन्त्रस्यासौ द्विविधः; षोढान्यासः, महाषोढान्यासश्चेति । तत्र महाषोढान्यासकर्ता नित्यशुद्धः; तस्य जलस्नानादिकं जपादित्रयेण पर्यवस्यति । यदुक्तं दक्षिणामूर्तिसंहितायाम्— 'महाषोढान्यासकर्ता शुद्धो भवति सर्वदा । जपो जल्पो भवेत्तस्य समाधिर्भक्षणं यतेः ॥ स्वयं यत्क्रियते कर्म तन्मुद्रारचनं भवेत् । तत्तद्ध्यानं भवेदिच्छा जायते यत्र मत्प्रिये ॥ प्रा क्षिण्यं भवेत्तत्तद्यत्र यत्र हि गच्छति । यत्र यत्रासने तिष्ठेत्तत्तदेव नमस्क्रिया ॥ यद्यदुच्चार्यते वाचा तत्स्तोत्रपठनं भवेत् । यदा यदा भवेत्तस्य प्रस्तदनुस्मरणं भवेत् ॥ तस्मादयं महाशुद्धो भवेत्सर्वत्र सर्वदा ।' इति ।

तादृशमहाशोढान्यासकर्तुः शुद्धतामाह— जप इति । हे भगवति; सकलशब्दस्य विभक्तिपरिणामेन सर्वत्रान्वयः । सकलः सर्वोऽपि जल्प्यत इति जल्पो वाग्व्यापारः । जप्यत इति जपः, 'स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् । स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशते ॥' 'स्वाध्यायादिष्टदेवतासंप्रयोगः' इति स्मृत्युक्त्या निर्दिष्टदेवतासंनिधापको जपः, सर्वस्याप्यभिवदनस्य मातृकारूपत्वाद्दास्याश्च स्वदृष्यनिषेधाभावात् । यद्यदभिवदनं क्रियते तत्तत्सर्वं मननिदिध्यासनोपासनादिपरिणामजनकेन श्रवणेन समं सकलमस्तमपि शिल्पं पाणीन्द्रियव्यापारः; मुद्रा देवतायाः स्तुतिः 'आवाहनसंनिधापनसंनिरोधनावगुंठनाकर्षणादयः; तासां रचना निर्माणम्; मुद्राणां हस्तचेष्टानां [illegible] हस्ताभ्यां मर्दनैरुच्यैः रङ्गवल्लीकरणस्थलशोधनादि तत्सर्वं मुद्राविज्ञानत्वेन पर्यवस्यतु । तथा कला समस्ताऽपि नर्तनगान पादेन्द्रियव्यापारः; प्रदक्षिणान्येव प्रादक्षिण्यम्; स्वार्थे ष्यञ् । तदर्थं क्रमणं प्रदक्षिणविधानम्, प्रदक्षिणक्रियायाः पादेन्द्रियव्यापारत्वात् । यद्यदुद्दिश्य यत्र यत्र गम्यते, तत्तदपि भवत्याः प्रदक्षिणविधानं सदैव पर्यवस्यतु । तथा अशनं भोजनमाहुतिद्रव्यं तद्भक्षणादि, भक्ष्यभोज्यलेह्यचोष्यादिकं सकलमाहुतिर्जां देवताद्देशेन द्रव्यप्रक्षेपणा विधि [illegible] यच्च प्रणामावश्यनादि हूयते, तत्सर्वं त्वदुद्देशेन द्रव्यप्रक्षेप एव भवतु; जठराग्निर्वै स्वाहाग्निमुखाय' । तदुक्तं— 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥' (भ० गी० १५-१४) तथा संवेशः स्वात्मोद्दीनश्चि [illegible] दृष्टयवलोकनाभिप्रायनिवेदनम् । यद्यत्किंचित्संवेशोद्दीनं किं क्रियते तत्सर्वं अवश्यमुद्दीनं [illegible] वेद्यतु । त्वया खिलं सप्रस्तं सुखं सुखत्वेन मन्यमानं मे त्वद्रूपामर्शस्य मम [illegible] [illegible] तव भवत्याः सपर्योपचर्यापदः अर्हणाक्रमः; 'पर्यायः क्रमनिर्माल्य [illegible] च' इति रत्नमाला । शुश्रूषारूपा आत्मार्पणदशा सर्वमात्मार्पणं तद्रूपा तद्रूपा ब्रह्मार्पणरूपा; हलन्ताद्वा' इति टाप् । दक्षेति पाठे सर्वमपि पूजाङ्गं भवतीत्यर्थः । भवतु जायताम् । मन्त्रो ज्वलादो मया क्रियते सोऽपि सर्वोऽपि ब्रह्मार्पणरूपेण पर्यवस्यतु । उक्तं च गीतासु— 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥' इति; 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि कौन्तेय प्रतिजाने प्रियोऽसि मे ॥' इति च ॥ जपो जल्प इत्याद्युपात्तैकादशेन्द्रियगणेन यद्यदभिवदनादिकं क्रियते, यच्च प्राणादौ हूयते सर्वमेतत्त्वदर्पणमेव भवत्विति भावयामि । न हि भावनादन्यत्पूजाङ्गमो मुख्योऽस्तीत्याभसंधिः ॥ २७ ॥

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
न्यायसुधाकृतस्तु— 'पृथक् चतुर्भ्यां भेदेन समर्पितयोरपि देवतोद्देशशब्दाभ्यां [1]समुदितयोर्विधेयत्वान्न वाक्यभेदः। यथा— 'गव्याश्वाश्वतरस्य गर्दभस्याजाश्वावयश्च व्रीहयश्च तिलाश्च यवाश्च माषाश्च तस्य द्वादशशतं दक्षिणा' इति ज्योतिष्टोमदक्षिणाविधौ भिन्नशब्दसमर्पितानामपि गवादीनां पशुभिः समुच्चितानां दक्षिणात्वेनान्वयात्तदादिरूपैका[2] दक्षिणा विधेया, न तु गवादय' प्रत्येकं दक्षिणात्वेन विधेया इति न वाक्यभेदः' इत्याहुः। सोऽपि प्रयासो विफलः। मन्त्रवर्णप्राप्ताग्निसूर्यतनुत्वेन प्रकाशकत्वादीनामेवोपयोगात्तौ तयोरपि विधाने गौरवात्। प्रपञ्चितमेतदस्माभिः विधिरत्नाकरे। ननु मन्त्रवर्णेऽग्नेस्तनूत्वादिप्राप्त्यनुवादित्वं मुख्यं 'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः। देवतायाग्नेस्तत्र दुर्बलं तूपलक्षणम्॥' इति तद्धितचतुर्थीमन्त्रवर्णानामुत्तरोत्तरदौर्बल्येन [3]चतुर्थीसद्भावे मन्त्रवर्णता देवताप्रत्ययोगात्। न च विरोधे सति बलाबलप्रयुक्तबाध्यबाधकभावः। इह तु नास्ति चतुर्थीमन्त्रवर्णयोर्विरोध इति शङ्कनीयम्। मन्त्रवर्णतोऽग्निसूर्यौ ज्योतिर्विशिष्टौ देवते प्राप्नुतः, चतुर्थीभ्यां केवलाग्नेति विरोधसद्भावादिति चेत्— मैवम्। अग्निसूर्यैक्यये विधिलाघवार्थं मन्त्रवर्णतोऽग्निसूर्यप्राप्तिमपेक्षेत इत्यपेक्षितस्य दुर्बलस्यापि प्रबलेन बाधयोगात्। ज्योतिर्विशिष्टयोश्च सूर्यस्य च मन्त्रवर्णतः प्राप्तावप्येकदेशद्वारा तदनुवादसम्भवात्। 'अग्नये वैश्वानराय पुरोडाशं द्वादशकपालं निर्वपति' 'अग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत्' इत्यादिविधिषु श्रूयमाना अशिष्टदेवतानां, 'वैश्वानरीं व्रतपतिं पवित्रेष्टिं तथैव च। ऋतावृतौ प्रयुञ्जानः पुनाति दशपूरुषम्॥' इत्यादिवचनेषु तद्धितप्रकृतिभिरेकदेशद्वारा अनुवाददर्शनाच्च। ननु यत्र यो गुणः पूर्वपक्षिणो विधेयत्वेनाभिमतः, तत्र तस्य गुणस्य प्रापकमेव शास्त्रं तत्प्रत्ययशास्त्रं भवति। अत्र तु यद्यप्यग्निहोत्रवाक्य एव गुणविशिष्टकर्मविधिरिति पूर्वपक्षे तथाभूतं तत्प्रत्ययशास्त्रमस्ति, तथाऽपि [4]सायंप्रातर्होमयोः दर्विहोमेषु वा गुणविधिरिति पूर्वपक्षयोस्तन्नास्तीति चेत्— सत्यम्। न ह्यत्रो यत्र गुणविधिः पूर्वपक्ष्यभिमतस्तत्रासामान्येन प्राप्त इति[5]। किं तु यस्य गुणस्य विधानं संभवति, यद्विधित्सया धात्वर्थादुत्पाद्यते विधिः, स गुणः समानपदश्रुत्युपात्ते धात्वर्थ एव विधीयमाने शास्त्रान्तरप्राप्तो नामप्रवृत्तिनिमित्तत्वेनानुवदितुं[6] शक्यते किं श्रुतपरित्यागेनेति ब्रूमः। चतुर्गृहीतमिति। 'चतुर्गृहीतं वा एतदभूत्स्वाधारमाधार्यं' इति त्रिवीतं प्राचीनं प्रवाजान्यजति' इत्याधारसंस्कारारूपविधिस्थितगुणप्रापकशास्त्रान्तरसद्भावात् तन्निमित्तमाधारवदस्यापि नामधेयत्वं युक्तमित्यर्थः। ननु संस्कारकर्म क्वचिदपि नामवन्न दृष्टमित्याशङ्क्याह— दृष्टं चेति। द्वितीयाध्याये अंशुग्रहाधिकरणे' 'अंशुं गृह्णाति' 'अदाभ्यं

---

1. समुदितयो॰ 2. गवादेका 3 चतुर्थीसद्भावान्मन्त्रवर्णयोर्देवताग्रहणासंभवात्।
4. प्रातर्होमेषु 5. पूर्वपक्ष्यभिमतस्तत्र सामान्येन प्राप्त इति। 6. ॰नापवदितुं

गृह्णाति' इति। न चास्य संस्कारकर्मत्वं 'इन्द्र ऊर्ध्वोऽध्वर इत्याधारमाधारयति' इति मान्त्रवर्णिकेन्द्रदेवतासम्बन्धाद्यागत्वसिद्धेः। अतो नामत्वम् ॥

गृह्णाति' इति श्रुतयोर्ग्रहादाज्यशब्दयोर्ग्रहणाख्यसंस्कार्यनामत्वं प्रसाधितम्। तस्यायसाम्यादुपांशुयाजान्तर्यामशब्दावपि संस्कारनामनी इति तदुदाहरणम्। ननु उपांशुयाज एव आधारणसंस्कारविधिः पूर्वपक्षिणा शङ्कितः। इह तु प्रयाजाज्ये तत्प्रख्यशास्त्रं प्रदर्श्यते। किं केन संगतम्? उच्यते— इत्थं वा सिद्धान्ती मन्यते— 'सर्वस्मै वा एतद्यज्ञाय गृह्यते। तद्ध्रुवायामाज्यम्' इति वचनेनोपांशुयाजेऽप्याज्यप्राप्तेर्न तत्र द्रव्यान्तरापेक्षाऽस्ति। न च तत्सामान्यवचनमुपांशुयाजातिरिक्तद्रव्यापेक्षाङ्गप्रधानयागविषयं स्यादिति वाच्यम्। अनिरूपितविशेषक्षारणयोग्यद्रव्यसामान्यप्रापकशास्त्रादाज्यरूपद्रव्यविशेषप्रापकशास्त्रस्यैव सामान्यशास्त्रत्वेऽपि क्षीघ्रप्रवृत्तिकत्वेनानुष्ठानोपयोगित्वात्। तस्मात् 'चतुर्गृहीतं वा' इत्यादिना प्रयाजाज्य एव आधारणसंस्कारपरामर्शात्तद्विधिः शङ्कनीयः। तत्र च तस्यैव वचनस्य तत्प्रख्यशास्त्रस्य सद्भावान्न गुणविधिर्युक्त इति। वस्तुतस्तु [1]आधार्यतीति संस्कारविधिः। आधारपदं चतुर्गृहीतवाक्यरूपतत्प्रख्यशास्त्रलब्धप्रवृत्तिनिमित्तकं [2]तन्नामेति अयं पक्षो न युक्तः। यदि हि चतुर्गृहीतवाक्यमाधारवाक्येन पात्रस्थितपास्यमानजलस्येव किंचित्तत्क्षारणात्मके[3] संस्कारे [4]विहितेकियत्तत्क्षारणीयमित्याकाङ्क्षायां चतुर्गृहीतमध्ये चतुर्थांशं क्षारयित्वा त्रिभिरंशैस्त्रयः प्रयाजा यष्टव्या इत्येतदर्थतयेष्यते, नहि तत्र तत्प्रख्यशास्त्रं भवेत्। आधार्यतीत्यनेन विधिस्तिरस्तस्य [5]आधारणसंस्कारस्य तत्र विधानाभावात्। यदि चतुर्गृहीतवाक्यमेव आधारणसंस्कारस्यापि विधायकमिति तस्य तत्प्रख्यशास्त्रतेष्यते, तदा न आधार्यतीत्यनेन आधारणसंस्कारो विधेयः, चतुर्गृहीतवाक्येनैव तस्य विहितत्वादिति कस्याधारपदं तत्प्रख्यशास्त्रलब्धप्रवृत्तिनिमित्तं[6] नाम स्यात्। तस्मादुभयथाऽप्यनुपपन्नः संस्कारपक्ष इत्यभिप्रेत्य तं पक्षं परित्यजति— न चास्य संस्कारकर्मत्वमिति। तर्हि आधारवाक्यस्य का गतिरित्याकाङ्क्षायां यागविधिरित्याह— इन्द्र ऊर्ध्व इति। ननु मन्त्रवर्णतो देवता लभ्यताम्। द्रव्यं कुतो लभ्यते? 'इन्द्र ऊर्ध्वः' इत्यादावेव द्रव्यदेवतासंबन्धश्रवणाद्यागविधिकल्पनायामधिकरणविषयवाक्यं किं विधेयमापाद्यतु[7] यस्य आधारपदं तत्प्रख्यशास्त्रलब्धप्रवृत्तिनिमित्तक नामधेयं भवेत्। कथं च 'इन्द्र ऊर्ध्वः' इत्यादौ प्रत्यक्षे देवतासंबन्धश्रवणे जाग्रति तदविगानेन संस्कारविधिपूर्वं श्रौत्यानामिति चेत्— उच्यते। चतुर्गृहीतवाक्येनैव द्रव्यलाभः। तत्र आधारशब्देन क्षारणयोग्यद्रव्यवाचिनोक्तस्य आधारणक्रियासंस्कार्यत्वेनान्वितस्य आज्यस्य श्रवणात्। तदेवाधार्यतीत्यनेन विधिस्तिरततया पूर्वपक्षाभिमतस्य क्षारणसंस्काररूपस्य गुणस्य विधायकं तत्प्रख्यशास्त्रमिति तल्लब्धप्रवृत्तिनिमित्तकमाधारपदं नामधेयम्। विधेयं च तत्र आधारनामकं किंचित्प्रधानकर्म। तत्तु क्षारणमात्ररूपत्वेन स्रुतशस्त्रादिवदस्यागात्मकतया प्रधानकर्म न भवति। किं तु यागात्मकतयेत्येतत् 'इन्द्र ऊर्ध्वोऽध्वर इत्याधारमाधारयति' इति वाक्येन लभ्यते। एवं चतुर्गृहीतवाक्येन संस्काररूपतया

---

1. आधार्यते: 2. तन्नामद्वयपक्षः 3 क्षारणात्मके 4. कियत्तारणीय० 5. अवधारण० 6. निमित्तकं 7. •मासादयतु

अर्थाक्षिप्तमाघ्यांशामिप्रायेण द्वितीयानिर्देशः। कथं पुनरशब्देनानध्याहृतेन च शाब्दस्यान्वयः। न हि श्रुत्या लक्षणया वा विधिवाक्ये साध्यत्वं शाब्दम्; नाप्यध्याहृतं वाक्यभेदप्रसङ्गात्— अग्निहोत्रहोमं कुर्यात्, दोहेन च फलमिति। (तत्र) अर्थाक्षिप्तेनापि यद्यन्वयः स्याद्यथा सति गुणोऽप्युद्भिदादिवाक्येऽर्थाक्षिप्तमाघ्यांशामिप्रायेण करणभूतेऽपि कर्मणि विधीयमानः श्रुत्यैव शक्यो विधातुमिति व्यर्थमशब्देन दत्तजलाञ्जलिः स्यात्।

अवगतत्वादपि श्रारणज मान्त्रवर्णिकदेवतासंबन्धाद्यागरूपताऽपि भवतीति प्रस्तरप्रहरणादि वदुभयरूपता। प्रस्तरप्रहरणं विनियुक्तसंस्कारः। अयं तु प्रयाजेषु विनियोक्ष्यमाणस्य संस्कार इति विशेषः। मन्त्रवर्णश्रवणान्मान्त्रवर्णिकदेवतान्वये सत्यपि केवलसंस्कारविधिरिति पूर्वपक्षोत्थानमित्यम्— आधारशब्दोक्तपदप्रधानद्रव्यद्वारा तद्विनियुक्तमन्त्रस्थाप्युपांशुयाजसंबन्धात्तस्मिन्मान्त्रवर्णिकेन्द्रदेवतान्वयः। तस्यापि याज्यानुवाक्यारूपमन्त्रवर्णप्राप्तैर्विष्ण्वादिभिर्विकल्पः, तेषामपि विकल्पितत्वात् इति। तथा च चतुर्गृहीतवाक्येन आधारणस्य प्रयाजाज्यसंस्कारत्वे स्पष्टं प्राप्यमाणे तद्विगणस्य कथमुपांशुयाजद्रव्यसंस्कारत्वेन पूर्वपक्षोत्थानम्? चतुर्गृहीतवाक्यश्रुतं प्रयाजाज्यसंस्काररूपमाधारणमन्यत्। 'आधारमाधार्यति' 'इन्द्र ऊर्ध्वोऽध्वर इत्याधारमाधारयति' इति वाक्ययोः श्रुतमुपांशुयाजद्रव्यसंस्काररूपाधारणमन्यदिति पूर्वपक्षी मन्यते। चतुर्गृहीतवाक्ये स्पष्टमेवाधारणे प्रयाजाज्यावयत्वेन श्रुतमिति तयोरुपांशुयाजद्रव्यसंस्काररूपाधारणान्तरविषयत्वं न कल्पनीयम्। तयोः प्रयाजाज्यसंस्काररूपस्यैव श्रारणस्य प्रधानकर्मताऽप्यस्ति। सा च द्रव्यदेवताऽलाभाद्यागरूपतयेत्येवमर्थोपपत्तौ आनिरूपितविशेषद्रव्यद्वारा मन्त्रतत्प्रकाश्यदेवतयोरसान्निहितोपांशुयाजान्वयो न कल्पनीय इति सिद्धान्तयाशय इति सर्वमवदातम्॥

एवमग्निहोत्राधारपदयोर्विधित्सितगुणप्रापकशास्त्रान्तरसत्त्वेन गुणविध्यसंभवात्तत्प्रकाश्यशास्त्रस्य प्रवृत्तिनिमित्तकं कर्मनामत्वमुपपादितम्। तथा सति कथं द्वितीयानिर्देशः? अग्निहोत्रनामकेन यागेन फलं भावयेत्, आधारनामकेन च इति तृतीयैव खलु भाव्यम्। तत्राह— अर्थाक्षिप्तेति। ननु अर्थाक्षिप्तस्याशब्दत्वात्तेन कथ शाब्दस्याख्यातार्थस्यान्वयः। न ह्यर्थाक्षिप्तं साध्यत्वं श्रुतस्याध्याहृतस्य वा कस्यचिच्छब्दस्यार्थ इत्याशङ्क्य— कथं पुनरिति। ननु अर्थाक्षिप्त तत् द्वितीयाया एवार्थ इत्याशङ्क्याह— वाक्यभेदप्रसङ्गादिति। वाक्यभेदमग्निहोत्रवाक्ये दर्शयति— अग्निहोत्रहोमेनेति। आधारवाक्येऽपि वाक्यभेदप्रसङ्गतुल्यः। यदि शाब्दस्यार्थं वाक्यभेदप्रसङ्गं चाविगणय्य अर्थाक्षिप्तेन अशाब्देनापि शाब्दस्याख्यातार्थस्य अन्वयोऽभ्युपगम्येत, तदा उद्भिदादिवाक्येष्वपि सोऽभ्युपगन्तुं शक्यः, उद्भिदा याग कुर्यात्, यागेन पशुनित्यादिप्रकारेणेति मतुवर्थलक्षणापत्त्या गुणविधिनिराकरणं प्रत्युद्भूतं स्यादित्याह—(तत्र) अर्थाक्षिप्तेनापीति। एवं करणभूतानां [1]धात्वर्थानां साध्यत्वेनान्वयस्य निराकरणेन तेषां करणत्वेन

---

1. धात्वर्थत्वेन

एतेन ये धात्वर्थस्य विषयत्वा करणत्वेन चान्वयं मन्यन्ते ते निराकृताः। विषयभूतेन हि कर्मं करणवाचिनां नामधेयानां सामानाधिकरण्यम्। आर्थिकेन करणत्वेन सामानाधिकरण्यमिति चेत्, साध्यत्वमपि हार्थिकमस्तीति गुणविधिरपि विनैव मत्वर्थलक्षणया विना च वैरूप्येण स्यादिति समस्तेन नामधेयप्रतिपादनमनर्थकं स्यात्। अथ विषयत्वद्वारेण करणत्वपर एव शब्दस्ततोऽन्यपरेण शास्त्रेणोपपादयितुमशक्यत्वेनोपात्तं विषयत्वं न शास्त्रार्थः स्यादतत्परत्वात्। अथ शब्द एव प्रथमं विषयतामधिगम्य पुनः करणतया-

---

साध्यत्वेन [विषयत्वेन] चान्वयमभ्युपगच्छतां प्राभाकराणां मतं निरस्तुमाह— एतेनेति।

प्राभाकराः स्वलक्षणमाहुः— लिङादियुक्तेषु वाक्येषु लिङादेरर्थो नियोगापरपर्यायमपूर्वं कृतिसाध्यत्वरूपेण कार्यत्वेनाभिधत्ते। तत्र साक्षात्कृतिसाध्यत्वासंभवात् किंविषयकृतिसाध्यं तदित्याकाङ्क्षायां धात्वर्थविषयकृतिसाध्योऽसौ तस्य कृतिसाध्यत्वसंघटनाय स्वयं कृतिसाध्यत्वेन धातुभिः समर्प्यमाणो यागादिरस्तस्य विषय इति उच्यते। यद्यपि अपूर्वं तद्विषयं न भवति, तथापि कृतिसाध्यत्वेन तदभिधाने तद्विशेषणभूतायाः कृतेः धात्वर्थः साक्षाद्विषय इति विशेषणविषयत्वात्तद्विशिष्टत्वरूपेण विशेष्यं प्रत्यपि विषय इति व्यपदिश्यते। एवं कृतिसाध्यत्वेन धातुभिः समर्प्यमाणो यागादिरपूर्वं प्रति करणमिति भवति। अपूर्वस्याक्रियात्वेन तत्र साक्षात्करणत्वात्कालान्वयेऽपि तद्विशेषणभूतायाः कृतिरूपाया भावनायाः क्रियात्वेन तत्र धात्वर्थस्य करणत्वोपपत्तेः। धात्वर्थेन हि यागादिना अनुष्ठितेन सा कृतिरपूर्वशरीरका क्रियते। एवं विशेषणकरणत्वाद्विशिष्टरूपेणापूर्वं प्रति करणत्वव्यपदेश इति। एवं वाक्यस्थैः धातुभिः साध्यत्वकरणत्वादिना रूपद्वयेन स्वार्थसमर्पणसामर्थ्याभावोपपादनेन निरस्ता इत्यर्थः। ननु विषयत्वेनैव यागादिर्धातुभिरभिधीयते, न करणत्वेनेत्याशङ्क्य निरस्यति— विषयभूतेनेति। करणत्वेनाऽसमर्पणे करणार्थतृतीयाविभक्तयन्तानां नामधेयानां सामानाधिकरण्यं न स्यादित्यर्थः। ननु नास्ति करणत्वे शब्दव्यापारः। किं त्वार्थिकं तत्। धात्वर्थो ह्यपूर्वे स्वविषयकृतिसाध्यत्वघटनाय तत्साधनमपि भवति। न खलु धात्वर्थविषयकृतिसाध्यत्वमपूर्वस्य धात्वर्थाजन्यत्वे घटते। पुरुषव्यापाररूपस्य च यागादेर्धात्वर्थस्यापूर्वं प्रति साधनत्वमपूर्वोत्पादनारूपा भावना प्रति करणत्वेनैव निर्वाह्यमित्येवमार्थिककरणत्वं साक्षात्[2] करणवाचिनामधेयसामानाधिकरण्यमुपपद्यत इति शङ्कते— आर्थिकेनेति। यद्यार्थिकेनापि शाब्दस्यान्वयमभ्युपैषि, तर्ह्युद्भिदादिवाक्येषु फलभावनाकरणस्य यागस्यासाधितस्य करणत्वायोगादार्थिकं साध्यत्वमप्यस्ति हेऽ तेन रूपेण विनैव मत्वर्थलक्षणया विनैव च वैरूप्यं स्वनिष्ठादेर्गुणस्यान्वयघटनान्नामत्वप्रतिपादनं सर्वमपि प्रत्युद्भूतं स्यात् इत्याह— साध्यत्वमपीति। अथ यदि वैरूप्यरूपदोषाद्बिभ्यतस्ते ब्रूयुः करणत्वमेव शास्त्रार्थः; विषयत्वं तदुपायमात्र विमर्शदशायामनुसंधेयम्। अतो न वैरूप्यम्; नापि यागसामानाधिकरण्यानुपपत्तिरिति; तत्राह— अथेति। विषयत्वं न शास्त्रार्थः स्यादिति। तथा च विषयरूपानुबन्धभेदस्य यजतेर्दानीत्यादिधातुभेदावगतस्य,

---

1. यद्यप्यपूर्वं प्रति यागो विषयो न भवति 2. करणत्वसत्त्वात्

ऽप्यभिधत्ते; कथं सकृदुच्चरितो द्विरभिदध्यात्? अभिधाने वा साध्यत्वमपि पुनरभिदधीत। न हि नियामकमस्ति द्विरेवाभिधत्ते न त्रिरिति, 'सकृत्प्रवृत्तायाः किमवगुण्ठनेन' इति न्यायात्। ततश्च गुणविधिरपि स्यादित्युक्तम्। अतः करणत्वेनैवान्वयो वाच्यो न विषयत्वेनेत्यास्तां तावत्। अतः कथं द्वितीयाश्रुतिनिर्देश इति वक्तव्यम्। तदुच्यते— अस्ति तावदार्थिकं धात्वर्थस्य साध्यत्वम्, असाधितस्य करणत्वानुपपत्तेः। अतः साध्यत्वसाधनत्वयोर्द्वयोरेकार्थसमवायात्, साध्याभिधायिनी द्वितीया साधनत्वमेव लक्षयन्ती धातुसामानाधिकरण्यं प्रतिपद्यत इत्यविरोधः॥

लिङादेर्वाचकस्य च समुदायेन बोध्यमानमपूर्वं लिङादेरेकरूपत्वेऽपि स्वबोधकान्तर्गतस्य यागादेर्विषयरूपस्यानुबन्धस्य यजत्यादिवाचकभेदेन भेदाद्भिद्यत इति सिद्धान्तो भव्येतेत्यर्थः। ननु विषयत्वकरणत्वयोरभिधानावश्यंभावात् क्रमेण तदुभयाभिधानमस्त्विति मन्दशङ्कामुद्भाव्य, क्रमेण श्रुतिसाध्यत्वापूर्वभावनाकरणत्वयोरभिधानवत् [1]स्वनिष्ठादिगुणसाध्यत्वस्याप्यभिधानं स्यादिति मतं धेलक्षणा[2]वैरूप्ययोरप्रसङ्गादुद्भिदादिषु [3]गुणविधिनिराकरणेन नामधेयत्वसिद्धान्तः प्रत्युद्धृतः स्यादिति पूर्वोक्तदूषणमावर्तयति— अथेत्यादिना। तस्मान्नामधेयसामानाधिकरण्यसिद्ध्यर्थं करणत्वेनैवापूर्वभावनान्वयो वक्तव्य इति परमतदूषणमुपसंहरति— अतः करणत्वेनेति। एवं प्रासङ्गिकं परमतदूषणं समाप्य प्रकृतामाधाराग्नेहोत्रवाक्यशेषद्वितीयानिर्देशानुपपत्तिशङ्कामुपसंहरति— अतः कथमिति। परिहर्तुं प्रतिजानीते— तदुच्यते इति। साध्यत्वबाधिन्या द्वितीयया साधनत्वं लक्ष्यत इति परिहरन् लक्षणाबीजं वाच्यलक्ष्यत्वयोः संबन्धं दर्शयति— अस्ति तावदिति। लक्षणाश्रयेण द्वितीयानिर्देशानुपपत्तिपरिहारमुपसंहरति— इत्यविरोध इति॥

॥ तद्व्यपदेशाधिकरणम् ॥ ५ ॥

तद्व्यपदेशं च [शश्च] ॥ ५ ॥

जैमिनीयन्यायमाला ॥

श्येनेनाभिचरन्यजेतेति श्रुतौ गुणः। विधीयते पक्षिरूपो नाम वा तस्य कर्मणः ॥ १३ ॥
श्येनेनेति गुणः काम्यः सौमिकः सोमबाधया। न चित्रावद्वाक्यभेदो रूढेर्वैषम्यदूषणम् ॥ १४ ॥

---

1. स्वनिष्ठादेः 2. वैरूप्यदोषयो॰ 3. गुणविधित्व॰

यथा वै श्येन इत्युक्ता ह्युपमानोपमेयता। नैकस्मिंस्तेन गौण्यास्य वृत्त्या स्यात्कर्मनामता ॥ १५ ॥

इह रूढशब्दा एव वाक्यभेदरहितास्तद्व्यपदेशवन्त उदाहरणम्; यथा—'श्येनेनाभिचरन्यजेत' इत्यादिषु श्येनादिशब्दाः। तेषु गुणविधिरुत कर्मनामधेयं वेति संशयः। अत्यन्तनिरूढत्वाद्गुणविधिर्ज्योतिष्टोमादिषु। काम्यत्वाच्च नित्यमुत्पत्तिशिष्टमपि स्तोमं बाधते। यद्वा गुणविशिष्टकर्मविधानम्; अप्रसिद्धार्थकल्पनातो वरं मत्वर्थलक्षणा सोमादिवत्। न च 'यथा वै श्येनो निपत्य' इत्यादिवाक्यशेषदर्शितक्रियासामान्येन कर्मणि गौणत्वेन कर्मवचनत्वं युक्तम्। अत्यन्तविप्रकृष्टत्वात् गौणत्वस्य। लक्ष्यमाण-

---

तद्व्यपदेशश्च ॥

रूढशब्दा इत्यनेन उद्भित्तत्प्रख्यन्यायाविषयत्वं दर्शितम्। वाक्यभेदरहिता इत्यनेन चित्राक्ष्याधिकरणन्यायाविषयत्वम्। तथा सति श्येनादिपदानां व्रीहिसोमादिपदवद्गुणपरत्वमेव स्यादिति [1]शङ्कानिरासेन विचारावकाशलम्भनाय नामधेयत्वसिद्धान्तयुक्तिः तद्व्यपदेशवन्त इत्यनेन दर्शिता। 'तद्व्यपदेशश्च' इति सूत्रे तच्छब्दो 'यस्मिन् गुणोपदेशः' इति सूत्रे प्रकृतविधेयत्वाभिमतगुणपरामर्शीति, अत्रापि तदनुसारेण तच्छब्दः पूर्वपक्षिणो विधेयत्वाभिमतं गुणं परामृशति। विशब्दो भिन्नार्थः। अपदेशः संकीर्तनम्। एवं च विधेयत्वाभिमतेन श्येनपक्ष्यादिरूपेण गुणेन सादृश्यकथनद्वारा ततो भेदेन श्येनादिशब्दप्रवृत्तिनिमित्तप्रदर्शकेषु वाक्यशेषेषु यत्संकीर्तनं तद्वन्त इत्यर्थः। श्येनादिशब्दा इति। आदिशब्दः 'संदंशेनाभिचरन् यजेत' 'गवाभिचर्यमाणो यजेत' इत्यनयोः संग्रहार्थः। 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' 'यथा संदंशो [2]दुरादानमादत्ते।' 'यथा गावो गोपायन्ति' इति श्येनादिषु तद्व्यपदेशरूपा वाक्यशेषाः। प्रसिद्धयादिभिर्गुणविधिपूर्वपक्षमधिकाशङ्काबीजप्रदर्शनेनोपस्करोति— अत्यन्तेति। ज्योतिष्टोमादिष्वित्यादिशब्देनोद्भिदधिकरणोदाहृता दार्शपूर्णमासिकाग्नेयादयो विश्वजिदादयश्च गृह्यन्ते। तेषु यथासंभवं फलार्थगुणविधिरित्यर्थः। उद्भिदधिकरणोक्तरीत्या विशिष्टविधिरिति पूर्वपक्षान्तरमाह— यद्वा इति। नन्वप्रसिद्धार्थकल्पनमसिद्धम्, वाक्यशेषप्रसिद्धार्थग्रहणादित्याशङ्क्य निराकरोति— न चेति। क्रियासामान्येनेति। निपत्यादानदुरादानादानगोपनक्रियाभिर्यत्सामान्यं श्येनपक्ष्यादिभिः सादृश्यं तेनेत्यर्थः। अत्यन्तविप्रकृष्टत्वादिति। अभिधेयगतगुणसदृशा ये अनभिधेयगता गुणाः तल्लक्षणाद्वारा तद्धर्मिणि लक्षणा लक्षितलक्षणारूपा गौणी। तत्र गुणलक्षणैव [3]तावदभिधेयासंबन्धिविषयत्वाद्विप्रकृष्टा। तद्वारा तद्धर्मिणि लक्षणा ततोऽपि विप्रकृष्टा इत्येवमत्यन्तविप्रकर्षः। लक्ष्यमाणेति। [4]अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु

---

1. शङ्काविकासेन 2. दुरासदमादत्ते 3 तावदसंबन्धि० 4. -अभिधेयाविनाभावप्रतीति० ; अभिधेयाविनाभावप्रवृत्तिः० ; अभिधेयाविनाभूते प्रवृत्ति०

स्त्रीरूपमेतद्रत्नं सह संभूय उपभोक्तुं नोऽस्माकं समयः सङ्केतः कृतः । 'समया: शपथाचारकाल सिद्धान्तसंविदः' इत्यमरः ॥ ३६ ॥

तत्रागतस्तावदसेयभूमा व्यासो मुनिर्व्याहरदेवमेनम् ।
एका बहूनां दयिता कथं स्यादिति प्रतर्को हृदि भूप मा भूत् ॥

तत्रेति । यावद्युधिष्ठिर एवं वदति तावदित्यर्थः । तत्र तस्मिन् गृहे आगतः असेयभूमा अपरिमितमाहात्म्यः व्यासो मुनिरेनं द्रुपदमेवं व्याहरत् उवाच । किमवाच— हे भूप, एका कन्या बहूनां पुंसां दयिता प्रिया कथं केन प्रकारेण स्यादिति प्रतर्कः ऊहः । 'तर्कः काङ्क्षाविवर्कोऽहंकामभेदेषु कीर्तितः' इति वैजयन्ती । हृदि हृदये म भूत्; 'न माङ्योगे' इत्यडभावः ॥

तेषां समीपेऽथ निवेश्य कृष्णां नृपाय तस्मै विजने निषण्णः ।
स पञ्चपत्नीत्वमशेषमस्या यथाक्रमं प्राक्रमताभिधातुम् ॥ ३८ ॥

तेषामिति । अथानन्तरं स व्यासः विजने एकान्ते निषण्णः सन् कृष्णां तेषां पाण्डवानां समीपे निवेश्य स्थापयित्वा तस्मै नृपाय द्रुपदाय यथाक्रमं क्रमगनतिक्रम्य अस्याः कृष्णायाः पञ्च पतयो यस्याः सा पञ्चपत्नी । 'विभाषा सपूर्वस्य' इति नकारः । नान्तत्वात् ङीप् । तस्याः भावः पञ्चपत्नीत्वमशेषं समस्तमभिधातुं वक्तुं प्राक्रमत उपक्रान्तवान् । 'श्रोपाम्यात्' इत्यात्मनेपदम् ॥ ३८ ॥

पुराजन्मनि पुण्यशीला नालायनीति श्रुतनामधेया ।
वृद्धं पतिं कुष्ठिनमूढरोषं सौहृल्यमाराधयति स्म साध्वी ॥ ३९ ॥

इयमिति । पुराजन्मनि पूर्वजन्मनि नालायनीति श्रुतनामधेया प्रसिद्धाख्या, 'नामधेयं च नाम च' इत्यमरः । पुण्यं शीलं वृत्तं यस्याः सा साध्वी पतिव्रता, 'सती साध्वी पतिव्रता' इत्यमरः । इयं कृष्णा वृद्धं स्थविरं, 'प्रवयाः स्थविरो वृद्धः' इत्यमरः । कुष्ठिनं कुष्ठरोगयुक्तम् । 'कोलो मण्डलक कुष्ठ' इत्यमरः । ऊढरोषमधिकरोषं मुनेरस्य गोत्रापत्यं सौहृदं 'गर्गादि यञ्' । पतिं भर्तारमाराधयति स्म सम्यगाधितवती । एतेनास्याः पातिव्रत्यं सूचितम् । तदुक्तं दशमस्कन्धे— 'दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा । पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥' इति ॥ ३९ ॥

आत्तं परीक्षार्थमपास्य रूपं चिरात्प्रसन्नो मुनिरिङ्गितज्ञः
स्वं पञ्चधाऽऽत्मानमसौ विभज्य रम्याकृतिस्तां रमयांबभूव ॥४०॥

आप्तमिति । चिरात्प्रसन्नोऽसौ मुनिः मौद्गल्यः परीक्षार्थं, इयं साध्वी भवति न वेति परीक्षार्थमित्यर्थः । आप्तं स्वीकृतं । 'अच उपसर्गात्तः' इति दाप्तेस्तकारः । रूपं देहमपास्य त्यक्त्वा इङ्गितं जानातीति इङ्गितज्ञः, 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । अभिप्रायविदित्यर्थः । अत एव रम्याकृतिः सन् त्वमात्मीयं आत्मानं स्वरूपं पञ्चधा पञ्चभिः प्रकारैः 'सङ्ख्याया विधार्थे धा' इति धाप्रत्ययः । विभज्य विभक्तं कृत्वा तां नालायनीं रमयांबभूव क्रीडयामास ॥ ४० ॥

अत्रापि जन्मन्यनुगच्छतीमां तादृग्विधो हन्त स एव भावः ।
किं चेदमाकर्णय सा तमेव प्रागिन्द्रसेनेति पतिं प्रपेदे ॥ ४१ ॥

अत्रापीति । हे नृप, अत्रापि जन्मनि इमां कृष्णां तादृग्विधस्तथाविधः स एव भावः पञ्चपतिप्राप्तिलक्षणस्वभावः । 'भावः सत्तास्वभाव...' इत्यमरः । अनुगच्छति अनुसरति, हन्तेत्यर्थे । किं च, इदं वक्ष्यमाणमाकर्णय शृणु । सा नालायनी प्राक् पूर्वमिन्द्रसेनेति प्रसिद्धा तमेव मौद्गल्यमेव पतिं प्रपेदे ॥ ४१ ॥

स तां तपोविघ्नभयेन मुक्तां भूयोऽपि भोगेप्सुमिदं जगाद ।
अयि त्वदीयैर्नियमैर्गिरीशः प्रीतो वरं दास्यति काङ्क्षितं ते ॥४२॥

स इति । स मुनिस्तपोविघ्नात् भयेन मुक्तां त्यक्तां भूयः पुनरपि भोगेप्सुं भोगानाप्तुमिच्छुम्; आप्नोतेः सन्नन्तादुप्रत्ययः । 'आप्ज्ञप्यृधामीत्' इतीकारः । 'श्रितादिषु गमिगाम्यादीनामुपसङ्ख्यानम्' इति भोगशब्देन सह समासः । तामिन्द्रसेनामिदं जगाद । किमिति— अयि प्रिये ! त्वदीयैः त्वत्संबन्धिभिर्नियमैः तपोभिः । 'नियमस्तु स यत्कर्म नित्यमागन्तु पथनम्' इत्यमरः । गिरीशः महादेवः । 'गिरीशो गिरिशो मृडः' इत्यमरः । प्रीतः सन् ते तव काङ्क्षितं वरं दास्यति वितरिष्यति ॥ ४२ ॥

तपोभिरुग्रैरपरोक्षयन्तीमात्मानमुत्तंसितबालचन्द्रम् ।
दन्तप्रभाकर्बुरकण्ठकान्तिरवोचदेनां गिरिशः प्रसन्नः ॥ ४३ ॥

तपोभिरिति । गिरौ शेते इति गिरिशः शम्भुः । औणादिको डप्रत्ययः । अथवा, गिरिरस्यास्तीति गिरिशः, लोमादिपाठात् शप्रत्ययः । उत्तंसितबालचन्द्रं शेखरीकृततरुणेन्दुं आत्मानमुग्रैस्तपोभिरपरोक्षयन्तीं अपरोक्षं कुर्वन्तीं । अपरोक्षशब्दात् 'तत्करोति' इति ण्यन्ताच्छतृप्रत्ययः । 'ङगितश्च' इति ङीष् । एनामिन्द्रसेनां प्रसन्नः सन्, दन्तप्रभाभिः कर्बुरा शबला कण्ठकान्तिर्यस्य स तथोक्तः सन् । 'चित्रकिम्मीरकल्माषशबलैताश्च कर्बुरे' इत्यमरः । अवोचत् ॥ ४३ ॥

अलं चरित्वा व्रतमर्थितोऽहं पतिं त्वया संप्रति पञ्चकृत्वः ।

तदन्यजन्मन्यवदातवृत्ता त्वं लप्स्यसे पञ्च पतीन्प्रतीतान् ॥ ४४ ॥

अलमिति । व्रतं तपश्चरितव्याऽलं; तपश्चर्यां न कर्तव्येत्यर्थः । 'अलंखल्वोः' इति क्त्वाप्रत्ययः । संप्रतीदानीमह त्वया पञ्चकृत्वः पञ्च वारान् । 'संख्यायाः क्रियाभ्यावृत्तिगणने' इति कृत्वसुच्प्रत्ययः । पतिं भर्तारमर्थितो याचितः; याच्ञार्थादर्थयतेरप्रधाने कर्मणि क्तः । तत्तस्मात्कारणात् अन्यजन्मनि जन्मान्तरे भाविजन्मनीत्यर्थः । अवदातवृत्ता शुद्धचरित्रा त्वं प्रतीतान्प्रख्यातान्पञ्च पतीन् लप्स्यसे प्राप्स्यसि ॥ ४४ ॥

कल्याणि निर्वेदमपास्य गङ्गां गच्छ द्रुतं द्रक्ष्यसि तत्र कंचित् ।
आदाय तं मत्कमुपेहि पार्श्वमिति ब्रुवन्नन्तरधत्त देवः ॥ ४५ ॥

कल्याणीति । हे कल्याणि! शोभने, गौरादिपाठात् ङीप् । निर्वेदं दुःखमपास्य त्यक्त्वा द्रुतं शीघ्रं गङ्गां मन्दाकिनीं गच्छ प्राप्नुहि । तत्र गङ्गायां कंचित्पुरुषं द्रक्ष्यसि विलोकयिष्यसि । तं पुरुषमादाय मत्कं मत्स्वामिकं मत्संबन्धीत्यर्थः । 'पार्श्वमन्तिकप्रदेशमुपेहि प्राप्नुहि । मत्कमित्यत्र अहं स्वामी अस्येति विगृह्य 'स एषां ग्रामणीः' इति कन् । 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य मादेशः । इत्येवं ब्रुवन् देवः शिवः अन्तरधत्तान्तर्दधे । दधातेर्लङि त्रिरूपादात्मनेपदम् ॥ ४५ ॥

कृतावगाहां गगनापगायां हेमाम्बुजान्यश्रुकणैः सृजन्तीम्[1] ।
यदृच्छयाऽऽगत्य सहस्रनेत्रस्तां वीक्ष्य विस्मेरमना बभूव ॥ ४६ ॥

कृतेति । यदृच्छया स्वेच्छया सहस्राक्षो महेन्द्रः आगत्योपेत्य गगनापगायां मन्दाकिन्यां कृतावगाहां कृतप्रवेशां अश्रुकणैर्बाष्पबिन्दुभिः हेमाम्बुजानि स्वर्णपद्मानि [2]सृजन्तीं तामिन्द्रसेनां वीक्ष्य विस्मेरमनाः साश्चर्यचित्तो बभूव ॥ ४६ ॥

पृष्टान्वयाख्यास्पदशोकहेतुरायाहि वक्ष्याम्यखिलं तवेति ।
विलोभयन्ती बलवैरिणं सा हन्तुः पुरामन्तिकमानिनाय ॥ ४७ ॥

पृष्टेति । पृष्टाः अनुयुक्ताः । 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः । अन्वयो वंशः । आख्या नाम, आस्पदं स्थानं, शोकहेतुर्दुःखकारणं च यस्याः सा तथोक्ता त्वा इन्द्रसेना आयाहि आगच्छाखिलं समस्तं तव वक्ष्यामि कथयिष्यामि इत्यनेन प्रकारेण विलोभयन्ती वञ्चयन्ती बलवैरिणमिन्द्रं पुरां हन्तुर्महादेवस्य । पुरामिति कर्मणि षष्ठी । अन्तिकं समीपमानिनाय प्रापयति स्म ॥ ४७ ॥

---

1. सृशन्तीं 2. सृशन्तीं

कान्तासखं कंचन काञ्चनाद्रौ दीव्यन्तमालोक्य युवानवर्क्षैः ।
कस्त्वं प्रभुं मामवमत्य मूढः क्रीडापरोऽसीदिति रुष्टः ॥ ४८ ॥

कान्तासखमिति । सः इन्द्रः काञ्चनाद्रौ मेरौ कान्तासखं प्रियायुक्तं, 'राजाहःसखिभ्यष्टच्' । अक्षैः पाशकैः । 'अक्षमिन्द्रियनक्षो ना रथाङ्क्ष्यवहारयोः । पाशके शकटे' इति रत्नमालायाम् । दीव्यन्तं क्रीडन्तं । 'दिवः कर्म च' इति चकारात्करणसंज्ञायां तृतीया । युवानं तरुणं कंचन केवलपुरुषमालोक्य, प्रभुं परिवृढं । 'प्रभुः परिवृढोऽधिपः' इत्यमरः । मामवमत्य तिरस्कृत्यावियमयेत्यर्थः । क्रीडापरः क्रीडासक्तोऽसि; मूढः मूर्खः । 'मूर्खे मूर्ढिछतयो-र्मूढः' इति रत्नमालायाम् । त्वं कः को वा? इत्येव रुष्टः कुपितः सन्नवदत् ॥ ४८ ॥

हरेण देव्या सह दीव्यतैव दृष्टः सहासेन विवृत्तकण्ठम् ।
स्तब्धाकृतिः स्तम्भ इवावतस्थे विस्रस्तवज्रेण करेण शक्रः ॥ ४९ ॥

हरेणेति । देव्या गौर्या सह दीव्यता क्रीडतैव सहासेन हासयुक्तेन हरेण शंभुना विवृत्तः विचलितः कण्ठः ग्रीवा यस्मिन् कर्मणि तद्विचलितं यथा भवति तथा । 'कण्ठो गलोऽथ ग्रीवायाम्' इत्यमरः । दृष्टः शक्रः स्तब्धाकृतिर्जडीभूतरूपः सन् विस्रस्तवज्रेण विभ्रष्टवज्रभोगिना करेण उपलक्षितः सन् स्तम्भो दारुविशेष इवावतस्थे अवस्थितः । 'ऊष्मौ स्थूणाजडीभावौ' इत्यमरः । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् ॥ ४९ ॥

दुरोदरान्ते स विभोर्निदेशादुद्घाटितद्वारशिलाकवाटाम् ।
आत्मोपमैरध्युषितां चतुर्भिर्घोराकृतिं वीक्ष्य गुहां चकम्पे ॥ ५० ॥

दुरोदरान्त इति । दुष्टमुदरं यस्य तद्दुरोदरं द्यूतं । पृषोदरादित्वात्साधुः । 'पणे द्यूते दुरोदरम्' इत्यमरः । तस्यान्ते अवसाने । 'अन्तोऽवयवसीमाभृत्यौ' इति विश्वः । विभोः प्रभोः शिवस्य देवस्य निदेशादुद्घाटितद्वारशिलाकवाटां उद्घाटितं विवृतं द्वारे शिलेव कवाटं यस्या-स्तामात्मोपमैरात्मा उपमा उपमानं येषां तैः । स्वसदृशैश्चतुर्भिः पुरुषैरध्युषितां अधिष्ठितां घोराकृतिं घोररूपां, 'घोरं भीमं भयानकम्' इत्यमरः । गुहां बिलम्; 'देवखातबिले गुहा' इत्यमरः । वीक्ष्य इन्द्रश्चकम्पे कम्पितवान् । 'कपि चलने' इत्यस्माल्लिट् ॥ ५० ॥

आचष्ट देवः कुपितो महेन्द्रमस्याः फलं भोक्तुमहंयुतायाः ।
पदच्युतैः संश्रितमेभिरिन्द्रैर्बिलं भजेथा निरयोपमानम् ॥ ५१ ॥

आचष्टेति । देवः शिवः कुपितः सन् महेन्द्रमाचष्टाख्यातवान् । चक्षिङः लङ् । अस्या अहंयुतायाः अहंकारित्वस्य । 'अहंयुः स्यादहंकारी' इत्यमरः । 'अहंयुममोर्युस्' । फलं भोक्तुमनु-

भवितुं पतात् स्वस्थानात् च्युतैर्भ्रष्टैरेभिरिन्द्रैः देवाधिपैः संश्रितमाश्रितं निरयोपमानं नरकतुल्यं, 'स्यान्नारकस्तु नरको निरय.' इत्यमरः। बिलं गुहां, 'सुषिरं विवरं बिलम्' इत्यमरः। भजेथाः प्राप्नुयाः। 'स्खरितञ्जितः' इत्यात्मनेपदम् ॥ ५१ ॥

त्रस्तः स तं प्राञ्जलिराह नाथ क्षमस्व दासस्य ममापराधम् ।
[1]नाहंकृतोऽहं न पुरो न कामः क्रोधस्य यन्मां विदधासि लक्ष्यम् ॥

त्रस्त इति । त्रस्तः भीतः स इन्द्रः प्रबद्धोऽञ्जलिर्येन सः प्राञ्जलिः। 'प्रादिभ्यो धातुजस्य बहुव्रीहिरुत्तरपदलोपश्च'। 'तौ युगावञ्जलिः पुमान्' इत्यमरः। तं शिवमाह उवाच। 'आहेत्युवाचार्थे, आसेति बभूवार्थे विस्तरेऽव्यये वर्णिते' इति धातुवृत्तौ। किमित्याह— हे नाथ, हे स्वामिन्, दासस्य भवदिङ्करस्य। 'दासोपक्षचेटकाः' इत्यमरः। ममापराधं क्षमस्व। 'क्षमूष् सहने' इत्यस्माद्धातोर्लोट्। अहं अहंकृतः अहङ्कारी नास्मि। पुरः त्रीणि पुराणि नास्मि। कामो मदनो नास्मि। यद्यस्मात् कारणात् मा क्रोधस्य कोपस्य लक्ष्यं विदधासि करोषि। अहंकारी पुराणि कामश्च भवत्क्रोधविषया नाहमिति भावः। नाहं कृतान्त इति पाठे अहं कृतान्तो मृत्युर्नास्मीत्यर्थः। 'कृतान्तो यमसिद्धान्त...' इत्यमरः ॥ ५२ ॥

विहस्य शक्रं विभुरादिदेश क्षन्ताऽस्मि निर्वर्तय मन्निदेशम् ।
एभिः सहायैः सह भूतधात्र्यामंशेन सद्यो रचयावतारम् ॥ ५३ ॥

विहस्येति । विभुः शंभुर्विहस्य हासं कृत्वा शक्रमादिदेशादिष्टवान्। आदेशमेवाह— क्षन्ता सहिष्णुरस्मि; त्वदपराधमित्यर्थः। 'सहिष्णुः सहनः क्षन्ता' इत्यमरः। मन्निदेशं मम निदेशं शासनं निर्वर्तय निष्पादय। एभिः पुरोवर्तिभिः सहायैः धर्मादिभिः सहचरैः सह भूतधात्र्यां भूमौ। 'भूतधात्र्यब्धिमेखला' इत्यमरः। सद्यस्तत्क्षणमेव। 'सद्यः सपदि तत्क्षणम्' इत्यमरः। अंशेन भागेनावतारं रचय कुरुष्व। धर्मादिसहितः सन् भूमावुत्पद्यस्वेत्यर्थः। रचयतिः चुरादिण्यन्तः ॥ ५३ ॥

क्रमेण धर्मश्च समीरणश्च त्वं चाश्विनौ चोद्भवहेतवो वः ।
इयं च साध्वी दयिता भवित्रीत्याख्यातवानन्तरधान्महेशः ॥ ५४ ॥

क्रमेणेति । क्रमेण पर्यायेण धर्मो यमश्च। 'धर्मः पुण्ययमन्याय...' इत्यमरः। समीरणो वायुश्च त्वं च अश्विनौ नासत्यौ च 'नासत्यावश्विनौ दस्रौ' इत्यमरः। उद्भवहेतवः उत्पत्तिकारणानि भवतेति शेषः। भूमौ यूयं जायध्वमित्यर्थः। वो युष्माकं इयं च साध्वी इन्द्राणी

---

1. नाहं कृतान्तो

दयिता प्रिया भाविनी भाविनी इत्येवमाख्यातवान् ऊचिवान् स्नेहात् शंभुः अन्तरात्मन्तर्दधे। दधातेर्लुङि 'गातिस्था' इति सिचो लुक् ॥ ५४ ॥

पञ्चापि तान् विद्धि वसुन्धराया हर्तुं भरं पाण्डवतां प्रपन्नान्।
स्त्री सा च तेषां परिणामवद्भिः पुराकृतैस्ते सुकृतैः सुताऽऽसीत् ॥

पञ्चापीति। हे भूप, तान् पञ्चापि धर्मादीन् वसुन्धरायाः भूमेः भरं भारं हर्तुं अपनेतुं पाण्डवतां पाण्डुपुत्रत्वं प्रपन्नान् प्राप्तान् विद्धि जानीहि। विदेर्लोटि मध्यमपुरुषैकवचनम्। 'हुझल्भ्यो हेर्धिः' इति धिरादेशः। सा च स्त्री इन्द्रसेना च तेषां धर्मादीनां संबन्धिभिः पुराकृतैः जन्मान्तरकृतैः परिणामवद्भिः सुकृतैः पुण्यैः ते तव सुता आसीत् ॥ ५५ ॥

इत्यूचिवान् दिव्यदृशं वितीर्य प्रदर्शयामास मुनिर्नृपाय।
समागतान्पाण्डुसुतान्सुरेन्द्रान् स्त्रियं च तां पार्श्वगताममीषाम् ॥

इतीति। इत्येवमुक्त्वानूचिवान् मुनिर्व्यासः दिव्यदृशं दिव्यदृष्टिं नृपाय द्रुपदाय वितीर्य दत्त्वा समागतान् पाण्डवान् सुरेन्द्ररूपेण स्त्रियं कृष्णामिन्द्रसेनारूपेण प्रदर्शयामास दर्शितवान् ॥ ५६ ॥

स विस्मयानन्दविषेयचेताः कृत्वा गिरीशस्य गिरं प्रमाणम्।
आकाङ्क्षितं पाण्डुसुतैरनिन्द्यैः कृष्णाविवाहं द्रुपदोऽनुमेने ॥ ५७ ॥

स इति। विस्मयानन्दविषेयचेताः आश्चर्यहर्षाधीनचित्तः, प्रत्यक्षेण सुरेन्द्रा दृष्टा इति विस्मयः, तेभ्यः कन्यका दीयत इति आनन्दः। 'स्यादानन्दथुरानन्दः शर्म' इत्यमरः। स द्रुपदः गिरीशस्य शंभोः गिरं वाचं प्रमाणं निर्णायकं कृत्वा प्रमाणत्वेन निश्चित्येत्यर्थः; शिवस्य सर्वज्ञत्वादित्यर्थः। अनिन्द्यैरगर्ह्यैः पाण्डुसुतैः पाण्डवैराकाङ्क्षितं अभीप्सितं कृष्णायाः द्रौपद्याः विवाहमनुमेने अङ्गीचकार ॥ ५७ ॥

अथापरेद्युर्हृदये करे च कुरूद्वहाः कौतुकमुद्वहन्तः।
उद्वाहवेषेण विशेषदृश्याः प्रसाधितां मण्डपिकामवापुः ॥ ५८ ॥

अथेति। अथानन्तरमपरेद्युरपरस्मिन् दिने हृदये चित्ते करे हस्ते कौतुकं कुतूहलं हस्तसूत्रं चोद्वहन्तः। मनसि कुतूहलं हस्ते मङ्गलसूत्रं च दधाना इत्यर्थः। 'कौतुकं तु कुतूकेच्छा-हस्तसूत्र' इति रत्नमालायाम्। उद्वाहवेषेण विवाहनेपथ्येन 'आकल्पवेषौ नेपथ्यम्' इत्यमरः। विशेषेण दृश्या अतिशयेन विलोक्या रम्या इत्यर्थः। कुरूद्वहाः पाण्डवाः प्रसाधितामलंकृतां 'प्रसाधितोऽलंकृतश्च' इत्यमरः। मण्डपिका विवाहगृहमवापुः। आप्नोतेर्लिट् ॥ ५८ ॥

युधिष्ठिरस्तत्र पुरोहितेन वैवाहिकैर्वस्तुभिरभ्युपेताम् ।
आलम्ब्य हस्तं द्रुपदस्य भेजे वैदूर्यसोपानपथेन वेदिम् ॥ ५९ ॥

युधिष्ठिर इति । तत्र मण्डपिकायां युधिष्ठिरः धर्मात्मजः पुरोहितेन धौम्येन सह । 'वृद्धौ यूना' इति ज्ञापकात् सहार्थशब्दाप्रयोगेऽपि सहार्थे तृतीया । वैवाहिकैर्विवाहार्थैः । 'प्रयोजनम्' इति ठञ् । वस्तुभिर्द्रव्यैरभ्युपेतां संयुतां वेदिं विवाहवेदिं । 'वेदिः परिष्कृता भूमिः' इत्यमरः । द्रुपदस्य हस्तमालम्ब्य गृहीत्वा वैदूर्याणां वालवाजमणीनां सोपानानि आरोहणानि । 'आरोहणं स्यात्सोपानम्' इत्यमरः । तेषां पन्थाः वैदूर्यसोपानपथः । 'ऋक्पूरब्धूः' इति समासान्तः । तेन सोपानपथेन भेजे प्राप । 'तृफलभजत्रपश्च' इत्येत्वाभ्यासलोपौ । वैदूर्यशब्दस्य 'विदूरगाज्ज्यः' इति प्रभवत्यर्थे ज्यप्रत्ययः । वैदूर्यं वालवायजम् इत्यमरः । वैदूर्यं वालवायादुत्पद्यते ; कथं विदूरशब्दात् ज्यप्रत्ययो विधीयते ? अत्रोच्यते— 'विग्रहो वालवाये तु विदूरात् प्रत्ययः स्मृतः । वालवायो वैदूरं च प्रकृत्यन्तरमेव च । न वै त्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत् ॥' अस्यार्थः— वालवायो विदूरमादेशं लभते । आदेश एव सूत्रे निर्दिष्टः । यथा—शिवादिगणे विग्रवणरवणावित्यादेशावेव पठ्येते । प्रकृत्यन्तरमेव वा; विदूरशब्दो नगरविशेषस्येव पर्वतस्यापि वाचकः । स एवात्र प्रकृतित्वेनाश्रीयत इत्यर्थः । पर्वते विदूरशब्दो न प्रसिद्ध इति चेत्, जित्वरीवद्व्यवहारः । प्रतिनियतपुरुषापेक्षाऽपि प्रसिद्धिः भवति । वणिजश्च मङ्गलार्थं वाराणसीं जित्वरीति व्यवहरन्ति ; तद्वदत्रापि ॥ ५९ ॥

क्रमेण वर्गः कुलपालिकानां प्रसाधयन्तीं वपुषा विभूषाः ।
आनीय कृष्णां तपनीयपीठे निवेशयामास वरस्य पार्श्वे ॥ ६० ॥

क्रमेणेति । क्रमेण पर्यायेण कुलपालिकानां कुलस्त्रीणां । 'कुलस्त्री कुलपालिका' इत्यमरः । वर्गः समूहः । 'वृन्दभेदाः समैर्वर्गः' इत्यमरः । वपुषा शरीरेण विभूषाः आभरणानि प्रसाधयन्तीमलंकुर्वन्तीं ; न तु विभूषाः कृष्णामलंकुर्वन्तीति भावः । एतेन कृष्णायाः सहजसौन्दर्यं सूचितम् । कृष्णां द्रौपदीमानीय तपनीयपीठे स्वर्णपीठे 'तपनीयं शातकुम्भम्' इति सुवर्णपर्यायेष्वमरः । वरस्य जामातुः पार्श्वे निवेशयामास । 'वरोऽनुकूलजामात्रोः' इति विश्वः ॥ ६० ॥

हुतं स धौम्येन सधूमरेखं वह्निं परीयाय वधूसहायः ।
प्रियासखो भृङ्गकृतानुषङ्गं हंसो यथा रक्तसरोजषण्डम् ॥ ६१ ॥

हुतमिति । सः युधिष्ठिरः वधूसहायः कृष्णासहितः सन् धौम्येन पुरोहितेन हुतं वषट्कृतं सधूमरेखं सधूमपुञ्जं वह्निं अग्निं प्रियासखो वनितासहायः हंसः भृङ्गैर्मधुकरैः कृतः अनुषङ्गः संसर्गः यस्य तं तथोक्तम् । रक्तसरोजानां रक्तोत्पलानां षण्डं समूहमिव । 'अञ्जादि-

कदम्बे षण्डमस्त्रियाम्' इत्यमरः। परीयाय प्रदक्षिणीचकार। 'अग्निं प्रदक्षिणीकृत्य' इति शास्त्रादिति भावः॥ ६१॥

गुरोर्निदेशाद्गुणशालिनी सा मुमोच लाजान् ज्वलिते कृशानौ।
प्रवालजाले पवनस्य वेगान्मुक्तामणीन्मूर्मिरिवाम्बुराशेः॥ ६२॥

गुरोरिति। गुणैः शालते शोभते इति गुणशालिनी सा कृष्णा गुरोर्धौम्यस्य निदेशात् शासनात् ज्वलिते दीपिते कृशानौ वह्नौ। 'कृशानुः पावकोऽनलः' इत्यमरः। लाजान् भृष्टशालीन् परिवापकापरपर्यायान्। 'लाजाः पुंसि परिवापकः' इति वैजयन्ती। अम्बुराशेः समुद्रस्य ऊर्मिः वीचिः। 'ऊर्मिः स्त्रियां वीचिः' इत्यमरः। पवनस्य वायोः वेगात् प्रवालानां विद्रुमाणां जाले समूहे। 'वीणादण्डे प्रवालोऽस्त्री विद्रुमे नवपल्लवे' इति रत्नमालायाम्। मुक्तामणीन् मौक्तिकानीव। 'अथ मौक्तिकं मुक्ताफले' इत्यमरः॥ ६१॥

कर्तुं ध्रुवं शत्रुनितम्बिनीनां सीमन्तशोणाश्मविहारयोग्यम्[1]।
अश्मानमाक्रामदरालकेश्याः करेण भर्तुश्चरणो गृहीतः॥ ६३॥

कर्तुमिति। भर्तुर्वरस्य करेण गृहीतः विधृतः अराला: कुटिलाः केशाः यस्याः अरालकेशी। 'स्वाङ्गात्' इति ङीष्। 'अराळं कुटिलं जिह्मम्' इत्यमरः। तस्याः कृष्णायाः चरणः पादः अश्मानं दृषदाक्रामत् आक्रामति स्म। 'उपलाश्मानः शिला दृषत्' इत्यमरः। कविरुत्प्रेक्षते— शत्रुनितम्बिनीनां शत्रुस्त्रीणां। 'ललना च नितम्बिनी' इत्यमरः, सीमन्तेषु केशवीथीषु। 'सीमन्तः केशवीथ्यां तु' इति शब्दार्णवे। शोणाश्मविहारे पद्मरागमणीनां आक्रमणे योग्यं अभ्यासं कर्तुं 'योग्यं क्लीबेऽनुपयानचन्दनाभ्यासवाचकं' इति रत्नमालायाम्। योग्यामिति स्त्रीलिङ्गपाठेऽप्यभ्यास एवार्थः। तथा रघुवंशे प्रयोगः— 'अपरः प्रणिधानयोग्यया' इति। 'योग्याऽभ्यासार्कयोषितोः' इति विश्वः। अश्मानमाक्रामदिति ध्रुवं शङ्के। लोके कुत्रचिदर्थे नैपुण्याय क्वचित्पूर्वाभ्यासं कुर्वन्ति तद्वदित्यर्थः। आक्रामदित्यत्र 'क्रमः परस्मैपदेषु' इति दीर्घः। 'आङ उद्गमने' इत्यात्मनेपदं न भवति, अत्रोद्गमनस्याभावात्॥ ६३॥

इत्थं चतुर्भिः कुरुराजपुत्रैरग्राहि घर्मोदकशीकरार्द्रः।
समुच्छ्वसत्पुष्करवारिरस्याः करः करिण्या इव यूथनाथैः॥ ६४॥

इत्थमिति। इत्थमनेन प्रकारेण चतुर्भिः कुरुराजपुत्रैः भीमादिभिः कर्तृभिः घर्मोदकशीकरैः स्वेदबिन्दुभिरार्द्रः सरसः समुच्छ्वसत्पुष्करवारुः विकसत्पद्मसुभगः अस्याः कृष्णायाः करो

1. योग्याम्

॥ तृतीयोल्लासः ॥



पारोक्ष्यमैत्रीमुपगम्य मान्यां मद्रेशकन्यां चकमे रमेशः ।
श्रीकान्तमत्यन्तमियं च यूनोः परस्परप्रेम तनोति योगम् ॥ १ ॥

पीत्वा श्रीशगुणामृतं मुनिवरप्रौढप्रणाल्यागतं
नो जेमत्यथ नो धयत्यपि पयो निद्राति सा नेति यत् ।
युक्तं किं त्ववला न तुष्यति भृशं शुष्यत्यहो बम्भ्रमी-
त्याताम्यत्यपि यत्र सत्यतितरामन्याय्यमुन्मुह्यति ॥ २ ॥

अप्रालेयकृतातिकम्पमशिखिज्वालाविसारिज्वरं
वैवर्ण्यं तदनातपोत्थममहाव्यायामघर्मोदयम् ।

पारोक्ष्येति । रमेशः पारोक्ष्यमैत्रीं गुणश्रवणोत्पन्नमैत्रीम् ; दर्शनाभावादित्यर्थः । चकमे कामयामास । इयं च लक्ष्मणा च श्रीकान्तमत्यन्तं चकमे । तथा हि—यूनोः परस्परप्रेम योगं समागमं तनोति हि । परस्परानुरागस्यैव समागमहेतुत्वम् ; अन्यथा रसाभासत्वात् । तथा हि— 'एकत्रैवानुरागश्चेत्तिर्यङ्म्लेच्छगतोऽपि वा । योषितो बहुसक्तिश्चेद्रसाभासास्त्रिधा मतः ॥' इति ॥ १ ॥

पीत्वेति । सा अबला लक्ष्मणा मुनिवर एव प्रौढप्रणाली ; 'द्वयोः प्रणाली पयसः पदव्याम्' इत्यमरः । ततः आगत श्रीशस्य गुणामृतं पीत्वा भगवद्गुणान् नारदमुखादाकर्ण्येति भावः । अथ नो जेमति न भुङ्क्ते । 'जिमु अदने' 'जेमनं लेह आहारः' इत्यमरः । पयोऽपि नो धयति ; 'धेट् पाने' । न निद्राति निद्रां न प्राप्नोतीति यत् तद्युक्तम् । अमृतपायिनां क्षुत्पिपासा-निद्राद्यभावस्य युक्तत्वादिति भाव. । किं तु न तुष्यति, महानन्दे प्राप्तव्ये तोषं न प्राप्नोति, बम्भ्रमीत्यादि यत्तदन्याय्यम् अयुक्तम् । कृष्णाविरहोत्पन्नेनारतिभावेनाहारादिकं विहाय शोषमोहादिकं प्राप्नोतीति भावः ॥ २ ॥

अप्रालेयेति । सा कन्यका हरेर्विरह सखीजनस्य हृदातङ्कः हृदयतापः, तस्य प्ररोहावद्-

अत्रासोदितविस्वरत्वमरुजाजाताङ्ककाश्यं हरेः
साऽविन्दद्विरहे सखीजनहृदातङ्कप्ररोहावहम् ॥ ३ ॥

तदानीं,

मन्दस्पन्दनचन्दनानिलचलत्फुल्लारविन्दोज्ज्वला-
मन्देन्दीवरतुन्दनिर्भररसस्यन्देकसंवासितः ।
माकन्दद्रुमकन्दलव्रजगलन्मारन्दबिन्दुच्छटा-
नन्दत्तुन्दिलपैकभृङ्गकलवाङ्नन्द्यश्चचकाश मधुः ॥ ४ ॥

चैत्रे तारवसंततिर्वितनुते व्यक्तामपर्णाकृतिं
यत्रोद्भासितकालकण्ठमहितोत्कण्ठा समुज्जृम्भते ।

मङ्कुरोत्पादकम्; 'रुक्तापशङ्काखातङ्क' इत्यमरः । प्रालेयेन हिमेन कृतो न भवतीति अप्रालेयकृतः स चासौ अतिकम्पश्च; तं हिमादनुत्पन्नं कम्पमित्यर्थः । एतेन कम्पाख्यसात्विकभावः सूचितः । शिखिज्वालाभिः अग्निज्वालासंपर्कादित्यर्थः । विसारी व्यापनशीलः ज्वरो न भवतीत्यशिखिज्वालाविसारिज्वररस्तम्; अनातपोत्थातपसंचारादनुत्पन्नम्; वैवर्ण्यं विवर्णतां च महाव्यायामाज्जातः घर्मादियो न भवतीति तम्, अत्रासोदितं भयादनुदितं विस्वरत्वं वैस्वर्यं च; अरुजाजाताङ्ककाश्यं रुजया रोगेणाजातमङ्ककाश्यं च; 'श्री रुमुजा चोपतापः' इत्यमरः । अविन्दत् ॥ ३ ॥

मन्देति । वसन्तो वर्ण्यते— मन्दस्पन्दनो यश्चन्दनानिलः मलयपवनः तेन । तुन्देषु उदरेषु निर्भरस्य पूर्णस्य रसस्य स्यन्देन स्रावेण माकन्दद्रुमकन्दलानामङ्कुरैः, तद्भक्षणेनेत्यर्थः । गलन्मारन्दबिन्दूना छटया समूहेन नन्दतां तुन्दिलानां पैकानां पिकसमूहानां भृङ्गाणां च कलवाग्भिः नन्द्यः । मधुर्वसन्तः । 'चैत्रवसन्तमधुद्रुमदैत्यविशेषेषु पुंसि मधुशब्दः । क्लीबे त्वम्बुनि दुग्धे मकरन्दे क्षौद्रमद्ययोस्त्वसौ ॥' इति रत्ने ॥ ४ ॥

चैत्र इति । तारवसंततिः तरुसमूहः अपर्णाकृतिं पर्णरहिताकृतिं वितनुते; पर्णानां गलितत्वादिति भावः । अपर्णायाः पार्वत्याः आकृतिमित्यर्थान्तरं च व्यक्तयते । 'अपर्णा पार्वती दुर्गा' इत्यमरः । यत्र चैत्रे उद्भासिता प्रव्यक्ता, कालकण्ठा कलकण्ठसंबन्धिनी महिता उत्कण्ठा यस्याः सः समुज्जृम्भते । 'कलकण्ठः कलध्वाने हंसे पारावते पिके' इति वैजयन्ती । अन्यत्र, यत्रा-

वैशाखोर्जितजन्म भावि मरुतो वल्गन्ति चामोदिनो
यस्माज्जागतमङ्गलं सुमनसां वृद्धिश्चकास्त्युत्तमा ॥ ५ ॥

आक्रामन्वनसंचयं किल जगत्प्राणाभ्रकः संस्पृश-
न्नुत्तुङ्गं नगमन्तरा च सुरसानन्यः सुवेलोद्गतः।
भूजातान्तरमूर्जितं श्रितमहारामं समुल्लासय-
न्नानन्दं स वनौकसां मधुलिहां तन्वन्बभौ दक्षिणः ॥ ६ ॥

तदनु वसन्तवनलक्ष्मीपरिणयमङ्गलसमयपरितःसिच्यमानबहु-
लकुङ्कुमरसाभोग., अविरलमुकुलतारकोन्मेषनिर्वाणसंध्यारेचिः, पथिक-

---

पर्णाकृतौ कालकण्ठस्य शिवस्य। वैशाखोर्जितजन्म वैशाखमासस्योत्पत्तिः, भावि भविष्यति; चैत्रमासानन्तरभावित्वादित्यर्थः। अन्यत्र, विशाखस्य सुब्रह्मण्यस्य संबन्धि वैशाखम्, ऊर्जितं जन्म च भावि। अपर्णायां शिवस्य उत्कण्ठया स्कन्दोत्पत्तिर्भावित्रीति भावः। 'विशाखः शिखिवाहनः' इत्यमरः। आमोदिनो मरुतः वायवः वल्गन्ति। अन्यत्र, कार्तिकेयोत्पत्त्या संतुष्टा देवाश्च नृत्यन्तीत्यर्थः। यस्मात् चैत्रमासात् स्कन्दोदयाच्च जागतमङ्गलं सुमनसां पुष्पाणां देवानां चोत्तमा वृद्धिः चकास्ति ॥ ५ ॥

आक्रामन्निति। अत्र प्रकृतमलयानिलार्थबोधकैः पदैः श्लेषमहिम्ना हनुमतः समुद्रलङ्घनाद्यप्रकृतार्थश्च सूच्यते। वनसंचयं विपिनसमूहम्। अन्यत्र, जलसंचयं समुद्रमित्यर्थः। 'वने सलिलकानने' इत्यमरः। आक्रामन् लङ्घयन् अन्तरा वनमध्ये समुद्रमध्ये च उत्तुङ्गं नगं वृक्षं मैनाकपर्वतं च। संस्पृशन्, सुरसैः पुष्परसैरानन्यः; अन्यत्र सुरसया नागमात्रा। सुवेलायाः वनसीमायाः उद्गतः उपरिगतः; 'वेलाऽतिक्रान्तीराब्धिवृद्धयोः कालमर्यादयोरपि' इति रत्ने। अन्यत्र, सुवेलाख्यपर्वतोपरिगतः। श्रितमहारामम् आश्रितोद्यानम्; उद्यानमध्यगतमित्यर्थः। ऊर्जितमुत्कृष्टम्; भूजातानां वृक्षाणामान्तरं मध्यदेशं समुल्लासयन् कम्पयन्; अन्यत्र, श्रितः महारामः दाशरथिर्येन तत्। भूजातायाः सीतायाः आन्तरं समुल्लासयन्। वनौकसां मधुलिहां भृङ्गाणाम्; अन्यत्र, मधुलिहां मधुपानासक्तानां वनौकसां कपीनामानन्दं तन्वन् दक्षिणः जगत्प्राणाभ्रकः मरुदङ्कुरः हनूमांश्च बभौ। 'जगत्प्राणसमीरणाः' इत्यमरः ॥ ६ ॥

तदन्विति। किसलयसमूहो वर्ण्यते— अविरलमुकुला एव तारकाः तासामुन्मेषनि-

जननयनजलधारासंपातविभाव्यमानशम्पासंपद्विगलयाविजयकुतूहलसं-नह्यदसमशरसेनासमुद्भूतलोहितधातुपरागविसरः, निखिलविपिनवारा-शिनव्यप्रवालाङ्कुरनिकरयुगपदखिलवनदेवताविरचन्यमानवसन्तमहीपा-लविजयलोहाभिसारप्रसारः, मानिनीजनगुरुतरमानविदलनायत्तचित्त-भूसमधिकपरितापितनाराचफलनिकरः, खरतरमिहिरकिरणविदारित-हिमानिकरोदीर्णरुधिरसंचयः, चिरविदेशप्रोषितविनीतयुवजनकृतनि-जशासनोल्लङ्घननिःसीमकुपितविषमशरचण्डतरमण्डलाग्रखण्डितविकी-र्यमाणतदीयपल्लवसंदोहः, प्रणयकलहविश्लेषिततरुणजनचिरामर्षनिशा-विरतिप्रतिपादकारुणोदयः, कलकण्ठकुलचिरविधृतमौनव्रतोद्यापनसर-सनवान्नप्राशनोत्सवपरिदीपितदीपकलिकाकलापः, इति च जगज्जनम-नसो विकल्पशिल्पमनल्पमनुकल्पयन्युगपदनुदिशं प्रकटितारुणिमसं-प्रदायश्चकाशे किसलयसमुदायः ॥

राजत्कोरकपालिकापरिगते रम्ये नवे पल्लवे
संरक्ते युवकोकिलेन सरसे सोत्कण्ठमास्वादिते ।

दानभूतसंध्यारोचिः, संध्याप्रादुर्भावानन्तरभावित्वात् तारकोन्मेषस्येति भावः । 'लोहाभिसारो-ऽस्त्रभृतां राज्ञां नीराजनाविधिः' इत्यमरः । नाराचफलानां बाणाग्राणाम् ; 'फल फले धने बीजं-निष्पत्तौ भोगलाभयोः । सस्यबाणाग्रयोश्चाथ' इति केशवः । 'मिहिरारुणपूषणः' इत्यमरः । अवि-नीतैरुद्धतैः युवजनैः कृतेन निजशासनोल्लङ्घनेन । वसन्तकाले प्रिया त्यक्त्वा विदेशगमनमेव निजशासनोल्लङ्घनमिति भावः । 'कौशेयको मण्डलाग्रः' इत्यमरः । चिरामर्ष एव निशा तस्या विरतिरवसानम् । किसलयावलोकने अमर्षापगमो भवतीति भावः । सरसनवान्नस्य किसलयरूप-स्येत्यर्थः । विकल्पशिल्पं विविधचिन्तनाव्यापारम् ; 'विकल्पो भ्रान्तिकल्पयोः' इति रत्ने ॥

राजदिति । कोरकपालिकायाः कुड्मलसंततेः परिगते परितो विद्यमाने ; अन्यत्र, कोरकोपमेयभूतदन्तपङ्क्तेश्च । संरक्ते रम्ये नवे सरसे पल्लवे युवकोकिलेन सोत्कण्ठमास्वादिते सती-

स्फीतामोदनटद्वरालिवलिता पुष्यद्गुलुच्छाञ्चिता
पुष्पोद्भेदमवाप्य कोमलतरा वल्लीमल्ली बभौ ॥ ७ ॥

निःशङ्कं गमयन्सुगन्धलहरीमाशामुखे चान्दनीं
गायद्भिर्मधुपव्रजैः परिवृतः पौष्पीं वहन्संततिम् ।
आसेव्यासवमश्नति प्रणयिनीमाघूर्णमानो मरु-
द्वल्लीं कामयितेव रागबहुलामुल्लासयन्दक्षिणः ॥ ८ ॥

बहुजडवृत्तिषु सूर्यालोकात्क्रमशस्तत्रापयातासु ।
विकसत्सुमनश्चर्यानिर्मलशोभाः सुशाखिनोऽप्यासन् ॥ ९ ॥

त्यर्थः । अन्यत्र, नायकेन कान्ताधरे आस्वादिते सतीत्यर्थः । स्फीतामोदेन नटद्वरालिभिः भृङ्गैः । अन्यत्र, सखीभिः । पुष्यद्गुलुच्छैः वर्धमानगुच्छैः । अन्यत्र, स्तनैरित्यर्थः । वल्लीमतल्ली पुष्पोद्भेदं विकसनम् । अन्यत्र, रजःप्रादुर्भावं, बभौ । अत्र उद्भटसेनायाः कस्याश्चिद्बालायाः अधरे नायकेन आस्वादिते तदानीमृतुमत्याः, अत एव प्रथमार्तवोत्सवेन नटत्सखीजनवलितायाः अर्थश्च रूपकातिशयोक्त्या प्रतीयते ॥ ७ ॥

निःशङ्कमिति । आशामुखे चान्दनीं सुगन्धलहरीं निःशङ्कं यथा तथा गमयन्; चन्दनवनसंपर्कादित्यर्थः । विटस्तु तनुचर्चितचन्दनसौरभ्यलहरीमित्यर्थः । आसवं पुष्परसम् । अन्यत्र मद्यम् । दक्षिणो मरुत् । रागबहुलां प्रणयिनीं कामयितेव कामुक इव; 'कन्नः कामयिताऽभीकः' इत्यमरः । वल्लीमुल्लासयन् अञ्चति । 'अञ्चु गतिपूजनयोः' ॥ ८ ॥

बहुजडेति । सूर्यस्य आलोकात् प्रकाशात् बहुजडवृत्तिषु शीतलव्यापारेषु अपयातासु सतीषु; सूर्यतेजसा हिमे अपगते सतीति भावः । अन्यत्र सूरीणां विदुषां परिचयेन जडवृत्तिषु मूढव्यापारेषु क्रमशोऽपगतेषु सत्स्वित्यर्थः । सुशाखिनो वृक्षाः; वेदाभ्यासशालिनश्च; विकसत्सुमनसां पुष्पाणां चर्यया; अन्यत्र सुमनसां रसिकाणां चर्यया; 'धीमान सूरिः कृती कृष्टिः' इत्यमरः । 'जडः स्तब्धे बुद्धिहीने हिमप्रस्तेऽपि वाच्यवत्' इति रत्ने । हिमस्य अपायेन वृक्षाः पुष्पिता आसन्निति प्रकृतार्थः । वेदशाखाध्ययनमात्रजडाः पुरुषा अपि विदुत्समागमेन रसिका भवन्ती-त्यप्रकृतार्थः ॥ ९ ॥

उपगतशैत्याः प्रमदोरःस्थलघटितास्तु शिथिलयांचक्रुः ।
आशुगनिवहाः क्रमशो दृढतरसंनद्धकञ्चुकानखिलान् ॥ १० ॥

कंदर्पाशुगचूतकन्दलचयग्रासातिमाद्यत्पिका
वाञ्जात्रेण तदन्तिमास्त्रविहितां व्यातेनिरे प्रक्रियाम् ।
तस्मात्पञ्चमता च मत्तपथिकव्रातासुलुण्टाकता
विख्याता कलकण्ठकण्ठकुहरोदारस्वरे भास्वरे ॥ ११ ॥

तेजः पुरा किल हिमेन हृतं ममेति चण्डांशुना गहनगर्भतले प्रतप्ते ।
जाड्यं भिया शरणमाप दृशाऽप्यगम्यं प्रौढाङ्गनाकुचमहीधरदुर्गमेव ॥

विकसितसुमनःशाखिसमुदयोल्लासितोऽपि पल्लवकुलैकश्लाघनीयः;

उपगतेति । उपगतं शैत्यं शीतलत्वं यैस्तथोक्ताः । आशुगानामनिलानां निवहाः प्रमदानां स्त्रीणामुरःस्थलघटिताः सन्तः दृढतरसंनद्धकञ्चुकान् कूर्पासकान् शिथिलयांचक्रुः । घर्मतप्ताः स्त्रियः शीतलवातसेवार्थं कूर्पासकान् मुमुचुरिति भावः । अन्यत्र, उपगतं शैत्यं शीतभावः तीक्ष्णत्वं यैस्तथोक्ताः । आशुगानां बाणानां निवहाः प्रमदानां प्रकृष्टमदवतां भटानां कञ्चुकान् कवचान् शिथिलयांचक्रुः ; विभिदुरिति भावः ॥ १० ॥

कंदर्पेति । यस्मात् कंदर्पाशुगानां चूतकन्दलानां चयस्य ग्रासेन । वाञ्जात्रेण रुतेन । तस्य मदनस्य अन्तिमास्त्रेण विहितामुत्पलास्त्रकृतां प्रक्रियां चर्यां व्यातेनिरे । संमोहनोन्मादनतापनशोषणस्तम्भनाख्याः पञ्च शराः; तस्मात्कलकण्ठानां स्वरे ; ' कलकण्ठस्तु कोकिले । हंसे पारावते चापि त्रिषु त्वेष कलस्वरे ' इति रत्ने । पञ्चमता पञ्चमास्त्रकार्यकारित्वात् पञ्चमत्वं पञ्चमस्वरत्वं च, असुलुण्टाकता प्राणापहारित्वं च विख्याता । मत्ताः पिकाः पञ्चमस्वरेण गायन्तः विरहिजनान् बाधन्त इति भावः ॥ ११ ॥

तेज इति । पुरा हेमन्तकाले मे मम तेजः अपहृतमिति चण्डांशुना गहनगतमध्यदेशे निबिडच्छायारण्ये रुषा प्रतप्ते शीतलावासस्थानमिति रुषा संतप्ते सतीत्यर्थः । जाड्यं शीतलत्वम् । महीधरदुर्गं पर्वतदुर्गमेव शरणमाप । तदुक्तं दुर्गलक्षणम्— ' औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा । शस्तं प्रशस्तमतिभिर्दुर्गं दुर्गानुचिन्तकैः ॥ ' इति ॥ १२ ॥

विकसितेति । सुमनसा समीचीनमनसा, शाखिनां वेदानां समुदयेन च; पल्लवकुलेन

वर्णनीयसंतानविभवोऽपि दूरोज्झितजातिप्रभावः; प्रवर्धमानबहुपलाशाडम्बरोऽपि अनपायोपचितद्विजवितानकोलाहलः; संततशोकानिवहोल्लासनोद्युक्तोऽपि भृशमयुक्ताश्रुधाराप्रवर्तकः; प्रतीतशुकवचःपरिपाटीकल्पितकर्णसुखोऽपि मधुपानमदप्रेङ्खदसंख्यमधुपाशंसनीयः; सर्वतः प्रशमितजडजातोऽपि निरुपभोन्निद्रजडजातः, पामर इवावधीरितजात्युन्मेषः, निहतसैन्यपजन्यभूभाग इव मन्दिताशुगसंचारः; सूतिकानिलय इव प्रसवकृतशोभासभाजितः; कैकेयीसंवाद इव वनसंचरणोत्सुकिनरामः, वीणागुण इव प्रपञ्चितपञ्चमारवः; जम्बूद्वीप इव विचित्रशोभनमेरुसमुल्लासिताशः; जगज्जनमनःप्रियंभावुकोत्सवमयः प्रचकाशेतरां सुरभिसमयः ॥

खरकिरणकरप्रहारदलदवश्यायोन्निद्रकमलपुटकिनीपारिष्वङ्ग-

विटसङ्गेन इति विरोधः । वसन्तसमयस्तु पुष्पितवृक्षाणां पल्लवकुलेन किसलयसमूहेन । संतानो वंशः, संतानाख्यवृक्षश्च । 'जातिर्वर्णे च मालत्याम्' इति कोशः । पलाशानां राक्षसानां, वृक्षाणां पत्राणां च । द्विजानां वितानं यज्ञः; पक्षिसङ्घश्च । अशोकाः शोकाविरुद्धाः; हर्षा इत्यर्थः । अशोकवृक्षाश्च । अयुक्ता अनौपयिकी अश्रुधारा बाष्पधारा । अन्यत्र, अयुक्तानां वियोगिनां च । शुकानां कीराणां शुकऋषेश्च वचःपरिपाटी । मद्यपैः मद्यपायिभिः, भृङ्गैश्च आशंसनीयः स्पृहणीयः । जडजातः मूढसमूहः; हिमसङ्घश्च । जडजातानि कमलानि यस्मिंस्तथोक्तः । 'विवर्णः पामरो नीचः' इत्यमरः । जन्यभूभागः युद्धदेशः; 'युद्धमायोधनं जन्यम्' इत्यमरः । 'आशुगो वायुविशिखौ' इत्यमरः । स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने' इत्यमरः । सभाजितः मानितः । वनसंचरणे उत्सुकिनः रामः दाशरथिः । अन्यत्र, वनविहारोत्सुकिताः रामाः स्त्रियः यस्मिंस्तथोक्तः । पञ्चमारवः पञ्चमस्वरः । अन्यत्र, पिकादीनां पञ्चमस्वरः । विचित्रः शोभनश्च यो मेरुपर्वतः तेन । अन्यत्र, 'नमेरुः सुरपुंनागः' इति नारे । प्रियं भवतीति प्रियंभावुकः स चासौ उत्सवश्च तन्मयः ॥

खरेति । 'अवश्यायस्तु नीहारः' । हिमापायेन उन्निद्रकमलायाः पुटकिन्याः पद्मिन्याः 'नलिनी स्यात्पुटकिनी' इति नारे । पारिष्वङ्गेण संपर्केण गन्धिकस्य सुगन्धवतः । विग-

न्धिलगन्धवहमन्दसंचरणसुखंकरसर्वदिग्वलये विगलदनवीनदलावरिल-
शाखाञ्चलमहीरुहनिचये समये, प्रतिमहीरुहवृन्दमन्दसुन्दरकन्दलानि, अधिकन्दलमविरलमुकुलाः, कुड्मलेषु सरसविकसनम्, विकसनेन मधूलिकोद्गारो मकरन्दस्यन्देन बहुलपरिप्लविलनम्, उत्कटामोदेन मदमुदितमधुलिहसंपातो मधुकरसंपानेन कुसुमरसपानगोष्ठी मधुरसपानेन विकसदभिनवमदावेशः, मदावेशेन सर्वतः प्रेङ्खदभृङ्गमालिकामङ्गलसंगीतं, मधुपगीतेन प्रकटितमदनमहाराजप्रतापापदानप्रचण्डडिण्डिमाडम्बरः, तदाडम्बरेण रणरणकपरिधूपितपथिकवधूपल्लवितनवादीनवकृतदीनाक्रन्दनसंततिकलनोदयमानभयोद्वेजितयुवजनदूरपरिहृतविदेशगमनानुसंधानम्, तेन च निःशलाकनिरन्तरासिकानिर्वेलप्रसरदनुरागमदनागमसमयदीक्षितजायापतिप्रथमरसविकसदाकण्ठमोहविशृङ्खलोदारविहारमुदितसुरभिसायकदेवताप्रसादसमेधितानवस्करसुखसंतानः समेधांबभूव समन्ततः ।

लद्भिः अनवीनदलैः जीर्णपर्णैः ; समये वसन्तकाले । प्रतिमहीरुहवृन्दं वृक्षाणां वृन्दंवृन्दे ; अधिकंदलं कंदले ; 'मकरन्दो मरन्दोऽपि रसासवमधूलिकाः' इति सारः । प्रतापापदानस्य चरितस्य ; 'अपदानं कर्मवृत्तम्' इत्यमरः । 'डम्बरः कान्तिगर्वयोः' इति कोशः । डिण्डिमाडम्बरेण रणरणकेन विग्रहेण परिधूपितायाः संतप्तायाः, पल्लवितेन वर्धितेन नवादीनवेन नवक्लेशेन 'आदीनवाश्चवो क्लेशे' इत्यमरः । दीनाक्रन्दनस्य आकलनेन श्रवणेन भीतैः युवजनैः देशान्तरगमनाचिन्ताऽपि न कृतेति भावः । तेन देशान्तरगमनाभावेन निःशलाके रहसि 'विविक्तविजनच्छन्ननिःशलाकाः' इत्यमरः । निरन्तरासिकया निरन्तरावस्थानेन, मदनागः मदनशास्त्रं ; समयः आचारः सिद्धान्तो वा ; 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । प्रथमरसेन शृङ्गाररसेन सुरभिसायकदेवता मदनदेवता ; अनवस्करः शोधितः ; 'निःशोध्यमनवस्करम्' इत्यमरः । सुखसंतानः सुखसंततिः ॥

एवं महिषं सर्वदेवात्मकत्वेन सर्वोत्कृष्टवस्तुत्वेन, राज्ञोऽधिकतरत्वेन स्तुत्वा तन्मुखेन सर्वाद्वैवं वेदान्धपरमतात्पर्यविषयीभूतं निरूप्य स्वोपजीव्यराजवंशस्याशिषं ग्रन्थः प्रार्थयते— श्रीमदिति। श्रीमान् लक्ष्मीसंपन्नः भोसलवंश एव दुग्धजलधिः क्षीराब्धिः तस्य, संपूर्णचन्द्रोपमो राकाचन्द्रसदृशः यः प्रतापः प्रतापसिंहाख्यः मूर्तो मूर्तिमान् स्वयं क्षितिपतिः भूपतिः सन् क्षितिं भूमिमक्षति निरुपद्रवं यथा तथा शास्ति रक्षति। सः प्रतापसिंहाख्यो राजा दीर्घायुः चिरजीवी आत्मजयुतः पुत्रपौत्रादिसंतानवान् धर्मी धर्मप्रवणचित्तः प्रजासु स्वविषयवासिनीषु रागवान्, लोभवान् निस्तुलैः निरुपमैः निजसभासारैः स्वीयसभ्यश्रेष्ठैः क्रमात् पुत्रपौत्रादिक्रमात् आगतैः प्राप्तैः सह उल्लाघोऽस्तु अरोगदृढगात्रो भवतु। अत्र भोसलवंशस्य दुग्धजलधित्वोक्त्या उपकालंकारः स्पष्टः। तत्र च राजवंशस्य सर्वजनप्रेमास्पदत्वं निर्मलत्वं कीर्तिमत्त्वं च व्यज्यते। राज्ञः पूर्णचन्द्रसाम्योक्त्या सकलजनानन्दकरत्वं व्यज्यते। एवं पूर्णचन्द्रसंपर्कादिव यथा क्षीराब्धिर्वर्धते, एवं राजानमाश्रित्य भोसलीयान्वयस्य संतानवृद्धिर्व्यज्यते॥ १०१॥

राजा धर्मपरः परस्परधृतस्नेहाश्च तन्मन्त्रिणो
राजन्वत्यवनौ वनीपकजना आढ्या भवन्तु क्षितौ।
पुष्टाङ्गाः पशवश्चरन्तु भजतां दुर्भिक्षवार्तां लयं
वाञ्छानाथकवेः कृतिश्च कुरुतां निर्मत्सराणां मुदम्॥ १०२॥

इति श्रीवाञ्छेश्वरकविविरचितं महिषशतकं संपूर्णम्॥

उपक्रमप्रतिपादितमर्थमुपसंहरन्परमाश्रान्तरतात्पर्यविषयीभूतं राजतदमात्यादीनां सन्मार्गप्रवर्तनरूपं, सर्वेषां जनानां गवां स्वप्रतिपादितमहिषवंशस्य च मङ्गलरूपमर्थमुपसंहरति— राजेति। शेषं सुगमम्॥ १०३॥

क्षेत्राणामुत्तमानामपि यदुपमया काऽपि लोके प्रशस्ति-
र्विद्वद्वर्येण मुक्तिक्षयमभिलषतां यास्कुना पण्यवीथी।
साक्षाद्विश्वेश्वरस्य त्रिभुवनमहिता या पुरी राजधानी
रम्या काशी सकाशंभवतु हितकरी मुक्तये मुक्तये नः॥

प्रीयतां कृत्तिकृतिना निर्मितेयं सुधीमुदे। भूयाद्वाञ्छेश्वरग्रन्थव्याख्या श्लेषार्थचन्द्रिका॥

इति श्रीकृत्तिसूरिकृतमहिषशतकव्याख्या संपूर्णा॥

SRIRANGAM SRI SANKARA GURUKULA SERIES.

No. 1.	**पञ्चरत्नकारिका:** A poetic commentary on the Upadesa Panchakam of Sri Sankara Bhagavatpadacharya by Sri Sadasiva ; with a *Prastavana* by Sri Sacchidananda Tirtha Swamigal.	0	12	0
No. 2.	**नयमञ्जरी** A poetic commentary on the Brahma Sutras, by Sri Appayya Dikshita. With a Sanskrit Introduction by Sri Sacchidananda Tirtha Swamigal.	2	0	0
No. 4	**बालभारतम्** of Agastya Pandita with the Commentary *Manohara* of Salva Timmaya Dandanatha Part I. Cantos 1-3	2	0	0
No. 5.	**कुमारसंभवचम्पू:** by Sri Sarabhoji Maharaja of Tanjore; with an Introduction by Vidyasagara Vidyavacaspti P. P. Subrahmanya Sastri, B A. (Oxon), M. A., Professor of Sanskrit, Presidency College, Madras.	1	0	0
No. 6.	**डमरुकम्** A Sanskrit Farce by Pandit Ghanasyama with the Commentary of Chandrasekhara; Edited by Do.	0	8	0
No. 7.	**शृङ्गारप्रकाश:** by Maharajadhiraja Sri Bhoja Deva. Part I, Prakasas 1 & 2 Edited by Do	1	8	0
No. 8.	**मनीषापञ्चकम्** of Sri Sankara Bhagavatpadacharya with a Summary of the Commentary of Sr. Sadasiva Brahmendra and a Foreword by Rao Saheb N. Natesa Iyer B A., B.L., President, All India Varnasrama Swarajya Sangha, Madura. Edited by Gurubhaktasikhamani T. K. Balasubrahmanya Iyer.	0	6	0
No 9.	**स्तोत्ररत्नमाला** Part I. Contains rare stotras by different ancient authors	1	8	0
No. 10.	**जीवन्मुक्तिकल्याणनाटकम्** by Naila Dikshitar.	1	4	0
No. 14.	**महिषशतकम्** of Sri Vaucheśvarakavi with the commentary of his great grandson Sri Vaucheśvara.	1	8	0
No. 15.	**शिवकेशादिपादान्तस्तुति:** of Sri Sankarawith the rare commentary of Sri Ramakrishna Suri	0	12	0

IN THE PRESS

No. 3. **शास्त्रदीपिका** of Parthasarathi Misra with the commentary *Mayukhavali* of Sri Appayya Dikshita

No. 11. **मद्रकन्यापरिणयचम्पू:** by Gangadhara Kavi

No. 12. **तत्त्वकौस्तुभ:** by Bhattoji Dikshita.

No. 13. **सौन्दर्यलहरी** with the commentaries of **लक्ष्मीधरा, सौभाग्यवर्धनी** and **अरुणामोदिनी**

The above Six books are being published serially in the ***Sri Sankara-gurukula Patrika***: Annual Subscription Rs. 6 only.

Apply to THE LIBRARIAN, *Sri Sankaragurukulam, Srirangam.*

॥ श्री. ॥

॥ श्लोकानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्
अर्कं भक्षयितुं प्रधावसि	३६	तिष्ठन्तु क्षितिपाः	२५
अक्षैर्मेति ननु श्रुतिः	४	तृण्यादानजला०	१६
आर्यश्रीधरमम्बु०	५	त्वं क्रीतोऽसि मया	१४
आशां पुष्यसि	५४	त्वं बद्धोऽसि हि	,,
उच्चैरावणसोदरः	४८	त्वं वाचंयमतां	२९
उत्साहेन पुरा वराह०	४०	त्व वाली रमसे	५४
उद्दामद्विरददय०	२१	त्वं शक्तिं सहजां	५०
उन्मत्ता द्रविणाधिकार०	१२	त्वं श्रुत्युद्धरणं	३९
उल्लेखान्विविधान्	३७	त्वं सद्यस्तनपीडनेन	५२
कंचित्पश्चधमं	८	त्वामादौ गणयन्ति	१९
कंदर्पं न भजासि	४४	देहं स्वं परिदग्ध्य	१२
कर्णं निर्णुदसि	४६	दुर्भिक्षं कृषितो	५
कर्षंकर्षमहर्निशं	१३	दुर्वाणीकसमुद्य०	२०
कृष्णस्ते सहजं हलं	४२	द्वन्द्वे प्रीतियुतः क्वचित	५०
केदारे महिषी०	२०	धत्से शृङ्गयुगं	३०
कौपीनाङ्गतया	४१	धान्युत्सङ्गतले विमुञ्चसि	२७
ख्यातानाहरतु	१९	धान्यं वाऽथ धनानि	१०
गम्भीरास्तिमितो न	३५	न ब्रूषे परुषं	१६
गोत्रोद्भेदनकौशलं	३३	न स्वप्नेऽपि दरिद्रता	,,
गोष्ठं ते नृपमन्दिरं	१७	नानाजिप्रभुचन्द्र०	३
ग्राह्योऽसि श्रवणादिभिः	३१	नित्यं दुर्धरदुर्मुखा०	३२
चौर्यं नाम कृषीबलस्य	१०	नित्यं धीरमनांसि	३४
जिष्णुस्त्वं हि कृशानु०	५५	नित्यं हन्त विवर्धमान०	१७
ज्यामाकर्षसि संगतार्ति	४७	निर्धूनोषि लसत्तनुं	४१
दानाश्रित्य चिरं	१४	निर्धूय श्रुतिमप्रमाणं	४३
दाम्नेयमभुमुखोऽसि	४९	पर्णानां पचतां च	२०

	पृष्ठम्		पृष्ठम्
पीत्वा वारि सरोवरेषु	२२	वर्णैर्नैकविधैः	३७
पैशुन्यं न हि	१६	विद्याजीवनकुण्ठनेन	१०
प्रस्थप्रस्रवणान्वितः	४५	विद्यापण्यविशेष०	६
प्रीतिं यासि मृदङ्गतः	३८	विद्वन्मा कुरु साहसं	७
ब्रूषे त्वं विविध०	२८	वेगादर्जुनमेव	४६
भीष्मस्त्वं हि दृशा	४५	शम्बाकारुपिषाण०	१९
भूपो भूप इतीव	२५	शीतं वारि सरोग	२१
मञ्जूषान्वितरौद्र०	४२	शृङ्गाग्रेण मुहुः	३१
मत्ता वित्तमदै०	११	शृङ्गारं इचिरं	५२
मालिन्यास्पदमुष्कैः	५२	श्रीमद्गोसलवंश०	५६
माहात्म्य तव	२४	श्रुत्वेमं महिष०	८
मुग्धान्धिरधानिकान्	११	संप्राप्तः सहजं	४१
मुद्राधारणदग्ध०	२९	सानन्दं महिषीशतं	२६
मूढाः कांचिदुपाश्रय०	१८	सीतायां प्रसितो	४८
मूढाभासघनोष्म०	१७	सुग्रीवोऽसि महान्	५६
मूर्ता किं तमसां	२३	सुहृंमंकरवाल	४४
मूर्तिं हन्त बिभर्षि	३४	सूत्राणि प्रसभं	५१
यं यो रक्षति तस्य	७	स्तोतुं त्वां महिषा०	१५
ये जाता विमले	२	स्वस्त्यस्तु प्रथमं	१
वे वे भुन्यपमृत्युनः	२४	स्वीयोत्सङ्गसमाधि०	२१
राजा धर्मपरः	४७	हा जानुद्वयसे	१८
राजा मुग्ध मति०	९	क्षान्तं क्षान्तमथापि	२४
लोकख्यातसहस्र०	३६	क्षुद्राणां यदि वासि	१३
लोके त्वं हि सधर्मराट्	४७	क्षेत्रज्ञस्य हिरण्य०	४०
वज्रादप्यतिनिष्ठुरं	३९	क्षेत्राण्यश्नासि पञ्च०	५५

Srirangam Sri Sankaragurukula Series No. 14.

MAHISHA SATAKAM

OF

SRI VANCHESVARAKAVI

with the commentary 'Slesharthachandrika'

OF

his great-grandson SRI VANCHESVARA YAJVA

with a Sanskrit Prastavana

By K. S. VENKATARAMA SASTRI

AND

AN ENGLISH INTRODUCTION

BY

R. KRISHNASWAMI IYER M.A., B.L.

Advocate, Tinnevelly

EDITED BY

Gurubhaktasikhamani, Sastraprasarabhushana

T. K. BALASUBRAHMANYA AIYAR, B. A.

Dharmadhikari, Sri Sankaragurukulam, Srirangam.



SRI SANKARAGURUKULAM,

Price Rs. 1-8-0] SRIRANGAM. [Postage Extra.

PREFACE

MY first acquaintance with the exquisite poem of Mahisha Satakam was some decades ago when the late revered Kunigal Rama Sastrigal, Dharmadhikari of the Mysore Palace, recited some stanzas from it when we were journeying together in a car and some buffaloes blocked the way. The simplicity of the style, the fine humour, the facility of expression and the magnificent use of double meaning words without the slightest trace of strain or artificiality made a very great impression upon me and, when I desired to have a copy of the entire poem, he told me that it had not been printed but the Mysore Pandits were very familiar with the stanzas as its commentator was once a Pandit of the Palace and was a very popular figure respected and loved by all. It gives me very great pleasure to find that a copy of the poem and of the commentary thereon has been obtained from a direct descendent of both the author and the commentator and that he has been kind enough to furnish such information as is available to him about them. Brahmasri Venkatarama Sastrigal has with his characteristic flow and clearness given in his Sanskrit Introduction a succinct account and I cannot do better than summarise it in English.

King Sahaji who ruled Tanjore from 1684 to 1710 A. D was a great patron of learning and was himself a very learned scholar and poet. It was he that founded the village of Sahajirajapura also known as Tiruvisanallur in the Tanjore District and granted it to several eminent scholars one of whom was the father of our author. He seems to have held a responsible post as a minister of the king. When the king went to Madura and stood in the presence of Goddess Minakshi he sang forth this extempore verse

पुरि मधुरं गिरि मधुरं गरिमधुरंधरानितम्बभाराढ्यम् ।
स्थूलकुच नीलकचं बालकचन्द्राङ्कितं वेल्लः ॥

Our poet who was then quite a young boy and had accompanied his father in the royal camp was struck with the rare poetical skill of the king and immediately said

हृदि सरसा विदितरसा सदितरसाहित्यवाङ्न मे ळगति ।
कविलोके न विळोके भुवि लोकेशस्य शाहजेरुपमाम् ॥

The king at once recognised the greatness of the boy and with great affection called him Kutti Kavi (young poet). This name stuck to him eclipsing his real name of Vanchesvara.

After the passing away of King Sahaji, his son Pratapa Simha ascended the throne and, taking advantage of his youth, several undesirables got influence over him with the result that the sincere well-wishers of the state were not listened to and scholars like Sridhara Venkatesa and Amba Deekshita were neglected and our poet who held the post of his father thought it wise to remove himself from the royal court. His attempts to catch the ears of the young king were all futile when he hit upon the plan of this poem wherein he has in his inimitable language extolled the virtues of the buffalo and of agriculture so closely connected with it in comparison with the service under a king surrounded by ministers and officers who had scant regard for honesty or learning. When this poem ultimately came to the notice of the king, he repented for his follies, came to the residence of the poet and persuaded him to return to the royal court. Besides this centum on the Buffalo, he has written two others— the Dhuti Satakam and the Asirvada Satakam. The latter has already been published by the Sri Vani Vilas Press and we hope the former also will find its way into print before long.

The Buffalo is decidedly a very unattractive animal and is more so by its being associated with Yama the God of Death as his vehicle. But to our poet it is so sacred and inspiring that, when he thinks of it, thoughts and expressions well up in his brain in such superabundance that he has got to pick and choose, thereby denying to most of them the opportunity of sharing in the glory of describing this wonderful specimen of God's creation

माहात्म्य तव वर्णये कियदिति स्तुत्युक्तिवर्त्मातिगं
त्वत्कल्याणगुणानुरूपमधिकप्रीत्या ममात्मादरात् ।
अर्थाः शब्दचयाः सदाऽहमहमित्यग्रे स्फुरन्त्यद्भुताः
स्वीकुर्या कमिव त्यजामि कमिव श्रीमँल्लुलायप्रभो ॥ ४२ ॥

In fact the author has by the very fine handling of slesha equated the buffalo with every imaginable thing. Even the Acharyas, the Avataras, the Devas and even the unqualified Absolute have to submit to such an equation at the hands of this poet and it is no surprise therefore that he has been appropriately crowned Slesha Sarvabhouma I desist from translating any samples of his style for no

translation can ever adequately convey the beauty and richness of the original and this is more so when the entire poem is founded upon an exquisite use of Slesha.

The commentator Kutti Suri or Vanchesvara is a namesake and a great grandson of the author and has faithfully recorded in his commentary the interpretation and explanations which he had handed down to him from his own father. The commentary is very lucid, learned and to the point and but for it the hasty reader may lose sight of many a point of beauty in the original. He was himself a very eminent scholar and had his early education at the feet of Isvara Sastri of Tiruvisanallur itself and later on of Srinivasarya of Manalur close by From the latter he learnt the intricacies of the modern school of Nyaya and mastered the Tatvachintamani of Gadadhara just then coming into prominence. He easily worsted many a combatant in the field of logic by handling this new weapon Chintamani and Amara Simha a Mahratta chief who appreciated him gave him the appellation of Chintamani Kutti or more shortly Mani Kutti. In acknowledgement of this honour, he has written four books known as Datta Chintamani, Sraddha Chintamani, Brahmasutrartha Chintamani and Bhatta Chintamani.

King Sarabhoji II of Tanjore started a Veda Sastra Pathasala at Orattanadu village and appointed Kutti Suri as one of the staff. But after a short time he felt the royal service somewhat irksome and decided upon a pilgrimage to Northern India. Before starting, he poured out his heart to the Goddess Dharmavardhini at Tiruvadi in beautiful stanzas of which the only remnant now available is the line

कतीन्द्रयामः कवि चन्द्रयामश्चण्डं पुनः पूरयितुं पिचण्डम् ॥

He went to Mysore and was detained there by Haidar Ali who had great respect for him. After Haidar's death, Tippu Sultan also held him in high reverence but one day he asked the Pandit in a very light manner when it would please him to become a Muslim. This made him decide to leave the state and he started for Benares and on the way went to Poona then ruled over by Bhaji Rao Peshva. The Court Pandit Chanda Narayana Bhattacharya had a contempt for southerners as they were not uptodate in the new school of Nyaya and declined to grant an interview to Kutti Suri. The latter however persisted and the court Pandit thought it proper to remain in a reclining posture when Kutti Sastri was admitted to his presence. But after a few minutes conversation he realised the great learning of the visitor and made friends with him so much so that Kutti Sastri himself was soon after enrolled as a Pandit of the Peshva's Court. At the request of the Peshva he wrote commentaries on the Hiranyakesi Srauta and Samanya Sutras. After staying there for some time he went to Benares. While there he had the rare fortune of studying Vedanta

under Ahobala Pandita and of himself teaching the same to the numerous deserving students who flocked to him.

It is interesting to recall that among such students was the young man who was later on to become the Jagadguru of Sri Sringeri Mutt under the name of Sri Nrisimha Bharati and the worthy predecessor of the illustrious Sri Sachidananda Sivabhinava Nrisimha Bharati Swamigal While at Benares Kutti Sastri wrote many a book. Probably Kakataliya Vadartha, Dhurganachandrika and Tarkasangraha Vyakhya are among those then written After some time he started for a return to the South While passing through Maharashtra on the way back, he was honoured by Madhava Rao, Parasuram Pattavardhana and other famous Pandits of the time. By the time he came to Mysore, the Hindu dynasty had been restored and Krishnaraja Wodayar was the ruling Prince. The king persuaded him to stay for some years at Mysore and appointed him as a Dharmadhikari in his own palace. Thanks to this royal patronage the Pandit performed the Jyotishtoma Yaga in a very grand style. While at Mysore he heard about the greatness of the then Jagadguru at Sringeri and went there to pay his respects to him, He did not recognise in the Acharya before him the young Brahmachari who was his disciple at Benares but the latter could not fail to recognise his Vedanta Guru, When the recognition was complete on both sides, their joy at so unexpectedly meeting each other was necessarily boundless.

The Pandit returned to Mysore and thence proceeded to Rameswaram. On the way he saw King Sarabhoji at Tanjore and the king was extremely glad to see the Pandit whom he thought he had lost for ever by his own fault. After his return from Rameswaram he stayed in his own village. Ripe in years and in learning, he had intense devotion to God, especially as manifested in the Mahalinga Murti at Madhyarjuna near his village and he has written a Mahalinga Sataka in praise of Him He seems to have lived to the age of about eighty and then merged in the feet of his favorite Deity Sri Mahalinga.

The reader will recognise from the above that the Mahisha Sataka is not an idle Kavya written by a clever poet for the benefit of those who want to waste time pleasantly but that it is replete with eternal truths, is from the pen of a really very serious author and has been commented upon by no less than the Vedanta Guru of a Sringeri Acharya. We have much pleasure and pride therefore in launching this publication for the benefit of all lovers of Sanskrit and of wisdom.

6-11-46. R. KRISHNASWAMI AIYAR.

॥ श्रीः ॥

॥ प्रस्तावना ॥

सहृदयाः

विदिततममेवेदं समेषामपि गैर्वाणवाणीप्रणयिनाम्, यत् श्रुतिस्मृतीतिहासपुराणादिषु पुनः पुनरुद्घुष्यमाणमहामहिमशालिन्येतस्मिन्भाग्ने वर्षे कृतावतारैर्यशोमात्रशरीरैः सरस्वती कटाक्षपात्रीभूतैर्वश्यवाग्भिरस्मत्पूर्वपुरुषैः सप्रणीताना तालपत्रमात्रशरीराणामपूर्वाणां क्वचिदप्यप्रकाशीकृतानां घटोदरस्थितदीपवत्कुत्रापि तिलीनानां ग्रन्थरत्नानां प्रकाशीकरणेन संस्कृतज्ञसमाजस्य महतीमप्रतिविधेयामुपकृतिमातनोतीयं श्रीशंकरगुरुकुलाभिधाना त्रैमासिकी पत्रिका इति। तेष्वेव ग्रन्थरत्नेष्वन्यतममिदं महिषशतकाभिधानं काव्यम् ॥

अस्य च प्रणेता श्रीमान्वाञ्छेश्वरनामा कुट्टिकविः कन्नटिजातीयोऽपि द्रविडदेशीयः शहजिराजपुरे (तिरुविशनल्लूर) कृतवसतिराश्रीदिति ज्ञायते। शहजिराजश्च महाराष्ट्रदेशीयानां भोसलकुलीनानामेकोजिप्रभृतीना तञ्जापुरमहाराजानामन्यतमः। अस्य च कालः A. D. 1684 प्रभृति 1710 पर्यन्तः। स स्वयं महापण्डितः सरसकविर्विद्वत्प्रियश्चासीदिति तत्कृतग्रन्थेभ्यस्तद्विषयकग्रन्थेभ्यश्च ज्ञायते। तेनोदारचित्तेन महाराजेन दत्ता बहवो विप्राणामग्रहाराः संप्रत्यपि विराजन्ते। तेषु ललामभूतोऽस्य शहजिराजपुराभिधान 'तिरुविसनल्लूर' अग्रहारः। यः किल कुम्भकोणनगर्याः क्रोशद्वयदूरे कवेरजातटनिकटे विद्योतते। यं चालमकार्षुः श्रीधरवेङ्कटेशप्रभृतयो भक्ताग्रेसराः सत्कवयः। यं चोपवर्णयन्त्येतद्ग्याख्यातारः स्वकीये भाट्टचिन्तामणौ— 'श्रीशहराजेन्द्रपुरे श्रीशहराजेन्द्रविष्टपैः सदृशे' इति। श्रीश-हर-अज-इन्द्राणां विष्टपैः सदृशे इत्यर्थः। अस्मिन् श्लोके श्रीशहराजेन्द्रपुरं हरिहरब्रह्मेन्द्रभुवनसमतया वर्ण्यते। 1691 नमे क्रैस्तवाब्देऽयं महाराजः स्वनाम्नाऽग्रहारमिमं निर्माप्य नानाविगन्तेभ्यस्तेषु तेषु शास्त्रेषु पारीणान्पण्डितप्रकाण्डानानाय्य तेभ्यो दत्तवान्। तत्प्रतिग्रहीतारश्च सप्तचत्वारिंशत् पण्डितवराः। तेष्वन्यतम एतद्ग्रन्थप्रणेतुः श्रीवाञ्छेश्वरस्य पिताऽपि। एतत्सर्वं तदीयदानशासनपत्रात्सम्यक् ज्ञायते। एतद्वंशीया एव परम्परया भोसलवंशीयाना महाराजानाममात्यपदवीमध्यतिष्ठन्। अयमपि स्वपूर्वजनिरूढसाचिव्यधुरं वहंस्तदा तदा राजनीतीरुपदिश्य सन्मार्गे प्रवर्तयामास महाराजम्। तथा चुक्तं व्याख्यानप्रारम्भे

—'तदमात्यकुलोत्पन्नः श्रीमान् वाल्लेश्वरः सुधीः । शिष्टः कन्नटिजातीयो वेदवेदाङ्गपारगः । नीतिमार्गेण राजानं तत्तत्कालेऽवचोदयत् ॥ ' इति ॥

एवं स्थिते एकोजिमहाराजनन्तरं तत्कुमारो बालकः प्रतापसिंहो यदा सिंहासनमारुरोह, तदा बालकमेनं राजानं मोहयित्वा वशीकृत्य च म्लेच्छाचाराः शूद्रप्रायाश्च केचन खलाः निखिलमप्यधिकारं स्वायत्तीकृत्य साधुसंमतान्प्रजाहितैषिणो नीतिमार्गविदुषः सर्वानपि निष्कास्य तत्तत्स्थाने स्वमार्गानुसारिणः प्रजाद्रोहेणापि स्वसुखमात्रसंपादनोद्युक्तानुप्रदण्डान्खलानेव निवेशयामासुः । ते च सुभेदारप्रभृतयो राज्याधिकारिणस्तत्र तत्र क्षेत्रेषु जायमानानि धान्यानि प्रसभमन्यायेनापजह्रुः । अथापि उग्रदण्डेभ्यस्तेभ्यो भीत्या किमपि कर्तुमक्षमाः प्रजाः कालगतिं विचिन्त्य तूष्णीमेव महत् दुःखमन्वभवन् । कोचित्तु देशान्तरं गताः । अयमपि तादृग्विधराजकीयोपद्रवाणां पात्रं बभूव । तदा हि राज्ञो दर्शनमपि सुदुर्लभमासीदस्य कवेः । कदाचित्प्राप्तेऽपि कृच्छ्रेण तद्दर्शने नैतस्योपदेशमप्रहीत्खलपरिवृतो भूमिपः । स्वोपदिष्टं सर्वमपि मरुभूमावुत्सृष्टं वारीव विफलं जातमालक्ष्यापि निसर्गतः कृपार्द्रधीरयं यथाशक्ति प्रजाभिरनुभूयमानस्य दुःसहदुःखस्यापनोदने यत्नः कार्य इति मनसिकृत्य एकैकस्याप्यधिकारिणो गृहमगमत् । तत्रापि स्वकीयोद्यमे विफले जाते प्रजानामीदृशीं महत्यामापदि तन्निवारणप्रयत्नं विहाय स्वसुखलाभाय देशान्तरगमनं नोचितमिति स्वान्तिग्धानपि बोध्यान्या गतिमपश्यन्नने असन्मार्गाद्राजान निवर्त्य सन्मार्गे प्रवर्तयितुं काव्यमिदं प्रणिनाय । अत्र च महिषस्तुतितो राजनिन्दा क्रियते । एतत्सर्वं कविनैव तत्र तत्र वर्ण्यते । तदानींतनराज्याधिकारिणां दौष्ट्यं बहुषु श्लोकेषु वर्ण्यते, तेभ्यः शापोऽपि दीयते । यथा— 'राजा मुग्धमतिस्ततोऽपि सचिवास्तान्वञ्चयन्तः खला देशद्रोहपराः सदैव वृषलाः सर्वापहारोद्यताः ' (१२) धान्यं वाऽथ धनानि वा समधिकं कृत्वा मिथः स्पर्धया मिथ्यासाहसिनोऽभ्युपेत्य वृषला देशाधिकाराशया । उत्कोचेन नृपान्तिकं तज्जनान्वश्यान्विधाय प्रजासर्वस्वं प्रसभं हरन्ति च शठास्ते यान्तु कालान्तिकम् ॥ (१३) विद्याजीवनकुण्ठनेन च कृषावालम्बितायां चिरादापके काणेशे कृतोऽपि पिशुनाः केदारमावृण्वते । हा किं वक्ष्मि सुभाहवालुमणियंभेजुष्टहस्तान्तर हुंकारस्थलसंप्रतीमुजुमुदादित्यादयो निर्दयाः ॥' (१५) देहं स्वं परिदग्ध्य यद्धि भवता धान्यं धनं वार्जितं तत्सर्वं प्रसभं हरन्ति हि सुभेदाराः स्वकीयं यथा ॥ (१८) एतावत्त्वहमर्थये पितृपतिं देवं त्वदारोहिणं क्षिप्रं प्रापय संनिधिं ननु सुभेदारस्य मद्रोहिणः (२०) इति । किं च, तदानीं विदुषां परिस्थितिः राजकीयाधिकारिणां तेषु विद्वेषः, स्वस्य दुरवस्था चेत्यादिकं सर्वमपि स्पष्टमेवानुवर्णयति— 'नानाजिप्रभुचन्द्रभानुशहजीनन्द्रानन्दरायादयो विद्वांसः प्रभवो गताः श्रितसुधीसंदोहजीवातवः । विद्यायां विषबुद्धयो हि वृषलास्तस्यास्त्विदानींतनाः (३) 'किं वक्ष्ये तदपि क्षितीश्वरवाहेर्द्वारप्रकोष्ठस्थळीदीर्घावस्थितिरोरवाय कुरुषे हा हन्त हन्त स्पृहाम् ॥' (४) 'आर्यश्रीधरमम्बुदीक्षितमिमौ दृष्ट्वा महापण्डितौ विद्यायै स्पृहये न यद्यपि वरं क्षात्रं विभेम्याहवात् ' (६) स्वप्नं स्वर्णमभूद्वताम्बुमखिनो धिक् तस्य कद्रूदर्शनीम् । स्वातः कुट्टिकविस्तु दुर्धनिगृहद्वारेषु निद्रायते ' इत्यादिना । महिषे स्तुतेऽपि

तस्य पङ्क्तयधमत्वात् न तन्माहात्म्यप्रतिपादने तात्पर्यं कवेः । अपि तु व्यङ्ग्यमर्यादया राजनिन्दायामेव । न तत्रापि हृदयपूर्विका प्रवृत्तिः । कदाचिदिमं प्रबन्धं श्रुत्वा राजा राजकीयाश्च प्रजाद्रोहपरतां विहाय प्रजाहितकारिणो भवेयुरित्याशयैव । एतच्च स्पष्टमेवानेदयति— 'कंचित्पश्वधमं लुलाय विगुणं कर्तुं प्रबन्धान् शतं त्वामालम्ब्य समुत्सहे न खलु तद्वर्ण्यस्य माहात्म्यतः । मद्रोहप्रवणाधिकारिहृतकक्रोधेन तन्निन्दनव्याजात्तत्प्रभुतत्प्रभुष्वपि च वाग्दण्डो मया पात्यते ॥ (१०) 'श्रुत्वेमं महिषप्रबन्धमिह ये भूपा गुणग्राहिणस्ते बुद्ध्वा निजदुर्गुणान्कविमुखात्तद्व्यङ्ग्यमर्यादया । अद्रोहेण निजाः प्रजा इव यथाधर्मं प्रजा रक्षितुं कुर्वन्तु स्वकुलक्रमागतवरान् देशाधिकारोचितान् ॥ (११) एवं राजनिन्दापरेपि अस्मिन् काव्ये आदावन्ते च भोसलवंशीयानां राज्ञां, विशिष्य प्रतापसिंहस्य च मङ्गलान्याशास्ति— 'ये जाता विमलेऽत्र भोसलकुले सूर्येन्दुवंशोपमे राजानश्चिरजीविनश्च सुखिनस्ते सन्तु संततिनः (१) श्रीमद्भोसलवंशदुग्धजलधेः संपूर्णचन्द्रोपमो यः शास्ति क्षितिमक्षति क्षितिपतिर्मूर्तेः प्रतापः स्वयम् । दीर्घायुर्जितशत्रुरात्मजयुतो धर्मी प्रजारागवानुल्लाघोऽस्तु स निस्तुलैर्निजसभास्तारैः क्रमादागतैः ' ॥ १०२ ॥ इति ॥

एवं सरसं सालंकारमनुपमवर्णनाचातुरीप्रकर्षं शब्दशक्त्या महिषे वर्णितेपि व्यङ्ग्यमर्यादया राजनिन्दापरं काव्यमिमं प्रणीय तत्र तत्र शिष्यैः प्रचारं कारयामास । क्रमेण चेदं काव्यं राज्ञः कर्णपदवीमप्यारूढम् । राजा च सद्य एव प्रबुद्धो भृशं दुःखितस्तत्क्षणमेव दुर्जनसहवासं परित्यज्य स्वयमेव शास्त्रिवर्याणां गृहमागत्य तेषां पादयोर्निपत्य, स्वीयानपराधान् सोढ्वा यथापूर्वं पुनरपि साचिव्यधुरमङ्गीकर्तुं प्रार्थयामास । शास्त्रिवर्यस्तु तदुक्तमङ्गीकृत्य तं परिसान्त्वयामास । तदुक्तं व्याख्यारम्भे— 'कदाचिद्बालको राजा मेलयित्वा खलान् बहून् । खेलंस्तैः सर्वदा मुग्धो न शुश्राव हितं वचः । तेभ्यो निवर्तयन्भूपं सन्मार्गे संप्रवर्तयन् । महिषस्तुतितो राजबुद्धिं चक्रे सुनिर्मलाम् ॥ ' इति ॥

किं च, अस्मिन्काव्ये महिषस्तुतिव्याजेन श्लेषेण तस्य सार्वात्म्यं प्रतिपाद्यते । स्पष्टमेव हि तैत्तिरीयोपनिषत्प्रतिपादितसत्यज्ञानानन्दपुरुषब्रह्मरूपता वर्णिता । तस्यैव शिवविष्ण्वादिरूपेण मत्स्यकूर्माद्यवतारमूर्तित्वेन इन्द्रादिदेवतात्वेन मध्वरामानुजाद्याचार्यपुरुषत्वेन अन्यैश्च बहुभिः प्रकारैः निरूपणं कृतम् । एतच्चोपलक्षणं सर्वात्मकतायाः । सार्वात्म्यं च 'इदं सर्वं यदयमात्मा' 'एकं सद्विप्रा बहुधा वदन्ति' इत्यादिश्रुतिषु ब्रह्मण एव प्रसिद्धम् । अतोऽत्र कवेः न महिषस्य तत्तदात्मप्रतिपादने तात्पर्यम् । अपि तु महिषव्याजेन ब्रह्मण एव सार्वात्म्यं प्रतिपिपादयिषितम् । एवं चास्य प्रबन्धस्य महातात्पर्यमद्वैते ब्रह्मण्येवेत्यपि न परोक्षं प्रेक्षावताम् । व्याख्याकृताऽप्यभिहितमेतत् । यथा उपक्रमे— 'स्वीयग्रन्थस्योपनिषत्प्रतिपाद्याद्वितीयात्मप्रतिपादनद्वारा निःश्रेयसोपयोगितां तत्र तत्र प्रकटयिष्यन् महिषप्रबन्धाख्यं महाकाव्यं चिकीर्षुः ' इति । उपसंहारेऽपि— 'एवं महिषं सर्वदेवात्मकत्वेन सर्वोत्कृष्टवस्तुत्वेन राज्ञोऽधिकतरत्वेन च स्तुत्वा तन्मुखेन सर्वाद्वैतं प्रबन्धपरमतात्पर्यविषयीभूतं निरूप्य ' इति । राज्ञः सन्मार्गप्रवर्तनं तु अवान्तरतात्पर्यविषयीभूतमेवेत्यपि तत्रैवोक्तम् ॥

कवेश्चास्य 'कुट्टिकविः' इति नामान्तरमपि श्रूयते । यथा स्वयमेव आह— 'ख्यातः कुट्टिकविस्तु' इति । तत्र चेत्थं व्याख्या दृश्यते— 'तत्सहाध्यायिनः स्वस्य दशामाह— कुट्टिकविः स्वयं दुर्धानिना.. इत्यादि । अन्ते व्याख्यानेऽप्युक्तम्— 'प्रीयतां कुट्टिकविना' इति । द्राविडभाष्यां कुट्टि इत्यस्य बाल इत्यर्थः । अनेन बाल्य एव वयसि अयं सरसकवितानिर्माणचतुर आसीदिति ज्ञायते । अत्र च काचन कथा प्रसिद्धा श्रूयते । तथा हि— कदाचित् शहजिमहाराजः श्रीमीनाक्षी-संदर्शनाय सपरिवारो मधुरां ययौ । तदा आस्थानपण्डितेन मन्त्रिवर्येण स्वपित्रा सहानतीतकौमारोऽयं बालोऽप्यगच्छत् । महाराजश्च देव्या आलयं गत्वा तत्राम्बिकां श्रीमीनाक्षीं दृष्ट्वा रोमाञ्चकञ्चुकितगात्रो भक्त्याविष्टचित्तः सन्नित्थं तुष्टाव— 'पुरि मधुरं गिरि मधुरं गरिमधुरं-धरनितम्बभाराढ्यम् । स्थूलकुच नीलकचं बालकचन्द्राङ्कितं तेजः ॥' इति । तच्छ्रुत्वा तन्निकटवर्ती अयं बालो राज्ञो भक्तिपारवश्यमनिसरससरलकवितानैपुण्यं चानुचिन्त्य तदुत्थमानन्दमन्तरेव नियन्तुमशक्नुवन्मुद्रिरान्निवेम पद्यमनुपदमेव जगौ— 'हृदि तरसा विदितरसा तदितरसाहित्यवाङ्न मे लगति । कावेलोके न विलोके भुवि लोकेशस्य शाहजेरुपमाम् ॥' इति । एवमुत्तरक्षणे आत्मगीतश्लोकोपश्लोकनपरं मधुरं पद्यमाकर्ण्य महाराजोऽतिमात्रविस्मयाविष्टचित्तस्तस्य बालभावमनुरुध्य महता प्रेम्णा कुट्टिकविरिति तमाजुहाव । ततः प्रभृति तस्य कुट्टिकविरिति व्यवहारः प्रसिद्धिं गतः । न केवलं तस्यैव, अपि तु तद्वंशीयेष्विदानीमपि कुट्टि इति व्यावहारिकं नाम प्रसिद्धं वर्तते । इदंप्रथमतया तु एतत्कवये शहजिराजेन प्रदत्तमेतत् । अपि च 'श्लेषकविसार्वभौमः' इत्यपि विरुदमस्य परिदृश्यते । महिषशतकादपरं शतकद्वयमप्यनेन प्रणीतम् । एकं आशीर्वादशतकम, अन्यत् धाटीशतकम् । तथा हि श्रूयते— 'चक्रे माहिषशतकं धाटीशतकं तथाऽऽशिषां शतकम् । श्लेषकविसार्वभौमः श्रीमान् वाञ्छेश्वरः स्वतन्त्रोऽसौ ॥' इति । आशीर्वादशतकं प्रागेव श्रीवाणीविलासमुद्रणालये मुद्रितमिदानीमपि लभ्यते । कविश्चाय आशीर्वादशतकस्यान्तिमे श्लोके मध्यार्जुनक्षेत्रविराजमानश्रीमहालिङ्गेशानोपासनया तदनुग्रहः स्वेन समवाप्त इति वर्णयति— 'पायान्मध्यार्जुनं नः सकृदपि भजतां मोक्षदं श्रीनटेशत्यागेशस्वामिनाथस्थलमतिमहितं यस्य शेषं वदन्ति । मान्धातुर्यत्र तिष्ठन् श्रियमतिविपुलां क्षेत्रवर्ये कवेः श्रीवाञ्छानाथस्य धादात्फलमपि सकलं श्रीमहालिङ्गमूर्तिः ॥' इति ।

काव्यस्य चास्य तत्कर्तृपरंपरायामागतेन तस्य नप्त्रा महापण्डितेन श्रीवाञ्छेश्वरेण संप्रणीतं कविहृदयनिगूढान् तांस्तान्भावविशेषान् सम्यगभिप्रकाशयत्तत्र तत्र शास्त्रीयां प्रक्रियामपि निरूपयद्पूर्वं व्याख्यानमपि सहैवात्र प्रकाशीकृतमिति महदिदं प्रमोदस्थानं सहृदयानाम् । कवेः परंपरा चेत्थं श्रूयते— कुट्टिकवेः पुत्रः माधवार्यः, तत्पुत्रः नरसिंहो नाम, तस्य पुत्रोऽयं व्याख्याता वाञ्छेश्वरयज्वा । तथा चुक्तमनेनैव— 'तस्य नप्ता माधवार्यपौत्रः श्रीनरसिंहजः ॥ वाञ्छेश्वरो लब्धजन्मा पितृप्रोक्तेन वर्त्मना । व्याख्यास्ये संप्रणम्यैतान्माहिषं शतकं मुदा । काहं मुग्धमतिः केयं साहिती सर्वपूजिता । तथाऽपि जन्म तद्वंशे प्रवर्तयति मामिह ॥' इति । अयं च बाल्य एव स्वपितुर्निकटे तथा स्वग्रामे प्रसिद्धपण्डितस्य ईश्वरशास्त्रिणश्च सविधे वेदव्याकरणपूर्वमीमांसादी-

न्यश्यैष्ट । ततः स तदा वङ्गदेशे नूतनतया प्रचारितां गादाधरीं तदनुसारिणीमनुगमरीतिं चाभ्येतुं कृतमतिर्बभूव । समयेऽस्मिन् दिष्ट्या स्वग्रामात् क्रोशद्वयदूरे विद्यमान 'मणक्कूर्' ग्रामे श्रीनिवासार्यो नाम पण्डितः वङ्गदेशे नवद्वीपं गत्वा तत्र कृत्स्नामपि चतुष्षष्टिवादात्मकां मूलतत्त्वचिन्तामणिं सगदाधरदीधितिमधीत्य तदानीमेव स्वग्रामं प्रतिनिवृत्तोऽभूत् । ततः प्राक् चोळदेशे जगदीशभट्टाचार्यकृतव्याख्यानस्यैव आसीत् प्रचार इत्यभियुक्ताः । अत एवेदं प्रथमतया समानीतां नव्यन्यायसरणिमुत्साहेन महता तस्मादधीतवानयं श्रीवाञ्छेश्वरः । एतांश्च स्वकीयाविद्यागुरूनयं स्मरति स्वव्याख्यारम्भे— 'नत्वा दुर्णिं महालिङ्गं विश्वेशं मणिकर्णिकाम् । ईश्वरश्रीनिवासार्यावेङ्कटाख्यगुरूत्तमान् ॥' इति । अष्टादशवयसः प्रागवाप्तमाध्यात्मिकशास्त्रजर्जितरेषु सर्वेष्वपि शास्त्रेषु परिनिष्ठितबुद्धिरासीत् ॥

एतस्मिन्समये भोसलवंश्यः अमरसिंहो नाम महाराष्ट्रराजः स्वयमवनिपोऽपि नैककलाकुशलो विदितविद्वद्धृदयः 'तिरुविसनल्लूर्' ग्रामनिकटवर्तिनि मध्यार्जुनक्षेत्रे श्रीमहालिङ्गेश्वरसेवार्थं कंचित्कालमुवास । तदा तस्य सदसि वङ्गदेशात्कश्चिन्नैयायिकपण्डितः समागत्य दाक्षिणात्येष्वतिमात्रमप्रचारितेष्वपूर्वेषु तत्त्वचिन्तामणिगतवादविशेषेषु नव्यगादाधरीरीत्या पूर्वपक्षानुद्भावयत् । ते वादा न ज्ञातपूर्वाश्चोळदेशीयैः । अतस्तत्रत्या नैयायिकवृद्धा उत्तरयितुमशक्नुवन्तो जोषमजुषन्त । राजाऽपि भग्नमना बभूव । अस्मिन्नवसरे अष्टादशवर्षदेशीयोऽयं कुट्टिशास्त्री तदुद्भावितं पूर्वपक्षजातं निराकृत्य पुनस्तत्पण्डितसमाधेयं पूर्वपक्षान्तरमप्यवतारयति स्म । तदा सर्वाः पण्डिताः प्रभवो राजा च सानन्दं साधुवादमकार्षुः । महाराजोऽमरसिंहश्च तत्त्वचिन्तामणिग्रन्थे तन्नैपुण्यस्मारक 'मणिकुट्टि' अथ वा 'चिन्तामणिकुट्टि' इति बिरुदं तस्मै प्रादात् । तदा तन्नामोट्टङ्कितः कञ्चन जयस्तम्भोऽपि तत्र प्रतिष्ठापनीय इत्यप्याशयो महाराजस्यासीत् । किं तु पण्डितप्रवराः सर्वेऽपि वर्धिष्णुरयं बालो न दृष्टिदोषविषयः कार्य इति राज्ञे निवेदयामासुः । अथापि तमाशीर्वचनेन महताऽन्वगृह्णन् । इत्थं तत्त्वचिन्तामणिवादवृत्तान्तस्मारकतयैवानन्तरं प्रौढे वयसि स्वकृतानां ग्रन्थानां प्रायेण चिन्तामणिशिरस्क नाम व्यधत्तानीत् ॥

गच्छता कालेन तञ्जानगर्यां द्वितीयः शरभोजिमहाराजः १८०० तमे क्रैस्तवाब्दे पट्टाभिषिक्तो राज्यं शासितुं प्रारभत । स च तदा तन्नगरनिकटवर्तिनि 'ओरत्तनाडु' समाख्यग्रामे वेदशास्त्राध्ययनस्थानमेकं स्थापयामास । यत्र बहूंश्चोळदेशीयान्विद्वन्मणीन्वंशपरपरानुभवार्हवृत्तिकल्पनापूर्वकं संमेलयामास । तेष्वन्यतमत्वेन परिगणतोऽयं कुट्टिशास्त्री तत्र वसन् विद्यामध्यापयति स्म शिष्यान् । तदा तत्र 'सर्वेऽपि पण्डिताः प्रत्यहं महाराजं प्रति आशीर्वादपुरःसरं मङ्गलाश्वत्थान् प्रदेयासुः' इति कश्चन सप्रदायः सर्वैरपि अनुसृत आसीत् । तं च सप्रदायं यथाकालं सर्वेष्वपि पण्डितेष्वनुतिष्ठत्सु अयं कुट्टिशास्त्री पुनर्यथाविधि विहितं कर्मानुष्ठाय प्रत्यहं किंचिद्विलम्बेनैव आशीरक्षतान् प्रददाति स्म । कथमयं गतभयोऽन्वहमक्षताना प्रदाने विलम्बते इति कैश्चिदसूयालुभिर्बोधितो राजा एकस्मिन् दिने शास्त्रिणमाहूय विलम्बकारणमप्राक्षीत् । शास्त्रिमहाशयस्तु राज्ञः पुरतः सविनयमस्य समाधानमुक्त्वा, नातः परमत्र परतन्त्रो वत्स्यामीति निश्चित्य मनसि, तस्मिन्नेव दिने तीर्थयात्राव्याजेनोत्तरां दिशं प्रति प्रतस्थे । प्रस्थाय च तस्यामेव रात्रौ

पञ्चनदक्षेत्रमागत्य तत्राम्बिकां धर्मसवर्धनीं बहुधा स्तुत्वाऽन्ते इत्थं विज्ञापयामास—'कतीन्द्रयामः कति चन्द्रयामश्चण्ड पुनः पूरयितुं पिचण्डम्' इति । इदमेकमेवार्धमिदानीं स्मर्यते । ततः सपरिग्रहः क्रमेणायं पण्डितवर्यः पुनानगराख्यं पुण्यपत्तनमाससाद । तदा तत्र 'पेष्वे' उपनामा भाजिरावो राज्यधुरं बभार । अस्य चास्थाने चन्दा नारायणभट्टाचार्यो नाम नैयायिकः प्रधानपण्डित आसीत् । शास्त्रिवर्यो यदा भट्टाचार्यं द्रष्टुमैच्छत्, तदा भट्टाचार्यो दाक्षिणात्यपण्डिता न न्याये परिनिष्ठितधिय इति मत्वा नानुमतिं दर्शनाय ददौ । तदनु मासत्रयं ततोऽधिकं वा यावदुपसर्पणे कृतेऽपि दाक्षिणात्ये तस्मिन् तुच्छभावेन भट्टाचार्यः शयान एवास्मै दर्शनमदात् । तं न्यग्भावमपि मर्षयन् यदा कानिचन शास्त्रार्थविचारपराणि वाक्यानि प्रायुङ्क्त, तत्क्षणमेव शयनादुत्थाय तस्य पाण्डित्यं श्लाघमानस्तमतीवोपचचार । ततः प्रभृति तयोर्मिथः स्नेहः समवर्धत । भट्टाचार्यस्नेहेन विद्वत्पक्षपातिनो भाजिरायस्य राज्यभरणसमये कंचित्कालमास्थानपण्डितो व्यराजतार्यं शास्त्रिवर्यः ॥

अस्मिन्नेव समये राज्ञा भाजिरावेण 'आपस्तम्बाश्वलायनादिप्रौतसूत्राणामिव हिरण्यकेशीयश्रौतसूत्रस्य भाष्यमद्य यावत्कैश्चिदपि न कृतम् । अतस्तत्सूत्रिणामुपकाराय भवद्भिः तस्य भाष्यं कार्यमिति प्रार्थितः सन् शास्त्रिवर्यो हिरण्यकेशीयश्रौतसूत्र तत्सामान्यसूत्रं च व्याचक्यौ । एवं तेन राज्ञा नितान्तमाहृतः शास्त्रिवर्यः कतिपयकाले तत्रोषित्वा ततो वाराणसीं प्रापत् । तत्र तदा अहोबलपण्डितो नाम कश्चिन्महात्मा आध्यात्मिकशास्त्राणि श्रीमच्छङ्करभगवत्पादभाष्यादीन्यध्यापयन्नासीत् । स किल पूर्वं महीशूरराज्यभारोद्वाहैदरास्त्रेण प्रसिद्धस्तत्रत्यपुण्यपरमं मानितवान्दास्यादीमलमकार्षीत् । ततस्तदात्मजेन टिप्पुना विमानितः स कदाचिद्दुर्मनस्केन तेन एवमवोचि—'कदा भो शास्त्रिवर्य भवानस्मादिदांमार्गमवलम्बिष्यते' इति । पण्डितमहाशयस्तु यथाप्रश्नुचिन्तामिति सविनयमुत्तरयित्वा सद्य एव तद्राज्यादपसस्मार । प्रापच्च वाराणसीम् । ततः कतिपयवासरानन्तरं टिप्पुराजस्य जननी हैदरप्रभोः पत्नी अहोबलपण्डिते परमया भक्त्या सनाथा तस्य स्वराज्ये वासमेव स्वराज्ययोगक्षेमकारणं मन्यमाना तं कंचित्कालमपश्यन्ती स्वपुत्रमप्राक्षीत्—'क्व स महापण्डितः' इति । स तु स्वस्य दुश्चेष्टितं निगूहमानो इततरमागमिष्यतीत्यनृतमेवोत्तरयति स्म । सा तु कालक्रमेण तदपराध ज्ञात्वा तस्मिन्महात्मनि कृतापराधस्य नूनमचिरात्तव राज्यक्षयो भविष्यतीति शशाप ॥

तादृशाहोबलपण्डितादेव गृहीताध्यात्मविद्योऽयं बाल्लेश्वरशास्त्री वाराणसीं कंचित्कालमधिवसन्नध्यापयति स्म बहून् शिष्यान् शारीरकमीमांसादीनि शास्त्राणि । ये तावत्पश्चात्यविद्याशीलगरिम्णा श्रीशृङ्गगिरिपीठमधिरूढाः श्रीनरसिंहभारतीस्वामिन इति प्रसिद्धा अभूवन्, तेऽपि पूर्वाश्रमे वाराणस्यामेतेषां सविधे एवाध्यात्मशास्त्रमधीतवन्तः । यदा चायं बाल्लेश्वरशास्त्री वाराणस्यामवात्सीत्, तदाऽनेकान् ग्रन्थान्पाणेषीत् । समग्रहीच्च बहूनि पुस्तकानि । एवं गच्छति काले स्वदेशागमनाय बन्धुभिः प्रार्थितः स्वाधारोपितपुस्तकनिचयः चतुरन्तादिपरिवृतपरिवारः पुनर्महाराष्ट्रमार्गेणैव प्रत्याययौ । मध्येमार्गं महाराष्ट्रदेशीयानामतिमात्रभक्तिभरितामहेणामादरात्, कचित्कैश्चिद्ब्राह्मणसत्तमैर्भगवत्पादभाष्याध्यापनाय कृतसम्प्रार्थनामनुसृत्य तत्र

कंचित्कालं वसन् तेषामभिलाषं पूरयित्वा क्रमेण कर्णाटकराज्यमापत् । काशीत आगमनसमये तदातन 'ईस्ट् इण्डिया कम्पेनी' राज्यनिर्वाहकैर्निरावाधसंचारार्थं प्रदत्तेभ्यः अनुयायिपरिवार-निवेदकेभ्यो यात्रानुमतिपत्रेभ्यः (Pass Ports Nos 1-3) अथ यज्वा पुनानगरे धार्वारनगरे चिञ्चिनीग्रामे च तत्रत्यैर्माधवराव परशुराम् पटूर्धनादिभिः प्रभुभिरातिमात्रमादृतः 1818 तम-क्रिस्तवब्दपर्यन्तं तत्र तत्रोषित्वा ततो महीशूरपुरं प्रति प्रतस्थे इति विशिष्य ज्ञायते । तत्र च तदा टिप्पुराजानन्तरं सिंहासने विराजमान. कृष्णराज ओडेयारप्रभुः महाराष्ट्रदेशात्स्वदेशं प्रत्यायान्त-मम्मुं शास्त्रिवर्यं यथाविधि सत्कृत्य तस्य स्वदेशे स्थिरवासमाकाङ्क्षमाणः स्वीयराज्ये धर्माधिकारिपद-मलंकर्तुं तं प्रार्थयामास । अयमपि तदङ्गीकृत्य तत्रानेकानि हायनान्यनैषीत् । तदैव शास्त्रि-वर्यो बहुता वित्तव्ययेन सह ज्योतिष्टोमं नाम महाक्रतुमन्वतिष्ठद्यथाविधि । यत्र स्वशिष्याः स्वबा-न्धवाश्च आर्त्विज्यमकुर्वन् । एकदा कृष्णराज ओडेयार महाराजो यज्ञवाट वाजपेयं क्रतुमनुष्ठा-यितुमीहमान एवमवोचत्— 'वाजपेयमहामखमनुतिष्ठतो भवतश्छत्रधारणेन आत्मानं कृतार्थं कर्तुमभिलषामि' इति । यज्वा तु नित्यकर्मानुष्ठानैकमतिर्बहुपशुसाध्यं वाजपेयमनुष्ठातुं नैच्छत् । एव कर्णाटकराज्ये महीशूरपुरमलंकुर्वाणमिमं कुट्टिशास्त्रिवर्यं राजा 'वेदमूर्ति' इति तन्महिमसं-सूचकविरुददानेन नानाविधशिबिकातुरगपदातिप्रभृतिना परिवारेण च बहुधा सभाजयति स्म इति 1824 तमे क्रिस्तवब्दे रामेश्वरयात्राप्रस्थानसमये तेन दत्ताद्देशान्तरगमनानुमतिपत्रात् ज्ञायते । अत्रान्तरे कदाचित् शास्त्रिवर्यः श्रीशृङ्गगिरिपीठाधिपानां श्रीजगद्गुरूणा श्रीमदाचार्यवर्याणां श्रीनृसिंहभारतीस्वामिनां दर्शनेन आत्मानं कृतार्थयितुकामः श्रीशृङ्गगिरिमगमत् । तत्र च, ये तावत्पूर्वाश्रमे वाराणस्यामस्माच्छास्त्रिवर्याद्यथात्मशास्त्रमधीतवन्तः, त एव तदानीं तत्पीठाधिपा आसन् । एतच्च शास्त्रिभिर्न ज्ञातपूर्वमासीत् । आचार्यास्तु दर्शनायागतमेनं यज्वानमालक्ष्य, विदित्वा च तमात्मनः पूर्वाश्रमे गुरुमप्राक्षुः — 'किं मां प्रत्यभिजानन्ति भवन्तः' इति । यज्वा पुनस्तान् साक्षाद्दृष्टाऽपि संन्यासिवेषेणावस्थानाद्विस्मृतपूर्वाश्रमपरिचयः सन् 'भवन्त एतत्पी-ठाधिपा आचार्या इत्येव जानामि' इति प्रत्यवदत् । 'नैतदाश्रमस्थं मां, किं तु पूर्वाश्रमस्थितम्' इति पुनः पर्यपृच्छन् श्रीमठाधिपाः । शास्त्रिवर्यस्तु न जाने इत्यवादीत् । तत आचा-र्यवर्याः स्वस्य पूर्वाश्रमे वाराणस्यां तेषां सकाशाद्यथात्मशास्त्रग्रहणवृत्तान्तमुक्त्वा तं स्मारयामासुः । तदाकर्ण्य यज्वा महान्तं प्रमोदमुपजगाम । ततः आचार्यवर्यैर्महता आदरेण संमानितः स्वगेहं प्रत्यागमत् । एवं महीशूरपुरीमधिवसन् श्रीवाञ्छेश्वरयज्वा यदा तीर्थयात्रायै रामेश्वरमगात्, तदा दीर्घकालविरहितस्वबन्धुजनदिदृक्षया स्वग्राममयासीत् ॥

समये च तस्मिन् तञ्जापुराधीशं पारंपर्यवृत्तिकल्पनासंरक्षितपण्डितप्रकाण्डमण्डलं श्रीशर-भोजिमहाराजं द्रष्टुमभिलषन् तन्नगरमासासाद । चिरकालानन्तरमागतं पण्डितमणिमथिषिक्तकारा-दिना सत्कुर्वन् महाराजः पूर्वमात्मना कृतमपराधं परिमार्ष्टुकामस्तस्य पादयोर्निपपात । तं च बहुधा बहुमन्यत । ततस्तयोर्मिथः संप्रवृत्तो नवनववृत्तान्तश्रवणकौतूहलाद्बहुधा संलापः । तदा पण्डितकमलेरङ्गमावह्य विहरन् राजपुत्रो बालः शिवाजिः तस्य कण्ठे विराजमानं कृष्णराज ओडे-

वारप्रभुणा प्रीत्या समर्पितं मरकतमणिहारं तन्मनसा सह आचकर्ष । तदनुपदमेव पण्डितवर्यस्तं मणिहारमस्मै वात्सल्येन समर्प्य समतोषयदेनम् । ततो यज्वा महाराजमापृच्छ्य स्वगृहमगात् । महाराजोऽपि स्वप्रीतिनिदर्शनाय बहुधननिचयमनुपदमेव तस्मै प्राहिणोत् ॥

एवं वाल्लेश्वरयज्वा यदा यदा स्वग्राममायथौ, तदा तदा महीशूरपुरे राज्ञा संमानतया दत्त छत्रचामरादिक सर्वं स्वग्रामवर्तिशिवविष्णवालयाभ्यां समर्पयति स्म । यदा च 1839 तमे क्रिस्त्वब्दे श्रीकाञ्च्यां श्रीकामाक्ष्याः महाकुम्भाभिषेकः, तथा 1849 तमे श्रीजम्बुकेश्वराख्यदिव्यक्षेत्रे श्रीमदखिलाण्डेश्वर्यास्ताटङ्कप्रतिष्ठामहोत्सवश्च समवर्तितः श्रीकाञ्चीकामकोटिपीठाधीश्वरैः श्रीशंकराचार्यैः ; तदाऽपि शास्त्रिवर्यः एतयोरुभयोरपि समययोः सन्निहितः सन् तत्र कर्तव्यजातं सर्वमपि निरवहत् इति श्रूयते । तस्यास्य यजमानः परमेश्वरे निरतिशया भक्तिरासीत् । यतः प्रतिदिनमेकादशरुद्रपूर्वकमीश्वरपूजनमन्तरा सलिलमपि पातुं नाभ्यवस्येत् इति श्रूयते । तत्रापि श्रीमध्यार्जुनक्षेत्रविराजमानश्रीमहालिङ्गेश्वरस्य चरणकमलयोरतिमात्रमावहद्भक्तिम् । अत एव चरमे वयसि वर्तमानः स यदा यदा स्वजन्मभूमिमायथौ, तदा तदा अहरहर्मध्यार्जुने श्रीमहालिङ्गेशमनेकन्तुतिप्रणतिपूर्वकमहङ्त्वा न स्वापमप्याप्नुयात् इति वदन्ति प्रामाणिका वृद्धाः । एवमनवरतमीश्वरं भक्त्या भजमानः शास्त्रिवर्यः स्वभक्तिपारम्यपरिणतया श्रीमहालिङ्गशतकाख्यया कयाचित्स्तोत्ररत्नावल्या सह भगवतः श्रीमहालिङ्गेशानस्य पादपङ्कजयुगले स्वात्मानं समर्प्यान्ते प्रायः अशीतितमे वयसि भौतिकं देहमत्यजत् । अनेन शास्त्रिवर्येण कृता अन्ये ग्रन्थाः एते— हिरण्यकेशीश्रौतसूत्रव्याख्या, तत्सामान्यसूत्रव्याख्या, दत्तचिन्तामणिः, श्राद्धचिन्तामणिः ब्रह्मसूत्रार्थचिन्तामणिः, काकतालीयवादार्थः घूर्णानचान्द्रिका, तर्कसंग्रहव्याख्या, श्रीमहालिङ्गशतकम्, भाट्टचिन्तामणिः इति ॥

इत्थं महिषशतककर्तृतद्व्याख्याकृतोः श्रीवाल्लेश्वरशास्त्रिणोः कालेतिवृत्तादिकं सर्वमपि तदंशीयैः तिरुविसनल्लूर ब्रह्मश्रीरामस्वामिशास्त्रिभिः लिखित्वा संप्रेषितमनुसृत्यैवात्र लिखितम् । अतस्तदेवात्र प्रमाणं भवति । सव्याख्यस्यास्य मुद्रापणे च तिस्रो मातृकाः लब्धाः । एका तावत् श्रीरामस्वामिशास्त्रिभिः संप्रेषिता । अन्या अडैयार ब्रह्मश्रीरामचन्द्रशास्त्रिभिः प्रहिता । अपरा तु आदितः प्रभृति षष्टितमश्लोकपर्यन्ता पळुवूर वेदान्तपाठशालाध्यक्षैः गीतोपन्यासचतुर वेदान्तस्थापक ब्रह्मश्री सुब्रह्मण्यशास्त्रिभिः प्रदत्ता । तिस्रोऽपि मातृकाः प्रायेण समानाः शुद्धा एव । आसां तिसृणामपि साहाय्यमवलम्ब्य यथामति संशोध्य प्रकाशीक्रियते । सुरभारत्यां निसर्गत एव प्रीतिभाजो गुणैकपक्षपातिनः सर्वेऽपि सहृदया अमुं प्रयासं सफलयन्तु, पुनः पुनरेतादृशग्रन्थरत्नप्रकाशीकरणाय प्रोत्साहयन्तु चास्मानिति भगवन्तमिन्दुकलावतंसं श्रीमहालिङ्गेश्वरमेव प्रार्थयामहे

इति शम् ॥

इत्थं

सहृदयवशंवदः व्याकरण-वेदान्त-विद्वान्

के. एस्. वेङ्कटरामशास्त्री

श्रीसच्चिदानन्दभारतीभाण्डाराध्यक्षः, श्रीशंकरगुरुकुलम् श्रीरङ्गम् ॥

धीमन्नवतारकथाः शुभाः' 'कृतवान्किल कर्माणि अतिमर्त्यानि' इत्यादिश्लोकोक्तानि ज्ञातानि। 'पृष्टो मुदितः' इत्यनेन 'संप्रश्नसंहृष्ट' इति मूलज्ञापनमभिप्रेयते। 'विप्राणां रौमहर्षणिः' 'पृष्टः सूतो महर्षिभिः'। प्रष्टृवक्त्रोरन्तरं सूचयित्वा तत्परिहारः क्रियतेऽनुपदमेव सर्वोत्कृष्टशुकाचार्यवक्त्रया वक्तुर्युत्कर्षकथनेन। शुकाचार्यरमेशादीन् प्रणम्य। शुकाचार्येणाचार्यदेन 'आचार्यवान्पुरुषो वेद' 'आचार्याद्धैव विद्या' 'आचार्यवत्तया मुक्तौ' इत्यादिक स्मार्यते। सर्वोत्कृष्टाचार्यप्रणाद्भावकृत्वेन सूतस्य महर्षीणामप्युपदेष्टृत्वरूपोत्कर्षो युक्त एवेति व्यज्यते। शुकाचार्यनमस्कारः कृतो द्वाभ्यां पद्याभ्या—'यं प्रव्रजन्तम्' 'यः स्वानुभावम्' इति। रमेशस्य नारायणस्य नमस्कारः कृत एकेनानुष्टुप्श्लोकेन। तस्मिन् श्लोकेऽपि नारायणेन सह नरः सरस्वती च प्रणमेते। सूतप्रदर्शितं शुकाचार्यगौरवं व्यज्यते, अलमाचार्यरमेशोत्तरनिवेशनेन शुकाचार्यस्याभ्यर्हितत्वद्योतनद्वारा। रमेश इतीनियत्राद्विपदेन नर सरस्वती व्याख्यश्च विवक्षितौ। 'प्रतिपूज्य वचस्तेषाम्' इति मूलोक्तप्रष्टृमहर्षिवचःपूजनमपि कथंचिदादिपदेन विवक्ष्येत। छात्रप्रायप्रष्टृज्ञापितमस्कारस्यानुचितत्वात् प्रष्टृसंबन्धेनैवाद्रवोमात्रं पूजनमासीत् सूतः। 'मुदितोऽब्रवीत्'। वक्तुः स्वयं मुदितत्वं श्रोतृरोमहर्षणं भवेत्। इत्थं च 'विप्राणां रौमहर्षणिः' इत्यस्य भावः प्रदर्श्यते। अयं वक्ता स्वयं हृष्टरोमा कथामाख्याति श्रोतृरोमहर्षणः॥ ७।

भक्तियोगः शास्त्रसारो भगवानेक एव हि।
सृष्ट्यादि कुरुते कार्यं वशीकृतगुणत्रयः॥ ८॥

भक्तियोगः शास्त्रसारः। 'स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे' 'वासुदेवे भगवति भक्तियोगः प्रयोजितः' इत्यादिकं स्मार्यते। एक एव हि सृष्ट्यादि कुरुते वशीकृतगुणत्रयः। 'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः' इति भागवतारम्भनिष्कृष्टं त्रिमूर्त्यद्वैतमत्र संग्रहारम्भ एव प्रकाश्यते भागवतशास्त्रसारार्थत्वेन। भगवान् श्रीधरोऽपीदं तत्त्वं प्राचीकशद्दीपिकारम्भ एव– 'माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ। वन्दे परस्परात्मानौ परस्परनतिप्रियौ॥' इति गानेन। अस्य तत्त्वस्य हरिहराद्वैतमिति संज्ञापि कृता तट्टीकाकर्त्रा॥ ८॥

अवतारा जगत्क्षेमकरा धर्मस्य चाश्रयः।
कलौ भागवतग्रन्थः शुकेनोक्तः परीक्षिते॥ ९॥

वृत्ता विंशत्यवताराः कथिताः संग्रहेण तृतीयाध्याये। 'जन्म गुह्यं भगवतो य एतत्प्रयतो नरः। सायंप्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते॥' इति श्रीशुकेन संकीर्तितावताराणामनुदिनं

कीर्तनमपि मोक्षक्षेमकरमित्युक्तम् । क्षेमकराः मोक्षरूपपरमक्षेमकराः । 'जन्म कर्म च मे दिव्य-मेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥' इति भगवद्वानमनुकृतं भागवतेन । 'एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च । वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥' इत्यपि गीतं शुकेन । अवतारा: क्षेमकरा इतीदं भागवतावतारमपि संगृह्णाति । सामान्येन सर्वावता-राणां क्षेमंकरत्वं प्रतिज्ञायते । धर्मस्याश्रयो भागवतग्रन्थः कलौ शुकेन प्रोक्तः परीक्षिते । अवतीर्णो भगवान्धर्मस्याश्रयः । तद्विषयो भागवतग्रन्थोऽपि धर्मस्याश्रयः । 'त्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः' इति पृष्टं मुनिभिः । धर्माश्रये कृष्णगुमणौ निम्लोचितवति धर्मस्य शरणत्वेन भाग-वतार्कं उदियाय । शुकेनोक्तः परीक्षिते । 'ज्ञानं च वैयासकिशब्दितं यत्पारीक्षितं भागवताभिरामम्' । पारीक्षितमिति ग्रन्थनाम । भागवतानामभिरामत्वाद्भागवतत्वेन व्यवहारः । पारीक्षितमित्येव मुख्या संज्ञेति मूलभावः । परीक्षिते प्रोक्तं पारीक्षितमिति व्युत्पत्तिः प्रदर्श्यते । 'तेन प्रोक्तम्' इति प्रोक्तार्थतद्धिताश्रयणे शुकनाम्नैव संज्ञा कर्तव्या भवेत् । अत्र श्रोतृनाम्ना संज्ञा क्रियते श्रोतुः प्रशस्त्यै । 'भागवतोत्तमोत्तम' इति प्रवक्त्रा गुरुणा शिष्यः संबोध्यते । 'वैयासकिशब्दितं ज्ञानम्' इति शुकस्य गुरोः प्रशस्तिकथनम । वैयासकिशब्देन व्यासकर्तृकत्वं सूच्यते । शब्दितमिति व्यासनिबन्धस्य शुकशब्दितत्वमुच्यते । परीक्षिते । 'संवत्सरं तदर्धं वा मासत्रयमथापि वा । परीक्ष्य विविधोपायैः कृपया निःस्पृहो वदेत् ॥' इति स्मर्यते । सप्ताहमात्रावधिकायु शेषे परीक्षितिः का वा परीक्षा शक्या ? सुचिरमपरीक्षिते शिष्ये कथं गुरुणा परमगुह्यमुपदिष्टमित्याक्षिप्ते, उच्यते-अयं जन्मनैव परीक्षित इति । परीक्षिते इति परीक्षितशब्दात्सप्तम्यन्तं रूपम् । निबन्धुरुत्तमत्वं, वक्तुरुत्तमत्वं श्रोतुरुत्तमत्वं च कीर्त्यते । गर्भे एव तं ददर्श पुण्डरीकाक्षः आपादतलमस्तकम् ॥९॥

श्रीमद्भागवतारम्भपरीक्षिज्जननादिकम् ।
पृष्टः सूतः शौनकेन तदुपोद्घातमब्रवीत् ॥ १० ॥

मूलद्वितीयश्लोकोपात्तं ग्रन्थनामानुपोद्घाते गृह्यते । प्रथमं भागवतजन्म वर्णितम् । अनन्तरं शुकमुखाद्भागवतश्रोतृपरीक्षितो जन्मादिकम् । जननादिकं जन्मादिमुक्तिपर्यन्तम् । 'जन्मा-द्यस्य यतः' इति सूत्रे आदिपदं मुक्तिमपि संगृह्णाति । प्रयन्तिशब्देन बन्धप्रलयरूपमुक्तिरपि ग्रहीतुं शक्या । अभिसंविशन्तिशब्देन तद्ग्रहणं सुलभम् । भागवतारम्भो मुक्तिप्रयोजनः । तदुपोद्घातम् । 'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते' । अयं प्रथमस्कन्धो भागवतोपोद्घातः ॥ १० ॥

वेदान् व्यस्येतिहासादीन् व्यासः कृत्वाऽप्यतुष्टधीः ।
देवर्षिणा स्मारयता कर्तव्यं बोधितोऽभवत् ॥ ११ ॥

व्यासः इति न रूढनाममात्रम्, योगार्थपौष्कल्यमप्यस्ति तस्मिन्। व्यस्यतीति व्यासः इति व्युत्पत्तिः प्रदर्श्यते व्यस्येति। 'व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधम्'। इतिहासादीन्। 'इतिहासपुराणं च पंचमो वेद उच्यते'। कृत्वा। इतिहासरूपवेदविषये कर्तृत्वमेव, न विभक्तृत्वमात्रम्। चतुर्णां वेदानां व्यासः, स्वपञ्चमवेदस्य प्रणेतैव, न व्यासः। इदं व्यज्यते 'व्यस्य, व्यासः, कृत्वा' इति पदत्रयेण। अतुष्टधीः। भागवतं तस्य चरमग्रन्थः। तत्प्रणयनेनैव तुष्टिः कृतकृत्यताबुद्धिश्च सपन्ना। तावत्पर्यन्तं न तुष्टिरभूत्। 'नातुष्यद्धृदयं ततः' इति मूलम्। 'ततः' वेदविभजनेतिहासपुराणप्रणयनादपि। पूर्वकालिकत्वबोधककत्वाप्रत्ययेन तत्सूच्यते अत्र। देवर्षिणा। 'देवर्षिः प्राह विप्रर्षिम्' इति सूतवचनं स्मार्यते। ऋष्योः समागमः। यद्येको देवर्षिः, अन्यो विप्रर्षिरित्यर्थादेव लभ्यते। स्मारयता। 'स्मारये त्वां न शिक्षये' इति सीता प्राह नाथं प्रति तस्मा उपदेशसमये। 'प्रभो' इति शिष्यं संबुबुधे नारदः। सीतायाः स्वनाथे राम इव नारदस्य व्यासे प्रीतिबहुमती इति व्यज्यते। स्वात्मनोऽपरितुष्टत्वस्य मूलमव्यक्तमगाधबोधं चासीदिति व्यजिज्ञपच्छिष्यः—'तन्मूलमव्यक्तमगाधबोधं पृच्छामि त्वा' इति। अगाधबोधमिति पदं मध्यमणिन्यायेनोभयत्रान्वेतव्यमिति व्यज्यतेऽत्र 'बोधितोऽभव' इति। व्यासस्यातुष्टिकारणाबोध आसीत्। स बोधितोऽभवत्। अगाधबोधं दुर्विज्ञानं अपरितोषकारणं व्यासं बोधयामास अगाधबोधो नारदः॥

पूर्वकल्पे शूद्रजन्मा महद्वीक्षणगोचरः।
यत्प्रसादाद्ब्रह्मपुत्रो जातोऽहं प्रलयात्परम्॥ १२॥

पूर्वकल्पे। 'अहं पुराऽतीतभवे' इति श्लोके पुराशब्दः 'पूर्वकल्पे' इति श्रीधरमुनिभिर्व्याख्यातः। तत्सूच्यतेऽत्र तत्पदोपादानेन। 'प्राक्कल्पविषयामेतां स्मृतिम्' इति वचनमिह भाव्यम्। भागवतमन्थोपोद्घात एव भागवतकटाक्षप्रभावो वर्ण्यत गुरुणा साक्षात्स्वानुभवकथनपूर्वकम्। 'इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे' इतिवत् न स्वश्रुतमात्रकीर्तनम्। यत्प्रसादात्। यच्छब्दस्योत्तरश्लोकस्थतस्येतिपदेनान्वयः। महद्वीक्षणगोचरीभवनस्य भगवत्प्रसादलभ्यकत्वम्। 'तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः' इति वचनं प्रत्यभिज्ञाप्यते गोचरपदेन। शूद्रजन्मा अहं ब्रह्मपुत्रो जातः। 'दौष्कुल्यमार्षं विधुनोति सद्यो महत्तमानामभिधानयोगः'। ब्रह्मा स्रष्टा सर्वलोकपितामहः। महद्भिस्तैरप्यलब्धं तत्पुत्रत्वभाग्यं लब्धं मया तद्दृष्टिगोचरत्वेन। प्रलयात्परम्। विश्वप्रलयेऽपि न पूर्वसंपादितादृष्टस्य प्रलयः॥ १२॥

यत्कीर्तनं सर्वविधपापजातनिवर्तकम्।
तस्य सर्वेश्वरस्यैव गुणान्वर्णय मुख्यतः॥ १३॥

नारदस्य पूर्वभवदौष्कुल्यं महत्सेवया महत्कटाक्षैर्निरन्तरभगवद्भजनेन च निवर्तितमि-

त्युक्तम्। तद्गानुवादेनापि जन्मनिकर्षनिवृत्तेः सद्यः सिद्धिर्भवेदिति कथनेन 'दौष्कुल्यमाधिम्' इति शुकश्लोकः स्मार्यते। सर्वविधपापजातनिवर्तकम्। समूहः, जन्म इति जातपदार्थद्वयमप्यत्र ग्राह्यम्। जन्मार्थग्रहणेन दौष्कुल्याधिनिवर्तनसूचनम्। 'येऽपि स्युः पापयोनयः' इति गीतावचनमपि स्मार्यते पापजातशब्देन। पापजाताः पापयोनयः। पापजातत्वं पापयोनित्वं। गुणान् वर्णय मुख्यतः। 'भवताऽनुदितप्रायं यशो भगवतोऽमलम्' इति नारदवचनव्याख्यायां 'प्रायग्रहणेन भारते प्रासंगिकतयाऽप्राधान्येन चोदितमिति सूच्यते' इत्युक्तं श्रीवीरराघवसूरिणा। 'किं वा भागवता धर्माः न प्रायेण निरूपिताः' इति व्यासनिर्वेदवचनमपीह भाव्यम्। प्रायेण भूयस्त्वेनेति श्रीधरमुनयः॥ १३॥

तपसः फलमेतद्वै वाचो बुद्धेः श्रुतस्य च।
गुणानुवर्णनं विष्णोर्मनःशान्तिकरं सुखम्॥ १४॥

वाच इति 'न यद्वचश्चित्रपदं हरेर्यशः' इत्यादिकं स्मार्यते। गुणानुवर्णनं विष्णोः। 'इदं हि पुंस्तपसः श्रुतस्य वा खिष्टस्य सूक्तस्य च बुद्धिदत्तयोः। अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम्॥' 'भवान्निन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम्' इति नारदोपदेशः स्मार्यते। 'समादिभिर्योगपथैः कामलोभहतो मुहुः। मुकुन्दसेवया यद्वत्तथाऽऽत्माऽद्धा न शाम्यति॥' इति नारदनिगमनवचनमपीह स्मार्यते उत्तरार्धेन॥ १४॥

एवमुक्तो नारदेन व्यासो भक्तिसमाहितः।
भक्तिज्ञानविरागाणां वर्धकं ग्रन्थमुत्तमम्॥ १५॥

पदे पदे भगवतः सौलभ्यादिप्रकाशकम्।
चक्रे क्षेमाय जगतः श्रीमद्भागवताभिधम्॥ १६॥

एवमुक्तः। गुरूपदेशानुपदमेव तत्क्षणमेव समाधिनिष्ठोऽभूत्। 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' 'तदव्यक्तमाह हि' यत्तदव्यक्तमद्रेश्यं तद्भक्तिसमाधिना व्यक्तमपश्यत्। 'अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयाम्'। समाधिश्चात्र सालम्बनः। तच्च व्यज्यते 'भक्तिसमाहितः। इति। भक्तिश्च सूत्रोक्तं संराधनम्। ग्रन्थानिबद्धबुधैर्भक्तिस्तत्कृते निबन्धे संक्रान्तेति सूच्यते भक्तिसमाहित इति कर्तृवर्णनेन, भक्तिवर्धकमिति ग्रन्थवर्णनेन च। कारणगुणान्वयः कार्ये। समाहित इति पदे च, 'समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्' इति श्रुतिप्रत्यभिज्ञापनेन 'अपश्यत्पुरुषं पूर्णम्'

इति भागवतरचनातः पूर्वं तत्त्वदर्शनरूपफललब्धिरवर्ण्यते । तत्त्वदर्शिभिर्ज्ञानमुपदेष्टव्यमिति भगवानगायत् । तत्त्वं पूर्णं साक्षात्कृत्य तदनन्तरं भागवतमगायद्भगवान् व्यासः । भक्तिज्ञानेत्यत्र भक्तिः प्रेम । पदे पदे । 'यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे' इति शौनकवचनं स्मार्यते । शौनकोक्त स्वादुत्वं भगवत. सौलभ्यादिपरमकल्याणगुणप्रकाशकत्वेनेति व्यज्यते सौलभ्यादिप्रकाशकमिति । आदिपदेन सौशील्यकरुणासौहार्दादिगुणग्रहणम् । 'चक्रे' । भागवतमन्थफलस्य कर्तृव्यासगामित्वं व्यज्यत आत्मनेपदेन । 'स्वात्मपरितोषणम्' इति वचनं स्मार्यते तेन । क्षेमाय जगतः इत्यनुपदमेव फलस्य जगद्गामित्वमुच्यते ॥ १५—१६ ॥

अवशिष्टः कौरवाणां समरे द्रौणिराग्रहात् ।
निहत्य द्रौपदीपुत्रानर्जुनेन पराजितः ॥ १७ ॥

अवशिष्टः । नार्यं शिष्टः; नार्यं शिष्टव्यपदेशार्हः । किं तु केवलमवशिष्टः समरे इति व्यज्यते अवशिष्टपदेन 'शिष्टाभास इति वाऽर्थः । अवोपसर्गस्यावसन्नार्थकत्वम् । तस्य जुगुप्सितं कर्म विगर्हयन्ति । समरे इति पदं अवशिष्टपदेनान्वेति, न निहत्यपदेनोत्तरपादस्थेन । निहत्य; न समरे किं तु स्वापे । द्रौपदीपुत्रान् । नैकोऽपि तेष्ववशिष्टः । अर्जुनेन । प्रियतमद्रौपदीपंचपुत्राणां क्रूरघातुकमपि न निजघान अर्जुनः शुभ्रः । न केवलं वर्णस्यात्यन्तशुभ्रत्वम्; स्वभावोऽपि निरुपाधिकशुभ्र इति व्यज्यते अर्जुनपदेन । पराजितः, न निहतः । निहननस्य न्याय्यत्वेऽपि केवलं पराजितः । केवलपराजयमात्रे द्रौणित्वं हेतुः । 'स एव भगवान्द्रोणः प्रजारूपेण वर्तते' इति द्रौपदी । हतानां सुतानां द्रौपदीमातृकत्वात्प्राणाः लब्धाः द्रौणिना । यदि हतानां सुतानां माता द्रौपदी नाभविष्यत्, दुर्लभा द्रौणेः प्राणा अभविष्यन् । इदं व्यञ्जितं शुकेन 'माता सुतानां निधनं शिशूनां निशम्य' इति । निहत्येति तच्छ्लोकस्मारणम् ॥ १७ ॥

तेन मुक्तं ब्रह्मशिरो हन्तुं गर्भगबालकम् ।
आगतं भगवान्कृष्णश्चक्रेण विनिपात्य च ॥ १८ ॥

कुलं संरक्ष्य पाण्डूनां भूमेर्भारं व्यपोह्य च ।
कुन्त्या स्तुतो भीष्ममुक्तिप्रदोऽगाद्द्वारकापुरीम् ॥ १९ ॥

तेन मुक्तं ब्रह्मशिरः । तेन अर्जुनेन ब्रह्मशिरः ब्राह्मणस्य अश्वत्थाम्नः शिरः मुक्तं वधात् । प्रथमपादस्य आवृत्तिः । अर्जुनेन कृपया वधान्मुक्तस्तत्क्षण एवापाण्डवाख्यं मुमोच । बन्धान्मोचनस्यास्त्रमोचनरूपप्रतिकरणमिति कृतघ्नतातिशयो द्योत्यते मुक्तपदेन । पूर्वं प्रकट-

वयसो युवानः पुत्रा हताः । तथात्वेऽपि करुणाकाष्ठया मोचितः । तन्मोचनस्य प्रतिकरणं गर्भगत-बालके ब्रह्मशिरोमोचनम् । पूर्वं हताः प्रातिविन्ध्यादयः शयनगता बालकाः, अयं तु गर्भगतबालक इति क्रौर्यगरीयस्त्वं व्यज्यते गर्भग इति बालक इति च । पूर्वमयं ब्रह्मबन्धुरागतो हन्तुं सुप्तान् बालान्, इदानीं तन्मुक्तं ब्रह्मशिरः आयाति हन्तुं गर्भगबालकम् । न स्वयमायात्ययं भीरुः । अस्त्रं ब्रह्मशिर आगतं कृष्णेन विनिपातितम् । बद्धस्य ब्रह्मणो द्रौणेः शिरो न विनिपातितं इति व्यञ्जितं शुकेन 'अस्त्रं ब्रह्मशिरो मेने' इति । तच्चानुस्मियतेऽत्र । कारुणिकेन शुद्धधवलेनार्जुनेनास्य ब्रह्मणः शिरो मुक्तम् । तस्य प्रत्युपकारस्तत्पौत्रे तत्कुलसंतानबीजे ब्रह्मशिरोमोचनम् । चक्रेण । 'जुगोप कुक्षिं गत आत्तचक्रः' इति वचनस्मारणेन भगवतोऽप्युत्तरागर्भगतत्वं व्यज्यते । 'सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः' इति वचनं स्मार्यते । 'कुलं सरक्ष्य पाण्डूनाम्' इति उत्तरश्लोके तच्छ्लोकस्मरणानुवृत्तिः । कुन्त्या स्तुतः । 'पृथयेत्थं कलपदैः परिणूताखिलोदयः' इति सूतेनानूदिताऽद्भुता पृथास्तुतिः । परिणूतेति दीर्घेण स्तुतेर्भक्त्याऽतिदीर्घत्वं व्यञ्जितम् । प्रेममयी वृद्धा पितृष्वसा कुन्ती कृष्णप्रभावज्ञा 'रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति' इति स्वहृदये कृष्णरतिप्रवाहं प्रार्थयामास । कुन्त्या स्तुतो भीष्ममुक्तिप्रदः इति समभिव्याहारेण मुमूर्षुनैष्ठिककुरुवृद्धस्तुतिरपि स्मार्यते; यस्यां कुन्तीस्तुताविव 'रतिरस्तु मेऽनवद्या' इति कृष्णे रतिः प्रार्थिता वृद्धतमेन नैष्ठिकेन । भीष्ममुक्तिप्रदोऽगात् । भीष्ममुक्तिप्रदानेनैव कृतकृत्यताबुद्धिः कृष्णस्य । आनुशासनिकस्थचरमाध्यायस्य भीष्ममुक्त्यध्याय इति नाम ॥ १८—१९ ॥

सर्वेश्वरः सर्ववन्द्यः स्वस्त्रीसौभाग्यवर्धकः ।

इत्थं स्तुतः पुरस्त्रीभी रेमे योगेश्वरो हरिः ॥ २० ॥

'इत्थं पुरस्त्रीभिः' इति पर्यन्त पूर्वश्लोके अगादित्यनन्तरमप्यावृत्त्याऽन्वेतव्यम् । इत्थं स्तुतः पुरस्त्रीभिरगाद्द्वारकापुरीम् । द्वारकापुरीं प्रति प्रयाणावसरे हास्तिनपुरस्त्रीभिरित्थं विचित्रमस्तूयत भगवान् । यथा कुन्तीस्तुतिं श्रुत्वा मन्द जहास भगवान्, तथा हास्तिनपुरस्त्रीभिः स्तुतो भगवान् सास्मितेन ययौ इति गीतम्—'एवंविधा वदन्तीनां स गिरः पुरयोषिताम् । निरीक्षणेनाभिनन्दन् सास्मितेन ययौ हरिः ॥' इति सूतेन । 'एवंविधा वदन्तीनाम्' इति तद्वचनमनुस्मियते 'इत्थं स्तुतः' इति । 'इत्थं' इति कुन्तीस्तुत्यनुवादकोऽपि श्लोकः स्मार्यते । 'स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातः समाहिताः । सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः ॥' । भगवत्स्तुतौ तन्मङ्गलाशासने च सर्वासां स्त्रियामधिकारः । अशरीरत्वसर्वेश्वरत्वादिज्ञानपूर्विका तत्स्तुतिर्मान्मथभावगन्धरहितेति व्यज्यते 'सर्वेश्वरः' इति । 'स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि' इति कौरवेन्द्रपुरस्त्रीणां स्तुत्यारम्भः । 'य एक ईशो जगदात्मलीलया सृजत्यवत्यात्ति न तत्र सज्जते' इति तद्गीतं स्मार्यते सर्वेश्वर इति । सर्ववन्द्यः । तरुणीभिरवन्द्यत्वे सर्ववन्द्यत्वमपेयादिति व्यज्यते । स्तुत्यभिवादनयोः पठितो धातुः । 'यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन्' इति

तत्स्तुत्यन्ते सर्वपत्नीसौभाग्यवर्धकत्वं स्तुतम्। तत्स्मार्यतेऽत्र स्वस्त्रीसौभाग्यवर्धकः इति चरमपठनेन। 'सर्वश्रुतिमनोहरः संजल्पः' इति सूतेन तत्स्तुतिः स्तुता। द्वारकापुरं प्रविशन् स्त्रीपुंपजनैः सर्वैः स्तुतः—'नताः स्म ते नाथ सदाऽङ्घ्रिपंकजं विरिञ्चिवैरिञ्चसुरेन्द्रवन्दितम्' इत्यारभ्य। 'प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः' इति सूतश्लोकवर्णने प्रजाशब्दः पुरस्त्रियोऽपि अन्तर्भावयति। 'त्वं स्त्री त्वं पुमानसि' इति श्रुतिवर्णितालिङ्गभगवत्स्तोत्राधिकारे न स्त्रीपुंप्रभेदप्रयुक्तं वैषम्यम्। 'विरिञ्चिवैरिञ्चसुरेन्द्रवन्दितम्' इत्युक्तं स्मार्यते सर्ववन्द्य इति। 'परमं च दैवतम्' इत्युक्तं स्मार्यते सर्वेश्वरः इति। 'तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्' इति श्वेताश्वतरश्रुत्या परमदैवतस्य सर्वेश्वरत्वम्। 'प्रपन्नतृष्णाखिलतापशोषणः' इत्यनेनापि सर्वेश्वरत्वमुपपाद्यते। 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते'। 'राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः। हर्म्याण्यारुरुहुर्विस्रस्तदृक्षणमहोत्सवाः। नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम्। नैव तृप्यन्ति हि दृशः श्रियो धामाङ्गमच्युतम्॥ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम्। बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम्॥' इति द्वारकौकसां संजातहर्षादिवर्णनमिह भाव्यम्। बाहवो लोकपालानाम्; लोकपालस्य क्षत्रस्य जननस्थानं बाहवः। 'बाहू राजन्यः'। इत्थं च सर्वेश्वरत्वसूचनम्। 'श्रियो निवासो यस्योरः' इति स्वस्त्रीसौभाग्यवर्धकत्वसूचनम्। 'एतदेवाभिनयेनाह' इति श्रीधरमुन्यवतारिका 'श्रियो निवासः' इति श्लोकस्य। अपर्याप्तत्वात्तेषां भक्तिभावस्य प्रेमवीक्षणादिभिरेव तन्मौनस्तुतिः। 'यतो वाचो निवर्तन्ते' इतिवत्काष्ठागतस्तासां कृष्णानन्दानुभवः। 'रेमे योगेश्वरो हरिः' 'यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः' 'असक्तमपि संगिनम्' इत्यादिकं स्मार्यते॥ २०॥

कृष्णेन रक्षितो गर्भादवतीर्णः शुभे दिने।
द्विजैरुक्तो विष्णुरातः परीक्षिदिति पप्रथे॥ २१॥

'योगेश्वरः' इति पूर्वश्लोकान्ते वदतो 'यत्र योगेश्वरः कृष्णः' इति संजयश्लोको बुद्धिस्थः। अत्रारम्भ एव कृष्णेनेति पठ्यते। गर्भात्; अत्र ल्यब्लोपे पञ्चमी विवक्षिता। गर्भमनुप्रविश्येत्यर्थः। गर्भादिति पदं मध्यमणिन्यायेनोभयत्रान्वेति। कृष्णेन रक्षितत्वात्तदत्तत्तत्संज्ञाद्विष्णुरात इति संज्ञा। गर्भे भगवद्दर्शनेन परीक्षेदिति संज्ञालाभः। 'पर्यैक्षत क इत्यसौ' 'स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः। गर्भे दृष्टमनुध्यायन् परीक्षेत नरेष्विह॥' परीक्षिदिति पप्रथे। 'रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना। तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः। भविष्यति न संदेहो महाभागवतो महान्॥' इति विष्णुरातसंज्ञा। गर्भादवतीर्णः। गर्भस्थभगवांस्तत अवतीर्णः, तेन सह शिशुरपि अवतीर्णः। भगवानिव भागवतोऽयमवतीर्णः। अवतीर्णः शुभे दिने। 'अथ सर्वगुणोपेतः कालः परमशोभनः' इति यथा भगवदवतारदिनं वर्णितम्, तथाऽस्य भागवतस्यावतारदिनमपि वर्णितम्—'ततः सर्वगुणोदर्के' इति। इदं सूच्यते—'अवतीर्णः शुभे दिने' इति॥ २१॥

तीर्थयात्रां समाप्याथ विदुरो गृहमागतः ।
ज्येष्ठस्योत्पाद्य वैराग्यं तेन साकमगाद्धरिम् ॥ २२ ॥

'विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् । ज्ञात्वाऽगाद्धास्तिनपुरं तथाऽवाप्तविविक्षितः ॥' 'आत्मनो गतिं श्रीहरिम्' इति श्रीधरव्याख्या । ज्येष्ठस्योत्पाद्य वैराग्यं; इदं दुःसाधसाधनम् । सनत्सुजातोपदेशेनाप्यस्य न तीव्रवैराग्यजनिरभवत् । ज्येष्ठस्य । अयं कनिष्ठभ्राता वर्णावरस्तस्य वैराग्योत्पादको गुरुरभूत् । आत्मनो गतिर्हरिः कृष्ण. इति मैत्रेयाज्ज्ञात्वा ज्येष्ठेन साकमात्मनो गतिं हरिमगात् । ज्येष्ठस्य वैराग्यमुत्पाद्य तेन सार्कं हरिं गन्तुं हास्तिनपुरगमनरूपं विलम्बमसहत । 'अगात्' इति भागवतश्लोकपदप्रयोगेण हास्तिनपुरगमनं ज्येष्ठभ्रात्रा सह हरिगमनायेति व्यज्यते । 'भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन्' इत्युक्तं स्मार्यते । 'एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितश्चाजमीढः' इत्युक्तमनुजोपदिष्टत्वं च स्मार्यते । 'ज्येष्ठपुत्राय मुण्डकमुपदिष्टं पित्रा । अत्र पितृसमो ज्येष्ठभ्राता विनीयतेऽनुजेन । प्रज्ञाचक्षुरयं ज्येष्ठोऽनुजभ्रातृसंदर्शिताध्वा अभवत् । चक्षुष्मता अन्धा इव नीयमानाः इत्युक्तमेतद्विषये सत्यम् । अनुजस्य कठवल्ल्युपदेष्टृयमावतारत्व ज्येष्ठं प्रत्युपदेशस्यौचित्योपपादकमिति व्यञ्जित सूतेन 'यावद्धार शूद्रत्वं शापाद्वर्षशतं यमः' इति । पुत्रशतनाशादपि तस्य न विरागः । 'भीमापवर्जितं पिण्डमादत्ते गृहपालवत्' इति विदुरोक्त्या तद्वैराग्योत्पादनम् । प्रेताय पिण्डं दीयेत दायादेन । जीवन्नेव शतपुत्रहन्तृभीमदत्तं पिण्डं प्रतिगृह्य जीवनमकरोदिति व्यञ्जितं सूतेन पिण्डशब्दप्रयोगेन । अगाद्धरिम् । मैत्रेयप्रोक्तमात्मनो गतिं हरिमगात् । 'अन्धश्च उपशान्तात्मा तत्रास्ते विगतैषणः । हरिभावनया ध्वस्तरजःसत्वतमोमलः । विज्ञानात्मनि संयोज्य क्षेत्रज्ञ प्रविलाप्य तम् । ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥' इति नारदवचनमिह भाव्यम् ॥ २२ ॥

अर्जुनाद्दुःखिताच्छ्रुत्वा कृष्णान्तर्धानमद्भुतम् ।
राज्येऽभिषिच्य पौत्रं स्वं पार्था जग्मुः परं पदम् ॥ २३ ॥

The Sri Sankara Jayanti celebrations commenced this year in this Gurukulam on Sunday the 27th of April and continued for five days. Every morning Mahanyasapurvaka Ekadasa Rudrajapams and Mahabhishekams were performed for the Utsava Image of Sri Sankara Bhagavatpadacharya. On the Jayanti day *i.e.*, on the 1st of May, the Abhishekams were performed for the Mula Murti also. The Mula Murti being of white marble, Abhishekams are performed only once in a year on the Jayanti day. Vedaparavanams, Paravanams of the Prasthanatrayabhashyas and of the other works of Sri Sankara and Sankaravijaya were all conducted during all the five days by specially nominated Brahmins. After the performance of Acharyasahasranama archana, and during the Naivedya offerings and Deeparadhanai, there was present a very large and enthusiastic crowd of bhaktas performing namasankeertanams and chanting various stotras. A very large number of devotees were fed sumptuously every day both in the noon and in the nights. In the evenings lectures by eminent Pandits and scholars were delivered to a large audience. On the 2nd day Vedanta sthapaka Polagam Brahmasri Ramasastrigal, Vedanta Professor of Sri Jagadguru Vidyasthanam of Jambukesvaram delivered a very fine lecture on *Isvarasvarupam*. The next day Brahmasri K. S. Venkatarama Sastrigal, the Librarian and Kavya Teacher of Sri Sankara Gurukulam gave an interesting lecture on Sri Sankara Bhagavatpada and Sri Sacchidananda Sivabhinava Nrisimha Bharati Svamigal. On Wednesday Brahmasri Gitopanyasachatura, Vedantasthapaka S. V. Subrahmanya Sastrigal, the Vedanta Teacher of the Pazhur Patasala delivered an inspiring address on *Gurubhakti* This was followed by another lecture by Brahmasri K. Panchapagesa Iyer M.A., L.T, Professor, Maharaja's College Pudukotah on *Sankarasadhanasopanam*. On the Jayanti day Brahmasri R Visvanatha Sastrigal of Kumbhakonam spoke on Acharyal's incarnation The next day Sahityacharya Sri Venkatesa Sastri B O. L. of Ariyalur explained portions of the Kathopanishad and he was followed the same evening by Sphutarjuna Sastri of Kalladakurichi who lectured on the Life and History of Sri Sankara.

१. विघ्नेशस्तोत्रम् ।

श्रीमत्सात्यवनेयगौतमसुतश्रीमत्कणादं
तत्संप्रार्थनयाऽधिकृत्य विशदन्यायागमांनिधिः ।
तस्मात्तत्प्रथने समाप्तिपथे [illegible]
स्तद्धस्तं वद के लिखेत्य [illegible] मुव्यहम् ॥

२. श्रीदक्षिणामूर्तिस्तोत्रम् ।

व्यावहारिककार्यजातमनुचिन्तयतां कृ-
त्संचिकीर्षुमसुं त्रिगोहितबद्धशीर्षविधारकृ ।
त्वत्पदाम्बुजभक्तिशून्यमतीव दुष्टमहेतिकं
शारदेऽव निसर्गसिद्धकृपाम्बुधे जगदम्बिके ॥

३. शंभो स्वानुभवैकवेद्यनम् ।

कामक्रोधमदाभिमानकुपथैः सदा दुर्गुणैः
संयुक्तोऽपि बहिस्तु सद्गुणगणैः संयुक्तवद्भाम्यहम् ।
एवं त्वन्यजनप्रतारणविधौ दक्षोऽपि सर्वज्ञ ते
मान्निध्ये कथमात्मनीनदुरघात्वर्थाय चोद्घाटये ॥ १ ॥

कुर्वे मंतुमहर्निशं भवति मे ह्रीस्तत्कथं वाचले
किं कुर्यां मम चित्तमद्य वशगं कामादरीणां सदा ।
तद्दूरीकरणं ममेप्सितमथापीशो न चाहं कृती
सर्वज्ञ. परिपूर्णशक्तिरसि तन्मच्चित्तदोषान्हर ॥ २ ॥

कायं वेदम्यतिहेयमस्ति तदपि ह्यात्मत्वबुद्धिर्दृढा
तस्मिन्मे जगदीश्वर क्षपयितुं तामीश्वरो नास्म्यहम् ।
प्रत्यक्षात्मधियं परोक्षविषया बुद्धिर्न वै बाधते
तस्मात्सच्चिदनन्तसौख्यविषयां प्रत्यक्षबुद्धिं दिश ॥ ३ ॥

प्रस्थानत्रयमीक्षितं च बहुधा दृष्टं महाभारतं
श्रीमद्रामकथा व्यलोकि पठिता गीताऽसकृत्सादरम् ।
श्रीमच्छंकरदेशिकेन्द्ररचितास्त्वन्ये प्रबन्धाः कृताः
कण्ठे यद्यपि नैव मे विगलिता देहे त्वहंतेश्वर ॥ ४ ॥

अङ्गीकृत्य यतित्वमीश परमोत्साहेन धर्मादिकं
ज्ञात्वा शिष्यजनोपदेशचतुरः कुर्वे ह्युपन्यासकान् ।
स्वानुष्ठानमनन्यमानसतया चैकाहमप्यञ्जसा
नैवाहं कृतवांस्तथाऽपि करुणावारांनिधे रक्ष माम् ॥ ५ ॥

---

४. स्वगुरुप्रार्थना ॥

आ कौमारात्समीपं तव बहुकृपयाऽऽनीय शब्दादरादी-
न्वेदं काव्यान्यजस्रं बहुसुलभतयाऽपाठयो नित्यमेव ।
गादाधर्यां सरण्यामतिकठिनतमायामपीमं जडाग्र्यं
हस्तालम्बेन चिन्तामणिसविधमिहानीनयः सद्गुरो माम् ॥ १ ॥

वेदाध्येतारमाराद्गरलपुरमहाक्षेत्र एनं सुशास्त्र-
प्रावीण्यापादनेच्छुस्त्वकृपणकरुणावारिधे त्वत्समीपम् ।
आनीयाश्वेव तर्केष्वतिकठिनमहाग्रन्थसंदोहमध्ये
सामान्यादिं निरुक्तिं परमसुलभयाऽपाठयस्त्वं सुरीत्या ॥ २ ॥

न्यायाध्येता क्षणानन्तरमिह न भवत्येवमाहुः पुराणाः
ज्ञाता तूत्सर्गतोऽस्य प्रवरकृतिषु यत्पादभक्तस्तवोर्व्याम ।

विद्यार्थी तर्कशास्त्रं त्वपटुरपि न वै विस्मरत्यंशतोऽपि
त्वत्पादाब्जद्वये मे प्रवितर सुदृढां भक्तिमस्मान्निमित्तात् ॥ ३ ॥

कारुण्यस्यैकपात्रं तव पदयुगलेऽत्यन्तभक्त्याऽन्वितं मां
वेदान्तन्यायशब्दादिषु कृतविषणेष्वग्रगण्यं बुधेषु ।
कृत्वा ग्रन्थाननेकानपि तनुमयेऽप्यप्रयत्नेन लीला-
न्यायेनाश्वेव कर्तुं त्वमिह पटुतरं देहि मामर्थ्यमस्य ॥ ४ ॥

त्वत्सान्निध्ये पुराऽहं बहुजनिषु कृतागण्यपुण्यैः सुखेन
स्वायुष्यस्याल्पभागं समनयमधुनाऽङ्गीकृता धूर्षया ते ।
त्वद्बन्धैवास्मि यद्यप्यमितकरुणया विश्वमंव्यापिना मे
चैतन्येनाऽऽविश त्वं हृदयसरसिजं दीनशिष्यस्य गुप्त्यै ॥ ५ ॥

---

५. पार्थप्रशस्तिः ॥

दैवीसंपच्युतायावनिभवतरते भारनिष्कासनाय
प्रोद्यत्सूर्यस्य भासा त्रिदशपतिसुरादींश्च विस्मापिताय ।
बाह्वोर्वीर्येण संतोषितपशुपतये व्यासवन्द्याय गीता-
दुग्धस्याऽद्याय भोक्त्रे तनुहृदयवचोभिश्च कुर्मो नमांसि ॥ १ ॥

मत्स्येशस्य पुरे समागतवतो भीष्मादिमुख्यानमौ
निर्जित्याच्छिनदम्बराणि समरे संशप्तकान्भूरिशः ।
एकस्त्वेव जघान पुत्रमरणादक्षौहिणीरष्ट वै
हत्वा सैन्धवमाजघान सुमहाविक्रान्त एषोऽर्जुनः ॥ २ ॥

शत्रुर्नश्यति पार्थसंस्मरणतस्तस्मादहं शत्रुभी
रागद्वेषमुखैः सदा परिवृतः कुर्वेऽनिशं तत्स्मृतिम् ।
संछेत्स्यत्यचिरात्स वृक्षनिचयान्नागादिसंज्ञान्मनो-
विन्ध्यारण्यविनिःसृतान्विशय एवास्मिन्न कार्यः खलु ॥ ३ ॥

धन्यः पार्थः खलु हि भगवान्यस्य सारथ्यमारा-
दूरीचक्रे परमपुरुषो विश्वजन्मादिहेतुः ।
अन्यच्चान्यत्किमपि सुहितं दुर्लभं चेतरेषां
चक्रे कृष्णो न खलु तदभूत्किं तु प्रसन्ने च तस्मिन् ॥ ४ ॥

दुर्दर्शानि दिवौकसां च भगवान्प्रीतः पुराऽदर्शय-
त्पार्थायामिततेजसे बहुविधान्यात्मस्वरूपाणि वै ।
वेदैर्यज्ञचयैस्तपोभिरपि वा दानेन सत्कर्मणा
दृश्यान्याह न हीति तावकि किमहं द्रष्टास्मि कृष्णाश्रयात् ॥ ५ ॥

॥ द्वादशादित्यस्तोत्रम् ॥

संपादकः— शिवगङ्गै सुन्दरश्रौती ।

मौनिस्वान्ताब्जभानुः परमविदयनं विघ्नशैलौघभेद-
क्रीडादम्भोलिधुर्यस्वचरणयुगलो दन्तिवक्त्रो गणेशः ।
पाशं हस्तैश्चतुर्भिः स्फटिकमणिधरो संदधानोऽष्टमूर्तेः
पाकोऽस्माकं हृदब्जे निवसतु सततं विघ्नराडेकदन्तः ॥

सूर्योऽस्माकं हृदब्जे विलसतु नितरां सूर्यनारायणोऽसौ
छायादेव्या समेतः सकलबुधजनैः सेव्यमानः प्रभाते ।
लोकानन्दं वितन्वन्परसिजनिलयानाथवासास्पदं यो
भक्तानां शोकमोहव्यसनहरः सप्तसप्तिर्बुधेशः ॥ १ ॥

पायान्मामेकचक्रे हरितहयवरैः कल्पितैर्भोगिराज्ञि-
स्यूतास्यैः प्रोह्यमाने ह्यरुणकरकशाप्रेरितैः स्यन्दनेऽन्तः ।

रक्ताब्जस्थश्चतुर्दोर्धृतकमलयुगाभीतिमुद्रावराङ्कः
संचिन्त्यो मण्डलान्तर्द्युतकनकनिभः कालचक्रप्रणेता ॥ २ ॥

मित्रं विश्वस्य मित्रं प्रणमदभयदं प्राणिनां प्राणभूतं
रक्ताम्भोजासनस्थं कमलयुगधरं स्वर्णवर्णं सुरेशम् ।
तेजोवृन्दं दिनेशं दुरितशमकरं सच्चिदानन्दकन्दं
देवं नित्यं प्रपद्येऽभयवरदकरं सर्वहृत्तापशान्त्यै ॥ ३ ॥

देवं देदीप्यमानं रविमखिलगुरुं सर्वलोकप्रदीपं
संतापघ्नं नतानां तिमिरकुलमहादन्तिसंहारसिंहम् ।
ब्रह्मानन्दैकसिन्धुं सुरनरखगगोप्राणिरूपं परेशं
वन्दे कारुण्यराशिं विमलतरमहाज्ञानसिद्ध्यै सदाऽहम् ॥

सूर्यं सूर्यालिहृद्यं निरतिशयमहादिव्यतेजोज्वलन्तं
तत्त्वातीतं तुरीयं प्रणवमुखमहामन्त्रयन्त्रस्वरूपम् ।
कालातीतं स्वमात्रं कमलभवमुखैः सेन्द्रदेवैः सदेड्यं
भक्तानां सर्वकालं शरणदचरणद्वन्द्वमीडे विमुक्त्यै ॥ ५ ॥

भानुं भानुप्रभिन्नाखिलहिमनिवहं स्वात्ममात्रे रमन्तं
देवानामादिदेवं चिदमृतजलधिं निस्तरङ्गं सुपूर्णम् ।
लोकानामादिहेतुं जनिलयरहितं भक्तरक्षाधुरीणं
सर्वज्ञं सर्वशक्तिं विभुमहमनिशं भावये मोहशान्त्यै ॥ ६ ॥

प्रातर्गन्तव्यमृक्षो यजुषि दिवसतो मध्यतस्तस्थिवांसं
सायाह्ने सामतोऽसुं खगपतिमहितं वेदवेदान्तवेद्यम् ।

सेवे तेताग्निरूपं त्रिदशपरिषदां हव्यदं भूर्भुवःस्व-
लोकानां स्वात्मभूतं श्रुतिषु समुदितं ज्ञानहेतोः पवित्रम् ॥
वृष्टिं सृष्ट्वा स्वकीयैर्झटिति बहुतरं घृष्टिभिर्विष्टपाना-
मन्नं प्राणं बलं यत्तप इति च सुविज्ञाननः स्वात्मसौख्यम् ।
पुष्णन्तं लोकबन्धुं मनसि सुकलये पूषणं भूषणं स्वः
पद्मान्युद्बोधयन्तं मुनिहृदयगृहं स्वात्मसौख्यानुभूत्यै ॥ ८ ॥

भूतानामग्रजातं सुरवरमभयं स्वर्णगर्भं सुसूक्ष्मं
सूत्रात्मानं प्रपञ्चे पयसि घृतमिव व्याप्तमन्तर्बहिश्च ।
एकं नित्यं विशुद्धं विमलतरमहाज्ञानगम्यं मुनीन्द्रै-
र्विश्वाधिष्ठानभूतं हृदयसरसिजे चिन्तये चित्प्रसूत्यै ॥ ९ ॥

बुद्धं मुक्तं मरीचिं बहिरिव भजतामान्तराण्यब्जबृन्दा-
न्यातन्वानं विबुद्धान्यघहरणचणैरिच्छान्दसैरुस्रबृन्दैः ।
तेजोबिम्बान्तरस्थं पुरुषमतिदयापूर्णकर्णान्तनेत्रं
ध्यायाम्यस्यांघ्रिभक्त्यै सततममृतदं दिव्यकल्याणमूर्तिम् ॥

सावित्राष्टार्णमन्त्रप्रकटितविभवं ह्यादिजं विश्वसृष्टे-
रादित्यं रश्मिमालाकवचितवपुषं योगियोगैकलभ्यम् ।
आधिव्याधिप्रणुन्नाखिलजनभिषजं सर्वलोकैकचक्षुः
संज्ञाच्छायाप्रियाभ्यामनिशमनुसृतं संश्रये रुक्प्रशान्त्यै ॥

देवो यः प्रेरयेन्नः सततमिह धियो मौनिहृद्ध्येयभूमा
वेदान्तानां सुसारं सवितुरनुपमं तस्य देवस्य यद्वै ।

कल्याणानां निदानं सुमहति महसां मण्डले संनिषण्णं
ध्यायेमह्यात्मविद्याविवरणविधये चिन्महस्तद्वरेण्यम् ॥ १२ ॥

अर्कं हित्वाऽन्यतर्कं स्वमनसि विबुधैश्चिन्त्यमानस्वरूपं
सत्राजिन्नामभाजे स्वचरणयुगलध्यानशीलाय राज्ञे ।
योऽष्टौ भारान्वमन्तं मणिवरमदिशद्धर्मणां स्वात्मभासां
धत्ते धत्ते महान्तं पुरुषसमुचितान्प्राप्तुमर्थान्भजेऽहम् ॥

स्तोष्येऽहं भास्कराख्यं विमलतरमहासंविदेकायनं य-
श्चाक्षुष्मत्या प्रतुष्टो निजपदमदिशत्सांकृतेर्विद्ययर्षेः ।
देवं तं विप्रमुख्यास्त्रिषवणमुदकैर्वैधमर्घं क्षिपन्तो
ध्यायन्तः प्राप्तभद्रा विमलधिषणया स्युः स्वरूपोपलब्ध्ये ॥

इति द्वादशादित्यस्तोत्रं संपूर्णम् ॥

॥ श्रीरुक्मिणीपरिणयः ॥

शालिवाटीपुरम्. पि एस्. सुब्रह्मण्यार्येण एम्. ए., बि. एल्. बिरुदाङ्कितेन विरचितः ॥

(पूर्वतोऽनुवृत्तः)

॥ चतुर्थः सर्गः ॥

पतत्पतङ्गप्रतिमः पयोनिधे-
रथावतीर्याम्बरतस्तटस्थलीम् ।
मुदाभियास्यन्निलयं मुरद्विषो
विवेश वीथीमिति तर्कयन् द्विजः ॥१॥

अहो कियद्भाग्यमभून्मयार्जितं
स्थिते यदूचे विनतासुतेऽपि माम् ।
कटाक्षपातैः कमलायतेक्षणो
व्रज प्रियां मे सुखयेति भाषितैः ॥ २ ॥

विहाय दारांस्तनुजान् गृहानहं
यदब्जनाभस्य भजन्पदाम्बुजम् ।
इहैव वृत्तिं किल पर्यवर्तयं
फलोदयः साम्प्रतमस्य दृश्यते ॥ ३ ॥

प्रियावचःपानमुदा विकासितं
स्मितानुलिप्तालकमाननं हरेः ।
निषेव्य सद्यस्त्रुटिताशुभाङ्कुर-
श्चिरेण भूयासमुदीर्णमङ्गलः ॥ ४ ॥

तदभ्यशिल्पं सदनं महाधनं
निशाम्य शौरेर्मनसा प्रणम्य च ।
निरङ्कुशानन्दभृतान्तरात्मना
बभूव निश्चेष्ट इव क्षणं द्विजः ॥ ५ ॥

स सर्वगोप्तारमुदारवीक्षणं
प्रवालरक्ताधरशोभिताननम् ।
निकामपीनायतबाहुबन्धुरं
विशालवक्षःस्थलबद्धकौस्तुभम् ॥ ६ ॥

प्रफुल्लनीलोत्पलराजिसच्छवि
दरोदिताकांशुपिशङ्गवाससम् ।
महार्हदिव्याभरणप्रभाङ्कुरै-
र्निवासवेश्म ज्वलयन्तमुच्चकैः ॥ ७ ॥

मनोभिरुच्चैरपि योगशालिना-
मगम्यरूपं पुरुषं पुरातनम् ।
अवारितोऽभ्यन्तरकक्ष्यमीयिवान्
रहः समासीनमुदैक्षताच्युतम् ॥ ८ ॥

तमप्रजन्मानमवेक्ष्य पादयो-
र्जगत्प्रणम्यः प्रणिपत्य केशवः ।
अपि त्वयाऽऽश्वासपदं प्रलम्भिना
किमप्युवाचेति तमन्वभाषत ॥ ९ ॥

अथ स सलिलजायतेक्षणं
जलधरकान्तिमुपेत्य माधवम् ।
मृगशिशुनयनामुखोद्गतां
वचनसुधां तमपाययद्द्विजः ॥ १० ॥

पृथिवीसुरस्य वचनं निशम्य स
मुदितो बभूव सदने यदूद्वहः ।
चलनं विभेत्तुमथ रुक्मिणोऽचिरा-
द्रथमारुरोह सह तेन सायुधः ॥ ११ ॥

इति श्रीरुक्मिणीपरिणये चतुर्थः सर्गः ॥

॥ पञ्चमः सर्गः ॥

रुक्मिणीं स दमघोषसूनवे
दातुमेव हृदयेन निश्चितः ।
कुण्डिनेशतनुजः समादिश-
न्मङ्गलाय पुरमार्गसंस्क्रियाम् ॥ १ ॥

भीष्मकेन शप एव काङ्क्षितो
नात्यलङ्कि मतमात्मजन्मनः ।
दुर्जनस्य चरितं महात्मभि-
र्दूष्यते न हि न वाऽनुमन्यते ॥ २ ॥

उत्पलग्रथिततोरणाङ्कया
बद्धकेतुविनिवर्तितोष्णया ।
पौरवर्गकृतपुष्पमोक्षया
पुष्यते स्म सुषमा ततः पुरा ॥ ३ ॥

चेदिपेन कृतकौतुकेन तां
सर्वतः कलयतेव रुक्मिणीम् ।
किं विलम्बितमिहेति जल्पता
स्थीयते स्म न चिरं न चास्यते ॥ ४ ॥

तं विवाहकृतयत्नमात्मनो
वीक्ष्य वीक्ष्य भयभारविह्वला ।
व्याधशङ्कचकिता मृगीव सा
प्रत्यपद्यत न किंचिदङ्गना ॥ ५ ॥

आदरात्स्वयमिहैत्य माधवं
साभिलाषमभिवर्ण्य मे द्विजः ।
यो गतः स च पुनर्न दृश्यते
स्वप्नभूतमथवा भवेदिदम् ॥ ६ ॥

किं नु वा स कमलायतेक्षणो
वीक्ष्य दोषमविनीतया मया ।
ईरिते वचसि वाग्मिनां वरो
मामनादरपदं व्यचिन्तयत् ॥ ७ ॥

शैलराजतनयाप्रसादतः
स्यन्दनेन पथि वा स वर्तते ।
सा विकल्पशतमित्थमीयुषी
रुक्मिणी कथमहो व्यवर्तत ॥ ८ ॥

शुश्रुवे बधिरयन्नथाम्बरं
काश्चिदत्र रथनेमिनिस्वनः ।

यं निशम्य च भटा रणोद्भटा
जानुभिर्धनुषि सज्जमतीं प्रपेदिरे ॥ ९ ॥

पाटयन्तमिव चेदिभूपते-
स्तं मनोरथतरुं नृपावलिः ।
चक्रघोषमशनेरिवोदित
प्रत्यनालयदुदीर्णसंभ्रमा ॥ १० ॥

दारुकेण नियतः खगध्वजो
लोकनाथभुजवीर्यरक्षितः ।
शैव्यसुग्र्यचतुरश्वयन्त्रितः
प्रत्यपद्यत ततो महान् रथः ॥ ११ ॥

आगते नगरमम्बुजेक्षणे
नाभ्यभासत मुखं क्षमाभुजाम् ।
यावदेति गगनं न भानुमां-
स्तावदेव कुमुदैर्विकस्यते ॥ १२ ॥

तं निपीय जलदोपमद्युतिं
निर्निमेषमविनृप्तचक्षुषा ।
विस्मृतान्यकरणप्रवृत्तय-
श्चित्रिता इव बभुः पुराङ्गनाः ॥ १३ ॥

हन्त माधवमिमं च सुन्दरीं
रुक्मिणीं च कृतपाणिपीडनौ ।
द्रष्टुमेव नयनं हि नः कृतं
कोऽयमेष शिशुपालदुर्मगः ॥ १४ ॥

रुक्मिणं च सृजता स्वयंभुवा
स्वोद्यमो विफलतामनीयत ।
द्वेष्टि यः कमललोललोचनं
साध्यते किमिव तेन जन्मिना ॥ १५ ॥

एवमुक्तिविशदं मुखाम्बुजं
योषितां सहरथो विकासयन् ।
आससाद भवनं महाभुजो
भीष्मकस्य गगनं यथांशुमान् ॥ १६ ॥

आगतं तमरविन्दलोचनं
वीक्ष्य वृद्धनृपतिः स पिप्रिये ।
पूर्णचन्द्रमसमम्बरोदितं
किं निशाम्य नयनं निमील्यते ॥ १७ ॥

स्वागतेन नरराजपुङ्गवः
सोऽभिनन्द्य मघवेव माधवम् ।
प्रादिशत्प्रणयतः समृद्धिम-
द्वेश्म तस्य हृतनन्दनद्युति ॥ १८ ॥

केशवस्तदनु रुक्मिणीं प्रति
ब्राह्मणं व्यसृजदागतं पुनः ।
न ह्युपेक्षितुमलं कृतात्मभि-
स्तादृशैर्व्यसनमाप्तचेतसाम् ॥ १९ ॥

अश्रुभिः शुभकपोलसर्पिभिः
पत्रलेखविधुरीकृताननां ।
आयतश्वसितकम्पिताधरां
मां द्विजेन समलक्षि रुक्मिणी ॥ २० ॥

तं प्रसन्नवदनं निरीक्ष्य सा
मन्यते स्म रमणं समागतम् ।
पर्यपृच्छयत तथापि स द्विजः
कातरं हि हृदयं शुभे नृणाम् ॥ २१ ॥

आगतः प्रियतमोऽद्य रुक्मिणि
द्वारकां च भवतीं निनीषति ।
वर्धसे जहिहि शोकमीदृशं
स्वस्ति तेऽस्तु नतगात्रि गम्यते ॥ २२ ॥

एवमुक्तवति सौम्यदर्शने
भूसुरे वचनमुत्पलेक्षणा ।
यं विकासमियमभ्युपेयुषी
कोऽस्य साम्यमधिरोढुमर्हति ॥ २३ ॥

एतदर्हमपि किं मया धृतं
दातुमित्यथ विचिन्त्य मा बहु ।
अन्वमंस्त सदृशीं प्रतिक्रियां
पादयोः स्वयमुपेत्य वन्दनम् ॥ २४ ॥

स द्विजः कृतनतिः स्वयं श्रिया
प्राप्तसर्वफललाभमङ्गलः ।
आशिषा पुनरिमां च वर्धय-
न्नग्निमानथ कृती यथागतम् ॥ २५ ॥

आगृहीतबलिपुष्पपाणिभि-
र्बालवीरुदिव पादचारिणी ।
अम्बिकायतनमाययौ शनैः
सा सखीभिरथ भीष्मकात्मजा ॥ २६ ॥

तत्र सर्वजगतामधीश्वरी-
मीश्वरस्य तनुभागभाजनम् ।
पादयोः शशिकलाप्रबोधयो-
रभ्यवन्दत शिवां शिवाय सा ॥ २७ ॥

याचते स्म पतिमम्बुजेक्षणं
सर्वलोकजननीं जनप्रिया ।
तच्च दत्तमिति कर्णगोचरं
सव्यनेत्रचलितेन शंसितम् ॥ २८ ॥

शैलराजतनयालयात्ततो
लज्जयेव मिलिता सखीजनैः ।
अन्वपद्यत महीं महीश्वर-
रावृतां विवृतहेतिपाणिभिः ॥ २९ ॥

मागधो गुरुगदां विलोडयन्
कालवायुरिव धूतभूधरः ।
गर्जति स्म शिशुपालभूभुजः
पक्षपात इव मूर्तिमंचरः ॥ ३० ॥

बद्धशङ्खरथनेमिपाणिना
पौण्ड्रकः कृतविडम्बनो हरेः ।
भ्रामयन्नसिमसौ स्म लक्ष्यते
स द्विजिह्व इव पन्नगाशनः ॥ ३१ ॥

मायया ऽभरितशम्बरद्युतिः
साल्वभूमिपतिरत्र राजिवान् ।
चापदण्डगुणकर्मनिस्वनै-
रद्रिरन्निव मुरारिविप्रियम् ॥ ३२ ॥

क्षमादिभिरुदारविक्रमै-
रावृते पुरुषथे महारथैः ।
व्रीडिता श्रुतिपुटान्तसर्पिभि-
र्वीक्षणैः कमपि मृग्यति स्म सा ॥३३॥

मत्तहंसगमनां नितम्बिनीं
सुप्तनप्रसृतचारुवाससम् ।
मोहिनीमिव सुरेन्द्रविद्विष-
स्तां निरीक्ष्य मुमुहुः क्षमाभुजः ॥३४॥

के मुहूर्तमिव दुर्धचेतना
बोधिताः सपदि शङ्खनिस्वनैः ।
स्यन्दने पतगराजलाञ्छने
रुक्मिणीं दहशुरच्युतेन ताम् ॥ ३५ ॥

हन्त धावसि हृतः पतिष्यसी-
त्येवमुक्तवति भूपमण्डले ।
अङ्किताः कमलनाभनामभिः
पेतुरत्र विशिखाः सहस्रशः ॥ ३६ ॥

वातवेगमिव जीर्णभूरुहः
कालवेगमिव दीनजन्तवः ।
सेहिरे न मगधाधिपादयः
शार्ङ्गवेगमसुरेन्द्रविद्विषः ॥ ३७ ॥

विक्रमेण विमुखीकृता हरे-
र्दुःसहेन धरणीन्द्रकुञ्जराः ।
वाग्भिरेव दमघोषनन्दनं
विव्रिताश्रममुमभ्यभान्त्सयन् ॥ ३८ ॥

केशवेन सुहृदः पराजिता-
नाहृतां च भगिनीं निशम्य सः ।
रोषविस्फुरिताम्रलोचनः
प्रत्यदृश्यत रथी नृपात्मजः ॥ ३९ ॥

आगतस्य बहु जल्पतः शनै-
र्जग्मिवान् रथहयान् बलानुजः ।
तं विरूपितशिखं च रुक्मिण
रुक्मिणीहितमिति व्यसर्जयत् ॥ ४० ॥

एवमेकरथ एव माधवो
न्यस्य पादमरियूथमूर्धनि ।
तां सुधामिव वहन् नृपात्मजां
द्वारकानगरतोरणं ययौ ॥ ४१ ॥

बं बलो बलिनमागतं रथी
श्रत्युदित्य भुजवीर्यविस्मितः ।
मा स्म साहसमिदं पुनः कृथा
इत्युवाच वचनं प्रियानुजः ॥ ४२ ॥

स प्रियस्तदनु बान्धवप्रियो
मातरं च पितरं ननाम सः ।
हर्षजैर्नयनवारिसिक्तयोः
शीतलैः क्षमितमार्गजक्लमः ॥ ४३ ॥

तां शचीमिव पुरा पुरन्दरो
बाहुवीर्यविजितां नृपात्मजाम् ।
रुक्मिणीमुदवहद्यदूद्वहः
प्रोद्वहन् नगरवासिनां मुदम् ॥ ४४ ॥

इति रुक्मिणीं मुदितापरः स्तुतिगीतिकाकृतमङ्ग-
[लो

विजयार्जितां यदुनन्दनः परिणीय तां
[पतिदेवताम् ।

जगतां हिते विहितादरः परिपालयन् जगती-
[मिमां

सदयं चिरं स महाभुजः शुभकेलिभिर्बुभुजे
[श्रियम् ॥ ४५ ॥

इति श्रीरुक्मिणीपरिणये पञ्चमः सर्गः ।
संपूर्णं चेदं काव्यम् ॥

॥ श्रीमदाचार्येन्द्रमहिमानुवर्णनम् ॥

[श्रीमदाचार्येन्द्राणां जयन्ती आराधनामहोत्सवावसरे श्रीसच्चिदानन्दतीर्थस्वामिभिः
प्रेषितोऽयं लेखः श्रीवेङ्कटरामशास्त्रिभिः सदसि पठित्वा तदर्थोऽपि विवृतः ।

यदि नः स्यात्पुनर्जन्म तदाऽऽचार्येन्द्रसन्निधौ ।
तद्दर्शनतदालापतत्सेवारसदं भवेत् ॥

अयि सद्गुरुसेवासमादरसफलीकृतपुण्यजन्मानः अग्रजन्मानः ! समालोचयन्तु नाम भवन्तः, कथं वाऽस्माकं जन्मसाफल्यं स्यादिति । तत्र चतुर्विधपुरुषार्थानां मूर्धन्यभूतेन तुरीयपुरुषार्थेनैव सर्वात्मना मानवजन्मनः साफल्य सिद्धेरिति सुनिश्चित एवायमर्थो विपश्चिन्मणिभिरेकस्वरेण । अतस्तत्प्राप्तिसाधनं किं ? इत्येव विचारणीयमापतति ॥

तत्र च 'ज्ञानादेव तु कैवल्यम्' 'नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुतिशतप्रथितं ज्ञानमेव परमं साधनमित्यत्रापि न कस्याप्यस्ति विसंवादः । ज्ञानसाधनानि पुनर्भूयांस्येव समधिगम्यन्ते साक्षात्परंपरासाधारण्येन । तन्मध्ये गुरुभक्तिरेव सर्वसाधना-

पेक्षया प्रधानभूतेति श्रुतिरेव भगवतो समर्थयति—'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥' इति॥

गुरूणां मध्येऽपि परमेश्वरावतारभूता महापुरुषा एव निश्रेयसलाभाय समाश्रयणीयाः। पर तु तादृशमहापुरुषा एव लोके दुर्लभतराः। तादृशानामाचार्याणां मध्ये तु मूलावतारभूताः श्रीमच्छंकरभगवत्पादा एव प्राधान्येन गणनामर्हन्ति। ततः परं तु तदीयांशावतारभूताः विद्यारण्यचरणाः शृङ्गगिरिपीठालंकारभूताः श्रीमदाचार्येन्द्राश्च तादृशमहापुरुषगोष्ठ्यां विशेषतः परिगणनीयाः सन्तीति सर्वेऽपि सूरयः समस्वरमेव समुद्घोषयन्ति। तत्रापि नास्तिकजनबहुलेऽस्मिन्काले स्वयमवतीर्णानां स्वामिवर्याणां महिमातिशयं केन वाक्येन कया भाषया कथं वा वर्णयामः। एतादृशमहापुरुषाणां समाश्रयणे सति मर्त्य एव जन्मसाफल्यं संभवति। अतस्तादृशानामेषां सेवावसर एव सर्वैरस्माभिः प्रार्थनीयः। यद्यपि पुनर्जन्माभावरूपमोक्ष एव सर्वाभिलाषगोचरो भवितुमर्हति, तथापि कुतश्चित्प्रतिबन्धात्तदसंभवश्चेत्तदा सौलभ्येन जन्मसाफल्यसंपादकानां श्रीमदाचार्येन्द्राणामवतारावसरे तत्संनिधान एव पुनर्जन्मलाभो भूयादित्येव वयमाशंसामहे। न हि कामधेनौ संनिहितायां करभानुसरणं युक्तरूप स्यात्॥

ननु श्रीमदाचार्येन्द्राः शिवसायुज्यमधिगता एव। कुतस्तेषामधुना समाश्रयणं? इति चेत्, भ्रान्तोऽसि। त एव खलु श्रीरंगे श्रीशंकरगुरुकुले अमृताभिलाषप्रतिमायां संनिधाय भक्तजनाननुगृह्णन्ति। अतस्तदवतारदेशकालादीनां मुख्यानामलाभेऽपि तत्संनिध्यसमुद्भासितायां प्रतिमायामपि तदाश्रयणसंभवात्तत्सेवावसरः सर्वेषां सुकर एव। यदि साक्षादेव तेषां समाश्रयणमपेक्षितं स्यात्तर्हि प्रतीक्षध्वं कंचन कालम्। पुनश्च त एव नूनमवतरिष्यन्ति। तादृशकालप्रतीक्षणेन तत्संनिधौ जन्मलाभो वा सर्वैरभ्यर्थनीयः। तत्सहवासभागधेयं तु महदेव जन्मसाफल्यं वः प्रापयिष्यति; यतः तद्दर्शनं वा तैः सह समालापो वा तत्संसेवनं वा इहैव नः परमं सुखमुपजनयिष्यति॥

श्रीमदाचार्येन्द्राणामाराधनपुण्यादेनेऽस्मिन् समवेतैः सर्वैरपीदमेवाभ्यर्थनीयम्, यत् पुनर्जन्मैव नो मा भूत्, यदि पुनर्जन्म स्यात् तर्हि श्रीमदाचार्येन्द्रचरणसेवायोग्यमेव विशिष्टं जन्म भूयादिति। यतस्तादृशं संदर्भमवाप्य श्रीकृष्णसंनिधौ गोपालबाला इव तत्सहवासप्रभूतं वाचामगोचरमहिमानमपगतसीमानं आनन्दभूमानमनुभवेम॥

॥ विवाहायननिर्णायकः ॥

नल्लूरग्रामाभिजनेन कल्याणसुन्दरशास्त्रिणा विरचितः ॥



सुन्दराचलमध्यस्थं नत्वा तं गणनायकम् ।
नत्वा तत्सुन्दरपुरं नत्वा तं सप्तसागरम् ॥
कल्याणसुन्दरं नत्वा नत्वा तां गिरिसुन्दरीम् ।
कल्याणसुन्दराख्येन ग्रन्थोऽयं लिख्यते मया ॥

विवाहकालस्तावद्बहुषु गृह्येषु उदगयनमात्रं निर्दिष्टम् । यथा बोधायनगृह्ये 'विवाहं व्याख्यास्यामः उदगयन आपूर्यमाणपक्षे' । आश्वलायनगृह्ये— 'उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनविवाहाः' इत्यादि । केषुचन गृह्येषु उदगयनदक्षिणायने उभे अपि विवाहस्य कालत्वेन निर्दिष्टे । यथा भारद्वाजगृह्ये— 'उदगयन उपगृह्णीत उदगयनं देवानामिति दैवं पुनरिदं कर्म । दक्षिणायन इत्यपरं विज्ञायते दक्षिणायनं पितृणामिति । पितृसंयुक्तं पुनरिदं कर्म' इत्या-

---

[विवाहायननिर्णायकोऽयं लघुग्रन्थः आपस्तम्बीयगृह्यप्रयोगसार— आपस्तम्बीयपितृमेधसारादिग्रन्थप्रणेतृभिः नल्लूरग्रामाभिजनैः ब्रह्मश्रीकल्याणसुन्दरशास्त्रिभिर्विरचितः । यद्यपि बहुप्रमाणवशेन शिष्टाचारानुरोधेन च उत्तरायणरूपविवाहकालस्य सिद्धत्वेन तत्र विवादस्यावकाश एव नास्ति, तथापि केचन पण्डिताः आपस्तम्बीयगृह्यसूत्रव्याख्यानं तात्पर्यदर्शनमापाततो दृष्ट्वा दक्षिणायनमपि आचार्याणां संमतं इति निश्चित्य तत्रापि विवाहं कुर्वन्ति कारयन्ति च । तत्र पूर्वापरग्रन्थसंदर्भपरामर्शेन स्मृतिमुक्ताफलवाक्यप्रमाणेन तात्पर्यदर्शनस्य यथावदर्थवर्णनेन तदाशयप्रकटनेन च तेषां व्यामोहनिराकरणायैवायं संक्षिप्तो ग्रन्थो विरच्यते । श्रीकाञ्चीकामकोटिपीठाधिपतयः श्रीजगद्गुरु शंकराचार्यवर्याः उत्तमदानपुरविजयकाले इमं ग्रन्थमामूलाग्रं श्रुत्वा महाजनमध्ये अनुमोदनपुरःसरं परमानुग्रहमकार्षुः । तथैव आर्यधर्मपत्रिकाद्वारा शिष्याणां सर्वेषामपि आज्ञा दत्ता 'एकदिनविवाहः दक्षिणायनविवाहश्च कदापि न कर्तव्यः' इति । अतः सर्वेपि आस्तिकवर्याः शिष्टाचारानुछ्लङ्घनेन उत्तरायण एव विवाहं कृत्वा क्षेमवन्तो भवेयुः । अयं च ग्रन्थः रजःप्रादुर्भावपूर्वकालविवाहविषयकः ।]

दिना। अपरेषु माघं फाल्गुनमाषाढ च वर्जयित्वा नव मासाः विवाहस्य कालत्वेन निर्दिष्टाः। यथा आपस्तम्बगृह्ये— 'सर्वऋतवो विवाहस्य शैशिरौ मासौ परिहाप्य उत्तम च नैदाघम्' इति ॥

एवं विवाहस्य काले बहुधा निर्दिष्टे सति भारद्वाजीयापस्तम्बिप्रभृतयः केचन स्वस्वगृह्यमात्रकोविदाः स्वस्वगृह्याणि तद्भाष्याणि च आपाततः स्वयमेव दृष्ट्वा अयनद्वयमपि विवाहस्य काल इति स्वयं बुध्वा तत्प्रदर्शनेनान्यानपि प्रबोध्य तान् पूर्वकालपण्डितैरप्याचर्यमाणादाचाराल्लक्षयित्वा अयनद्वयेऽपि विवाहं कारयन्ते। यद्यपि तेषामिदमयनद्वयेपि विवाहकरणबोधनं स्वस्वसूत्रे विशेषविधानबलाद्युक्तमिव प्रतिभाति, तथापि आपस्तम्बगृह्यव्याख्यानभूततात्पर्यदर्शनस्य आमूलाग्रं सम्यक् परामर्शे कृते 'उत्तरायणमेव विवाहस्य कालः' इत्यत्रैव तस्य संमतिः सम्यक् परिज्ञायते। अभिव्यञ्जयति चैतमर्थम्। तथा हि— सुदर्शनाचार्यैस्तावत् स्वव्याख्यारचनापूर्वकालिकैः बहुगृह्यवेदितृभिः भारद्वाजीयापस्तम्बिप्रभृतिभिरपि विद्वद्भिः शिष्टैः 'दक्षिणायन इत्यपरं' 'सर्वऋतवो विवाहस्य' इत्यादिस्वस्वसूत्रोक्तं विवाहकालं परित्यज्य आचार्यवर्यमहर्षिवर्यबोधायनाद्युक्तं उत्तरायणमेव विवाहस्य कालत्वेन आहृतमितीममभिप्रायमिदानींतनानामपि विदुषां प्रकाशीकर्तुमेव तस्मिन्नुदगयनसूत्रव्याख्यानान्ते 'निर्णये तु शिष्टाः प्रमाणं सर्वत्र' इत्युक्तम्। अत एवेदानीमपि प्रायेण शिष्टाः सर्वेऽपि उत्तरायण एव विवाहमाचरन्ति। एतद्विरोधेन ये तावदिदानीं अयनद्वयमपि विवाहस्य काल इति बोधयन्ति तेषां वचनं पूर्वोदाहृतव्याख्यानस्य पूर्वैराहृतस्य आचारस्य च विरोधादुपेक्ष्यमेव। यदपि कैश्चिदुच्यते— दक्षिणायने विवाहो न कर्तव्यः इति ये वदन्ति, ते 'सर्वऋतवो विवाहस्य' इति सूत्रार्थं सम्यगनालोचितवन्तः इति, तत्र त एव तत्सूत्रार्थं उदगयनसूत्रार्थं च न दृष्टवन्तः। यदि पूर्वोक्तप्रकारेण दृष्टवन्तः स्युः, तर्हि उत्तरायणमेव विवाहस्य काल इति निश्चित्य अयनद्वयेऽपि विवाहकरणबोधने न प्रवर्तेरन् ॥

ननु उदगयनसूत्रव्याख्याने 'एवं उदगयनादीनां विधाने सत्यपि क्वचिदनियमः प्रतिभासते, सर्वऋतवो विवाहस्येति वचनात्। यदा दक्षिणायनेऽपि विवाहः स्यात्तदा समावर्तनं तत्कालसमीपकाल एव' इति वचनं दृश्यते। तेन हि दक्षिणायनमपि विवाहस्य कालः इति सुदर्शनाचार्याणामाशये सम्यक् प्रतीयमाने सति उदगयनमेव तेषामभिमतमिति कथं वक्तुं शक्यमिति चेत्— उच्यते। इदं तावद्व्याख्यानं न विवाहकालबोधकं; किं तु समावर्तनकालबोधकम्। यदि दक्षिणायनमपि आचार्याणामभिमतं स्यात्, तदा विवाहविधायके 'सर्वऋतवो विवाहस्य' इति वक्ष्यमाणे सूत्रे एव विवाहकालविचारः करणीयः। तत्राविचार्य अप्रकृते उदगयनसूत्रे विवाहकालस्य विचारितत्वात्। तथैव उदगयनसूत्रव्याख्याने 'उदगयनादीनां विधाने सति' इत्यत्र विधानशब्देन पूर्वेषां स्वस्य चाभिमतं उत्तरायणं स्फुटमुद्घोष्य 'क्वचिदनियमः प्रतिभासते सर्वऋतवो विवाहस्येति वचनात्' इत्यत्र क्वचिच्छब्देन प्रतिभासते इत्युक्त्या च उत्तरायणस्य नियमा-

भावो न विद्यते, किं तु आभासः प्रतिभानमात्रमिति च विज्ञाप्य 'यदा दक्षिणायनेऽपि विवाहः स्यात्तदा' इत्यत्र यदाशब्दापिशब्दतदाशब्दनिर्देशेन 'सर्वऋतवो विवाहस्य' इति सूत्रस्थऋतुशब्दं विहाय दक्षिणायनशब्दनिर्देशेन च पूर्वेषां स्वस्य चानभिमत दक्षिणायनमनूद्य, तत्रैव विवाहकाल-समीपकाल एव समावर्तनं कर्तव्यमिति समावर्तनकालमेव तत्र बोधयति। तत्रैव चान्ते 'निर्णये तु शिष्टाः प्रमाणं सर्वत्र' इत्युक्त्वा हि तेषामुदगयनमेवाभिमतमिति स्पष्टमेव परिज्ञायते। यदि दक्षिणायनमपि तेषामभिमत स्यात् तदा उदगयनसूत्रे एतादृशं व्याख्यागौरवं नाहृतं स्यात्। विवाहविधायके 'सर्वऋतवो विवाहस्य' इति सूत्र एव दक्षिणायने विवाहे अनुष्ठीयमाने 'अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः' इति वचनेन विवाहपूर्वादिन एव समावर्तनमनुष्ठेयम् इत्येतावदेव स्पष्टमुक्तं स्यात्। निर्णये तु शिष्टाः प्रमाणमिति च न वक्तव्यमाचार्यैः॥

ननु आपस्तम्बगृह्यस्य व्याख्यानं कर्तुं प्रवृत्तैः सुदर्शनाचार्यैः 'सर्वऋतवो विवाहस्य...' इति सूत्रस्य कथं ऋजुना मार्गेण न व्याख्यानं कृतमिति चेत्, उच्यते, ऋत्वोः ऋजुना मार्गेण व्यावहारिकायनबोधकत्वाभावात्। किं च अयनयोः सूर्यगतिनिरुक्तत्वेन ऋतूनां चन्द्रगतिनिरुक्तत्वेन च परस्परं कारणभेदस्य सत्वेन पूर्वैरेव ग्रीष्महेमन्तयोः ऋत्वोः अयनाभ्यां सह संपूर्णस्वावयव-सबन्धाभावेन यत्किंचित्स्वावयवसबन्धस्य निष्प्रयोजनत्वाङ्गीकारात् सुदर्शनाचार्यैरपि सूत्रस्य ऋजु-ना मार्गेण व्याख्यानं न कृतम्। पूर्वोक्तकारणेनैव पूर्वैरिदानींतनैरपि समावर्तने विवाहे च 'निर्णये तु शिष्टाः प्रमाणं सर्वत्र' इति व्याख्यानभागमेवाङ्गीकृत्य एतत्सूत्रमनादृतम्। नन्वस्मदाचार्यकृतं सूत्रमस्माभिरेव कथमनादरणीयमिति चेत्— सत्य, अस्मत्पूर्वैरेवानादृतत्वेन अस्माभिः किमु करणीयम्। किं च, एवं बहुषु स्थलान्तरेषु दृश्यते। यथा आपस्तम्बधर्मसूत्रे वैश्वदेवप्रकरणे 'न-क्तमेवोत्तमेन वैहायसम्' (आ. ध. सू. २. २. ४. ८.) इति सूत्र उज्ज्वलायां हरदत्ताचार्यैः वैहा-यसबलिः रात्रावेव देयः इति ऋजुना मार्गेण प्रथमं व्याख्यातम्। ततः उक्तव्याख्याने शिष्टाचार-विरोधं दृष्ट्वा तदनुसारेण पुनरपि तस्यैव सूत्रस्य तत्रैव 'एवकारो भिन्नक्रमः। नक्तमुत्तमेनैव बलिर्देयः तत्र बल्यन्तराणां रात्रौ निवृत्तिः' इति अन्यथा व्याख्यानं कृतम्। एवमेव 'संध्योश्च बहिर्ग्रामादासनं वाग्यतश्च' (आ. ध. सू. १. ११. ३०. ८) इति सूत्रस्य उज्ज्वलायां 'स्नातकः सायं प्रातश्च सावित्रीजपमासीन एव कुर्यात्' इति ऋजुना मार्गेण प्रथमतो व्याख्यानं कृत्वा पुनश्च पूर्ववत्पूर्वाचारमालोच्य हरदत्ताचार्यैः 'अन्ये तु आसनग्रहणं स्थानस्याप्युपलक्षणं। वाग्यमनं च लौकिक्या वाचो निवृत्तिः न सावित्रीजपस्य इति वर्णयन्ति' इति स्वाशय आविष्कृतोऽन्ते। अत एवेदानीमपि शिष्टाः सर्वेऽपि प्रातस्तिष्ठन्त एव जपन्ति। एवं शिष्टाचारानुरोधेन सूत्रानादरणस्य वा तदन्यथाकरणस्य वा बहूनि उदाहरणानि तत्र तत्र दृश्यन्ते॥

(शिष्टमग्रे)

भवानि त्वं दासे मयि वितर दृष्टिं सकरुणा-
मिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजितपदाम् ॥ २२ ॥

॥ लक्ष्मीधरा ॥

हे भवानि भवस्य पत्नि, त्वं भवती दासे मयि दासभूते किंकरे मयि वितर देहि दृष्टिं कटाक्षं सकरुणां करुणायुक्तां इति एवंप्रकारेण स्तोतुं स्तोत्रं कर्तुं वाञ्छन् इच्छन् कथयति वदति भवानि त्वमिति 'भवानि त्वं दासे मयि वितर दृष्टिं सकरुणाम्' इति वाक्यप्रतीकं 'भवानि त्वं' इत्येवं यः साधकः, तदैव 'भवानि त्वं' इति वाक्यैकदेशोच्चारणसमय एव त्वं भवती तस्मै वाक्यैकदेशोच्चारकाय दिशसि ददासि निजसायुज्यपदवीं निजस्य आत्मनः सायुज्यपदवीं तादात्म्यम् । मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजितपदां मुकुन्दो विष्णुः, ब्रह्मा द्रुहिणः, इन्द्रः आखण्डलः, तेषां स्फुटं यथा भवति तथा मकुटैः नीराजिते नीराजनविधिक्रियाञ्चिते पदे पादाम्बुजे यस्यास्ताम् ॥

अत्रेत्थं पदयोजना— हे भवानि, त्वं दासे मयि सकरुणां दृष्टिं वितरेति स्तोतुं वाञ्छन् भवानि त्वमिति यः कथयति, तस्मै तदैव त्वं मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजितपदां निजसायुज्यपदवीं दिशसि ॥

अयमर्थः— 'भवानि त्वं दासे मयि' इत्यादिवाक्यप्रतीके 'भवानि त्वं' इति पदद्वये 'भवानि' इति पदस्य लोडुत्तमपुरुषैकवचनान्तत्वमवगम्य तत्सामानाधिकरण्येन त्वंपदस्यान्वये महावाक्यप्रयोगोऽनेन साधकेन प्रयुक्त इति मत्वा महावाक्यफलं तादात्म्यं दिशति भगवती ; जपहोमाद्युपासनाविधिभ्यः तादात्म्योपासनायाः सद्यः फलदायित्वात् । 'अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः' इति न्यायेन अविवक्षया प्रयुक्तमपि महावाक्यं फलदायकमिति, नापि अविमृश्यकारित्वं देव्या इति रहस्यम् ॥ २२ ॥

॥ सौभाग्यवर्धनी ॥

ध्यानमहिमानमभिधाय नाममहिमानमाह— भवानि त्वमिति । हे भवानि, त्वदासे मयि सदयां दृष्टिं वितर इति स्तोतुमिच्छन् यो वदति भवानि त्वमिति हेतोस्तस्मै निजसायुज्यपदवीं हरिविरिञ्चीन्द्रप्रभृतिदेवानां स्फुटमुकुटनीराजितपदां दिशसि । लोडुत्तमपुरुषशब्दसाम्यमात्रश्रवणादेव वितरसीत्यर्थः ॥ २२ ॥

॥ अरुणामोदिनी ॥

एवं सप्तश्लोक्या त्रिवर्गानुसारिणा फलदातृत्वमुक्त्वा, अपवर्गकामिनां तदातृत्वमाह — भवानीति । हे भगवति, यः साधकः, भवस्य पत्नी भवानी, तस्याः संबुद्धिः हे भवानि, भवस्य पत्नीभावनाप्य तदनुग्राहिके देवि, 'इन्द्रवरुण ..' इत्यादिना ङीषानुकौ । त्वमिष्टार्थवितरणे प्रवीणा निपुणा असि, दासे किंकरे मय्यात्मनि सकरुणां कृपापर्याप्तां दृष्टिं वीक्षणं वितर देहि । भक्तदुःखमोचनशीलकरुणाकटाक्षवीक्षणत्वात्तवेति भावः । अत्र भगवतीदृष्टिप्रसारणस्य भक्तानुग्रहेच्छाप्रयुक्तत्वेन प्रसारणमात्राकाङ्क्षणेन स्वस्वत्वनिवृत्तेरभावान्न चतुर्थी । एतेन चतुर्थ्यर्थे सप्तमीति व्याख्यानं निरस्तम् । इति एवंप्रकारेण स्तोतुं प्रसादाभिलाषेण स्तुतिं कर्तुं वाञ्छन्नभिलषन् सन् ; यदेति शेषः । भवानि त्वमिति कथयति, स्तवनार्थं प्रवर्तितः, भवानि त्वं दासे इत्यादिप्रथमवाक्ये प्रथमप्रार्थितं त्वं भवती भवानि भवेयमिति लोडुत्तमपुरुषैकवचनतया तादात्म्यरूपार्थान्तरबोधकं भवानि त्वमिति पदद्वयमुत्तमपुरुषसामर्थ्यादस्मदर्थलाभात् 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिमहावाक्यसरूपं कथयति जल्पति, तस्मै उपासकाय, तदैव तदानीमेव भवत्करुणाकटाक्षवीक्षणप्रसारणप्रार्थनारूपार्थान्तरविवक्षापूर्वकस्याप्यनिच्छयाऽपि तादात्म्याभिलाषरूपार्थद्योतकस्य वाक्यांशस्योच्चारणवेलायामेवेत्यर्थः । त्व भवती भक्ताभीष्टदायिनीत्यर्थः । मुकुन्दब्रह्मेन्द्राणां विष्णुविधिसुरेशानां स्फुटैः प्रकाशमानैः मकुटैः किरीटैः नीराजिते पदे यस्यास्ताम् ; इन्द्रादिशिरोधृतकिरीटमणिदीपप्रकाशितानित्यर्थः । निजसायुज्यपदवीमात्मीयतादात्म्यमार्गं सालोक्यसारूप्यसामीप्यसायुज्यरूपेण चतुर्विधां मुक्तिं दिशसि ददासि । अतस्त्व सकलमनोरथवितरणं कियदिति भावः । 'एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नाम् । आकुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण उपैति मुक्तिम् ॥' इति भागवतोक्तेरेतादृशतात्पर्योक्तानामपि भगवन्नाम्नामीप्सितार्थदातृत्वमस्ति । भगवत्युपासनाऽपि यथाकथंचिदमनस्केनापि कृता फलदेति भावः ॥ २२ ॥

त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्धं शंभोरपरमपि शङ्के हृतमभूत् ।
यदेतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटम् ॥ २३ ॥

॥ लक्ष्मीधरा ॥

त्वया भवत्या हृत्वा अपहृत्य वामं वामार्धं वपुः शरीरं अपरितृप्तेन असंतुष्टेन मनसा अन्तःकरणेन शरीरार्धं शंभोरपरमपि दक्षिणमपि शङ्के मन्ये हृतं गृहीतं अभूत । यत यस्मात एतत् हृदयकमलान्तःप्रतिभासि त्वद्रूपं तव शरीरं सकलं कृत्स्नं वामदक्षिणभागात्मकं अरुणाभं

अरुणस्य प्रातःकालसूर्यस्याभेवाभा यस्य तत् । यद्वा, अरुणा रक्तवर्णा आभा प्रभा यस्य तत् अरुणाभम् । त्रिनयनं नयनत्रययुक्तं कुचाभ्यामानम्रं स्तनाभ्यामीषन्नम्रं कुटिलशशिचूडालमकुटं कुटिलशशिना वक्रचन्द्रकलया चूडालं चूडावन्तं मकुटं यस्य तत् ।

अत्रेत्थं पदयोजना— हे भगवति, शंभोर्वामं वपुः त्वया हृत्वा अपरितृप्तेन मनसा अपरमपि शरीरार्धं हृतमभूदिति शङ्के ; यत् एतत् त्वद्रूपं सकलमरुणाभं त्रिनयनं कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटम् ॥

अयमर्थः— भगवत्या शंभोः एकस्मिन्नर्धे अपहृते अपरार्धस्यापहार उत्प्रेक्ष्यते । यद्वा, उत्तरकौलसिद्धान्तप्रतिपादकोऽयं श्लोकः । उत्तरकौलसिद्धान्ते शक्तितत्त्वादन्यत् शिवतत्त्वं नास्ति । अतश्च शिवतत्त्वं शक्तितत्त्वे अन्तर्भूतमिति तदेवोपास्यमिति प्रस्तुतम् । एतच्च 'मनस्त्वं व्योम त्वं' (३५) इति श्लोकव्याख्यानावसरे 'तवाधारे मूले' (४१) इति श्लोकव्याख्यानावसरे च निपुणतरमुपपादयिष्यामः ॥ २३ ॥

॥ सौभाग्यवर्धनी ॥

ननु लोके उर्वत्र शिवसायुज्यमेवाभिलषितम् ; मत्सायुज्यपदव्या किमित्यत आह— त्वयेति । वामाङ्गरूपया त्वया अपरितुष्टेन मनसा दक्षिणाङ्गमपि शंभोरपहृतमिति शङ्के तर्कये । पूर्वं द्विनेत्रं केवलं मुकुटालंकारम् ; अधुना त्रिनयनं कुचाभ्यामानम्रं शशिकलालंकृतशरीरम् ; एभिर्हेतुभिः शंभोः शरीरं हृतमित्यपह्नुतिरलंकारो व्यङ्ग्यः । एतावता त्वमेव शिवस्वरूपिणी, शिवोऽपि त्वन्मय इति शक्तिशक्तिमतोरभेदः पूर्वोक्तः स्मारितः । त्वत्सायुज्यमेव शिवसायुज्यमिति ध्वनिः ॥ २३ ॥

॥ अरुणामोदिनी ॥

सायुज्यादिफलदातृत्वमेवाह— त्वयेति । हे भगवति, त्वया भवत्या शंभोः शिवस्य वामं वपुः वामभागं हृत्वा अपहृत्य अपरितृप्तेन शरीरैकदेशहरणादपरितुष्टेन मनसा अन्तःकरणेन अपरभागहरणोत्सुकेनेत्यर्थः । अपरमपि हृतान्यच्छरीरार्धं दक्षिणं भागमपीत्यर्थः । हृतं स्वीकृतमभूदिति शङ्के तर्कयामि । कुत इत्यत्राह— यद्यस्मात्कारणादेतन्मनसि प्रतिफलत्सकलं समस्तमरुणाभं बालसूर्यसदृशं कुचाभ्यामानम्रं च ईषदवनतं च त्वद्रूपम् ; भवदाकारशरीरमित्यर्थः । त्रीणि नयनानि यस्य तत्त्रिनयनम् ; क्षुभ्नादित्वान्न णत्वम् । कुटिलशशिना अर्धेन्दुना, चूडा अस्यास्तीति चूडालं मकुटकिरीटं यस्य तत्, अपि जातमिति शेषः । 'प्राणिस्थादातो लजन्यतरस्याम्' इति लच्प्रत्ययः । भवदाकारे नवनत्रयचन्द्रकलाधारणादिशिवचिह्नदर्शनादपरं शरीरं हृतमित्येव प्रतिभातीत्यर्थः । 'न शिवेन विना शक्तिर्न शक्तिरहितः शिवः' इत्याद्यभेदबोधकवचनेभ्यस्तत्प्रकटनापूर्वकं लोकानुग्रहीतुमेवार्धनारीश्वररूपं स्वीकृतमिति परमार्थः । उक्तं च सकलजननीस्तवे— 'त्वयाऽसौ जानीते रचयति भवत्यैव सकलं त्वमेवैतत्सर्वं त्वमसि तनवोऽन्यस्य विबिधाः । गतः साम्यं शंभुर्वहति परमव्योमवपुषा तथाप्यर्धं भूत्वा विहरसि शिवस्येति किमिदम् ॥' इति । काव्यलिङ्गानुप्राणितेयमपरशरीरार्धहरणोत्प्रेक्षा ॥ २३ ॥

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति ।
सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिव-
स्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः ॥ २४ ॥

॥ लक्ष्मीधरा ॥

जगत् स्थावरजङ्गमात्मकं जगत् सूते सृजति धाता स्रष्टा । हरिः विष्णुः अवति रक्षति । रुद्रः क्षपयते संहरति । धातृहरिरुद्राः सृष्टिस्थितिलयाधिकारिणः । तिरस्कुर्वन् उपसंहरन् एतत् धातृहरिरुद्रात्मकं त्रितयं स्वमपि स्वकीयमपि वपुः देहं ईशः महेश्वरतत्त्वं तिरयति अन्तर्हितं करोति । ईश्वरः धातृहरिरुद्रानात्मन्यारोप्य स्वयमपि सदाशिवतत्त्वे अन्तर्भूत इत्यर्थः । अनेन ब्रह्माण्डप्रलय उक्तः । तदनन्तरं ब्रह्माण्डोत्पित्सा सदाशिवस्य जायते । तदानीमाह — सदापूर्व इति । सदाशब्दः पूर्वं यस्य शिवशब्दस्य सः सदापूर्वः शिवशब्दः । तेन सदाशिवशब्देन वाच्यवाचकयोरभेदोपचारात् सदाशिवरूपं तत्त्वमुपचर्यते । सर्वं तदिदं पूर्वोक्तं धातृहरिरुद्रेशानात्मकं तत्त्वचतुष्टयमनुगृह्णाति । चकारः शङ्काच्छेदे । शिवः सदाशिवः । कथमनुगृह्णातीत्याशङ्क्यायामाह — तवाज्ञामालम्ब्येति । तव भवत्याः क्षणचलितयोर्भ्रूलतिकयोः क्षणमात्रं चलितयोः । भ्रूलतिकाचलनेन विज्ञेयामाज्ञामालम्ब्येत्यर्थः । भवद्भ्रूविक्षेपमात्रेण धातृहरिरुद्रेशानात्मकं तत्त्वचतुष्टयमुत्पन्नम्, भ्रुकुटीकरणमात्रेण तद्विनष्टमिति अनेककोटिब्रह्माण्डानामुत्पादने संहरणे च त्वद्भ्रूविक्षेपमात्ररूपा शक्तिः साचिव्यं सदाशिवस्य करोतीति तात्पर्यम् ॥

अत्रेत्थं पदयोजना— हे भगवति, धाता जगत् सूते । हरिः जगत् अवति । रुद्रः जगत् क्षपयते । ईशः एतत् तिरस्कुर्वन् स्वमपि वपुः तिरयति । सदापूर्वः शिवः सर्वं तदिदं तव क्षणचलितयोः भ्रूलतिकयोः आज्ञामालम्ब्य अनुगृह्णाति ॥ २४ ॥

॥ सौभाग्यवर्धनी ॥

ननु ब्रह्मादयो देवाः सायुज्यदाने समर्थाः किं न सन्ति; तत्सकाशादेव सायुज्यं भविष्यति, मत्सायुज्ये क्रोऽयं निर्बन्ध इत्यत आह— जगत्सूत इति । ब्रह्मा जगत्सृजति, विष्णुस्त्रायति, रुद्रः संहरति, ब्रह्मादिदेवतैः सह ईश्वरो जगत्तिरोधत्ते । अयमर्थः — रुद्रेण कार्यरूपं जगत्संहृतं कारणरूपेण तिष्ठति; यथा घटनाशे कपालरूपेण कार्यम्, पटनाशे तन्तुरूपेण, कुण्डलनाशे सुवर्णरूपेण। तथा वर्तमानं स्वात्मना सह तिरयति आच्छादयति । सदापूर्वः शिवः सर्वमनुगृह्णाति; स्वात्मनि बीजभावेन स्थापयति, पुनः सृष्टेरनुग्रहाय। तदुक्तं शांभवदीपिकायाम्— 'सृष्टिस्थित्युपसंहारतिरोधानुग्रहात्मकम् ।

कृत्यं पञ्चविधं यस्मात्तं नुमः शाश्वतं शिवम् ॥' इति । एतत्पञ्चविधं ब्रह्मादयो ये कुर्वन्ति, ते च क्षणचलितयोर्भ्रूलतिकयोराज्ञामवलम्ब्य, ईषद्भ्रूविलासेन स्वस्वकृत्यं कुर्वन्ति। एतावता तव भ्रूविलासमहिमा एतादृशः, तव महिमानं को वा वक्तुं समर्थ इति भावः। पूर्वं 'तवापाङ्गालोके पतितम्' इत्यादिना अपाङ्गमहिमा वर्णितः। अनेन पद्येन भ्रूविलासमहिमा वर्णितः। अतस्तवाज्ञावर्तिनां सायुज्ये प्रयोजनं नास्ति। तवैव सायुज्यं परमपुरुषार्थ इत्यभिप्रायः ॥ २४ ॥

॥ अरुणामोदिनी ॥

उपक्रान्तं देवीप्राधान्यमेवाह— जगदिति । हे देवि, धाता ब्रह्मा; 'ब्रह्मविष्णुमहादेवा अस्याः पुत्रा वरानने। चतुर्थोऽहं महेशानि सुतस्तस्या महेश्वरः। तस्याः पतिर्ब्रह्मरूपी स्वयं साक्षात्सदाशिवः।' इति दक्षिणामूर्तिसंहितोक्तेर्भवत्या ज्येष्ठपुत्रो धात्राख्यः जगत्स्थावरजङ्गमात्मकं प्रपञ्चं सूते उत्पादयति। तथा हरिः पालनाधिकृतो द्वितीयः पुत्रो विष्ण्वाख्योऽवति; विरिञ्चिसृष्टजगद्रक्षणं करोति। तथा रुद्रः संहाराधिकृतः कालरुद्राख्यस्तृतीयः पुत्रः तदेव जगत्क्षपयते संहरते। एते च कालपुरुषाः। तथा ईशो ब्रह्मादिकारणभूतो महेश्वराख्यश्चतुर्थः पुत्रः। तदुक्तं भारते— 'अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चात्र वीराः। त्वत्तः सर्वे देवदेव प्रसूता एवं चेशः कारणात्मा त्वमीड्यः ॥' इति । एतत्पूर्वोक्तं ब्रह्मविष्णुरुद्रादिसर्वप्रपञ्चं तिरस्कुर्वन्नावृण्वानः, स्वस्मिन्नुपसंहरन्नित्यर्थः। स्वं स्वकीयमपि वपुः ब्रह्मादिकारणं शरीरं तिरयति स्वकारणे सदाशिवेऽन्तर्हितं करोतीत्यर्थः। ततश्च सदाशब्दः पूर्वं यस्य सः सदापूर्वः शिवः सदाशिवाख्यो भवत्पतिः। अत्र सदाशब्दपूर्वत्वं शिवशब्दस्यैव ; न तु संज्ञिनस्तदर्थस्येत्यवाच्यवचनदोषपरिहारपूर्वकं यथाकथंचित्तत्सपादनयुक्तिः 'हिरण्यपूर्वं कशिपुं प्रचक्षते' 'देवपूर्वं गिरिं ते' इत्यादौ मल्लिनाथपादैः सर्वकषासंजीवन्यादौ बहुधा प्रपञ्चिता द्रष्टव्या। क्षणचलितयोः क्षणमात्रमुत्क्षेपितयोस्तव सकलप्रपञ्चविधायिन्या भवत्या भ्रूलतिकयोराज्ञां निदेशमालम्ब्य तादिदं विधातृहरिरुद्रेशानादिरूपं सर्वं प्रपञ्चमनुगृह्णाति। स्वेच्छावशात्सृष्ट्याद्यनुग्रहवत्करोतीत्यर्थः। सर्वमत्रोपपादितव्यं देवीप्राधान्यमस्माभिः प्रागेव प्रत्यपादीत्युपरम्यते। अत्र 'आत्मा वै पुत्रनामासि' 'स एवायं पुरुषः प्रत्यक्षेणोपलभ्यते' इत्यादिश्रुतेर्विरिञ्चाद्यनेकरूपाणां कल्पनामात्रम्। वस्तुतस्त्वमेकैवैवंविधकल्पनापरेत्यभिप्रायः। तदुक्तं सकलजननीस्तवे— 'विरिञ्चाख्या मातः सृजसि हरिसंज्ञा त्वमवसि त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरतया। भवन्ती सादाख्या प्रभवसि च पाशौघदलने त्वमेवैकाऽनेका भवसि कृतिभेदैर्गिरिसुते ॥' इति । सहस्रनामादिष्वपीदं व्यक्तमेवेति तत्रैव द्रष्टव्यम् ॥ २४ ॥

त्रयाणां देवानां [1]त्रिगुणजनितानां तव शिवे
भवेत्पूजा पूजा तव चरणयोर्या विरचिता ।
तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमकुटाः ॥ २५ ॥

1. 'त्रिगुणजनितानामपि शिवे' इति अरुणामोदिनीपाठः ।

॥ लक्ष्मीधरा ॥

त्रयाणां देवानां धातृहरिरुद्राणामित्यर्थः। त्रिगुणजनितानां सत्त्वरजस्तमःप्रभवानाम्। तव भवत्याः। हे शिवे, शिवमहिषि। भवेत् भवत्येव प्राप्तकाले लिङ्। पूजा सपर्या। सैव पूजा नान्येति द्वितीयपूजाशब्दस्यार्थः। तव चरणयोः या पूजा विरचिता निर्मिता। युक्तं चैतदित्याह —तथा हीत्यादिना। तथा हि युक्तमेतत्। त्वत्पादोद्वहनमणिपीठस्य तव पादयोः उद्वहनार्थं यन्मणिपीठं परिकल्पितं तस्य निकटे उपसिंहासनसमीपं स्थिताः वर्तन्ते स्म। हि यस्मात् एते धातृहरिरुद्राः अधिकारपुरुषाः शश्वत् अनवरतं मुकुलितकरोत्तंसमकुटाः मुकुलिताः कृताञ्जलयः करा एव उत्तंसाः, तद्युक्ताः मकुटाः येषां ते ॥

अत्रेत्थं पदयोजना— हे शिवे, तव त्रिगुणजनितानां त्रयाणामपि देवानां तव चरणयोः या पूजा विरचिता भवेत् सैव पूजा। तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे हि यस्मात् मुकुलितकरोत्तंसमकुटाः शश्वदेते स्थिताः ॥

अयं भावः— भगवत्याः पादपीठसेवा पूजामात्रेण न लभ्यते, अपि तु भगवत्याः प्रसादवशादेवेति ॥ २५ ॥

॥ सौभाग्यवर्धनी ॥

इदानीं चरणार्चनमहिमानमाह— त्रयाणामिति। तव चरणयोर्या विरचिता पूजा त्रयाणां देवानां भवति। यतस्त्वत्पादोद्वहनमणिपीठस्य समीपे ह्येते शश्वन्मुकुलितकरोत्तंसमकुटाः सन्ति। अतस्तेषां पूजा न पृथक्कार्या। एतावता शिवपूजाविष्णुपूजयोः सकाशात्तव पूजा विशिष्टकरेति भावः। तदुक्तं देवीपुराणे— 'विष्णुपूजासहस्राणि शिवपूजाशतानि च। अम्बिकाचरणार्चायाः कलां नार्हन्ति षोडशीम् ॥' इति ॥ २५ ॥

॥ अरुणामोदिनी ॥

भ्रान्तिप्रतीतदेवतान्तरपूजातो भगवतीचरणपूजाया आधिक्यमाह— त्रयाणामिति। शिवचद्रि भक्तलोकमिति शिवा, तस्याः संबुद्धिः हे शिवे भक्तजनशिवंकरे देवि, त्रिभिर्गुणैः सत्त्वरजस्तमोभिर्भवदीयैर्जनितानामुत्पादितानां त्रयाणां विधातृहरिरुद्राख्यानामधिकारिपुरुषाणाम्; अपिशब्दादन्येषां सर्वेषां देवानां मध्य इत्यर्थः। तव चरणयोः पादयोर्या पूजा सपर्या विरचिता सैव पूजेत्यन्वयो भवति; न भवदन्यदेवताचरणपूजा पूजा भवितुमर्हतीत्यर्थः। अत एवाहुरागमविदः— 'विष्णुपूजासहस्राणि शिवपूजाशतानि च। अम्बिकाचरणार्चायाः कलां नार्हन्ति षोडशीम् ॥' इति। तव चरणयोर्या पूजा विरचिता सैव त्रिगुणजनितानां त्रयाणां देवानां पूजेति प्राचीनयोजना चाचार्यानभिमता शेषरूपहर्यादिपूजाप्राधान्यापत्त्या सकलदेवतापूजापरमप्राप्तिस्थानदेवीचरणपूजौत्कट्यहानिप्रसङ्गनादुपेक्ष्यैव। उक्तमर्थं समाधत्ते— तथा हीति। सर्वासां देवतानां मध्ये भवच्चरणपूजैव पूजेति यदुक्तं तदुक्तमेवेत्यर्थः। एते विधात्रादयः, हि यस्मात्त्वत्पादोद्वहनमणिपीठस्य भवच्चरणारविन्दयोरुद्वह-

नार्थं सिंहासनाधःस्थापितपीठविशेषस्य निकटे समीपे, मुकुलिताः करा अञ्जलय एव उत्तंसा येषु तानि मुकुटानि येषां ते ; मुकुटधृताञ्जलयः सन्तः शश्वत्सदा स्थिताः । यतः परेषां पूज्यत्वेनाभिमता ब्रह्मादयोऽपि शिरोनिबद्धाञ्जलिपुटा देवीचरणोपासितपरायणाः स्थिताः, अतो भवच्चरणपूजा पूजा, यतः पूज्यपूजनं पूजा, न ह्यपूज्यपूजनं इति भावः ॥ २५ ॥

विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम् ।
वितन्द्री माहेन्द्री वितातिरपि [1]संमीलितदृशा
महासंहारेऽस्मिन् [2]विहरति सति त्वत्पतिरसौ ॥ २६ ॥

॥ लक्ष्मीधरा ॥

विरिञ्चिः ब्रह्मा पञ्चत्वं पञ्चभूतानां व्यष्टिरूपतां, मरणमिति यावत्, व्रजति याति । हरिः विष्णुः आप्नोति प्राप्नोति विरतिं उपरतिं, मरणमिति यावत् । विनाशं मृतिं कीनाशः यमः भजति । धनदः कुबेरः निधनं मरणं याति प्राप्नोति । वितन्द्री विशेषेण तन्द्री प्रमीला जाड्यं यस्याः सा, निद्राणेत्यर्थः, माहेन्द्री महेन्द्रस्येयं माहेन्द्री चतुर्दशानां मनूनां इन्द्राणां वितातिरपि सङ्घोऽपि संमीलितदृशा संमीलिता दृक् दृष्टिर्यस्याः सा । 'हलन्तादपि टाविष्यते' इति टाप् । यद्वा, संमीलितदृशा करणेन, वितन्द्री माहेन्द्री । महासंहारे कल्पान्ते अस्मिन् विहरति विश्वङ्गलतया वर्तते, हे सति, पतिव्रते, त्वत्पतिः सदाशिवः हरः असौ सहस्रदलकमले परिदृश्यमानः ॥

अत्रेत्थं पदयोजना— विरिञ्चिः पञ्चत्वं व्रजति । हरिः विरतिं आप्नोति । कीनाशः विनाशं भजति । धनदः निधनं याति । माहेन्द्री वितातिरपि संमीलितदृशा वितन्द्री । अस्मिन् महासंहारे सति, असौ त्वत्पतिः हरः विहरति ॥

अयं भावः— सर्वेषामधिकारपुरुषाणां च संहारे ब्रह्माण्डभङ्गसमये तव पत्युर्यद्विहरणं तत्तव पातिव्रत्यमहिमायत्तमिति ॥ २६ ॥

॥ सौभाग्यवर्धनी ॥

चरणसपर्यामहिमानमभिधाय तत्प्रभावमहिमानमाह— विरिञ्चिरिति । विरिञ्चिर्मृतिं याति ; विष्णुर्विरामं प्राप्नोति ; यमो नाशमेति ; कुबेरो निधनमपिगच्छति । माहेन्द्री दिशां वितातिः तन्द्रारहिता जागरूकाऽपि मीलति दीर्घनिद्रां याति । त्वत्पतिः शिवः महाप्रलये विलसति । हे सति सदामङ्गलरूपे, तवामङ्गलं कालत्रयेऽपि यतो नास्ति ; अत एव तस्य ब्रह्मादेरिव विरामो नास्ति । सर्वबलसंहारकमहामा-

1. संमीलति दिशां 2. विलसति इति सौभाग्यवर्धनीपाठः ।

यायास्तवैतामस्याः (इदयाः) शक्तेः साक्षिण्या चिच्छक्तिरूपया नित्यनिरतिशयानन्दघनया अविनाभूतः स्वयंप्रकाशः समुज्जृम्भत इति यो महिमा शिवस्य स चिच्छक्तिरूपाया नित्यनिरतिशयायास्तवैव प्रभाव इति भावः ॥ २६ ॥

॥ अरुणामोदिनी ॥

भगवतीप्रसादमहिमानमेवाह— विरिञ्चिरिति । हे सति पतिव्रताशिरोमणे देवि । पत्युर्दीर्घायुष्मत्ता भवत्पातिव्रत्यमहिमायत्तेति ध्वनिः । विरिञ्चिः स्रष्टापि पञ्चत्वं मरणं व्रजति ; स्वकारणे लीनो भवति । हरिः पालनकर्ता विष्णुरपि विरतिं नाशमाप्नोति ; सोऽपि विलीनो भवतीत्यर्थः । कीनाशः सर्वविनाशकः अन्तकोऽपि विनाशं भजति । धनदो दानशौण्डो धर्मपरायणः कुबेरोऽपि निधनं नाशं याति ; 'निधनं नाशकुलयोः' इति विश्वः । किमुतान्ये देवा इत्यर्थः । महेन्द्राणामियं माहेन्द्री वितातिरिन्द्रसमूहोऽपि संमीलिता निमीलिता दृशा यया सा सती वितन्द्री विशेषेण निद्राणा भवतीत्यर्थः । तत्पूर्वाद्धातेः 'स्पृहिगृहि' इत्यादिना तन्द्रेति निपात्यते । तन्द्रायाः करणम्, तरेः त्रिद्रिः ; 'तत्करोति' इति ण्यन्तादच इप्रत्ययः । 'कृदिकारादक्तिनो ङीष् वा वक्तव्यः' इति ङीषू । अस्मिन्नेवंविधे महासंहारे महाप्रलये असौ त्वत्पतिः, भवद्भर्ता शिवः सहस्रकमले मया परिदृश्यमान इत्यर्थः । विहरति क्रीडते । भवत्पातिव्रत्यमहिमा खल्वेतदिति भावः । अत्रोक्तं सूतसंहितायाम्— 'असंख्या विलयं यान्ति ब्रह्माणः पण्डितोत्तमाः । असंख्या विष्णवो रुद्रा असंख्या वासवादयः ॥ एक एव शिवः साक्षात्सृष्टिस्थित्यन्तहेतवः ।' इति । श्रुतिश्च— 'एक एव रुद्रो न द्वितीयाय तस्थे' इत्यादिः । सर्वमन्यत्प्रागेवोक्तमस्माभिरित्युपरम्यते ॥

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः[1] ।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥ २७ ॥

॥ लक्ष्मीधरा ॥

जपः मन्त्रजपः 'उपांशूच्चैर्वा क्रियते' इत्यादिभिरुदितः सः जल्पः यादृच्छिकसँलापः । शिल्पं सकलमपि हस्तविन्यासादिक्रियानिचयः मुद्राविरचना मुद्राणां संक्षोभणद्रावणाकर्षणवश्योन्मादमहाङ्कुशखेचरीबीजयोनित्रिखण्डात्मकानां विरचना करणम् । गतिः यादृच्छिकगमनं प्रादक्षिण्यक्रमणं प्रदक्षिणक्रिया । अशनादि ओदनादियावत्किंचित्पदार्थचर्वणं आहुतिविधिः आहुतीनां देवतोद्देशेन हविःप्रक्षेपणात्मकानां विधिः करणम् । प्रणामः नमस्कारः संवेशः यादृच्छिकदण्डवत्क्षितिशयनम् । सुखं सुखकरं वस्तु जल्पशिल्पव्यतिरेकेण अङ्गभङ्गनयनोन्मीलननिमीलनादिकं अखिलं

1. '०मदनाद्याहुतिविधिः' इति सौभाग्यवर्धनीपाठः ।

उभयथाऽपि न कर्मातस्तदभावः । १२ ॥

ईश्वरेच्छा नित्या अनित्या वा । आद्य प्रलयेऽप्यतिप्रसङ्गः स्यात् । द्वितीये कारणबाधा-द्बाधिता । उभयथाऽपीश्वरसिसृक्षया परमाणुकर्मेति सिद्धान्तो दुरुत्सादः । अतस्तदभावो द्व्यणु-काभावः । स्वसिद्धान्ते तु न दोषः, ईश्वरस्याचिन्त्यशक्तेर्वैचित्र्यसिद्धत्वात् । स्वत एव काले विशेष-भ्युपगमाच्च ॥

समवायाभ्युपगमाच्च साम्याद्नवस्थितेः । १३ ॥

समवायस्वीकाराद्नवस्था । ननु समवायस्यैकत्वान्नानवस्थेत्यत आह— साम्यादिति । समवायस्यापि संबन्धापेक्षातौल्यात् । स्वनिर्वाहकत्वे वा गुणादेरेव तथात्वसंभवात् किं तेनेत्यर्थः ॥

नित्यमेव च भावात् । १४ ।

कारणे कार्यस्य सत्तासमवायो जनिरिति तैरभ्युपगतम् । तथा च नित्यमुत्पत्तिः स्यात्, परमाणूनां समवायस्य च नित्यत्वादिति सूत्रार्थः । किं च,

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ १५ ॥

परमाणूनां अनित्यता स्यात्, रूपादिमत्त्वात् घटवदित्यर्थः ॥

उभयथा च दोषात् ॥ १६ ॥

परमाणूनां नित्यत्वे तद्बद्धघटादेरपि नित्यत्वं स्यात् । अनित्यत्वे तु सर्वार्थक्रियाद्रव्यं नोत्पद्येत, निराश्रयत्वादित्यर्थः ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

नेदं मतमपेक्ष्यम्, श्रुत्यादिभिरपरिगृहीतत्वात्, प्रत्युत निरस्तत्वाच्च । तथा च मोक्ष-धर्मेषु सृगालवाक्यम्— 'अहमासं पण्डितको हैतुको वेदनिन्दकः । आन्वीक्षिकीं तर्कविद्यामनु-रक्तो निरर्थकाम् ॥' इति । अत्रानुव्याख्याने सुधायां च प्रसङ्गाद्बहवः स्वसिद्धान्ता उक्ताः । तद्यथा — काल आकाशश्चानवधिकपरिमाणोत्कर्षापकर्षवान् सांशश्च । ईश्वरोऽपेक्ष्यम् । परमाणुश्च सांशः । एवं तदंशा अपीत्यनवधिकमेवाणुत्वोत्कर्षापकर्षादिकम् । सर्वं चैतत्साक्षिसिद्धम् । अग्नी न्ही-यानिति श्रुत्युक्तयोरणोर्महतश्चेति शब्दविषयत्वाच्च । नन्वेवं स्वस्मादपि स्वयमुत्कृष्टोऽपकृष्टश्चेत्येव-मागतम् । को नेत्याहेत्यादि । तथा जातेरपि प्रतिव्यक्ति भेदः, ब्राह्मणत्वादेः सत्येवाश्रये नाशः, सादृश्यबलेन व्युत्पत्तेः, सादृश्यमपि प्रतिव्यक्ति भिन्नम्, सर्वं च भावात्मका इति । एतच्च सर्वम-संभवदुक्तिकमिति विदुषां स्पष्टमेव । वैशेषिक दिमतखण्डनं त्वस्माकमिष्टमेवेति नाधिकं लिख्यते ॥

इह महद्दीर्घवदिति सूत्रे षष्ठ्यर्थे वतिः। विभक्तिविपरिणामेन वा तस्मादित्यध्याहारेण वा तस्मादिति भाष्यकारेणोक्तमिति सुधायामुक्तम्। तत्र षष्ठ्यर्थे वतिस्तुच्छम्, इत्यर्थं षष्ठ्यन्ताद्विधानात्। विभक्तिविपरिणामेनेति पक्षोऽपि तुच्छम्, यथाश्रुतस्य चानिष्टार्थ्यं विना तदयोगात्; अन्यथाऽतिप्रसङ्गात्। तस्मादित्यध्याहारस्तथेतितुच्छः, असामर्थ्येन तद्धितायोगात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वान्युक्तिभङ्गप्रसङ्गाच्च। अपांभक्षो वेति सूत्रे शृगालवाक्यमुदाहरन् पाञ्चरात्रस्य पतिताद्येकविषयतां बोधयति प्रथमपरिच्छेदोदाहृतानि स्कान्दकौर्मादिवचनानि स्मारणीयः। प्रत्युत चतुर्दशविद्यास्थानानामध्ययनावधिपरिगृहीतत्वादान्वीक्षिकी श्रेष्ठैव। किं तु न तत्रैवाभिनिवेष्टव्यम्। 'अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः। सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः॥' इति न्यायेन क्षुरस्यस्यनन्तरं वेदान्ताः परिशीलनीया इत्याशयेन शृगालवाक्येऽनुरक्तपदं प्रयुक्तम्। यद्यपि जल्पन्ति — 'अस्ति किल विष्णुः नारायणरूपेणाविस्तरेण कृतं पुनर्व्यासरूपेण तेन संक्षिप्तं ब्रह्मतर्काभिधानं शास्त्रम्। तदेव चतुर्दशविद्यास्थानान्तर्गतं न्यायशास्त्रम्, न तु गौतमप्रणीतम्। तच्चास्य मीमांसाशास्त्रस्याङ्गम्, अक्षपादीनामुपक्रमादीनां श्रुतिलिङ्गवाक्यादीनां च स्वरूपप्रामाण्यतद्बलाबलनिर्णायकतयोपयुज्यमानत्वात्। उक्तं चानुव्याख्याने—' प्रमाणन्यायमीमांसा क्रियते तर्कशास्त्रतः। मानन्यायैस्तु [1]तत्सिद्धिर्मीमांसानं ... नम्॥ ब्रह्मतर्कं च भगवान् ... व कृतवान् प्रभुः। पञ्चाशत्कोटिविस्तारान्नारायण ... । उद्धृत्य पञ्चसाहस्रं कृतवान् बादरायणः॥' इति। तथा च गौतमीयादीनामत्यन्तमनपेक्ष ... । तत्रेदं वक्तव्यम्— कमठमाठरकौरव्यादिश्रुतीनां मीमांसायामङ्गं ब्रह्मतर्क इति सम्य ... नुरूपो बलिः' इति न्यायात्। किं तु, त्वया 'ज्योतिरुपक्रमात्तु' इत्यधिकरणसिद्धान्त ... स्वीकृतस्य वेदार्थस्य प्रतिकूलत्वात् प्रसिद्धानि परित्यज्य व्याकरणशास्त्रानुक्रमणिकादीन्यपि भिन्नान्येव ब्रह्मतर्कसहोदराणि वक्तव्यानि, कल्पनाकोशस्य निरवधिकत्वात्। तथाऽपि तानि नाद्रियन्त इति न्यूनता भवदीयभाष्यकृतः। सचेतसां त्विह मूकतैवोचितेत्युपरम्यते॥ ६॥

इदानीमष्टभिः सूत्रैः परमाणुपुञ्जवादिनौ वैभाषिकसौत्रान्तिकौ निराकरोति—

समुदाय उभयहेतुकेऽपि तदप्राप्तिः॥ १८॥

पुञ्जः किमेकस्मादनेकस्माद्वा। आद्ये व्याघातः। द्वितीये समुदितादिशकलितादा? । आद्ये अन्योन्याश्रयात्तदप्राप्तिः। अन्त्ये समुदायस्य सदातनत्वापत्त्या प्रलयाभ्युपगमविरोध इत्यर्थः॥

---

1. तत्सिद्धौ मीमांसा

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥

अस्तु समुदायस्य सदातनत्वम् । न चैवं प्रलयानुपपत्तिः; इदमिदं चेति परस्परापेक्षविज्ञेयव्यवहाराभावेन तदुपपत्तेरिति चेन्न, उत्पत्तौ सत्यां तन्निमित्तकविज्ञेयव्यवहारयोरप्यावश्यकत्वादित्यर्थः ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

उत्तरोत्पादे कारणविनाशात् घटपटादिविशेषो न स्यादित्यर्थः । कारणस्य हि सदृशकार्यजनन एव सामर्थ्यम् । अन्यथा घटात्पटोऽप्युत्पद्येतेति भावः ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥

कारणे विनष्टे कार्यमुत्पद्यते चेत् तत्कार्यमिति प्रतिज्ञाहानिः। अविनष्टे चेद्यौगपद्यं कार्यकारणयोः स्यात् । तथा च क्षणिकत्वं भज्यमिति भावः । किं च,

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २२ ॥

सन्तानान्तरेण यः प्रतिक्षणं विनाशः यश्च सन्तानेन सह, तयोरनुपपत्तिरिति सूत्रार्थः ॥

उभयथा च दोषात् ॥ २३ ॥

कारणे सति कार्यं भवत्येवेति नियमे अर्थक्रियाकारित्वमेव सत्त्वमित्यभ्युपगमात् कार्यस्यापि यावत्कारणभावित्वं वाच्यम् । तथा च सव्येतरविषाणवत् कार्यकारणभावव्याघातः । अनियमे त्वसत्यं स्यादिति उभयथाऽपि दोष एवेत्यर्थः ॥

आकाशे चाविशेषात् ॥ २४ ॥

प्रदीपादिषु परिमाणभेदेन भेदसिद्धौ तद्दृष्टान्तेन सर्वस्यापि क्षणिकत्वमनुमेयमिति चेन्न, आकाशदृष्टान्तेन स्थैर्यस्याप्यनुमातुं शक्यत्वादित्यर्थः ॥

अनुस्मृतेश्च ॥ २५ ॥

प्रत्यभिज्ञानात् स्थैर्यसिद्धिरित्यर्थः ॥ ७ ॥

अथ चतुर्भिः सूत्रैः शून्यवादमपाकरोति—

नासतोऽदृष्टत्वात् ॥ २६ ॥

अदृष्टत्वादसतः कारणत्वं न युज्यते । किं च,

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

असतः कारणत्वे उदासीनानां खपुष्पादीनां सकाशादपि सौरभादिसिद्धिः स्यादिति सूत्रार्थः । चक्षुरुन्मेष न चेदन्यत्रापि न स्यात्, अविशेषादिति सूच्यते ॥

नाभाव उपलब्धेः ॥ २८ ॥

न च जगदपि शून्यमिति वाच्यम्, दृश्यमानत्वादित्यर्थः ॥

न च दृष्टस्यापि स्वप्नादिवदसत्त्वमस्तीति वाच्यम्, स्वप्नस्यासत्त्वाभावात् । स्वप्नजाग्रत्त्वं दृष्टान्त इति चेत्, न, स्वप्न एवाय न जाग्रत्, रज्जुरियं न सर्प इति बाधबलेन वैषम्यादित्याह सूत्रकारः—

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥ इति ॥ ८ ॥

योगाचारसंमत विज्ञानवादं निराकरोति—

न भावोऽनुपलब्धेः ॥ ३० ॥

न विज्ञानमात्रं जगत्, ज्ञानं घट इत्याद्यननुभवादित्यर्थः ॥

क्षणिकत्वाच्च ॥ ३१ ॥

ज्ञानं हि क्षणिकम् । अर्थास्तु प्रत्यभिज्ञया स्थिराः । अतो नैक्यम् ॥

एवं प्रत्येकं दूषितानि बौद्धमतानि साधारण्येन दूषयितुं सूत्रम्—

सर्वथानुपपत्तेश्च ॥ ३२ ॥

इति । प्रमाणाभावाच्छ्रुतिस्मृतिविरोधाच्च बौद्धाना चत्वार्यपि मतानि उपेक्षणीयानीत्यर्थः ॥ ९ ॥

स्याद्वादिनो जैनस्य मतं दूषयति—

नैकस्मिन्नसंभवात् ॥ ३३ ॥

स्यात् सत्, स्यादसत्, स्यादुभयम्, स्यादुभयविलक्षणम्, स्यादुभयत्वे सति उभयविलक्षणम्, स्यान्नैतत्सर्वं, स्यात्सर्वं चेति सप्तभङ्गी नैकस्मिन् युज्यते, अदृष्टत्वेनासंभवात् । अत्रानुव्याख्यानम्— 'आह क्षणिको विश्वं सदसद्वयमद्वयम् । द्वयाद्वयमतत्सर्वं सप्तभङ्गि वनावनम् ॥ नैतत्पदार्थ एकस्मिन

एवं चात्माकात्स्न्यम् ॥ ३४ ॥

जीवस्य शरीरपरिमाणत्वे पिपीलिकादिशरीरस्थस्य गजादिशरीरप्राप्तौ सत्यां तत्रापूर्णता स्यात् । तथा च न सर्वं शरीरं चेष्टेत ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

तत्तच्छरीरस्थस्य तत्तत्परिमाणतेत्यपि न मन्तव्यम्, विकारत्वादनित्यतापत्तेः ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात् ॥ ३६ ॥

शरीरावच्छेदमन्तरेण स्वतः परिमाणाभावादात्मनः शरीरपरिमाणतेति हि परो ब्रूते । तत्रेदं पृच्छामः— मोक्षे शरीरमस्ति न वेति । द्वितीये परिमाणाभावाज्जीवस्याप्यभावप्रसङ्गः ; न हि परिमाणशून्यं द्रव्यमस्ति । आद्ये तु देहात्मनोर्नित्यत्वमागतम् । तथा च शरीरत्वाविशेषात् सांसारिकशरीरमपि नित्यं स्यादित्यर्थः ॥ १० ॥

पाशुपतपक्षं निरस्यति—

पत्युरसामञ्जस्यात् ॥ ३७ ॥

पत्युरञ्जनप्रसिद्धेश्वरस्य पशुपतेर्जगत्कारणत्वं न युक्तम्, पारतन्त्र्यादिदोषग्रस्तत्वेनासामञ्जस्यात् । श्रूयते हि— 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्' 'अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ' 'अस्य देवस्य मीळ्हुषोवया विष्णोरेषस्य प्रभृथे हविर्भिः । विदेहि रुद्रो रुद्रियं महित्व यामिष्टं बर्तिरश्विनाविरावत् ।' 'एको नारायण आसीन्न ब्रह्मा नेशानः' इति । ब्रह्मद्विषे चतुर्मुखस्य पञ्चममुखच्छेत्रे शरवे हिंसनशीलाय हन्तवै हन्तुमेव, न तु भूषणाद्यर्थमिति भावः । आसमन्तादीशस्य अभीष्टसेचकस्य विष्णोर्देवस्य हविर्भिः प्रभरणे कृते सति अहंकाररूपेण बन्धको रुद्रो रौद्रं महिमानं यथा लेभे, तथा युवामपि विष्णुपूजयैव अन्नवद्वर्तनं प्राप्तवन्तौ स्थ इति तत्त्वप्रकाशिकोक्तश्रुत्यर्थः ॥

संबन्धानुपपत्तेश्च ॥ ३८ ॥

रुद्रस्य जगता सह कार्यकर्तृभावरूपसंबन्धो नोपपद्यते, अशरीरत्वादिति सूत्रार्थः॥

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

इति सूत्रान्तरम् । भूतलादावधिष्ठाने स्थितो हि कुलालादिः करोति । न चात्र तदस्तीत्यर्थः ॥

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

यथा शरीरं साक्षात्प्रयत्नाधिष्ठेयत्वान्न शरीरान्तरमपेक्षते तथा सर्वं जगद्ब्रह्मस्य साक्षात्प्रयत्नाधिष्ठेयत्वान्न शरीरसापेक्षमिति चेन्न, साक्षात्प्रयत्नाधिष्ठेयस्योत्पत्तिविनाशयोर्जननमरणाद्यापत्तेरित्यर्थः ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

देहवत्त्वेऽन्तवत्त्वं स्यात्, अन्यथा तु ज्ञानाभावः स्यादिति सूत्रार्थः । विष्णोस्तु श्रुत्यैव विरोधाः परिहृताः इति माध्वाधिकरणशरीरम् । एतच्च बुध्न्याद्यधिकरणस्य स्मृत्यनवकाशेत्यादि-द्वितीयाध्यायप्रथमाधिकरणस्य च भङ्ग्या भग्नमेवेत्यवधेयम् ॥ ११ ॥

शक्तिरेव जगज्जननीति मतं निरस्यति—

उत्पत्त्यसंभवात् ॥ ४२ ॥

न हि पुरुषाननुगृहीताभ्यः स्त्रीभ्य उत्पत्तिर्दृश्यते ॥

नन्वस्त्यनुग्राहकः पुरुषः सदाशिव इत्याशङ्क्य तत्रापि बाधकमुक्तमेवेत्याह—

न च कर्तुः करणम् ॥ ४३ ॥

नन्वस्तु शक्त्यनुग्राहकेश्वरस्य विज्ञानकरणमपीत्यत आह—

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

तस्य पाशुपतमतस्याप्रतिषेधः । शाक्तमतमपहाय मतान्तरमेव परिगृहीतं स्यादित्यर्थः । तच्च दूषितमिति भावः ॥

विप्रतिषेधाच्च ॥ ४५ ॥

श्रुतिस्मृत्यादिविरोधादप्यसमञ्जसं शाक्तमतमित्यर्थः ॥

तदेवं वैदिकानामवैदिकानां च समस्तान्तराणां निरासात् सिद्धं विष्णोः सर्वकर्तृत्वमिति माध्वाः । खण्डनं तूक्तमेव ॥ १२ ॥

इति श्रीतत्त्वकौस्तुभे द्वितीयपरिच्छेदे द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

॥ द्वितीयस्याध्यायस्य तृतीयः पादः ॥

आकाश उत्पत्तिमान्न वेति संशये नेति प्राप्तम्, विभुत्वात् 'अनादिर्वाऽयमाकाशः' इति श्रुतेश्च । अत्र सिद्धान्तमाह—

न विलक्षणश्रुतेः ॥ १ ॥

उत्पत्त्यसंभवादिति प्रकृतानुत्पत्तिः संबध्यते । वियदनुत्पत्तिमत्, तथाऽश्रुतेः ॥

अस्ति तु ॥ २ ॥

अस्ति चोत्पत्तौ श्रुतिः— 'आत्मन आकाशः संभूतः' इति ।

गौण्यसंभवात् ॥ ३ ॥

'अनादिर्नाऽयमाकाशः शून्योऽलौकिकः' इति श्रुतिर्गौणी, अन्यथा उत्पत्तिश्रुति-बाहुल्यासंभवात् ॥

शब्दाच्च ॥ ४ ॥

'अथ ह वाव नित्यानि पुरुषः प्रकृतिरात्मा काल इति । अथ वान्यनित्यानि प्राणः श्रद्धा भूतानि भौतिकानीति । यानि ह वाव उत्पत्तिमन्ति वान्यनित्यानि । यानि ह वा अनुत्पत्ति-मन्ति तानि नित्यानि । न ह्येतानि कदाचनोत्पद्यन्ते न क्षीयन्ते पुरुषः प्रकृतिरात्मा काल इति । अथैतान्युत्पत्तिमन्ति चानुत्पत्तिमन्ति च प्राणः श्रद्धाऽऽकाशः इति, भागशो ह्युत्पद्यन्ते' इति भाल्लवेयश्रुतिः ॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

एकस्यैवाकाशस्य गौणमुख्यापेक्षयाऽनुत्पत्तिरुत्पत्तिश्चेति उक्तव्यवस्था युक्तैव ; यथा ब्रह्मशब्दस्य विष्णौ मुख्यस्य विरिञ्च्यादौ गौणता । एवमनुत्पत्तिमच्छब्दस्यापि विष्णौ मुख्यस्या-काशे गौणतोपपत्तेः ॥

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

ब्रह्मणोऽन्यस्यानुत्पत्तिमत्त्वे 'इदं सर्वमसृजत' इति प्रतिज्ञा हीयेत, आकाशस्यापि सर्वस्मादव्यतिरेकात् । 'आत्मा वा इदमेक एवाग्र आसीत्' 'एकमेवाद्वितीयम्' इत्यादिश्रुति-भ्योऽपि युक्तैव वियदुत्पत्तिः ॥

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

वियत उत्पत्तिमत्, विभक्तत्वात् घटवत् । ब्रह्म नोत्पत्तिमत्, अविभक्तत्वात् व्यति-रेकेण घटवत् इति प्रयोगावभिप्रेत्य व्याप्तिप्रदर्शनपरं सूत्रम् । विकारिण एव हि लोके विभक्ता दृश्यन्ते । विभागश्चालक्षणत्वम् । तदुक्तं बृहत्संहितायाम्— 'एकोऽविभक्तः परमः पुरुषो विष्णुरुच्यते । प्रकृतिः पुरुषः कालस्त्रय एते विभागिनः ॥ चतुर्थस्तु महान् प्रोक्तः पञ्चमाऽहं-कृतिर्मता । तद्विभागेन जायन्ते आकाशाद्याः पृथक् पृथक् ॥ यो विभागी विकारी सः सोऽवि

कारः परो हरिः। अविभागात्परानन्दो नित्यो नित्यगुणात्मकः॥ विभागो ह्यल्पशक्तिः स्यान्न तदस्ति जनार्दने।' इति। विष्णुरविभक्तः, प्रकृत्याद्यस्त्रयो विभागवत्त्वेनोक्ताः। महानपि तथा; तत् तस्माद्धेतोः। न चास्य प्रागुक्तभाल्लवेयश्रुतिविरोधः, तत्र स्वरूपत उत्पत्तेरभावस्योक्तत्वात्। अनेन वियत्पदमनादित्वेन प्रसिद्धानां प्रकृत्यादीनामुपलक्षणार्थमिति सूचितम्। आकाशशब्देनेह भूताकाशतदीक्षता उच्यन्ते। तत्र भूतं स्वरूपत एवोत्पत्तिमत्, रूपित्वात् 'आकाशे नीलिमोदेति' इति श्रुतेः। तदभिमानिनोऽपि शरीरोत्पत्तिद्वारोऽस्त्येवोत्पत्तिः। अवकाशतदभिमानिनोस्तु परा-धीनविशेषलाभलक्षणोत्पत्तिः। एवं ब्रह्मजीवादीनामपीति माध्वाधिकरणशरीरम्॥

इह ब्रह्मशब्दवदिति दृष्टान्तोऽयुक्तः। 'बृह जातिजीवकमलासनशब्दराशिषु' इति धातुं कल्पयता माध्वेन विरिञ्चे रूढेः स्वीकारात्। 'यतो वा' इत्यादिवाक्यशेषात् रूढ्यर्थमत्रा-गत्य त्यज्यत इति 'जन्मादि' सूत्रेऽवोचः। बृहत्संहितास्थत्वेन त्वत्कल्पिते वचने पञ्चमीति वक्तव्ये पञ्चमेति टाबसाधुः। शरीरोत्पत्तिद्वारोत्पत्तिरिति ब्रुवतोत्पत्तेर्गौणत्वमेवोक्तं स्यात्। तथा च प्रागु-क्तमुख्यत्वव्याकोपः। परार्धानविशेषलाभ उत्पत्तिरिति तु अतिस्थवीयः। ब्रह्मणो जगत्कारण-ताया निर्वाहार्थं हि ब्रह्माभिन्नस्याखिलस्योत्पत्तिः स्थाप्यत इति ब्रवीषि। न च पारिभाषिक्याऽन-योत्पत्त्या कारणता निर्वहति, अनादीनां कार्यताया दुरुपपादत्वात्। 'यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया' इत्यप्यपार्थकमेव, त्वद्रीत्या भगवदनुग्रहोपेक्षयोः स्वरूपात्मकतया सर्वदा सद्-सत्त्वापत्तेः। किं च कदाचिदुपेक्षायामपि जीवानां नाशः स्यात्। कदाऽप्यसौ न तानुपेक्षत इति चेत्, तर्ह्युपेक्षा अलीकेति फलितोऽर्थः। तथा च 'न सन्ति यदुपेक्षया' इति त्वत्कल्पितषड्ङ्गश्रुतेः कथं नाप्रामाण्यम्? असदर्थबोधकत्वस्यैव तथात्वात्। 'तथान्यप्रतिषेधात्' 'आध्यानाय तु प्रयोजनाभावात्' इति त्वदधिकरणरीत्या ध्येयात्सगुणादन्यस्यैव ब्रह्मतया तत्र जगत्कारणत्वायोगा-नास्य प्रकरणस्थोक्त्यसंभवाच्चेति दिक्॥ १॥

'वायुर्वाव नित्यः' इत्यादिश्रुतेर्वायुर्नित्य[1] इति प्राप्ते सिद्धान्तमाह—

एतेन मातरिश्वा व्याख्यातः॥ ८॥

उत्पत्तेर्मुख्यत्वेनानुत्पत्तेर्गौणत्वेन विभागेन चेत्यर्थः। अत्र भूतवायोर्मुख्यैवोत्पत्तिः। देवतायास्तु [2]स्वरूपेणानादित्वेऽपि शरीरोपाधिकोत्पत्तिः पराधीनविशेषलाभरूपा चेति माध्वाः। खण्डनं प्राग्वत्॥ २॥

ब्रह्म उत्पद्यते न वेति संशये उत्पद्यत इति प्राप्तम्, 'असतः सदजायत' इति श्रुतेः। सिद्धान्तमाह—

---

1. ०र्वायोर्नित्यत्वे 2. स्वरूपेण नित्यत्वेऽपि

हायनीवदग्निप्रजापत्योः युगपत्संबन्धात्स्यादुभयविशिष्टमेकं कारकम्। यदा तु यजति-ददातिजुहोतिभ्य इव भावनाविभक्तिः प्रत्येकमग्निप्रजापतिभ्यामुच्चरन्ती देवताविभक्तिः अक्षरार्थभेदभिन्नामेव देवतां भावनामेव प्रतिपादयति, तदा कुतो देवतैक्यम्? देवतासामान्येन त्वेकत्वं भावनासामान्येन तुल्यमिति समस्तो वेद एकं वाक्यं स्यात्। अतो नामत्वे देवता-विधानासंभवादरूपत्वमिति गुणविधित्वमेव युक्तम्॥

अविहितदेवताकेषु वा दर्विहोमेषु गुणविधानाच्च[न्न] तत्प्ररूपत्वम्। आधारशब्देनापि स्मरणसमर्थं द्रव्यमाज्यपयःप्रभृत्यभिधीयते। तच्च द्वितीयानिर्देशादाधारणसंस्कार्यत्वेनाव-

---

धीनैकदेवताकारकविषयत्वेनाप्युपपन्ना न तद्भेदं गोचरयतीति प्राभाकरमतानुसारिणो देवताकारका-भेदाश्रयणेन भावनावैषम्यशङ्कां परिहरति— देवतासामान्येन त्विति। अयमाशयः— प्रत्याख्या-तं भावनेव प्रतिचतुर्थि देवता भिद्यत एव। न हि सा चतुर्थीकल्प्या; किं त्वाख्यातेन शक्त्या भावनेव चतुर्थ्या लक्षणया सा शब्दवृत्त्यैव बोध्या। द्रव्योद्देश्यत्वविशिष्टद्रव्यप्रतिग्रहीतृत्वरूपसंप्र-दानवाचिन्यास्तस्याः विशेषणभूतद्रव्योद्देश्यत्वरूपे[1] देवताकारके लक्षणाभ्युपगमात्। अत एव तद्धितो देवतावाची, चतुर्थी तल्लक्षिका, मन्त्रवर्णस्तत्कल्पकः इत्येतेषां देवताबोधने शीघ्रमन्थरम-न्थरतरत्वविशेषाद्बलाबलविशेषः। अन्यथा चतुर्थीमन्त्रवर्णयोर्देवताकल्पकत्वाविशेषाद्बलाबलविवेको न स्यात्; तस्माद्देवताभेद आवश्यक इति देवतात्वसामान्यैक्यवचनं प्रत्याख्यातं भावनाभेदेऽपि भावनात्वसामान्यैक्यवचनवन्निरर्थकमिति। अग्निसूर्यवाक्ययोस्तत्तद्देवताद्वयविशिष्टकर्मविधिप्रसा-धनस्य फलं अग्निहोत्रनामकहोमविधानस्य रूपाभावेनासंभवादग्निदेवतारूपगुणविधिरेव तत्र वाक्य इति प्राक्प्रतिज्ञातमर्थमुपसंहरति— अत इति। ननु अग्निसूर्यवाक्याभ्यां मा भूद्देवताद्वाभः। 'अ-ग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा' 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा' इति मन्त्रवर्णतस्तल्लाभः स्यादिति चेत्; न, तयोर्मन्त्रयोर्लिङ्गादग्निसूर्यवाक्यविहितकर्मद्वयान्वायित्वात्॥

अविहितदेवताकेषु वेति। नन्वत्र वाकारः किमर्थः? न हि पूर्वमग्निहोत्रशब्देनाग्नि-देवताविधेराश्रयान्तरमुक्तम्; येनायं सफलः स्यात्। स्यादेतत्। वार्तिके अग्निसूर्यवाक्ययोर्मध्ये अग्निवाक्यविहितसायंहोमे अग्नेः प्राप्तत्वात् तं परित्यज्य सूर्यवाक्यविहिते प्रातर्होमे अग्नि-देवताविधिरिति प्रथमं कश्चित्पक्ष उक्तः। तं पक्षं मनसि विपरिवर्तमानमपेक्ष्य पक्षान्तरप्रदर्श-नार्थो वाकार इति चेत्; न, प्रातर्होमस्योत्पत्तिशिष्टसूर्याद्यवरुद्धत्वेन तत्राप्यन्वयासंभवात्। ननु 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति गुणफलविधिरयमुत्पत्तिशिष्टदेवतान्तरावरुद्धेऽपि निवेशं लभत इति चेत्, तर्हि सायंहोमे कर्मार्थतयाऽग्नेः प्राप्तत्वेऽपि फलार्थतया प्राप्त्यभावात् 'दध्ना जुहोति'

---

1. रूपदेवता-

गम्यते । निष्प्रयोजनस्य संस्कारासंभवात्प्रयोजनापेक्षायां प्रकृतद्रव्यापेक्षोपांशुयाजार्थता

'दर्शेन्द्रियकामस्य' इति न्यायेन सायंहोमेऽपि गुणफलविधिः संभवतीति तत्र तत्परित्यागोक्तिरयुक्ता। ननु सायंहोमेऽपि फलार्थाग्निविधेरुपपद्यते चेत् सायंप्रातर्होमयोस्तद्विधिरिति कंचित्पक्षमपेक्ष्य पक्षान्तरप्रदर्शनार्थोऽयं वाकारोऽस्त्विति चेत्; इदमप्यनुपपन्नम्। एवं स्वर्गकामवाक्यमात्रस्य फलार्थगुणविधायकत्वोपपादनेऽपि 'अग्निहोत्रं जुहुयात्' इति फलश्रवणरहितवाक्यस्य फलार्थ-गुणविधायकत्वानुपपादनात्, तत्र अगत्या अग्निहोत्रनामककर्मविधेयत्वेनाग्निहोत्रपदप्रत्यभि-ज्ञानात् स्वर्गकामवाक्यं तस्यैव फलसंबन्धबोधकं स्यादिति सायंप्रातर्होमयोः केवलं प्रातर्होमे वा फलार्थगुणविधिरित्यघटनात्। तस्मात्केनापि प्रकारेणान्यत्र गुणविधिपक्षमपेक्ष्य पक्षान्तरप्रदर्श-नार्थत्वं वाकारस्य नोपपद्यत इति चेदुच्यते— अग्निहोत्रवाक्य एव अग्निदेवताविशिष्टहोमविधि-रिति प्रथमं कंचित्पक्षमभिप्रेत्य वाकारः। यद्वा अग्निसूर्यवाक्ययोर्देवतारूपगुणमात्रविधायकत्वे वस्तुतो न वाक्यभेदः। मन्त्रवर्णप्राप्ताग्निसूर्यानुवादेन प्रजापतिमात्रविधेर्मन्थकृतैव सिद्धान्ते वक्ष्य-माणत्वात्। न चानयोर्विशिष्टविधित्वसमर्थनेनैव अरूपत्वपूर्वपक्षोपपादनं कार्यमिति निर्बन्धोऽस्ति। अग्निसूर्यवाक्यसन्निधिश्रुतयोः सायं जुहोति प्रातर्जुहोतीति वाक्ययोरनुपादेयकालसंबन्धात्कर्म-विधिरवश्यंभावीति तद्वाक्यद्वयविहितहोमयोः सायंप्रातःशब्दप्रत्यभिज्ञानवद्भ्यामग्निसूर्यवाक्याभ्यां देवताविधिरिति समर्थनेन रूपालाभपूर्वपक्षोपपत्तेः। तस्मादिह विशिष्टविधिप्रसाधने ग्रन्थकारस्य नादरः। किं त्विह विशिष्टविधिर्वास्तु, सायंप्रातर्होमयोर्देवताविधिर्वाऽस्तु; सर्वथा रूपं न लभ्यत इति तात्पर्यम्। एवं चावश्यकल्पनीयाविधिविधेययोः सायंप्रातर्होमयोरेवाग्निसूर्यवाक्याभ्यां देवतामात्रविधिः विशिष्टविधिगौरवपरिहारायाभ्युपगन्तुं युक्त इति तत्रैव ग्रन्थकारस्य तात्पर्यावगमा-यात्। अग्निसूर्यवाक्यविधेयदेवतानामग्निहोत्रवाक्यविहिताग्नेश्चोत्पत्तिशिष्टत्वाविशेषात्[2] अग्निप्राप्ति-मन्तं सायंहोमं परित्यज्य प्रातर्होमे सूर्यप्रजापतिभ्यां सह विकल्पेनाग्निदेवताविधिरिति यथावार्तिकं स्थितं प्रथमपक्षमपेक्ष्य सायंहोमेऽपि अग्निप्रजापतिभ्यां सह विकल्पेनाग्निविधिरिति पक्षमपेक्ष्य वा पक्षान्तरप्रदर्शनार्थो वाकारः। पक्षद्वयेऽपि यत्र अग्निदेवताविधिस्तत्रैव दध्यादिवत्तस्याः फलार्थ-तया विधानार्थं स्वर्गकामवाक्यम्। अनेन च वाकारेण विकल्पपक्षे किंचिदस्वारस्यमपि ध्वनितम्— सायंप्रातःशब्दयुक्तवाक्यविहितहोमयोः सायंप्रातःशब्दयुक्तविधिविधेयतया विशेषविशिष्टाभ्यामग्नि-प्रजापतिभ्यां सूर्यप्रजापतिभ्यां च तद्रहिताग्निहोत्रवाक्यविधेयतया सामान्यशिष्टस्याग्नेर्विकल्पो न युक्तः इति। एवमग्निहोत्रवाक्येन [3]स्वविधेयहोमे अग्निविधिः, प्रातर्होमे सायंप्रातर्होमयोर्वा विकल्पेनाग्न-विधिः, अविहितदेवताकेषु दर्विहोमेषु वा तद्विधिरिति पूर्वपक्षं प्रदर्श्य आधारवाक्येऽपि पूर्वपक्षमुप-पादयति— आधारमिति 'घृ क्षरणदीप्त्योः' इति धातोर्घञन्तेनोक्ते क्षरणयाग्ये पयःप्रभृतौ द्रवद्रव्ये आधारयतीति क्षरणसंस्काररूपगुणविधिः, संस्कृतस्य च द्रव्यापेक्षोपांशुयाजरूपप्रधानयागे विनियोग इत्याह— आधारशब्देनापीति। ननु च यदेव नाम शाङ्खायनेनोक्तेऽभिमतं तस्यैव पूर्वपक्षिणा विधे-

---

1. तात्पर्यपर्यवसानात् 2. विहिताग्नेश्चोत्पन्नशिष्टत्वाविशेषात् 3. स्वविधेयहोमे सायं-प्रातर्होमयोर्वाऽग्निविधिः। प्रातर्होमे सूर्यविकल्पेनाग्निविधिः। अविहित०

विज्ञायते। प्रकरणेन च गुणे विधीयमाने नास्ति मत्वर्थलक्षणा, मतुप्प्रत्ययप्रयुक्तस्यैव वाक्यस्य प्रकरणेन कल्पनात्। न चात्र यागो विधीयते, संस्कारमात्रश्रवणात्। न च संस्कारकर्माणि क्वचिन्नामवन्ति दृश्यन्ते; तस्माद्गुणविधिः। एवं च द्वितीयानिर्देशो युक्तो भवति, आधारस्य संस्कार्यत्वात्। अग्निहोत्रे चार्थाक्षिप्तसाध्यत्वानुवादेनोपसर्जनार्थविधानात्। नामधेयत्वे तु

यार्थता वाच्या, यथा अग्निहोत्रशब्दे; न चात्र तथा; सिद्धान्ते ह्याधारपदं नाम, पूर्वपक्षे त्वाधारयतिपदं विधेयार्थम्। किं च, अग्निहोत्रवाक्ये सामानाधिकरण्येन गुणविधिः, आधारवाक्ये वैयधिकरण्येन। अतोऽग्निहोत्राधारवाक्ययोर्वैरूप्येण पूर्वपक्षसिद्धान्तप्रवृत्तेरधिकरणभेदः स्यात्। यद्युच्येत— मत्वर्थलक्षणां विना गुणविधिसंभवरूपं पूर्वपक्षबीजं उदाहरणद्वयेऽप्येकरूपमित्येकाधिकरण्यमुपपद्यत इति, नैतदपि युक्तम्। संस्कृतद्रव्यस्य [1]यागेषु विनियोजके वाक्ये मत्वर्थलक्षणावश्यंभावादित्याशङ्क्याह— प्रकरणेन चेति। मतुप्प्रत्ययप्रयुक्तस्यैवेति। उदाहृतश्च वार्तिके पूर्वाचार्यश्लोकः— 'श्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पने। लक्षणावाक्यभेदादिदोषो नानुमिते क्षमः॥' (तन्त्रवार्तिकं १. ४. ३.) इति। ननु संस्कृतद्रव्यद्रव्यविनियोगाकाङ्क्षया यागसंबन्धोऽवश्यापेक्षितश्चेत् प्राकरणिकं यागान्तरं किमर्थमन्वेषणीयम्? किमर्थं च तत्संबन्धबोधकं वाक्यान्तरं कल्पनीयम्। आधारवाक्यं एव यागविधिरस्तु। तथा च मत्वर्थलक्षणाविशिष्टविधिगौरवपरिहाराय आधारपदं यागनामैव स्यादित्याशङ्क्याह— न चात्रेति। संस्कारमात्रश्रवणादिति। आधारयतिधातोर्हि क्षारणमेवार्थः, न याग इत्यर्थः। 'वैश्वदेवीँ सांग्रहणीं निर्वपेत्' इत्यत्र निर्वापसंस्कारश्रवणेऽपि सांग्रहणीपदस्य यागनामत्वं तन्नामकयागविधानं च संप्रतिपन्नम्; तथेह किं न स्यादित्याशङ्क्य मात्रेत्युक्तम्। तत्र सांग्रहणीपदार्थस्य यागान्यभिचारिदेवतासंबन्धश्रवणं तस्य यागनामत्वकल्पकं तन्नामकयागविधिकल्पकं चाधिकं श्रूयते। नात्र तथा संस्कारादधिकं श्रूयत इत्यर्थः। नन्वाधारयोग्यस्य द्रव्यद्रव्यसामान्यस्य आधारविधिनैवार्थलभ्यत्वात्तत्परतायामाधारपदं व्यर्थम्। ततो वरं नामैवास्त्वित्याशङ्क्याह— न च संस्कारकर्माणीति। यानि संकल्पपरिग्रहणादिव्यवहाररहितानि संस्कारकर्माणि तेषामनुपयुक्तं नाम। अत एव तेषामन्यत्रापि क्वचिदपि नाम न दृश्यते इत्यर्थः। नन्वाधारपदस्य द्रव्यद्रव्यसामान्यपरत्वेऽपि तुल्यं वैयर्थ्यमित्याशङ्क्याह— एवं चेति। किं द्रव्यप्रधानोऽयमाधारणविधिः, उत द्रव्यगुणक इति संदेहप्रसक्तौ द्रव्यप्रधान इति निर्णयाय द्वितीयानिर्देशेन भाव्यम्। न च केवला विभक्तिः प्रयोगार्हेति तदनुग्रहार्थः प्रकृत्यंशः। यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र गुणफलविधौ प्रकरणप्राप्तस्यैव होमस्याश्रयत्वेऽपि सिद्धविभक्त्यनुग्रहार्थो धातुरूपप्रकृत्यंश इति भावः। संस्कार्यत्वादिति। अध्ययनाद्धेतोर्वसतीतिवत् प्रयोजनस्य हेतुत्वविवक्षया पञ्चमी; संस्कार्यत्वमुद्दिश्य इति स्यङ्लोपे वा पञ्चमी। उभयथाऽपि संस्कार्यत्वसिद्ध्यर्थमित्यर्थः। ननूपपद्य-

---

1. उपांशुयाजे; प्रयाजेषु

तस्माविधेयत्वात्कर्मैव विधेयम्। तच्च करणमिति नामधेयं तृतीयान्तं स्यादनुपपन्ना द्वितीया स्यात्। न च फलवाक्य एव कर्मणः करणत्वम्, उत्पत्तिवाक्ये तु फलवाक्यापेक्षितकर्मस्वरूपकर्तव्यतैव प्रतिपाद्यत इति वाच्यम्। विधेः करणत्वावगमात्कर्मत्वासंभवात्, साध्यत्वे च तस्य साध्यान्तरानपेक्षत्वान्न फलवाक्येनापि फले विधातुं शक्यत इति कर्मान्तरमेव फलवाक्ये स्यात्। तथा चाधाराग्निहोत्राधिकरणे वक्ष्यते— न ह्यकरणभूतोऽसौ साध्यान्तरान-

---

तामाधारवाक्ये द्वितीया, अग्निहोत्रवाक्ये तु नोपपद्यते, प्रातर्होमस्य दर्विहोमानां वा फलभावनाकरणत्वेनोत्पन्नतया तथैवानुवदितव्यत्वादित्याशङ्क्याह— अग्निहोत्रे चेति। उत्पत्तिवाक्येषु करणतया श्रुतानामपि धात्वर्थानामसाधितानां करणत्वायोगेनार्थात्साध्यत्वमप्याक्षिप्तमस्तीति तेन रूपेणानूद्योपसर्जनार्थदेवताविधानात् द्वितीयानिर्देशो युक्तो भवतीत्यर्थः। प्रत्युत नामत्वपक्ष एव तन्निर्देशानुपपत्तिरित्याह— नामधेयत्वे त्विति। फलवाक्य एव धात्वर्थस्य करणतया अन्वयः। उत्पत्तिवाक्ये तु यदपेक्षितेन साध्यत्वेनेति प्राभाकरमतमाशङ्क्य निराकरोति— न चेति। विधेरिति। [1]अन्यथा न प्रवर्तयितुं शक्त इत्यर्थः। यद्यत्रापरो[2] ब्रूयात्— कर्तव्यतावगतिरेव प्रवृत्तिहेतुर्नेष्टसाधनतावगतिः। अतः प्रवृत्त्यर्थं न तद्बोधनापेक्षेति; तत्राह— साध्यत्वे चेति। यद्युत्पत्तिवाक्ये धात्वर्थस्य कृतिसाध्यत्वेनावगतिस्तदा धात्वर्थकर्तव्यतावगमादेव तत्र प्रवृत्तिसिद्धेः साध्यान्तरानपेक्षणात्फले तन्न विधातुं शक्यमिति फलवाक्येन फलकरणतया बोध्यमानं कर्मान्तरं स्यात्। तस्मादुत्पत्तिवाक्येऽपि करणतावोधनमेष्टव्यमित्यर्थः। इदमेव दूषणमाधाराग्निहोत्राधिकरणे वार्तिककारैर्वक्ष्यत इत्याह— तथा चेति। वार्तिके प्राचीनानामष्टौ धात्वर्थविधानादिपक्षा दूषिताः। तत्र धात्वर्थविधानपक्षे समानप्रत्ययोपात्तभावनातिलङ्घनेन विधेर्धात्वर्थसंक्रमो न युक्त इत्यादिदूषणान्यभिधाय दूषणान्तरत्वेनेदमुक्तम्— 'न ह्यकरणभूतोऽसौ' इत्यादि। तत्र उत्पत्तिवाक्ये धात्वर्थविधिवादित्वाविशेषेण न्यायसाम्यात्प्राभाकरमतानुसारिणं प्रत्यत्रोदाहृतम्। यद्यप्युत्पत्तिवाक्ये साध्यत्वेन विहितस्य किमर्थमपुरुषार्थः साध्यत इत्यपेक्षायां फलवाक्ये फलकरणत्वेन विधानान्नापुरुषार्थत्वमित्येवमुभयसाम्यं वक्तुं शक्यम्। न चोत्पत्तिवाक्ये साध्यत्वेनान्वये पुरुषस्य किमर्थमित्यपेक्षायामपि विधेयस्य करणत्वानवगतेः साध्यानपेक्षत्वात् पदार्थापेक्षां च विना पदार्थान्तरान्वययोगात् फलवाक्येऽपि करणत्वेन विधिर्न सिध्येत्। अत उत्पत्तिवाक्येऽपि करणत्वेन विधिरेष्टव्य इति वाच्यम्। न हि पुरुषस्य किमर्थमित्यपेक्षा स्वतन्त्रा फलकरणत्वेनान्वयहेतुरुच्यते; किं तु, विधेः प्रवर्तकत्वसिद्धयर्था विध्यधीना सैव च पदार्थापेक्षेति कथं तथा फलवाक्ये करणत्वेनान्वयो न सिध्येत्? अन्यथा उत्पत्तिवाक्यफलवाक्ययोरुभयोरपि करणत्वेनान्वय इत्येतदपि न सिध्येत्। पुरुषस्य कैमर्थ्याकाङ्क्षायामपि पदार्थानां न साऽस्तीति त्वदुक्त्या रीत्या समानपदोपात्तस्य यागस्यैव साध्यत्वे-

---

1. प्रवर्तको विधिरिष्टसाधनताबोधनमन्तरेण न 2. परो

हलायुध इति । हरभूधराभ. कैलासनिभोऽसौ पुरोवर्ती हलायुधः बलभद्रः । 'कामपालो हलायुधः' इत्यमरः । नीले मेचकं अम्बरे वाससी । 'अम्बरं व्योम्नि वाससि' इत्यमरः । तयोर्युगेन युगलेन । 'युग्मं तु युगलं युगम्' इत्यमरः । रोषात् कोपाद्धेतोः हलेन सीरेण । 'लाङ्गलं हलं गोदारण च सीरोऽथ' इत्यमरः । द्विधाकृतेन द्विप्रकारीकृतेन यमुनापगायाः कालिन्दीनद्याः । 'कालिन्दी सूर्यतनया यमुना शमनस्वसा' इत्यमरः । पूरेण प्रवाहेण बद्धः नद्ध इव विभाति । एतेनास्य शौर्यं सूचितम् ॥ ६ ॥

वंशे यदूनां विहितावतारः श्रीवत्सलक्ष्मा पुरुषः स एषः ।
विच्छायतां येन हृते द्युवृक्षे शचीमुखं नन्दनवत्प्रपेदे ॥ ७ ॥

वंश इति । एष पुरोवर्ती यदूनां यदुवंश्यानां वंशे कुले, 'द्वौ वंशौ कुलमस्करौ' इत्यमरः । विहितः कृतः अवतारो येन सः, पः प्रसिद्धः, श्रीवत्सो नाम शुक्लरोमावर्तं लक्ष्म चिह्नं यस्य सः पुरुषः कृष्ण इत्यर्थः । 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः । येन कृष्णेन द्युवृक्षे पारिजाते हृते सति शचीमुखं इन्द्राणीवदनं कर्तृ । 'पुलोमजा शचीन्द्राणी' इत्यमरः । नन्दनवत् इन्द्रोद्यानमिव विगता छाया कान्तिरनातपश्च यस्य तत्, तस्य भावस्तत्ता तां विच्छायतां, 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपम्' इत्यमरः । प्रपदे; शचीमुखं नन्दनमपि शोभाच्छाया-विहीनमासीदित्यर्थः । एतेन पारिजातहरणसमये योद्धुं समागतनिखिलसुरविजयः सूचितः ॥

अस्यान्तिके सात्यकिमुख्य एष विभाति वृष्ण्यन्धकभोजवर्गः ।
प्रसूनबाणोदयकारणस्य ज्योतिर्गणः पत्युरिवौषधीनाम् ॥ ८ ॥

अस्येति । प्रसूनबाणः प्रद्युम्नस्तस्य उदय उत्पत्तिः तस्य कारणस्य हेतोः अस्य कृष्ण-स्यान्तिके समीपे । 'उपकण्ठान्तिकाभ्यर्ण...' इत्यमरः । सात्यकिः कृष्णानुजः मुख्यः आदिर्यस्य स तथोक्तः । एष पुरोवर्ती वृष्णीना अन्धकानां भोजानां च वर्गः समूहः । वृष्ण्यन्धकभोजशब्दै-स्तदपत्यानि लक्ष्यन्ते । प्रसूनबाणोदयकारणस्य मदनोद्भवनिमित्तस्य ओषधीनां पत्युश्चन्द्रस्यान्ति-के ज्योतिषां नक्षत्राणाम्, 'ज्योतिर्भद्योतदृष्टिषु' इत्यमरः । गणः सङ्घ इव विभाति राजते ॥ ८ ॥

अयं जरासन्ध इति क्षितीशो वारान्दशाष्टौ च जिते मुरारौ ।
पराङ्मुखे शूरगुणानुरक्ता श्रीरेव यस्याभिमुखीबभूव ॥ ९ ॥

अयमिति । अयं पुरोवर्ती जरासन्धः इति प्रसिद्धः क्षितीशो राजा । मुरारौ कृष्णे दश अष्टौ च वारान संभूय अष्टादशकृत्व इत्यर्थः । अत्यन्तसंयोगे द्वितीया । जिते पराजिते पराङ्मुखे सति शूरगुणेषु अनुरक्ता श्रीर्लक्ष्मीरेव यस्य जरासन्धस्याभिमुखीबभूव । पत्यौ पराजिते तत्प्रिया-

ऽभियाति स्मेत्याश्चर्यम्। वस्तुतस्तु जयश्रीरभिमुखीबभूवेति भावः। तदुक्तं भागवते— 'जरासुतेन बलिना वारानष्टौ दशापि च। जितोऽहं जलधेर्मध्ये निवसामि पृथासुत॥' इति॥ ९॥

प्राग्ज्योतिषेशो भगदत्त एष यस्यौपवाह्यो युधि सुप्रतीकः।
स्मेराणि वक्त्राम्बुजकाननानि मृद्नात्ययत्नादरियोधयूनाम्॥

प्राग्ज्योतिषेति। एषः पुरोवर्ती भगदत्तः भगदत्ताख्यः प्राग्ज्योतिषेशः प्राग्ज्योतिषदेशाधिनाथः। युधि युद्धे, 'समित्याजिसमिद्युधः' इत्यमरः। यस्य भगदत्तस्य औपवाह्यो वाहनम्, 'राजवाह्यस्त्वौपवाह्यः' इत्यमरः। सुप्रतीको नाम दिग्गजः। 'सुप्रतीकश्च दिग्गजाः' इत्यमरः। अरियोधाः शत्रुभटाः ते च ते युवानस्तरुणाः इत्यर्थः। 'भटा योधाश्च योद्धारः' इति 'वयस्थस्तरुणो युवा' इति चामरः। स्मेराणि विकस्वराणि। 'नमिकम्पि' इति रप्रत्ययः। वक्त्राम्बुजकाननानि वक्त्रपद्मगहनानि। 'गहनं कानने वनम्' इत्यमरः। अयत्नाद्यत्नाभावेन लीलयैवेत्यर्थः। मृद्नाति मर्दयति। मृदेः क्र्यादिकाल्लट्। अरियोधयूनामित्यत्र 'युवा खलतिपलितवलिनजरतीभिः' इत्यस्य सूत्रस्य नियमार्थत्वात् युवन्शब्दस्य पूर्वनिपाताभावः॥ १०॥

चेदीश्वरोऽसौ शिशुपालनामा तृणाय शौरिं भुवि मन्यते यः।
शल्योऽयमासाद्य यमीशितारं भद्राणि सर्वेऽपि भजन्ति मद्राः॥

चेदीश्वर इति। असौ पुरोवर्ती शिशुपालनामा शिशुपालाख्यश्चेदीश्वरः चेदिदेशाधिपः। यः शिशुपालः भुवि भूमौ शौरिं कृष्णं तृणाय मन्यते तृणादपि निकृष्टतरं मन्यत इत्यर्थः। 'मन्यकर्मण्यनादरे' इति चतुर्थी। अयं पुरोवर्ती शल्यः शल्याख्यो राजा। सर्वेऽपि मद्राः देशविशेषाः यं शल्यमीशितारं स्वामिनमासाद्य; 'स्वामी त्वीश्वरः पतिरीशिता' इत्यमरः। भद्राणि सुखानि भजन्ति प्राप्नुवन्ति॥ ११॥

निधिर्महिम्नां महनीयकीर्तिर्माहिष्मतीनायक एष नीलः।
प्रयुक्तहेतेः समरे परेषु तनूनपाद्यस्य तनोति साह्यम्॥ १२॥

निधिरिति। महिम्नां महत्त्वानां निधिः स्थानं महनीयकीर्तिः श्लाघ्ययशाः एषः पुरोवर्ती नीलः नीलाख्यः माहिष्मती नाम नगरी तस्या नायकः पतिः। समरे युद्धे परेषु शत्रुषु प्रयुक्तहेतेः प्रयुक्तायुधस्य। 'रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः' इत्यमरः। यस्य नीलस्य, तनूं न पातयतीति तनूनपादग्निः। 'न भ्राण्णपात्' इत्यादिना नञ्प्रकृतिभावाल्लोपाभावः। साह्यं सहायत्वं तनोति करोति; देवतासहायोऽयमिति भावः॥ १२॥

एतेऽपि चान्ये बहवस्त्वदर्थमिहागता भूपतयो महान्तः ।
अमीषु कंचित्कृतलक्ष्यवेधं भद्रे वृणीतां भवती वरेण्यम् ॥१३॥

एतेऽपीति । एतेऽपि पूर्वोक्ताश्चान्ये च बहवोऽनेके महान्तो भूपतयस्त्वदर्थं त्वन्निमित्तमिहागताः । हे भद्रे हे कल्याणि, भवती त्वममीषु भूपतिषु मध्ये, कृतः लक्ष्यस्य शरव्यस्य वेधः ताडनं येन तं तथोक्तम् । 'व्यधो वेधः' इत्यमरः । कंचिद्वरेण्यं वरणीयं, वृणोतेरौणादिक एण्यप्रत्ययः । वृणीता वृणीष्वेत्यर्थः । वृञ् वरणे इत्यस्माद्धातोः लोटि 'ई हल्यघोः' इति ईत्वम् । शेषे प्रथमः ॥ १३ ॥

अथोदतिष्ठन्कनकासनेभ्यः कन्या ममैवेयमिति ब्रुवाणाः ।
सज्यं धनुस्तत्र विधातुकामाः सदस्यहंपूर्विकया नरेन्द्राः ॥१४॥

अथेति । अथानन्तरं नरेन्द्राः राजानः इयं कन्या ममैवेति ब्रुवाणाः सन्तः धनुश्चापं सज्यं समौर्वीकं विधातुकामाः सन्तः तत्र सदसि सभाया कनकासनेभ्यः, सुवर्णपीठेभ्यः सकाशात् अहं पूर्वमहं पूर्वमस्यां क्रियायामिति सर्वैर्यत्प्रोच्यते सा अहंपूर्विका । स्वार्थे कन्, मत्वर्थीयो वा ठन् । 'अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम्' इत्यमरः । तयाऽहंपूर्विकया उदतिष्ठन उत्थितवन्तः । 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदमत्र न भवति, अनूर्ध्वकर्मणीति प्रतिषेधात् ॥ १४ ॥

शरासनारोपणतत्पराणां गणं यदूनां विनिवार्य कृष्णः ।
पृथासुतान्मध्यगतान् द्विजानां प्रदर्शयामास हलायुधाय ॥१५॥

शरासनेति । कृष्णो वासुदेव शरासनारोपणतत्पराणां चापारोपणोत्सुकानां यदूनां गणं समूह विनिवार्य वारयित्वा, द्विजानां विप्राणा मध्यगतान् पृथासुतान् युधिष्ठिरादीन् हलायुधाय बलदेवाय प्रदर्शयामास । इय कन्या पाण्डवैरेव प्राप्यते, नान्यैरिति बलभद्रं नेत्रसंज्ञया वारयन् प्रादर्शयदित्यर्थः ॥ १५ ॥

रङ्गस्थलालङ्करणायमानं शरासनं तद्गिरिराजसारम् ।
नालं ग्रहीतुं कतिचिन्नरेन्द्रा गृहीतमारोपयितुं च केचित् ॥१६॥

रङ्गेति । रङ्गस्थलस्यालङ्करणायमानं अलंकरणपदात् आचारक्यङन्तात् शानच् । गिरिराजस्य हिमगिरेरिव सारो यस्य तत् । 'हिमालयोऽद्रिराजः स्यात्' इत्यमरः । शरासनं चापं कतिचित् नरेन्द्रा राजानः ग्रहीतुं उपादातुं नालं न समर्थाः । केचित् नृपाः गृहीतं चापमारोपयितुं आरोपितमौर्वीकं कर्तुं नालं । 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः ॥ १६ ॥

आरोपयञ्ज्यामथ माषमात्रे पपात विद्धो धनुषा स नीलः ।
मुद्गान्तरे सत्वनिधिस्तु शल्यः स मागधः सर्षपमात्र एव ॥१७॥

आरोपयन्निति । अथानन्तरं सः नीलः प्रसिद्धः ज्यां मौर्वीं 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । आरोपयन् आरोपितां कुर्वन् माषमात्रे माषबीजप्रमाणे सत्येव धनुषा विद्धः सन् पपात । सत्वस्य बलस्य निधिः स्थानं शल्यस्तु मद्राधिपः पुनः मुद्गान्तरे मुद्गबीजमात्रव्यवधाने सति धनुषा विद्धः सन् पपात । सः प्रसिद्धः मागधः सर्षपमात्रे सर्षपप्रमाणे सत्येव धनुषा विद्धः सन् पपात ॥

चापं महान्तं तपनस्य सूनावधिज्यमातन्वति रोममात्रे ।
स तं विचिक्षेप विकीर्णमाल्यमाधोरणं दुष्ट इव द्विपेन्द्रः ॥१८॥

चापमिति । तपनस्य सूर्यस्य सूनौ कर्णे महान्तं चापं अधिज्यं आरोपितमौर्वीकं आतन्वति कुर्वति सति स चापः रोममात्रे सत्येव तं कर्णं दुष्टो दप्तः द्विपेन्द्रः गजश्रेष्ठः आधोरणं हस्तिपकमिव विकीर्णानि इतस्ततः पर्यस्तानि माल्यानि स्रजो यस्मिन् कर्मणि तद्यथा भवति तथा विचिक्षेप विक्षिप्तः । 'आधोरणा हस्तिपकाः' इत्यमरः ॥ १८ ॥

इत्थं वृथाभूतमनोरथेषु सुयोधनाद्येषु नराधिपेषु ।
द्विपेन्द्रहस्तो महतां द्विजानां मध्यादुदस्थान्मघवत्कुमारः ॥१९॥

इत्थमिति । सुयोधनाद्येषु दुर्योधनप्रभृतिषु नराधिपेषु राजसु इत्थं उक्तप्रकारेण वृथाभूतमनोरथेषु विफलिताभिलाषेषु सत्सु । 'वाञ्छा लिप्सा मनोरथः कामोऽभिलाषः' इत्यमरः । द्विपेन्द्रस्य गजश्रेष्ठस्येव हस्तौ यस्य सः, आजानुबाहुरित्यर्थः । मघवत्कुमारः शक्रसूनुरर्जुनो महतां महात्मनां द्विजानां विप्राणां मध्यादुदस्थादुत्थितवान् । तिष्ठतेर्लुङि 'गातिस्था' इति सिचो लुक् ॥

द्विजेषु हृष्यत्सु स रङ्गमध्ये विकृष्य सज्यं धनुरुज्झितेन ।
विद्धं शरव्यं विशिखेन यन्त्रादपातयद्राजकतोऽभिमानम् ॥२०॥

द्विजेष्विति । सोऽर्जुनः द्विजेषु हृष्यत्सु 'अस्मदीयोऽयं शरव्यं पातयिष्यति' इति नन्दत्सु सत्सु रङ्गमध्ये सज्यं सगुणं धनुर्विकृष्य उज्झितेन त्यक्तेन विशिखेन शरेण विद्धं ताडितं शरव्यं लक्ष्यं यन्त्रात्सकाशादपातयत् । राजकतः राजसमूहादपि अभिमानं लक्ष्यवेधनविषयमहङ्कारमपातयत् । अर्जुनेन शरव्ये विद्धे सति राजानो गर्वं जहुरिति भावः । राजकत इत्यत्र 'गोत्रोक्ष—' इत्यादिना समूहार्थे वुञ् । 'अथ राजक । राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात ।' इत्यमरः ॥ २० ॥

तं दिव्यपुष्पप्रकराभिवृष्टं मनोभवं मूर्तमिवात्तचापम् ।
श्लाघापरेवाब्जनिभैरपाङ्गैरवाकिरत्संसदि राजपुत्री ॥ २१ ॥

तमिति । संसदि सभायां राजपुत्री द्रौपदी दिव्यानां दिवि भवानां पुष्पाणां प्रकरः समूहस्तेनाभिवृष्टमभिषिक्तं मूर्तं साकारमात्तचापं धृतधनुषं मनोभवं मदनमिव स्थितं तमर्जुनं श्लाघा अर्जुनप्रशंसैव परा प्रधानं यस्याः सा तथोक्तेव । श्लाघतेः 'गुरोश्च हलः' इति स्त्रिया प्रत्ययः । अब्जनिभैः पद्मसदृशैरपाङ्गैः कटाक्षैरवाकिरदवकीर्णवती ॥ २१ ॥

तयाऽधिकण्ठं निहितामुदारां कल्हारमालामुरसा दधानः ।
रराज भूयः सुरराजसूनुः सगैरिकस्यन्द इवाञ्जनाद्रिः ॥ २२ ॥

तयेति । तया द्रौपद्या अधिकण्ठं कण्ठे, विभक्त्यर्थेऽव्ययीभावः । निहितां निक्षिप्तामुदारां रम्यां कल्हारमालां सौगन्धिकस्रजम्, 'सौगन्धिकं तु कल्हारम्' इत्यमरः । उरसा दधानः सुरराजसूनुरर्जुनः सगैरिकस्यन्दः सधातुनिष्यन्दः अञ्जनाद्रिरञ्जनगिरिरिव भूयः अत्यर्थं रराज ॥

[1]तृणाय मत्वा नरनायकानां निकायमायामिभुजः स वीरः ।
आदाय कन्यां निरियाय रङ्गाच्छौर्योदधिः शौल्किकचापपाणिः ॥

तृणायेति । आयामिभुजो दीर्घबाहुः शौर्योदधिः वीर्यसागरः शुल्कं मूल्यं प्रयोजनमस्य शौल्किकः स चासौ चापश्च शौल्किकचापः स पाणौ यस्य स तथोक्तः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यात् पाणिशब्दस्य परनिपातः । स वीरोऽर्जुनो नरनायकानां नरपतीनां निकायं समूहं तृणाय मत्वा तृणादपि निकृष्टतरं मत्वा । 'मन्यकर्मणि' इति चतुर्थी । कन्यामादाय रङ्गान्निरियाय निर्गतवान् ॥ २३ ॥

मूढोऽयमस्मानवमत्य कृष्णामदाद्द्विजायेति नृपाय कुप्यत् ।
द्रुतोद्धृतक्ष्मारुहभीमयुक्तः प्रत्युद्ययौ राजकमिन्द्रसूनुः ॥ २४ ॥

मूढ इति । मूढो दुर्बुद्धिरयं द्रुपदः अस्मानवमत्य कृष्णां द्रौपदीं द्विजाय विप्रायादात् दत्तवानित्यनेन प्रकारेण [2]मत्वेत्यर्थः । नृपाय द्रुपदाय कुप्यत् कुध्यत् । 'क्रुधद्रुह...' इत्यादिना चतुर्थी । राजकं राजसमूहं कर्म, इन्द्रसूनुरर्जुनः द्रुतं शीघ्रं यथा तथा उद्धृतः उत्पाटितः क्ष्मारुहो वृक्षो येन स चासौ भीमश्च तेन युक्तः सन् प्रत्युद्ययौ प्रत्युज्जगाम ॥ २४ ॥

---

1. तृणानि 2. उक्त्वेत्यर्थः

दण्डैरमीभिर्दलितावलेपान्नृपान्विधास्याम इति ब्रुवाणान् ।
स्मेराननेन्दुर्निखिलान्द्विजातीन्निवारयन्कार्मुकमाचकर्ष ॥ २५ ॥

दण्डैरिति । अमीभिर्दण्डैर्यष्टिभिः साधनैः । 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडेऽपि च' इत्यमरः । नृपान् दलितावलेपान् खण्डितगर्वान् विधास्यामः करिष्याम इति ब्रुवाणान्निखिलान् द्विजातीन्विप्रान्निवारयन्निरुन्धन्नर्जुनः स्मेराननेन्दुः सस्मितमुखचन्द्रः सन् कार्मुकं धनुराचकर्ष ॥ २५ ॥

कर्णेन पार्थं सह युध्यमानं भीमं च शल्येन नियुध्यमानम् ।
तौ [1]श्लाघयन्तः शतशो नरेन्द्राः सुरा इव प्रेक्षकतामवापुः ॥

कर्णेनेति । कर्णेन सह युध्यमानं पार्थम्, शल्येन सह नियुध्यमानं बाहुयुद्धं कुर्वाणं भीमं च तौ भीमार्जुनौ श्लाघयन्तः प्रशंसन्तः ; स्तोमयन्त इति पाठे स एवार्थश्च 'स्तोम श्लाघायाम्' इति चौरादिकः । श्लाघिरपि चौरादिक एव । शतशो नरेन्द्रा राजानः सुरा देवा इव प्रेक्षकतां द्रष्टृत्वमवापुः, न त्वयुध्यन्तेति भावः ॥ २६ ॥

द्विजातिबुद्ध्या मृदुबाणमोक्षो विद्धः शरैर्मर्मसु फल्गुनेन ।
ब्राह्मं किलाजय्यमवेत्य तेजो रवेः कुमारः समरान्निवृत्तः ॥ २७ ॥

द्विजातीति । द्विजातिबुद्ध्या ब्राह्मणोऽयमिति बुद्ध्या मृदुः बाणमोक्षो यस्य सः, फल्गुनेन मर्मसु शरैर्विद्धः सन् रवेः कुमारः कर्णः, ब्राह्मं ब्राह्मणसंबन्धि 'ब्राह्मोऽजातौ' इति निपातनात् ब्रह्मन्शब्दादाणि परतष्टिलोपः । तेजो वर्चस्तदीयं जेतुमशक्यं किलेति प्रसिद्धौ । 'अच्यजय्यौ शक्यार्थे' इति निपातनात्साधुः । 'जय्यो यः शक्यते जेतुम्' इत्यमरः । अवेत्य ज्ञात्वा समरात् युद्धात् निवृत्तः निववृते ॥ २७ ॥

भीमस्तु निर्वर्तितबाहुयुद्धमुत्क्षिप्य शल्यं भुवि पातयित्वा ।
यन्नावधीन्मातुलमार्तबन्धुः श्लाघ्योऽभवत्तेन यशोधनानाम् ॥

भीम इति । आर्तबन्धुः भीमस्तु निर्वर्तितबाहुयुद्ध समापितनियुद्ध मातुलं मातुर्भ्रातरं शल्यमुत्क्षिप्योन्नमय्य भुवि भूमौ पातयित्वा नावधीत् न जघानेति यत्, तेनाहननेन यशोधनानां यशस्विनां श्लाघ्यः स्तुत्योऽभवत् । हन्तेर्लुङि वधादेशः ॥ २८ ॥

---

1. स्तोमयन्तः

ततः प्रवीरौ जितकर्णशल्यौ जिज्ञासवः शौरिनिवारितास्ते ।
अयासिषुः स्वानि पुराणि सर्वे सविस्मयव्रीलरुषो नरेन्द्राः ॥२९॥

तत इति । ततोऽनन्तरं यथाक्रमं जितकर्णशल्यौ प्रवीरावर्जुनभीमसेनौ जिज्ञासवः कावित्रावितिज्ञातुमिच्छवः शौरिणा कृष्णेन निवारितास्ते सर्वे नरेन्द्राः सविस्मयव्रीलरुषः साश्चर्यलज्जाकोपाः सन्तः स्वान्यात्मीयानि पुराणि अयासिषुर्गतवन्तः ॥ २९ ॥

आदाय कृष्णां दिवसावसाने कुरूद्वहौ प्राप्य कुलालगेहम् ।
काऽप्याहृताऽभूदियमम्ब भिक्षेत्यन्तर्गतां मातरमुक्तवन्तौ ॥

आदायेति । कुरूद्वहौ भीमार्जुनौ कृष्णां द्रौपदीमादाय स्वीकृत्य दिवसावसाने दिनान्ते कुलालगेहं प्राप्य कुम्भकारगृहं प्राप्य, हे अम्ब हे मातः । 'अम्बार्थ..' इति ह्रस्वः । काऽपि काचिदियं भिक्षा 'रत्नादिस्तम्बपर्यन्तं सर्वं भिक्षा तपस्विनः' इति वचनात् कन्याऽपि भिक्षाशब्दवाच्या भवति । आहृता [1]आनीताऽभूत् इत्यनेन प्रकारेणान्तर्गतां गृहमध्यगतां मातरं कुन्तीमुक्तवन्तौ ॥ ३० ॥

सा भुज्यतां प्रौढरसा भवद्भिरित्यूचुषी सूनृतभाषिणीयम् ।
निर्गत्य गेहादवलोक्य कन्यां विलज्जमानाऽजनि धर्मभीता ॥

सेति । सूनृतभाषिणी प्रियसत्यवादिनी । 'सूनृतं प्रियसत्य' इत्यमरः । इयं कुन्ती प्रौढरसा प्रकृष्टरसा सा भिक्षा भवद्भिः पञ्चभिः भुज्यतामनुभूयतामित्यूचुषी उक्तवती सती गेहान्निर्गत्य कन्यामवलोक्य धर्माद्भीता धर्मभीता अजनि जाता । धर्मभीतेत्यत्र 'भयभीतभीतिभीभिरिति वक्तव्यम्' इति पञ्चमीसमासः ॥ ३१ ॥

तथाविधां तां स निरीक्ष्य भोज्यां धर्मात्मजो वाचमिमामवादीत् ।
तवाम्ब नैतद्वचनं मृषा स्यात्सर्वे यदस्यां वयमार्द्रभावाः ॥ ३२ ॥

तथाविधामिति । धर्मात्मजः धर्मपुत्रो युधिष्ठिरः तथाविधां धर्मभीतामित्यर्थः । भोज्यां भोजसुतां, 'कौञ्यादिभ्यश्च' ष्यङ्प्रत्ययः । तां पृथां निरीक्ष्य इमां वक्ष्यमाणां वाचं अवादीत् । वदेर्लुङि 'वदव्रज' इति वृद्धिः । हे अम्ब, तवैतद्वचनं 'सा भुज्यतां प्रौढरसा भवद्भिः' इत्येतद्वाक्यं मृषा अनृतं न स्यान्न भवेत् । कुत इत्यत आह— यद्यस्मात्कारणात् सर्वे वयमस्यां कन्यायामार्द्रभावाः सरसचित्ताः ॥ ३२ ॥

---

1. आजिता

अन्येद्युरुद्यत्प्रमदो नरेन्द्रस्तान् क्षत्रियानेव चरैर्विदित्वा ।
पुरोहितेन प्रहितेन तूर्णमानाययामास निजं निकेतम् ॥ ३३ ॥

अन्येद्युरिति । अन्येद्युरन्यस्मिन् दिने 'सद्यः परुत्' इत्यादिना निपातनात्साधुः । नरेन्द्रो द्रुपदस्तान् कन्याहारिणः पुरुषान् चरैर्गूढपुरुषैः । 'अपसर्पश्चरः स्पशः' इत्यमरः । क्षत्रियानेव विदित्वा ज्ञात्वा उद्यत्प्रमदः उदितानन्दः सन् प्रहितेन प्रेषितेन पुरोहितेन । 'पुरोधास्तु पुरोहितः' इत्यमरः । निजमात्मीयं निकेतं गृहं । 'वेश्म सद्म निकेतनम्' इत्यमरः । तूर्णमानाययामास आनाययति स्म ॥ ३३ ॥

तत्रोपविष्टाः पृथगासनेषु पृष्टान्वयास्ते पृषतात्मजेन ।
लाक्षागृहान्मृत्युमुखादिव स्वान्परिच्युतान्पाण्डुसुतानशंसन् ॥

तत्रेति । तत्र गृहे पृथगासनेषु भिन्नासनेषु उपविष्टास्ते क्षत्रियाः पृषतात्मजेन द्रुपदेन पृष्टान्वयाः पृष्टवंशाः सन्तः स्वानात्मनः लाक्षागृहात् जतुगृहान्मृत्युमुखादिव परिच्युतान् गलितान् पाण्डुसुतानशंसन् कथितवन्तः ॥ ३४ ॥

सत्कृत्य सर्वान्स तुहृष्टचेता युधिष्ठिरं वाचमवोच देवम् ।
लब्धामसौ बाहुबलेन कन्यां गृह्णातु पाणौ महितेऽह्नि पार्थः ॥

सत्कृत्येति । सः द्रुपदस्तु हृष्टचेताः संतुष्टचित्तः सन् सर्वान्पाण्डवान्सत्कृत्याहूय । 'आदरानादरयोः' इति सच्छब्दस्य गतिसंज्ञायां, 'कुगति' समासः । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यप् । युधिष्ठिरमेव वक्ष्यमाणप्रकारेण वाचमवोचदुक्तवान् । वक्तेर्लुङि 'अस्यतिवक्ति' इति क्लेरङ् । 'वच उम्' इत्युमागमः । किमित्याह—पार्थोऽर्जुनः बाहुबलेन लब्धा कन्यां महिते पूजिते । 'मह पूजायाम्' इत्यस्माद्धातोः कर्तरि क्तः । अह्नि दिवसे पाणौ गृह्णातु पाणिपीडनं करोतु ॥ ३५ ॥

धर्मात्मजस्तं निजगाद राजन्पञ्चापि कृष्णां वयमुद्वहाम ।
योषिन्मयं रत्नमनर्घमेतत्सहोपभोक्तुं समयः कृतो नः ॥ ३६ ॥

धर्मात्मज इति । धर्मात्मजस्तं द्रुपदं निजगाद । किमित्याह— हे राजन्, पञ्चापि वयं कृष्णामुद्वहाम पाणिपीडनं करवाम । वहतेर्लोडुत्तमपुरुषबहुवचनम् । बहवो यूयं [1]कथमेकामुद्वहेयेत्यत आह— योषिदिति । अनर्घममूल्यं । 'मूल्ये पूजाविधावर्घ—' इत्यमरः । योषिन्मयं

[1], कथमेकामुद्वह्येथेत्यत

नित्यं यत्र जुहोति कुण्डमबलानाभिच्छलाद्भाति त-
द्रोमालीकपटादुदेति सरणिर्धूमस्य नो चेत्कथम् ॥ ६८ ॥

पुंसाऽहं दलितः पदेति शकटः कोपात्प्रसाद्यात्मभू-
देवेशं जघनाख्यचक्रतनुतामासाद्य योषामणेः ।
प्राञ्चं शश्वदधो विधाय पुरुषं कालेन विद्राव्य तं
प्रौढिं प्राप्तुमिवेह भाति नियतं पुंभावमाराहवे ॥ ६९ ॥

तन्व्याः सारतरोरुकाण्डसदृशः सृष्ट्वा किलास्मान्विधि-
स्तादृङ्मार्दववर्णलेशरहितांश्चक्रे [illegible]: पद्मभूः ।
इत्यालोच्य लुनन्ति सामजकरा नीरेजदर्शं रुषा
स्यात्तोषाय तदीयहिंसनमपि प्रौढेऽनवाप्ये रिपौ ॥ ७० ॥

सरणिः रोमालीकपटात् कथमुदेति । सर्वदा हूयमानत्वात् रोमालिव्याजेन अद्यापि धूमसरणिरुदेति । जगदपि कंदर्पाधीनमेवास्ते इत्यर्थः । मदनस्य जगद्वशीकरणसाधनीभूतस्तन्नाभिरिति भावः ॥

पुंसेति । अहं पुंसा पुरुषेण पदा करणभूतेन दलितः इति, शकटः शकटासुरः कोपात् आत्मभूः मन्मथ एव देवेशः सुरोत्तमः ; 'मकरध्वज आत्मभूः' इत्यमरः । तं प्रसाद्य योषामणेः जघनाख्यचक्रतनुतां चक्ररूपतामासाद्य प्राञ्चं पुरातनं तं पुरुषं पूर्ववैरिणमित्यर्थः ; भवन्तमित्यभिप्रायः । पुंभावमाराहवे पुरुषायितरूपमदनयुद्धे अधो विधाय शश्वत विद्राव्य पलायनं कारयित्वा ; अन्यत्र सुरते द्रवीकृत्य जित्वेत्यर्थः । कालेन केनचित्कालविशेषेण प्रौढिं प्राप्तुमिवेह भाति । नियतं निश्चयः ॥ ६९ ॥

तन्व्या इति । पद्मभूः कमलोत्पन्नः शठः विधिः अस्मान् तन्व्याः सारतरोरुकाण्डसदृशः समानान् सृष्ट्वा तादृङ्मार्दवस्य वर्णस्य च लेशेनापि विकलान् हीनान् चक्रे किल इति, सामजकराः गजशुण्डाः आलोच्य रुषा नीरेजदर्शं नीरेजं दृष्ट्वा दृग्विषयसर्वपद्मानीत्यर्थः । मान्तकृदन्तत्वादव्ययम् । लुनन्ति छिन्दन्ति । तथा हि— प्रौढे रिपौ अहितकारिणि अनवाप्ये आप्तुमशक्ये तदीयहिंसनमपि रिपुसंबन्धिनां हिंसनमपि तोषाय स्यात्खलु । पद्मभुवा शठ्यं कृतमिति रुषा तस्यागोचरत्वात्तदुत्पादककमलसजातीयपद्मानि छिन्दन्तीति भावः ॥ ७० ॥

कान्तायां ललितोरुणाऽपहसितो रम्भातरुः प्रेरितं
रोषात्पन्नगणं च संहृततनुं नैजं विलोक्याशुगैः ।
आयस्तो गणरात्रतोऽपि विफलारम्भाद्द्विधेवानम-
द्वक्त्रोऽभूत्क्रम ईदृशो जडसुहृत्संसक्तयोः स्याद्रणे ॥ ७१ ॥

जङ्घासंपदमन्यदुर्लभतरामिच्छेद्यदा काहली
तन्व्याः शौल्विकयन्त्रपावकमहासंतापसंताडनम् ।
भूयोऽनुभूय सा क्षितिभृतामग्रे त्रपादुर्गता
नूनं तारतरं रटत्यनुदिनं प्रख्यापयन्ती व्यथाम् ॥ ७२ ॥

कान्तायां इति । कान्तायां ललितोरुणा अपहसितः अवमानित इत्यर्थः । रम्भातरुः रोषात्प्रेरितं नैजं पन्नगणं पर्णगणम् ; अन्यत्र शत्रुपक्षे पन्नगाणि वाहनानि गणं सेनासमूहं च ; 'पन्नगं पर्णे वाहने च' इति मेदि० । 'सैन्यभेदे समूहे च संख्यायां प्रमथे गणः' इति हैमः । संहृततनुं गुलकीकृतस्वरूपम् , कदलीपर्णान्युद्गमनसमये आकुञ्चितानि भवन्तीत्यर्थः । अन्यत्र घातितशरीरं, विलोक्य आशुगैः समीरैः बाणैश्च ; 'आशुगौ वायुविशिखौ' इत्यमरः । आयस्तः स्वयं च आयासं प्राप्तः सन् गणरात्रतोऽपि चिरकालादपीत्यर्थः । 'गणरात्रं निशाबृन्दम्' इत्यमरः । विफलारम्भात् निष्फलप्रयत्नात् द्विधेव आनमद्वक्त्रः नम्रमुखोऽभूत् । कदलीतरुः पुष्पोद्गमे अवनतमुखो भवति । जडश्च सुहृत्संसक्तः असमीचीनज्ञानयुक्तश्च, तयोः रणे कलहे 'दुर्ज्ञाने ज्ञातरि त्रिषु' इत्यमरः । भवेद्धि । अत्र कदलीतरुः जडः शीतलः ; ऊरुस्तु सुहृदं कन्यकां संसक्त इत्यर्थः ॥ ७१ ॥

जङ्घेति । काहली अन्येषां दुर्लभतरां तन्व्या जङ्घासंपदं यदा इच्छेत् , तदा शौल्विकस्य यन्त्रपावके भस्त्रिकाभवनवर्धितानौ ताम्रकुट्टकेन महासंतापं संताडनं च ; 'शौल्विकस्ताम्रकुट्टकः' इत्यमरः । भूरि भूयिष्ठं अनुभूय 'स्फीतं भूयश्च भूरि च' इत्यमरः । काहली यदा यदा समीक्रियते तदा तदा संतापादिकमनुभवतीति भावः । त्रपादुर्गता लज्जाहीना सती क्षितिभृतामग्रे अनुदिनं व्यथां प्रख्यापयन्ती कथयन्तीव शश्वत्तारतरं रटति नूनम् । स्वस्य दुर्लभमन्यदीयैश्वर्यमिच्छन् पुरुषो जनैस्ताड्यते ; ताडितश्च स्वदुःखं राज्ञां पुरतः यथोद्घोषयति तद्वदिति भावः ॥ ७२ ॥

तपाते कमलं तपः किसलयं सम्यग्वने द्वे ततः
पद्माख्यामपि पल्लवाह्वयमजो दत्ते स्म कारुण्यतः ।
तादृङ्नीरजलोचनापदलसद्रूपं तु नादादहो
जानीते किल विश्वकृद्विदितुं कर्मानुरूपं फलम् ॥ ७३ ॥

वाणी साऽमृतसारिणी हृतयुवश्रेणी दृगेणीदृशः
पादौ नव्यसरोजबर्हकृतसंवादौ प्रभासंपदौ ।
यस्याः प्रेममणीकुटी कुचनटी शाटी सुधावाटिका
दन्तालेः किल वञ्चनाय जगतां कामस्य सा शाम्बरी ॥ ७४ ॥

किं च, विहाय विहायसममृतकरबिम्बमलक्ष्य तमस्विनीं नभःपट-

तपात इति । कमलं किमलयं च द्वे अपि वने जले विपिने च; 'वने सलिलकानने' इत्यमरः । सम्यक् तेपाते तपश्चेरतुः । तपसि प्रवृत्ताः वनं सलिलं वा आश्रयन्त इति भावः । ततः तस्मात् अजो विधिः कारुण्यतः पद्माख्याम्, पदः मेव मा शोभेव शोभा यस्य तत् पद्मं कान्ताचरणकान्तिमदित्यर्थः । पद्ममित्याख्यां पद्माख्यां, पल्लवाह्वयं पदः लवः विलासः वस्य सः पल्लवः । 'लवो रामसुते लेशे विलासे छेदने च ना' इति रत्ने । पल्लव इत्याह्वयमपि दत्ते स्म दत्तवान् किल । तादृक् तादृशं नीरजलोचनायाः पदस्य लसद्रूपं संपूर्णचारुस्वरूपं तु नादात्; कान्तापदरूपप्राप्त्यै तपः कुर्वतोः कमलपल्लवयोः अजः पद्ममिति पल्लव इति च आख्यामकरोत्, पदरूपं तु न दत्तवान् । तथा हि— विश्वकृद्विधिः कर्मानुरूपं फलं वितरितुं जानीते किल; अहो ॥ ७३ ॥

वाणीति । यस्या एणीदृशः सा वाणी अमृतसारिणी; नव्यसरोजबर्हैः नूतनकमलदलैः; कुचनटी प्रेममणीनां कुटी स्थावासगृहम्; दन्तालेः दन्तपङ्क्तेः शाटी वसनम्; अधर इत्यर्थः । सुधावाटिका अमृतावासशाला अभवत् । सा तादृशी कन्यका जगतां वञ्चनाय कामस्य शाम्बरी किल; जगद्वशीकरणार्थं कल्पिता मदनसंबन्धिनी माया किल; 'स्यान्माया शाम्बरी' इत्यमरः ॥ ७४ ॥

विहायेति । अस्मिन्गद्ये विषयिवाचकैरेव पदैर्विषयस्याविष्कारः रूपकातिशयोक्त्या क्रियते । विहायसमन्तरिक्षं विहाय अमृतकरबिम्बं चन्द्रबिम्बमित्यनेन चन्द्रस्योपमेयभूतं मुखं

लिकाम्, अनम्बुनि विसारविहारम्, अपहाय चन्द्रमसं चन्द्रिकोद्गारम्, अनभिलषितसंध्यारुणच्छविम्, अलतानिचितां कुन्दकोरकततिम्, अनीहितगुणसङ्गं वीणालापम्, अनादृतजलधिवसतिं कम्बुबिम्बोकम्, अनपेक्षितनलिनीं मृदुलमृणालीम्, अनारूढवल्लिकं पल्लवोद्गमम्, अमहीरुहाधिष्ठितमतुच्छमच्छगुलुच्छद्वितयम्, अमहीतलासक्तामतिकृशां यामुनझरीम्, अनापगामध्यविलसनमतुलगभीरावर्तम्, अभूतलारोपितावाक्चरभविरहितरम्भायुगलम्, अनादृतकासारावासमम्बुजातम्, अपेततारापथं तारकाविलसनम्, अनभ्रमध्यगामचिरद्युतिलतामित्यखिलमिदमविकलमनवरतं कदाऽप्यनुपजातमेलनमेकत्र समावेशयन्ननङ्गसरोजसूनुरभिनवमद्भुतमखिलातिरिक्तं जगन्निर्माणकौशलमात्मनः प्रख्यापयितुमेनां भुवनजनजेगीयमानलावण्यसीमानमजनयदिति प्रससार रसिकजनप्रवादः ॥

परिगृह्यते । एवमन्यत्राप्युन्नेयः । चन्द्रस्य मुखवासं गगनं विहायान्यत्रावस्थितिरुक्ता । एवमुत्तरत्रापि । तमस्विनीं रात्रिमपास्य तमःपटलिकामित्यनेन केशसंहतिः सूच्यते । अनम्बुनि निर्जलदेशे विसारविहारं मत्स्यविहारम् ; 'विसारः शकुली चाथ' इत्यमरः । अनेन चक्षुर्गृह्यते । चन्द्रिकोद्गार इत्यनेन हासप्रसारः । अरुणच्छलेन अधरकान्तिरुच्यते । लतायां निचिता न भवतीति अलतानिचिता कुन्दकोरकततिमिति दन्तपङ्क्तिः । अनीहितगुणसङ्गमनपेक्षितन्त्रीसङ्गं वीणालापमित्यनेन कण्ठस्वरः । अनादृता जलधिवसतिः समुद्रवासो येन तम् ; कम्बुबिम्बोकं शङ्खविलासम् ; अनेन गलः सूच्यते । मृणालीति बाहुः, पल्लवेन हस्तश्च । महीरुहे अधिष्ठितं न भवतीति तथोक्तम्, अतुच्छं पूर्णम्, अच्छं स्वच्छं गुलुच्छद्वितयं गुच्छयुगम् ; अनेन स्तनावुच्येते । यामुनझरीमित्यनेन रोमराजिः । अनापगामध्यविलसनं नदीमध्यविलसनरहितम् ; आवर्तेनेन नाभिरुच्यते । अवाक्चरं अधोमुखचारि, अविरहितं विश्लेषरहितं ; रम्भायुगलेनोरुयुगलमुच्यते । अम्बुजातमित्यनेन पदयुगम् । तारकाविलसनमिति नखप्रकाशः । अचिरद्युतिलतां तटिल्लतामिति तनुलता गृह्यत इति, अविकलं विकलरहितम् ; एकत्र कदाप्यनुपजातमेलनम्, इदमखिलम्, अनङ्ग एव सरोजसूनुः ब्रह्मा

तदनु कदाचित्—

सौन्दर्यं भवदीयमिन्दुवदना लोकोत्तरान्सद्गुणा-
नास्थाने पितुरन्तिके निगदतो मत्तः समाकर्ण्य ते ।
तादृग्रूपविभावनाहृतमना निर्लक्ष्यनिष्कम्पदृक्
निर्व्यापारदशां गता हि तरुणी चित्रार्पितेवाभवत् ॥ ७५ ॥

सेयं त्वद्गुणगुम्भितेव तरुणी नैश्चल्यमासेदुषी
भावं गोपयितुं विकस्वरमतो नैवाशकत्संसदि ।
स्विन्ने पाणितले कपोलयुगली यस्याः सरोमोद्गमा
निःश्वासोच्चलितं पयोधरयुगं यच्चञ्चले सक्थिनी ॥ ७६ ॥

अनवरतमेकत्र समावेशयन् आत्मनः स्वस्य जगन्निर्माणे कौशलं प्रख्यापयितुमेनामजनयत् उत्पादयामासेति रसिकजनानां प्रवादः प्रससार प्रसृतोऽभवत् ॥

सौन्दर्यमिति । इन्दुवदना तरुणी सा लक्ष्मणा आस्थाने सभायाम्; 'आस्थानी सभामास्थानम्' इत्यमरः । पितुः वृद्धसेनस्य अन्तिके भवदीयं सौन्दर्यं लोकोत्तरान् सद्गुणान् महाभाग्यशौर्यौदार्यादिगुणानित्यर्थः । निगदतः गायतः, मत्तः मत्सकाशात् समाकर्ण्य, ते तव तादृग्रूपस्य विभावनायामाहृतमनाः निर्लक्ष्या निष्कम्पा च दृक् यस्याः सोक्ता । निर्व्यापारदशां व्यापारशून्यां दशां गता सती चित्रार्पितेवाभूत् ॥ ७५ ॥

सेयमिति । अतोऽनन्तरं सेयं तरुणी त्वद्गुणैः गुम्भितेव स्तूनेव नैश्चल्यमासेदुषी सती संसदि विकस्वरं बहिः व्यापनशीलं, भावं रोमाञ्चादिसात्त्विकभावम्; गोपयितुं नैवाशकत् अशक्ताऽभूत् । यस्याः पाणितले यद्यस्मात्स्विन्ने, सक्थिनी ऊरू चञ्चले अभवताम्; तस्मात् सा नाशकदिति पूर्वेणान्वयः । कामक्रोधादिगतश्चित्तविकारो भाव. । 'सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्'; स त्रिविधः— स्थायी, व्यभिचारी, सात्त्विकश्चेति । तत्र अश्रुप्रभृतयो भावाः भावसूचनात्मकविकाररूपत्वाच्चानुभावा इति सात्त्विकानां द्वैरूप्यम्; 'स्तम्भः प्रलयरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू । अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः ॥ स्तम्भः स्यान्निष्क्रियाङ्गत्वं प्रलयो नष्टचेष्टता ।' इति । स्पष्टमन्यत् ॥ ७६ ॥

तदनु चिरसंलापसंभूतानन्दमामन्त्र्य भूपं [illegible]विहाराय बहिः स्पन्दमाने मयि सहचरी लक्ष्मणायाः काचिदनुपमलक्षणा विचक्षणा वाचि धुरि समागत्य भगवन् वासुदेवकथासुधाप्लुतभवदुदारवचन-परिपाटीसमाकलनेन क्षणसंमुखावस्थानेन च निरन्तरहृदयसंनिधापि-ताचिरंतनपुरुषसुन्दराकृतिसदातनानुसंधानाऽपि दुहिता मद्रधरापतेः प्रतिकलविकसदनुपममहितनिजानन्दानुभवजन्यतुन्दिलतामन्तरेण हल्लेखविसारिवैवर्ण्यपाण्डरमहसैव केवलं तानवेन भवतः समारूढवती साधर्म्यम् । आन्तरेणापि सुखसातत्येन यथा मम सध्रीची परवशता-मियात् तथा तदीयमनोरथसाकल्यसंपादने प्रतिभूपदमारोपयितव्यो

तदन्विति । मयि बहिः स्पन्दमाने प्रचलिते सति, भगवन्, वासुदेवकथासुधया आप्लुतायाः सिक्तायाः भवदुदारवचनानां परिपाट्याः समाकलनेन श्रवणेन; 'परिपाटी अनुक्रमः' इत्यमरः । क्षणसंमुखावस्थानेन अभिमुखावस्थित्या च निरन्तरं हृदये संनिधापितस्य चिरंतन-पुरुषस्य कृष्णस्य सुन्दराकृतेः सदातनानुसंधानाऽपीत्यर्थः । सद्गुरूपदेशमा-त्रेण शिष्या: यथा भगवदनुसंधानं कुर्वन्ति तद्वदिति भावः । मद्रधरापतेः दुहिता प्रतिकलं प्रतिक्षणं विकसतः वर्धमानस्यानुपमस्य महितस्य निजानन्दस्य ब्रह्मानन्दस्यानुभवात् जन्यां तुन्दिलतामन्तरेण देहपुष्टिं विनेत्यर्थः । तानवेन तनुसंबन्धिना हल्लेखेन कृष्णविरहेण विसारि यत् वैवर्ण्यं वैवर्ण्यात्मकसात्त्विकभावः; तद्रूपेण पाण्डरमहसा धवलवर्णेनैव भवतः साधर्म्यं समानतां समारूढवती । औत्सुक्यं हल्लेखो विरहविषादौ च तुल्यार्थः । गुरूपदेशमहिम्ना शिष्योऽपि गुरु-समो भवतीति प्रसिद्धिः । एषा तु विरहपाण्डिम्ना त्वत्सदृशा अभूत । कृष्णस्वरूपानुसंधाने कृतेऽपि तदीयविरहदुःखेन आनन्दाभावात् देहे पाण्डुरता कार्श्यं च समजनीति भावः । आन्तरेणेति । आन्तरेण सुखसातत्येन सुखनैरन्तर्येण मम सध्रीची अपि सख्यपि 'सध्रीची सहचर्यपि' इति सारे । यथा परवशतां इयात् पारवश्यं प्राप्नुयात् । अपिशब्देन भवानान्दरानन्देन यथा परवशस्तद्वदित्यर्थो लभ्यते । अन्यत्र, परस्य लोकोत्तरपुरुषस्य वशता-मधीनतां कृष्णाधीनतामित्यर्थः । तथा तदीयमनोरथस्य साकल्यसंपादने संपूर्णसंपादने भगवद-नुग्रहः निरवग्रहं निष्प्रतिबन्धं यथा तथा प्रतिभूपदं जामकस्थानम्; 'स्युर्जामकाः प्रतिभुवः'

निरवग्रहं भगवदनुग्रह इति सपादपतनं क्रियासमभिहारेण मामनुबध्नाति स्म ॥

सा लक्ष्मणा हि पुरुषोत्तमनित्यसक्ता
सद्वाहिनीशतनया शतपत्रपाणिः ।
शुद्धान्तमर्हति तवेति निगद्य कृष्ण-
मापृच्छ्य तापसवरो निजमाप धाम ॥ ७७ ॥

अथ विस्मयविकसनैकदोहलं मदनविजयकाहलं मुनितिलकवाग्उपन्यस्तमतिशस्तमस्तमितयुवजनधैर्यमुद्रमाचितानूनभद्रमदरिद्रमनोरथैकतानं मद्धराकमनसुतानुपमगुणयशःप्रवादमुपचितमदनमादमाकण्ठोत्कण्ठमनुचिन्तयन् यदुकण्ठीरवोऽयमसुखायमानेतरपारो हृदय-

---

इत्यमरः । आरोपयितव्यः । कृष्णविवाहस्तस्या भवेत्तथाऽनुग्रहः कार्य इति भावः । इति सपादपतनं सप्रणामं यथा तथा क्रियासमभिहारेण ; 'क्रियासमभिहारः स्यात्पौनःपुन्यभृशार्थयोः' इति रत्ने । मामनुबध्नाति स्म अनुबबन्ध ॥

सेति । सा लक्ष्मणा हि यस्मात् पुरुषोत्तमं निजसक्ता मनसा नित्यसंगता । अन्यत्र, विष्णुमनुगता । सद्वाहिनीनां सेनानाम् ईशस्य राज्ञः तनया ; अन्यत्र, समुद्रतनया, शतपत्रवत् पाणौ यस्यास्तथोक्ता । अन्यत्र पद्मपाणिश्च भवतीति शेषः । 'शतपत्रं कुशेशयम्' इत्यमरः । तस्मात् लक्ष्मीतुल्यत्वादित्यर्थः । तव शुद्धान्तमन्तःपुरमर्हति, तवान्तःपुरे वस्तुं योग्येति भावः । इति निगद्य कृष्णमापृच्छ्य गमनाय पृष्ट्वा निजं धाम स्थानमाप ॥ ७७ ॥

अथेति । विस्मयस्य विकसनैकदोहलं वर्धनकर्मविशेषः ; आश्चर्यहेतुरिति यावत् । मदनस्य विजयकाहलं विजयशंसकं मुनितिलकवाचा उपन्यस्तमुक्तम्, धैर्यमुद्रं धैर्यचिह्नमाचितं पूरितं अनूनभद्रं महाभद्रं यस्मिंस्तथोक्तम् । अदरिद्रमनोरथस्य एकतानमेकायनम्, उपचितः मदनस्य मादः गर्वः येन तथोक्तम् । 'मादो मदः' इत्यमरः । मद्धराकमनस्य मद्भूपतेः सुतायाः अनुपमगुणयशसां प्रवादं कथाम्, आकण्ठमुत्कण्ठा यस्मिन्कर्मणि यथा तथा । अप्राप्तेष्टवस्तुविषयानुरागान्मानसी व्यथा उत्कण्ठा । तथा 'रागादलब्धविषये वेदना महती

कमलोत्कीर्णां कमलामिव तामेव कलकण्ठीमवलोकयन् तदीयाधर-मधुरसुधारसलिलिक्षाकुतूहलैकान्तस्फुरद्रसनः शल्कीकृततत्तादृगनुत्तमस्थेमा न शरीरस्थितिकारणमाहारमप्यजीगणदितरलोकसुलभानभ्यर्हितानपि भोगान् गर्हयांचकार । निरन्तरहृदयविश्रमायतनमनिमिषलोचनासेचनकलावण्यमवरोधवधूजनमीषदपि नावलोकयांबभूव ; न तरामचकथत् ; न च तमामचकमत समागमाय ; केवलमरतिमेवानपायिनीमशिथिलमुपगूहयन् दिनमिव जागरांबभूव रजनीमपि ॥

इति श्रीमदुदयकुलकलशजलनिधिचन्द्रमसः पण्डितमण्डलीमान्यस्य दत्तात्रेयविपश्चित-स्तनयेन गङ्गाधरकविना विरचिते श्रीमद्रकन्यापरिणये प्रथमरसोल्लासे पूर्णः द्वितीयोल्लासः ॥

तु या । संशोणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः ॥' इति । अनुचिन्तयन् अयं यदुकण्ठीरवः हृदयकमले उत्कीर्णां विन्यस्ताम् ; 'कृतं विन्यस्तमुत्कीर्णम्' इति सारे । अवलोकयन् ध्यायन् ; सुधारसस्य लिलिक्षया लेढुमिच्छया उत्पन्नेन कुतूहलेन एकान्तं अत्यन्तं स्फुरद्रसनः चलज्जिह्वः, शल्कीकृतः तत्तादृक् अनुत्तमः स्थेमा स्थैर्यं यस्य स तथोक्तः सन् आहारमपि नाजीगणत न गणयामास । इतरलोकेषु स्वर्गादिष्वपि सुलभा न भवन्तीत्यनितरलोकसुलभाः तानभ्यर्हितान् उत्तमान् भोगानपि ; 'भोगः सुखे स्त्र्यादिभृतौ' इत्यमरः । गर्हयांचकार निनिन्द । अनिमिषा देवाः ; 'सुरमत्स्यावनिमिषौ' इत्यमरः । तल्लोचनानामासेचनकं दर्शने तृप्तेरनुत्पादकं लावण्यं यस्य तम् ; ईषदपि नावलोकयांबभूव न ददर्श । नाचकथत्तराम् किंचिदपि न बभाषे । समागमाय रतये न तमामचकमत सर्वथैव न कामयामास । स्त्रीणां दर्शनमप्यनपेक्षमाणस्य कुतः संभाषणम् ? समागमेच्छा तु सर्वात्मना नास्तीति भावः । केवलमरतिम् , अन्यवस्तुष्वरतिरप्रीतिः तां । अशिथिलं दृढं उपगूहयन् सर्वभोगेषु निरभिलाषः सन्नित्यर्थः । दिनमिव अहनीव रजनीमपि निशायामपि जागरांबभूव निर्निद्रोऽभूत् । अत्यन्तसंयोगे द्वितीया । रात्रौ कदापि निद्रां न प्रापेत्यर्थः ॥

॥ इति श्रीमद्रकन्यापरिणयव्याख्याने द्वितीयोल्लासः ॥

सीतायामिति । सीतायां लाङ्गलपद्धतौ दृढं प्रसितः दृढ बद्धः, कृतः रचितः यः युगस्य गलबद्धदारुविशेषस्य व्यापारः कृष्यादिरूपः तस्मिन् घोरः क्रूरः क्रमः शक्तिर्यस्य स तादृशः ; 'रथसीराङ्गयोर्युगः' इति 'क्रमः शक्तौ परिपाट्याम्' इति च विश्वः । हे दर्पोज्जृम्भित दर्पेण बलेनोज्जृम्भित गर्विष्ठ आहवे युद्धे हयाधिपस्याश्वश्रेष्ठस्य हत्या हननेन या श्रान्तिः श्रमस्तां वहसि बिभर्षि । अनरण्ये अरण्यरहिते विषये देशे 'विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च' इति विश्वः । प्रख्यातः प्रसिद्धः ; आरण्यकमहिषाणां कृष्यानुपयोगाभावेन न प्रसिद्धिरस्तीति भावः । जवाद्वेगात् उत्कृष्टः समीचीनकृषिकर्मणा कृष्टः धन्वा मरुभूमिर्येन स तादृशः । मायावी मायावान् स प्रसिद्धः रावणः पुनरपि मद्गृहे मद्भवने प्राप्तोऽसि । किं वितर्के । रावणपक्षे —सीतायां वैदेह्यां दृढं प्रसितः अत्यन्तमासक्तः, कृतयुगे युगान्तरे व्यापारेण घोरः क्रमः परिपाटी यस्य स तादृशः । कृतयुगे हि रावणः स्वशिरःकर्तनादिघोरतपश्चर्यां कृत्वा श्रीपरमेश्वरात् त्रैलोक्याधिपत्यं संपादयामासेति श्रीमद्रामायणादिप्रसिद्धिरनुसंधेया । दर्पेण बलेन उज्जृम्भितो यः हैहयाधिपः कार्तवीर्यार्जुनः तेन हत्या हननेन श्रान्तिं श्रमं वहसि । कार्तवीर्यार्जुनो युद्धे रावणं निर्जित्य कारागृहे निरुद्धवानिति पौराणी कथा । अनरण्यस्य इक्ष्वाकुवंशस्य राज्ञो विषये गोचरे प्रख्यातः प्रसिद्धः, तं निर्जितवानित्यर्थः । उत्कृष्टधन्वा आकृष्टधन्वा ॥ ८८ ॥

ताम्रश्मश्रुमुखोऽसि नैव सहसे क्रोडाहतिं मानवैः
कामं वाडववैरमाकलयसे रोषेण नैसर्गिकम् ।
संप्रीतिं तरसादनेऽपि तनुषे त्वामद्य पानोत्सुकं
चन्द्राख्यानमवैमि यत्तव खुरानाश्चर्यमालोकये ॥ ८९ ॥

ताम्रेति । ताम्रश्मश्रुमुखोऽसि ताम्रवर्णोपेतमुखलोमविशिष्टः, मानवैः मनुष्यैः क्रोडस्य भुजान्तरस्य आहतिं हननम् ; 'न ना क्रोडं भुजान्तरम्' इत्यमरः । नैव सहसे । काममत्यन्तं रोषेण कोपेन नैसर्गिकं स्वाभाविकं वाडववैरमश्ववैरमाकलयसे । तरसा वेगेन अदने भक्षणे संप्रीतिं संतोषं वितनुषे तनोषि । पानोत्सुकं त्वां अद्येदानीं चन्द्राख्यानं चन्द्राख्याननामानं म्लेच्छप्रभुमवैमि जानामि । यद्यस्मात्कारणात् तव खुरान् शफानि ; 'शफं क्लीबे खुरः पुमान्' इत्यमरः । आलोकये इत्याश्चर्यम् । यवनपक्षे —ताम्रस्तुङ्गकः श्मश्रुमुखः श्मश्रुमान् मानवैः क्रोडस्य वराहस्य आहतिं हननम् ; 'क्रोडः पोत्री किटिः किटिः' इत्यमरः । वाडवानां ब्राह्मणानां वैरं द्वेषम्, तरसस्य मांसस्यादने भक्षणे ; 'पिशितं तरसं मांसम्' इत्यमरः । मद्यपानोत्सुकं मदिरापानोत्सुकम् । खुरानिति म्लेच्छशास्त्रस्य संज्ञा ; यदपि महिषस्य म्लेच्छवदेव खुरौ न तथापि इत्याश्चर्यं बोध्यम् ॥ ८९ ॥

द्वंद्वे प्रीतियुतः क्वचित्कृतबहुव्रीहिप्रकर्षः क्वचि-
त्तत्श्चात्तत्पुरुषान्वितः कृतसमाहारः क्वचिच्च क्वचित् ।
शब्देषु द्विगुणादरं कलयसि श्रीकासरक्ष्मापते
प्रायः शाब्दिकचक्रवर्तिनमिह त्वामेव मन्यामहे ॥ ९० ॥

द्वंद्व इति । द्वंद्वे मिथुने प्रीतियुतः ; 'स्त्रीपुंसौ मिथुनं द्वंद्वम्' इत्यमरः । क्वचित्प्रदेशविशेषे निर्व्यापारस्थल इत्यर्थः । क्वचिदन्यत्र कृतः बहुव्रीहिप्रकर्षः, बहवः अनेके व्रीहयः शालयस्तेषां प्रकर्षः येन सः तथाविधः । पश्चादनन्तरं तत्पुरुषेण कर्मकेणान्वितः । क्वचित्कुत्रचित् कृतः समीचीन आहारो भक्षणं येन स तादृशः । क्वचिच्च प्रदेशे शब्देषु ध्वनिषु द्विगुणस्य द्विगुणशब्दस्यादरं करोषि । श्रीकासरक्ष्मापते प्रायः प्रायेण शाब्दिकचक्रवर्तिनं वैयाकरणश्रेष्ठं त्वां मन्यामह एव । वैयाकरणपक्षे—द्वंद्वे इतरेतरद्वंद्वे प्रीतियुतः, समस्यमानपदार्थातिरिक्तपदार्थप्रतीत्यभावात् । क्वचित्कृतः सिद्धान्तितः बहुव्रीहेः 'अनेकमन्यपदार्थे' इति सूत्रविहितसमासस्य प्रकर्षः तत्पुरुषापेक्षया प्राबल्यं इन्द्रवरुणभवशर्वरुद्रमृडपूषमघोनामतद्धितलुकि अष्टन आ विसर्जनीयस्य सः इत्यत्र 'इन्द्रवरुणाधिकरणन्यायसिद्धं येन स तादृशः । पश्चादनन्तरं तत्पुरुषेण तत्पुरुषसमासेनान्वितः, तत्पुरुषे पूर्वपदे संबन्धिलक्षणाङ्गीकाराद्बहुव्रीह्यपेक्षया तद्दौर्बल्याभिप्रायेण पश्चात्छब्दप्रयोगः । न च बहुव्रीहावप्यन्यपदार्थप्रतीत्यर्थं लक्षणाऽऽवश्यकीति वाच्यम् । बहुव्रीहेरन्यपदार्थे शक्तेरवाच्यणाधिकरणादौ व्युत्पादितत्वात् । क्वचित्कृतः समाहारः समाहारद्वंद्वो येन स तथोक्तः । द्विगुना द्विगुसमासेनादरं प्रीतिं कलयसीति प्राञ्चः । अन्ये तु द्विर्द्वित्वं, गुणः 'अदेङ्गुणः' इति शास्त्रविहितसंज्ञावानकारादिः तयोरादरं कलयसीत्यर्थः । एतेन पूर्वव्याख्यायां द्विगुणति णत्वानुपपत्तिः, 'रषाभ्यां नो णः समानपदे' इति शास्त्रबोधितनिमित्ताभावादिति चिन्तानिरस्ता । परे तु द्विगुर्द्विगुनमासः णत्वं च तयोरादरमित्याहुः । वयं तु ब्रूमः—द्वयोर्गुणः द्विगुणः, द्वयोरिति 'षष्ठी स्थानेयोगा' इति शास्त्रपरिभाषितस्थानषष्ठी । तथा च द्वयोः स्थाने गुणविधिं हि वैयाकरणो ब्रूते, 'एकः पूर्वपरयोः' इत्यधिकृत्य विहितत्वादिति संक्षेपः ॥ ९० ॥

त्वं शक्तिं सहजां दधासि च पदेष्वङ्गाजहल्लक्षणः
स्वातन्त्र्यं प्रथयंश्च शब्दविषयेऽप्यासक्तिमुर्व्यां भजन् ।
भूयो दर्शनमेषि लिङ्गकरणप्रामाण्यसंभावितः
कक्ष्यायां प्रसितस्ततोऽद्य महिष त्वां तर्कये तार्किकम् ॥ ९१ ॥

त्वमिति । सहजां सहोत्पन्नां शक्तिं दधासि । हे अङ्ग महिष पदेषु चरणेषु अजहत् अत्यजत् लक्षणमावर्तादिरूपं यस्य स तादृशः । शब्दविषये ध्वनिविषये स्वातन्त्र्यमन्यानपेक्षत्वं

प्रथयन् विस्तारयन् ; जनसमुदायेऽपि निर्भयं यथा तथा उच्चैः शब्दं करोषीत्यर्थः । उच्चां भूमावासक्तिमवस्थानं भजन् भूयः पुनः पुनः दर्शनं दृष्टिपथम्, एषि प्राप्नोषि । लिङ्गेनैव लिङ्गकमुपस्थं तेन यद्रणं युद्धम्; निधुवनमित्यर्थः । अत्र सामान्येन प्रमाणत्वेन संभावितः पूजितः, महिषीभिरिति शेषः । कक्ष्यायां बन्धिन्यां रज्जौ प्रसितः बद्धः । ततो हेतोः हे महिष त्वां तार्किकं तर्कशास्त्रज्ञं तर्कये मन्ये । तार्किकपक्षे—सहजां शक्तिं कार्यानुकूलतामिति यावत् । दधाति निरूपयति । पदेषु 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ काकादिपदेषु अजहती शक्यार्थमत्यजन्ती लक्षणा यस्य स तादृशः । शब्दविषये शब्दप्रमाणविषये स्वातन्त्र्यं स्वातन्त्र्येण प्रामाण्यं प्रथयन्विस्तारयन्, वैशेषिका हि शब्दस्यानुमानविधयैव प्रामाण्यं वदन्ति ; तन्निराकृत्य शब्दस्वातन्त्र्यवादं प्रवर्तयतीत्यर्थः । उच्चैर्भासक्तिं भूसंपादनेच्छाम् ; यद्वा तर्कशास्त्रस्येश्वरसाधनैकप्रयोजनत्वेन तस्य च क्षितिः कर्तृजन्येत्यनुमानमूलकत्वेन तत्रापेक्षावश्यकत्वादिति भावः । भूयो दर्शनं भूयःसु अधिकरणेषु दर्शनं साध्यहेत्वोः सहचारदर्शनम्, तस्य व्याप्तिग्राहकत्वादिति भावः । लिङ्गं धूमादि, करणं चक्षुरादि, प्रामाण्यं प्रामाण्यास्वतस्त्वादि तैः संभावितः पूजितः, कक्ष्यायां वादकथायां प्रसितः बद्धः, समयबन्धादिनेति भावः ॥ ९१ ॥

सूत्राणि प्रसभं महःप्रतिभयोत्साहेन यत्खण्डय-
न्धाट्याबाङ्मुख एव चाधिकरणप्रौढिं परां दर्शयन् ।
संघर्षे सति वाडवैर्विजयितां सिद्धान्ततो गाहसे
तेन त्वं महिषक्षितीश्वर महामीमांसकाग्रेसरः ॥ ९२ ॥

सूत्राणीति । यद्यस्मात्कारणात् सूत्राणि स्वबन्धनसाधनानि, प्रसभं हठात्कारेण, महान् अधिकः, अप्रतिभयः प्रतिभयरहितः य उत्साहः संतोषः तेन, खण्डयन् शकलयन्, धाट्या वेगेन अबाङ्मुख एव परां श्रेष्ठाम्, अधिकस्य रणस्य युद्धस्य प्रौढिमुत्कर्षं दर्शयन् प्रकाशयन्, वाडवैरग्नेयैः संघर्षे युद्धे सति सिद्धो निश्चितो योऽन्तो नाशः तेन विजयितां जयिष्णुत्वं गाहसे । युद्धसमये अग्निं हत्वा जयं प्राप्नोषीत्यर्थः । तेन कारणेन हे महिषक्षितीश्वर त्वं महामीमांसकाग्रेसरः मीमांसकश्रेष्ठः भवसीति शेषः । मीमांसकपक्षे—सूत्राणि 'औदुम्बरी सर्वा वेष्टयितव्या' इत्यादीनि कल्पसूत्राणि, महाप्रतिभया महास्फूर्त्या उत्साहेन च खण्डयन् प्रत्यक्षश्रुतिविरोधेन न प्रमाणमिति स्थापयन्, धाट्या शब्दोच्चारणवेगेन बाङ्मुख एव अधिकरणप्रौढिमधिकरणविचारमाहात्म्यम्, न तु पुस्तकाद्यपेक्षयेति भावः । वाडवैर्वाङ्मयैः संघर्षे सति सिद्धान्ततः सिद्धान्तमार्गेण विजयितां प्राप्नोषि ॥ ९२ ॥

मालिन्यास्पदमुच्चकैस्तव वपुर्ग्रीवा पुनः स्रग्धरा
नित्यं जाङ्गलभूमिषु त्वमयसे शार्दूलविक्रीडितम् ।
काठिन्यं वपुषो बिभर्षि नियतं किं चेन्द्रवज्राधिकं
वृत्तात्मा भजसि प्रबन्धपदवीं श्रीमैरिमक्ष्मापते ॥ ९३ ॥

मालिन्यास्पदमिति । उच्चकैरुन्नतं तव वपुः, मालिन्यस्य कर्दमादिप्रयुक्तमालिन्यस्य आस्पदं स्थानम्, ग्रीवा पुनः स्रग्धरा स्रजं रज्जुशङ्खकाञ्चीकांस्यशृङ्खलादिकं धरतीति तादृशी । नित्यं जाङ्गलभूमिषु कठिनभूमिषु शार्दूलस्य व्याघ्रस्य विक्रीडितं चेष्टितं त्वमयसे प्राप्नोषि । कठिनभूकर्षणेऽपि शार्दूलसमानविक्रम इत्यर्थः । इन्द्रस्य शक्रस्य वज्रायुधं तदपेक्षया अधिकं काठिन्यं दृढत्वं, वपुषो देहस्य बिभर्षि । वृत्तात्मा वर्तुलात्मा प्रबन्धपदवीं प्रबन्धसाम्यं भजसि प्राप्नोषि । प्रबन्धपक्षे—मालिनीशार्दूलविक्रीडितेन्द्रवज्रादीनि वृत्तानि बोध्यानि । प्रबन्धस्य नानावृत्तशोभितत्वादिति भावः । तल्लक्षणानि तु विस्तरभयान्न लिख्यन्ते ॥ ९३ ॥

शृङ्गार रुचिरं दधास्यनुदिनं वीरेण संचार्यसे
कृष्यां भूरि दयान्वितः प्रतिभयं हास्यं वहस्यद्भुतम् ।
उद्घोषं विकृतं करोषि बहुधा रौद्रं मुहुर्वीक्षसे
सायं दामनि शान्तिभाङ्नवरसास्तस्माल्लुलाय त्वयि ॥ ९४ ॥

शृङ्गारमिति । रुचिरं सुन्दरम्, शृङ्गयोर्विषाणयोरयमं दधासि धत्से । अनुदिनं प्रतिदिनं वीरेण वीरनाम्ना गोपालेन संचार्यसे । कृष्यां कर्षणे भूरि अत्यन्तं दयया कृपयाऽन्वितो युक्तः प्रतिभयं भयंकरं, अद्भुतमाश्चर्यपदं हास्यं वहसि दधासि । विकृतं विकटमुद्घोषं ध्वनिं करोषि । बहुधा बहुप्रकारेण रौद्रं क्रूरं मुहुः पुनः पुनः वीक्षसे पश्यसि । सायं सायंकाले दामनि रज्जौ शान्तिभाक् निर्व्यापारः, तस्मात्कारणात् त्वयि नवरसाः शृङ्गारादयः दृश्यन्त इति शेषः । शृङ्गारादिशब्दैः शृङ्गारादयोऽलंकारशास्त्रे प्रसिद्धा नवरसा बोध्याः । तल्लक्षणानि च पूर्वमेवोक्तानि ॥ ९४ ॥

त्वं सद्यस्तनपीडनेन रचयञ्शृङ्गारलीलाश्रुता
न्यापीतैरधरामृतैश्च सरसः संमीलिताक्षः सुखैः ।
आकृष्टः प्रसभं सरोमलनया तापाश्चिरेणातनोः
पत्न्या शिक्यलतेव लुलायाधीश संक्रीडसे ॥ ९५ ॥

स्वभिति । सद्यस्तनं तात्कालिकं यत्पीडनं ताडनं तेन शृङ्गयोर्विषाणयोः अग्राभ्यामग्राभ्यां क्रीडया अनायासेन क्षतानि व्रणानि रचयन्कुर्वन्ना समन्तात्पीतैः पानकर्मीकृतैः सरसः कामारस्वाधरामृतैरन्तर्वर्तिजलैः सुखैरानन्दैश्च संमीलिते मुकुलिते अक्षिणी यस्य सः तथोक्तः । उपरितनजलस्य रविकिरणतप्ततया तत्परित्यज्याधोभागगतशीतलजलपानेन मनोयं प्राप्नोतीत्यर्थः । सरसः सरस्या अमलतया स्वच्छतया अतनोः महतः तापात्सूर्यकिरणदाहात्प्रचुरं बलात्कारेण आकृष्टो नीतः, अर्थात्सरोदेशं प्रतीति शेषम् । हे लुलायाधीश त्वं पद्मिन्या सरस्या सह रसिकाग्रणीरिव रसिकश्रेष्ठ इव संक्रीडसे रमसे । रसिकपक्षे—स्तनयोः कुचयोः पीडनेन मर्दनेन शृङ्गारस्य शृङ्गाररसस्य या लीला विलासः तया क्षतानि नखदन्तक्षतदंशनादिजनितव्रणानि, सद्यस्तस्मिन्नेव क्षणे आ समन्तात्पीतैः अधरस्य दशनच्छदस्यामृतैः रसैः सरसः शृङ्गाररसास्वादविशिष्टः सुखैर्विगलितवेद्यान्तरस्वस्वरूपानन्दानुभवैः ; 'रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतेरिति भावः । सरोमलतया रोमराजिसहितया अतनोः अनङ्गस्य तापाज्ज्वरात्, अर्थान्नरुणेति संबध्यते । प्रभृतमाकृष्टः वशीकृतः पद्मिन्या उत्तमनायिकया । अत्र वात्स्यायनतन्त्रविशे नखदानविधानप्रकरणे (अनङ्गरङ्गे) —'ग्रीवाकरोरुजघनस्तनपृष्ठकक्ष हृद्यार्श्वगण्डविषये नखराः खराः स्युः । माने नवीनसुरते विरहे प्रवासे द्रष्टव्यक्षयेऽथ विरतौ च मदे प्रयोज्याः ॥' तथा —'अव्यक्तरेखं कृतरोमहर्षं समर्पितं गण्डकुचाधरेषु । यत्कर्म संपूर्णनखप्रसूतं विज्ञास्तदेतन्नखरिति वदन्ति ॥' तथा दन्तक्षतप्रकरणेऽपि—'नखप्रदेशेषु रदाः प्रयोज्याः ओष्ठाननान्तर्नयनानि हित्वा । हिङ्कारसीत्कारविशेष उक्तो दन्तार्पणे कामकलाविदग्धैः ॥' एवं चुम्बनप्रकरणेऽपि—'अधराक्षिकपोलमस्तकं वदनान्तः स्तनयुग्मकंधरे । विहितानि पदानि पण्डितैः परिरम्भादनु चुम्बनस्य हि ॥' इति । तथा काव्यप्रकाशेऽपि चुम्बनपरिरम्भणादीनां रसाविर्भावनिमित्तत्वमुक्तम् —'संभोगो विप्रलम्भश्च द्विधा शृङ्गार इष्यते । संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः ॥ तत्राद्यः परस्परावलोकनपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य इति एक एव गण्यते' इति । रसास्वादकानन्दानुभवो युक्तः । तत्रैव 'ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृङ्गारादिको रसः' इति । अतनोस्तापादित्यनेन त्रयस्त्रिंशद्व्यभिचारिभावाः सूचिताः, 'मतिर्व्याधिर्मथोन्मादः' इत्यादिना परिगणितमध्यपातित्वात्तावत्त्व । त्रयस्त्रिंशत्त्वरूपं त्वस्मत्कृतश्लेषार्थचन्द्रिकायां द्रष्टव्यम् । पद्मिन्येत्यत्रापि पद्मिन्यादिलक्षणं वात्स्यायनतन्त्रे—'पद्मिनी चित्रिणी चाथ शङ्खिनी हस्तिनी तथा । क्रमाच्चतुर्धा नारीणां लक्षणानि ब्रुवेऽधुना । पूर्वपूर्वतरास्वासु श्रेष्ठास्तत्तल्लक्षम चक्ष्महे ॥ प्रान्तारक्तकुरङ्गाक्षावतयना पूर्णेन्दुवदनाना पीनोत्तुङ्गकुचा शिरीषमृदुला स्वल्पाशना दक्षिणा । फुल्लाम्भोजसुगन्धिकामललिता लज्जावती मानिनी श्यामा काऽपि सुवर्णचम्पकनिभा देवादिपूजारता ॥ उन्निद्राम्बुजकोशतुल्यमदनच्छत्रा मरालक्षना तन्वी हंसवधूगतिः सुकलितं वेषं सदा बिभ्रती । मध्यं चापि

वलित्रयाङ्कितमयौ शुक्लाम्बराकाङ्क्षिणी सुग्रीवा शुभनाभिकेति गदिता नार्युत्तमा पद्मिनी ॥ इति ॥ ९५ ॥

आशां पुष्यसि योनिपानसलिले यो नाभिमानान्वित
प्रीत्या नित्यपपारलौकिकविधावङ्गीकृतः कैरपि ।
स्वच्छन्दं चरसीह यः किल परक्षेत्रे खलाग्रेसर-
स्तं त्वां हन्त विटाग्रगण्यमधुना जाने महासैरिभ ॥ ९६ ॥

आशामिति । यः निपानसलिले आहावजले, आशामिच्छां पुष्यसि रक्षसि । 'आहावस्तु निपानं स्यात्' इत्यमरः । नाभिमानेन नाभिप्रमाणेनान्वितो युक्तः ; नाभिदघ्न इत्यर्थः । नित्यं सर्वदा प्रीत्या संतोषेण अपारः निरवधिर्यो लौकिकस्य कृष्यादेर्विधिर्व्यापारः तस्मिन् कैरपि केश्चिदेवाङ्गीकृतः स्वीकृतः ; न हि सर्वेऽपि महिषेणैव कर्षन्ति, वृषभेणापि कर्षणसंभवादिति भावः । परेषामन्येषां क्षेत्रे केदारे स्वच्छन्दं स्वेच्छं यथा तथा चरसि भक्षयसि । खलस्य धान्यराशीकरणखलस्य अग्रेसरः प्रमुखः, तं तादृशं त्वां हे महासैरिभ विटाग्रगण्यं जाने मन्ये । विटपक्षे – योनौ उपस्थे यत्पानं पेयं सलिलं तत्राशाम् ; पद्मिन्याः सुगन्धिमदनसलिलत्वेन भगचुम्बनमिच्छतीत्यर्थः । तदुक्तं वात्स्यायनतन्त्रे— 'कक्षायुगं मन्मथमन्दिरं च नाभेश्च मूलं स्मरलोलचित्ताः । चुम्बन्ति लाटा निजदेशसाम्यान्नास्त्यन्यतश्चुम्बनरीतिरेषा ॥' इति । अभिमानेन गर्वेण अभिजात्यादिजनितेनेति भावः । नान्वितः न युक्तः । विटस्याभिजात्यादेरपालनीयत्वादिति भावः । पारलौकिकं परलोकसाधनं ज्योतिष्टोमादिकं कर्म तत्र भवतीस्वपारलौकिकं परस्त्रीसंभोगादि तत्र विधौ व्यापारे कैरपि केश्चिदेवाङ्गीकृतः । परक्षेत्रे परकलत्रे चरसि, खलानां दुष्टानाम् । परस्त्रीसंभोगो वात्स्यायनतन्त्रेऽभिहितः—'नारी चोत्तमयौवनाभिलषितं कान्तं न चेदाप्नुयादुन्मादं मरणं च विन्दति तदा कंदर्पसंमोहिता । संचिन्त्येति समागतां परवधूं रत्यर्थिनीं स्वेच्छया गच्छेत्कापि न सर्वदा सुमतिमानित्याह वात्स्यायनः ॥' इति ॥ तथा च परस्त्रीसंभोगस्य वात्स्यायनसंमतत्वेऽपि सर्वश्रुतिस्मृतिनिषिद्धत्वेन तत्र प्रवर्तमानानां खलत्वं स्पष्टमिति भावः ॥ ९६ ॥

स्वं वाली रमसे रुमामुपगतः प्रौढाङ्गदेहान्वित-
स्तारामैत्रमिह स्फुटं वितनुषे नादैर्जयन्दुन्दुभिम् ।
इत्थं सत्यपि कासरेश्वर नृणामाश्चर्यदश्चर्यया
मातङ्गान्तिक एव निर्भयमहो संचारशीलोऽसि किम् ॥ ९७ ॥

त्वं वालीति । त्वं बालः पुच्छमस्यास्तीति वाली रुमा भूविशेषम् ; 'रुमा स्याद्वणाकरः' इत्यमरः । उपगतः प्राप्तः सन् रमसे क्रीडसे । प्रौढाभि स्थूलानि अङ्गान्यवयवा यस्य तादृशेन देहेन शरीरेणान्वितो युक्तः । तारामैत्रं तारया कनीनिकया मैत्रं समानरूपत्वम् ; 'तारकाऽक्ष्णः कनीनिका' इत्यमरः । वितनुषे करोषि । इह स्फुटं स्पष्टं नादैः शब्दैः दुन्दुभिं वाद्यविशेषं जयन् तिरस्कुर्वन् , इत्थमेवं सत्यपि वालिसाम्येऽपि हे कासरेश्वर चर्यया स्वव्यापारेण नृणां पुरुषाणामाश्चर्यदः अद्भुतरसोत्पादकः । तदेवाह—मातङ्गान्तिक एव चण्डालसमीप एव निर्भयं यथा तथा संचारशीलोऽसि संचरिष्णुस्वभावोऽसि । किं वितर्के । अहो इत्याश्चर्ये । मतङ्गाश्रमे वालिप्रवेशाभावेनेत्यर्थः । वालिपक्षे—रुमां सुग्रीवभार्यां, प्रौढाङ्गस्नेहान्वितः प्रौढा प्रकृष्टा अङ्गदे स्वपुत्रे या ईहा इच्छा तया अन्वितः, तारामैत्रं तारायां स्वभार्यायां मैत्रं स्नेहम् । दुन्दुभिममुरविशेषम् ॥

जिष्णुस्त्वं हि कृशानुभावमयसे श्रीकासरक्ष्मापते
नित्यं किंच सदन्तकोऽसि वपुषि ग्राम्येऽस्ति ते निर्ऋतिः ।
पाशी चासि सदाशुगत्वमयसे सर्वत्र कृष्यादिषु
प्रायो वैश्रवणोच्छ्रयं प्रकटयन्किं च त्वमुग्राकृतिः ॥ ९८ ॥

जिष्णुरिति । हि यस्मात्कारणाज्जिष्णुर्जयशीलः, इन्द्रश्च । कृशानां दरिद्राणामनुभावं संपदमयसे करोषि ; कृशानोर्वह्नेर्भावं बहित्वं च । किं च अपि च श्रीकासरक्ष्मापते नित्यं सर्वदा सन् वर्तमानः अन्तको यमः यस्मिन् स तथोक्तः ; पृष्ठभागोपारूढकृतान्त इत्यर्थः ; अन्यत्र सन् समीचीनः धर्माधर्मव्यवस्थापक इति यावत् ; तादृशश्चासावन्तक इत्यर्थः । ग्राम्ये ग्राकृते ते वपुषि देहे निर्ऋतिः दोषोऽस्ति ; अन्यत्र निर्ऋतौ राक्षसः । पाशी पाशयुक्तः ; रज्ज्वादिना बद्ध इति यावत् ; अन्यत्र वरुणः । सर्वत्र कृष्यादिषु कर्मस्वाशुगत्वं शीघ्रगामित्वमयसे प्राप्नोषि ; अन्यत्र वायुत्वम् । प्रायो वै प्रायेण खलु श्रवणयोः श्रोत्रयोः उच्छ्रयमोन्नत्यं प्रकाशयन् ; कुबेरैश्वर्यमिति च । किं च, त्वमुग्रा क्रूरा आकृतिराकारो यस्य स तथोक्तः ; उग्राकृतिरीश्वराकृतिरिति च । तथा च सर्वादिक्पालकात्मकस्त्वमिति भावः ॥ ९८ ॥

क्षेत्राण्यश्नासि पञ्चलाङ्गलविधौ लब्धाद्रिकृष्णाजिनो
गोदानेषु सहस्रशः प्रतिदिनं पात्रीभवस्यात्मना ।
त्वं ब्रह्माण्डकटाहमश्नासि समुद्घोषेण लब्धा त्वया
काऽपि स्वर्णतुलाऽपि कासरपते दीर्घायुरिच्छामि ते ॥ ९९ ॥

क्षेत्राणीति । पञ्चलाङ्गलविधौ पञ्चलाङ्गलव्यापारे क्षेत्राणि केदारादीनि अञ्जसि प्राप्नोषि । अन्यत्र पञ्चलाङ्गलशास्त्रे क्षेत्राणि केदारादीनि अञ्जसि प्राप्नोषि । पञ्चलाङ्गलविधि-पूर्वकभूदानमिति च । लब्धं प्राप्तमार्द्रं सिक्तं यत्कृष्णं नीलवर्णमाजिनं चर्म स तथोक्तः । आर्द्र-कृष्णाजिनप्रतिग्रहोऽपि प्रतिपाद्यते । सहस्रशः गवां भूमीनां दानेषु खण्डनेषु कृष्यादिषु प्रतिदिनं प्रत्यहम्, आत्मना अन्तःकरणेन पात्रीभवसि पात्रं भवसि । सहस्रगोप्रतिग्रह इति च । समुद्घोषेण सम्यगुद्घोषेण ब्रह्माण्डकटाहमण्डमित्तिमञ्जसि प्राप्नोषि ; अण्डभित्तिव्यापिशब्दं करोषीत्यर्थः । ब्रह्माण्डकटाहप्रतिग्रह इति च । स्वर्णानां हिरण्यानां तुला तोलनमपि लब्धा प्राप्ता । महिषेन्द्रेण कृषिं कुर्वन्तः संपत्तिमुत्तमां प्राप्य सुवर्णतोलनं कुर्वन्तीत्यर्थः । हे कासरपते इत्थं महादानप्रतिग्रहं कुर्वतस्ते तव दीर्घायुः शास्त्रोक्तं दीर्घायुष्यमिच्छामि वाञ्छामि । महादानप्रतिग्रहं कुर्वतस्तवा-पमृत्युप्रसक्त्या तत्परिहारस्य प्रार्थनीयत्वादिति भावः ॥ ९९ ॥

सुग्रीवोऽसि महान्गजोऽसि वपुषा नीलः प्रमाथी तथा
धूम्रश्चासि महानुभाव महिष त्वं दुर्मुखः केसरी ।
इत्थं ते सततं महाकपिशताकारस्य साहाय्यतः
सीतां प्राप्य विलङ्घ्य दुःखजलधिं नन्दामि रामः स्वयम् ॥ १०० ॥

सुग्रीव इति । सुष्ठु ग्रीवा कण्ठो यस्य तथोक्तः ; अन्यत्र सुग्रीवः प्रसिद्धः । वपुषा देहेन महान् स्थूलो गजोऽसि ; स्थौल्ये गजसदृश इत्यर्थः । अन्यत्र गजो गवाश्व इति प्रसिद्धो वानरः । नीलो नीलवर्णः ; अग्नितनयश्च । प्रमाथी प्रहर्ता ; वानरश्च । धूम्रो धूम्रवर्णः ; वानरश्च । हे महानुभाव सर्वश्रेष्ठ महिष त्वं दुर्मुखः विकृतमुखः ; दुर्मुखनामा वानरश्च । केसरा लोमानि यैर्युक्तः ; तन्नामा वानरश्च । इत्थमेवंप्रकारेण महाकपिशताकारस्यानेककपिरूपस्य ते साहाय्यतः उपकारतः सीतां लाङ्गलपद्धतिं प्राप्य ; अन्यत्र जानकीं लब्ध्वेत्यर्थः । दुःखजलधिं दुःखसागरं विलङ्घ्य तीर्त्वा स्वयं रामो रमणशीलः सन् नन्दामि संतुष्यामि ॥ १०० ॥

श्रीमद्गोसलवंशदुग्धजलधेः संपूर्णचन्द्रोपमो
यः शास्ति क्षितिमक्षति क्षितिपतिर्मूर्तेः प्रतापः स्वयम् ।
दीर्घायुर्जितशत्रुरात्मजवृतो धर्मी प्रजारागवा-
ञ्छाघोस्तु स निस्तुलैर्निजसभास्तारैः क्रमादागतैः ॥ १०१ ॥

॥ श्रीः ॥

मायूरक्षेत्रनिवासिभिः ब्रह्मश्री शिवरामकृष्णशास्त्रिभिर्विरचिता

॥ श्रीभागवतचतुःशती ॥

मीमांसारत्नं, ए वि. गोपालाचार्यैः विरचितया व्याख्यया सहिता।

प्रथमः स्कन्धः ॥

चरणं करणं मुक्तेस्तरणं भवसिन्धुमग्नजनानाम्।
शरणं भवताच्छ्रीमद्गुरुचरणानां प्रसन्नहृदयानाम् ॥ १ ॥

अत्र सामान्यरूपेण पूर्वेषां सर्वेषां गुरूणां चरणं शरणीक्रियते, 'एवं गजेन्द्रमुपवर्णितनिर्विशेषम्' इतिवदत्रापि विशेषानिर्देशात्, वैयाकरणेन स्वविद्यागुरोस्तृतीयश्लोके नमस्करिष्यमाणत्वाच्च। 'इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे' इति भवभूतिरुत्तररामचरितारम्भे। भगवानेव भवार्णवमग्नान् जनानुद्धर्तुमाचार्यमूर्तिकां परिगृह्य तद्रूपेणावस्थाय ज्ञानदानेनान्तेवासिनो नैःश्रेयसं गमयतीति सर्वेषां वेदान्तिनां समतः सिद्धान्तः। 'साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम्। मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना॥' इति स्मर्यते। अस्मिन्प्रथमश्लोके आर्षं तद्वचनमनुसृत्य आचार्यचरणशरणीकरणस्य संसारार्णवमग्नतारयितृत्वं मुक्तेः करणत्वं चानुसंधीयते। 'गुर्वर्कलब्धोपनिषत्स्वचक्षुषा ये ते तरन्तीव भवानृताम्बुधिम्' इति ब्रह्मस्तुतिः॥

२ 'विजितहृषीकवायुभिरदान्तमनन्तुरगं य इह यतन्ति यन्तुमतिलोलमुपायखिदः। व्यसनशतान्विताः समवहाय गुरोश्चरणं वणिज इवाज सन्त्यकृतकर्णधरा जलधौ॥' इति श्रुतिगीताश्लोकोऽप्यत्र सिस्मारयिषितः। 'गुरुचरणानाम्'। नात्र बहुत्वे वा पादरूपावयवे वा तात्पर्यम्; गुरोरित्यस्यार्थः। तथा च गुरोश्चरणमिति श्रुतिगीतोक्तमेव गुरुचरणानां चरणमित्यनेनोक्तं भवति। 'अकृतकर्णधरा जलधौ' इति द्योतितं गुरोश्चरणस्य संसारसिन्धुतरणत्वमप्यत्र स्पष्टमुच्यते—'तरण संसारसिन्धुमग्नानाम्' इति। 'उपायखिदः' 'व्यसनशतान्विताः' 'समवहाय' इति अनितरशरणता तदेकशरणता च द्योत्येते तत्र यथाऽऽह। 'अनन्यप्रोक्ते गतिरत्र नास्ति' इति नाचिकेतसं प्रेष्ठेति संबोध्य त प्रति यमो जगौ। गुर्वीश्वरयोरभेदानुसंधानं श्रीमन्मध्वमुनिसंमतम्। तदुक्तं श्रीमज्जयतीर्थभाष्यटीकायां—'स्वस्य गुरुदेवतयोर्भेदेऽरुचिं सूचयति' इति। ३. संचि-

श्लेषयिवितस्य श्रीभागवतस्य आदिगुरुर्भगवान्। 'यो वै वेदांश्च प्रहिणोति तस्मै' इति ब्रह्मणो वेदविभासकः आदिगुरुर्भगवानेव तस्मै श्रीभागवतं विभासयामासेति स्पष्टं गीयते ग्रन्थान्ते—'कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा' इति। आदिगुरुर्भगवानेव तत्तद्गुरुरूपेण पर्यायतोऽवस्थाय जिज्ञासमानान् छात्रानुज्जीवयति। 'जगदुगुरुर्यान जगाद कृष्णः' 'रस्यमासीज्जगद्गुरोः' 'अखिलकलादिगुरुर्ननर्त' इति भागवतप्रसिद्धं भगवतो जगद्गुरुत्वमादिगुरुत्व च। 'तेन ब्रह्महृदा य आदिकवये' इति भागवतादौ 'नमस्तस्मै भगवते वासुदेवाय साक्षिणे। य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे॥' इति तदुपसंहारे च गायन् वेदभागवतयोरेकप्रवक्तृकत्वबोधनेन भागवतस्य वेदसंमितत्वं व्यञ्जयति। ४. बन्धुः सतां बदरिकाश्रमतापसो नरसखो नारायणः, देवो ह्यशीर्षः 'दाक्षिण्यरम्या गिरिशस्य मूर्तिः' 'नटपरिवृढो यस्याधस्ताच्छ्रमं शमयिष्यते' इति श्रीवेङ्कटनाथवर्णितः श्रीदक्षिणामूर्तिः, देवहूतिबालः श्रीकपिलः, श्रीसनत्कुमाराभिन्नश्रीस्कन्दभगवान् इत्याद्या गुरुमूर्तयो बहुशः। एतासां सर्वासां गुरुमूर्तीनां शरणवरणमध्यत्र चतुरं द्योत्यते गुरुचरणानामिति बहुवचनेन। शब्दावृत्त्याऽपेक्षितबहुत्वसूचनमलङ्काराय। आवृत्तिं विनापि शब्दशक्तिध्वनिनैव वा तत्फललाभः। नारदोऽस्य भागवतग्रन्थस्यानुग्राहको गुरुः। नारदश्च सनत्कुमारान्तेवासी। 'तमेनं स्कन्द इत्याचक्षते स्कन्द इत्याचक्षते' इति द्विरुक्ता स्कन्दसंज्ञा तस्मिन्नारदगुरौ। भगवान् सनत्कुमारः स्कन्दत्वेनाविर्बभूवेति यावदधिकारसूत्रभाष्यम्। स्कन्दव्यासादय आचार्यमूर्तयस्तदधिकारभाजः। 'भवप्रवाहोपशमं पदाम्बुजम्' 'चरणं भवच्छिद स्वस्त्ययनं सुमङ्गलम्' इत्यादिकं स्मर्तव्यम्। चरणमित्यत्र जातावेकवचनम्। चरणशब्देनोपक्रमणात् भवच्छित् स्वस्त्ययनं सुमङ्गलमाचरितं भवति संक्षेपारम्भे। 'विष्णोः पदे परमे मध्व उत्स' इति भगवच्चरणस्य मधुस्यन्दित्वं श्रुतिप्रसिद्धम्। भगवच्चरणवरकाव्यस्य मधुमयत्वमाशास्यते ग्रन्थारम्भे। 'सारङ्गाणा पदाम्बुजम्' इति भक्तषट्चरणानां भगवत्पदस्य मधुझरितत्वं निर्धारितम्। ५. 'भगवद्वन्दन स्वाद्यं गुरुवन्दनपूर्वकम्' इति स्मर्यते। गुरुरेव परं ब्रह्म। तन्त्रेण गुरुदेवतयोर्नमस्कारः कृतो भवति। 'मधुराधिपतेरखिलं मधुरम्' इति श्रीवल्लभाचार्याणा भगवन्माधुर्यानुभवः। स्वयं स्वाद्यस्य भगवतो गुरुत्वेन वन्दनं स्वादुतरम्। ६. गुरुचरणानां चरणमित्यन्वयः। चरणानां चरणं गुरुचरणमिति शब्दशक्त्या गुरुचरणस्य चरणानां मध्ये उत्तमत्वं व्यज्यते। 'मङ्गलानां च मंगलं दैवतं दैवताना च' इत्यादाविव निर्धारणे तात्पर्यम्। गुरुपादानामित्युक्ते नैतल्लभ्यते। ७. भागवतप्रथममङ्गलश्लोके, 'धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि' इत्यनुसंहित ज्योतिष्टममत्र निपुण सूच्यते प्रथमपदेनैव 'चरणं पवित्रं वितनं पुराणं येन पूनस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम।' 'ज्योतिष्मद्धाजमानं महस्वत्। अमृतस्य धारा बहुधा दोहमानम्। चरणं नो लोके सुधितां दधातु' इति प्रसिद्धश्रुतिस्मारणेन। चरणपदोपक्रमा सा श्रुतिरत्र जिघ्राहयिषिता ग्रन्थारम्भे चरणशब्दपठनेन॥ भगवच्चरणस्य पाप्मतारणमोक्षामृतधारादोहनादिमहिमा ज्योतिष्मत्ता च सुविस्तरं निरूप्यते श्रीभागवते यथाऽस्यां चरणश्रुतौ। 'ज्योतिश्चरणाभिधानात्' इति ब्रह्मसूत्रे चरणज्योतिषोः

महचरितत्वं, यथाऽन्यां श्रुतौ : इत्थं चरणशब्दोपक्रमेण भागवतप्रथमश्लोकपठितकुहकनिरासकधाम्नः सूचनमभिप्रेयते। अन्यच्च, 'चरण पवित्रम' इति श्रुतिः सदःसु पठ्यते ताम्बूलसमर्पणकाले। सत्रयागसदसि प्रथम पठितं भागवतचरित्रं सूतेन। चरणश्रुतिस्मारणेन भागवताख्यानकथारम्भावसरोऽपि सनपुणं सूच्यते संक्षेपारम्भ एव। ८. नामैकदेशे नामग्रहणमिति न्यायेन रथचरणार्थकनोमज्ञापनेन भागवतगानदेशभूतनैमिशमपि सूच्यते चरणशब्देन। ९. चरणं आचरणं आचारः, गुरुचरणानां चरणं शरणं भवतु। गुरोः सुचरितान्यस्माभिरनुष्ठेयत्वेन वरणीयानि। शरणमुपायः साधनमिति पर्यायाः। गुरुसुचरितानामनुचरणं मे उपायो भवतु। तदेव मुक्तेः कारणं, भवसिन्धोस्तरणम्। 'यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि' 'धर्म चर' इत्याचार्यानुशासनमन्तेवासिनं प्रति। गुर्वाचरितं सुचरितं किं? कस्तदाचरितो धर्मः? 'धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्' इति भागवतारम्भप्रोक्ता भक्तियोगः। अलुब्धा धर्मकामा निर्मत्सरा ब्रह्मविदो गुरवः सन्तः। इत्थं चरणपदेनात्र सग्रहारम्भे, 'धर्मः प्रोज्झितकैतवः' इति भागवतारम्भश्लोकस्यापि सूचनं रस्यम्। १०. चरणं भक्षणम्; भागवतरसफलभक्षणमपि सूच्यते मुक्तिकरणत्वेन। मुमुक्षूणां तत्फलभक्षणं तद्रसपानं शरणम्। इह परत्र चापि निवृत्ततर्षैरपि भक्षणीयमिदं भवौषधम्। इत्थं च निगमकल्पतरुश्लोकोऽप्यनेन स्मार्यते। 'अहमन्नादोऽहमन्नादः' इत्यानन्दघनसामगानं भागवतफलरसपानमप्यन्तर्भावयेत् ११. चरणं वेदशाखा। निगमकल्पतरुशाखारूढशुकाधीतभागवतसंहिता स्वाध्येतृणां मुक्तिप्रदा। 'स संहितां भागवतीम्' 'शुकमध्यापयामास' इत्यादिकमिह भाव्यम्। व्यासगुरुचरणानां चरणं संहिता भागवतम्॥

करणं मुक्तेः। 'साधकतमं करणम्' इति भगवान् पाणिनिः। 'व्यापारवदसाधारणं कारण करणम्' इति नैयायिकाः। गुरुचरणानां चरणं निःसंशयं निरपायं नेदिष्ठं सुलभतमं मुक्तिकारणम्। 'सिद्धिर्भवति वा नेति संशयोऽच्युतसेविनाम्। न संशयोऽत्र तद्भक्तपरिचर्यारतात्मनाम्' इति स्मर्यते। 'कस्तु निःसंशयं कार्यं कुर्यात्प्राज्ञः ससंशयम्' इति हनुमन्मुखेन पृष्टमादिकविना। 'महत्सेवां द्वारमाहुर्विमुक्तेः' इति शुकगानमप्यत्र स्मर्तव्यम्। चरणं करण भवतीत्यौचित्यं शब्दतोऽपि। चस्य कत्वेन विपरिणामः सुलभः। प्रसिद्धश्च 'चोः कुः'। तरणं प्लवः पोतः। तरणस्तारयिता कर्णधारः। 'त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षताम्। कलिं सत्वहरं पुंसां कर्णधार इवार्णवम्॥' इति भागवतप्रवर्तकप्रश्नश्लोकोऽत्र संग्रहप्रथमश्लोके सूच्यत इति रसिकमनोहरम्। त्वत्पादपोतेन इति जगद्गुरुचरणस्य भवार्णवतारकपोतत्वं प्रसिद्धम्। भध्यमणिन्यायेन मुक्तेस्तरणमित्यन्वयेऽपि तरतेः प्राप्त्यर्थाश्रयणेन सुश्लिष्टमेव भवेत्। 'संसारसिन्धुमग्नानां'। 'संस्मरिणां करुणयाऽऽह पुराणगुह्यम्' इति सूतेनोपक्रमोक्तं, 'संसारसर्पदष्ट यो विष्णुरातममूमुचत्' इति तेनोपसंहारोक्तं च प्रत्यभिज्ञाप्येतां संसारपदेन। 'तस्त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम्' इति भागवतश्लोके भगवदङ्घ्रेरुडुपत्वं स्पष्टमगीयत। मग्नानामिति पदेन 'मग्नानुद्धरते' इति श्लोकः स्मार्यते। 'शरणं'। चरणं शरणं भवति। पूर्वार्धादौ निवेशितं चरणपदमुद्देश्यसमर्पकम्। उत्तरार्धादौ निवेशितं शरणपदं विधेयसमर्पकम्। 'शरणं गृहरक्षित्रोः'। शरणं रक्षित्र भवेत्। गृहार्थो-

ऽपि स्वीकार्यः। तत्रैव वसेयम्। 'नित्यं यदीयचरणौ शरणं मदीयम्' इति यामुनस्तोत्रम्। 'भवतात्'। तातङ् आशिषि। मङ्गलाशीः क्रियते प्रथमश्लोके। 'भू सत्तायाम्' इति पाणिनिः स्वधातुपाठग्रन्थस्यादौ मङ्गलं पपाठ। 'सर्वेषामेव भूतानां भावार्थो भवतिः स्मृतः। स एव भगवान्विष्णुः किमतद्वस्तु रूप्यताम्' इति शुकः। अत्र श्लोके न केवलं चरणरूपप्रथमनामपदेन मङ्गलाचरणम्, भवतादिति प्रथमक्रियापदेनापि मङ्गलं विधीयते। शरणं भवतात्। केवलकृपया स्वयं भवतात्। अत्र न स्वातन्त्र्यं रोचयामहे। वत्साय धेनुरिव वात्सल्यनिर्भरतया स्वयं प्रभूतं ज्ञानस्तन्यं प्रस्नुवीत, तेन च अस्मान् शोकस्य पारं तारयतु॥

'श्रीमद्गुरुचरणानाम्'। ब्रह्मनिष्ठारूपा श्रीः श्रीशब्देन विवक्ष्यते। 'सा हि श्रीरमृता सताम्'। मतुपा भूमप्रशंसानित्ययोगा जिघृक्ष्यन्ते। २. श्रीमदिति व्यस्तं वा पृथक्पदं चरणपदान्वयि 'श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना' इति यामुनस्तोत्र इव। ३. श्रिया नित्यसंयुक्तमादिगुरुभगवच्चरणम्। 'श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः' 'सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता' 'विष्णो श्रीरनपायिनी' इत्यादिकं भाव्यम्। 'प्रसन्नहृदयानाम्'। श्रीभागवतश्रवणप्रवचनाभ्यामेव हृदयस्य प्रसन्नत्वलाभः संभावनीय इति भागवतारम्भ एव सुस्पष्टं प्रदर्श्यते। 'येनात्मा सुप्रसीदति' 'ययाऽऽत्मा संप्रसीदति' इतीदमारम्भ एवोच्चैरुद्घुष्यते। भगवतो बादरायणस्य हृदय श्रीभागवतगानात्पूर्वं खिलं अप्रसन्नमासीत्। श्रीनारदनियोगेन भागवतगानानन्तरमेव तत् प्रसादं लेभे। नातिप्रसीदद्धृदयः आसीच्छारीरकनिबन्धापि। 'आत्मप्रसादनी' 'एवं प्रसन्नमनसः' इत्यादिकं भाव्यम्। प्रसन्नहृदयानामितीदं सर्वं चतुरं प्रत्यभिज्ञापयितुम्॥

कलिना बलिना खिलीकृतेऽस्मिन् समये वैदिकधर्मरक्षणाय।
धृतभागवतस्वरूप आद्यः पुरुषो मे हृदयं विशेत्प्रसन्नः॥ २॥

कलिना बलिनेति। गुरुत्वेन प्रथमगुरुर्भगवान्, तद्रूपाः परंपरागताः श्रीभागवतसंप्रदायगुरवश्च नेमिरे प्रथमश्लोके। तच्चरणवन्दनफलत्वेन गुरुर्भगवान् सुप्रसन्नो वरदो भूत्वा संग्रहकर्तुः कवेर्हृदयं प्रविशति। तत्प्रवेशानुभवः कीर्त्यतेऽत्र। 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'गुहां प्रविष्टावात्मानौ' इति यद्यपि प्रागेव हृदयान्तःप्रविष्टो भगवान्, यद्यपि हार्दरूपेण स तत्र सदा संनिहितः; सोऽन्तःप्रवेशः सर्वप्राणिसाधारणः। सुप्रसन्नत्वेन हृदयान्तरवस्थानं, 'मे हृदयं विशेत्प्रसन्नः' इत्यत्र नूतनप्रवेश इव भाव्यते। सृष्ट्यादावपि न मुख्योऽनुप्रवेशः, लाक्षणिक एव बदानीमपि। 'त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे' इति दशमारम्भे वसुदेवोक्तमत्र भाव्यम्। अत्र ग्रन्थारम्भे स्वस्य ध्रुवशिशुवद्भावनाभिज्ञत्वमव्युत्पन्नत्वं चाभिमन्यते संग्रहकर्त्रा। संग्रहकरणव्यापारे ज्ञानशक्त्यादिकं कृत्स्नं भगवतैवानुप्राह्यामित्यनुसन्धीयते आकिञ्चन्यकाष्ठामवलम्ब्य। 'योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना' इति वस्तुतोऽभेदो ध्रुवः

स्तोत्रारम्भे स्तुतिशक्तिप्रदानाय स्वप्रार्थनामनुरुध्य स्वान्तः प्रविशन्तं भगवन्तमनुभवन् तदनुभवमगायत्। अत्र तत्सदृशोऽनुभवः। 'पृथुकवदनशुल्लस्पर्शनीत्या कदाचिच्छिरसि विनिहिताया: स्वेन भूम्ना तवैव। स्तुतिरियमुपजाता मन्मुखेनेत्यधीयुः परिचरणपरास्ते पादुकेऽपास्तदोषाः॥' इति पादुकासहस्रान्ते इत्थमेव ध्रुवशिशुसमाधिरनुसंहिता श्रीवेङ्कटनाथेन। भागवतग्रन्थोऽपि भगवत्स्वरूपम्। संजिघृक्षितस्य भागवतग्रन्थस्य स्वरूपं धरन् भगवान् संग्रहनिबन्धुर्हृदयं प्रविश्य तत्र सुप्रसन्नः सदा संनिहित इति प्रत्यक्षविदितमेवास्माकम्॥

'कलिना बलिना खिलीकृतेऽस्मिन्'। अनेन भागवतगानावसरोऽपि ज्ञाप्यते। 'कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् संगता वयम्' इति भागवतारम्भश्लोकः प्रत्यभिज्ञाप्यते संग्रहारम्भे। खिलशब्देन भागवतगाननिमित्तं सूच्यते। खिलमिवात्मानमशोचद्भगवान् व्यासो भागवतगानात्पूर्वं। 'वैदिकधर्मरक्षणाय'। 'धर्मसंस्थापनार्थाय' इति भगवता गीतं भगवदवतारनिमित्तम्। भागवतावतारेऽपि तत्तुल्यमिति व्यज्यते। खिलीकृते इति धर्मस्य ग्लानिः सूच्यते। तथा चावतारस्य निमित्तान्तरसूचनमपि भवति। कल्यन्ते भगवानेवावतरिष्यति। कल्यारम्भे भागवतरूपेणावततार। कलियुगो भागवतावतारेणोपक्रम्य भगवदवतारेण समाप्तिमुच्छति। कल्यारम्भे धर्मस्य ग्लानौ संजातायां भागवतस्वरूपेण भगवानात्मानमवतारयामास। 'धृतभागवतस्वरूपः'। यद्यपि पूर्वं सर्वप्राणिसाधारणतया भगवदन्तःप्रवेशः सिद्धः, तथापि भागवतस्वरूपविशिष्टवेषेणान्तःप्रवेशोऽनुग्रहेण लाभ्यः। अभ्यात्मदीपो भागवतम्। 'अहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता'। भागवतदीपत्वेनान्तरवस्थाय। 'आद्यः पुरुषः'। 'पूर्वमेवास' इति 'पुरि शेते' इति 'पुरु सनोति' इति च पुरुषः। यद्यप्ययमाद्यः पुरि शयानः पुरुषः पूर्वमेव हृद्यवस्थितः, धृतभागवतस्वरूपः पुनर्मद्धृदयं प्रविशेत्। 'तमेव चाद्यं पुरुषं प्रपद्ये' इति भगवता गीतम्। 'त्वमेक आद्यः पुरुषः सुप्तशक्तिः' इत्यत्र गीयते। वैदिकानां धर्मस्य च रक्षणायेत्यन्वयाश्रयणेन 'परित्राणाय साधूनाम्' इति गीतागीतं निमित्तान्तरमपि संगृह्यते। वैदिकानां रक्षणाय, धर्मस्य रक्षणाय च। हृदयान्तःप्रवेशवर्णने पुरुषपदस्यौचित्यं रस्यम्। 'हृदयं विशेत्प्रसन्नः' इत्यनेन भागवतारम्भे 'सद्यो हृद्यवरुद्ध्यते' इति गीतमपि नानुसंधीयते। श्रीभागवतशुश्रूषामात्रेण तत्क्षणमेव भगवान् हृदये अवरुध्येत, किमुत संग्रहेण तत्प्रविवक्षायामिति कैमुत्यं व्यङ्ग्यम्। 'ईश्वरः सद्यो हृद्यवरुद्ध्यते' इति महामुनिर्वक्तुं प्रभवेत्। वयं तु 'प्रसन्नः स्वयं विशेदित्येव वदाम इत्यपि व्यज्यते। हृद्विशेद्धरिः इति भागवतद्वितीयश्लोकसंग्राहके पंचमश्लोके वक्ष्यते; तद्रहस्यं तत्र प्रदर्शयिष्यामः। भागवतसंग्रहप्रविवक्षायां भगवतः स्वहृदये प्रविविक्षा भवतीति न्याय्यमेव। विवक्षायां सत्यां विविक्षाप्रवेशौ भवतः। 'शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम्। नातिदीर्घेण कालेन भगवान्विशते हृदि॥' इति नारदगीतं सत्याप्यते भगवता। तद्वचनं स्मार्यतेऽत्र॥

यज्ञस्वामिमखीन्द्रांस्तान् सर्वदर्शनपारगान्।
नत्वा विद्यागुरून्कुर्वे श्रीभागवतसंग्रहम्॥ ३॥

'यज्ञस्वामिमखीन्द्रान्'। मखित्वान्मखिश्रेष्ठत्वाच्च तद्ग्रहः। यज्ञस्य स्वामी। स्वामी यजमानो मखी। तान् प्रसिद्धान्। सर्वदर्शनपारगान्। दर्शनं शास्त्रं। भागवतशास्त्रस्यापि पारंगतास्तत्प्रवचनपराः; न केवलमखिनः, य 'वदवादरताः पार्थ नान्यदस्तीति वादिनः' इति भगवता, 'पश्चादभिश्चात्रिशेषात्' इति भगवत्पादश्च निन्दिताः। 'सर्वदर्शनशिरोमणिभूतं वेदान्तदर्शनम्' इत्युक्तं माधवाचार्यैः सर्वदर्शनसंग्रहे। 'अध्यात्मविद्या विद्यानाम्' इति भगवान्। अवगतिरूपदर्शनपर्यवसानं वेदान्तदर्शनम्। 'यस्यावगतिपर्यन्ता दृष्टान्तत्वे प्रतिष्ठिता'। सर्वो भगवान्, तद्दर्शनपारगा इत्यप्यर्थः। तथा च, 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इति भगवद्गीताचार्यलक्षणान्वयः। मखीन्द्राः श्रोत्रियाः। श्रोत्रियं ब्रह्मनिष्ठम्। 'नत्वा विद्यागुरून्'। निरुपपदविद्याशब्दोऽध्यात्मविद्यां गृह्णीयात्। नत्वा कुर्वे इति समभिव्याहारेण गुरुप्रणतेर्भागवतसंग्रहकरणरूपकार्यप्रयोजकत्वं द्योत्यते। श्रीभागवतप्रवचननिरता गुरवः श्रीभागवतप्रवचनकर्मण्यपि ते आचार्याः। 'कुर्वे'। दैनन्दिनमदनुसंधानायायं संग्रहः क्रियते। आत्मप्रयोजनमेव मुख्योद्देश्यमित्यमरपादिनो धातोरात्मनेपदवरणेन व्यज्यते। स्वानुभवमात्राय रचितोऽयं संग्रहः। परविदुत्प्रयोजनायेति न मदभिमानः। 'ईक्षन्तामिच्छया सन्तः क्षमन्तां मम साहसम्। मया हि स्वीयबोधाय क्रियते न हि सर्वतः॥' इति श्रीधरमुनिभिर्द्वितीयस्कन्धान्ते प्रदर्शितो विनयमार्गोऽनुगम्यते। सम्यग्गृह्यतानेन भागवतभावः इति भागवतसंग्रहः॥

यतो जन्मादि जगतो यत् ज्ञातृ ज्ञानदं विधेः।
यस्मिन्नारोप्यते सर्गस्तद्ध्यायामि परं महः॥ ४॥

'यतो जन्मादि जगतः'। श्रीभागवतमङ्गलश्लोकत्रयं प्रत्येकमेकैकेनात्र संगृह्यते। यद्यप्ययं संग्रहग्रन्थः, मङ्गलविषये संग्रहरूपसंकोचो न न्याय्यः। एकैको मूलमङ्गलश्लोकः शक्यतोऽर्थतश्च पृथक्श्लोकैः संगृह्यते, मङ्गलविषये कात्स्न्यंप्रदर्शनं न्याय्यमिति हृदयम्। मङ्गलाचरणे को वा संग्रहरूपात्मतां सहेत। श्रीमद्रामायणसंक्षेपशतश्लोक्यां मूलदृष्टफलश्रुतिश्लोकाः प्रायशस्तथैव पठ्यन्ते। फले सङ्कोचो न न्याय्यः। फलकात्स्न्यमेव लिप्सेरन् जनाः। फलविषये रामायणसंक्षेपप्रदर्शितो मार्गो मङ्गलविषयेऽनुगम्यते; 'शान्तिः शान्तिः शान्तिः' इति मंगलपाठे त्रित्वादरणं वैदिको मार्गः। मूलग्रन्थे आहृतत्रित्वसख्या संग्रहेऽप्यादृयते। यत इति भगवत्परामर्शो ध्रुवं माङ्गलिको भवेत्। 'यत् तत् पदमनुत्तमं' इति यच्छब्दो भगवत्सहस्रनामसु पठितः। जन्म जगतः कार्यस्य। न तस्य माङ्गलिकत्वनैयत्यं। यतःशब्दपरामृष्टा 'यतो वा' इति श्रुतिरपि मङ्गलब्रह्मनिर्देशेनोपक्रमे। जन्माद्यस्य यतः इति मूलग्रन्थे जन्मशब्देन ग्रन्थारम्भः कृतः। मूलपरामृष्टश्रुतिरातिरात्रानुस्रियते। यतो येन यदिति श्रुतेः। यतो यः यत् यत्र तत्सत्यं परं धीमहीति श्रीशुकः। अस्मिन श्लोके यतो यत यस्मिन इत्येकरूप्येण क्लीबपठनम्। सर्वत्र विधेयं क्लीबमेव। यः इति मध्ये शुकः। अभिज्ञः स्वराडादिकवये ब्रह्म हृदा तेने। अत्र पुंस्त्वस्यापेक्षा स्वरसा। सर्वथा मुनिः स्वतन्त्रो न वैरूप्यादि चोद्याद्विभियात्। अत्र क्लीबमेवाद्रियते सर्वत्र, श्रुत्यनुरोधेन विधेयानुरोधेन च। 'यत् ज्ञातृ' इत्यभिज्ञः स्वरा-

द्वित्युभयोः संग्रहः क्रियते। 'स्वेनैव राजते यस्तं स्वतःसिद्धविज्ञानमित्यर्थः' इति श्रीधरमुनयः। 'ज्ञातृ' इत्येतन्मूलश्लोकपदद्वयसंग्राहकं। 'ज्ञानदं विधेः'। ज्ञानशब्दो वेदतदर्थवाची। अर्थज्ञानपर्यन्तं वेदज्ञानमिति बोधनायात्र ज्ञानशब्दप्रयोगः। विधिर्ज्ञानदं। वेदशब्दज्ञानं विना न विधेः स्रष्टृत्वसंभवः। 'वेदशब्देभ्य एवादौ' इति विधेर्विधानरूपा सृष्टिः। विधीयत इति विधिः, विधत्ते इति विधिः। कर्तरि कर्मणि च व्युत्पन्नो विधिशब्दः। विधेरिति शब्दस्याऽऽवृत्त्या विधातुर्विधिरूपसृष्टिहेतोरित्यर्थद्वयलाभः। विधेरिति स्रष्टुः स्वयं भगवत्सृष्टृत्वमपि गम्यते कर्मण्युत्पत्त्या। तथा च 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति मूलश्लोकपरामृष्टश्रुत्यैकार्थ्यं लभ्यते संग्रहश्लोकस्य। यस्मिन्नारोप्यते सर्गः। यत्र त्रिसर्गो मृषा इति मूलवाक्यस्यार्थः संगृह्यतेऽनेन। अध्यारोपापवादयोरत्रारोपः। 'धाम्ना स्वेन सदा निरस्तकुहकं' इत्यपवादः उक्तो मूलश्लोकतृतीयपादे परमप्राप्त्युत्तरीयबोधनाय। तत् व्याख्यामि। धीमहीति गायत्र्या समारम्भाय बहुवचनप्रयोगः कृतो मूलश्लोके। अत्र बहुवचनमेकत्वेन संगृह्यत इव। पूजाया बहुवचनमिति बहुवचनगम्यपूजायामरुचिर्न्याय्या। 'परं महः'। परशब्दो मूलस्थसत्यशब्दस्याप्युपलक्षकः। 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥' इति ऋचि सत्यपरशब्दौ सहपठितौ। महो भर्गः। भर्गस्तेजः समाख्यातं। महसो भर्गस्य तेजस्त्वकीर्तनेन गायत्र्यैकवाक्यं सूच्यते॥ ४॥

यत्र भागवतो धर्मः प्रोच्यते ब्रह्म चामलम्।
यत्कर्ताऽऽदौ वासुदेवो यच्छ्रुतेर्हृद्विशेद्धरिः॥ ५॥

पूर्वश्लोकेन प्रथममङ्गलश्लोकः संगृहीतः। अनेन द्वितीयमङ्गलश्लोकः संगृह्यते। 'कृत भागवतस्वरूप आद्यः' इति भागवतस्य भगवत्स्वरूपत्वमुक्तम्। भगवदपेक्षयाऽपि तत्स्वरूपभूते भागवते भूयानादरः प्रदर्शितः शुकेन तद्विषये मङ्गलश्लोकद्वयकरणेन। तद्विषयश्लोकद्वयस्यात्रैकवाक्यीकृतश्लोकद्वयेन संग्रहः। 'यत्र भागवतो धर्मः प्रोच्यते'। भागवतधर्मप्रवचनाद्भागवतसंज्ञेति व्यज्यतेऽनेन लक्षणवाक्येन। 'किं वा भागवता धर्मा न प्रायेण निरूपिताः। प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः' इति याऽपूर्णताऽऽसीद्व्यासे भागवतरचनात्पूर्वं सा निवर्तिता भागवतधर्मवर्णकभागवतग्रथनेन। धर्मः प्रोज्झितकैतवो भागवतधर्मः। निरस्तकुहकमिति गीतं मूले प्रथमश्लोकचतुर्थपादे। 'धर्मः प्रोज्झितकैतवः' इति मूले द्वितीयश्लोकः प्रारभ्यते। कैतवद्विड् मुनिः। प्रोच्यते प्रकर्षेण विस्तरश ऐदंपर्येणोच्यते। 'ब्रह्म चामल'। अमलपदेन 'भवताऽनुदितप्रायं यशो भगवतोऽमलम्' इति नारदवचनं स्मार्यते। 'यत्कर्ताऽऽदौ वासुदेवः'। 'नमस्तस्मै भगवते वासुदेवाय वेधसे। य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे' 'पपृच्छानमयं सौम्या यन्मुखाम्बुरुहासवं। एतदेवात्मभू राजन्नारदाय विपृच्छते। वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः' इत्यादिकं स्मार्यते। यच्छ्रुतेर्हृद्विशेद्धरिः। 'सद्यो हृदवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्' इत्यस्य संग्रहः। 'शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितं। नातिदीर्घेण कालेन

भगवान् विशते हृदि' इति द्वितीयाष्टमाध्यायश्लोकोऽप्यत्र भाव्यः। 'प्रविष्ट कर्णरन्ध्रेण स्वानां भावसरोरुहम्' इति तदनन्तरश्लोकार्थोऽप्यत्र विवक्षितः। श्रुतेः श्रवणेन्द्रियादित्यर्थः। प्रथमं श्रवणं प्रविश्य ततो हृदि प्रविशेदित्यर्थः। श्रुतिवातनीतं श्रुतिवातेन श्रुतिं कर्णं नीयते, कर्णरन्ध्राद्धृदयं प्रविशति, अयं प्रवेशक्रमः ॥ ५ ॥

तद्वेदकल्पकतरोः प्रादुर्भूतं रसात्मकम् ।
फलं पिबत हे मर्त्याः शुकास्वादितमद्भुतम् ॥ ६ ॥

तद्वेदेति। तत्फलं असेयमाहिमवत्त्वेन प्रसिद्धं भागवताख्यं फलम्। 'वेदकल्पकतरोः प्रादुर्भूतं'। कल्पकतरुः कांक्षितानि लोकत्रयाणि फलानि कल्पयितुं दातुं प्रभवति। इदं फलं न वेदकल्पकतरुणा कल्पितम्; किं तु तत्तरोः प्रादुर्भूतं, वेदवान्नत्यसिद्धमिति रसोऽनुभाव्यः। निगमकल्पतरोर्गलितमिति मूलश्लोकस्थायं भाव इति व्यज्यते प्रादुर्भूतमिति पदेन। सामान्यकल्पतरुव्यतिरेकोऽपि ध्वन्यते प्रादुर्भूतमिति। तर्वग्रादधोगलनमद्भुतार एव। रसात्मक फलं। अजामनन्तरं कृत्स्नं रसघनं भागवतरूपफलं भगवत्स्वरूपवदिति व्यज्यते। फलस्य रसात्मकत्वात्पानयोग्यत्वमिति मूलभावो व्यज्यते। 'रसो वै सः' इति श्रुतिमनुसृत्य भागवतमपि रसशब्देन व्यपदिशन्नृषिर्भगवानिव भागवतमपि रसशब्दव्यपदेशार्हमिति व्यञ्जयामासेत्यत्र द्योत्यते। रसो वै तद्भागवतम् ब्रह्मरसात्मक इति गीतमवधेयं। किं च, रसात्मकत्वाद्भागवतं भगवानेव 'श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि' इति पाद्मोक्तेः। एवं च भागवतं भगवद्रूपेण पूज्यमित्यपि ध्वन्यम्। 'पिबत हे मर्त्याः'। मर्त्यानामेतद्रसपानेनामर्त्यत्वं भविष्यतीति व्यज्यते संबुद्धया। अमर्त्या इत्यपि पदविभागः। मर्त्या अमर्त्या भवन्ति। अहो भुवि भावुकाः मर्त्यलोकस्थाः। 'पिबत'। सार्वकालिकत्वे लोट्। आलयं आप्रयाणात् भंतम्। अद्भुतम् अहो इत्यस्य भावः। भगवदवतारसमये गीतं 'तमद्भुतम्' इति। भगवदवतारवद्भागवतावतारोऽप्यद्भुत इति भावो व्यज्यतेऽद्भुतपदेन। शुकास्वादितं। प्राक् स्वयं रसोऽपि शुकचर्वितचर्वणेन रसवत्तरो भवति ॥ ६ ॥

नैमिशे शास्त्रसारादीन्पृष्टः सूतो महर्षिभिः ।
शुकाचार्यरमेशादीन्प्रणम्य मुदितोऽब्रवीत् ॥ ७ ॥

नैमिशे। 'नैमिशेऽनिमिषक्षेत्रे' इति भागवतारम्भवदेव संग्रहोऽप्यारभ्यते। शास्त्रसारादीन्पृष्टः। अत्र 'यः सारं समुद्धृत्य मनीषया' 'अखिलश्रुतिसारमेक पुराणम्' इत्यादिकं स्मार्यते। शास्त्रं वेदः, यथा— शास्त्रयोनित्वादिति सूत्रे। शास्त्रसारोऽखिलश्रुतिसारः। इत्थं च निगमकल्पतरोः सारभूत रसमयं फलं भागवतम्। शास्त्रसारमिति भागवतस्य गौण नाम। 'सर्ववेदेतिहासानां सारं सारं समुद्धृतम्' इत्युक्तमनुसृत्य शास्त्रेत्यादेतिहासस्याप्यन्तर्भावेन। आदिपदेन 'हर-

The Journal
OF THE
Sri Sankaragurukulam
Srirangam

VOL. V. NO. 18

VALMIKI AND VANARAS

By R Narayana Aiyar, I. C. S. (Retd.)

We are too apt to regard the poet's tale of monkeys' doings as a farrage of nonsense *Juvenal* setting out the subjects of his '*Satirae*' (Satires) says:—

"Quicquid agunt homines, votum, timor, ira, voluptas,
Gaudia, discursus, nostri est farrago libelli." i. 85-6

'Whatever men engage in, their wild desires, fears, rage, pleasures, joys, and varied pursuits form the motley subject of my book.' So intimately does *Valmiki* seem to know *Vanara* nature, and with such innate affection and understanding sympathy does he realise and portray it, that we might substitute 'pitheci' (apes) for 'homines' (men) in the Roman poet's lines and apply them to the Adikavi.

At our very first introduction to the monkey-world the poet gives us this picture:—

[1]सद्विग्नहृदयः सर्वा दिशः समवलोकयन्। न व्यतिष्ठत कस्मिंश्चिद्देशे वानरपुङ्गवः॥

---

1. The references are to T. R. Krishnacharya's Edition (Kumbakonam).

नैव चक्रे मनः स्थाने वीक्षमाणो महाबलौ । कपेः परमभीतस्य चित्तं व्यवससाद ह ॥
(4. 2. 2-3)

and exclaims by the mouth of Hanuman—

अहो शाखामृगत्वं ते व्यक्तमेव प्लवङ्गम । लघुचित्ततयाऽऽत्मानं न स्थापयसि यो मतौ ॥
(4. 2. 17)

Hanuman could take this liberty with his chief—

सुग्रीवेण समं त्वस्य अद्वैधं छिद्रवर्जितम् । आबाल्यं लक्ष्यमभवदनिलस्याग्निना यथा ॥
(7 36 43)

They had made mud pies together, [1]chummed together, and probably sat together at the feet of Acharya Jambavan[2]

Monkeys go about in troops, or as the Tamil saying is, 'குரங்கு எல்லாம் கூட்டம் கூட்டமாக இருக்கும்'; 'முசு குவாலெடுத்தாறபோலே'

So the poet tells us that when they went in search of Sita—

विचित्य दिवसं सर्वे सीताधिगमने धृताः । समायान्ति स्म मेदिन्यां निशाकालेषु वानराः ॥
[मेदिन्यां सर्वसंमतिविषयीभूतभूमौ । समायान्ति सङ्घीभूय प्राप्नुवन्ति][3] (4. 47. 4)

Again,

ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः । एकान्ते वृक्षमूले तु निषेदुर्दीनमानसाः ॥
[समागताः संघीभूताः] (4. 48. 23).

Also तत्र वायुसुतः सर्वं विचिनोति स्म पर्वतम् । परस्परेण हनुमानन्योन्यस्याविदूरतः ॥
[अन्योन्यस्याविदूरतः परस्परेण संगमव्य सर्वं पर्वतं विचिनोति स्मेति संबन्धः ।] (4. 50. 5)

Indeed it was on account of this gregarious instinct that Angada, the leader of the party, and Jambavan, and Hanuman never thought of splitting their company up into sections, though that would have enabled them to search the extensive South more speedily and, if that was otherwise possible, to send a contingent headed by Hanuman across to Lanka. Sugriva evidently meant each party to be an *indivisible* unit, for once they got separated, the monkeys instead of looking for Sita would be running hither and thither in search of one another!

Closely connected with this animal instinct is the instinct blindly to follow the leader. Hanuman espies the ऋक्षबिल and says there must be water inside that cave.

---

1. *Cf.* 'सहपांसुक्रीडनतया सहसंवृद्धतया च सर्वविस्रम्भस्थान द्वितीयमिव हृदयं...'
Kadambari (Peterson), 1. p, 76.

2. *Cf.* 'वत्स सुग्रीव, अथ ब्रह्मपुत्रादाचार्याज्जाम्बवतोऽधीतधर्मपारायणवचनेन कीदृशस्त्वया मैत्रीधर्म आगमितः ।
Mahaviracharitam, V 58-59.

3. The commentaries are Govindarajiya.

All the monkeys *repeat what he says* and at once enter the cave without further thought— इत्युक्त्वा तद्बिलं सर्वे विविशुस्तिमिरावृतम् । (4. 50. 17.)

इत्युक्त्वेति हनुमदुक्तप्रकारेण सर्वेऽप्युक्त्वा विविशुः ।

Again, विवेश चाङ्गदो भूमौ रुदन्दर्भेषु दुर्मनाः ॥ (4. 55. 16)

His lieutenants at once followed suit—

मतं तद्वालिपुत्रस्य विज्ञाय प्लवगर्षभाः । उपस्पृश्योदकं तत्र प्राङ्मुखाः समुपाविशन् ॥

दक्षिणाग्रेषु दर्भेषु उदक्तीरं समाश्रिताः । मुमूर्षवो हरिश्रेष्ठा एतदभ्यमिति स्म ह ॥ (4, 55, 19,20)

प्रायोपवेश might all be known to Angada 'बुद्ध्या ह्यष्टाङ्गया युक्त' 'बृहस्पतिसमं बुद्ध्या' as Hanuman spoke of him, (4. 54. 2 4), and to the great leaders, but what did the average monkey know about it ? For him it was enough that his leaders spread the darbha grass pointing to the south, sipped water and sat down facing east. His mimicking instinct at once came into play and he squatted down in the same way determined to perish from hunger ! (4. 55. 18)

Only a little while before, when Tara advised that Svayamprabha's Cave offered a safe asylum from Sugriva, the monkeys with one voice had acclaimed it and had implored Angada to adopt some such means by which their lives could be saved!

श्रुत्वाऽङ्गदस्यापि वचोऽनुकूलमूचुश्च सर्वे हरयः प्रतीताः ।
यथा न हिंस्येम तथा विधानमसक्तमद्यैव विधीयतां नः ॥ (4. 53. 42)

The true companion-picture to the scene of the प्रायोपवेश at the foot of Vindhya on the shore of the southern sea— दक्षिणस्योदधेस्तीरे विन्ध्योऽयमिति निश्चयः ॥ (4. 60. 7) is that other scene of the एकपादतपस् at the foot of Mahendra which Jambavan vowed that all the monkeys as well as the bears should practise till Hanuman returned from his mission, using a striking phrase to express the fine sentiment:—

स्थास्यामश्चैकपादेन यावदागमनं तव । त्वद्गतानि च सर्वेषां जीवितानि वनौकसाम् ॥ (4, 67. 36)

Cf. ये तु तत्रोत्तरे तीरे समुद्रस्य महाबलाः । पूर्वं संविष्टिताः शूरा वायुपुत्रादिदृक्षवः ॥ (5, 57, 18)

To Jambavan and his plantigrade tribe such a posture came easily enough ; the monkeys, we must suppose, reconciled themselves to it because their souls having departed with Hanuman their bodies would scarcely feel the strain!

Of the monkeys' valour it is unnecessary to speak, but it depended entirely upon who led them into battle. When Akampana, making a sortie from the West Gate of the beleaguered city which was guarded by Indrajit himself, poured his

shafts on the Vanara host the monkeys could not stand the hail of missiles and turned tail both captains and the rank and file Presently when Hanuman turned up and they saw him stand up to that redoubtable warrior, they grew bold and rallied round the leader—

अवस्थितं हनूमन्तं ते दृष्ट्वा हरियूथपाः । बभूवुर्बलवन्तो हि बलवन्तं समाश्रिताः ॥ (6.56.10,)

When properly led, the monkeys made great slaughter with rocks and trees, not to mention nails and teeth, fists and knees 'दंष्ट्रायुधाश्चैव नखायुधाश्च' (6. 14.3) said Vibhishaa to Ravana, as much as to say 'you, my dear brother, with your boasted score of arms, can wield only one weapon at a time, but Rama's allies can employ two at once and will tear your men to pieces literally with tooth and nail. Vibhishana spoke better than he knew; ere long his words received this gory illustration—

ततः कराग्रैः सहसा समेत्य राजा हरीणाममरेन्द्रशत्रुम् ।
खरैश्च कर्णौ दशनैश्च नासां ददंश पार्श्वेषु च कुम्भकर्णम् ॥ (6. 67. 87)

—upon which incident there is this piquant comment by Bhavabhuti—

एतन्निरीक्ष्य निपपात च कुम्भकर्णः सुग्रीवमुग्रतरविद्रुतिरग्रहीच्च ।
उन्मोच्य सोऽपि निपुणः स्वमसुष्य नासां लज्जां स्वसुश्च युगपत्किल निश्चकर्त ॥[1]
(Mahaviracharitam, 6. 46)

Sita realised the use of these peculiarly simian weapons when she described the monkey warriors who were coming to her rescue—

वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति । मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः ॥ (5. 36. 25)

Nails and teeth however were of little avail till the monkeys came to close grips with the enemy. Against Rakshasas skilled in the use of missiles their natural weapons were rocks and trees. Their Book of Genesis (I. xvii) specifically states that the Vanaras who were generated for the assistance of Rama were endowed at birth with the use of rocks and trees in warfare—

शिलाप्रहरणाः सर्वे सर्वे पादपयोधिनः । (I 17. 25)

Hence we have Hanuman's famous proclamation—

न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् । शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ (5. 42 35)

To Rama's taunt that an unarmed monkey like Valin was hardly a foeman worthy of his steel, Bhavabhuti makes the monkey lord return this answer—

---

1. cf. कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः । Raghuvamsa 12. 80

ज्ञाता एव वयं जगत्सु चरितैर्वाग्भिः किमाख्यायते
संयत्तो भव सत्यमस्ति भवतः सत्यं मनुष्यो भवान् ।
शक्यैरव्यवधीयमानविजयाः प्राप्तो वयं लेपु चे-
द्राहन्ते सुखमाश्वसन्ति गिरयो यैर्वानराः शत्रिणः ॥ (Mahaviracharitam, 5 51)

Trees being their habitat were the weapons readiest to their hand; their deftness in uprooting them and their proficiency in hurling them were something *sui generis*. When Akampana was dealing death and destruction among the demoralised Vanara forces, Hanuman pulled up a gigantic asvakarna tree and rushed into the Rakshasa ranks swinging it in the manner of an Indian club and laid them low like ripe corn Uprooting a second tree he brought it down upon the head of the 'unshakeable' general and reaped eternal glory (6. 56. 29, 30)

Next only to the giants of the forest, rocks and stones were the Vanaras' handiest missiles. As in ancient Greece and Troy, so in Dandaka and in Lanka, these were "parked" in inexhaustible magazines Allowance being made for the scale of Valmiki's canvas in his battle-pieces, his descriptions of the launching of broken rocks by the monkeys at their light-armed foes recall passages in the Iliad where Ajax or Hector or Tydides hurled huge 'splinting-jagged' stones "such as" says Homer, "twice five men in our degenerate days could barely lift." Like the 'chermadion', the war-stone in Homer, the शिला or crag in Valmiki was a good brainer and crushed the foe utterly. Compare for instance the fate of the great Dioies at the hands of Pirus with that of Mahodara at the hands of Neela (Iliad iv. 518; Ramayana, 6. 70. 31, 32)

When the Poet says that the great monkey chiefs were born सर्वे सर्वास्त्रकोविदाः (1, 17, 25) all well-versed in the use of missiles, we are to except archery, as barring Valin, no monkey ever shot with bow and arrow; and if Valin used a bow to discharge his winged dart at the seven sal trees, it must have been by way of sport ; more probably he threw the dart with the hand. With regard to other artificial weapons, we are to understand, not that the Vanaras went to war armed with them, but that when they had occasion to employ them proficiency in their use simply came to them as a matter of gift and not as a result of practice. Thanks to this dispensation time and again Rakshasa heroes found it to their cost to go into the fray armed with sword or spear, club or mace; they met with their destruction at the hands of the Vanaras with their own weapons. Hanuman snatched the sword from Trisiras's hand and seizing him by the crown severed his three heads with one sweep of his own weapon, even as Indra had the three heads of Visvarupacharya

parted from the trunk with one stroke of the woodman's axe (6, 70. 47). Rishabha made an end of Mahaparsva with the latter's own mace (6. 70, 66). One of Angada's earliest exploits was to kill Vajradamshtra with the latter's own sword (6. 54. 35). Sugriva fighting with Mahodara picked up any serviceable weapon that lay in the field and showed equal dexterity wielding the 'musala', whirling the 'parigha', or plying the 'khadga'. Both cambatants, says the Poet, were शस्त्रविशारदौ (6, 98, 29) skilled in the use of arms. In the last round, which was fought by them with sword and buckler, the lord of the monkeys though lacking training and experience was more than a match for the seasoned soldier. As they moved round each other thrusting and parrying, Mahodara made a slip and stuck his poniard into the adversary's buckler instead of his body --

स तु शूरो महावेगो वीर्यश्लाघी महोदरः । महाचर्मणि तं खड्गं पातयामास दुर्मतिः ॥
(6, 98, 31)

Attempting to retrieve it he was promptly decapitated by Sugriva with the sword in his hand.

By सर्वास्त्रकोविदाः we are further to understand, with Govindaraja, that by reason of their divine descent the Vanara lords knew the properties of the different astras and when to oppose them and when to submit to them. Hanuman knew that it was in vain to struggle against the Brahmastra with which sagacious Indrajit had restrained him—

न मेऽस्य बन्धस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात् ।
इत्येव मत्वा विहितोऽस्त्रबन्धो मयाऽऽत्मयोनेरनुवर्तितव्यः ॥ (5. 48. 42)

Ravana, less astute than his son, discharged the Agneyastra against Neela thinking to calcine that brilliant Vanara commander in chief, heedless for the moment of Sardoola's words—

पुत्रो हुतवहस्याथ नीलः सेनापतिः स्वयम् । (6. 30. 25).

The flaming parental dart just caressed Neela to sleep, and he knew that he would rise with the greater splendour—

पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा । जानुभ्यामपतद्भूमौ न च प्राणैर्व्ययुज्यत ॥
(6. 59. 90)

When a monkey hero was pounded by his adversary he did not sag to the ground but dropped down on his crooked knees as Neela did—the posture from which he could most easily resume his fight ;

Cf. व्रणैः साम्रैरशोभेतां पुष्पिताविव किंशुकौ । युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ ॥
(6. 54. 33)

So when the fierce son of Tydeus struck Aeneas with a huge chermadion, the Trojan hero smitten literally hip and thigh.

"Sunk on his knees, and staggering with his pains,
His falling bulk his bended arm sustains." (Pope's Iliad, v. 379)

Of the unreasoning fears of the monkeys the Poet gives us many instances in the war. One instance which at once exhibits their characteristic credulity and their absurd cowardice will suffice. When Kumbhakarna made his appearance on the battle-field the monkeys scuttled in all directions—

